नमो नमो निम्मल दंसणस्स

पंचम गणधर श्री सुधर्मास्वामिने नमः

१५ प्रज्ञापनाउपाङ्गसूत्रम्-१

(सटीकं)

चतुर्थम् उपाङ्गम्-१

(श्यामाचार्य संकलितं मूलसूत्रम् + मलयगिरिआचार्य विरचिता वृत्तिः)

वृ.

॥१॥ जयति नमदमरमुकुटप्रतिबिम्बच्छद्मविहितबहुरूपः ।
उद्धर्तुमिव समस्तं विश्वं भवपङ्कतो वीरः ॥

॥२॥ जिनवचनामृतजलधिं वन्दे यद्बिन्दुमात्रमादाय ।
अभवन्नूनं सत्त्वा जन्मजराव्याधिपरिहीणाः ॥

॥३॥ प्रणमत गुरुपदपङ्कजमधरीकृतकामधेनुकल्पलतम् ।
यदुपास्तिवशान्निरुपममश्नुवते ब्रह्म तनुभाजः ॥

॥४॥ जडमतिरपि गुरुचरणोपास्तिसमुद्भूतविपुलमतिविभवः ।
समयानुसारतोऽहं विदधे प्रज्ञापनाविवृतिम् ॥

अथ प्रज्ञापनेति कः शब्दार्थः ?, उच्यते, प्रकर्षेण–निःशेषकुतीर्थितीर्थकरासाध्येन यथावस्थितस्वरूपनिरूपणलक्षणेन ज्ञाप्यन्ते–शिष्यबुद्धावारोप्यन्ते जीवाजीवादयः पदार्था अनयेति प्रज्ञापना, इयं च समवायाख्यस्य चतुर्थाङ्गस्योपाङ्गं, तदुक्तार्थप्रतिपादनात्, उक्तप्रतिपादनमनर्थकमिति चेत्, न, उक्तानामपि विस्तरेणाभिधानस्य मन्दमतिविनेयजनानुग्रहार्थतया सार्थकत्वात् । इदञ्चोपाङ्गमपि प्रायः सकलजीवाजीवादिपदार्थशासनात् शास्त्रं, शास्त्रस्य चादौ प्रेक्षावतां प्रवृत्त्यर्थमवश्यं प्रयोजनादित्रितयं मङ्गलं च वक्तव्यम्, उक्तं च–

॥१॥ "प्रेक्षावतां प्रवृत्त्यर्थं, फलादित्रितयं स्फुटम् ।
मङ्गलं चैव शास्त्रादौ, वाच्यमिष्टार्थसिद्धये ॥" इति

तत्र प्रयोजनं द्विधा–परमपरं च, पुनरेकैकं द्विधा–कर्तृगतं श्रोतृगतं च, तत्र द्रव्यास्तिकनयमतपर्यालोचनायामागमस्य नित्यत्वात् कर्तुरभाव एव, तथाचोक्तम्–

"एषा द्वादशाङ्गी न कदाचिन्नासीत् न कदाचिन्न भवति न कदाचिन्न भविष्यति, ध्रुवा नित्या शाश्वती" त्यादि, पर्यायास्तिकनयमतपर्यालोचनायां चानित्यत्वादवश्यंभावी तत्सद्भावः, तत्त्वपर्यालोचनायां तु सूत्रार्थोभयरूपत्वादागमस्याथपिक्षया नित्यत्वात् सूत्रापेक्षया चानित्यत्वात् कथञ्चित् कर्तृसिद्धिः, तत्र सूत्रकर्तुरनन्तरं प्रयोजनं सत्त्वानुग्रहः परम्परं त्वपवर्गप्राप्तिः, उक्तं च–

॥१॥ "सर्वज्ञोक्तोपदेशेन, यः सत्त्वानामनुग्रहम् ।
करोति दुःखतप्तानां, स प्राप्नोत्यचिराच्छिवम् ॥"

तदर्थप्रतिपादकस्यार्हतः किं प्रयोजनमिति चेत्, न किञ्चित्, कृतकृत्यत्वात्, प्रयोजनमन्तरेणार्थप्रतिपादनप्रयासो निरर्थक इति चत्, न, तस्य तीर्थकरनामकर्मविपाकोदयप्रभवत्वात्, उक्तं च– "तं च कहं वेइज्जइ?, अगिलाए धम्म देसणाए उ" श्रोतृणामनन्तरं प्रयोजनं विवक्षिताध्ययनार्थपरिज्ञानं, परम्परं तु निःश्रेयसावाप्तिः, ते हि विवक्षितमध्ययनमर्थतः सम्यगवगम्य संसाराद्विरज्यन्ते, विरक्ताश्च सन्तः संसाराद्विनिर्जिगमिषवः संयमाध्वनि यथाऽऽगमं सम्यक् प्रवृत्तिमातन्वते, प्रवृत्तानां च संयमप्रकर्षवशत उपजायते सकलकर्मक्षयान्निःश्रेयसावाप्तिरिति, उक्तं च–

॥ १ ॥ "सम्यग्भावपरिज्ञानाद्विरक्ता भवतो जनाः ।
क्रियाऽऽसक्ता ह्यविघ्नेन, गच्छन्ति परमां गतिम् ॥" इति,

अभिधेयं जीवाजीवस्वरूपं, तच्च प्राक् प्रदर्शितनामव्युत्पत्तिसामर्थ्यमात्रादवगतम्। सम्बन्धो द्वेधा–उपायोपेयभावलक्षणो गुरुपर्वक्रमलक्षणश्च, तत्राद्यस्तर्कानुसारिणः प्रति, तद्यथा–वचनरूपापन्नं प्रकरणमुपायः तत्परिज्ञानं चोपेयं, गुरुपर्वक्रमलक्षणः केवलश्रद्धानुसारिणः प्रति, तं चाग्रे स्वयमेव सूत्रकृदभिधास्यति । इदं च प्रज्ञापनाख्यमुपाङ्गं सम्यग्ज्ञानहेतुत्वादत एव परम्परया मुक्तिपदप्रापकत्वात् श्रेयो-भूतम्, अतो मा भूत्तस्य विघ्न इति विघ्नविनायकोपशान्तये शिष्याणां मङ्गलबुद्धिपरिग्रहाय स्वतो मङ्गलभूतस्याप्यस्यादिमध्यावसानेषु मङ्गलमभिधातव्यम्, आदिमङ्गलं ह्यविघ्नेन शास्त्रपारगमनार्थं, मध्यमङ्गलमवगृहीतशास्त्रार्थस्थिरीकरणार्थम्, अन्तमङ्गलं शिष्यप्रशिष्यपरम्परया शास्त्रस्याव्य- वच्छेदार्थं, उक्तं च–

॥ १ ॥ "तं' मङ्गलमाईए मज्झे पज्जंतए य सत्थस्स ।
पढमं सत्थत्थाविग्घपारगमणाय निद्दिट्ठं ॥
॥ २ ॥ तस्सेव य थेज्जत्थं मज्झिमयं अन्तिमंपि तस्सेव ।
अव्वोच्छित्तिनिमित्तं सिस्सपसिस्साइवंसस्स ॥"

तत्र प्रथमपदगतेन 'ववगयजरमरणभये' इत्यादिना ग्रन्थेनादिमङ्गलम्, इष्टदेवतास्तवस्य परममङ्गलत्वात्, उपयोगपदगतेन 'कइविहे णं भंते ! उवओगे पन्नत्ते' इत्यादिना मध्यमङ्गलम्, उपयोगस्य ज्ञानरूपत्वात्, ज्ञानस्य च कर्मक्षयं प्रति प्रधानकारणतया मङ्गलत्वात्, न च कर्मक्षयं प्रति प्रधानकारणता तस्य न प्रसिद्धा, तस्याः साक्षादागमेऽभिधानात्, तथा चागमः–

॥ १ ॥ "जं अन्नाणी कम्मं खवेइ बहुयाहिं वासकोडीहिं ।
तं नाणी तिहि गुत्तो खवेइ उस्सासमित्तेणं ॥"

"तथा समुद्घातपदगतेन केवलिसमुद्घातपरिसमाप्तयुत्तरकालभाविना सिद्धाधिकारप्रतिबद्धेन–

॥ १ ॥ निच्छिन्नसव्वदुक्खा जाइजरामरणबन्धणविमुक्का ।
सासयमव्वाबाहं चिट्ठन्ति सुही सुहं पत्ता ॥"

–इत्यादिना अवसानमङ्गलम् ॥ अधुनाऽऽदिमङ्गलसूत्रं व्याख्यायते–

पदं – १ – प्रज्ञापना

मू. (१) *ववगयजरमरणभये सिद्धे अभिवंदिऊण तिविहेणं ।*
वंदामि जिनवरिंदं तेलोक्कगुरुं महावीरं ।

वृ. सितं–बद्धमष्टप्रकारं कर्मेन्धनं ध्मातं–दग्धं जाज्वल्यमानशुक्लध्यानानलेन यैस्ते निरुक्तविधिना सिद्धाः, अथवा 'षिधु गतौ' सेधन्ति स्म–अपुनरावृत्त्या निर्वृतिपुरीमगच्छन् यदिवा 'षिध संराद्धौ' सिध्यन्ति स्म–निष्ठितार्था भवन्ति स्म यद्वा 'षिधु शास्त्रे माङ्गल्ये च' सेधन्ते स्म–शासितारोऽभवन् मङ्गल्यरूपतां वाऽनुभवन्ति स्मेति सिद्धाः, अथवा सिद्धाः–नित्या अपर्यवसानस्थितिकत्वात्, प्रख्याता वा भव्यैरुपलब्धगुण-सन्दोहत्वात्, उक्तं च–

॥१॥ "ध्मातं सितं येन पुराणकर्म, यो वा गतो निर्वृतिसौधमूर्ध्नि ।
ख्यातोऽनुशास्ता परिनिष्ठितार्थो, यः सोऽस्तु सिद्धः कृतमङ्गलो मे ॥"

सिद्धाश्च नामादिभेदतोऽनेकधा ततो यथोक्तसिद्धप्रतित्त्यर्थं विशेषणमह–'व्यपगतजरा-मरणभयान्' जरावयोहानिलक्षणा मरणं–प्राणत्यागरूपम् भयम्–इहलोकादिभेदात्सप्तप्रकारम्, उक्तं च–"इहपरलोगादाणं अकम्हआजीवमरणमसिलोए" इति, विशेषतः–अपुनर्भावरूपतया अपगतानि-परिभ्रष्टानि जरामरणभयानि योभ्यस्ते तथा तान्, 'त्रिविधेन' मनसा वाचा कायेन, अनेन योगत्रयव्यापारविकलं द्रव्यवन्दनमित्याह, 'अभिवन्द्य' अभिमुखं वन्दित्वा, प्रणम्येत्यर्थः

अनेन समानकर्तृकतया पूर्वकाले क्त्वाप्रत्ययविधानान्नित्यानित्यैकान्तपक्षव्यवच्छेदमाह, एकान्तनित्यानित्यपक्षे क्त्वाप्रत्ययस्यासम्भवात्, तथाहि–अप्रच्युतानुत्पन्नस्थिरैकस्वभावं नित्यम्, तस्य कथं भिन्नकालक्रियाद्वयकर्तृत्वोपपत्तिः ?, आकालमेकस्वभावत्वेनैकस्या एव कस्याश्चित् क्रियायाः सदा भावप्रसङ्गात्, अनित्यमपि प्रकृत्यैकक्षणस्थितिधर्मकम्, ततस्तस्यापि भिन्नकालक्रियाद्वयकर्तृत्वायोगः, अवस्थानाभावादित्यलं विस्तरेण, अन्यत्र सुचर्चितत्वात्, क्त्वाप्रत्ययस्योत्तरक्रियासापेक्षत्वादुत्तरक्रियामाह–'वंदामि जिनवरिंद'मित्यादि,

'सूर वीर विक्रान्तौ' वीरयति स्म कषायादिशत्रून् प्रति विक्रामति स्मेति वीरः, महांश्चासौ वीरश्च महावीरः, इदं च 'महावीर' इति नाम न यादृच्छिकम्, किन्तु यथावस्थितमनन्यासाधारणं परीषहोपसर्गादिविषयं वीरत्वमपेक्ष्य सुरासुरकृतम्, उक्तं च–"अयले भयभेरवाणं खंतिखमे परीसहोवसग्गाणं । देवेहिं खए महावीर" इति, अनेनापायापगमातिशयो ध्वन्यते, तं कथंभूतमित्याह–'जिनवरेन्द्रम्' जयन्ति–रागादिशत्रूनभिभवन्ति जिनाः, ते च चतुर्विधाः, तद्यथा–श्रुतजिना अवधिजिना मनःपर्यायजिना केवलिजिनाः, तत्र केवलिजिनत्वप्रतिपत्तये वरग्रहणम्, जिनानां वराउत्तमा भूतभवद्भाविभावस्वभावा-वभासिकेवलज्ञानकलितत्वात् जिनवराः, ते चातीर्थकरा अपि सन्तः सामान्यकेवलिनो भवन्ति ततस्तीर्थकरत्वप्रतिपत्त्यर्थमिन्द्रग्रहणम्, जिनवराणामिन्द्रो जिनवरेन्द्रः,प्रकृष्टपुण्यस्कन्धरूपतीर्थं करनामकर्मोदयात्तीर्थकर इत्यर्थः ।

अनेन ज्ञानातिशयं पूजातिशयं चाह, ज्ञानातिशयमन्तरेण जिनेषु मध्ये उत्तम त्वस्य पूजातिशयमन्तरेण जिनवराणामपि मध्ये इन्द्रत्वस्यायोगात्, तं पुनः किंभूतमित्याह–'त्रैलोक्यगुरुम्' गृणाति यथावस्थितं प्रवचनार्थमिति गुरुः त्रैलोक्यस्य गुरुस्त्रैलोक्यगुरुः, तथा च भगवान् अधोलोकनिवासिभवनपतिदेवेभ्यस्तिर्यग्लोकनिवासिव्यन्तरनरपशुविद्याधरज्योतिष्केभ्य ऊर्ध्वलोकनिवासिवैमानिकदेवेभ्यश्च धर्मं दिदेश, तम्, अनेन वागतिशयमाह ।

एते चापायापगमातिशयादयश्चत्वारोऽप्यतिशया देहसौगन्ध्यादीनामतिशयानामुपलक्षणम्, तानन्तरेणैषामसम्भवात्, ततश्चतुस्त्रिंशदतिशयोपेतं भगवन्तं महावीरं वन्दे इत्युक्तं

द्रष्टव्यम् ॥ आह–ननु ऋषभादीन् व्युदस्य किमर्थं भगवतो महावीरस्य वन्दनम् ?, उच्यते, वर्त्तमानती- र्थाधिपतित्वेनासन्नोपकारित्वात्, तदेवासन्नोपकारित्वं दर्शयति–

मू. (२) *सुयरयणनिहाणं जिनवरेणं भवियजननिव्वुइकरेणं।*
उवदंसिया भगवया पन्नवणा सव्वभावाणं ॥

वृ. अत्र प्रज्ञापनेति विशेष्यं शेषं सामानाधिकरण्येन वैय्यधिकरण्येन च विशेषणं, 'जिनवरेण'त्ति जिनाः–सामान्यकेवलिनः तेषामपि वरः–उत्तमस्तीर्थकृत्त्वात् जिनवरस्तेन सामर्थ्यात् महावीरेण, अन्यस्य वर्त्तमानतीर्थाधिपतित्वाभावात्, इह छद्मस्थक्षीणमोहजिनापेक्षया सामान्यकेवलिनोऽपि जिनवरा उच्यन्ते ततस्तत्कल्पं मा भूत्सीद्विनेयजन इति तीर्थकृत्त्वप्रतिपत्तये विशेषणान्तरमाह–'भगवता' भगः–समग्रैश्वर्यादिरूपः, उक्तं च–

॥ १ ॥ "ऐश्वर्यस्य समग्रस्य, रूपस्य यशसः श्रियः।
धर्मस्याथ प्रयत्नस्य, षण्णां भग इतीङ्गना ॥"

भगोऽस्याऽस्तीति भगवान्, अतिशायने वतुप्रत्ययः, अतिशायी च भगो वर्द्धमानस्वामिनः शेषप्राणिगणापेक्षया, त्रैलोक्याधिपतित्वात्, तेन भगवता, परमार्हन्त्यमहिमोपेतेनेत्यर्थः, पुनः कथंभूतेनेत्याह–'भव्यजननिर्वृतिकरेण' भव्यः–तथाविधानादिपारिणामिकभावात् सिद्धिगमनयोग्यः स चासौ जनश्च भव्यजनः निर्वृतिः–निर्वाणं सकलकर्ममलापगमनेन स्वस्वरूपलाभतः परमं स्वास्थ्यं तद्धेतुः सम्यग्दर्शनाद्यपि कारणे कार्योपचारात् निर्वृतिस्तत्करणशीलो निर्वृतिकरः भव्यजनस्य निर्वृतिकरो भव्यजननिर्वृतिकरस्तेन,

आह–भव्यग्रहणमभव्यव्यवच्छेदार्थमन्यथा तस्य नैरर्थक्यप्रसङ्गात्, तत इदमापतितं–भव्यानामेव सम्यग्दर्शनादिकं करोति नाभव्यानाम्, न चैतदुपपन्नम्, भगवतो वीतरागत्वेन पक्षपातासम्भवात्, नैतत्सारम्, सम्यक्वस्तुतत्त्वापरिज्ञानात्, भगवान् हि सवितेव प्रकाशमविशेषेण प्रवचनार्थमातनोति, केवलमभव्यानां तथास्वाभाव्यादेव तामसखगकुलानामिव सूर्यप्रकाशो न प्रवचनार्थ उपदिश्यमानोऽपि उपकाराया प्रभवति, तथा चाह वादिमुख्यः–

॥ १ ॥"सद्धर्म्मबीजवपनानघकौशलस्य, यल्लोकबान्धव ! तवापि खिलान्यभूवन्।
तन्नाद्भुतं खगकुलेषु हि तामसेषु, सूर्यांशवो मधुकरीचरणावदाताः ॥"

ततो भव्यानामेव भगवद्वचनादुपकारो जायते इति भव्यजननिर्वृतिकरेणेत्युक्तम्। किमित्याह–'उवदंसिय'त्ति उप–सामीप्येन यथा श्रोतृणां झटिति यथाऽवस्थितवस्तुतत्त्वावबोधो भवति तथा, स्फुटवचनैरित्यर्थः, दर्शिता–श्रवणगोचरं नीता, उपदिष्टा इत्यर्थः, काऽसौ ?–

'प्रज्ञापना' प्रज्ञाप्यन्ते–प्ररूप्यन्ते जीवादयो भावा अनया शब्दासंहत्या इति प्रज्ञापना, किंविशिष्टेत्यत आह–'श्रुतरत्ननिधानम्' इह रत्नानि द्विविधानि भवन्ति, तद्यथा–द्रव्यरत्नानि भावरत्नानि (च), तत्र द्रव्यरत्नानि वैडूर्यमरकतेन्द्रनीलादीनि, भावरत्नानि श्रुतव्रतादीनि, तत्र द्रव्यरत्नानि न तात्त्विकानीति भावरत्नैरिहाधिकारः, तत एवं समासः–श्रुतान्येव रत्नानि श्रुतरत्नानि न तु श्रुतानि च रत्नानि च, नापि श्रुतानि रत्नानीवेति, कुत इति चेत् ?, उच्यते, प्रथमपक्षे श्रुतव्यतिरिक्तैर्द्रव्यरत्नैरिहाधिकाराभावात्, द्वितीयपक्षे तु श्रुतानामेव तात्त्विकरत्नत्वात्, शेषरत्नैरुपमाया अयोगात्, निधानमिव निधानं श्रुतरत्नानां निधानं श्रुतरत्ननिधानं, केषां प्रज्ञापनेत्यत

मू. (५)　*अज्झयणमिणं चित्तं सुयरयणं दिट्ठिवायणीसंदं ।*
जह वन्नियं भगवया अहमवि तह वन्नइस्सामि ।।

वृ. अध्ययनमिदं–प्रज्ञापनाख्यम्, ननु यदीदमध्ययनं किमित्यस्यादावनुयोगादिद्वारोपन्यासो न क्रियते?, उच्यते, नायं नियमो यदवश्यमध्ययनादावुपक्रमाद्युपन्यासः क्रियते इति, अनियमोऽपि कुतोऽवसीयते? इति चेत्, उच्यते, नन्वध्ययनादिपदर्शनात्, तथा चित्रार्थाधिकारयुक्तत्वाच्चित्रम्, श्रुतमेव रत्नं श्रुतरत्नं दृष्टिवादस्य–द्वादशाङ्गस्य निष्यन्द इव दृष्टिवादनिष्यन्दः, सूत्रे नपुंसकतानिर्देशः प्राकृतत्वात्, यथा वर्णितं भगवता–श्रीमन्महावीरवर्धमानस्वामिना इन्द्रभूमिप्रभृतीनामध्ययनार्थस्य वर्णितत्वात् अध्ययनं वर्णितमित्युक्तम्, अहमपि तथा वर्णयिष्यामि ।।

आह–कथमस्य छद्मस्थस्य तथा वर्णयितुं शक्तिः?, नैष दोषः, सामान्येनाभिधेयपदार्थवर्णमात्रमधिकृत्यैवमभिधानात्, तथा चाहमपि तथा वर्णयिष्यामीति किमुक्तं भवति?–तदनुसारेण वर्णयिष्यामि, न स्वमनीषिकयेति ।। अस्यां च प्रज्ञापनायां षट्त्रिंशत् पदानि भवन्ति, पदं प्रकरणमर्थाधिकार इति पर्यायः, तानि च पदान्यमूनि–

मू. (६)　*पन्नवणा ठाणाइं बहवत्तव्वं ठिई विसेसा य ।*
वक्कंती ऊसासो सन्ना जोणी य चरिमाइं ।।

वृ. तत्र प्रथमं पदं प्रज्ञापनाविषयं प्रश्नमधिकृत्य प्रवृत्तत्वात् प्रापना १ एवं द्वितीयं स्थानानि २ तृतीयं बहुवक्तव्यम् ३ चतुर्थं स्थितिः ४ पञ्चमं विशेषाख्यं ५ षष्ठं व्युत्क्रान्तिः, व्युत्क्रान्तिलक्षणार्थाधिकारयुक्तत्वात ६ सप्तममुच्छ्वासः७ अष्टमं संज्ञा ७ नवमं योनिः ९ दशमं चरमाणि चरमाणीति प्रश्नमुद्दिश्य प्रवृत्तत्वात् १० ।

मू. (७)　*भासा सरीर परिणाम कसाए इन्दिए पओगे य ।*
लेसा कायठिई या सम्मत्ते अंतकिरिया य ।।

वृ. एकादशं भाषा ११ द्वादशं शरीरं १२ त्रयोदशं परिणामः १३ चतुर्दशं कषायं १४ पञ्चदशमिन्द्रियं १५ षोडशं प्रयोगः १६ सप्तदशं लेश्या १७ अष्टादशं कायस्थितिः १८ एकोनविंशतितमं सम्यक्त्वम् १९ विंशतितममन्तक्रिया २० ।

मू. (८)　*ओगाहणसण्ठाणा किरिया कम्मे इयावरे ।*
बन्धए वेदे ए वेदस्स बन्धए वेयवेयए ।।

वृ. एकविंशतितममवगाहनास्थानं २१ द्वाविंशतितमं क्रिया २२ त्रयोविंशतितमं कर्म २३ चतुर्विंशतितमं कर्मणो बन्धकः, तस्मिन् हि यथा जीवः कर्मणो बन्धको भवति तथा प्ररूप्यते इति तत्तथानाम २४ एवं पञ्चविंशतितमं कर्मवेदकः २५ षड्विंशतितमं वेदस्य बन्धक इति, वेदयते–अनुभवतीति वेदस्तस्य बन्ध एव बन्धकः, किमुक्तं भवति?–कति प्रकृतीर्वेदयमानस्य कतिप्रकृ.तीनां बन्धो भवतीति तत्र निरूप्यते ततस्तद्वेदस्य बन्ध इति नाम २६ एवं कां प्रकृतिं वेदयमानः कति प्रकृतीर्वेदयति इत्यर्थप्रतिपादकं वेदवेदको नाम सप्तविंशतितमम् २७ ।

मू. (९)　*आहारे उवओगे पासणया सन्नि सञ्जमे चेव ।*
ओही पवियारण वेदना य तत्तो समुग्घाए ।।

वृ. अष्टाविंशतितममाहारप्रतिपादकत्वादाहारः २८ एवमेकोनत्रिंशत्तममुपयोगः २९

त्रिंशत्तमं 'पासणय'त्ति दर्शनता ३० एकत्रिंशत्तमं संज्ञा ३१ द्वात्रिंशत्तमं संयमः ३२ त्रयस्त्रिंशत्तमम-वधिः ३३ चतुस्त्रिंशत्तमं प्रविचारणा ३४ पञ्चत्रिंशत्तमं वेदना ३५ षट्त्रिंशत्तमं समुद्घातः ३६ ॥ तदेवमुपन्यस्तानि पदानि ॥

साम्प्रतं यथाक्रमं पदगतानि सूत्राणि वक्तव्यानि, तत्र प्रथमपदगतमिदमादिसूत्रम्–

(अथ प्रथम–प्रज्ञापना पदं आरभ्यते)

मू. *(१०) से किं तं पन्नवणा ?, पन्नवणा दुविहा पन्नत्ता, तंजहा–जीवपन्नवणा य अजीव-पन्नवणा य ॥*

वृ. अथास्य सूत्रस्य कः प्रस्तावः ?, उच्यते, प्रश्नसूत्रमिदम्, एतच्चादावुपन्यस्तमिदं ज्ञापयति–पृच्छतो मध्यस्थबुद्धिमतोऽर्थिनो भगवर्हदुपदिष्टतत्त्वप्ररूपणा कार्या, न शेषस्य, तथा चोक्तम्–'मध्यस्थो बुद्धिमानर्थी, श्रोता पात्रमिति स्मृतः', तत्र सेशब्दो मागधदेशीप्रसिद्धो निपातः तत्रशब्दार्थे, अथवा अथशब्दार्थे, स च वाक्योपन्यासार्थः, किमिति परप्रश्ने, 'तं'ति तावदिति द्रष्टव्यम्, तच्च क्रमोद्योतने, तत एष समुदायार्थः–तिष्ठन्तु स्थानादीनि पदानि प्रष्टव्यानि, वाचः क्रमवर्त्तित्वात् प्रज्ञापनाऽनन्तरं च तेषामुपन्यस्तत्वात्,

तत्रैतावदेव तावत् पृच्छामि–किं प्रज्ञापनेति, ? अथवा प्राकृतशैल्या 'अभिधेयवद्भिङ्गवच-नानि योजनीयानि' इति न्यायादेवं द्रष्टव्यम्, तत्र का तावत् प्रज्ञापनेति ?, एवं सामान्येन केनचित्प्रश्ने कृते सति भगवान् गुरुः शिष्यवचनानुरोधेनादरार्थं किञ्चित् शिष्योक्तं प्रत्युच्चार्याह–'पन्नवणा दुविहा पन्नत्ता' इति, अनेन चागृहीताशेष्यभिधानेन निर्वचनसूत्रेणैतदाचष्टे–न सर्वमेव सूत्रं गणधरप्रश्नतीर्थकरनिर्वचनरूपम्, किन्तु किञ्चिदन्यथाऽपि, बाहुल्येन तु तथारूपम्,

यत उक्तम्–'अत्थं भासइ अरिहा सुत्तं गंथन्ति गणहरा निउण'मित्यादि, तत्र प्रज्ञापनेति पूर्ववत्, 'द्विविधा' द्विप्रकारा 'प्रज्ञप्ता' प्ररूपिता, यदा तीर्थकरा एव निर्वक्तारस्तदाऽयमर्थोऽ-वसेयः–अन्यैरपितीर्थकरैः, यदा पुनरन्यः कश्चिदाचार्यस्तन्मतानुसारी तदा तीर्थकरगणधरैरिति, द्वैविध्यमेवोपदर्शयति–'तंजहा जीवपन्नवणा य अजीवपन्नवणा य'

'तद्यथे'ति वक्ष्यमाणभेदकथनप्रकाशनार्थः, जीवन्तिप्राणान् धारयन्तीति जीवाः, प्राणाश्च द्विधा–द्रव्यप्राणा भावप्राणाश्च, तत्र द्रव्यप्राणा इन्द्रियादयो भावप्राणा ज्ञानादीनि, द्रव्यप्राणैरपि प्राणिनः संसारसमापन्ना नारकादयः, केवलभावप्राणैः प्राणिनो व्यपगतसमस्तकर्मसङ्गाः सिद्धाः, जीवानां प्रज्ञापना जीवप्रज्ञापना, न जीवा अजीवा–जीवविपरीतस्वरूपाः, ते च धर्माधर्माकाश-पुद्गलास्तिकायाद्धासमयरूपास्तेषां प्रज्ञापना अजीवप्रज्ञापना, चकारौ द्वयोरपि प्राधान्यख्यापनार्थौ, न ह्येवविधान्यतरस्याः प्रज्ञापनायाः गुणभावः, एवं सर्वत्राप्यक्षरगमनिका कार्या ॥

तदेवं सामान्येन प्रज्ञापनाद्वयमुपन्यस्य सम्प्रति विशेषस्वरूपावगमार्थमादावल्प-वक्तव्यत्वादजीवप्रज्ञापनां प्रतिपिपादयिषुस्तद्विषयं प्रश्नसूत्रमाह–

मू. *(११) से किं तं अजीवपन्नवणा ?, अजीवपन्नवणा दुविहा पन्नत्ता, तंजहा–रुविअजीव-पन्नवणा य अरूविअजीवपन्नवणा य ।*

वृ. अथ किं तत् अजीवप्रज्ञापनेति ?, अथवा का साऽजीवप्रज्ञापना ?, सूरिराह–'अजीव-पन्नवणा दुविहा पन्नत्ता, तंजहा' इत्यादि, अजीवप्रज्ञापना द्विविधा प्रज्ञप्ता, तद्यथा–रूप्यजीवप्रज्ञापना

च अरूप्यजीवप्रज्ञापना च, रूपमेषामस्तीति रूपिणः, रूपग्रहणं गन्धादीनामुपलक्षणम्, तद्व्यतिरिकेण तस्यासम्भवात्, तथाहि–प्रतिपरमाणु रूपरसगन्धस्पर्शाः, उक्तं च– '

'कारणमेव तदन्त्यं सूक्ष्मो नित्यश्च भवति परमाणुः ।
एकरसगन्धवर्णो द्विस्पर्शः कार्यलिङ्गश्च''

तस्मादव्यतिरेकः परस्परं रूपादीनामिति, अथवा रूपं नाम–स्पर्शरूपादिसम्मूर्च्छनात्मिका मूर्तिस्तदेषामस्तीति रूपिणः, रूपिणश्च तेऽजीवाश्च रूप्यजीवाः तेषां प्रज्ञापना रूप्यजीवप्रज्ञापना, पुद्गलस्वरूपाजीवप्रज्ञापनेतियावत्, पुद्गलानामेव रूपादिमत्त्वात्, रूपिव्यतिरेकेणारूपिणो धर्मास्तिकायादयस्ते च तेऽजीवाश्चारूप्यजीवाः तेषां प्रज्ञापना अरूप्यजीवप्रज्ञापना, चशब्दौ प्राग्वत् ।। तत्राल्पवक्तव्यत्वात् प्रथमतोऽरूप्यजीवप्रज्ञापनां चिकीर्षुरिदमाह–

मू. *(१२) से किं तं अरुविअजीवपन्नवणा ?, अरुविअजीवपन्नवणा दसविहा पन्नत्ता, तंजहा–धम्मत्थिकाए धम्मत्थिकायस्स देसे धम्मत्थिकायस्स पदेसा अधम्मत्थिकाए अधम्मत्थिकायस्स देसे अधम्मत्थिकायस्स पदेसा आगासत्थिकाए आगासत्थिकायस्स देसे आगासत्थिकायस्स पदेसा अद्धासमए १०, सेत्तं अरूविअजीवपन्नवणा ।।*

वृ. सेशब्दोऽथशब्दार्थः, अथ का सा अरूप्यजीवप्रज्ञापना ?, सूरिराह–अरूप्यजीवप्रज्ञापना 'दशविधा' दशप्रकारा प्रज्ञप्ता, अरूप्यजीवानां दशविधत्वात् तत्प्ररूपणाऽपि दशविधोक्ता, तदेव दशविधत्वं दर्शयति–'तंजहे' त्यादि, तद्यथेति वक्ष्यमाणभेदकथनोद्द्योतनारअथः, 'तद्'दशविधत्वम्, यदिवा 'तदि' त्यव्ययं सर्वलिङ्गवचनेषु सा दशविधाऽरूप्यजीवप्रज्ञापना यथा भवति तथा दर्श्यते– 'धम्मत्थिकाए'त्ति जीवानां पुद्गलानां च स्वभावत एव गतिपरिणामपरिणतानां तत्स्वभाव-धरणात्–तत्स्वभावपोषणाद्धर्मः अस्तयश्चेह प्रदेशास्तेषां कायः–सङ्घातः, 'गण काए य निकाए खन्धे वग्गे तहेव रासी य' इतिवचनात्, अस्तिकायः प्रदेशसङ्घात इत्यर्थः, धर्मश्चासौ अस्तिकायश्च धर्मास्तिकायः, अनेन च सकलमेव धर्मास्तिकायरूपमवयविद्रव्यमाह, अवयवी च नामावयवानां तथारूपसङ्घातपरिणामविशेष एव, न पुनरवयवव्यतिरेकेण द्रव्येभ्यः पृथगर्थान्तरं द्रव्यम्, तथाऽनुपलम्भात्, तन्तव एव हि आतानवितानरूपसङ्घातपरिणामविशेषमापन्ना लोके पटव्यपदेशभाज उपलभ्यन्ते, न तदतिरिक्तं पटाख्यं नाम, उक्तं चान्यैरपि–

॥ १ ॥ ''तन्त्वादिव्यतिरेकेण, न पटाद्युपलम्भनम् ।
तन्त्वादयो विशिष्य हि, पटादिव्यपदेशिनः ॥''

कृतं प्रसङ्गेन, अन्यत्र चिन्तितत्वादेतद्वादस्य, तथा 'धर्मास्तिकायस्य देश' इति तस्यैव धर्मास्तिकायस्य बुद्धिविकल्पितो धादिप्रदेशात्मको विभागः, 'धममत्थिकायस्स पदेसा' इति प्रकृष्टा देशाः प्रदेशाः–निर्विभागा भागा इति भावः, ते चासङ्ख्येयाः, लोकाकाशप्रदेशप्रमाणत्वात् तेषाम्, अत एव बहुवचनम्, धर्मास्तिकायप्रतिपक्षभूतोऽधर्मास्तिकायः, किमुक्तं भवति ?–जीवपुद्गलानां स्थितिपरिणामपरिणतानां तत्परिणामोपष्टम्भकोऽमूर्त्तोऽसंख्यातप्रदेशसंघातात्मकोऽधर्मास्तिकायः 'अधर्मास्तिकायस्य देश' इत्यादि पूर्ववत् ।

तथा 'आडि'ति मर्यादया स्वस्वभावापरित्यागरूपया काशन्ते–स्वरूपेण प्रतिभासन्ते अस्मिन्व्यवस्थिताः पदार्था इत्याकाशम्, यदा त्वभिविधावाङ् तदा 'आडि'ति सर्वभावाभिव्याप्तया काशते इत्याकाशम्, अस्तयः–प्रदेशास्तेषां कायोऽस्तिकायः आकाशं च तदस्तिकायश्चा-

काशास्तिकायः, 'आकाशस्तिकायस्य देश'; इत्यादि पूर्ववत्, नवरं प्रदेशा अनन्ता द्रष्टव्याः, अलोकस्यानन्तत्वात्। 'अद्धेति' कालस्याख्या, अद्धा चासौ समयश्चाद्धासमयः, अथवाऽद्धायाः समयो निर्विभागो भागः, अयं च एक एव वर्त्तमानः परमार्थः सन्, नातीता नानागताः समयाः, तेषां यथाक्रमं विनष्टानुत्पन्नत्वेनासत्त्वात्, ततः कायत्वाभाव इति देशप्रदेशकल्पनाविरहः, आवलिकादयस्तु पूर्वसमयनिरोधेनैवोत्तरसमयसद्भाव इति ततः समुदयसमित्याद्यसम्भवेन व्यवहारार्थमेव कल्पिता इति द्रष्टव्यम्।

तथा अमीषामित्थं क्रमोपन्यासे किं प्रयोजनम् ?, उच्यते, इह धर्मास्तिकाय इति पदं मङ्गलभूतम्, आदौ धर्मशब्दान्वितत्वात्, पदार्थप्ररूपणा च सम्प्रति प्रथमत उत्क्षिप्ता वर्त्तते, ततो मङ्गलार्थमादौ धर्मास्तिकायस्योपादानम्, धर्मास्तिकायप्रतिपक्षभूतश्चाधर्मास्तिकाय इति तदनन्तरमधर्मास्तिकायस्य, द्वयोरपि चानयोराधारभूतमाकाशमिति तदनन्तरमाकाशास्तिकायस्य,

ततः पुनरजीवसाधर्म्यादद्धासमयस्य, अथवेह धर्माधर्मास्तिकायौ विभू न भवतः, तद्विभुत्वे तत्सामर्थ्यतो जीवपुद्गलानामस्खलितप्रचारप्रवृत्तौ लोकालोकव्यवस्थाऽनुपपत्तेः, अस्ति च लोकालोकव्यवस्था, तत्र तत्र प्रदेशे सूत्रे साक्षाद्दर्शनात्, ततो यावति क्षेत्रेऽवगाढौ तावत्प्रमाणो लोकः शेषस्त्वलोक इति सिद्धम्, उक्तं च–

॥ १ ॥ "धर्माधर्मविभुत्वात् सर्वत्र च जीवपुद्गलविचारात्।
नालोकः कश्चित्स्यान्न च सम्मतमेतदार्याणाम्॥
॥ २ ॥ तस्माद्धर्माधर्मावगाढौ व्याप्य लोकखं सर्वम्।
एवं हि परिच्छिन्नः सिध्यति लोकस्तदविभुत्वात्॥"

ततः एवं लोकालोकव्यवस्थाहेतू धर्माधर्मास्तिकावित्यनयोरादावुपादानम्, तत्रापि माङ्गलिकत्वात् प्रथमतो धर्मास्तिकायस्य, तत्प्रतिपक्षत्वात् ततोऽधर्मास्तिकायस्य, ततो लोकालोकव्यापित्वादाकाशास्तिकायस्य, तदनन्तरं लोके समयासमयक्षेत्रव्यवस्थाकारित्वाद्-द्धासमयस्य, स्वमागमानुसारेणान्यदपि युक्तयनुपाति वक्तव्यम्, इत्यलं प्रसङ्गेन।

प्रकृतोपसंहारमाह–'सेत्तं अरूविअजीवपन्नवणा' सैषा अरूप्यजीवप्रज्ञापना॥ पुनराह विनेयः–

सू. (१३) से किं तं रूविअजीवपन्नवणा ?, रूविअजीवपन्नवणा चउव्विहा पन्नत्ता, तंजहा–खंधा खंधदेसा खंधपएसा परमाणुपोग्गला, ते समासओ पंचविहा पन्नत्ता, तंजहा–वण्णपरिणया गंधपरिणया रसपरिणया फासपरिणया संठाणपरिणया।

वृ. अथ का सा रूप्यजीवप्रज्ञापना ?, सूरिराह–रूप्यजीवप्रज्ञापना चतुर्विधा प्रज्ञप्ता, तद्यथा–'स्कन्धाः' स्कन्दन्ति शुष्यन्ति धीयन्तेव–पुष्यन्ते पुद्गलानां विचटनेन चटनेन चेति स्कन्धाः 'पृषोदरादय' इति रूपनिष्पत्तिः, अत्र बहुवदनं पुद्गलस्कन्धानामानन्त्यख्यापनार्थम्, न ह्यानन्त्य-मनुपपन्नम्, आगमेऽमधानात्, तथा च वक्ष्यति–

'दव्वओणं पुग्गलत्थिकाए' इत्यादि, 'स्कन्धदेशाः' स्कन्धानामेव स्कन्धत्वपरिणाममजहतो बुद्धिपरिकल्पिता द्व्यादिप्रदेशात्मका दिभागाः, अत्रापि बहुवचनमनन्तानन्तप्रादेशिकेषु तथाविधेषु स्कन्धेषु देशानन्तत्वसम्भावनारथम्, स्कन्धानां स्कन्धत्वपरिणामपरिणतानां बुद्धिपरिकल्पिता प्रकृष्टा देशा निर्विभागा भागाः परमाणव इत्यर्थः स्कन्धप्रदेशाः, अत्रापि बहुवचनं प्रदेशानन्तत्व

सम्भावनार्थम्, 'परमाणुपुद्गला इति' परमाश्च तेऽणवश्च परमाणवो निर्विभागद्रव्यरूपाः ते च ते पुद्गलाश्च परमाणुपुद्गलाः, स्कन्धत्वपरिणामरहिताः केवलाः परमाणव इत्यर्थः ।

'ते समासओ' इत्यादि, ते स्कन्धाध्यो यथासम्भवं 'समासतः' सङ्क्षेपेण पञ्चविधाः प्रज्ञप्ताः, तद्यथा–'वर्णपरिणताः' वर्णतः परिणताः, वर्णपरिणामभाजइत्यर्थः, एवं गन्धपरिणता रसपरिणताः स्पर्शपरिणताः संस्थानपरिणताः, परिणता इत्यतीतकालनिर्देशो वर्त्तमानातगतकालोपलक्षणं, वर्त्तमानानागतत्वमन्तरेणातीतत्वस्यासम्भवात्, तथाहि–यो वर्तमानत्वमतिक्रान्तः सोऽतीतो भवति, वर्त्तमानत्वं च सोऽनुभवति योऽनागतत्वमतिक्रान्तवान्, उक्तं च–

॥ १ ॥ "भवति स नामातीतो यः प्राप्तो नाम वर्त्तमानत्वम् ।
एष्यंश्च नाम स भवति यः प्राप्स्यति वर्त्तमानत्वम् ॥"

ततो वर्णपरिणता इति वर्णरूपतया परिणताः परिणमन्ति परिणमिष्यन्तीति द्रष्टव्यम्, एवं गन्धरसपरिणता इत्यादयपि परिभावनीयम् ।

मू. *(१३-वर्तते) जे वण्णपरिणया ते पंचविहा पन्नत्ता, तंजहा–कालवण्णपरिणया नीलवण्णप० लोहियवण्णप० हालिद्दवण्णप० सुक्किलवण्णपरिणया. जे गंधपरिणता ते दुविहा पं० तं०– सुब्भिगंधपरिणता य दुब्भिगंधपरिणता य, जे रसपरिणता ते पंचविहा पं० तं०–तित्तपरिणता कडुयरसपरिणता कसायरसपरिणया अंबिलरसपरिणता महुरसपरिणया,*

जे फासपरिणता ते अट्ठविहा पं० तं०–कक्खडफासपरिणया मउयफासपरिणया गुरुयफासपरिणता लहुयफासपरिणया सीयफासपरिणया उसिणफासपरिणया निद्धफासपरिणया लुक्खफासपरिणया,

जे सण्ठाणपरिणया ते पंचविहा पं० तं०–परिमंडलसंठाणपरिणया वट्टसंठाणपरि० तंससंठाणप० चउरंससं० प० आयतसंठाणपरिणया ।

वृ. ये वर्णपरिणतास्ते पञ्चविधाः प्रज्ञप्ताः, तद्यथा–कृष्णवर्णपरिणताः कज्जलादिवत्, नीलवर्णपरिणता नील्यादिवत्, लोहितवर्णपरिणता हिङ्गुलकादिवत्, हारिद्रवर्णपरिणता हरिद्रादिवत्, शुक्लवर्णपरिणताः शङ्खादिवत् ।

ये गन्धपरिणतास्ते द्विविधाः प्रज्ञप्ताः, तद्यथा–सुरभिगन्धपरिणताश्च दुरभिगन्धपरिणताश्च, चशब्दौ परिणामभवनं प्रति विशेषाभावख्यापनार्थौ, तथाहि–यथा कथञ्चिदवस्थिताः सामग्रीवशतः सुरभिगन्धपरिणामं भजन्ते तथा कथञ्चिदवस्थिता एव सामग्रीवशतो दुरभिगन्धपरिणाममपीति, सुरभिगन्धपरिणताश्च यथा श्रीखण्डादयः, दुरभिगन्धपरिणता लसुनादिवत् । ये रसपरिणतास्ते पञ्चविधाः प्रज्ञप्ताः, तद्यथा–तिक्तरसपरिणताः कोशातक्यादिवत्, कटुकरसपरिणताः सुण्ठ्यादिवत्, कषायरसपरिणता अपक्वकपित्थादिवत्, अम्लरसपरिणता अम्लवेतसादिवत्, मधुररसपरिणताः शर्करादिवत् । ये स्पर्शपरिणतास्तेऽष्टविधाः प्रज्ञप्ताः, तद्यथा– कर्कशस्पर्शपरिणताः पाषाणादिवत्, मृदुस्पर्शपरिणता हंसरुतादिवत्, गुरुकस्पर्शपरिणताः वज्रादिवत्, लघुकस्पर्श० अर्कतूला- दिवत्, शीतस्पर्शपरिणता मृणालादिवत्, उष्णस्पर्श० वह्न्यादिवत्, स्निग्धस्पर्शपरिणता घृतादिवत्, रूक्षस्पर्शपरिणता भस्मादिवत् ।

ये संस्थानपरिणतास्ते पञ्चविधाः प्रज्ञप्ताः, तद्यथा–परिमण्डलसंस्थानपरिणता वलयवत्,

वृत्तसंस्थानपरिणताः कुलालचक्रादिवत्, त्र्यस्रसंस्थानपरिणताः शृङ्गाटकादिवत्, चतुरस्रसंस्थान-परिणताः कुम्भिकादिवत्, आयतसंस्थानपरिणता दण्डादिवत्, एतानि च परिमण्डलादीनि संस्थानानि धनप्रतरभेदेन द्विविधानि भवन्ति, पुनः परिमण्डलमपहाय शेषाणि ओजःप्रदेशजनितानि युग्मप्रदेशजनितानीति द्विधा, तत्रोत्कृष्टं परिमण्डलादि सर्वमनन्ताणुनिष्पन्नमसङ्ख्येयप्रदेशावगाढं चेति प्रतीतमेव, जघन्यं तु प्रतिनियतसङ्ख्येपरमाण्वात्मकम्, अतो नानिर्दिष्टं ज्ञातुं शक्यते इति विनेयजनानुग्रहाय तदुपदर्श्यते–तत्रौजःप्रदेशप्रतरवृत्तं पञ्चपरमाणुनिष्पन्नं पञ्चाकाशप्रदेशावगाढं च, तद्यथा–एकः परमाणुर्मध्ये स्थाप्यते, चत्वारः क्रमेण पूर्वादिषु चतसृषु दिक्षु, युग्मप्रदेशप्रतरवृत्तं द्वादशपरमाण्वात्मकं द्वादशप्रदेशावगाढं च, तत्र निरन्तरं चत्वारः परमाणवश्चतुष्वाकाशप्रदेशेषु रुचकाकारेण व्यवस्थाप्यन्ते, ततस्तत्परिक्षेपेण शेषा अष्टौ ओजःप्रदेशं धनवृत्तं सप्तप्रदेशं सप्तप्रदेशा-वगाढं च, तच्चैवं–[illegible] प्रतरवृत्ते मध्यस्थितस्य परमाणोरुपरिष्टादधस्ताच्च एकैकोऽणुरवस्थाप्यते, तत एवं सप्तप्रदेशं भवति युग्मप्रदेशं धनवृत्तं द्वात्रिंशत्प्रदेशं द्वात्रिंशत्प्रदेशा-वगाढं च, तच्चैवं–पूर्वोक्तद्वादशप्रदेशात्मकस्य प्रतरवृत्तस्योपरि द्वादश, तत उपरिष्टादधश्चान्ये चत्वारश्चत्वारः परमाणव इति

ओजः प्रदेशं प्रतरत्र्यस्रं त्रिप्रदेशं त्रिप्रदेशावगाढं च, तच्चैवं पूर्वं तिर्यगणुद्वयं न्यस्यते, तत आद्यस्याध एकोऽणुः, स्थापना– युग्मप्रदेशं प्रतरत्र्यस्रं षट्परमाणुनिष्पन्नं षट्प्रदेशावगाढं च, तत्र तिर्यग् निरन्तरं त्रयः परमाणवः स्थाप्यन्ते, तत आद्यस्याद्य उपर्यधोभावेनाणुद्वयं द्वितीयस्याध एकोऽणुः, स्थापना ओजः– प्रदेशं धनत्र्यस्रं पञ्चत्रिंशत्परमाणुनिष्पन्नं पञ्चत्रिंशत्प्रदेशावगाढं च, तच्चैवं–तिर्यग् निरन्तराः पञ्च परमाणवःस्थाप्यन्ते, तेषां चाधोऽधः क्रमेण तिर्यगेव चत्वारस्त्रयो द्वावेकश्चेति पञ्चदशात्मकः प्रतरो जातः, स्थापना–अस्यैव च प्रतरस्योपरि सर्वपङ्क्तिश्चतस्त्यान्त्य-परित्यागेन दश १०, तथैव तदुपर्युपरि षट् त्रय एकश्चेति क्रमेणाणवः स्थाप्यन्ते, एते मीलिताः पञ्चत्रिंशद्भवन्ति युग्मप्रदेशं धनत्र्यस्रं चतुष्परमाणवात्मकं चतुष्प्रदेशावगाढं च प्रतरत्र्यस्रस्यैव त्रिप्रदेशात्मकस्य सम्बन्धिन एकस्याणोरुपर्येकोऽणुः स्थाप्यते, ततो मीलिताश्च त्वारो भवन्ति ॥

ओजःप्रदेशं प्रतरचतुरस्रं नवपरमाण्वात्मकं नवप्रदेशावगाढं च, तत्र तिर्यग् निरन्तरं त्रिप्रदेशास्तिस्रः पङ्क्तयः स्थाप्यन्ते, स्थापनायुग्मप्रदेशं प्रतरचतुरस्रं चतुष्परमाण्वात्मकं चतुष्प्रदेशाव-गाढं च, तत्र तिर्यग् द्विप्रदेशे द्वे पङ्क्ति स्थाप्येते, ओजःप्रदेशं धनचतुरस्रं सप्तविंशतिपरमाण्वात्मकं सप्तविंशतिप्रदेशावगाढं च, तत्र नवप्रदेशात्मकस्यैव पूर्वोक्तस्य प्रतरस्याध उपरि च नव नव प्रदेशाः स्थाप्यन्ते, ततः सप्तविंशतिप्रदेशात्मकमोजः प्रदेशं धनचतुरस्रं भवति अस्यैव युग्मप्रदेशं धनचतुरस्रमष्टपरमाण्वात्मकमष्टप्रदेशावगाढं च, तच्चैवं–चतुष्प्रदेशात्मकस्य पूर्वोक्तस्य प्रतरस्योपरि चत्वारोऽन्ये परमाणवः स्थाप्यन्ते ३॥ ओजःप्रदेशं श्रेण्यायतं त्रिपरमाणु त्रिप्रदेशावगाढं च, तत्र तिर्यग् निरन्तरं त्रयः स्थाप्यन्ते युग्मप्रदेशं श्रेण्यायतं द्विपरमाणु द्विप्रदेशावगाढं च, तथैवाणुद्वयं स्थाप्यते ओजः–प्रदेशं प्रतरायतं पञ्चदशपरमाण्वात्मकं पञ्चदशप्रदेशावगाढं च, तत्र पञ्चप्रदेशात्मिकास्तिस्रः पङ्क्तयस्तिर्यक् स्थाप्यन्ते, युग्मप्रदेशं प्रतरायतं षट्परमाण्वात्मकं षट्प्रदेशावगाढं च, तत्र त्रिप्रदेशं पङ्क्तिद्वयं स्थाप्यते, स्थापना–ओजःप्रदेशं धनायतं पञ्चचत्वारिंशत्-परमाण्वात्मकं तावत्प्रदेशावगाढं च, तत्र पूर्वोक्तस्यैव प्रतरायतस्य पञ्चदशप्रदेशात्मकस्याध उपरि

तथैव पञ्चदश परमाणव;—स्थाप्यन्ते युग्मप्रदेशं धनायतं द्वादशपरमाण्वात्मकं द्वादशप्रदेशावगाढं च, तत्र प्रागुक्तस्य षट्प्रदेशस्य प्रतरायतस्योपरि तथैव तावन्तः परमाणवः स्थाप्यन्ते ४॥

प्रतरपरिमण्डलं विंशतिपरमाण्वात्मकं विंशतिप्रदेशावगाढं च, तच्चैवं—प्राच्यादिषु चतसृषु दिक्षु प्रत्येकं चत्वारश्चत्वारोऽणवः स्थाप्यन्ते, विदिक्षु च प्रत्येकमेकैकोऽणुः स्थाप्यते घनपरिमण्डलं चत्वारिंशत्प्रदेशावगाढं चत्वारिंशत्परमाण्वात्मकं च, तत्र तस्या एव विंशतेरुपरि तथैवान्या विंशतिरवस्थाप्यते ५॥ इत्थं चैषां प्ररूपणमितोऽपि न्यूनप्रदेशतायां यथोक्तसंस्थानाभावात्, एतत्सङ्ग्राहिकाश्चेमा उत्तराध्ययननिर्युक्तिगाथाः—

॥ १ ॥ "परिमण्डले य वट्टे तंसे चउरंस आयए चेव।
घनपयर पढमवज्जं ओजपएसे य जुम्मे य॥

॥ २ ॥ पंचगबारसगं खलु सत्तगबत्तीसगं च वट्टम्मि।
तिय छक्कपणगतीसा चत्तारि य होंति तसंम्मि॥

॥ ३ ॥ नव चेव तहा चउरो सत्तावीसा य अट्ठ चउरंसे।
तिगदुगपन्नरसेव य छच्चेव य आयए होंति॥

॥ ४ ॥ पणयाला बारसगं तह चेव य आययम्मि संठाणे।
वीसा चत्तालीसा परिमंडलए य संठाणे॥" इत्यादि॥

—सम्प्रत्येतेषामेव वर्णादीनां परस्परं संवेधमाह—

मू. (१३-वर्तते) जे वण्णओ कालवण्णपरिणता ते गंधओ सुब्भिगंधपरिणतावि दुब्भिगंधपरिणतावि रसओ तित्तरसपरिणयावि कडुयरसपरिणयावि कसायरसपरिणयावि अंबिलरसपरिणयावि महुररसपरिणयावि फासओ कक्खडफासपरिणयावि मउयफासपरिणयावि गुरुयफासपरिणयावि लहुयफासपरिणयावि सीयफासपरिणयावि उसिणफासपरिणयावि निद्धफासपरिणयावि लुक्खफासपरिणयावि संठाणओ परिमंडलसंठाणपरिणतावि वट्टसंठाण-परिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आयतसंठाणपरिणायावि २०,

जे वन्नओ नीलवण्णपरिणता ते गंधओ सुब्भिगंधपरिणायावि दुब्भिगंधपरिणयावि रसओ तित्तरसपरिणयावि कडुयरसपरिणतावि कसायरसपरिणतावि अंबिलरसपरिणतावि महुररसपरिणतावि फासओ कक्खडफासपरिणतावि मउयफासपरिणतावि गुरुयफासपरिणतावि लहुयफासपरिणतावि सीतफासपरिणतावि उसिणफासपरिणतावि निद्धफासपरिणतावि लुक्खफासपरिणतावि संठाणओ परिमंडलसण्ठाणपरिणतावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आयतसंठाणपरिणयावि २०,

जे वण्णओ लोहियवण्णपरिणया ते गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणयावि रसओ तित्तरसपरिणतावि कडुयरसपरिणतावि कसायरसपरिणतावि अंबिलरसपरिणयावि महुररसपरिणतावि फासओ कक्खडफासपरिणतावि मउयफासपरिणातावि गुरुयफासपरिणयावि लहुयफासपरिणतावि सीतफासपरिणतावि उसिणफासपरिणतावि निद्धफासपरिणयावि लुक्खफासपरिणयावि संढाणओ परिमंडलसंठाणपरिणतावि वट्टसंठाणपरिणतावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आयतसंठाणपरिणतावि २०,

जे वण्णओ हालिद्दवण्णपरिणया ते गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणयावि रसओ तित्तरसपरिणयावि कडुयरसपरिणतावि कसायरसपरिणतावि अंबिलरसपरिणतावि महुररसपरिणयावि फासओ कक्खडफासपरिणयावि मउयफासपरिणयावि गुरुयफासपरिणयावि लहुयफासपरिणयावि सीयफासपरिणयावि उसिणफासपरिणयावि निद्धफासपरिणयावि लुक्खफासपरिणयावि संठाणओ परिमंडलसंठाणपरिणयावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणतावि आयतसंठाणपरिणतावि २०,

जे वन्नओ सुक्किलवण्णपरिणता ते गंधओ सुब्भिगंधपरिणतावि दुब्भिगंधपरिणतावि रसओ तित्तरसपरिणतावि कडुयरसपरिणतावि कसायरसपरिणतावि अंबिलरसपरिणतावि महुररसपरिणतावि फासओ कक्खडाफासपरिणतावि गुरुयफासपरिणतावि लहुयफासपरिणतावि सीयफासपरिणतावि उसिणफासपरिणतावि निद्धफासपरिणतावि लुक्खफासपरिणतावि संठाणओ परिमंडलसंठाणपरिणयावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आययसंठाणपरिणयावि २०, १००।

जे गंधओ सुब्भिगंधपरिणया ते वण्णओ कालवण्णपरिणयावि नीलवण्णपरिणयाविलोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किलवण्णपरिणयावि रसओ तित्तरसपरिणयावि कडुयरसपरिणतावि कसायरसपरिणतावि अंबिलरसपरिणतावि महुररसपरिणयावि फासओ कक्खडफासपरिणतावि मउयफासपरिणतावि गरुयफासपरिणतावि लहुयफासपरिणतावि सीतफासपरणतावि उसिणफासपरिणयावि निद्धफासपरिणयावि लुक्खफासपरिणयावि संणंठाणओ परिमंडलसंठाणपरिणयावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आययसंठाणपरिणयावि २३, जे गंधओ दुब्भिगंधपरिणया ते वण्णओ कालवण्णपरिणयावि नीलवण्णपरिणयावि लोहियवण्णपरिणयावि हारिद्दवण्णपरिणयावि सुक्किलवण्णपरिणयावि रसओ तित्तरसपरिणयावि कडुयरसपरिणयावि कसायरसपरिणयावि अंबिलरसपरिणयावि महुररसपरिणयावि फासओ कक्खडफासपरिणयावि मउफासपरिणयावि गुरुयफासपरिणयावि लहुयफासपरिणयावि सीयफासपरिणयावि उसिणफासप० निद्धफासप० लुक्खफासपरिणयावि संठाणओ परिमंडल- संठाणपरिणयावि वट्टसंठाण० तंससंठाणप० चउरंससंठाणपरिणयावि आययसंठाणपरिणयावि २६, ४६।

जे रसओ तित्तरसपरिणया ते वण्णओ कालवण्णपरिणतावि नीलवण्णपरिणयावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किलवण्णपरिणयावि गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणयावि फासओ कक्खडफासपरिणयावि मउयफासपरिणतावि गुरुयफासपरिणतावि लहुयफासपरिणतावि सीतफासपरिणतावि उसिणफासपरिणतावि निद्धफासपरिणयावि लुक्खफासपरिणयावि संठाणओ परिमंडलसंठाणपरिणयावि वट्टसंठाण- परिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आययसंठाणपरिणयावि २०,

जेरसओ कडुयरसपरिणता ते वण्णओ कालवण्णपरिणयावि नीलवण्णपरिणयावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किलवण्णपरिणयावि गंधओ सुब्भिगन्धपरिणयावि

दुब्भिगंधपरिणयावि फासओ कक्खडफासपरिणयावि मउफासपरिणयावि गुरुयफासपरिणयावि लहुयफासपरिणयावि सीतफासपरिणयावि उसिणफासपरिणयावि निद्धफासपरिणयावि लुक्खफासपरिणयावि संठाणओ परिमंडलसंठाणपरिणयावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आययसंठाणपरिणयावि२०,

जे रसओ कसायरसपरिणता ते वण्णओ कालवण्णपरिणतावि नीलवण्णपरिणतावि लोहियवण्णपरिणतावि हालिद्दवण्णपरिणयावि सुक्किलवण्णपरिणयावि गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणयावि फासओ कक्खडफासपरिणयावि मउयफासपरिणयावि गुरुयफासपरिणयावि लहुयफासपरिणतावि सीतफासपरिणतावि उसिणफासपरिणयावि निद्धफासपरिणयावि लुक्खफासपरिणयावि संठाणओ परिमंडलसंठाणपरिणतावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आययसंठाणपरिणयावि२०,

जे रसओ अंबिलरसपरिणया ते वण्णओ कालवण्णपरिणयावि नीलवण्णपरिणयावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किलवण्णपरिणयावि गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणयावि फासओ कक्खडफासपरिणयावि मउयफासपरिणयावि गुरुयफासपरिणयावि लहुयफासपरिणयावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आययसंठाणपरिणयावि २०,

जे रसओ महुररसपरिणया ते वण्णओ कालवण्णपरिणयावि नीलवण्णपरिणयावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किलवण्णपरिणयावि गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणयावि फासओ कक्खडफासपरिणयावि मउयफासपरिणयावि गुरुयफासपरिणतावि लहुयफासपरिणतावि सीतफासपरिणयावि उसिणफासपरिणयावि निद्धफासपरिणयावि लुक्खफासरिणतावि संठाणओ परिमंडलसंठाणपरिणतावि वट्टसंठाणपरिणतावि तंससंठाणपरिणतावि चउरंससंठाणपरिणतावि आययसंठाणपरिणयावि २०, १००।

जे फासतो कक्खडफासपरिणता ते वण्णओ कालवण्णपरिणतावि नीलवण्णपरिणतावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणतावि सुक्किलवण्णपरिणतावि गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणतावि रसओ तित्तरसपरिणतावि कडुयरसपरिणतावि कसायरसपरिणतावि अंबिलरसपरिणतावि महुररसपरिणतावि फासओ गुरुयफासपरिणतावि लहुयफासपरिणतावि सीतफासपरिणतावि उसिणफासपरिणतावि निद्धफासपरिणतावि लुक्खफासपरिणतावि संठाणतो परिमंडलसंठाणपरिणतावि वट्टसंठाणपरिणतावि तंससंठाणपरिण- तावि चउरंससंठाणपरिणतावि आयतसंठाणपरिणयावि २३,

जे फासओ मउयफासपरिणता ते वण्णओ कालवण्णपरिणतावि नीलवण्णपरिणतावि लोहियवण्णपरिणतावि हालिद्दवण्णपरिणयावि सुक्किलवण्णपरिणयावि गंधओ सुब्भिगंधपरिणतावि दुब्भिगंधपरिणतावि रसओ तित्तरसपरिणतावि कडुयरसपरिणतावि कसायरसपरिणतावि अंबिलरसपरिणतावि महुररसपरिणतावि फासओ गुरुयफासपरिणयावि लहुयफासपरिणयावि सीतफासपरिणयावि उसिणफासपरिणयावि निद्धफासपरिणतावि लुक्खफासपरिणयावि संठाणओ परिमंडलसंठाणपरिणयावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि

चउरंससंठाणपरिणयावि आययसंठाणपरिणयावि २३,

जे फासओ गुरुयफासपरिणता ते वण्णओ कालवण्णपरिणतावि नीलवण्णपरिणतावि लोहियवण्णपरिणतावि हालिद्दवण्णपरिणतावि सुक्किल्लवण्णपरिणतावि गन्धओ सुब्भिगंधपरिणतावि दुब्भिगंधपरिणतावि रसओ तित्तरसपरिणतावि कडुयरसपरिणतावि कसायपसपरिणतावि अंबिलरसपरिणतावि महुररसपरिणतावि फासओ कक्खडफासपरिणतावि मउयासपरिणतावि सीयफासपरिणतावि उसिणफासपरिणतावि निद्धफासपपरिणतावि लुक्खफासपरिणतावि संठाणओ परिमंडलसंठाणपरिणतावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आययसंठाणपरिणयावि २३,

जे फासओ लहुयफासपरिणता ते वण्णओ कालवण्णपरिणतावि नीलवण्णपरिणयावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणतावि सुक्किल्लवण्णपरिणतावि गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणयावि रसओ तित्तरसपरिणतावि कडुयरसपरिणतावि कसायरसपरिणतावि अंबिलपसपरिणतावि महुररसपरिणतावि फासओ कक्खडफासपरिणतावि मउयफासपरिणयावि सीयफासपरिणयावि उसिणफासपरिणयावि निद्धफासपरिणतावि लुक्खफासपरिणतावि संठाणओ परिमंडलसंठाणपरिणतावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आययसंठाणपरिणयावि २३,

जे फासओ सीयफासपरिणता ते वण्णओ कालवण्णपरिणयावि नीलवण्णपरियावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणतावि सुक्किल्लवण्णपरिणयावि गंधओ सुब्भिगंधपरिणतावि दुब्भिगंधपरिणतावि रसओ तित्तरसपरिणयावि कडुयरसपरिणयावि कसायरसपरिणतावि अंबिलरसपरिणतावि महुररसपरिणतावि फासओ कक्खडफासपरिणयावि मउयफासपरिणयावि गुरुयफासपरिणतावि लहुयफासपरिणयावि निद्धफासपरिणतावि लुक्खफासपरिणयावि संठाणओ परिमंडलसंठाणपरिणयावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आयतसंठाणपरिणयावि २३,

जे फासओ उसिणफासपरिणता ते वण्णओ कालवण्णपरिणयावि नीलवण्णपरिणयावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणयावि रसओ तित्तरसपरिणयावि कडुयरसपरिणयावि कसायरसपरिणयावि अंबिलरसपरिणयावि महुररसपरिणयावि फासओ कक्खडफासपरिणयावि मउयफासपरिणयावि गुरुयफासपरिणयावि लहुयफासपरिणयावि निद्धफासपरिणयावि लुक्खफासपरिणयावि संठाणओ परिमंडलसंठाणपरिणयावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणपरिणयावि आयतसंठाणपरिणतावि २३,

जे फासओ निद्धफासपरिणता ते वण्णओ कालवण्णपरिणतावि नीलवण्णपरिणतावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधनपरिणयावि रसओ तित्तरसपरिणयावि कडुयरसपरिणयावि कसायरसपरिणयावि अंबिलरसपरिणयावि महुररसपरिणयावि फासओ कक्खडफासपरिणयावि मउयफासपरिणयावि गुरुयफासपरिणयावि लहुयफासपरिणयावि सीतफासपरिणतावि उसिणफासपरिणयावि संठा-

णओ परिमंडलसंठाणपरिणयावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंस-संठाणपरिणयावि आययसंठाणपरिणयावि २३,

जे फासओ लुक्खफासपरिणता ते वण्णओ कालवण्णपरिणतावि नीलवण्णपरिणयावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि गंधओ सुब्भिगंधपरिण-यावि दुब्भिगंधपरिणयावि तित्तरसपरिणयावि कडुयरसपरिणयावि कसायरसपरिणयावि अंबिलरसपरिणयावि महुररसपरिणयावि फासओ कक्खडफासपरिणयावि मउयफासपरिणयावि गुरुयफासपरिणयावि लहुयफासपरिणयावि सीतफासपरिणयावि उसिणफासपरिणयावि संठाणओ परिमंडलसंठाणपरिणयतावि वट्टसंठाणपरिणयावि तंससंठाणपरिणयावि चउरंससंठाणप० आययसंठाणप० २३, १८४।

जे संठाणओ परिमंडलसंठाणपरिणता ते वण्णओ कालवण्णपरिणतावि नीलवण्ण-परिणयावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणयावि रसओ तित्तरसपरिणयावि कडुयरसपरिणयावि कसायरसपरिणयावि अंबिलरसपरिणयावि महुररसपरिणयावि फासओ कक्खडफासपरिणयावि मउयफासपरिणयावि गुरुयफासपरिणयावि लहुयफासपरिणयावि सीयफासपरिणयावि उसिणफासपरिणयावि निद्धफासपरिणयावि लुक्खफासपरिणयावि २०,

जे संठाणओ वट्टसंठाणपरिणता ते वण्णओ कालवण्णपरिणयावि नीलवण्णपरिण- यावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणयावि रसओ तित्तरसपरिणतावि कडुयरसपरिणतावि कसायरसपरिणतावि अंबिरसपरिणयावि महुररसपरिणतावि फासओ कक्खडफासपरिणतावि मउयफासपरिणयावि गुरुयफासपरिणयावि लहुयफसपरिणयावि सीयफासपरिणयावि उसिणफासपरिणयावि निद्धफासपरिणयावि लुक्खफासपरिणयावि २०,

जे संठाणओ तंससंठाणपरिणता ते वण्णओ कालवण्णपरिणयावि नीलवण्णपरिणयावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि गंधओ सुब्भिगंध-परिणयावि दुब्भिगंधपरिणयावि रसओ तित्तरसपरिणयावि कडुयरसपरिणयावि कसायरस-परिणयावि अंबिलरसपरिणयावि महुररसपरिणयावि फासओ कक्खडफासपरिणयावि मउय-फासपरिणयावि गुरुयफासपरिणयावि लहुयफासपरिणयावि सीयफासपरिणयावि उसिणफास-परिणयावि निद्धफासपरिणयावि लुक्खफासपरिणयावि २०,

जे संठाणओ चउरंससंठाणपरिणता ते वण्णओ कालवण्णपरिणतावि नीलवण्ण-परिणतावि लोहियवण्णपरिणतावि हालिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि गंधओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणयावि रसओ तित्तरसपरिणयावि कडुयरसपरिणयावि कसायरसपरिणयावि अंबिलरसपरिणयावमहुररसपरिणयावि फासओ कक्खडफासपरिणतावि मउयफासपरिणतावि गुरुयफासपरिणतावि लहुयफासपरिणतावि सीयफासपरिणयावि उसिणफासपरिणयावि निद्धफासपरिणवावि लुक्खफासपरिणयावी २०,

जे संठाणओ आयतसंठाणपरिणता ते वण्णओ कालवण्णपरिणतावि नीलवण्णपरिण-

यावि लोहियवण्णपरिणयावि हालिद्दवण्णपरिणयावि सुक्किल्लवण्णपरिणयावि गन्धओ सुब्भिगंधपरिणयावि दुब्भिगंधपरिणयावि रसओ तित्तरसपरिणतावि कडुयरसपरिणतावि कसायरसपरिणतावि अंबिलरसपरिणयावि महुररसपरिणयावि फासओ कक्खडफासपरिणयावि मउयफासपरिणयावि गुरुयफासपरिणयावि लहुयफासपरिणयावि सीयफासपरिणयावि उसिणफासपरिणयावि निद्धफासपरिणयावि लुक्खफासपरिणतावि २०, १०० ।

सेत्तं रूविअजीवपन्नवणा, सेत्तं अजीवपन्नवणा ।

वृ. ये स्कन्धा दयो 'वर्णतो' वर्णमाश्रित्य कालवर्णपरिणता अपि भवन्ति ते 'गंधतो' गन्धमाश्रित्य सुरभिगन्धपरिणता अपि भवन्ति, दुरभिगन्धपरिणता अपि, किमुक्तं भवति ? – गन्धमधिकृत्य ते भाज्याः,केचित् सुरभिगन्धपरिणता भवन्ति केचिद्दुरभिगन्धपरिणताः, न तु प्रतिनियतैकगन्धपरिणामपरिणता एवेति, एवं च रसतः स्पर्शतः संस्थानतश्च वाच्याः, तत्र द्वौ गन्धौ पञ्च रसा अष्टौ स्पर्शाः पञ्च संस्थानानीति, एते च मीलिता विंशतिरिति कृष्णवर्णपरिणता एतावतो भङ्गांल्लभन्ते २०, एवं नीलवर्णपरिणता अपि २०, लोहितवर्णपरिणता अपि २०, हारिद्रवर्णपरिणता अपि २०, शुक्लवर्णपरिणता अपि २०, एवं पञ्चभिर्वर्णैर्लब्धं शतम् १०० ।

गन्धमधिकृत्याह–'ये गंधतो' इत्यादि, ये 'गन्धतो' गन्धमधिकृत्य सुरभिगनधपरिणामपरिणतास्ते वर्णतः कालवर्णपरिणता अपि नीलवर्णपरिणता अपि लोहितवर्णपरिणता अपि हारिद्रवर्णपरिणता अपि शुक्लवर्णपरिणता अपि ५, एवं रसतः ५ स्पर्शतः ८ संस्थानतः ५, एते च मीलितास्त्रयोविंशतिः २३ इति सुरभिगन्धपरिणतास्त्रयोविंशतिभङ्गांलभन्ते, एवं दुरभिगन्धपरिणता अपि २३, ततो गन्धपदेन लब्धा भङ्गानां षट्चत्वारिंशत् ४६ ।

रसमधिकृत्याह–ये 'रसतो' रसमधिकृत्य तिक्तरसपरिणतास्ते वर्णतः ५ गन्धतः २ स्पर्शतः ८ संस्थानतः ५ एते सर्वेऽप्येकत्र मीलिता विंशतिः इति तिक्तरसपरिणता विंशतिभङ्गांल्लभन्ते, एवं कटुकरसपरिणताः २० कषायरसपरिणताः २० अम्लरपसरिणताः २० मधुररसपरिणताश्च २०, एवं रसपञ्चटकसंयोगे लब्धं भङ्गकानां शतम् १०० इत्यादि ।

स्पर्शमधिकृत्याह–'जे फासतो कक्खडफासपरिणया' इत्यादि, ये स्पर्शतः कर्कस्पर्शपरिणतास्ते वर्णतः ५ गन्धतः २ रसतः ५ स्पर्शतः ६ प्रतिपक्षस्पर्शयोगाभावात् संस्थानतः ५, एते सर्वेऽप्येकत्र मीलितास्त्रयोविंशतिः २३, एतावतो भङ्गान् कर्कशस्पर्शपरिणता लभन्ते २३, एतावत एव मृदुस्पर्शपरिणताः २३ गुरुस्पर्शपरिणताः २३ लघुस्पर्शपरिणताः २३ शीतस्पर्शपरिणताः २३ उष्णस्पर्शपरिणताः २३ स्निग्धस्पर्शपरिणताः २३ रूक्षस्पर्शपरिणताः २३, एतैषामेकत्र मीलने जातं भङ्गकानां चतुरशीत्यधिकं शतं १८४ इत्यादि ।

संस्थानमधिकृत्याह–'जे सण्ठाणओ परिमण्डलसण्ठाणपरिणया' इत्यादि, ये संस्थानतः परिमण्डलसंस्थानपरिणतास्ते वर्णतः ५ गन्धतः २ रसतः ५ स्पर्शतः ८ एते सर्वेऽप्येकत्र मीलिताः विंशतिः २० एतावतो भङ्गान् परिमण्डलसंस्थानपरिणता लभन्ते, एवं वृत्तसंस्थानपरिणताः २० त्र्यस्रसंस्थानपरिणताः २० चतुरस्रसंस्थानपरिणताः २० आयतसंस्थानपरिणताः २०, अमीषां चैकत्र मीलने लब्धं भङ्गकानां शतम्, एतेषां च वर्णगन्धरसस्पर्शसंस्थानानां सकलभङ्गसङ्कलने जातानि पञ्च शतानि त्रिंशदधिकानि ५३० । इह यद्यपि बादरेषु स्कन्धेषु पञ्चापि वर्णा द्वावपि

गन्धौ पञ्चापि रसाः प्राप्यन्ते, ततोऽ-वधिकृतवर्णादिव्यतिरेकेण शेषवर्णादिभिरपि भङ्गाः सम्भवन्ति, तथापि तेष्वेव बादरेषु स्कन्धेषु ये व्यवहारतः केवलकृष्णवर्णाद्युपेता अपान्तरालस्कन्धा यथा देहस्कन्ध एव लोचनस्कन्धः कृष्णस्तदन्तर्गत एव कश्चिल्लोहितोऽन्यस्तदन्तर्गत एव शुक्ल इत्यादि ते इह विवक्ष्यन्ते, तेषां चान्यद्वर्णान्तरादि न सम्भवति,

स्पर्शचिन्तायां त्ववधिकृतस्पर्शं प्रति प्रतिपक्षव्यतिरेकेणान्ये स्पर्शा लोकेऽप्यविरोधिनो दृश्यन्ते ततो यथोक्तैव भङ्गसङ्ख्या, साऽपि च परिस्थूरन्यायमङ्गीकृत्याभिहिता, अन्यथा प्रत्येकमप्येषां तारतम्येनानन्तत्वादनन्ता भङ्गाः संभवन्ति, एतेषां च वर्णादिपरिणामानां जघन्यतोऽवस्थानमेकं समयमुत्कर्षतोऽसङ्ख्येयं कालम्, सम्प्रत्युपसंहारमाह 'सेत्तं रूविअजीवपन्नवणा, सेत्तं अजीवपन्नवणा' सैषा रूप्यजीवप्रज्ञापना, सैषाऽजीवप्रज्ञापना ॥

साम्प्रतं जीवप्रज्ञापनामभिधित्सुस्तद्विषयं प्रश्नसूत्रं चा(ऋमा)ह–

मू. (१४) से किं तं जीवपन्नवणा ?, २ दुविहा पन्नत्ता, तंजहा–संसारसमावण्णजीवपन्नवणा य असंसारसमावण्णजीवपन्नवणा य

वृ. अथ का सा जीवप्रज्ञापना ?, सूरिराह–जीवप्रज्ञापना द्विविधा प्रज्ञप्ता, तद्यथा–संसारसमापन्नजीवप्रज्ञापना चासंसारसमापन्नजीवप्रज्ञापना च, तत्र संसरणं संसारो–नारकतिर्यग्नरामरभवानुभवलक्षणस्तं सम्यग्–एकीभावेनापन्नाः संसारसमापन्नाः, संसारवर्त्तिन इत्यर्थः, ते च ते जीवाश्च तेषां प्रज्ञापना संसारसमापन्नजीवप्रज्ञापना,

न संसारोऽसंसारो–मोक्षस्तं समापन्ना असंसारसमापन्ना मुक्ता इत्यर्थः, ते च ते जीवाश्च तेषां प्रज्ञापनाऽसंसारसमापन्नजीवप्रज्ञापना, चशब्दौ प्राग्वत् । तत्राल्पवक्तव्यत्वात्प्रथमतोऽसंसारसमापन्नजीवप्रज्ञापनाभिधित्सुस्तद्विषयं प्रश्नसूत्रमाह–

मू. (१५) से किं तं असंसारसमावण्णअणजीवपन्नवणा ?, असंसारसमावण्णजीवपन्नवणा दुविहा पन्नत्ता, तंजहा–अनन्तरसिद्धअसंसारसमावन्नजीवपन्नवणा य परम्परसिद्धअसंसारसमावन्नजीवपन्नवणा य ।

वृ. अथ का सा असंसारसमापन्नजीवप्रज्ञापना ?, सूरिराह–असंसारसमापन्नजीवप्रज्ञापना द्विविधा प्रज्ञप्ता, तद्यथा–अनन्तरसिद्धासंसारसमापन्नजीवप्रज्ञापना च परम्परसिद्धासंसारसमापन्नजीवप्रज्ञापना च, तत्र न विद्यतेऽन्तरं–व्यवधानमर्थात्समयेनयेषांतेऽनन्तरास्ते च ते सिद्धाश्चानन्तरसिद्धाः, सिद्धत्वप्रथमसमये वर्त्तमाना इत्यर्थः, ते च तेऽसंसारसमापन्नजीवाश्चानन्तरसिद्धासंसारसमापन्नजीवास्तेषां प्रज्ञापनाऽनन्तरसिद्धाऽसंसारसमापन्नजीवप्रज्ञापना, चशब्दः स्वगतानेकभेदसूचकः, तथा विवक्षिते प्रथमे समये यःसिद्धस्तस्य यो द्वितीयसमयसिद्धः स परस्तस्यापि यस्तृतीय- समयसिद्धः स परः, एवमन्येऽपि वाच्याः, परे च परे चेति वीप्सायां 'पृषोदरादय' इति परम्परशब्द-निष्पत्तिः, परम्पराश्च ते सिद्धाश्च परम्परसिद्धाः विवक्षितसिद्धस्य प्रथमसमयात् प्राग् द्वितीयादिषु समयेष्वनन्तामतीतांद्धां यावद्वर्त्तमाना इति भावः, ते च तेऽसंसारसमापन्नाश्च परम्परसिद्धा- संसारसमापन्नास्ते च ते जीवाश्च तेषां प्रज्ञापना परम्परसिद्धासंसारसमापन्नजीवप्रज्ञापना, अत्रापि चशब्दः स्वगतानेकभेदसूचकः ॥

मू. (१६) से किं तं अनन्तरसिद्धअसंसारसमावण्णजीवपन्नवणा ?, अनन्तरसिद्धअ-

संसारसमावन्नजीवपन्नवणा पन्नरसविहा पन्नत्ता, तंजहा-

तित्थसिद्धा अतित्थसिद्धा तित्थगरसिद्धा अतित्थगरसिद्धा सयंबुद्धसिद्धा पत्तेयबुद्धसिद्धा बुद्धबोहियसिद्धा इत्थीलिङ्गसिद्धा पुरिसलिङ्गसिद्धा नपुंसकलिङ्गसिद्धा सलिङ्गसिद्धा अन्नलिङ्गसिद्धा गिहिलिङ्गसिद्धा एगसिद्धा अनेगसिद्धा ।

वृ. 'से किंत'मित्यादि, अथ का सा अनन्तरसिद्धासंसारसमापन्नजीवप्रज्ञापना ?, सूरिराह-अनन्तरसिद्धासंसारसमापन्नजीवप्रज्ञापना पञ्चदशविधा प्रज्ञप्ता, अनन्तरसिद्धानामुपाधिभेदतः पञ्चदशविधत्वात्, तदेव पञ्चदशविधत्वं तेषामाह-'तंजहे'त्यादि, 'तद्यथे'ति पञ्चदशभेदोपदर्शनसूत्रकं. तीर्थसिद्धाः तीर्यते संसारसागरोऽनेनेति तीर्थं-यथावस्थितसकलजीवाजीवादिपदार्थसार्थप्ररूपकं परमगुरुप्रणीतं प्रवचनम्, तच्च निराधारं न भवति इति सङ्घः प्रथमगणधरो वा वेदितव्यः,उक्तं च -"तित्थं भंते ! तित्थं तित्थकरे तित्थं ? गो० अरिहा ताव नियम तित्थकरे, तित्थं पुन चाउव्वण्णो समणसङ्घो पढमगणहरो वे'ति, तस्मिन्नुत्पन्ने ये सिद्धास्ते तीर्थसिद्धाः, तथा तीर्थस्याभावोऽतीर्थं, तीर्थस्याभावश्चानुत्पादोऽपान्तराले व्यवच्छेदो वा तस्मिन् ये सिद्धास्तेऽतीर्थसिद्धाः, तत्र तीर्थस्यानुत्पादे सिद्धा मरुदेवीप्रभृतयः, न हि मरुदेव्यादिसिद्धिगमनकाले तीर्थमुत्पन्नमासीत्, तथा तीर्थस्य व्यवच्छेदः सुविधिस्वाम्याद्यपान्तरालेषु तत्र ये जातिस्मरणादिनाऽपवर्गमार्गमवाप्य सिद्धास्ते तीर्थव्यवच्छेदसिद्धाः २,

तथा तीर्थकराः सन्तो ये सिद्धास्ते तीर्थकरसिद्धाः ३ सामान्यकेवलिनःसन्तो ये सिद्धास्तेऽतीर्थकरसिद्धाः ४ तथा स्वयंबुद्धाः सन्तो ये सिद्धास्ते स्वयम्बुद्धसिद्धाः ५, प्रत्येकबुद्धाः सन्तो ये सिद्धास्ते प्रत्येकबुद्धिसिद्धाः ६, अथ स्वयम्बुद्धप्रत्येकबुद्धानां कः प्रतिविशेषः ?, उच्यते, बोध्युपधिश्रुतलिङ्गकृतो विशेषः, तथाहि-स्वयम्बुद्धा बाह्यप्रत्ययमन्तरेणैव बुध्यन्ते, स्वयमेव-बाह्यप्रत्ययमन्तरेणैव निजजातिस्मर- णादिना बुद्धाः स्वयम्बुद्धा इति व्युत्पत्तेः, ते च द्विधा-तीर्थंकरास्तीर्थकरव्यतिरिक्ताश्च, इह तीर्थकर- व्यतिरिक्तैरधिकारः, आह च नन्द्यध्ययनचूर्णिकृत्-"ते दुविहा संयबुद्धा-तित्थयरा तित्थयरवइरित्ता य, इह वइरित्तेहिं अहिगारो" इति।

प्रत्येकबुद्धास्तु बाह्यप्रत्ययमपेक्ष्य, प्रत्येकं-बाह्यं वृषभादिकं कारणमभिसमीक्ष्य बुद्धाः प्रत्येकबुद्धा इति व्युत्पत्तेः, तथा च श्रूयते-बाह्यप्रत्ययसापेक्षा करकण्ड्वादीनां बोधिः, बहिःप्रत्ययमपेक्ष्य च ते बुद्धाः सन्तो नियमतः प्रत्येकमेव विहरन्ति, न गच्छवासिन इव संहताः, आह च नन्द्यध्ययनचूर्णिकृत्-पत्तेयं-बाह्यं वृषभादिकं कारणमभिसमीक्ष्य बुद्धाः, बहिप्रत्ययं प्रति बुद्धानां च पत्तेयं नियमा विहारो जम्हा तम्हा य ते पत्तेयबुद्धा' इति, स्वयम्बुद्धानामुपधिर्द्वादशविध एव पात्रादिकः, प्रत्येकबुद्धानां तु द्विधा-जघन्यतस्तथोत्कर्षतश्च, तत्र जघन्यतो द्विविधः, उत्कर्षतो नवविधः प्रावरणवर्जः, उक्तं च-

"पत्तेयबुद्धाणं जहन्नेणं दुविहो उक्कोसेणं नवविहो नियमा पाउरणवज्जो भवइ" इति, तथा स्वयम्बुद्धानां पूर्वाधीतं श्रुतं भवति वा न वा, यदि भवति ततो लिङ्गं देवता वा प्रयच्छति गुरुसन्निधौ वा गत्वा प्रतिपद्यते, यदि च एकाकिविचरणसमर्थः इच्छा वा तस्य तथारूपा जायते तत एकाकी विहरति, अन्यथा गच्छवासेऽवतिष्ठते, अथ पूर्वाधीतं श्रुतं तस्य न भवति तर्हि नियमाद्गुरुसन्निधौ गत्वा लिङ्गं प्रतिपद्यते गच्छं चावश्यं न मुञ्चति, तथा चोक्तम्-

"पुव्वाहीयं सुयं से हवइ वा न वा, जइ से नत्थि तो लिङ्गं नियमा गुरुसन्निहे पडिवज्जइ गच्छे य विहरइत्ति, अह पुव्वाधीयसमयसम्भवोऽत्थि तो से लिङ्गं देवया पडियच्छइ गुरुसन्निहे वा पडिवज्जइ, जइ य एगविहारविहरणसमत्थो इच्छा वा से तो एक्को चेव विहरइ, अन्यथा गच्छे विहरइ" त्ति प्रत्येकबुद्धानां तु पूर्वाधीतं श्रुतं नियमतो भवति, तच्च जघन्यत एकादशाङ्गानि, उत्कर्षतः किञ्चिन्न्यूनानि दश पूर्वाणि, तथा लिङ्गं तस्मै देवता प्रयच्छति लिङ्गरहितो वा कदाचिद्भवति, तथा चोक्तम्–"पत्तेयबुद्धाणं पुव्वाहीयं सुयं नियमा हवइ, जहन्नेणं इक्कारस अङ्गा, उक्कोसेणं भिन्नदसपुव्वा, लिङ्गं च से देवया पयच्छइ, लिङ्गवज्जिओ वा भवइ, जओ भणियं–रुप्पं पत्तेयबुद्धा" इति।

तथा बुद्धा–आचार्यास्तैर्बोधिताः सन्तो ये सिद्धास्ते बुद्धबोधितसिद्धाः। एते च सर्वेऽपि केचित्स्त्रीलिङ्गसिद्धाः, स्त्रिया लिङ्गं स्त्रीलिङ्गं, स्त्रीत्वस्योपलक्षणमित्यर्थः, तच्च त्रिधा, तद्यथा–वेदः-शरीरनिर्वृत्तिर्नेपथ्यं च, तत्रेह शरीरनिर्वृत्त्या प्रयोजनम्, न वेदनेपथ्याभ्यां, वेदे सति सिद्धत्वाभावात्, नेपथ्यस्य चाप्रमाणत्वात्, आह च नन्द्यध्ययनचूर्णिकृत्–"इत्थीए लिङ्गं इत्थिलिङ्गं, इत्थीए उवलक्खणंति वुत्तं भवइ, तं च तिविहं–वेदो सरीरनिव्वित्ती नेवत्थं च, इह ससीरनिव्वत्तीए अहिगारो, न वेयनेवत्थेहिं"ति। ततस्तस्मिन् स्त्रीलिङ्गे वर्त्तमानाः सन्तो ये सिद्धास्ते स्त्रीलिङ्गसिद्धाः, एतेन यदाहुरा- शाम्बराः–'न स्त्रीणां निर्वाण'मिति, तदपास्तं द्रष्टव्यं, स्त्रीनिर्वाणस्य साक्षादनेन सूत्रेणाभिधानात्, तत्प्रतिषेधस्य युक्तया अनुपपन्नत्वात्, तथाहि–मुक्तिपथो ज्ञानदर्शनचारित्राणि 'सम्यग्दर्शन- ज्ञानचारित्राणि मोक्षमार्गः' इति वचनात्, सम्यग्दर्शनादीनि च पुरुषाणामिव स्त्रीणामप्यविकलानि, तथाहि–एवन्ते स्त्रियोऽपि सकलमपि प्रवचनार्थमभिरोचयमानाः,

जानते च षडावश्यककालिकोत्कालिकादिभेदभिन्नं श्रुतं, परिपालयन्ति सप्तदशप्रकारमकलङ्कं संयमं, धारयन्ति च देवासुराणामपि दुर्धरं ब्रह्मचर्यं, तप्यन्ते च तपांसि मासक्षपणादीनि, ततः कथमिव न तासां मोक्षसम्भवनः?, स्यादेतत्–अस्ति स्त्रीणां सम्यग्दर्शनं ज्ञानं वा, न पुनश्चारित्रं, संयमाभावात्, तथाहि–स्त्रीणामवश्यं वस्त्रपरिभोगेन भवितव्यमन्यथा विवृताङ्गयस्तास्तिर्यक्स्त्रिय इव पुरुषाणामभिभवनीया भवेयुः, लोके च गर्होपजायते, ततोऽवश्यं ताभिर्वस्त्रं परिभोक्तव्यं, वस्त्रपरिभोगे च सपरिग्रहता, सपरिग्रहत्वे च संयमाभाव इति, तदसमीचीनम्, सम्यक्सिद्धान्तापरिज्ञानात्, परिग्रहो हि परमार्थतो मूर्छाऽभिधीयते, 'मुच्छा परिग्गहो वुत्तो' इतिवचनात्, तथाहि–मूर्छारहितो भरतश्चक्रवर्ती सान्तःपुरोऽप्यादर्शकगृहेऽवतिष्ठमानो निष्परिग्रहो गीयते, अन्यथा केवलोत्पादासम्भवात्, अपि च–यदि मूर्छाया अभावेऽपि वस्त्रसंसर्गमात्रं परिग्रहो भवेत् ततो जिनकल्पं प्रतिपन्नस्य कस्यचित्साधोस्तुषारकणानुषक्ते प्रपतति शीते केनाप्यविषह्योपनिपातमद्य शीतमिति विभाव्य धर्मार्थिना शिरसि वस्त्रे प्रक्षिप्ते तस्य सपरिग्रहता भवेत्,

न चैतदिष्टं, तस्मान्न वस्त्रसंसर्गमात्रं परिग्रहः, किन्तु मूर्छा, सा च स्त्रीणां वस्त्रादिषु न विद्यते, धर्मोपकरणमात्रतया तस्योपादानात्, न खलु ता वस्त्रमन्तरेणात्मानं रक्षयितुमीशते, नापि शीतकालादिषु व्यग्रदशायां स्वाध्यायादिकं कर्तुं, ततो दीर्घतरसंयमपरिपालनाय यतनया वस्त्रं परिभुञ्जाना न ताः परिग्रहवत्यः, अथोच्येत–सम्भवति नाम स्त्रीणामपि सम्यग्दर्शनादिकं रत्नत्रयं, परं न तत् सम्भवमात्रेण मुक्तिपदप्रापकं भवति, किन्तु प्रकर्षप्राप्तम्, अन्यथा दीक्षानन्तरमेव सर्वेषामप्यविशेषेण मुक्तिपदप्राप्तिप्रसक्तिः, सम्यग्दर्शनादिरत्नत्रयप्रकर्षश्च स्त्रीणामसम्भवी, ततो

न निर्वाणमिति, तदप्ययुक्तम्, स्त्रीषु रत्नत्रयप्रकर्षासम्भवे ग्राहकप्रमाणस्याभावात्, न खलु सकलदेशकालव्याप्तया स्त्रीषु रत्नत्रयप्रकर्षासम्भवग्राहकं प्रमाणं विजम्भते, देशकालविप्रकृष्टेषु प्रत्यक्षस्याप्रवृत्तेः, तदप्रवृत्तौ चानुमानस्याप्यसम्भवात्, नापि तासु रत्नत्रयप्रकर्षासम्भवप्रतिपादकः कोऽप्यागमो विद्यते, प्रत्युत सम्भवप्रतिपादकः स्थाने स्थानेऽस्ति, यथेदमेव प्रस्तुतं सूत्रं, ततो न तासां रत्नत्रयप्रकर्षासम्भवः, अथमन्येथाः–स्वभावत एवातपेनेव छाया विरुध्यते स्त्रीत्वेन सह रत्नत्रयप्रकर्षः, ततस्तदसम्भवोऽ- नुमीयते, तदयुक्तमुक्तं, युक्तिविरोधात्,–

तथाहि–रत्नत्रयप्रकर्षः स उच्यते यतोऽनन्तरं मुक्तिपदप्राप्तिः, स चायोग्यवस्थाचरमसमयभावी, अयोग्यवस्था चास्मादृशामप्रत्यक्षा, ततः कथं विरोधगतिः ?, न हि अदृष्टेन सह विरोधः प्रतिपत्तुं शक्यते, मा प्राप्तयुरुषेष्वपि प्रसङ्गः, ननु जगति सर्वोत्कृष्टपदप्राप्तिः सर्वोत्कृष्टेनाध्यवसायेनावाप्यते, नान्यथा, एतच्चोभयोरप्यावयोरागमप्रामाण्यबलतः सिद्धं,

सर्वोत्कृष्टे च द्वे पदे–सर्वोत्कृष्टदुःखस्थानं सर्वोत्कृष्टसुखस्थानं च, तत्र सर्वोत्कृष्टदुःखस्थानं सप्तमनरकपृथ्वी, अतः परं परमदुःखस्थानस्याभावात्, सर्वोत्कृष्टसुखस्थानं तु निःश्रेयसं, तत्र स्त्रीणां सप्तमनरकपृथिवीगमनमागमे निषिद्धं, निषेधस्य च कारणं तद्गमनयोग्यतथाविधसर्वोत्कृष्टमनोवीर्यपरिणत्यभावः, ततः सप्तमपृथिवीगमनवत्त्वाभावात्, सम्मूर्छिमादिवत्, अपि च–यासां वादलब्धिविकुर्वणत्वादिलब्धौ पूर्वगतश्रुताधिगतौ च न सामर्थ्यमस्ति तासां मोक्षगमनसामर्थ्यमित्यतिदुःश्रद्धेयं,

तदेतदयुक्तं, यतो यदि नाम स्त्रीणां सप्तमनरकपृथिवीगमनं प्रति सर्वोत्कृष्टमनोवीर्यपरिणत्यभावः, तत एतावता कथमवसीयते–निःश्रेयसमपिप्रति तासां सर्वोत्कृष्टमनोवीर्यपरिणत्यभावोन हि यो भूमिकर्षणादिकं कर्मकर्तुं न शक्नोति स शास्त्राण्यप्यवगाहुं न शक्नोतीति प्रत्येतुं शक्यम्, प्रत्यक्षविरोधात्, अथ सम्मूर्छिमादिषूभयत्रापि सर्वोत्कृष्टमनोवीर्यपरिणत्यभावो दृष्टः ततोऽत्राप्यवसीयते, ननु यदि तत्र दृष्टस्तर्हि कथमत्रावसीयते ?

न खलु बहिर्व्याप्तिमात्रेण हेतुर्गमको भवति, किन्त्वन्तर्व्याप्तया, अन्तर्व्याप्तिश्च प्रतिबन्धबलेन, न चात्र प्रतिबन्धो विद्यते, न खलु सप्तमपृथिवीगमनं निर्वाणगमनस्य कारणं, नापि सप्तमपृथिवीगमनाविनाभावि निर्वाणगमनं, चरमशरीरिणां सप्तमपृथिवीगमनमन्तरेणैव निर्वाणगमनभावात्, न च प्रतिबन्धमन्तरेणैकस्याभावेऽन्यस्यावश्यमभावः, मा प्रापत् यस्य तस्य वा कस्यचिदभावे सर्वस्याभावप्रसङ्गः, यद्येवं तर्हि कथं सम्मूर्छिमादिषु निर्वाणगमनाभाव इति ?, उच्यते, तथाभवस्वाभाव्यात्, तथाहि–

ते सम्मूर्छिमादयो भवस्वभावत एव न सम्यग्दर्शनादिकं यथावत्प्रतिपत्तुं शक्यन्ते, ततो न तेषांनिर्वाणसम्भवः, स्त्रियस्तुप्रागुक्तप्रकारेण यथावत्सम्यग्दर्शनादिरत्नत्रयसम्पद्योग्याः, ततस्तासां न निर्वाणगमनाभावः, अपि च–भुजपरिसर्प्पा द्वितीयामेव पृथिवीं यावद्गच्छन्ति न परतः, परपृथिवीगमनहेतुतथारूपमनोवीर्यपरिणत्यभावात्, तृतीयां यावत्पक्षिणश्चतुर्थीं चतुष्पदाः पञ्चमीमुरगाः, अथ च सर्वेऽप्यूध्वमुत्कर्षतः सहस्रारं यावद्गच्छन्ति, तत्राधोगतिविषये मनोवीर्यपरिणतिवैषम्यदर्शनादूर्ध्वगतावपि च तद्वैषम्यम्, आह च–

॥ १ ॥ "विषयमगतयोऽप्यधस्तादुपरिष्टात्तुल्यमासहस्रारम् ।

गच्छन्ति च तिर्यञ्चस्तदधोगत्यूनताऽहेतुः ॥''

तथा च सति सिद्धं स्त्रीपुंसनामधोगतिवैषम्येऽपि निर्वाणं समं, यदप्युक्तम्–'अपि च यासां वादलब्धावित्यादि' तदप्यश्लीलं, वादविकुर्वणत्वादिलब्धिविरहेऽपि विशिष्टपूर्वगतश्रुताभावेऽपि माषतुषादीनां निःश्रेयससम्पदधिगमश्रवणात्, आह च–

॥ १ ॥ ''वादविकुर्वणत्वादिलब्धिविरहे श्रुते कनीयसि च ।
जिनकल्पमनः पर्यवविरहेऽपि न सिद्धिविरहोऽस्ति ॥''

अपि च–यदि वादादिलब्ध्यभावबन्निःश्रेयसाभावोऽपि स्त्रीणामभविष्यत् ततस्तथैव सिद्धान्ते प्रत्यपादयिष्यत्, यथा जम्बूयुगादारात् केवलज्ञानाभावो, न च प्रतिपाद्यते क्वापि स्त्रीणां निर्वाणाभाव इति, तस्मादुपपद्यते स्त्रीणां निर्वाणमिति कृतं प्रसङ्गेन । तथा पुंल्लिङ्गे–शरीर-निर्वृत्तिरूपे व्यवस्थिताः सन्तो ये सिद्धास्ते पुंल्लिङ्गसिद्धाः, एवं नपुंसकलिङ्गसिद्धाः, तथा स्वलिङ्गे–रजोहरणादिरूपे व्यवस्थिताः सन्तो ये सिद्धास्ते स्वलिङ्गसिद्धाः, तथाऽन्यलिङ्गे–परिव्राजकादिसम्बन्धिनि वल्कलकाषायादिरूपे द्रव्यलिङ्गे व्यवस्थिताः सन्तो ये सिद्धास्तेऽन्यलिङ्गसिद्धाः, गृहिलिङ्गे सिद्धा गृहिलिङ्गसिद्धाः मरुदेवीप्रभृतयः, तथैकसिद्धा एकस्मिन् २ समये एका एव सन्तः सिद्धा एकसिद्धाः, 'अनेगसिद्धा' इति एकस्मिन् समयेऽनेके सिद्धा अनेकसिद्धाः, अनेके चैकस्मिन्समये सिध्यन्त उत्कर्षतोऽष्टोत्तरशतसङ्ख्या वेदितव्याः, यस्मादुक्तम्–

॥ १ ॥ ''बत्तीसा अडयाला सट्ठी बावत्तरी य बोद्धव्वा ।
चुलसीई छन्नउइ उ दुरहियमट्ठुत्तरसयं च ॥''

अस्या विनेयजनानुग्रहाय व्याख्या–अष्टौ समयान् यावन्निरन्तरमेकादयो द्वात्रिंशत्पर्यन्ताः सिध्यन्तः प्राप्यन्ते, किमुक्तं भवति ? –प्रथमे समये जघन्यत एको द्वौ वोत्कर्षतो द्वात्रिंशत्सिध्यन्तः प्राप्यन्ते, द्वितीयेऽपि समये जघन्यत एको द्वौ वोत्कर्षतो द्वात्रिंशत्, एवं यावदष्टमेऽपि समये जघन्यत एको द्वौ वोत्कर्षतो द्वात्रिंशत्, ततः परमवश्यमन्तरं, तथा त्रयस्त्रिंशदादयोऽष्टचत्वारिंशत्पर्यन्ता निरन्तरं सिध्यन्तः सप्त समयान् यावत्प्राप्यन्ते, परतो नियमादन्तरं, तथा एकोनपञ्चाशदादयः षष्टिपर्यन्ता निरन्तरं सिध्यन्त उत्कर्षतः षट् समयान् यावदवाप्यन्ते परतोऽवश्यमन्तरं, तथैकषष्ट्यादयो द्विसप्ततिपर्यन्ता निरन्तरं सिध्यन्त उत्कर्षतः पञ्च समयान् यावदवाप्यन्ते ततः परमन्तरं, त्रिसप्तत्यादयश्चतुरशीतिपर्यन्ता निरन्तरं सिध्यन्त उत्कर्षतश्चतुरः समयान् यावत्तत ऊर्ध्वमन्तरं, तथा पञ्चाशीत्यादयः षन्नवतिपर्यन्ता निरन्तरं सिध्यन्त उत्कर्षतस्त्रीन् समयान् यावत्परतो नियमादन्तरं, तथा सप्तनवत्यादयो द्व्युत्तरशतपर्यन्ता निरन्तरं सिध्यन्त उत्कर्षतो द्वौ समयौ परतोऽवश्यमन्तरं, तथा त्र्युत्तरशतादयोऽष्टोत्तरशतपर्यन्ताः सिध्यन्तो नियमादेकमेव समयं यावदवाप्यन्ते, न द्वित्रादिसमयान्, तदेवमेकस्मिन् समये उत्कर्षतोऽष्टोत्तरशतसङ्ख्याः सिध्यन्तः प्राप्यन्ते इत्यनेकसिद्धा उत्कर्षतोऽष्टोत्तरशतप्रमाणा वेदितव्याः ।

आह–तीर्थसिद्धातीर्थसिद्धरूपभेदद्वय एव शेषभेदा अन्तर्भवन्ति तत्किमर्थं शेषभेदोपादानम् ?, उच्यते, सत्यमन्तर्भवन्ति परं न तीर्थसिद्धातीर्थसिद्धभेदद्वयोपादानमात्राच्छेषभेदपरिज्ञानं भवति, विशेषपरिज्ञानार्थं च एष शास्त्रारम्भप्रयास इति शेषभेदो पादानम्,

उपसंहारमाह–'सेत्तमि'त्यादि, सैषा अनन्तरसिद्धासंसारसमापन्नजीवप्रज्ञापना ॥

मू. (१७) से किं तं परम्परसिद्धअसंसारसमावण्णजीवपन्नवणा ?, २ अनेगविहा पन्नत्ता, तंजहा–अपढमसमयसिद्धा दुसमयसिद्धा तिसमयसिद्धा चउसमयसिद्धा जाव संखिज्जसमयसिद्धा असंखिज्जसमयसिद्धा अनन्तसमयसिद्धा, सेतं परम्परसिद्धासंसारसमावण्णजीवपन्नवणा, सेत्तं असंसारसमावण्णजीवपन्नवणा ।

वृ. अथ का सा परम्परसिद्धासंसारसमापन्नजीवप्रज्ञापना ?, सूरिराह–परम्परसिद्धासंसारसमापन्नजीवप्रज्ञापनाऽनेकविधा प्रज्ञप्ता, परम्परसिद्धानामनेकविधत्वात्, तदेवानेकविधत्वमाह–'तंजहे'त्यादि, 'तद्यथे'त्यनेकविधत्वोपदर्शने, 'अप्रथमसमयसिद्धा' इति, न प्रथमसमयसिद्धा अप्रथमसमयसिद्धाः–परम्परसिद्धविशेषणप्रथमसमयवर्त्तिनः, सिद्धत्वसमयाद्वितीयसमयवर्त्तिन इत्यर्थः, त्र्यादिषु तु समयेषु द्वितीयसमयसिद्धादय उच्यन्ते, यद्वा सामान्यतः प्रथमसमयसिद्धा इत्युक्तं, तत एतद्विशेषतो व्याचष्टे–

द्विसमयसिद्धास्त्रिसमयसिद्धाश्चतुःसमयसिद्धा इत्यादि यावच्छब्दकरणात् पञ्चसमयसिद्धादयः परिगृह्यन्ते । 'सेत्त' मित्यादि निगमनद्वयं सुगमं, तदेवमुक्ता असंसारसमापन्नजीवप्रज्ञापना ॥ सम्प्रतिसंसारसमापन्नजीवप्रज्ञापनामभिधित्सुस्तद्विषयं प्रश्नसूत्रमाह–

मू. (१८) से किं तं संसारसमावण्णजीवपन्नवणा ?, संसारसमावण्णजीवपन्नवणा पंचविहा पन्नत्ता, तंजहा–एगेंदियसंसारसमावण्णजीवपन्नवणा बेइंदियसंसारसमावण्णजीवपन्नवणा तेइंदियसंसारसमावण्णजीवपन्नवणा चउरिंदियसंसारसमावण्णजीवपन्नवणा पंचिंदियसंसारसमावण्णजीवपन्नवणा ।

वृ. अथ का सा संसारसमापन्नजीवप्रज्ञापना ?, सूरिराह–संसारसमापन्नजीवप्रज्ञापना पञ्चविधा प्रज्ञप्ता, तद्यथा–एकेन्द्रियसंसारसमापन्नजीवप्रज्ञापनेत्यादि, तत्रैकं स्पर्शनलक्षणमिन्द्रियं येषां ते एकेन्द्रियाः–पृथिव्युच्चुतेजोवायुवनस्पतयो वक्ष्यमाणस्वरूपास्ते च ते संसारसमापन्नजीवाश्च तेषां प्रज्ञापना एकेन्द्रियसंसारसमापन्नजीवप्रज्ञापना, एवं सर्वपदेष्वक्षरघटना कार्या, नवरं द्वे स्पर्शनरसनालक्षणे इन्द्रिये येषां ते द्वीन्द्रियाः शङ्खशुक्तिकादयः, त्रीणि–स्पर्शनरसनाघ्राणलक्षणानीन्द्रियाणि येषां ते त्रीन्द्रियाः–यूकामत्कुणादयः, चत्वारि स्पर्शनरसनाघ्राणचक्षुर्लक्षणानीन्द्रियाणि येषां ते चतुरिन्द्रियाः–दंशमशकादयः, पञ्च स्पर्शनरसनाघ्राणचक्षुःश्रोत्रलक्षणानीन्द्रियाणि येषां ते पञ्चेन्द्रियाः–मत्स्यमकरमनुजादयः ।

अमीषां चैकादिसङ्ख्यानामिन्द्रियाणां स्पर्शनादीनामसंव्यवहारराशेरारभ्य प्रायोऽनेनैव क्रमेण लाभ इति सम्प्रत्ययार्थमित्थं क्रमेणैकेन्द्रियाद्युपन्यासः ।

इन्द्रियाणि च द्विधा, तद्यथा–द्रव्येन्द्रियाणि भावेन्द्रियाणि च, तत्र द्रव्येन्द्रियाणि निर्वृत्त्युपकरणरूपाणि, तानि च सविस्तरं नन्द्यध्ययनटीकायां व्याख्यातानीति न भूयो व्याख्यायन्ते भावेन्द्रियाणि क्षयोपशमोपयोगरूपाणि, तानि चानियतानि, एकेन्द्रियाणामपि क्षयोपशमोपयोगरूपभावेन्द्रियपञ्चकसम्भवात्, केषाञ्चित्तत्तत्फलदर्शनात्, तथाहि–बकुलादयो मत्तकामिनीगीतध्वनिश्रवणसविलासकटाक्षनिरीक्षणमुखक्षिप्तसुरागण्डूषगन्धाघ्राणरसास्वादस्तनाद्यवयवस्पर्शनतः प्रमोदभावेनाकालक्षेपमुपलभ्यन्ते पुष्पफलानि प्रयच्छन्तः, उक्तं च–

॥ १ ॥ "जं किर वउलाईणं दीसइ सेसिंदिओवलम्भोऽवि ।

तेणऽत्थि तदावरणक्खओवसमसम्भवो तेसिं ॥''

ततो न भावेन्द्रियाणि लौकिकव्यवहारपथावतीर्णैकेन्द्रियादिव्यपदेशनिबन्धनं, किन्तु द्रव्येन्द्रियाणि, तथाहि–येषामेकं बाह्यं द्रव्येन्द्रियं स्पर्शनलक्षणमस्ति ते एकेन्द्रियाः येषां द्वे ते द्वीन्द्रियाः एवं यावद्येषां पञ्च ते पञ्चेन्द्रियाः, आह च–

॥ १ ॥ ''पंचिंदिओवि वउलो नरोव्व सव्वविसयोवलम्भाओ ।
तहवि न भन्नइ पंचेंदिओत्ति बज्झिंदियाभावा ॥''

मू. *(१९) से किंतं एगेंदियसंसारसमावण्णजीवपन्नवणा ?, एगेंदियसंसारसमावण्णजीवपन्नवणा पंचविहा पन्नत्ता, तंजहा–पुढविकाइया आउक्काइया तेउक्काइया वाउक्काइया वणस्सइकाइया ।*

वृ. अथ का सा एकेन्द्रियसंसारसमापन्नजीवप्रज्ञापना ?, सूरिराह–एकेन्द्रियसंसारसमापन्नजीवप्रज्ञापना पञ्चविधा प्रज्ञप्ता, एकेन्द्रियाणां पञ्चविधत्वात्, तदेव पञ्चविधत्वमाह–'तंजहे'त्यादि, पृथिवी–काठिन्यादिलक्षणा प्रतीता सैव कायः–शरीरं येषां ते पृथिवीकायाः पृथिवीकाया एव पृथिवीकायिकाः, स्वार्थे इकप्रत्ययः, आपो–द्रवास्ताश्च प्रतीता एव ताःकायः–शरीरं येषां तेऽप्कायाः अप्काया एवाप्कायिकाः, तेजो–वह्निः तदेव कायः–शरीरं येषां ते तेजस्काया तेजस्कापा एव तेजस्कायिकाः, वायुः–पवनः स एव कायो येषां ते वायुकायाः वायुकाया एव वायुकायिकाः, वनस्पतिः–लतादिरूपः स एव कायःशरीरं येषां ते वनस्पतिकायाः वनस्पतिकाया एव वनस्पतिकायिकाः । इह सर्वभूताधारत्वात् पृथिव्याः पृथिवीकायिकानां प्रथममुपादानं, तदनन्तरं तत्प्रतिष्ठित- त्वादप्कायिकानां, अप्कायिकाश्च तेजः प्रतिपक्षभूतास्तत्तदनन्तरं तेजस्कायिकानामुपादानं, तेजश्च वायुसम्पर्कतः प्रवृद्धिमुपयाति तत एतदनन्तरं वायुकायिकग्रहणं, वायुश्च दूरस्थितो वृक्षशाखादि- कम्पनतो लक्ष्यते ततस्तदनन्तरं वनस्पतिकायिकोपादानं ॥

सम्प्रति पृथिवीकायिकमनवबुध्यमानस्तद्विषयं शिष्यः प्रश्नं करोति–

मू. *(२०) से किं तं पुढविकाइया ?, पुढविकाइया दुविहा पन्नत्ता, तंजहा–सुहुमपुढविकाइया य बादरपुढविकाइया य ।*

वृ. अथ के ते पृथिवीकायिकाः ?, सूरिराह – पृथिवीकायिकाः द्विविधाः प्रज्ञप्ताः, तद्यथा–सूक्ष्मपृथिवीकायिकाश्च बादरपृथिवीकायिकाश्च, सूक्ष्मनामकर्मोदयात्सूक्ष्माः बादरनामकर्मोदयद्बादराः, कर्मोदयजनिते खल्वेते सूक्ष्मबादरत्वे नापेक्षिके बदरामलकयोरिव, सूक्ष्माश्च ते पृथिवीकायिकाश्च सूक्ष्मपृथिवीकायिकाः, चशब्दः स्वगतपर्याप्तापर्याप्तभेदसूचकः,

बादराश्च ते पृथिवीकायिकाश्च बादरपृथिवीकायिकाः, अत्रापि चशब्दः शर्करावालुकादिभेदसूचकः, तत्र सूक्ष्मपृथिवीकायिकाः समुद्गकपर्याप्तप्रक्षिप्तगन्धावयववत्सकललोकव्यापिनो, बादराः प्रतिनियतदेशचारिणः, तच्च प्रतिनियतदेशचारित्वं द्वितीयपदे प्रकटयिष्यते ॥

तत्र सूक्ष्मपृथिवीकायिकानां स्वरूपं जिज्ञासुरिदमाह–

मू. *(२१) से किंतं सुहुमपुढविकाइया ?, २ दुविहा पन्नत्ता, तंजहा–पज्जत्तसुहुमपुढविकाइया य अपज्जत्तसुहुमपुढविकाइया य, से त्तं सुहुमपुढविकाइया ।*

वृ. अथ के ते सूक्ष्मपृथिवीकायिकाः ?, सूरिराह–सूक्ष्मपृथिवीकायिका द्विविधाः प्रज्ञप्ताः,

से किं तं सजोगिकेवलिखीणकसायवीयरायचरित्तारिया ?, सजोगिकेवलिखीणकसायवीयरायचरित्तारिया दुविहा पं०, तं०–पढमसमयसजोगिकेवलिखीणकसायवीयरायचरित्तारिया य अपढमसमयजोगिकेवलिखीणकसायवीयरायचरित्तारिया य, अहवा चरिमसमयसजोगिकेवलिखीणकसायवीयरायचरित्तारिया य अचरिमसमयजोगिकेवलिखीणकसायवीयरायचरित्तारिया य, सेत्तं सजोगिकेवलिखीणकसायवीयरायचरित्तारिया।

से किं तं अजोगिकेवलिखीणकसायवीयरायचरित्तारिया ?, दुविहा पं०, तं०–पढमसमयअजोगिकेवलिखीणकसायवीयराय- चरित्तारिया य अपढमसमयअजोगिकेवलिखीणकसायवीयरायचरित्तारिया य, अहवा चरिमसमय- अजोगिकेवलिखीणकसायवीयरायचरित्तारिया य अचरिमसमयअजोगिकेवलिखीण- कसायवीयरायचरित्तारिया य, सेत्तं अजोगिकेवलिखीणकसायवीयरायचरित्तारिया, सेत्तं केवलिखीणकसायवीयरायचरित्तारिया, सेत्तं खीणकसायवीयरायचरित्तारिया सेत्तं वीयरायचरित्तारिया।

अहवा चरित्तारियापंचविहा पं०, तं०–सामाइयअचरित्तारिया छेदोवट्ठावणीयचरित्तारिया परिहारविसुद्धिचरित्तारिया सुहुमसंपरायचरित्तारिया अहक्खायचरित्तारिया य।

से किं तं सामाइयचरित्तारिया ?, सामाइयचरित्तारिया दुविहा पं०, तं०– इत्तरियसामाइयचरित्तारिया य आवकहियसामाइयचरित्तारिया य, सेत्तं सामाइयचरित्तारिया।

से किं तं छेदोवट्ठावणियचरित्तारिया ?, छेदोवट्ठावणियचरित्तारिया दुविहा पं०, तं०–साइयारछेदोवट्ठावणियचरित्तारिया य निरइयारछेदोवट्ठावणियचरित्तारिया य, सेत्तं छेदोवट्ठावणियचरित्तारिया। से किं तं परिहारविसुद्धियचरित्तारिया ?, परिहारविसुद्धियचरित्तारिया दुविहा पं०, तं०–निव्विसमाणपरिहारविसुद्धियचरित्तारिया य निव्विट्ठकाइयपरिहारविसुद्धियचरित्तारिया य, से त्तं परिहारविसुद्धियचरित्तारिया।

से किं तं सुहुमसंपरायचरित्तारिया ?, दुविहा पं०, संकिलिस्समाणसुहुमसंपरायचरित्तारिया विसुज्झमाणसुहुमसंपरायचरित्तारिया य, सेत्तं सुहुमसंपरायचरित्तारिया।

से किं तं अहक्खायचरित्तारिया ?, अहक्खायचरित्तारिया दुविहा पं०, तं०–छउमत्थअहक्खायचरित्तारिया य केवलिअहक्खायचरित्तारिया य, सेत्तं अहक्खायचरित्तारिया, सेत्तं चरित्तारियं, सेत्तं अणिड्ढिपत्तारिया, सेत्तं कम्मभूमगा, सेत्तं गब्भवक्कंतिया, सेत्तं मणुस्सा।

वृ. 'से किं तं' इत्यादि सुगमं, यावद् 'अहवा चरित्तारिया पंचविहा पन्नत्ता तंजहा–सामाइयअचरित्तारिया' इत्यादि, नवरं पढमसमय० अपढमसमय०इति, ये तेषामेवोपशान्तकषायत्वादीनां विशेषाणां प्रथमे समये वर्तन्ते ते प्रथमसमयाः ततो द्वितीयादिषु समयेषु वर्तमाना अप्रथमसमयाः, तथा 'चरिमसमय० अचरिमसमय०' इति ये तेषामेवोपशान्तकषायत्वादीनां विशेषाणामन्त्यसमये वर्तन्ते ते चरमसमयाः, ये ततोऽर्वागूद्विचरमत्रिचरमादिषु समयेषु वर्तन्ते ते अचरमाः।

सामायिकादिचारित्राणां स्वरूपमिदम्–समो रागद्वेषरहितत्वाद् आयो गमनं समायः एष चान्यासामपि साधुक्रियाणामुपलक्षणं, सर्वासामपि साधुक्रियाणां रागद्वेषरहितत्वात्, समायेन निर्वृत्तं समाये भवं वा सामायिकं, यद्वा समानां–ज्ञानदर्शनचारित्राणामायो–लाभः समायः समाय

सूक्ष्मपृथिवीकायिकानभिधाय सम्प्रति बादरपृथिवीकायिकानभिधित्सुस्तद्विषयं प्रश्नसूत्रमाह–

मू. *(२२) से किं तं बादरपुढविकाइया ?, बादरपुढविकाइया दुविहा पन्नत्ता, तंजहा–सण्हबादरपुढविकाइया य खरबादरपुढविकाइया य।*

वृ. अथ के ते बादर पृथ्वीकायिकाः ? सूरिराह–बादर० द्विविधा प्रज्ञप्ताः, तद्यथा–श्लक्ष्णबादरपृथिवीकायिकाश्च बादरपृथिवीकायिकाश्च, तत्र श्लक्ष्णा नाम चूर्णितलोष्टकल्पा मृदुपृथिवी तदात्मका जीवा अप्युपचा रतः श्लक्ष्णास्ते च ते बादरपृथिवीकायिकाश्च श्लक्ष्णबादरपृथिवी- कायिकाः, अथवा श्लक्ष्णा च सा बादरपृथिवी च २ सा कायः–शरीरं येषां ते श्लक्ष्णबादरपृथिवीकायाः त एव स्वार्थिकेकप्रत्ययविधानात् श्लक्ष्णबादरपृथिवीकायिकाः,

चशब्दो वक्ष्यमाणस्वगतानेकभेदसूचकः, खरा नाम पृथिवीसङ्घातविशेषं काठिन्यविशेषं चापन्नवा तदात्मका जीवा अपि खरास्ते च ते बादरपृथिवीकायिकाश्च खरबादरपृथिवीकायिकाः, अथवा पूर्ववत्प्रकारान्तरेण समासः, चशब्द स्वगतवक्ष्यमाणचत्वारिंशद्भेदसूचकः ॥

मू. *(२३) से किं तं सण्हबायरपुढविकाइया ?, सण्हबायरपुढविकाइया सत्तविहा पन्नत्ता, तंजहा–किण्हमत्तिया नीलमत्तिया लोहियमत्तिया हालिद्दमत्तिया सुक्किल्लमत्तिया पाण्डुमत्तिया पनगमत्तिया, सेत्तं सण्हबादरपुढविकाइया।*

वृ. अथ के ते श्लक्ष्णबादरपृथिवीकायिकाः, सूरिराह–श्लक्ष्णबादरपृथिवीकायिकाः सप्तविधाः प्रज्ञप्ताः, तदेव सप्तविधत्वं तद्यथेत्यादिनोपदर्शयति, कृष्णमृत्तिकाः–कृष्णमृत्तिकारूपा एवं नीलमृत्तिका लोहितमृत्तिका हारिद्रमृत्तिका शुक्लमृत्तिकाः, इत्थं वर्णभेदेन पञ्चविधत्वमुक्तं, पाण्डुमृत्तिका नाम देशविशेषे या धूलीरूपा सती पाण्डू इति प्रसिद्धा,

तदात्मका जीवा अप्यभेदोपचारात् पाण्डुमृत्तिकेत्युक्ताः, 'पनगमट्टियत्ति' नद्यादिपूरप्लाविते देशे नद्यादिपूरेऽपगते यो भूमौ श्लक्ष्णमृदुरूपो जलमलापरपर्यायः पङ्कः स पनकमृत्तिका तदात्मका जीवा अप्यभेदोपचारात्पनकमृत्तिकाः, निगमनमाह–सेत्तं सण्हबायरपुढविकायइ, सुगमम् ॥

मू. *(२४) से किं तं खरबायरपुढविकाया ?, खरबायरपुढविकाइया अनेगविहा प० तं०*

वृ. अथ के ते खरबादरपृथिवीकायिकाः ?, सूरिराह–खरबादरपृथिवीकायिका अनेकविधाः प्रज्ञप्ताः, चत्वारिंशद्भेदा मुख्यतया प्रज्ञप्ता इत्यर्थः, तानेव चत्वारिंशद्भेदानाह–'तंजहा पुढवी य'इत्यादि गाथाचतुष्टयं ।

मू. *(२५) पुढवी य सक्करा वालुया य उवले सिला य लोणूसे ।*
अय तंब तउय सीसय रूप्प सुवन्ने य वइरे य १४ ॥

वृ. पृथिवीति भामा सत्यावामावत् शुद्धपृथिवी च नदीतटभित्त्यादिरूपा, चशब्द उत्तरभेदापेक्षया समुच्चये १ शर्करा–लघूपलशकलरूपा २ वालुका–सिकताः ३ उपलः–टङ्कादुपकरणपरिकर्मणायोग्यः पाषाणः ४ शिला–घटनयोग्या देवकुलपीठाद्युपयोगी महान् पाषाण विशेषः ५ लवणं–सामुद्रादि ६ ऊषो–यद्वशादूषरं क्षेत्रम् ७ अयस्ताम्रत्रपुसीसकरूप्यसुवर्णानि प्रतीतानि १३ वज्रो–हीरकाः १४ ।

मू. *(२६) हरियाले हिंगुलए मनोसिला सासगंजणपवाले ।*
अब्भपडलब्भवालुय बायरकाए मणिविहाणा ८ ॥

वृ. हरितालहिङ्गुलकमनःशिलाः प्रतीताः १७ सासगं-पारदः १८ अञ्जनं-सौवीराञ्जनादि १९ प्रवालं-विद्रुमः २० अभ्रपटलं-प्रसिद्धम् २१ अभ्रवालुका-अभ्रपटलमिश्रा वालुका २२ 'बायरकाये' इति बादरपृथिवीकायेऽमी भेदा इति शेषः, 'मणिविहाणा'इति चशब्दस्य गम्यमानत्वान्मणिविधानानि च-मणिभेदाश्च बादरपृथिवीकायभेदत्वेन ज्ञातव्याः । तान्येव मणिविधानानमि दर्शयति-

मू. (२७) *गोमेज्जए य रुयए अंके फलिहे य लोहियक्खे य ।*
मरगय मसारगल्ले भुयमोयगइंदनीले य ९ ॥

वृ. 'गोमिज्जए' इद्यादि, गोमेज्जकः २३ चः समुच्चये रूचकः २४ अङ्कः २५ स्फटिकः २६ चःपूर्ववत् लोहिताक्षः २७ मरकतः २८ मसारगल्लः २९ भुजमोचकः ३० इन्द्रनीलश्च ३१ ।

मू. (२८) *चंदन गेरुय हंसगब्भ पुलए सोगंधिए य बोद्धव्वे ।*
चंदप्पभवेरुलिए जलकंते सूरकंते य ९ ॥

वृ. चन्दनो ३२ गैरिको ३३ हंसगर्भः ३४ पुलकः ३५ सौगन्धिकश्च ३६ चन्द्रप्रभो ३७ वैडूर्यो ३८ जलकान्तः ३९ सूर्यकान्तश्च ४०, तदेवमाद्यगाथया पृथिव्यादयश्चतुर्दश भेदा उक्ताः, द्वितीयगाथयाऽष्टौ हरितालादयः, तृतीयगाथया गोमेज्जकादयो नव, तुर्यवा गाथया नवेति सङ्ख्यया चत्वारिंशत् ४० ।

मू. (२९) *जेयावन्ने तहप्पगारा ते समासओ दुविहा पन्नत्ता, तंजहा-पज्जत्तगा य अपज्जत्तगा य, तत्थणं जे ते अपज्जत्तगा ते णं असंपत्ता तत्थ णं जे ते पज्जत्तगा एतेसिं वन्नादेसेणं गंधादेसेणं रसादेसेणं फासादेसेणं सहस्सग्गसो विहाणाइं, सङ्खेज्जाइं जोणिप्पमुहसतसहस्साइं, पज्जत्तगणिस्साए अपज्जत्तगा वक्कमंति, जत्थ एगो तत्थ नियमा असङ्खेज्जा, से त्तं खरबायरपुढविकाइया, सेत्तं बायरपुढविकाइया, सेत्तं पुढविकाइया ।*

वृ. 'जे यावन्ने तहप्पगारा' इति येऽपि चान्ये तथाप्रकारा मणिभेदाः-पद्मरागादयस्तेऽपि खरबादरपृथिवीकायत्वेन वेदितव्याः 'ते समासओ'इत्यादि, 'ते' सामान्यतो बादरपृथ्वीकायिकाः 'समासतः' सङ्क्षेपेण द्विविधाः प्रज्ञप्ताः, तद्यथा-पर्याप्तका अपर्याप्तकाश्च, तत्र येऽपर्याप्तकास्ते स्वयोग्याः पर्याप्तीः साकल्येनासंप्राप्ता अथवाऽसंप्राप्ता इति-विशिष्टान् वर्णादीननुपगताः,

तथाहि-वर्णादिभेदविवक्षायमाते न शक्यन्ते कृष्णादिना वर्णभेदेन व्यपदेष्टुं किंकारणमिति चेद्, उच्यते, इह शरीरादिपर्याप्तिषु परिपूर्णासु सतीषु बादराणां वर्णादिविभागः प्रकटो भवति नापरिपूर्णासु, ते चापर्याप्ता उच्छ्वासपर्याप्तयाऽपर्याप्ता एव म्रियन्ते, ततो न स्पष्टतरवर्णादिविभाग इत्यसंप्राप्ता इत्युक्तं, ननु कस्मादुच्छ्वासपर्याप्तयैवापर्याप्ता म्रियन्ते नार्वाक् शरीरेन्द्रियपर्याप्तिभ्यासमप्यर्याप्ता अपि ?, उच्यते, यस्मादागामिभवायुर्बध्वा म्रियन्ते सर्व एव देहिनो नावध्वा, तच्च शरीरेन्द्रियपर्याप्तिभ्यां पर्याप्तानां बन्धमायाति नान्यथेति, अन्ये तु व्याचक्षते-सामान्यतो वर्णदीनसंप्राप्ता इति, तच्च न युक्तं, यतः शरीरमात्रभाविनो वर्णादयः, शरीरं च शरीरपर्याप्तया सञ्जातामिति ।

'तत्थ णं जे ते पज्जत्तगा'इत्यादि, तत्र ये ते पर्याप्तकाः-परिसमाप्तस्वयोग्यसमस्तपर्याप्तयः, एतेषां 'वर्णादेशेन' वर्णभेदविवक्षया एवं गन्धादेशेन रसादेशेन स्पर्शादेशेन 'सहस्रशः' सहस्रसङ्ख्य-

या विधानानि–भेदाः, तद्यथा–वर्णाः कृष्णादिभेदात्पञ्च गन्धौ सुरभीतरभेदाद्वौ रसाः तिक्तादयः पञ्च स्पर्शा मृदुकर्कशादयोऽष्टौ, एकैकस्मिंश्च वर्णादौ तारतम्यभेदेनानेकेऽवान्तरभेदाः,

तथाहि–भ्रमरकोकिलकज्जलादिषु तरतमभावात् कृष्णकृष्णतरकृष्णतमेत्यादिरूपतया अनेके कृष्णभेदाः, एवं नीलादिष्वप्यायोज्यं, तथा गन्धरसस्पर्शेष्वपि, तथा परस्परं वर्णानां संयोगतो धूसरकर्बुरत्वादयोऽनेकसङ्ख्या भेदाः, एवं गन्धादीनामपि परस्परं गन्धादिभिः समायोगाद्, अतो भवन्ति वर्णादेशैः सहस्राग्रशो भेदाः, 'सङ्खेज्जाइं जोणिप्पमुहसयसहस्साइं'ति सङ्ख्येयानि योनिप्रमुखाणि–योनिद्वाराणि शतसहस्राणि,

तथाहि–एकैकस्मिन् वर्णे गन्धे रसे स्पर्शे च संवृता योनिः पृथिवीकायिकानां, सा पुनस्त्रधा–सचित्ता अचित्ता मिश्रा च, पुनरेकैका त्रिधा–शीता उष्णा शीताष्णा, शीतादीनामपि प्रत्येकं तारतम्यभेदादनेकभेदत्वं, केवलमेवं विशिष्टवर्णादियुक्ताः सङ्ख्यातीता अपि स्वस्थाने व्यक्तिभेदेन योनयो जातिमधिकृत्यैकैव योनिर्गण्यते, ततः सङ्ख्येयानि पृथिवीकायिकानां योनिशतसहस्राणि भवन्ति, तानि च सूक्ष्मबादरगतसर्वसङ्ख्यया सप्त, 'पज्जत्तगनिस्साए'इत्यादि, पर्याप्तकनिश्रयाऽपर्याप्तका व्युत्क्रामन्ति–उत्पद्यन्ते, क्रियन्त इत्याह–यत्रैकः पर्याप्तकस्तत्र नियमात्तन्निश्रयाऽसङ्ख्येयाः–सङ्ख्यातीता अपर्याप्तकाः, उपसंहारमाह–'सेत्त'मित्यादि निगमनत्रयं सुगमम् ॥ तदेवमुक्ताः पृथिवीकायिकाः, सम्प्रत्यप्कायिकप्रतिपादनार्थमाह–

मू. (३०) से किं तं आउक्काइया ?, आउक्काइया दुविहा पन्नत्ता, तंजहा–सुहुमआउक्काइया य बादरआउक्काइया य। से किं तं सुहुमआउक्काइया ?, सुहुमाउका० दुविहा पन्नत्ता, तंजहा–पज्जत्तसुहुमआउकाइया य अपज्जत्तसुहुमआउकाइया य, सेत्तं सुहुमआउकाइया।

से किं तं बादरआउकाइया ?, २ अनेगविहा पन्नत्ता, तंजहा–उस्सा हिमए महिया करए हरतणुए सुद्धोदए सीतोदए उसिणोदए खारोदए खट्टोदए अम्बिलोदए लवणोदए वारुणोदए खीरोदए घओदए खोतोदए रसोदए,–

–जे यावन्ने तहप्पगारा ते समासओ दुविहा पन्नत्ता तं०–पज्जत्तगा य अपज्जत्तगा य, तत्थ णं जे ते अपज्जत्तगा ते णं असंपत्ता, तत्थ णं जे ते पज्जत्तगा एतेसिं वण्णादेसेणं गंधादेसेणं रसादेसेणं फासादेसेणं सहस्सग्गसो विहाणाइं संखेज्जाइं जोणिप्पमुहसयसहसाइं, पज्जत्तगनिस्साएअपज्जत्तगा वक्कमंति, जत्थ एगो तत्थ नियमा असंखिज्जा, से तं बादरआउक्कायिया, सेत्तं आउकाइया।

वृ. सुगमम्, 'उस्सा' इत्यवश्यायः त्रेहः 'हिमं' स्त्यानोदकं 'महिका' गर्भमासेषु सूक्ष्मवर्षः करको–घनोपलः हरतनुर्यो भुवमुद्भिद्य गोधूमाङ्कुरतृणाग्रादिषु बन्द्रो बिन्दुरुपजायते 'शुद्धोदकं' अन्तरिक्षसमुद्भवं नद्यादिगतं च, तच्च स्पर्शरसादि भेदादनेकभेदं, तदेवानेकभेदत्वं दर्शयति–'शीतोदकं' नदीतडागावटवापीपुष्करिण्यादिषु शीतपरिणामं 'उष्णोदकं' स्वभावत एव क्वचिन्निर्झरा- दावुष्णपरिणामं 'क्षारोदकं' ईषल्लवणस्वभावं यथा लाटदेशादौ केषुचिदवटेषु 'खट्टोदकम्' ईषदम्लपरिणामं 'अम्लोदकं' स्वभावत् एवाम्लपरिणामं काञ्जिकवत्

लवणोदकं लवणसमुद्रे वारुणं वारुणसमुद्रे क्षीरोदकं क्षीरसमुद्रे क्षोदोदकं इक्षुसमुद्रे रसोदकं पुष्करवरसमुद्रादिषु, येऽपि चान्ये तथाप्रकाराः–रसस्पर्शादिभेदभिन्ना घृतोदकादयो बादरा अप्कायिकाः ते सर्वे बादराप्कायिकतया प्रतिपत्तव्याः, ते समासओ इत्यादि प्राग्वत्, नवरं सङ्ख्येयानि

योनिप्रमुखाणि शतसहस्राणि इत्यत्रापि सप्त वेदितव्यानि ॥

उक्ता अप्कायिकाः, समप्रति तेजस्कायिकान् प्रतिपिपादयिषुराह-

मू. (३१) से किं तं तेऊकाइया ?, २ दुविहा पन्नत्ता, तंजहा-सुहुमतेऊकाइया य बादरतेऊकाइया य । से किन्तं सुहुमतेऊकाइया ?, २ दुविहा पन्नत्ता, तंजहा-पज्जत्तगा य अपज्जत्तगा य, सेत्तं सुहुमतेऊकाइया से किं तं बादरतेऊकाइया ?, २ अनगविहा पन्नत्ता, तंजहा-इंगाले जाला मुम्मुरे अच्ची अलाए सुद्धागनी उक्का विज्जु असणी निग्घाए संघरिससमुट्ठिए सूरकंतमणिनिस्सिए,

-जे यावन्ने तहप्पगारा ते समासओ दुविहा पन्नत्ता, तं०-पज्जत्तगा य अपज्जत्तगा य, तत्थ णं जे ते अपज्जत्तगा ते णं असंपत्ता, तत्थ णं जे ते पज्जत्तगा एएसिणं वन्नादेसेणं गंधादेसेणं रसादेसेणं फासादेसेणं सहस्सग्गसो विहाणाइं संखेज्जाइं जोणिप्पमुहसयसहस्साइं, पज्जत्तगनिस्साए अपज्जत्तगा वक्कमंति, जत्थ एगो तत्थ नियमा असंखिज्जा, सेत्तं बादरतेऊकाइया, से त्तं तेऊकाइया

वृ. सुगमं, नवरमङ्गारो-विगतधूमः 'ज्वाला' जाज्वल्यमानखादिरादिज्वाला अनलसम्बद्धा दीपशिखेत्यन्ये 'मुर्मुरः' फुस्फुकादौ भस्ममिश्रिताग्निकणरूपः 'अर्चिः' अनलाप्रतिबद्धा ज्वाला 'अलातं' उल्मुकं 'शुद्धाग्निः' अयःपिण्डादौ 'उल्का' चुडुल्ली विद्युत् प्रतीता 'अशनिः' आकाशे पतन् अग्निमयः कणः निर्घातो-वैक्रियाशनिप्रपातः सङ्घर्षसमुत्थितः-अरण्यादिकाष्ठनिर्मथनसमुद्भुतः सूर्यकान्तमणिनिसृतः-सूर्यखरकिरणसम्पर्के सूर्यकान्तमणेर्यः समुपजायते,

'जे यावन्ने तहप्पगारा' इति येऽपि चान्ये तथाप्रकाराः-एवंप्रकारास्तेजस्कायिकास्तेऽपि बादरतेजस्कायिकतया वेदितव्याः, 'ते समासओ' इत्यादि प्राग्वत्, नवरमत्रापि सङ्ख्येयानि योनिप्रमुखाणि शतसहस्राणि सप्त वेदितव्यानि ॥ उक्ताः तेजस्कायिकाः, वायुकायिकप्रतिपादनार्थमाह-

मू. (३२) से किंतं वाउकाइया ?, २ दुविहा पन्नत्ता, तंजहा-सुहुमवाउकाइया य बादरवाउकाइया य । से किन्तं सुहुमवाउकाइया ?, २ दुविहा पन्नत्ता, तंजहा-पज्जत्तगसुहुमवाउकाइया य अपज्जत्तगसुहुमवाउकाइया य, सेत्तं सुहुमवाउकाइया । से किंतं बादरवाउकाइया ?, २ अनेगविहा पन्नत्ता, तंजहा-पाइणवाए पडीणवाए दाहिणवाए उदीणवाए उड्ढवाए अहोवाए तिरियवाए विदिसीवाए वाउब्भामे वाउक्कलिया वायमंडलिया उक्कलियावाए मंडलियावाए गुंजावाए झंझावाए संवट्टवाए घणवाए तणुवाए सुद्धवाए-

-जे यावण्णे तहप्पगारा ते समासओ दुविहा पन्नत्ता, तंजहा-पज्जत्तगा य अपज्जत्तगा य, तत्थ णं जे ते अपज्जत्तगा ते णं असंपत्ता, तत्थ णं जे ते पज्जत्तगा एतेसिणं वण्णादेसेणं गंधादेसेणं रसादेसेणं फासादेसेणं सहस्सग्गसो विहाणाइं संखेज्जाइं जोणिप्पमुहसयसहस्साइं, पज्जत्तगनिस्साए अपज्जत्तया वक्कमंति, जत्थ एगो तत्थ नियमा असंखेज्जा, से त्तं बादरवाउक्का०, से तं वाउकाइया

वृ. प्रतीतं, नवरं 'पाईणवाए' इति यः प्राच्या दिशः समागच्छति वातः स प्राचीनवातः एवमपाचीनवातः दक्षिणवातः उदीचीनवातश्च वक्तव्यः, ऊर्ध्वमुद्गच्छन् यो वाति वातः स ऊर्ध्ववातः, एवमधोवाततिर्यग्वातवपि परिभावनीयौ, 'विदिग्वातो' यो विदिग्भ्यो वाति 'वातोद्भ्रामः' अनवस्थितवातः वातोत्कलिका-समुद्रस्येव वातोत्कलिका 'वातमण्डली' वातोली 'उत्कलिकावात' उत्कलिकाभिः प्रचुरतराभिः सम्मिश्रितो यो वातो-

–'मण्डलीकावातो' मण्डलिकाभिर्मूलत आरभ्य प्रचुरतरभिः समुत्थो यो वातः 'गुञ्जावातो' यो गुञ्जन्–शब्दं कुर्वन् वाति 'झञ्झावातः' सवृष्टिरशुभनिष्ठुर इत्यन्ये, 'संवर्त्तकवातः' तृणादिसंवर्त्तनस्वभावः 'घनवातो;' घनपरिणामो रत्नप्रभापृथिव्याद्यधोवर्त्ती 'तनुवातो' विरलपरिणामो घनवातस्याधःस्थायी 'शुद्धवातो' मन्दस्तिमितो वस्तिद्वृत्त्यादिगत इत्यन्ये, 'ते समासओ' इत्यादि प्राग्वत्, अत्रापि सङ्ख्येयानि योनिप्रमुखाणि शतसहस्राणि सम्भवसेयानि ॥

उक्ता वायुकायिकाः, सम्प्रति वनस्पतिकायिकप्रतिपादनार्थमाह–

मू. (३३) *से किं तं वणस्सइकाइया ?, वणस्सइकाइया दुविहा पन्नत्ता, तंजहा–सुहुमवणस्सइकाइया य बायरवणस्सइकाइया य ।*

मू. (३४) *से किं तं सुहुमवणस्सइकाइया ?, २ दुविहा पन्नत्ता, तंजहा–पज्जत्तगसुहुमवणस्सइकाइया य अपज्जत्तगसुहुमवणस्सइकाइया य, सेत्तं सुहुमवणस्सइकाइया ।*

मू. (३५) *से किंतं बायरवणस्सइ० ?, २ दुविहा पन्नत्ता, तंजहा–पत्तेयसरीरबादरवणस्सइ० साहारणस० बादरवणस्सइ० ।*

वृ. सुगमं यावत् 'सेत्तं सुहुमवणस्सइकाइया,' 'से किंत' मित्यादि, अथ के ते बादरवनस्पतिकायिकाः ?, २ द्विविधाः प्रज्ञप्ताः, तद्यथा–प्रत्येकशरीरबादरवनस्पतिकायिकाश्च साधारणशरीरबादरवनस्पतिकायिकाश्च, तत्रैकमेकं जीवं प्रति गतं प्रत्येकं शरीरं येषां ते प्रत्येकशरीराः ते च ते बादरवनस्पतिकायिकाश्च प्रत्येकशरीरबादरवनस्पतिकायिकाः, चशब्दः स्वगतानेकभेदसूचकः, समानं–तुल्यं प्राणापानाद्युपभोगं यथा भवति एवमा–समन्तादर्कीभावनानन्तानां जन्तूनां धारणं–सङ्ग्रहणं येन तत्साधारणं साधारणं शरीरं येषां ते साधारणशरीराः ते च ते बादरवनस्पतिकायिकाश्च साधारणबादरवनस्पतिकायिकाः, चशब्दोऽत्रापि स्वगतानेकभेदसूचकः ।

मू. (३६) *से किं तं पत्तेयसरीरबादरवणस्सइकाइया ?, २ दुवालसविहा प०, तंजहा–*

वृ. 'से किं त' मित्यादि, अथ के ते प्रत्येकशरीरबादरवनस्पतिकायिकाः ?, सूरिराह–प्रत्येकशरीरबादरवनस्पतिकायिकाः द्वादशविधाः प्रज्ञप्ताः, तद्यथा–

मू. (३७) *रुक्खा गुच्छा गुम्मा लता य वल्ली य पव्वगा चेव ।*
तणवलयहरियओसहि- जलरुहकुहणा य बोद्धव्वा ॥

वृ. 'रुक्खे'त्यादि, 'वृक्षाः' चूतादयः 'गुच्छा' वृन्ताकीप्रभृतयः 'गुल्मानि' नवमालिकाप्रभृतीनि 'लताः' चम्पकलतादयः, इह येषां स्कन्धप्रदेशे विवक्षितोर्ध्वगतैकशाखाव्यतिरेकेणाऽन्यच्छाखान्तरं परिस्थूरं न निर्गच्छति ते लता विज्ञेयास्ते च चम्पकादय इति, 'वल्लयः' कूष्माण्डीत्रपुषीप्रभृतयः, 'पर्वगा' इक्ष्वादयः, 'तृणानि' कुशजंजुकाऽर्जुनादीनि 'वलयानि' केतकीकदल्यादीनि तेषां हि त्वचा वलयाकारेण व्यवस्थितेति, 'हरितानि' तण्डुलीयकवास्तुलप्रभृतीनि 'औषध्यः' फलपाकान्ताः ते च शाल्यादयः, जले रुहन्तीति जलरुहाः–उदकावकपनकादयः 'कुहणा' भूमिस्फोटाभिधानाः ते चाकायप्रभृतयः ।

मू. (३८) *से किंतं रुक्खा ?, २ दुविहा पन्नत्ता, तंजहा–एगट्ठिया य बहुबीयगा य । से किं तं एगट्ठिया ?, २ अनेगविहा पन्नत्ता, तंजहा–*

वृ. तत्र 'यथोद्देशं निर्देश' इतिन्यायात् प्रथमतो वृक्षप्रतिपादनार्थमाह–'से किं तमि'त्यादि,

अथ के ते वृक्षाः ?, सूरिराह–वृक्षा द्विविधाः प्रज्ञप्ताः, तद्यथा–एकास्थिकाश्च बहुबीजकाश्च, तत्र फलं फलं प्रति एकमस्थि येषां ते एकास्थिकाः, चशब्दो वक्ष्यमाणस्वगतानेकभेदसूचकः, तथा प्रायोऽस्थिवन्धमन्तरेणैवमेव फलान्तर्वर्त्तीनि बहूनि बीजानि येषां ते बहुबीजकाः, 'शेषाद्ये'ति कप्रत्ययः, अत्रापि चशब्दो वक्ष्यमाणस्वगतानेकभेदसूचकः ॥ तत्रैकास्थिकप्रतिपादनार्थमाह–
अथ के ते एकास्थिकाः ?, २ अनेकविधाः प्रज्ञप्ताः, तद्यथा–'निंबंबे'त्यादि गाथात्रयं,

मू. (३९) *निंबंबजंबुकोसंबसालअंकुल्ल पीलु सेलू य ।*
सल्लइमोइमालुय बउल पलासे करंजे य ॥

मू. (४०) *पुत्तंजीवयऽरिट्ठे विहेलए हरिडए य भिल्लाए ।*
उंबेभरिया खीरिणि बोद्धव्वे धायइ पियाले ॥

मू. (४१) *पूइनिंबकरंजे सुण्हा तह सीसवा य असने य ।*
पुन्नागनागरुक्खे सीवण्णि तहा असोगे य ॥

वृ. तत्र निम्बाम्रजम्बुकोशम्बाः प्रतीताः शालः–सर्जः 'अङ्कोल्ल'त्ति अङ्कोटः प्राकृतत्वात्सूत्रे टकारस्य लादेशः, 'अङ्कोल्ल' इति वचनात्, पीलुः–प्रतीतः शेलुः–स्लेष्मातकः सल्लकी–गजप्रिया मोचकीमालुकौ देशविशेषप्रतीतौ वकुलः–केसरः पलाशः–किंशुकःकरञ्जो–नक्तमालः पुत्रजीवको–देशविशषप्रसिद्धः अरिष्टः–पिचुमन्दःविभीतकः–अक्षः हरीतकः–कोङ्कणदेशप्रसिद्धः कषायबहुलः भल्लातको यस्य भल्लातकाभिधानानि फलानि लोकप्रसिद्धानि उम्बेभरिकाक्षीरणी-धातकीप्रियालपूति (निम्ब) करञ्जश्लक्ष्णाशिंशपाऽशनपुन्नागनागश्रीपण्यशोका लोकप्रतीताः ।

मू. (४२) *जे यावन्ने तहप्पगारा, एएसि णं मूलावि असंखेज्जजीविया कंदावि खंधावि तयावि सालावि पवालावि पत्ता पत्तेयजीविया पुप्फा अनेगजीविया फला एगट्ठिया, से त्तं एगट्ठिया*

वृ. 'जे यावन्ने तहप्पगारा' इति येऽपि चान्ये तथाप्रकाराः–एवंप्रकारास्तत्तद्देश-विशेषभाविनः ते सर्वेऽप्येकास्थिका वेदितव्याः, एतेषाम्–एकास्थिकानां मूलान्यप्यसङ्ख्येय-जीवकानि–असङ्ख्येयप्रत्येकशरीरजीवात्मकानि, एवं खन्दा अपि स्कन्धा अपि त्वचोऽपि शाखा अपि प्रवाला अपि प्रत्येकमसङ्ख्येयप्रत्येकशरीरजीवकाः,

तत्र मूलानि यानि कन्दस्याधस्ताद् भूमेरन्तः प्रसरन्ति, तेषामुपरि कन्दास्ते च लोक-प्रतीताः,स्कन्धाः स्थुडाः, त्वचः–छल्लयः शालाः–शाखाः प्रवालाः–पल्लवाङ्कुराः, 'पत्ता पत्तेय-जीवय'त्ति पत्राणि प्रत्येकजीविकानि–एकैकं पत्रमे (कै)केन जीवेनाधिष्ठितमिति भावः, 'पुप्फा अनेगजीविय'त्ति पुष्पाण्यनेकजीवानि, प्रायः प्रतिपुष्पपत्रं जीवभावात्, फलान्येकास्थिकानि, उपसंहारमाह–'से त्तं एगट्ठिया' सुगमं ॥ बहुबीजकप्रतिपादनार्थमाह–

मू. (४२/१) *से कं तं बहुबीयगा ?, बहुबीयगा अनेगविहा पं० तं०–*

वृ. अथ के ते बहुबीजकाः ?, सूरिराह–बहुबीजका अनेकविधाः प्रज्ञप्ताः,तद्यथा–

मू. (४३) *अत्थिय तेंदु कविट्ठे अंबाडगमाउलिंग बिल्ले या ।*
आमलग फणिस दालिम आसोठे उंबर वडे य ॥

मू. (४४) *नग्गोह नंदिरुक्खे पिप्परी सयरी पिलुक्खरुक्खे य ।*
काउंबरि कुत्थुंभरि बोद्धव्वा देवदाली य ॥

मू. (४५) तिलए लउए छत्तोह सिरीस सत्तवन्न दहिवन्ने ।
लोद्धधवचंदज्जुणनीमे कुडए कयंबे य ॥

वृ. 'अत्थिये' त्यादि गाथात्रयं, एते च अस्थिक तिन्दुक कपित्थ अम्बाडक मातुलिङ्ग बिल्व आमलक पनस दाडिम अश्वत्थ उदुम्बर वट-न्यग्रोधनन्दिवृक्ष पिप्पली शतरी प्लक्षका दुम्बरिकुस्तुम्भरि देवदालि तिलक लवकच्छत्रोपग शिरीष सप्तपर्णदधिपर्ण लोध्र धवचन्द नार्जुनी पकुट जकदम्बकानां मध्ये केचिदतिप्रसिद्धाः केचिद्देशविशेषतो वेदितव्याः, नवरमिहामलकादयो न लोकप्रसिद्धाः प्रतिपत्तव्याः, तेषामेकास्थिकत्वात्, किन्तु देशविशेषप्रसिद्धा बहुबीजका एव केचन ।

मू. (४६) जे यावन्ने तहप्पगारा, एतेसि णं मूलावि असंखेज्जजीविया कंदावि खंधावि सालावि पत्ता पत्तेयजीविया पुप्फा अनेगजीविया फला बहुबीयगा । से त्तं बहुबीयगा, से त्तं रुक्खा ।

वृ. 'जे यावन्ने तहप्पगार'त्ति, येऽपि चान्ये तथा–प्रकाराः–एवंप्रकारास्तेऽपि च बहुबीजका मन्तव्याः, एतेषामपि मूलकन्दस्कन्धत्वक्शाखाप्रवालाः प्रत्येकमसङ्ख्येवप्रत्येकशरीरजीवाकः, पत्राणि प्रत्येकजीवकानि, पुष्पाण्यनेकजीवकानि, फलानि बहुबीजकानि, उपसंहारमाह–सेत्तमित्यादि निगमनद्वयं सुगमं ॥ सम्प्रति गुच्छप्रतिपादनार्थमाह–

मू. (४६/१) से किं तं गुच्छा ?, गुच्छा अनेगविहा पन्नत्ता, तं०–

मू. (४७) वाइंगणिसल्लइयुण्डई य तह कत्थुरी य जीभुमणा ।
रुवी आढइ नीली तुलसी तह माउलिंगी य ॥

मू. (४८) कच्चुंभरि पिप्पलिया अतसी बिल्ली य काइमाईया ।
वुड्ढू पडोलकंदे विउव्वा वत्थलंदेरे ॥

मू. (४९) पत्तरउर सीयउरए हवंति तहा जवसए य बोद्धव्वे ।
निग्गुमिअंकतबरि अत्थई तेव तलउदाडा ॥

मू. (५०) सणपाणकाससुद्दग उग्घाडग साम सिंदुवारे साम य ।
करमद्दअद्दूसग करीर एरावणमहित्थे ॥

मू. (५१) जाउलगमीलपरिली गयमारिणि कुव्वतारिया भंडा ।
जीवइ केयइ तह गंज पाडलादासिअंकोले ॥

मू. (५२) जे यावन्ना तहप्पगारा, सेत्तं गुच्छा ।से किं तं गुम्मा ? गुम्मा अनेगविहा प० तं०

मू. (५३) सेणयए नोमालिय कोरंटय बंधुजीवगमणोज्जे ।
पिइअयं पाणं कणयर कुज्जय तह सिंदुवारे य ॥

मू. (५४) जाई मोग्गर तह जूहिया य तह मल्लिया य वासंती ।
वत्थुल कत्थुल सेवाल गंठी मगदंतिया चेव ॥

मू. (५५) चंपगजीइ नीइया कुंदो (कंदो) तहा महाजाई ।
एवमनेगागारा हवंति गुम्मा मुणेयव्वा० ॥

मू. (५६) से त्तं गुम्मा ॥ से किं तं लयाओ ?, लयाओ अनेगविहाओ पन्नत्ताओ, तं०–

मू. (५७) पउमलया नागलया असोग चंपगलया य चूयलता ।

वनलय वासंतिलया अइमुत्तय कुंदसामलया ॥

मू. (५८) जे यावन्ने तहप्पगारा, से त्तं लयाओ ॥ से किं तं वल्लीओ ?, अनेगविहाओ प० तं०–

मू. (५९) पूसफली कालिंगी तुंबी तउसी य एलवालुंकी ।
घोसाडइ पंडोला पंचंगुलि आयनीली य ॥

मू. (६०) कंगूया कंडुइया कक्कोडई कारियल्लई सुभगा ।
कुयवाय वागली पाव वल्ली तह देवदाली य ॥

मू. (६१) अप्फेया अइमुत्तगणागलया कण्हसूरवल्ली य ।
संघट्टसुमणसावि य जासुवन कुविंदवल्ली य ॥

मू. (६२) मुद्दिय अंबावल्ली किण्हछीरालि जयंति गोवाली ।
मा[illegible]

मू. (६३) ससिवी दुगोत्तफुसिया गिरिकण्णइ मालुया य अंजनई ।
दहिफोल्लइ कागलि मोगली य तह अक्कबोंदी या ॥

मू. (६४) जे यावन्ने तहप्पगारा, से त्तं वल्लीओ । से किं तं पव्वगा ? अनेगविहा प०, तं०–

मू. (६५) इक्खू य इक्खुवाडी वीरुणी तह एक्कडे य मासे य ।
सुंठे सरे य वेत्ते तिमिरे सतोरग णले य ॥

मू. (६६) वंसे वेच्छू कणए कंकावंसे य चाववंसे य ।
उदए कुडए विसए कंडा वेल्ले य कल्लाणे ॥

मू. (६७) जे यावन्ना तहप्पगारा, से त्तं पव्वगा ॥ से किं तं तणा ?, तणा अनेगविवा पन्नत्ता, तं–

मू. (६८) संडिय मंतिय होत्तिय दब्भकुसे पव्वए य पोडइला ।
अज्जुण असाढए रोहियंसे सुयवेखीरबुसे ॥

मू. (६९) एरंडे कुरुविंदे करजर सुंठे तहा विभंगू य ।
महुरतण छुरय सिप्पिय बोद्धव्वे सुंकलितणे य ॥

मू. (७०) जे यावन्ने तहप्पगारा, से त्तं तणा ॥ से किं तं वलया ? अनेगविनिहा प०, तं०–

मू. (७१) ताल तमाले तक्कलि तोयली साली य सारकत्ताणे ।
सरले जावति केतइ कदली तह धम्मरुक्खे य ॥

मू. (७२) मुयरुक्ख हिंगुरुक्खे लवंगरुक्खे य होइ बोद्धव्वे ।
पूयफली खज्जुरी बोद्धव्वा णालिएरी य ॥

मू. (७३) जे यावन्ना तहप्पगारा, से त्तं वलया ।से किं तं हरिया ? अनेगविहा प० तं०–

मू. (७४) अज्जोरुह बोडाणे हरितग तह तंदुलेज्जगतणे य ।
वत्थुल पोरग मज्जारयाइ विल्ली य पालक्का ॥

मू. (७५) दगपिप्पली य दव्वी सोत्तिय साए तहेव मंडुक्की ।
मूलग सरिसव अंबिल साएय जियंतए चेव ॥

मू. (७६) तुलस कण्ड उराले फणिज्जए अज्जए य भूयणए ।
बारग दमणग मखरुयग सतपुप्फीदीवरे य तहा ॥

मू. (७७) जे यावन्ना तहप्पगारा, से त्तं हरिया ॥ से किं तं ओसहिओ ?, ओसहिओ अनेगविहाओ पन्नत्ताओ, तं०– साली वीही गोहुम जव जवजवा कलमसूरतिलमुग्गमासणिप्फावकुलत्थआलिसंदसतीणपलिमंथा अयसीकुसुंभकोद्दव कंगूरालगमासकोद्दंसा सणसरिसवमूलिगबीया, जे यावन्ना तहप्पगारा, से त्तं ओसहीओ ॥

से किं तं जलरुहा ?, जलरुहा अनेगविहा पन्नत्ता, तं०–उदए अवए पनए सेवाले कलंबुया हढे कसेरुया कच्छभाणी उप्पले पउमे कुमुदे णलिणे सुभए सुगंधिए पोण्डरीयए महापुंडरीयए सयपत्ते सहस्सपत्ते कल्हारे कोकनदे अरविंदे तामरसे भिसे भिसमुणाले पोक्खले पोक्खलत्थिभुए, जे यावन्ना तहप्पगारा, से त्तं जलरुहा ॥

से किं तं कुहुणा ?, कुहुणा अनेगविहा पन्नत्ता, तं–आहकाए कुहणे कुणक्के दव्वहलिया सफाए सज्झाए छत्तोए वंसीण हिताकुरए, जे यावन्ना तहप्पगारा, से त्तं कुहुणा ॥

मू. (७८) नानाविह संठाणा रुक्खाणं एगजीविया पत्ता ।
खंधावि एगजीवा तालसरणालिएरीणं ॥

मू. (७९) जह सगलसरिसवाणं सिलेसमिस्साण वट्टिया विट्ठी ।
पत्तेयसरीराणं तहेति सरीरसंघाया ॥

मू. (८०) जह वा तिलपप्पडिया बहुएहिं तिलेहि संहता संती ।
पत्तेयसरीराणं तह होंति सरीरसंघाया ॥

मू. (८१) से त्तं पत्तेयसरीरबादरवणप्फइकाइया ॥

वृ. एते गुच्छादिभेदाः स्वरूपत एव प्रतीताः, केचिद्देशविशेषादवगन्तव्याः, अत्र वृक्षादिषु यस्यैकस्य नाम गृहीत्वाऽपरत्रापि तन्नाम गृहीतं तत्रान्यो भिन्नजातीयः सदृन्नामा प्रतिपत्तव्यः, अथवा एकोऽपि कश्चिदनेकजातीयको भवति, यथा–नालिकेरीतरुरेकास्थिकत्वादेकास्थिकः, त्वचो वलयाकारत्वाच्च वलयः, ततोऽनेकजातीयत्वादपि तन्नाम निर्दिश्यमानं न विरुध्यते ।

साम्प्रतमुक्तानुक्तार्थसंग्रहार्थमिदमाह– 'नानाविदेहेत्यादि' नानाविधं–नानाप्रकारं संस्थानं–आकृतिर्वेषां तानि नानाविधसंस्थानानि, 'वृक्षाणा'मिति वृक्षग्रहणमुपलक्षणं, तेन गुच्छगुल्मादीनामपि द्रष्टव्यं, पत्राणि एकजीवकानि–एकजीवाधिष्ठितानि वेदितव्यानि, स्कन्धोऽपि एकजीवाधिष्ठितः, किं सर्वेषामपि ?, नेत्याह–तालसरलनालिकेरीणां, तालसरलनालिकेरीग्रहणमुपलक्षणं, तेनान्येषामपि यथाऽऽगममेकजीवाधिष्ठितत्वं स्कन्धस्य प्रतिपत्तव्यं, अन्येषां तु स्कन्धाः प्रत्येकमनेकप्रत्येकशरीरजीवात्मका इति सामर्थ्यादवसेयं, 'खंधावि अणेगजीविया' इति पूर्वमभिधानात् । अथ अयदि प्रत्येकमनेकशरीरजीवाधिष्ठितास्ततः कथमेकखण्डशरीराकारा उपलभ्यन्ते इति ?, तदवस्थानस्वरूपमाह–'जह सगले'त्यादि, यथा सकलसर्षपाणां 'श्लेष्ममिश्राणां' श्लेष्म- द्रव्यविमिश्रितानां वलिता वर्तिरिकरूपा भवति, अथ ते सकलसर्षपाः परिपूर्णशरीरा; सन्तः पृथक्स्वस्वावगाहनयाऽवतिष्ठन्ते 'तथा' अनवैवोपमया प्रत्येकशरीराणां जीवानां शरीरसङ्घाताः पृथक्पृथक्स्वस्वावगाहना भवन्ति, इह श्लेषद्रव्यस्थानीयं रागद्वेषोपचितं तथाविधं कर्म सकल- सर्षपस्थानीयाः प्रत्येकशरीराः, सकलसर्षग्रहणं सर्षपवैविक्त्यप्रतिपत्त्या पृथक्स्वस्वावगाहकप्रत्येक- शरीरवैविक्त्यप्रतिपत्त्यर्थं ।

अत्रैव दृष्टान्तान्तरमाह–'जह वे'त्यादि, वाशब्दो दृष्टान्तान्तरसूचने, यथा तिलशष्कुलिका–तिलप्रधाना पिष्टमयी अपूपिका बहुभिस्तिलैर्मिश्रिता सती यथा पृथक् २ स्वस्वावगाहतिलात्मिका भवति कथञ्चिदेकरूपा च 'तथा' अनयैवोपमया प्रत्येकशरीरिणां जीवानां शरीरसङ्घाताः कथञ्चिदेकरूपाः पृथक्स्वस्वावगाहनाश्च भवन्ति । उपसंहारमाह–सेत्तमित्यादि सुगमं ॥ 'से त'मित्यादि सुगमं । सम्प्रति साधारणवनस्पतिकायिकप्रतिपादनार्थमाह–

मू. (८२) *से किं तं साहारणसरीरबादरवणस्सइकाइया ?, अनेगविहा प० तं०–*

मू. (८३) *अवए पनए सेवाले लोहिणी मिहुत्थु हुत्थिभागा(य) ।*
अस्सकन्नि सीहकन्नी सिंउढि तत्तो मुसुंढी य ॥

मू. (८४) *रुरु कुण्डरिया जीरु छीर विराली तहेव किट्टीया ।*
हालिद्दा सिंगबेरे य आतूलुगा भूलए इय ॥

मू. (८५) *कंवूयं कत्तुक्कड सुमत्तओ वलइ तहेव महुसिंगी ।*
नीरुह सप्पसुयंधा छिन्नरुहा चेव बीयरुहा ॥

मू. (८६) *पाढामियवालुंकी महुररसा चेव रायवत्ती य ।*
पउमा माढरि दंतीति चंडी किट्टीत्ति यावरा ॥

मू. (८७) *मासपन्नि मुग्गपन्नी जीवियरसहे य रेणुया चेव ।*
काओली खीरकाओली तहा भंगी नही इय ॥

मू. (८८) *किमिरासि भद्द मुच्छा नंगलई पेलुगा इय ।*
किण्ह पउले य हढे हरतणुया चेव लोयाणी ॥

मू. (८९) *कण्हे कंदे वज्जे सूरणकंदे तहेव खल्लूरे ।*
एए अनंतजीवा जे यावन्ने तहाविहा ॥

मू. (९०) *तणमूल कंदमूले, वंसीमूलेत्ति आवरे ।*
संखिज्जमसंखिज्जा, बोद्धव्वणंतजीवा य ॥

मू. (९१) *सिंघाडगस्स गुच्छो अनेगजीवो उ होइ नायव्वो ।*
पत्ता पत्तेयजीवा दोन्नि य जीवा फले भणिया ॥

मू. (९२) *जस्स मूलस्स भग्गस्स, समो भंगो पदीसइ ।*
अनंतजीवे उ से मूले, जे यावन्ने तहाविहा ॥

मू. (९३) *जस्स कंदस्स भग्गस्स, समो भंगो पदीसइ ।*
अनंतजीवे उ से कंदे, स जे यावन्ने तहाविहा ॥

मू. (९४) *जस्स खंधस्स भग्गस्स, समो भंगो पदीसइ ।*
अनंतजीवे उ से खंधे, जे यावन्ने तहाविहा ॥

मू. (९५) *जीसे तयाए भग्गाए, समो भंगो पदीसए ।*
अनंतजीवा तया सा उ, जे यावन्ने तहाविहा ॥

मू. (९६) *जस्स सालस्स भग्गस्स, समो भंगो पदीसए ।*
अनंतजीवे य से साले, जे यावन्ने तहाविहा ॥

मू. (९७) जस्स पवालस्स भग्गस्स, समो भंगो पदीसए।
अनंतजीवे पवाले से, जे यावन्ने तहाविहा॥

मू. (९८) जस्स पत्तस्स भग्गस्स, समो भंगो पदीसए।
अनंतजीवे उ से पत्ते, जे यावन्ने तहाविहा॥

मू. (९९) जस्स पुप्फस्स भग्गस्स, समो भंगो पदीसए।
अनंतजीवे उ से पुप्फे, जे यावन्ने तहाविहा॥

मू. (१००) जस्स फलस्स भग्गस्स, समो भंगो पदीसए।
अनंतजीवे फले से उ, जे यावन्ने तहाविहा॥

मू. (१०१) जस्स बीयस्स भग्गस्स, समो भंगो पदीसए।
अनंतजीवे उ से बीए, जे यावन्ने तहाविहा॥

मू. (१०२) जस्स मूलस्स भग्गस्स, हीरो भंगोपदीसए।
परित्तजीवे उ से मूले, जे यावन्ने तहाविहा॥

मू. (१०३) जस्स कंदस्स भग्गस्स, हीरो भंगो पदीसए।
परित्तजीवे उ से कंदे, जे यावन्ने तहाविहा॥

मू. (१०४) जस्स खंधस्स भग्गस्स, हीरो भंगो पदीसए।
परित्तजीवे उ से खंधो, जे यावन्ने तहाविहा॥

मू. (१०५) जीसे तयाए भग्गाए, हीरो भंगो पदीसए।
परित्तजीवा तया सा उ, जे यावन्ने तहाविहा॥

मू. (१०६) जस्स सालस्स भग्गस्स, हीरो भंतो पदीसए।
परित्तजीवे उ से साले, जे यावन्ने तहाविहा॥

मू. (१०७) जस्स पवालस्स भग्गस्स, हीरो भंगो पदीसए।
परित्तजीवे पवाले उ, जे यावन्ने तहाविहा॥

मू. (१०८) जस्स पत्तस्स भग्गस्स, हीरो भंगो पदीसए।
परित्तजीवे उ से पत्ते, जे यावन्ने तहाविहा॥

मू. (१०९) उस्स पुप्फस्स भग्गस्स, हीरो भंगो पदीसए।
परित्तजीवे उ से पुप्फे, जे यावन्ने तहाविहा॥

मू. (११०) जस्स फलस्स भग्गस्स, हीरो भंगो पदीसए।
परित्तजीवे फले से उ, जे यावन्ने तहाविहा॥

मू. (१११) जस्स बीयस्स भग्गस्स, हीरो भंगो पदीसए।
परित्तजीवे उ से बीए, जे यावन्ने तहाविहा॥

मू. (११२) जस्स मूलस्स कट्ठाओ, छल्ली बहुलतरी भवे।
अनंतजीवा उ सा छल्ली, जे यावन्ने, तहाविहा॥

मू. (११३) जस्स कंदस्स कट्ठाओ, छल्ली बहलतरी भवे।
अनंतजीवा उ सा छल्ली, जे यावन्ने तहाविहा॥

मू. (११४) जस्स संघस्स कट्ठाओ, छल्ली बहलतरी भवे।
अनंतजीवा उ सा छल्ली, जे यावन्ना तहाविहा ॥

मू. (११५) जीसे सालाए कट्ठाओ, छल्ली बहलतरी भवे।
अनंतजीवा उ सा छल्ली, जे यावन्ना तहाविहा ॥

मू. (११६) जस्स मूलस्स कट्ठाओ, छल्ली तनुयरी भवे।
परित्तजीवा उ सा छल्ली, जे यावन्ना तहाविहा ॥

मू. (११७) जस्स कंदस्स कट्ठाओ, छल्ली तनुययरी भवे।
परित्तजीवा उ सा छल्ली, जे यावन्ना तहाविहा ॥

मू. (११८) जस्स खंधस्स कट्ठाओ, छल्ली तनुययरी भवे।
परित्तजीवा उ सा छल्ली, जे यावन्ना तहाविहा ॥

मू. (११९) जीसे सालाए कट्ठाओ, छल्ली तनुययरी भवे।
परित्तजीवा उ सा छल्ली, जे यावन्ना तहाविहा ॥

वृ. 'से किं त'मित्यादि, अथ के ते साधारणशरीरबादरवनस्पतिकायिकाः ?, सूरिराह-साधारणशरीरबादरवनस्पतिकायिका अनेकविधाः प्रज्ञप्ताः, तद्यथा-'अवए'इत्यादि, एते च केचिदतिप्रसिद्धत्वात्केचिद्देशविशेषतः स्वयमवगन्तव्याः। 'जे यावन्ने तहाविहा' इति, येऽपि चान्ये-एवंव्यतिरिक्तास्तथाप्रकारा एवंप्रकारास्तेऽपि अनन्तजीवा ज्ञातव्याः

'तणे'त्यादि, तृणमूलं कन्दमूलं यद्यापरकं वंशीमूलं, एतेषां मध्ये क्वचिज्जातिभेदतो देशभेदतो वा सङ्ख्याता जीवाः क्वचिदसङ्ख्याता अनन्ताश्च ज्ञातव्याः 'सिंघाडगस्से'त्यादि, शृङ्गाटकस्य यो गुच्छः सोऽनेकजीवो भवति ज्ञातव्यः, त्वक्शाखादीनामनेकजीवात्मकत्वात्, केवलं तत्रापि यानि पत्राणि तानि प्रत्येकजीवानि, फले पुनः प्रत्येकमेकैकस्मिन् द्वौ द्वौ जीवौ भणितौ।

'जस्स मूलस्से'त्यादि, यस्य मूलस्य भग्नस्य सतः-समः-एकान्तसदृशरूपः चक्राकारो भङ्गः प्रकर्षेण दृश्यते तन्मूलमनन्तजीवमवसेयं। 'जे यावन्ने तहाविहा' इति, यान्यपि चान्यानि अभग्नानि तथाप्रकाराणि अधिकृतमूलभग्नसमप्रकाराणि तान्यप्यनन्तजीवानि ज्ञातव्यानि एवं कन्दस्कन्धत्वक्शाखाप्रवालपत्रपुष्पफलबीजविषया अपि नव गाथा व्याख्येयाः

सम्प्रति प्रत्येकशरीरलक्षणाभिधानार्थं गाथादशकमाह- 'जस्से'त्यादि, यस्य मूलस्य भग्नस्य सतो भङ्गे-भङ्गप्रदेशे तु हीरो-विषमच्छेदमुद्दन्तुरं वा प्रदृश्यते-प्रकर्षेण स्पष्टरूपतया लक्ष्यते ततो मूलं 'परित्तजीवं' प्रत्येकशरीरजीवात्मकं ज्ञातव्यं, 'जे यावन्ने तहाविहा' इति, यान्यपि चान्यानि भग्नानि तथाप्रकाराणि अधिकृतसशरीरभग्नमूलसदृशानि मूलानि तान्यपि प्रत्येकशरीरजीवात्मकानि मन्तव्यानि, एवं कन्दादिविषया अपि नव गाथा भावनीयाः, यत्र कुत्रापि लिङ्गव्यत्ययः स प्राकृतलक्षणा- दवसेयः। अधुना मूलादिगतानां वल्कलरूपाणामनन्तजीवत्वपरिज्ञानार्थं लक्षणमाह-यस्य मूलस्य काष्ठात्-मध्यसारात् छल्लीवल्कलरूपा बहुलतरा भवति सा अनन्तजीवा ज्ञातव्या, 'जे यावन्ना तहाविह'त्ति याऽपि चान्या अधिकृतया अनन्तजीवत्वेन निश्चितया छल्लया समानरूपा छल्ली सापि तथाविधा-अनन्तजीवात्मिका ज्ञातव्या,

एवं कन्दस्कन्धशाखाविषया अपि तिस्रः गाथाः परिभावनीयाः अधुना तासामेव छल्लीनां

प्रत्येकजीवत्वपरिज्ञानाय लक्षणमाह–'जस्स मूलस्से' त्यादि गाथाचतुष्टयं, यस्य मूलस्य काष्ठात्–मध्यसारात् छल्ली–वल्कलरूपा तनुतरा भवति सा 'परित्तजीवा' प्रत्येकशरीरजीवात्मिका द्रष्टव्या, 'जे यावन्ना तहाविहा' इति यापि चान्या अधिकृतया प्रत्येकशरीर-जीवात्मकत्वेन निश्चितया छल्लया समानरूपा छल्ली सापि तथाविधा–प्रत्येकशरीरजीवात्मिका अवगन्तव्या,

एवं कन्दादिविषया अपि तिस्रः गाथा भावनीयाः ॥ यदुक्तम्–'जस्स मूलस्स भग्गस्स समो भङ्गो पदीसइ' इत्यादि, तदेव लक्षणं स्पष्टं प्रतिपिपादयिषुरिदमाह–

मू. (१२०) *चक्कागं भज्जमाणस्स, गंठी चुन्नघनो भवे।*
पुढविसरिसेण भेएण, अनंतजीवं वियाणाहि ॥

वृ. 'चक्कागं'मित्यादि, चक्रकं–चक्राकारं एकान्तेन समं भङ्गस्थानं यस्य भज्यमानस्य मूलकन्दस्कन्धत्वक्शाखापत्रपुष्पादेर्भवति तन्मूलादिकमनन्तजीवं विजानीहि इति सम्बन्धः, तथा 'गंठी चुन्नघनो भवे' इति ग्रन्थिः पर्व सामान्यतो भङ्गस्थानं तत्र तस्य भज्यमानस्य चूर्णेन–रजसा घनो–व्याप्तो भवति ॥ अथवा यस्य पत्रादेर्भज्यमानस्य चक्राकारं भङ्गं ग्रन्थिस्थाने रजसा व्याप्तिं च विना पृथिवीसदृशेन भेदेन भङ्गस्थानं भवति, सूर्यकरनिकरप्रतप्तकेदारतरिकाप्रतरखण्डस्येव समो भङ्गो भवतीतिभावः तमनन्तकायं विजानीहि ॥

मू. (१२१) *गूढसिरागं पत्तं सच्छीरं जं च होइ निच्छीरं।*
जंपिय पणट्ठसंधिं अनंतजीवं वियाणाहि ॥

वृ. पुनरपि लक्षणान्तरमाह–यत्पत्रं सक्षीरं निःक्षीरं वा गूढशिराकं–अलक्ष्यमाणशिराविशेषं यदपि च प्रनष्टसन्धि–सर्वथाऽनुपलक्ष्यमाणपत्रार्द्धद्वयसन्धि तदनन्तजीवं विजानीहि।

मू. (१२२) *पुप्फा जलया थलया य बिंटबद्धा य नालबद्धा य।*
संखिज्जमसंखिज्जा बोद्धव्वाऽनंतजीवा य ॥

वृ. सम्प्रति पुष्पादीगतं विशेषमभिधित्सुराह–पुष्पाणि चतुर्विधानि, तद्यथा–जलजानि–सहस्रपत्रादीनि स्थलजानि–कोरण्टकादीनि, एतान्यपि च प्रत्येकं द्विधा, तद्यथा–कानिचिद्वृन्तबद्धानि अतिमुक्तकप्रभृतीनि कानिचिन्नालबद्धानि जातिपुष्पप्रभृतीनि, अत्र एतासां मध्ये कानिचित्पत्रादिगतजीवापेक्षया सङ्ख्येयजीवानि कानिचिदसङ्ख्येयजीवानि कानिचिदनन्तजीवानि यथाऽऽगमं बोद्धव्यानि।

मू. (१२३) *जे केइ नालियाबद्धा पुप्फा संखिज्जजीविया भणिया।*
निहुया अनंतजीवा जे यावन्ने तहाविहा ॥

वृ. अत्रैव कञ्चिद्विशेषमाह–यानि कानिचित् नालिकाबद्धानि पुष्पाणि जात्यादिगतानि तानि सर्वाण्यपि सङ्ख्यातजीवकानि भणितानि तीर्थकरगणधरैः, स्निहुः–स्निहूपुष्पं (थोहरपुष्पं) पुनरनन्तजीवं, यान्तपि चान्यानि स्निहूपुष्पकल्पानि तान्यपि तथाविधानि–अनन्तजीवात्मकानि ज्ञातव्यानि ॥

मू. (१२४) *पउमुप्पलिनीकंदे अंतरकंदे तहेव झिल्ली य।*
एए अनंतजीवा एगो जीवो विसमुणाले ॥

वृ. पद्मिनीकन्दः–उत्पलिनीकन्दः, अन्तरकन्दो–जलजवनस्पतिविशेषकन्दः, झिल्लिका–

वनस्पतिविशेषरूपा, एते सर्वेऽप्यनन्तजीवाः, तथा [illegible] च किमिति ? (एको जीवः) एकजीवात्मके विसमृणाले इति भावः

मू. (१२५) *पलंडूल्हसुणकंदे य, कंदली य कुसुंबए ।*
एए परित्तजीवा, जे यावन्ने तहाविहा ॥

वृ. पलण्डुकन्दो लसुनकन्दः कन्दलीकन्दको वनस्पतिविशेषः, कुस्तुम्बकोऽप्येवमेव, एते सर्वेऽपि 'परित्तजीवा' प्रत्येकशरीरजीवात्मकाः प्रतिपत्तव्याः, येऽपि चान्ये एवंप्रकारा अनन्तजीवात्मकलक्षणविरहितास्तेऽपि तथाविधाः-प्रत्येकशरीरजीवात्मका वेदितव्याः ।

मू. (१२६) *पउमुप्पलनलिणाणं, सुभगसोगंधियाण य ।*
अरविंदकुंकणाणं, सयवत्तसहस्सपत्ताणं ॥

मू. (१२७) *बिंटं बाहिरपत्ता य, कण्हिया चेव एगजीवस्स ।*
अब्भिंतरगा पत्ता पत्तेयं केसरा मिंजा ॥

वृ. पद्मानाम् उत्पलानां नलिनानां सुभगानां सौगन्धिकानां अरविन्दानां कोकनदानां शतपत्राणां सहस्रपत्राणां प्रत्येकं यत् वृन्तं-प्रसवबन्धनं यानि च बाह्यपत्राणि प्रायो हरितरूपाणि या च कर्णिका-पत्राधारभूता एतानि त्रीण्यपि एकजीवात्मकानि, यानि पुनरभ्यन्तराणि पत्राणि यानि च केसराणि याश्च मिञ्जाः-फलानि एतानि प्रत्येकमेकैकजीवाधिष्ठितानि ॥

मू. (१२८) *वेणुनल इक्खुवाडिय समासइक्खू य इक्कडे रंडे ।*
करकर सुंठि विहंगू तणाण तह पव्वगाणं च ॥

मू. (१२९) *अचिंछ पव्वं बलिमोडओ य एगस्स होंति जीवस्स ।*
पत्तेयं पत्ताइं पुप्फाइं अनेगजीवाइं ॥

वृ. वेणुः-वंशो नडः-तृणविशेषः इक्षुवाटिकादयो लोकतः प्रत्येतव्याः, तृणानि दूर्वादीनि यानि च पर्वगानि-पर्वोपेतानि एतेषां यदक्षि यच्च पर्व यच्च 'बलिमोडउ' त्ति पर्वपरिवेष्टनं चक्रकारं, एतानि एकजीवस्य सम्बन्धीनि भवन्ति, एकजीवात्मकानि भवन्तीति भावः, पत्राणि एतेषां प्रत्येकमेकजीवाधिष्ठितानि पुष्पाण्यनेकजीवात्मकानि ॥

मू. (१३०) *पूसफलं कालिंगं तुंबं तउसेल एलवालुंकं ।*
घोसाडय पंडोलं तिंदूयं चेव तेंदूसं ॥

मू. (१३१) *बिंटसमं सकडाहं एयाइं हवंति एगजीवस्स ।*
पत्तेयं पत्ताइं सकेसरं केसरं मिंजा ॥

वृ. पुष्पफलं एवं कालिङ्गं तुम्बं त्रपुषं 'एलावालु' त्ति चिर्भटविशेषरूपं, वालुकं-चिर्भटं, तथा घोषातकं पटोलं तेन्दुकं तिन्दुसं च यत्फलं, एतेषु प्रत्येकं वृन्तसमं 'सकडाहं' ति समांसं सगिरं तथा कटाह एतानि त्रीण्येकस्य जीवस्य भवन्ति, एकजीवात्मकान्येतानि त्रीणि भवन्तीत्यर्थः तथा एतेषामेव पुष्पफलादीनां तिन्दुकपर्वन्तानां पत्राणि पृथक् 'प्रत्येक' मिति प्रत्येकशरीराधिष्ठितानि, एकैकजीवाधिष्ठ तानीत्यर्थः । तथा सकेसरा अकेसरा वा मिञ्जा-बीजानि प्रत्येकमेकैकजीवाधिष्ठितानि ।

मू. (१३२) *सप्फाए सज्जाए उव्वेहलिया य कुहणकंदुक्के ।*

एए अनंतजीवा कंदुक्के होइ भयणा उ ॥

वृ. एते कुहनादिवनस्पतिविशेषा लोकतः प्रत्येतव्याः, एते चानन्तजीवात्मकाः, नवरं कंदुक्के भजना, स हि कोऽपि देशविशेषादनन्तः--अनन्तजीवात्मको भवति, कोऽप्यसङ्ख्येयजीवात्मक इति ॥ आह–किं बीजजीव एव मूलादिजीवो भवति उतान्यस्तस्मिन्नपक्रान्ते उत्पद्यते इति परप्रश्नमाशङ्क्याह–

मू. (१३३) *बीए जोणिब्भूए जीवो वक्कमइ सो व अन्नो वा ।*
जोऽवियं मूले जीवो सोऽवि य पत्ते पढमयाए ॥

वृ. बीजे योनिभूते–योन्यवस्थां प्राप्ते, योनिपरिणाममजहतीति भावः, बीजस्य हि द्विविधाऽवस्था, तद्यथा–योन्यवस्था अयोन्यवस्था च, तत्र यदा बीजं योन्यवस्थां न जहाति अथ च उज्झितं जन्तुना तदा तत् योनिभूतमित्यभिधीयते, उज्झितं च जन्तुना निश्चयतो नावगन्तुं शक्यते ततोऽतिशायिना सम्प्रति सचेतनमचेतनं वा अविध्वस्तयोनि योनिभूतमिति व्यवह्रियते, विध्वस्तयोनि तु निष्प्रत्यचेतनत्वादयोनिभूतमिति, अथ योनिरिति किमभिधीयते ?,

उच्यते, जन्तोरुत्पत्तिस्थानं अविध्वस्तशक्तिकं--तत्रस्थजीवपरिणमनशक्तिसम्पन्नमिति भावः, तस्मिन् बीजे योनिभूते जीवो 'व्युत्क्रामति' उत्पद्यते 'स एव' पूर्वको बीजजीवः अन्यो वा आगत्य तत्रोत्पद्यते, किमुक्तं भवति ?–यदा बीजजीवनिर्वर्त्तकेन जीवेन स्वायुषः क्षयात् बीजपरित्यागः कृतो भवति, तस्य च बीजस्य पुनरम्बुकालावनिसंयोगरूपसामग्रीसंभवस्तदा कदाचित्स एव प्राक्तनो बीजजीवो मूलादिनामगोत्रे उपनिबध्य बीजे उत्पद्यते–तत्रागत्य परिणमति, कदाचिदन्यः पृथिवीकायिकादिबीजः,

'योऽपि च मूले जीव इति' य एव मूलतया परिणमते जीवः सोऽपि च पत्रे प्रथमतयेति–स एव प्रथमपत्रतयाऽपि परिणमते इत्येकजीवकर्त्तृके मूलप्रथमपत्रे इति ।

मू. (१३४) *सव्वोऽवि किसलओ खलु उग्गममाणो अनंतओ भणिओ ।*
सो चेव विवड्ढंतो होइ परित्तो अनंतो वा ॥

वृ. आह--यद्येवं 'सव्वोऽवि किसलओ खलु उग्गममाणो अणंतओ भणिओ' इत्यादि वक्ष्यमाणं कथं न विरुध्यते ?, उच्यते, इह बीजजीवोऽन्यो वा बीजमूलत्वेनोत्पद्य तदुत्सूनावस्थां करोति, ततस्तदनन्तरभाविनीं किसलयावस्थां नियमतोऽनन्ता जीवाः कुर्वन्ति, पुनश्च तेषु स्थितिक्षयात्परिणतेषु असावेव मूलजीवोऽनन्तजीवतनुं स्वशरीरतया परिणमय्य तावद्वर्द्धते यावत्प्रथमपत्रमिति न विरोधः, अन्ये तु व्याचक्षते–प्रथमपत्रमिह याऽसौ बीजस्य समुच्छ्रूनावस्था, तेन एकजीवकर्त्तृके मूलप्रथमपत्रे इति, किमुक्तं भवति ?–मूलसमुच्छ्रूनावस्थे एकजीवकर्तृके, एतच्च नियमप्रदर्शनार्थमुक्तं–मूलसमुच्छ्रूनावस्थे एकजीवपरिणामिते एव, शेषं तु किसलयादि नाश्यं मूलजीवपरिणामाविर्भावितमिति, ततः 'सव्वोऽवि किसलओ खलु उग्गममाणो अणंतओ भणिओ' इत्याद्यपि वक्ष्यमाणमविरुद्धं, मूलस-मुच्छ्रूनावस्थानिर्वर्तनारम्भकाले किसलयत्वाभावादिति, आह–प्रत्येकशरीरवनस्पतिकायिकानां सर्वकालं शरीरावस्थामधिकृत्य किं प्रत्येकशरीरत्वमुत कस्मिंश्चिदवस्थाविशेषे अनन्तजीवत्वमपि सम्भवति ?,

तथा साधारणवनस्पतिकायिकानामपि किं सर्वकालमनन्तजीवत्वमुत कदाचित्

प्रत्येकशरीरत्वमपि भवति ?, तत आह–'सव्वोऽवी'त्यादि, इह सर्वशब्दोऽपरिशेषवाची, सर्वोऽपि वनस्पतिकायः प्रत्येकशरीरः साधारणोवा किसलयावस्थामुपगतः सन् अनन्तकायस्तीर्थकरगणधरैर्भणितः, स एव किसलयरूपोऽनन्तकायिकः प्रवृद्धिं गच्छन् अनन्तो वा भवति परीत्तो वा, कथम् ?, उच्यते, यदि साधारणं शरीरं निर्वर्त्त्यते तदा साधारण एव भवति, अथ प्रत्येकशरीरं ततः प्रत्येक इति, कियतः कालादूर्ध्वं प्रत्येको भवति इति चेत्, उच्यते अन्तर्मुहूर्त्तात्, तथाहि–निगोदानामुत्कर्षतोऽप्यन्तर्मूहूर्त्तं कालं यावत्स्थितिरुक्ता ततोऽन्तर्मुहूर्त्तात्परतो विवर्द्धमानः प्रत्येको भवतीति ॥ समप्रति साधारणलक्षणमाह–

मू. (१३५) *समयं वक्कंताणं समयं तेसिं सरीरनिव्वत्ती ।*
समयं आणुग्गहणं समयं ऊसासनीसासो ॥

वृ. 'समयं' युगपद् व्युक्रान्तानां–उत्पन्नानां सतां 'तेषां' साधारणजीवानां समकम्–एककालं शरीरनिर्वृत्तिर्भवति, समकं च प्राणापानग्रहणं–प्राणापानयोग्यपुद्गलोपादानम् ततः समकम्–एककालं तदुत्तरकालभाविनावुच्छ्वासनिःश्वासौ ।

मू. (१३६) *इक्कस्स उ जं गहणं बहूण साहारणाण तं चेव ।*
जं बहुयाणं गहणं समासओ तंपि इक्कस्स ॥

वृ. तथा एकस्य यत् आहारादिपुद्गलानां ग्रहणं तदेव बहूनामपि साधारणजीवानामवसेयं, किमुक्तं भवति ?–यत् आहारादिकमेको गृह्णाति शेषा अपि तच्छरीराश्रिता बहवोऽपि तदेव गृह्णन्तीति, तथा च यद्बहूनां ग्रहणं तत्संक्षेपादेकत्र शरीरे समावेशात् एकस्यापि ग्रहणम् ।

मू. (१३७) *साहारणमाहारो साहारणमाणुपानगहणं च ।*
साहारणजीवाणं साहारणलक्खणं एयं ॥

वृ. सम्प्रत्युरक्तार्थोपसंहारमाह–सर्वेषामप्येकशरीराश्रितानां जीवानामुक्तप्रकारेण यत् साधारणं साधारणः, सूत्रे नपुंसकतानिर्देशः आर्षत्वात्, आहारः आहारयोग्यपुद्गलोपादानम् यच्च साधारणं प्राणापानयोग्यपुद्गलोपादानं उपलक्षणमेतत् यौ साधारणावुच्छ्वासनिःश्वासौ या च साधारणा शरीरनिर्वृत्तिः एतत्साधारणजीवानां लक्षणम् ।

मू. (१३८) *जह अयगोलो धंतो जाओ तत्ततवणिज्जसंकासो ।*
सव्वो अगनिपरिणओ निगोयजीवे तहा जाण ॥

वृ. सम्प्रति यथैकस्मिन् निगोदशरीरे अनन्ता जीवाः परिणताः प्रतीतिपथमवतरन्ति तथा प्रतिपादयन्नाह–यथा अयोगोलो ध्मातः सन् तप्ततपनीयसंकाशः सर्वोऽग्निपरिणतो भवति तथा निगोदजीवान् जानीहि, निगोदरूपेऽप्येकैकस्मिन् शरीरे तच्छरीरात्मकतया अनन्तान् जीवान् परिणतान् जानीहि ।

मू. (१३९) *एगस्स दोण्ह तिण्ह व संखिज्जाण व न पासिउं सक्का ।*
दीसंति सरीराइं निगोयजीवाणऽनंताणं ॥

वृ. एवं च सति–एकस्य द्वयोस्त्रयाणां यावत्संख्येयानां वाशब्दादसंख्येयानां वा निगोदजीवानां शरीराणि द्रष्टुं न शक्यानि, कुत इति चेत् ?, उच्यते–अभावात्, न हि एकादिजीवगृहीतानि अनन्तवनस्पतिशरीराणि सन्ति, अनन्तजीवपिण्डात्मकत्वात्तेषाम्, कथं तर्हि उपलभ्यानि ?,

इत्यत आह–'दीसंती'त्यादि, दृश्यन्ते शरीराणि निगोदजीवानांबादरनिगोदजीवानां अनन्तानां न तु सूक्ष्मनिगोदजीवानां, तेषां शरीराणामनन्तजीवसङ्घातात्मकत्वेऽप्यनुपलभ्यस्वभावत्वात्, तथासूक्ष्मपरिणामपरिणतत्वात्, अथ कथमेतदवसीयते--निगोदरूपशरीरं नियमादनन्त जीवपरिणामाविर्भावितं भवति ?, उच्यते–जिनवचनात्, तच्चेदम्

॥१॥ "गोला य असंखेज्जा होंति निगोया असंखया गोले ।
एक्केक्को य निगोओ अनंतजीवो मुणेयव्वो ॥"

मू. (१४०) *लोगागासपएसे निगोयजीवं ठवेहि इक्किक्कं ।*
एवं मविज्जमाणा हवंति लोगा अनंता उ ॥

वृ. सम्प्रति एतेषामेव निगोदजीवानां प्रमाणमभिधित्सुराह–एकैकस्मिन् लोकाकाशप्रदेशे एकैकं निगोदजीवं स्थापय, एवमेकैकस्मिन् आकाशप्रदेशे एकैकजीवरचनया मीयमानः 'अनन्तलोका' अनन्तलोकाकाशप्रमाणा निगोदजीवा भवन्ति ॥

मू. (१४१) *लोगागासपएसे परित्तजीवं ठवेहि इक्किक्कं ।*
एवं मविज्जमाणा हवंति लोगा असंखिज्जा ॥

वृ. सम्प्रति प्रत्येकवनस्पतिजीवप्रमाणमाह–एकैकस्मिन् लोकाकाशप्रदेशे एकैकं प्रत्येकवनस्पतिजीवं स्थापय, एवमुक्तप्रकारेण मीयमानाः प्रत्येकतरुजीवा असङ्खयेयलोकाकाशप्रदेशप्रमाणा भवन्ति ।

मू. (१४२) *पत्तेया पज्जत्ता पयरस्स असंखभागमित्ता उ ।*
लोगाऽसंखा पज्जत्तयाण साहारणमनंता ॥

वृ. सम्प्रति पर्याप्तापर्याप्तभेदेन प्रत्येकसाधारणवनस्पतिजीवानां प्रमाणमाह–पर्याप्ताः प्रत्येकवनस्पतिजीवाः घनीकृतस्य सम्बन्धिनः प्रतरस्य असङ्खयेयतमे भागे यावन्त आकाशप्रदेशास्तावत्प्रमाणा भवन्ति, अपर्याप्तानां पुनःप्रत्येकतरुजीवानामसङ्खयेया लोकाः परिमाणं, पर्याप्तानां अपर्याप्तानां च साधारणजीवानां अनन्तलोकाः, किमुक्तं भवति ?--असङ्खयेयलोकाकाशप्रदेशप्रमाणा अपर्याप्ताः प्रत्येकतरवः, अनन्तलोकाकाशप्रदेशप्रमाणाः पर्याप्ता अपर्याप्ताश्च साधारणजीवा इति ॥

मू. (१४३) *एएहिं सरीरेहिं पच्चक्खं ते परूविया जीवा ।*
सुहुमा आणागिज्झा चक्खुप्फासं न ते इति ॥

मू. (१४४) जे यावन्ने तहप्पगारा, ते समासओ दुविहा पन्नत्ता, तं०–पज्जत्तगा य अपज्जत्तगा य, तत्थ णं असंपत्ता, तत्थ णं जे ते पज्जत्तगा तेसिणं वन्नाएसेणं गंधाएसेणं रसाएसेणं फासाएसेणं सहस्सग्गसो विहाणाइं, संखिज्जाइं जोणिप्पमुहसयसहस्साइं, पज्जत्तगनीसाए अपज्जत्तगा वक्कमंति, जत्थ एगो तत्थ सिय संखिज्जा सिय असंखिज्जा सिय अनंता ॥ एएसिणं इमाओ गाहाओ अनुगंतव्वाओ, तंजहा–

वृ. 'जे यावन्ने तहप्पगारा' इति, येऽपि चान्ये–अनुक्तरूपास्तथाप्रकाराः–प्रत्येकतरुरूपा साधारणरूपाश्च, तेऽपि वनस्पतिकायत्वेन प्रतिपत्तव्याः, 'ते समासओ'इत्यादि प्राग्वत्, नवरं यत्रैको बादरपर्याप्तस्तत्र तन्निश्रया अपर्याप्ताः कदाचित् सङ्खयेयाः, कदाचितदसङ्खयेया कदाचिद-

नन्ताः, प्रत्येकतरवः सङ्ख्येया असङ्ख्येया वा; साधारणास्तु नियमादनन्ता इति भावः।

'एतेषां' साधारणप्रत्येकतरुरूपाणां वनस्पतिविशेषाणां वक्ष्यमाणानामिमाः-विशेषप्रतिपादिका वक्ष्यमाणा गाथा अनुगन्तव्याः-प्रतिपत्तव्याः, ता एवाह-'तंजहा' तद्यथा-

मू. (१४५) *कंदा य कंदमूला य, रुक्खमूला इयावरे।*
गुच्छा य गुम्मवल्ली य, वेणुयाणि तणाणि य॥

वृ. 'कंदा वे'त्यादि गाथात्रयं 'कन्दाः' सूरणकन्दादयः कन्दमूलानि वृक्षमूलानि च साधारणवनस्पतिविशेषाः 'गुच्छा' गुल्मा, वल्लयश्च प्रतीताः 'वेणुका' वंशास्तृणानिअर्जुनादीनि।

मू. (१४६) *पउमुप्पल संघाडे हढे य सेवाल किन्नए पनए।*
अवए य कच्छभाणी कंदुक्के गूणवीसइमे॥

वृ. पद्मोत्पलशृङ्गाटकानि प्रतीतानि 'हढो' जलजवनस्पतिविशेषः सेवालः-प्रसिद्धः कृष्णकपनकावककच्छभाणिकन्दुकाः-साधारणवनस्पतिविशेषाः।

मू. (१४७) *तय छल्लि पवालेसु य पत्तपुप्फफलेसु य।*
मूलग्गमज्झबीएसु, जोणी कस्सवि कितिया॥

वृ. एतेषामेकोनविंशतिसङ्ख्यानां त्वगादिषु मध्ये कस्यापि कापि योनिः, किमुक्तं भवति कस्यापि त्वक् योनिः कस्यापि छल्ली यावत्कस्यापि मूलं कस्याप्यग्रं कस्यापि मध्यं कस्यापि बीजमिति

मू. (१४८) *से त्तं साहरणसरीरवणस्सइकाइया से त्तं बायरवणस्सइकाइया, से त्तं वणस्सइकाइया, से त्तं एगिंदिया॥*

वृ. 'सेत्त' मित्यादि निगमनचतुष्टयं सुगमं॥ तदेनमुक्ता एकेन्द्रियाः,

सम्प्रति द्वीन्द्रियप्रतिपादनार्थमाह-

मू. (१४९) *से किं तं बेइंदिया ?, बेइंदिया अनेगविहा पन्नत्ता, तंजहा-पुलाकिमिया कुच्छिकिमिया गंडूयलगा गोलोमा णेउरा सोमंगलगा वंसीमुहा सूइमुहा गोजलोया जलोया जालाउया संखा संखणगा धुल्ला खुल्ला गुलया खंधा वराडा सोत्तिया मुत्तिया कलुयावासा एगओवत्ता दुहओवत्ता नंदियावत्ता संबुक्का माइवाहा सिप्पिसंपुडा चंदना समुद्दलिक्खा,*

-जे यावन्ने तहप्पगारा, सव्वे ते संमुच्छिमा नपुंसगा, ते समासओ दुविहा पन्नत्ता, तंजहा-पज्जत्तगा य अपज्जत्तगा य, एएसिणं एवमाइयाणं बेइंदियाणं पज्जत्तापज्जत्ताणं सत्त जाइकुलकोडिजोणीपमुहसयसहस्सा भवंतीति मक्खायं। से त्तं बेइंदियसंसारसमावन्नजीवप०।

वृ. अथ के ते द्वीन्द्रियाः ?, सूरिराह-द्वीन्द्रिया अनेकविधाः प्रज्ञप्ताः, तद्यथा-'पुलाकिमिया' इत्यादि, पुलाकिमिया नाम पायुप्रदेशोत्पन्नाः कृमयः कुक्षिकृमयः-कुक्षिप्रदेशोत्पन्नाः शङ्खाः-समुद्रोद्भवाः प्रतीताः शङ्खनकाः त एव लघवः धुल्लाः-धुल्लिकाः खुल्ला-लघवः शङ्खाः-सामुद्रशङ्खाकाराः वराटाः-कपर्दकाः 'सिप्पिसंपुड'त्ति संपुटरूपाः शुक्तयः चन्दनका-अक्षाः, शेषास्तु यथासम्प्रदायं वाच्याः, 'जे यावन्ने तहप्पगारा' इति येऽपिचान्ये तथाप्रकारा-एवंप्रकारा मृतककडेवर- सम्भूतकृम्यादयस्ते सर्वे द्वीन्द्रिया ज्ञातव्याः, ते संमुर्छिमत्वादेव च नपुंसकाः, संमुर्छिमानामवश्यं नपुंसकत्वात् 'नारकसंमुर्च्छिमा नपुंसका' इतिवचनात्,

'ते समासओ' इत्यादि, ते द्वीन्द्रियाः समासतः-संक्षेपेण द्विविधाः प्रज्ञप्ताः, तद्यथा-

पर्याप्तकाश्च अपर्याप्तकाश्च, चशब्दौ योनिकुलभेदेन स्वगतानेकभेदसूचकौ, एतेषां द्वीन्द्रियाणामेवमादीनां पुलाकृम्यादीनां द्वीन्द्रियाणां पर्याप्तपर्याप्तादीनां सर्वसङ्ग्रहया सर्वजातिकुलकोटीनां योनिप्रमुखाणि–योनिप्रवहाणि योनिशतसहस्राणि भवन्ति, सप्त जातिकुलकोटिलक्षा भवन्तीति भावः, इत्याख्यातं तीर्थकृद्भिः, मकारोऽलाक्षणिकः, इयमत्र भावना–इह जातिकुलयोनीनां परिज्ञानार्थमिदं परिस्थूरमुदाहरणं पूर्वाचार्यैरुपदर्शितम्, तद्यथा–जातिरिति किल तिर्यग्गतिः तस्याः कुलानि–कृमिकीटवृश्चिकादीनि, इमानि च कुलानि योनिप्रमुखाणि, तथाहि–

एकस्यामेव योनौ अनेकानि कुलानि भवन्ति, यथा छगणयोनौ कृमिकुलं कीटकुलं वृश्चिककुलमित्यादि, अथवा जातिकुलमिलेकं।दम्, जातिकुलयोन्योश्च परस्परं भिन्नत्वात्, एकस्यामपि योनौ अनेकजातिकुलसम्भवात्, यथा एकस्यामेव योनौ कृमिजातिकुलं कीटकजातिकुलं वृश्चिकजातिकुलमित्यादि, एवं च एकस्यामेव योनाववान्तरजातिभेदभावादनेकानि योनिप्रवहाणि जातिकुलानि सम्भवन्तीत्युपपद्यन्ते, द्वीन्द्रियाणां सप्त जातिकुलकोटीनां शतसहस्राणाम्, उपसंहारमाह–'सेत्त' मित्यादि, सैषा द्वीन्द्रियसंसारसमापन्नजीवप्रज्ञापना ॥

सम्प्रति त्रीन्द्रियसंसारसमापन्नजीवप्रज्ञापनार्थमाह–

मू. (१५०) से किं तं तेइंदियसंसारसमावन्नजीवपन्नवणा ?, तेइंदियसंसारसमावन्नजीवपन्नवणा अनेगविहा पन्नत्ता, तं–ओवइया रोहिणिया कुंथू पिपीलिया उद्दंसगा उद्देहिया उक्कलिया उप्पाया उप्पडा तणहारा कट्ठहारा मालुया पत्ताहारा तणबेंटिया पत्तबेंटिया पुप्फबेंटिया फलबेंटिया बीयबेंटिया तेवुरणमिंजिया तओसिमिंजिया कप्पासट्ठिमिंजिया हिल्लिया झिल्लिया झिंगिरा किंगिरिडा बाहुया लहुया सुभगा सोवत्थिया सुयबेंटा इंदकाइया इंदगोवया तुरुतुंबगा कुच्छलवाहगा जूया हालाहला पिसुया सयवाइया गोम्ही हत्थिसोंडा,

जे यावन्ने तहप्पगारा, सव्वे ते संमुच्छिमा नपुंसगा ते समासओ दुविहा पन्नत्ता, तं०–पज्जत्तगा य अपज्जत्तगा य, एएसिणं एवमाइयाणं तेइंदियाणं पज्जत्तापज्जत्ताणं अट्ठ जाइकुललोडिजोणिप्पमुहसयसहस्सा भवंतीतिमक्खायं, सेत्तं तेइंदियसंसारसमावन्नजीवपन्नवणा ।

'अथ का सा त्रीन्द्रियसंसारसमापन्नजीवप्रज्ञापना ?, भगवानाह–त्रीन्द्रियसंसारसमापन्नजीवप्रज्ञापना अनेकविधा प्रज्ञप्ता, तामेव तद्यथेत्यादिनोपदर्शयति, एते च औपयिकप्रभृतयस्त्रीन्द्रिया देशविशेषतो लोकतश्चावगन्तव्याः, नवरं गोम्ही–कर्णसियालिया 'जे यावन्ने तहप्पगारा' येऽपि चान्ये तथाप्रकारास्ते सर्वे त्रीन्द्रिया ज्ञातव्या इति शेषः, सव्वे 'ते संमुच्छिमानपुंसका' इत्यादि पूर्ववत्, 'एतेसिण'मित्यादि, एतेषां–त्रीन्द्रियाणामेवमादिकानाम्–औपयिकप्रभृतीनां पर्याप्तापर्याप्तानां सर्वसङ्ग्रहया अष्टौ जातिकुलकोटीनां योनिप्रमुखाणि–योनिप्रवाहाणि शतसहस्राणि भवन्ति, अष्टौ कुलकोटिलक्षा भवन्तीति भावः, इत्याख्यातं तीर्थकृद्भिः, उपसंहारमाह–'सेत्त'मित्यादि ॥ तदेवमुक्ता त्रीन्द्रिय संसारसमापन्नजीवप्रज्ञापना, सम्प्रति चतुरिन्द्रियसंसारसमापन्न- जीवप्रज्ञापनामाह–

मू. (१५१) से किं तं चउरिंदियसंसारसमावन्नजीवपन्नवणा ?, २ अनेगविहा पं०, तं०–

मू. (१५२) अंधिय पत्तिय मच्छिय मसगा कीडे तहा पयंगे य ।
ढंकुण कुक्कड कुक्कुह नंदावत्ते य सिंगिरडे ॥

मू. (१५३) किण्हपत्ता नीलपत्ता लोहियपत्ता हालिद्दपत्ता सुक्किलपत्ता चित्तपक्खा विचित्तपक्खा ओहंजलिया जलचारिया गंभीरा णीणिया तंतवा अच्छिरोडा अच्छिवेहा सारंगा नेउरा दोला भमरा भरिली जरुला तोट्टा विंछुया पत्तविच्छुया छाणविच्छुया जलविच्छुया पियंगाला कणगा गोमयकीडा, जे यावन्ने तहप्पगारा, सव्वे ते संमुच्छिमा नपुंसगा,

ते समासओ दुविहा पन्नत्ता, तं०-पज्जत्तगा य अपज्जत्तगा य, एएसिणं एवमाइयाणं चउरिंदियाणं पज्जत्तापज्जत्ताणं नव जाइकुलकोडिजोणिप्पमुहसयसहस्साइं भवंतीतिमक्खायं, से त्तं चउरिंदियसंसारसमावन्नजीवपन्नवणा ॥

वृ. एतेऽपि चतुरिन्द्रिया लोकतः प्रत्येतव्याः, एतेषां च पर्याप्तापर्याप्तानां सर्वसङ्ख्यया जातिकुलकोटीनां नव लक्षा भवन्ति, शेषा अक्षरगमनिका प्राग्वत्, उपसंहारमाह-'सेत्त' मित्यादि

उक्ता चतुरिन्द्रियसंसारसमापन्नजीवप्रज्ञापना, सम्प्रति पञ्चेन्द्रियसंसारसमापन्नजीवप्रज्ञापनामाह-

मू. (१५४) से किं तं पंचेंदियसंसारसमावन्नजीवपन्नवणा ?, २ चउव्विहा पं०, तं०-नेरइयपंचिंदियसंसारसमावन्नजीवपन्नवणा, तिरिक्खजोणियपंचिंदियसंसारसमावन्नजीवपन्नवणा मणुस्सपंचिंदियसंसारसमावन्नजीवपन्नवणा देवपंचिंदियसंसारसमावन्नजीवपन्नवणा ।

वृ. अथ का सा पञ्चेन्द्रियसंसारसमापन्नजीवप्रज्ञापना ?, सूरिराह-पञ्चेन्द्रियसंसारसमापन्नजीवप्रज्ञापना चतुर्विधा प्रज्ञप्ता, तद्यथा-'नैरयिके' त्यादि, अयम्-इष्टफलं कर्म निर्गतमयं येभ्यस्ते निरया-नरकावासास्तेषु भवा नैरयिकास्ते च ते पञ्चेन्द्रियसंसारसमापन्नजीवाश्च नैरयिकपञ्चेन्द्रियसंसारसमापन्नजीवास्तेषां प्रज्ञापना, तथा 'अञ्च गतौ' तिरोऽञ्चन्तीति तिर्यञ्चः, 'तिरसस्तिर्यतीति' तिरसस्तिर्यदिशः, तेषां योनिः-उत्पत्तिस्थानं तिर्यग्योनिस्तत्र भवास्तैर्यग्योनिकास्ते च ते पञ्चेन्द्रियसंसासरसमापन्नजीवाश्च तेषां प्रज्ञापना तैर्यग्योनिकपञ्चेन्द्रियसंसारसमापन्नजीवप्रज्ञापना,

तथा मनुशब्दो मनुष्यवाची यथा राजशब्दो राज्यन्याभिधायकः, मनोरपत्यानि मनुष्याः, 'मनोर्यञ्णौ चश्चेति' यः प्रत्ययः षकारश्चागमः, अयं चयः प्रत्ययो जाताविति मनुष्यशब्दो जातिवाची राजन्यशब्दवत्, ते च ते पञ्चेन्द्रियसंसारसमापन्नजीवाश्च तेषां प्रज्ञापना मनुष्यपञ्चेन्द्रियसंसारसमापन्नजीवप्रज्ञापना, तथा दीव्यन्ति-स्वेच्छया क्रीडन्तीति देवाः भवनपत्यादयः ते च ते पञ्चेन्द्रियसंसारसमापन्नजीवाश्च तेषां प्रज्ञापना देवपञ्चेन्द्रियसंसारसमापन्नजीवप्रज्ञापना ॥

तत्र नैरयिकप्रतिपादनार्थं प्रश्ननिर्वचनसूत्रे आह-

मू. (१५५) से किं तं नेरइया ?, नेरइया सत्तविहा पन्नत्ता तं०-रयणप्पभापुढविनेरइया १ सक्करप्पभापुढविनेरइया २ वालुयप्पभापुढविनेरइया ३ पंकप्पभापुढविनेरइया ४ धूमप्पभापुढविनेरइया ५ तमप्पभापुढविनेरइया ६ तमतमप्पभापुढविनेरइया ७,

ते समासओ दुविहा पन्नत्ता, तं०-पज्जत्तगा य अपज्जत्तगा य, से त्तं नेरइया ॥

वृ. सप्तविधत्वं नैरयिकाणां पृथिवीभेदेन अन्यथा प्रभूतभेदत्वमपि घटते, ततः पृथिवीभेदत एव सप्तविधत्वं तद्यथेत्यादिनोपदर्शयति-रत्नानि-वज्रवैडूर्यादीनि, प्रभाशब्दोऽत्र सर्वत्रापि स्वभाववाची रत्नानि प्रभा-स्वरूपं यस्याः सा रत्नप्रभा-रत्नबहुला रत्नमयीति भावार्थः, सा

चासौ पृथिवी च २ तस्यां नैरयिका रत्नप्रभापृथिवीनैरयिकाः, एवं 'सक्करप्पहापुढविनेरइया' इत्यादि भावनीयम्, उपसंहारमाह–'सेत्तं नेरइया' ॥

अधुनोद्देशक्रमप्रामाण्यानुसरणतस्तिर्यक्पञ्चेन्द्रियान् प्रतिपिपादयिषुराह–

मू. (१५६) से किं तं पंचिंदियतिरिक्खजोणिया ?, पंचिंदियतिरिक्खजोणिया तिविहा पन्नत्ता, तं०–१ जलयरपंचिंदियतिरिक्खजोणिया य १ थलयपंचिंदियतिरिक्खजोणिया य २ खहयरपंनदियतिरिक्खजोणिया य ३ ।

वृ. अथ के ते पञ्चेन्द्रियतिर्यग्योनिकाः ?, सूरिराह–पञ्चेन्द्रियतिर्यग्योनिकास्त्रिविधाः प्रज्ञप्ताः, तद्यथेत्यादि, 'जलयरे–' त्यादि, जले चरन्ति–पर्यटन्तीति जलचराः, 'आधारादिति' टप्रत्ययः, ते च ते पञ्चेन्द्रियतिर्यग्योनिकाश्च जलचरपञ्चेन्द्रियतिर्यग्योनिकाः, स्थले चरन्तीति स्थलचराः, खे–आकाशे चरन्तीति खचराः, प्राकृतत्वादार्षत्वाच्च 'खहचरा' इति सूत्रे पाठः, तत उभयत्रापि पञ्चेन्द्रियतिर्यग्योनिकशब्देन सह विशेषणसमासः ।

मू. (१५७) से किं तं जलयरपंचिंदियतिरिक्खजोणिया ?, जलयरपंचिंदियतिरिक्खजोणिया पंचविहा पन्नत्ता, तं०– १ मच्छा २ कच्छभा ३ गाहा ४ मगरा ५ सुसुमारा ॥

से किं तं मच्छा ?, मच्छा अनेगविहा पन्नत्ता, तं०–सण्हमच्छा खवल्लमच्छा जुंगमच्छा विज्झाडियमच्छा हलिमच्छा मगरिमच्छा रोहियमच्छा हलीसागरा गागरा वडा वडगरा गब्भया उसगारा तिमितिमिंगिला नक्का तंदुलमच्छा कणिक्कामच्छा सालिसतअझियामच्छा लंभणमच्छा पडागा पडागाइपडागा जे यावन्नेतहप्पगारा, सेत्तं मच्छा ॥

वृ. अथ के ते जलचरपञ्चेन्द्रियतिर्यग्योनिकाः ?, सूरिराह–जलचरपञ्चेन्द्रियतिर्यग्योनिकाः पञ्चविधाः प्रज्ञप्ताः, तदेव पञ्चविधत्वं तद्यथेत्यादिनोपदर्शयति १ मत्स्याः २ कच्छपाः, सूत्रे पकारस्य भकारः प्राकृतत्वात् ३ ग्राहा ४ मकराः ५ शिशुमाराः, प्राकृतत्वात्सूत्रे 'सुसुमारा' इति पाठः । मत्स्यादीनां च विशेषा लोकतो वेदितव्याः,

मू. (१५८) से किं तं कच्छभा ?, कच्छभा दुविहा पन्नत्ता, तं०–अट्ठिकच्छभा य मंसकच्छभा य, से त्तं कच्छभा ॥

वृ. नवरमस्थिकच्छपा मांसकच्छपा इति–ये अस्थिबहुलाः कच्छपास्ते अस्थिकच्छपाः ये मांसबहुलास्ते मांसकच्छपाः ।

मू. (१५९) से किं तं गाहा ?, गाहा पंचविहा पन्नत्ता, तं०–१ दिली २ वेढगा ३ मुद्धया ४ पुलया ५ सीमागारा, से त्तं गाहा ॥

मू. (१६०) से किं तं मगरा ?, मगरा दुविहा पन्नत्ता, तं–१ सोंडमगरा य २ मट्ठमगरा य, से त्तं मगरा ॥ से किं तं सुसुमारा ?, सुसुमारा एगागारा पन्नत्ता, से त्तं सुसुमारा । जे यावन्ने तहप्पगारा । ते समासओ दुविहा प० तं०–संमुच्छिमा य गब्भवक्कंतिया य, तत्थ णं जे ते संमुच्छिमा ते सव्वे नपुंसगा, तत्थ णं जे ते गब्भवक्कंतिया ते तिविहा, प०, तं०–इत्थी पुरिसा नपुंसगा ।

एएसिणं एवमाइयाणं जलयरपंचिंदियतिरिक्खजोणियाणं पज्जत्तापज्जत्ताणं अद्धतेरसजाइकुलकोडिजोणिप्पमुहसयसहस्सा भवन्तीति मक्खायं । सेत्तं जलयरपंचिंदियतिरिक्खजोणिया

वृ. 'ते समासओ' इत्यादि, ते जलचरपञ्चेन्द्रियतैर्यग्योनिकाः समासतः–संक्षेपेण द्विविधाः

प्रज्ञप्ताः, तद्यथा–संमूर्च्छिमाश्च गर्भव्युत्क्रान्तिकाश्च, "मूर्च्छा मोहसमुच्छ्रययोः" अस्मात् संपूर्वात् संमूर्च्छनं संमूर्च्छः, "अकर्तरि" इति भावे धञ्प्रत्ययः, गर्भोपपातव्यतिरेकेण एवमेव प्राणिनामुत्पाद इति भावः, तेन निर्वृत्ताः संमूर्च्छिमाः "भावादिम" इति इमप्रत्ययः।

गर्भे व्युत्क्रान्तिः–उत्पत्तिर्येषां ते, व्युत्क्रान्तिशब्दोऽत्रोत्पत्तिवाची, तथा पूर्वाचार्यप्रसिद्धेः, यदिवा 'गर्भात्' गर्भावासाद् व्युत्क्रान्तिः–निष्क्रमणं येषां ते गर्भव्युत्क्रान्तिकाः 'शेषाद् वा" इति कचसमासान्तः। चशब्दौ प्रत्येकं स्वगतानेकभेदसूचकौ।

तत्र ये ते संमूर्च्छिमास्ते सर्वे नपुंसकाः संमूर्च्छिमभावस्य नपुंसकत्वाविनाभावित्वात्। ये तु गर्भव्युत्क्रान्तिकास्ते त्रिविधाः प्रज्ञप्ताः, तद्यथा–स्त्रियः पुरुषा नपुंसकाः। एतेषां चोभयेषामपि शरीरावगाहनादिषु द्वारेषु यद्यन्तनं यच्च गर्भव्युत्क्रान्तिकानां स्त्रीपुंसनपुंसकानां परस्परमल्पबहुत्वचिन्तनं तज्जीवाभिगमटीकायां कृतमिति ततोऽवधार्यम्।

'एएसिणं' इत्यादि, एतेषामेवमादिकानामुपदर्शितप्रकारादीनां जलचरपञ्चेन्द्रियतैर्यग्योनिकानां पर्याप्तापर्याप्तानां सर्वसंख्ययाऽर्धत्रयोदशजातिकुलकोटीनां योनिप्रमुखानि–योनिप्रवहाणि शतसहस्राणि भवन्तीत्याख्यातं भगवद्भिस्तीर्थकरैः।

उपसंहारमाह–'सेत्तं' इत्यादि, तदेवमुक्ता जलचरपञ्चेन्द्रियतैर्यग्योनिकाः॥

सम्प्रति स्थलचरपञ्चेन्द्रियतैर्यग्योनिकानभिधित्सुराह–

मू. (१६१) *से किं तं थलयरपंचिंदियतिरिक्खजोणिया ?, थलयरपंचिं० दुविहा पं०, तं०–चउप्पयथलयरपंचिंदियतिरिक्खजोणिया य परिसप्पथलयरपंचिंदियतिरिक्खजोणिया य।*

से किं तं चउप्पयथलयरपंचिंदियतिरिक्खजोणिया ?, चउप्पयथलयरपंचिंदियतिरिक्खजोणिया चउव्विहा पं०, तं०–एगखुरा बिखुरा गंडीपदा सणप्फदा। से किं तं एगखुरा ?, एगखुरा अनेगविहा पं०, तं०–अस्सा अस्सतरा घोडगा गद्दभा गोरक्खरा कंदलगा सिरिकंदलगा आवत्तगा जे यावन्ने तहप्पगारा, सेत्तं एगखुरा। से किं तं दुखुरा ?, दुखुरा अणेगविहा पं०, तं०–उट्टा गोणा गवया रोज्झा पसुया महिसा मिया संबरा वराहा आया एलगरुरुसरभचमरकुरंगगोकन्नमादि जे यावन्ने तहप्पगारा, सेत्तं दुखुरा।

से किं तं गंडीपया ?, गंडीपया अनेगविहा पं०, तं०–इत्थी हत्थीपूयणया मंकुणहत्थी खग्गा (ग्गा) गंडा जे यावन्ने०, सेत्तं गंडीपया। से किं तं सणप्फया ?, अनेगविहा पं०, तं०–सीहा वग्घा दीविया अच्छा मरच्छा परस्सरा सियाला बिडाला सुणगा कोलसुणगा कोकंतिया ससगा चित्तगा चिल्लगा जे यावन्ने०, सेत्तं सणप्फया।

ते समासओ दुविहा पं०, तं०–संमुच्छिमा य गब्भवक्कंतिया य, तत्थ णं जे ते संमुच्छिमा ते सव्वे नपुंसगा, तत्थ णं जे ते गब्भवक्कंतिया ते तिविहा पं०, तं०–इत्थी पुरिसगा नपुंसगा। एएसिणं एवमाइयाणं थलयरपंचिंदियतिरिक्खजोणियाणं पज्जत्तापज्जत्ताणं दस जाइकुलकोडिजोणिप्पमुहसयसहस्सा भवन्तीतिमक्खायं। सेत्तं चउप्पयथलयरपंचिंदियतिरिक्खजोणिया।

वृ. चत्वारि पदानि येषां ते चतुष्पदाः–अश्वादयः ते च ते स्थलचरपञ्चेन्द्रियतैर्यग्योनिकाश्च चतुष्पदस्थलचरपञ्चेन्द्रियतैर्यग्योनिकाः, उरसा भुजाभ्यां च परिसर्पन्तीति परिसर्पाः–अहिनकुलादयः, ततः पूर्ववत् स्थलचरपञ्चेन्द्रियतैर्यग्योनिकपदेन सह विशेषणसमासः, चशब्दौ प्रत्येकं

स्वगतानेकभेदसूचकौ, तदेवानेकभेदत्वं क्रमेण प्रतिपिपादयिषुरिदमाह–'से किं तं' इत्यादि, अथ के ते चतुष्पदस्थलचरपञ्चेन्द्रियतैर्यग्योनिकाः ?, सूरिराह–चतुष्पदस्थलचरपञ्चेन्द्रियतैर्यग्योनिकाश्चतुर्विधाः प्रज्ञप्ताः, तद्यथा–'एगखुरा' इत्यादि, तत्र प्रतिपदमेकः खुरः–शफो येषां ते एकखुराः–अश्वादयः, द्वौ द्वौ खुरौ प्रतिपदं येषां ते द्विखुराः–उष्ट्रादयः, तथा चैकैकस्मिकन् पदे द्वौ द्वौ शफौ ध्यश्येते, गण्डीव–सुवर्णकाराधिकरणीस्थानमिव पदं येषां ते गण्डीपादाः–हस्त्यादयः, तथा सनखानि–दीर्घनखपरिकलितानि पदानि येषां ते सनखपदाः–श्वादयः, प्राकृतत्वाच्च सणप्फया इति सूत्रे निर्देशः। अधुना एतानेव एकशखुरादीन् भेदतः क्रमेण प्रतिपिपादयिषुरिदमाह–

'से किं तं' इत्यादि, सुगमम्, नवरं ये केचिज्जीवभेदाः प्रतीतास्ते लोकतो वेदितव्याः। 'ते समासओ दुविहा पन्नत्ता' इत्यादि सूत्रं प्रागवद् भावनीयम्, नवरमत्र जातिकुलकोटीनां योनिप्रमुखानि शतसहस्राणि दश भवन्तीति वेदितव्यम्। अत्रापि च संमूर्छिमानां गर्भव्युत्क्रान्तिकानां च प्रत्येकं यत् शरीरादिद्वारेषु चिन्तनं यच्च स्त्रीपुंनपुंसकानां परस्परमल्पबहुत्वं तज्जीवाभिगमटीकातो वेदितव्यम्, 'सेत्तं चउप्पया' इत्यादि ।

मू. (१६२) *से किं तं परिसप्पथलयरपंचिंदियतिरिक्खजोणिया ?, परिसप्पथलयर- ० दुविहा पं०, तं०–उरपरिसप्पथलयरपंचिंदियतिरिक्खजोणिया य भुयपरिसप्पथलयरपंचिंदियतिरिक्खजोणिया य । से किं तं उरपरिसप्पथलयरपंचिंदियति- रिक्खजोणिया ?, उरपरिसप्पथलयरपंचिंदिय० चउव्विहा पं०, तं०–अही अयगरा आसालिया महोरगा ॥*

से किं तं अही ?, अही दुविहा पं०, तं०–दव्वीकरा य मउलिणो य, से किं तं दव्वीकरा दव्वीकरा अनेगविहा पं०, तं०–आसीविसा दिट्ठीविसा उग्गविसा भोगविसा तयाविसा लालाविसा उस्सासविसा नीसासविसा कण्हसप्पा सेदसप्पा काओदरा दज्झपुप्फा कोलाहा मेलिमिंदा सेसिंदा जे यावन्ने तहप्पगारा, सेत्तं दव्वीकरा । से किं तं मउलिणो ?, मउलिणो अनेगविहा पं०, तं०–दिव्वागा गोणसा कसाहीया वइउला चित्तलिणो मंडलिणनो मालिणो अही अहिसलागा वासपडागा जे यावन्ने तहप्पगारा, सेत्तं मउलिणो, सेत्तं अही ।

से किं तं अयगरा ?, अयगरा एगागारा प०, सेत्तं अयगरा ।

से किं तं आसालिया ?, कहि णं भंते ! आसालिया संमुच्छति ?, गोयमा ! अंतो मणुस्सखित्ते अड्ढाइज्जेसु दीवेसु निव्वाघाएणं पन्नरससु कम्मभूमिसु वाघायं पडुच्च पंचसु महाविदेहेसु चक्कवट्टिखंधावारेसु वासुदेवखंधवरेसु लदेवखंधावारेसु मंडलियखंधावारेसु महामंडलियखंधावारेसु गामनिवेसेसु नगरनिवेसेसु निगमनिवेसेसु खेडनिवेसेसु कव्वडनिवेसेसु मडंबनिवेसेसु दोणमुहनिवेसेसु पट्टणनिवेसेसु आगरनिवेसेसु आसमनिवेसेसु संवाहनिवेसेसु रायहाणीनिवेसेसु एएसिणं चेव विनासेसु एत्थ णं आसालिया संमुच्छति । जहन्नेणं अंगुलस्स असंखेज्जइभागमित्ताए ओगाहणाए उक्कोसेणं बारसजोयणाइं तयणुरूवं च णं विक्खंभबाहल्लेणं भूमीं दालित्ता णं समुट्ठेइ, असन्नी मिच्छदिट्ठी अन्नाणी अंतोमुहुत्तऽद्धाउया चेव कालं करेइ, सेत्तं आसालिया ।

से किं तं महोरगा ?, महोरगा अनेगविहा पं०, तं०–अत्थेगइआ अंगुलंपि अंगुलपुहुत्तियावि वियत्थिंपि वियत्थिपुहुत्तियावि रयणिंपि रयणिपुहुत्तियावि कुच्छंपि कुच्छिपुहुत्तियावि धणुंपि धणुपुहुत्तयावि गाउयंपि गाउयपुहुत्तयावि जोयणंपि जोयणपुहुत्तयावि जोयणसयंपि जोयणस-

यपुहुत्तयावि जोयणसहस्संपि, ते णं थले जाता जलेऽवि चरंति थलेऽवि चरन्ति, ते नत्थि इहं, बाहिरएसु दीवेसु समुद्दएसु हवंति, जे यावन्ने तहप्पगारा, सेत्तं महोरगा।

–ते समासओ दुविहा पं० तं०–संमुच्छिमा य गब्भवक्कंतिया य, तत्थ णं जे ते संमुच्छिमा ते सव्वे नपुंसगा, तत्थ णं जे ते गब्भवक्कंतिया ते णं तिविहा पं०, तं०–इत्थी पुरिसगा नपुंसगा एएसिणं एवमाइयाणं पज्जत्तापज्जत्ताणं उरपरिसप्पाणं दस जाइकुलकोडिजोणिप्पमुहसयसहस्सा भवंतीतिमक्खायं, सेत्तं उरपरिसप्पा।

से किं तं भुयपरिसप्पा?, भुयपरिसप्पा अणेगविहा पं० तं०–नउला सेहा सरडा सल्ला सरंठा सारा खोरा घरोइला विस्संभरा मूसा मंगुसा पयलाइया छीरविरालिया जहा चउप्पाइया, जे यावन्ने तहप्पगारा, ते समासओ दुविहा पं० तं०–संमुच्छिमा य गब्भवक्कंतिया य, तत्थ णं जे ते संमुच्छिमा ते सव्वे नपुंसगा, तत्थ णं जे ते गब्भवक्कंतिया ते णं तिविहा पं० तं०–इत्थी पुरिसा नपुंसगा। एएसिणं एवमाइयाणं पज्जत्तापज्जत्ताणं भुयपरिसप्पाणं नव जाइकुलकोडिजोणिय-प्पमुहसयसहस्सा भवन्तीति मक्खायं, सेत्तं भुयपरिसप्पथलयरपंचिंदियतिरिक्खजोणिया, सेत्तं परिसप्पथलयरपंचिंदियतिरिक्खजोणिया।

मू. अथ के ते परिसर्प्पस्थलचरपञ्चेन्द्रियतैर्यग्योनिकाः ?, सूरिराह–परिसर्पस्थलचर-पञ्चेन्द्रियतैर्यग्योनिका द्विविधाः–द्विप्रकाराः प्रज्ञप्ताः, तद्यथा–'उरपरिसप्प' इत्यादि, उरसा परिसर्पन्तीति उरःपरिसर्पाः ते च ते स्थलचरपञ्चेन्द्रियतैर्यग्योनिकाः उरःपरिसर्पस्थलचलर-पञ्चेन्द्रियतैर्यग्योनिकाः, भुजाभ्यां परिसर्पन्तीति भुजपरिसर्पाः ते च ते स्थलचरपञ्चेन्द्रियतैर्यग्यो-निकाश्च भुजपरिसर्पस्थलचरपञ्चेन्द्रियतिर्यग्योनिकाः, चशब्दौ प्रत्येकं स्वगतानेकभेदसूचकौ, तत्रोरः परिसर्पस्थलचरपञ्चेन्द्रियतैर्यग्योनिकभेदानुपदिदर्शयिषुरिदमाह– 'से किं तं उरपरिसप्प' इत्यादि, अथ के ते उरः परिसर्पस्थलचरपञ्चेन्द्रियतैर्यग्योनिकाः सूरिराह–उरःपरिसर्पस्थलचरपञ्चेन्द्रिय-तैर्यग्योनिकाश्चतुर्विधाः प्रज्ञप्ता;–अहयोऽजगरा आसालिगा महोरगाः।

एतेषामेव भेदानामवगमाय प्रश्ननिर्वचनसूत्राण्याह–'से किं तं' इत्यादि, अथ के तेऽहयः गुरुराह–अहयो द्विविधाः प्रज्ञप्ताः, तद्यथा–दर्वीकराश्च मुकुलिनश्च, तत्र दर्वीव दर्वी–फणा तत्करण-शीला दर्वीकराः, मुकुलं–फणाविरहयोग्या शरीरावयवविशेषाकृतिः सा विद्यते येषां ते मुकुलिनः, फणाकरणशक्तिविकला इत्यर्थः, अत्रापि चशब्दौ स्वगतानेकभेदसूचकौ।

तत्र दर्वीकरभेदानभिधित्सुराह–'से किं तं' इत्यादि, आश्यो–दंष्ट्राः तासु विषंय येषां ते आशीविषाः, उक्तं च–"आसी दाढा तग्गयविसा य आसीविसा मुणेयव्वा" इति, दृष्टौ विषं येषां ते दृष्टिविषाः उग्रं विषं येषां ते उग्रविषाः भोगः–शरीरं तत्र विषं येशां ते भोगविषाः त्वचि विषं येषां ते त्वग्विषाः लाला–मुखात् स्रवः तत्र विषं येषां ते लालाविषाः निःश्वासे विषं येषां ते निः श्वासविषाः कृष्णसर्पादयो जातिभेदा लोकतः प्रतिपत्तव्याः, उपसंहारमाह–'सेत्तं दव्वीकरा' मुकुलिनः प्रतिपिपादयिषुरिदमाह–'से किंतं' इत्यादि, एतेऽपि लोकतोऽवसेयाः।

अजगराणामवान्तरजातिभेदा न विद्यन्ते तत उक्तम्–एकाकार अजगराः प्रज्ञप्ताः। आसालिगामभिधित्सुराह–'से किं तं आसालिया' अथ का सा आसालिगा ?, एवं शिष्येण प्रश्ने कृते सति भगवान् आर्यश्यामो यदेव ग्रन्थान्तरेषु आसालिगाप्रतिपादकं गौतमप्रश्नभगवन्निर्वचनरूपं

सूत्रमस्ति तदेवागमबहुमानतः पठति–'कहि णं भंते !' इत्यादि, क्व 'णं' इति वाक्यालङ्कारे भदन्त!– परमकल्याणयोगिन्! आसालिगा संमूर्च्छति ?, एषा हि गर्भजा न भवति किन्तु संमूर्च्छिमैव तत उक्तं संमूर्च्छति, भगवानाह–गौतम ! अन्तः–मध्ये मनुष्य- क्षेत्रे–मनुष्यक्षेत्रस्य न बहिः,

एतावता मनुष्यक्षेत्राद् बहिरस्या उत्पादो न भवतीति प्रतिपादितं, तत्रापि मनुष्यक्षेत्रे सर्वत्र न भवति किन्त्वर्द्धतृतीयेषु द्वीपेषु अर्द्ध तृतीयं येषां तेऽर्द्धतृतीयाः, अवयवेन विग्रहः, समुदायःसमासार्थः, तेषु, एतावता लवणसमुद्रे कालोदसमुद्रे वा न भवतीत्यावेदितमित्यर्थः 'निव्वाघाएणं' इत्यादि, निर्व्याघातेन–व्याघातस्याभावो निर्व्याघातं तेन यदि पञ्चसु भरतेषु पञ्चसु ऐरवतेषु पञ्चसु महाविदेहेषु [illegible] हेतुत्वाद् व्याघातो न भवति तदा पञ्चदशसु कर्मभूमिषु संमूर्च्छति, व्याघातं प्रतीत्य, किमुक्तं भवति ? –

यदि पञ्चसु भरतेषु पञ्चस्वैरवतेषु यथोक्तरूपो व्याघातो भवति ततः पञ्चसु महाविदेहेषु संमूर्च्छति, एतावता त्रिंशत्यकर्मभूमिषु नोपजायते इति प्रतिपादितम्, पञ्चदशसु कर्मभूमिषु पञ्चसु वा महाविदेहेषु न सर्वत्र संमूर्च्छति, किन्तु चक्रवर्तिस्कन्धावारेषु, वाशब्दःसर्वत्रापि विकल्पार्थो द्रष्टव्यः, बलदेवस्कन्धावारेषु वासुदेवस्कन्धावारेषु, माण्डलिकः–सामान्यराजाऽल्पर्द्धिकः, महामाण्डलिकः स एवानेकदेशाधिपतिः तत्स्कन्धावारेषु, 'गामनिवेसेसु' इत्यादि,

ग्रसति बुद्ध्यादीन् गुणानिति ग्रामः, यदिवा गम्यः शास्त्रप्रसिद्धानामष्टादशकराणामिति ग्रामः, निगमः–प्रभूततरवणिग्वर्गावासः, पांसुप्राकारविबद्धं खेटं, क्षुल्लकप्राकारवेष्टितं कर्बटम्, अर्द्धतृतीयगव्यूतान्तर्ग्रामान्तररहितं मडम्बम्, 'पट्टणत्ति' पट्टनं पत्तनं वा, उभयत्रापि प्राकृतत्वेन निर्देशस्य समानत्वात्, तत्र यन्नौभिरेव गम्यं तत् पट्टनं, यत्पुनर्शकटैर्घोटकैर्नौभिर्वा गम्यं तत् पत्तनं, यथा भृगुकच्छं, उक्तं च–

॥ १ ॥ "पत्तनं शकटैर्गम्यं, घोटकैर्नौभिरेव च ।
नौभिरेव तु यद् गम्यं, पट्टनं तत्प्रचक्षते ॥"

द्रोणमुखं–बाहुल्येन जलनिर्गमप्रवेशम्, आकरो हिरण्याकरादिः, आश्रमः–तापसावसथोपलक्षित आश्रयः, संबाधोयात्रासमागतप्रभूतजननिवेशः, राजधानी–राज्ञाधिष्ठानं नगरं ।

'एएसिणं' इत्यादि, एतेषां चक्रवर्तिस्कन्धावारादीनामेव विनाशेषूपस्थितेषु 'एत्थ णंति' एतेषु चक्रवर्तिस्कन्धावारादिषु स्थानेषु आसालिका संमूर्च्छति, सा च जघन्यतोऽङ्गुलासंख्येयभागमात्रयाऽवगाहनया समुत्तिष्ठतीति योगः, एतच्चोत्पादप्रथमसमये वेदितव्यं, उत्कर्षतो द्वादश योजनानि, तदनुरूपं–द्वादशयोजनप्रमाणदैर्ध्यानुरूपं 'विक्खंभबाहल्लेणं' ति विष्कम्भश्च बाहल्यं च विष्कम्भबाहल्यं समाहारो द्वन्द्वः तेन, विष्कम्भो–विस्तारः बाहल्यं–स्थूलता, भूमीं 'दालित्ता णं' विदार्य समुपतिष्ठति, चक्रवर्तिस्कन्धावारादीनामधस्ताद् भूमेरन्तरुत्पद्यते इति भावः, सा चासंज्ञिनी–अमनस्का, संमूर्च्छिमत्वात्, मिथ्यादृष्टिः,सास्वादनसम्यक्त्वस्यापि तस्या (अ)संभवात्, अत एवाज्ञानिनी अन्तर्मुहूर्तायुरेव कालं करोति, तदेवं ग्रन्थान्तर्गतं सूत्रं पठित्वा सूत्रकृत् सम्प्रति उपसंहारमाह–'सेत्तं आसालिया' ।।

लसम्प्रति महोरगानभिधित्सुराह– 'से किं तं' इत्यादि सुगमं, नवरं वितस्तिर्द्वादशाङ्गुलप्रमाणा, रत्निर्हस्तः, कुक्षिर्द्विहस्तमानः, धनुश्चतुर्हस्तं, गव्यूतं द्विधनुःसहस्रप्रमाणं, चत्वारि गव्यूतानि

योजनं, इदं च वितस्त्यादि उच्छ्रायाङ्गुलापेक्षया द्रष्टव्यं, शरीरप्रमाणस्य परिचिन्त्यमानत्वात्, तथा अस्तीति निपातोऽत्र बहुत्वाभिधायी प्रतिपदं च संबध्यते, ततोऽयमर्थः-सन्त्येके केचन महोरगा अङ्गुलमपि शरीरावगाहनया भवन्ति, तथा सन्त्येके केचन येऽङ्गुलपृथक्त्विका अपि, अङ्गुलपृथक्त्वं विद्यते येषां ते अङ्गुलपृथक्त्विकाः, "अतोऽनेकस्वरात्" इति इकप्रत्ययः, तेऽपि शरीरावगाहनया भवन्ति, अङ्गुलपृथक्त्वमानशरीरावगाहना अपि भवन्तीति भावः, एवं शेषसूत्राण्यपि भावनीयानि

'ते णं' इत्यादि, ते अनन्तरोदितस्वरूपा महोरगाः स्थलचरविशेषत्वात् स्थले जायन्ते, स्थले च जाताः सन्तो जलेऽपि स्थल इव चरन्ति स्थलेऽपि चरन्ति, तथाभवस्वाभाव्यात्, यद्येवं ते कस्मादिह न दृश्यन्त इत्याशङ्कायामाह-'ते नत्थि इहं' इत्यादि, 'ते' यथोक्तस्वरूपा महोरगा 'इह' मानुषे क्षेत्रे 'नत्थित्ति' न सन्ति, किन्तु बाह्येषु द्वीपसमुद्रेषु भवन्ति, समुद्रेष्वपि च पर्वतदेवनगर्यादिषु स्थलेष्वुत्पद्यन्ते न जलेषु, स्थूलतरत्वात्, तत इह न दृश्यन्ते। 'जे यावन्ने तहप्पगारा' इति, येऽपि चान्ये अङ्गुलदशकादिशरीरावगाहनमानास्तथाप्रकाराः सन्ति तेऽपि महोरगा ज्ञातव्याः

उपसंहारमाह-'सेत्तं' इत्यादि, 'ते समासओ' इत्यादि प्राग्वद् भावनीयम्। एतेषामपि दश जातिकुलकोटीनां योनिप्रमुखाणि शतसहस्राणि। एतेषामपि च यत् शरीरादिषु द्वारेषु चिन्तनं यच्च स्त्रीपुंनपुंसकानामल्पबहुत्वं तज्जीवाभिगमटीकातो भावनीयम्। उरःपरिसर्पवक्तव्यतोपसंहारमाह-'से त्तं उरपरिसप्पा'।

अधुना भुजपरिसर्पानभिधित्सुराह-सुगमं, नवरं ये भुजपरिसर्पविशेषा अप्रतीतास्ते लोकतोऽवसेयाः। अमीषां च नव जातिकुलकोटीनां योनिप्रमुखानि शतसहस्राणि भवन्ति, यत्पुनः शरीरादिषु द्वारेषु चिन्तनं यच्च स्त्रीपुंनपुंसकानामल्पबहुत्वं तज्जीवाभिगमटीकातो वेदितव्यं 'सेत्तं' इत्यादि। सम्प्रति खचरपञ्चेन्द्रियतिर्यग्योनिकानभिधित्सुराह-

मू. (१६३) से किं तं खहयरपंचिंदियतिरिक्खजोणिया ?, खहयरपंचिंदियतिरक्खजोणिया चउव्विहा पं०, तं०-चम्मपक्खी लोमपक्खी समुग्गपक्खी वियपक्खी, से किं तं चम्मपक्खी ?, चम्मपक्खी अनेगविहा पं०, तं०-वग्गुली जलोया अडिल्ला भारंडपक्खी जीवंजीवा समुद्दवायसा कण्णत्तिया पक्खिविरालिया, जे यावन्ने तहप्पगारा, सेत्तं चम्मपक्खी।

से किं तं लोमपक्खी ?, लोमपक्खी अनेगविहा पं०, तं-ढंका कंका कुरला वायसा चक्कागा हंसा कलहंसा रायहंसा पायहंसा आडा सेडी बगा बलागा पारिप्पवा कोंचा सारसा मेसरा मसूरा मयूरा सत्तहत्था गहरा पोंडरिया कागा कामिंजुया वंजुलगा तिलिरा वट्टगा लावगा कवोया कविंजला पारेवया चिडगा चासा कुक्कुडा सुगा बरहिणा मयणसलागा कोइला सेहा वरिल्लगमाइ, सेत्तं लोमपक्खी।

से किं तं समुग्गपक्खी ?, समुग्गपक्खी एगागारा पन्नत्ता, ते णं नत्थी इहं, बाहिरएसु दीवसमुद्देसु भवंति, सेत्तं समुग्गपक्खी। से किं तं वियपक्खी ?, वियपक्खी एगागारा पन्नत्ता, ते णं नत्थि इहं, बाहिरएसु दीवसमुद्देसु भवन्ति, सेत्तं वियपक्खी।

ते समासओ दुविहा पं०, तं०-संमुच्छिमा य गब्भवक्कंतिया य, तत्थ णं जे ते संमुच्छिमा ते सव्वे नपुंसगा, तत्थ णं जे ते गब्भवक्कंतिया ते णं तिविहा पं०, तं०-इत्थी पुरिसा नपुंसगा। एएसिणं एवमाइयाणं खहयरपंचिंदियतिरिक्खजोणियाणं पज्जत्तापज्जत्ताणं बारस जाइकुलकोडि-

जोणिपमुहसयसहस्सा भवन्तीति मक्खायं ।

वृ. अथ के ते खचरपञ्चेन्द्रियतैर्यग्योनिकाः ?, सूरिराह–चतुर्विधाः प्रज्ञप्ताः, –'चम्मपक्खी' इत्यादि, चर्मात्मकौ पक्षौ चर्मपक्षौ तौ विद्येते येषां ते चर्मपक्षिणः, लोमात्मकौ पक्षौ लोमपक्षौ तद्वन्तो लोमपक्षिणः, तथा गच्छतामपि समुद्गकवत् स्थितौ पक्षौ समुद्गकपक्षौ तद्वन्तः समुद्गकपक्षिणः, विततौ नित्यमनाकुञ्चितौ पक्षौ येषां विततपक्षौ तद्वन्तो विततपक्षिणः ।

'से किं तं' इत्यादि, अथ के ते चर्मपक्षिणः ?, चर्मपक्षिणोऽनेकविधाः प्रज्ञप्ताः, तद्यथा–वल्गुली इत्यादि, एते च भेदा लोकतोऽवसेयाः, 'जे यावन्ने तहप्पगारा' इति, येऽपि चान्ये तथाप्रकाराः–एवंरूपास्ते चर्मपक्षिणो द्रष्टव्याः, उपसंहारमाह–'सेत्तं चम्मपक्खी' । लोमपक्षिप्रतिपादनार्थमाह–'से किं तं' इत्यादि, एते च लोमपक्षिभेदा लोकतो वेदितव्याः । समुद्गकपक्षिप्रतिपादनार्थमाह– 'से किं तं' इत्यादि पाठसिद्धं. एवं विततपक्षिसूत्रमपि ।

'ते समासओ' इत्यादि प्रागवद् भावनीयं, एतेषां द्वादश जातिकुलकोटीनां योनिप्रमुखानि शतसहस्राणि अमीषामपि शरीरादिषु द्वारेषु चिन्तनं स्त्रीपुनंपुंसकानामल्पबहुत्वं च जीवाभिगमटीकातः प्रतिपत्तव्यं, इह तु ग्रन्थगौरवभयान्न लिख्यते । अधुना विनेयजनानुग्रहाय द्वीन्द्रियप्रभृतिजातिकुलकोटिशतसहस्रसंख्याप्रपितादिका संग्रहिणीगाथामाह –

मू. (१६४) *सत्तट्ठजाइकुलकोडिलक्ख नव अद्धतेरसाई च ।*
दस दस य होंति नवगा तह बारस चेव बोद्धव्वा ॥

वृ. अत्र द्वीन्द्रियेभ्य आरभ्य यथासंख्येन संख्यापदयोजना, सा चैवं–द्वीन्द्रियाणां सप्त जातिकुलकोटिलक्षाणि, त्रीन्द्रियाणामष्टौ, चतुरिन्द्रियाणां नव, जलचरपञ्चेन्द्रियाणामर्द्धत्रयोदशानि, चतुष्पदस्थलचरपञ्चेन्द्रियाणां दश, उरःपरिसर्पस्थलचरपञ्चेन्द्रियाणां दश, भुजपरिसर्पस्थलचरपञ्चेन्द्रियाणां नव, खचरपञ्चेन्द्रियाणां द्वादशेति ।

मू. (१६५) *सेत्तं खहयरपंचिंदियतिरिक्खजोणिया, सेत्तं पंचिंदियतिरिक्खजोणिया ।*

वृ. उपसंहारमाह–'सेत्तं' इत्यादि । तदेवमुक्ताः पञ्चेन्द्रियतैर्यग्योनिकाः । सम्प्रति मनुष्यानभिधित्सुराह–

मू. (१६६) *से किं तं मणुस्सा ?, मणुस्सा दुविहा पं०, तं०–संमुच्छिममणुस्सा य गब्भवक्कंतियमणुस्सा य, से किं तं संमुच्छिममणुस्सा ?, कहि णं भंते ! संमुच्छिममणुस्सा संमुच्छंति ?,*

गोयमा अंतो मणुस्सखित्ते पणयालीसाए जोयणसयसहस्सेसु अड्ढाइज्जेसु दीवसमुद्देसु पन्नरससु कम्मभूमीसु तीसाए अकम्मभूमीसु छपन्नाए अंतरदीवएसु गब्भवक्कंतियमणुस्साणं चेव उच्चारेसु वा पासवणेसु वा खेलेसु वा सिंघाणएसु वा वंतेसु वा पित्तेसु वा पूएसु वा सोणिएसु वा सुक्केसु वा सुक्कपुग्गलपरिसाडेसु वा विगयजीवकलेवरेसु वा थीपुरिससंजोएसु वा नगरनिद्धमणेसु वा सव्वेसु चेव असुइट्ठाणेसु, एत्थ णं संमुच्छिममणुस्सा संमुच्छंति,

अंगुलस्स असंखेज्जइभागमेत्ताए ओगाहणाए असन्नी मिच्छदिट्ठी अन्नाणी सव्वाहिं पज्जत्तीहिं अपज्जत्तगा अंतोमुहुत्ताउया चेव कालं करेंति । से त्तं संमुच्छिममणुस्सा ॥

से किं तं गब्भवक्कंतियमणुस्सा ?, गब्भवक्कंतियमणुस्सा तिविहा पं०, तं०–कम्मभूमगा अकम्मभूमगा अंतरदीवगा, से किं तं अंतरदीवगा ?, अंतरदीवगा अट्ठावीसविहा पं०, तं–एगोरुया

आहासिया वेसाणिया नंगोला हयकन्ना गयकन्ना गोकन्ना सक्कुलिकन्ना आयंसमुहा मेंढमुहा अयोमुहा गोमुहा आसमुहा हत्थिमुहा सीहमुहा वग्घमुहा आसकन्ना हरिकन्ना अकन्ना कण्णपाउरणा उक्कामुहा मेहमुहा विज्जुमुहा विज्जुदंता घणदंता लट्ठदंता गूढदंता सुद्धदंता। सेत्तं अंतरदीवगा।

से किं तं अकम्मभूमगा?, तीसविहा पं०, पंचहिं हेमवएहिं पंचहिं हिरण्णवएहिं पंचहिं हरिवासेहिं पंचहिं रम्मगवासेहिं पंचहिं देवकुरूहिं पंचहिं उत्तरकुरूहिं। सेत्तं अकम्मभूमगा॥

वृ. अत्रापि संमूर्च्छिममनुष्यविषये प्रवचनबहुमानतः शिष्याणामपि च साक्षाद् भगवतेदमुक्तमिति बहुमानोत्पादनार्थमङ्गान्तर्गतमालापकं पठति–'कहि णं भन्ते' इत्यादि, सुगमं, नवरं 'सव्वेसु चेव असुइट्ठाणेसुत्ति' अन्यान्यपि यानि कानिचिद् मनुष्यसंसर्गवशादशुचिभूतनि स्थानानि तेषु सर्वेष्विति। उक्ताः संमूर्च्छिममनुष्याः, अधुना गर्भव्युत्क्रान्तिकमनुष्यप्रतिपादनार्थमाह–'कम्मभूमगा' इति कर्म–कृषिवाणिज्यादि मोक्षानुष्ठानं वा कर्मप्रधाना भूमिर्येषां ते कर्मभूमाः आर्षत्वात् समासान्तोऽत्रत्यवः कर्मभूमा एव कर्मभूमकाः, एवमकर्मा–यथोक्तकर्मविकला भूमिर्येषां ते अकर्मभूमाः ते एव अकर्मभूमकाः, अन्तरशब्दो मध्यवाची, अन्तरे–लवणसमुद्रस्य मध्ये द्वीपा अन्तरद्वीपाः तद्गता अन्तरद्वीपगाः, ''अस्ति पश्चानुपूर्वी'' इति न्यायख्यापनार्थं प्रथमतोऽन्तरद्वीपगान् प्रतिपादयति–'से किं तं' इत्यादि सुगमं, नवरमष्टविंशतिविधा इति याद्दशा एव यावत्प्रमाणा यावदपान्तराला यत्प्रमानोहिमवत्पर्वतपूर्वापरदिग्व्यवस्थिताः अष्टविंशतिविधा अन्तरद्वीपास्तादृशा एव तावत्प्रमाणा तावदपान्तरालास्तत्प्रमान एव शिखरिपर्वतपूर्वापरदिग्व्यवस्थिता अपि, ततोऽत्यन्तसदृशतया व्यक्तिभेदमनपेक्ष्यान्तरद्वीपा अष्टविंशतिविधा एव विवक्षिता इति तज्जातमनुष्या अप्यष्टविंश- तिविधा उक्ताः।

तानेव नामग्राहमुपदर्शयति–'तंजहा एगोरुया' इत्यादि, एते सप्त चतुष्काः, अष्टविंशतिसंख्यत्वात्, एते च प्रत्येकं हिमवति शिखरिणि च, तत्र हिमवद्गतास्तावद् भाव्यन्ते–इह जम्बूद्वीपे भरतस्य हैमवतस्य च क्षेत्रस्य सीमाकारी भूमिनिमग्नपञ्चविंशतियोजनो योजनशतोच्छ्रयपरिमाणो भरतक्षेत्रापेक्षया द्विगुणविष्कम्भो हेममयश्चीनपट्टवर्णो नानावर्णविशिष्टद्युतिमणिनिकरपरिमण्डितोभयपार्श्वः सर्वत्र तुल्यविस्तारो गगनमण्डलोल्लेखिरत्नमयैकादशकूटोपशोभितो वज्रमयतलविविधमणिकनकमण्डिततटभागदशयोजनावगाढपूर्वपश्चिमयोजनसहस्रायामदक्षिणोत्तरपञ्चयोजनशतविस्तारः पद्मवरदशोभितशिरोमध्यभागः सर्वतः कल्पपादपश्रेणिरमणीयः पूर्वापरपर्यन्ताभ्यां लवणोदार्णवजलसंस्पर्शी हिमवन्नामा पर्वतः,

तस्य लवणोदार्णवजलसंस्पर्शादारभ्य पूर्वस्यां पश्चिमायाश्च दिशि प्रत्येकं द्वे द्वे गजदन्ताकारे दंष्ट्रेविनिर्गते, तत्र ऐशान्यां दिशि या विनिर्गता दंष्ट्रा तस्यां हिमवतः पर्यन्तादारभ्य त्रीणि योजनशतानि लवणसमुद्रमवगाह्यात्रान्तरे योजनशतत्रयायामविष्कम्भः किञ्चिन्यूनैकोनपञ्चाशदधिकनवयोजनशतपरिरय एकोरुकनामा द्वीपो वर्तते, अयं च पञ्चधनुःशतप्रमाणविष्कम्भया द्विगव्यूतोच्छ्रितया पद्मवरवेदिकया सर्वतः परिमण्डितः,

तस्याश्च पद्मवरवेदिकाया वर्णको जीवाभिगमटीकायामिव वेदितव्यः, साऽपि च पद्मवरवेदिका सर्वतः सामस्त्येन वनखण्डपरिक्षिप्ता, वनाच्च वनखण्डस्यायं विशेषः–प्रायो बहूनां समानजातीयानामुत्तमानां महीरुहाणां समुदायो वनं, यथा असोकवनं चम्पकवनमिति, अनेकजाती

यानामुत्तमानां महीरुहाणां समूहो वनखण्डः, उक्तं च जीवाभिगममूलटीकायाम्–

"एगजाइएहिं खंडेहिं वणं, अनेगजाइएहिं उत्तमेहिं वनसंडे" इति, तस्य च वनखण्डस्य चक्रवालतया विष्कम्भो देशोने द्वे योजने, परिक्षेपः पद्मवरवेदिकाप्रमाणः, अस्य च वनखण्डस्य वर्णकः प्रतिपादितोऽस्ति, स चातीव गरीयानिति नोपदर्शितः, केवलं जीवाभिगमटीकातोऽवसेयः, तस्यैव हिमवतः पर्यन्तादारभ्य दक्षिणपूर्वस्यां दिशि त्रीणि योजनशतानि लसवणसमुद्रमवगाह्य द्वितीयदंष्ट्राया उपरि एकोरुकद्वीपप्रमाण आभासिकनामा द्वीपो वर्तते, तथा तस्यैव हिमवतः पश्चिमायां दिशि पर्यन्तादारभ्य दक्षिणपश्चिमायां–नैऋतकोण इत्यर्थः, त्रीणि योजनशतानि लवणसमुद्रमवगाह्य दंष्ट्राया उपरि यथोक्तप्रमाणो वैषाणिकनामा द्वीपः, तथा तस्यैव हिमवतः पश्चिमायां दिशि पर्यन्तादारभ्य पश्चिमोत्तरस्यां दिशि–वायव्यकोणे इत्यर्थः, त्रीणि योजनशतानि लवणसमुद्रमध्ये दंष्ट्रामतिक्रम्यात्रान्तरे पूर्वोक्तप्रमाणो नाङ्गोलिकनामा द्वीपः,

एवमेते चत्वारो द्वीपा हिमवतश्चतसृष्वपि विदिक्षु तुल्यप्रमाणा अवगाढाः, उक्तं च–

॥ १ ॥ "चुल्लहिमवंतपुव्वावरेण विदिसासु सागरं तिसए।
गंतूनंतरदीवा तिन्नि सए हुंति विच्छिन्ना॥

॥ २ ॥ अउणापन्ननवसए किंचूणं परिहि तेसिमे नामा।
एगोरुयगाभासिय वेसाणिय चेव नंगूली॥"

तत एषामेकोरुकादीनां चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं चत्वारि चत्वारि योजनशतान्यतिक्रम्य चतुर्योजनशतायामविष्कम्भाः किञ्चिन्न्यूनपञ्चषष्टिसहित-द्वादशयोजनशतपरिक्षेपाः यथोक्तपद्मवरवेदिकानवखण्डमण्डितपरिसराः जम्बूद्वीपवेदिकात-श्चतुर्योजनशतप्रमाणान्तरा हयकर्णगजकर्णगोकर्णशष्कुलीकर्णनामानश्चत्वारो द्वीपाः, तद्यथा–एकोरुकस्य परतो हयकर्णः आभासिकस्य परतो गजकर्णः वैषाणिकस्य परतो गोकर्णः नाङ्गोलिकस्य परतो शष्कुलीकर्ण इति। तत एतेषामपि हयकर्णादीनां चतुर्णां द्वीपानां परतः पुनरपि यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं पञ्च पञ्च योजनशतानि व्यतिक्रम्य पञ्चयोजनशतायामविष्कम्भा एकाशीत्यधिक-पञ्चदशयोजनशतपरिक्षेपाः पूर्वोक्तप्रमाणपद्मवरवेदिकावनखण्डमण्डितबाह्य-प्रदेशा जम्बूद्वीपवेदिकातः पञ्चयोजनशतप्रमाणान्तरा आदर्शमुख १ मेण्ढमुख २ अयोमुख ३ गोमुख ४ नामानश्चत्वारो द्वीपाः, तद्यथा–हयकर्णस्य परत आदर्शमुखः गजकर्णस्य परतो मेण्ढमुखः गोकर्णस्य परतोऽयोमुखः शष्कुलीकर्णस्य परतो गोमुख इति।

एवमग्रेऽपि भावना कार्या, एतेषामप्यादर्शमुखादीनां चतुर्णां द्वीपानां परतो भूयोऽपि यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं षट् षट् योजनशतान्यतिक्रम्य षड्योजनशतायामविष्कम्भाः सप्तनवत्यधिकाष्टादशयोजनशतपरिक्षेपा यथोक्तप्रमाणपद्मवरवेदिकावनखण्डमण्डितपरिसरा जम्बूद्वीपवेदिकातः षड्योजनशतप्रमाणान्तरा अश्वमुखहस्तिमुखसिंहमुखव्याघ्रमुखनामानश्चत्वारो द्वीपाः। एतेषामप्यश्वमुखादीनां चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं सप्त २ योजनशतान्यतिक्रम्य सप्तयोजनशतायामविष्कम्भावप्रयोदशाधिकद्वाविंशतियोजनशतपरिरयाः पूर्वोक्तप्रमाणपद्मवरवेदिकावनखण्डसमवगूढा जम्बूद्वीपवेदिकातः सप्तयोजनशतप्रमाणान्तरा अश्वकर्णहरिकर्णाकर्णकर्णप्रावरणनामानश्चत्वारो द्वीपाः।

तत एतेषामश्वकर्णादीनां चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकमष्टावष्टौ योजनशतान्यतिक्रम्याष्टयोजनशतायामविष्कम्भा एकोनत्रिंशदधिकपञ्चविंशतियोजनशतपरिक्षेपा यथोक्तप्रमाणपद्मवरवेदिकावनखण्डमण्डितपरिसरा जम्बूद्वीपवेदिकातोऽष्टयोजनशतप्रमाणान्तरा उल्कामुखमेघमुखविद्युन्मुखविद्युद्दन्ताभिधानाश्चत्वारो द्वीपाः ।

ततोऽमीषामपि उल्कामुखादीनां चतुर्णां द्वीपानां परतो यथाक्रमं पूर्वोत्तरादिविदिक्षु प्रत्येकं नवनव योजनशतान्यतिक्रम्य नवयोजनशतायामविष्कम्भाः पञ्चचत्वारिंशदधिकाष्टत्रिंशतियोजनशतपरिक्षेपा यथोक्तप्रमाणपद्मवरवेदिकावनखण्डसमवगूढा जम्बूद्वीपवेदिकातो नवयोजनशतप्रमाणान्तरा धनदन्तलष्टदन्तगूढदन्तशुद्धदन्तनामानश्चत्वारो द्वीपाः ।

एवमेते हिमवति पर्वते चतसृषु विदिक्षु व्यवस्थिताः सर्वसंख्ययाऽष्टाविंशतिः, एवं हिमवत्तुल्यवर्णप्रमाणे पद्मह्रदप्रमाणायामविष्कम्भावगाहपुण्डरीकह्रदोपशोभिते शिखरिण्यपि पर्वते लवणोदार्णवजलसंस्पर्शादारभ्य यथोक्तप्रमाणान्तरासु चतसृषु विदिक्षु व्यवस्थिता एकोरुकादिनामानोऽक्षुण्णान्तरालायामविष्कम्भा अष्टाविंशतिसंख्या द्वीपा वक्तव्याः, सर्वसंख्यया षट्पञ्चाशदन्तरद्वीपाः, एतद्गता मनुष्या अप्येतन्नामानः उपचारात्, भवति च तात्स्थ्यात् तद्व्यपदेशः, यथा पञ्चालदेशनिवासिनः पुरुषाः पञ्चाला इति, ते च मनुष्या वज्रर्षभनाराचसंहननिनः कङ्कपक्षिपरिणामा अनुलोमवायुवेगा समचतुरस्रसंस्थानाः,

तद्यथा–सुप्रतिष्ठितकूर्मचारुचरणाः सुकुमारश्लक्ष्णप्रविरलोरमकुरुविन्दवृत्तऽङ्गायुगला निगूढसुबद्धसंधिजानुप्रदेशाः करिकरसमवृत्तोरवः कण्ठीरवसदृशकटीप्रदेशाः शक्रायुधसमध्यभागाः प्रदक्षिणावर्तनाभिमण्डलाः श्रीवत्सलाञ्छितविशालमांसलक्षःस्थलाः पुरपरिघाऽनुकारिदीर्घबाहवः सुश्लिष्टमणिबन्धा रक्तोत्पलपत्रानुकारिशोणपाणिपादतलाः चतुरङ्गुलप्रमाणसमवृत्तकम्बुग्रीवाः शारदाशशाङ्कसौम्यवदनाः छत्राकारशिरसोऽस्फुटितस्निग्धकान्तिश्लक्ष्णमूर्द्धजाः

कमण्डलु कलश यूपस्तूप वापी ध्वज पताका सौवस्तिक यव मत्स्य मकर कूर्म रथवर स्थालांशुकाष्टापदाङ्कुश सुप्रतिष्ठक मयूर श्रीदामाभिषेक तोरण मेदिनी जलधि वरभवनादर्शपर्वतगजवृषभसिंहच्छत्रचामररूपरशस्तोत्तमद्वात्रिंशल्लक्षणधराः ।

स्त्रियोऽपि सुजातसर्वाङ्गसुन्दर्यः समस्तमहेलागुणसमन्विताः संहताङ्गुलिपद्मदलवत्सुकुमारकूर्मसंस्थानमनोहारिचरणा रोमरहितप्रशस्तलक्षणोपेतजङ्घायुगला निगूढमांसलजानुप्रदेशाः कदलीस्तम्भनिभसंहतसुकुमारपीवरोरुका वदनायामप्रमाणत्रिगुणमांसलविशालजघनधारिण्यः स्निग्धकान्तिसुविभक्तश्लक्ष्णरोमराजयः प्रदक्षिणावर्ततरङ्गभङ्गुरनाभिमण्डलाः प्रशस्तलक्षणोपेतकुक्षयः संगतपार्श्वाः कनककलशोपमसंहितोन्नतवृत्ताकृतिपीवरपयोधराः सुकुमारबाहुलतिकाः सौवस्तिकशङ्खचक्राद्याकृतिलेखालङ्कृतपाणिपादतलाः वदनत्रिभागोच्छ्रितमांसलकम्बुग्रीवाः प्रशस्तलक्षणोपेतमांसलहनुविभागा दाडिमपुष्पानुकारिशोणिमाधरौष्ठा रक्तोत्पलतालुजिह्वा विकसितकुवलयपत्रायतकान्तलोचना आरोपितचापपृष्ठाकृतिसुसंगतभ्रूलतिकाः प्रमाणोपपन्नललाटफलकाः सुस्निग्धकान्तश्लक्ष्णशिरोरुहाः पुरुषेभ्यः किञ्चिदूनोच्छ्रायाः स्वभावत उदारशृङ्गारचारुवेषाः प्रकृत्यैव हसितभणितविलासविषयपरमनैपुण्योपेताः ।

तथा मनुष्या मानुष्यश्च स्वभावत एव सुरभिवदनाः प्रतनुक्रोधमानमायालोभाः संतोषिणो

निरौत्सुक्या मार्दवार्जवसंपन्नाः सत्यपि मनोहारिणि मणिकनकमौक्तिकादौ ममत्वकारणे ममत्वाभिनिवेशरहिताः सर्वथाऽपगतवैरानुबन्धा हस्त्यश्वकरभगोमहिशष्यादिसद्भावेऽपि तत्परिभोगपराङ्मुखाः पादविहारिणोज्वरादिरोगयक्षभूतपिशाचादिग्रहमारिव्यसनोपनिपातविकलाः परस्परप्रेष्यप्रेषकभावरहितत्वादहमिन्द्राः, तेषां पृष्ठकरण्डकानि चतुःषष्टिसंख्याकानि चतुर्थातिक्रमे चाहारग्रहणं, आहारोऽपि च न शाल्यादिधान्यनिष्पन्नः किन्तु पृथ्वीमृत्तिका कल्पद्रुमाणां पुष्पफलानि च,

तथाहि–जायन्ते खलु तत्रापि विस्रसात एव शालिगोधूममाषमुद्गादीनि धान्यानि, परं न तानि मनुष्याणामुपभोगं गच्छन्ति, या तु पृथ्वी सा शर्करातोऽप्यनन्तगुणमाधुर्या, यश्च कल्पद्रुमपुष्पफलानामास्वादः स चक्रवर्तिभोजनादप्यधिकगुणः, तथा चोक्तम्–"तेसिणं भंते! पुप्फफलाणं केरिसए आसाए पन्नते?, गोयमा! से जहानामए रन्नो चाउरंतस्स चक्कवट्टिस्स कल्लाणे भोयणजाए सयसहस्सनिप्फन्ने वन्नोवए रसोवए फासोवए आसायणिज्जे दप्पणिज्जे मयणिज्जे बिंहणिज्जे सव्वेंदियगायपल्हायणिज्जे आसाएणं पन्नत्ते, एत्तोवि इट्ठतराए चेव पन्नत्ते"।

ततः पृथ्वी कल्पद्रुमपुष्पफलानि च तेषामाहारः, तथाभूतं चाहारमाहार्य प्रासादादिसंस्थाना ये गृहाकाराः कल्पवृक्षास्तेषु यथासुखमवतिष्ठन्ते, न च तत्र क्षेत्रे दंशमशकयूकामत्कुणमक्षिकादयः शरीरोपद्रवकारिणो जन्तव उपजायन्ते, येऽपि च जायन्ते भुजगव्याघ्रसिंहादयस्तेऽपि मनुष्याणां न बाधायै प्रभवन्ति, नापि ते परस्परं हिंस्यहिंसकभावे वर्तन्ते, क्षेत्रानुभावतो रौद्रानुभावरहितत्वात्, मनुष्ययुगलानि च पर्यवसानसमये युगलं प्रसुवते, तच्च युगलमेकोनाशीतिदिनानि पालयन्ति, तेषां शरीरोच्छ्रयोऽष्टौ धनुःशतानि, पल्योपमासंख्येयभागप्रमाणमायुः, उक्तं च–

॥ १ ॥ "अन्तरदीवेसु नरा धणुसयमट्ठुसिया सया मुइया।
पालंति मिहुणधम्मं पल्लस्स असंखभागाऊ॥

॥ २ ॥ चउसट्ठि पिट्ठकरंडयाणि मणुयाणा तेसिमाहारो।
भत्तस्स चउत्थस्स य गुणसीइदिणाणि पालणया॥"

स्तोककषायतया स्तोकप्रेमानुबन्धतया च ते मृत्वा दिवमुपसर्पन्ति, मरणं च तेषां जृम्भिकाकासक्षुतादिमात्रव्यापारपुरस्सरं भवति, न शरीरपीडारम्भपुरस्सरमिति। तदेवमुक्ता अन्तरद्वीपगाः॥ साम्प्रतमकर्मभूमकप्रतिपादनार्थमाह– अथ के तेऽकर्मभूमकाः?, सूरिराह–अकर्मभूम-कास्त्रिंशद्विधाः प्रज्ञप्ताः, तच्च त्रिंशद्विधत्वं क्षेत्रभेदात्, तथा चाह···'तंजहा–पंचहिं हेमवएहिं' इत्यादि, पञ्चभिर्हैमवतैः पञ्चभिर्हैरण्यवतैः पञ्चभिर्हरिवर्षैः पञ्चभी रम्यकवर्षैः पञ्चभिर्देवकुरुभिः पञ्चभिरुत्तरकुरुभिर्भिद्यमाना त्रिंशद्विधा भवन्ति, षण्णां पञ्चानां त्रिंशत्संख्यात्मकत्वात्।

तत्र पञ्चसु हैमवतेषु पंचसु हैरण्यवतेषु मनुष्या गव्यूतप्रमाणशरीरोच्छ्रयाः पल्योपमायुषो वज्रर्षभनाराचसंहननाः समचतुरस्रसंस्थानाः चतुःषष्टिपृष्टकरण्डकाश्चतुर्थातिक्रमभोजिन एकोनाशीतिदिनान्यपत्यपालकाः, उक्तं च–

॥ १ ॥ "गाउयमुच्चा पलिओवमाउणो वज्जरिसहसंघयणा।
हेमवएरन्नवए अहमिंदनरा मिहुणवासी॥

॥ २ ॥ चउसट्ठी पिट्ठकरंडयाण मणुयाण तेसिमाहारो।
भत्तस्स चउत्थस्स य गुणसीदिणऽवच्चपालणया॥"

पञ्चसु हरिवर्षेषु पञ्चसु रम्यकेषु द्विपल्योपमायुषो द्विगव्यूतप्रमाणशरीरोच्छ्रया वज्रर्षभनाराचसंहननाः समचतुरस्रसंस्थानाः षष्ठभक्तातिक्रमे आहारग्राहिणो अष्टावंशत्यधिकशत-संख्यपृष्ठकरण्डकाश्चतुः षष्टिदिनान्यपत्यपालकाः, आह च-

॥१॥ "हरिवासरम्मएसुं आउपमाणं सरीरमुस्सेहो ।
पलिओवमाणि दोन्नि उ दोन्नि उ कोसुस्सिया भणिया ॥

॥२॥ छट्ठस्स य आहारो चउसट्ठिदिणाणि पालणा तेसिं ।
पिट्ठिकरंडाण सयं अट्ठावीसं मुणेयव्वं ॥"

पञ्चसु देवकुरुषु पञ्चसूत्तरकुरुषु त्रिपल्योपमायुषो गव्यूतत्रयप्रमाणशरीरोच्छ्रयाः समचतुरस्रसंस्थाना वज्रर्षभनाराचसंहननिनः षट्पञ्चाशदधिकशतद्वयप्रमाणपृष्ठकरण्डका अष्टमभक्तातिक्रमाहारिण एकोनपञ्चाशद्दिनान्यपत्यपालकाः, तथा चोक्तम्-

॥१॥ "दोसुवि कुरूसु मणुया तिपल्लपरमाउणो तिकोसुच्चा ।
पिट्ठिकरंडसयाइं दो छप्पन्नाइं मणुयाणं ॥

॥२॥ [illegible]
अउणापन्नदिणाइं अट्ठमभत्तस्समाहारो ॥"

एतेषु सर्वेष्वपि क्षेत्रेष्वन्तरद्वीपेष्विव मनुष्याणामुपभोगाः कल्पद्रुमसंपादिताः, नवरमन्तरद्वीपापेक्षया पञ्चसु हैमवतेषु पञ्चसु हैरण्यवतेषु मनुष्याणामुत्थानबलवीर्यादिकं कल्पपादपफलानामास्वादो भूमेर्माधुर्यमित्येवमादिका भावाः पर्यायानधिकृत्यानन्तगुणा द्रष्टव्याः, तेभ्योऽपि पञ्चसु हरिवर्षेषु पञ्चसु रम्यकवर्षेषु अनन्तगुणाः, तेभ्योऽपि पञ्चसु देवकुरुषु पञ्चसूत्तरकुरुषु अनन्तगुणाः, तदेवमुक्ता अकर्मभूमकाः । संप्रतिकर्मभूमकप्रतिपादनार्थमाह-

मू. (१६६) *से किं तं कम्मभूमगा ?, कम्मभूमगा पन्नरसविहा पं०, तं०-पंचहिं भरहेहिं पंचहिं एरवएहिं पंचहिं महाविदेहेहिं, ते समासओ दुविहा पं०, तं०- आरिया य मिलिक्खू य, से किं तं मिलिक्खू ?, मिलिक्खू अनेगविहा पं०, तं०-*

-सगा जवणा चिलाया सबरबब्बरमुरंडोड्डभडगनिण्णगपक्कणिया कुलक्खगोंडसिंहल-पारसगोधा कोंचअंबडइदमिलचिल्लपुलिंदहारोसदोबवोक्काणगन्धा हारवा पहलियअज्झलरोम-पासपउसा मलया य बंधुया य सूयलिकोंकणगमेयपल्हवमालव मग्गर आभासिआ कणवीर ल्हसिय खसा खासिय णेदूर मोंढ डोंबिल गलओस पओस कक्केय अक्खाग हणरोमग हूणरोमग मरु मरुय चिलाय वियवासी य एवमाइ, सेत्तं मिलिक्खू ।

वृ. अथ के ते कर्मभूमकाः ?, सूरिराह कर्मभूमकाः पञ्चदशविधाः प्रज्ञप्ताः, तत्र पञ्चदशविधत्वं क्षेत्रभेदात्, तथा चाह-'पञ्चहिं भरहेहिं' इत्यादि, पञ्चभिर्भरतैः पञ्चभिरैरवतैः पञ्चभिर्महाविदेहैर्भिद्यमानाः पञ्चदशविधा भवन्ति, ते च पञ्चदशविधा अपि समासतो द्विविधाः प्रज्ञप्ताः, -आर्या म्लेच्छाश्च, तत्र आराद् हेयधर्मेभ्यो याताः-प्राप्ता उपादेयधर्मैरित्यार्याः, "पृषोदरादयः" इति रूपनि-ष्पत्तिः, म्लेच्छाः-अव्यक्तभाषासमाचाराः, "म्लेच्छ अव्यक्तायां वाचि" इति वचनात्, भाषाग्रहणं चोपलक्षणं, तेन शिष्टाऽसंमतसकलव्यवहारा म्लेच्छा इति प्रतिपत्तव्यं ।

तत्राल्पवक्तव्यत्वात् प्रथमतो म्लेच्छवक्तव्यतामाह-'से किं तं' इत्यादित, अथ के ते

म्लेच्छाः ?, 'मिलिक्खू' इति निर्देशः प्राकृतत्वाद् आरअषत्वाद्य, सूरिराह–म्लेच्छा अनेकविधाः प्रज्ञप्ताः, तद्यानेकविधत्वं शक–यवन–चिलात–शबर–बर्बरादिदेशभेदात्, तथा चाह–'तंजहा सगा' इत्यादि, शकदेशनिवासिनः शकाः, यवनदेशनिवासिनो यवनाः, एवं सर्वत्र, नवरममी नानादेशा लोकतो विज्ञेयाः ॥ आर्यप्रतिपादनार्थमाह–

मू. (१६६) *से किं तं आरिया ?, आरिया दुविहा पं०, तं०–इड्ढिपत्तारिया य अणिड्ढिपत्तारिया य, से किं तं इड्ढिपत्तारिया ?, इड्ढिपत्तारिया छव्विहा पं०, तं०–अरहंता चक्कवट्टी बलदेवा वासुदेवा चारणा विज्जाहरा, सेतं इड्ढिपत्तारिया ।*

से किं तं अणिड्ढिपत्तारिया ?, अणिड्ढिपत्तारिया नवविहा प०, तं०–खेत्तारिया जातिआरिया कुलारिआ कम्मारिया सिप्पारिओ भासारिया नाणारिया दंसणारिया चारित्तारिया ।

से किं तं खेत्तारिया ?, खेत्तारिया अद्धछव्वीसतिविहाणा पं०, तं०–र

मू. (१६७) *रायगिह मगह चंपा अंगा तह तामालिति वंगा य ।*
कंचणपुरं कलिंगा वाणारसी चेव कासी य ।

मू. (१६८) *साएय कोसला गयपुरं च कुरु सोरियं कुसट्टा य ।*
कंपिल्लं पंचाला अहिछत्ता जंगला चेव ॥

मू. (१६९) *बारवई सोरट्ठा मिहिल विदेहा य वच्छ कोसंबी ।*
नंदिपुरं संडिल्ला भद्दिलपुरमेव मलया य ॥

मू. (१७०) *वइराड वच्छ वरणा अच्छा तह मत्तियावइ दसण्णा ।*
सोत्तियवई य चेदी वीयभयं सिंधुसोवीरा ॥

मू. (१७१) *महुरा य सूरसेना पावा भंगी य मास पुरिवट्टा ।*
सावत्थी य कुणाला कोडीवरिसं च लाटा य ॥

मू. (१७२) *सेयवियाविय नयरी केकयअद्धं च आरियं भणियं ।*
इत्थुप्पत्ती जिणाणं चक्कीणं रामकण्हाणं ॥

वृ. सुगमं, नवरं 'रायगिहमगह' इत्यादि, राजगृहं नगरम्, मगधो जनपदः, एवं सर्वत्रापि अक्षरसंस्कारो विधेयः, भावार्थस्त्वयम्–१ मगधेषु जनपदेषु राजगृहं नगरम्, २ अङ्गेषु चम्पा ३ वङ्गेषु तामलिप्ती ४ कलिङ्गेषु काञ्चनपुरं ५ काशिषु वाराणसी ६ कोसलासु साकेतं ७ कुरुषु गजपुरं ८ कुशावर्तेषु सौरिकं ९ पाञ्चालेषु काम्पिल्यं, १० जङ्गलेषु अहिच्छत्रा ११ सुराष्ट्रेषु द्वारावती १२ विदेहेषु मिथिला १३ वत्सेषुकौशाम्बी १४ शाण्डिल्येषु नन्दिपुरं, १५ मलयेषु भद्दिलपुरं १६ वत्सेषु वैराटपुरं १७ वरणेषु अच्छापुरी १८ दशार्णेषु मृत्तिकावती १९ चेदिषु शौक्तिकावती २० वीतभयं सिन्धुषु सौवीरेषु २१ मथुरा शूरसेनेषु २२ पापा भङ्गेषु २३ मास पुरिवट्टा २४ कुणालेषु श्रावस्ती २५ लाटासु कोटिवर्ष २६ श्वेताम्बिकानगरी केकयजनपदार्द्धे एतावदर्द्धषड्विंशतिजनपदात्मकं क्षेत्रमार्यं भणितं, कुतः ? इत्याह–

'इत्थुप्पत्ती' इत्यादि, यस्मादत्र–एषु अर्द्धषड्विंशतिसंख्येषु जनपदेषु उत्पतन्तितिर्जिनानं–तीर्थकराणां चक्रवर्तिना रामाणां–बलदेवानां कृष्णानां–वासुदेवानां तत आर्यं, एतेन क्षेत्रार्यानार्यव्यवस्था दर्शिता–यत्र तीर्थकरादीनामुत्पत्तिस्तदार्यं शेषमनार्यमिति ।

मू. *(१७३) से त्तं खेत्तारिया ॥ से किं तं जाइआरिया ?, जाइआरिया छव्विहा पं०, तंजहा–*

वृ. उक्ताः क्षेत्रार्याः, सम्प्रति जात्यार्यप्रतिपादनार्थमाह–सुगमं, नवरं यद्यपि शास्त्रान्तरेष्वनेका जातय उपवर्ण्यन्ते तथाऽपि लोके एता एव ।

मू. *(१७४)* *अंबट्ठा य कलिंदा य, विदेहा वेदगाइया ।*
हरिया चुंचुणा चेव, छ एया इब्भजाईओत

वृ. अम्बष्ठ–कलिन्द–वैदेह–वेदंग–हरित–चुंचुणरूपा इभ्यजातयोऽभ्यर्चनीया जातयः प्रसिद्धाः, तत एताभिर्जातिभिरुपेता जात्यार्या न शेषजातिभिः ।

मू. *(१७५) सेत्तं जाइआरिया । से किं तं कुलारिया ?, कुलारिया छव्विहा पं०, तं०–उग्गा भोगा राइन्ना इक्खागा नाया कौरव्वा, सेत्तं कुलारिया ।*

से किं तं कम्मारिया ?, कम्मारिया अनेगविहा पं०, तं०–दोसिया सुत्तिया कप्पासिया सुत्तवेयालिया भंडवेयालिया कोलालिया नरवाहणिया जे यावन्ने तहप्पगारा, से त्तं कम्मारिया ।

से किं तं सिप्पारिया ?, सिप्पारिया अनेगविहा पं०, तं०–तुण्णागा तंतुवाया पट्टागा देयडा वरुड्ढा छव्विया कट्ठपाउयारा मुंजपाउयारा छत्तारा वज्झारा पुच्छरा लेप्पारा चित्तारा संखारा दंतारा भंडारा जिज्झगारा सेल्लारा कोडिगारा, जे यावन्ने तहप्पगारा, से त्तं सिप्पारया ॥

से किं तं भासारिया ?, भासारिया जे णं अद्धमागहाए भासाए भासेंति, तत्थऽवि य णं जत्थ बंभी लिवी पवत्तइ, बंभीए णं लिवीए अट्ठारसविहे लेक्खविहाणे पं०, तं०–बंभी जवणाणिया दोसापुरिया खरोट्ठी पुक्खरसारिया भोगवइया पहराइया अंतक्खरिया अक्खरपुट्ठिया वेणइया निण्हइया अंकलिवी गणियलिवी गंधव्वलिवी आयंसवलिवी माहेसरी दोमिलिवी पोलिन्दी, से त्तं भासारिया । से किं तं नाणारिया ?, नाणारिया पंचविहा पं०, तं०–आभिनिबोहियनाणारिया सुयना- णारिया ओहिनाणारिया मनपज्जवनाणारिया केवलनाणारिया, सेत्तं नाणारिया ।

से किं तं दंसणारिया ?, दंसणारिया दुविहा पं०, तं०–सरागदंसणारिया य वीयरायदं सणारिया य, से किं तं सरागदंसणारिया ?, सरागदंसणारिया दसविहा पं०, तं–

वृ. 'तुण्णागा' इत्यादि, तुन्नाकाः–सूच्याजीविनःतन्तुवायाः– कुविन्दाः पट्टकाराः–पट्टकूलकुविन्दाः, देयडा–दृतिकाराः वरुड्ढाः–पिच्छिकाः छर्विकाः–कटादिकाराः कट्ठपाउरा–काष्ठापादुकाकाराः, एवं मुंजपाउयारा, 'छत्तारा' छत्रकाराः, एवं शेषाण्यपि पदानि भावनीयानि ब्राह्मी यवनानीत्यादयो लिपिभेदास्तु संप्रदायादवसेयाः । उक्ता भाषार्याः, सम्प्रति ज्ञानार्यानाह–'से किं तं' इत्यादि सुगमम् । दर्शनार्यानाह– अथ के ते दर्शनार्याः ?, सूरिराह–दर्शनार्या द्विविधाः प्रज्ञप्ताः, तद्यथा–सरागदर्शनार्या वीतरागदर्शनार्याश्च, तत्र सरागं–सकषायं यद्दर्शनं तेनार्याः सरागदर्शनार्याः वीतरागं– उपशान्तकषायं क्षीणकषायं वा यद्दर्शनं तेनार्या वीतरागदर्शनार्याः । तत्र सरागदर्शनार्यप्रतिपादनापर्थमाह–'से किं तं' इत्यादि, अथ के ते सरागदर्शनार्याः ?, सूरिराह–सरागदर्शनार्या दशविधाः प्रज्ञप्ताः, तद्यथा–

मू. *(१७६)* *निसग्गुवएसरुई आणरुई सुत्तबीयरुइमेव ।*
अभिगमवित्थररुई किरियासंखेवधम्मरुई ॥

वृ. 'निसग्गुवएस' इत्यादि, अत्र रुचिशब्दः प्रत्येकमभिसंबध्यते, ततो निसर्गरुचिरिति द्रष्टव्यं, तत्र निसर्गः–स्वभावः तेन रुचिः–जिनप्रणीततत्त्वाभिलाषरूपा यस्य स निसर्गरुचिः,

उपदेशो–गुर्वादिना वस्तुतत्त्वकथनं तेन रुचिः–उक्तस्वरूपा यस्य स उपदेशरुचिः,

आज्ञा–सर्वज्ञवचनात्मिका तस्यां रुचिः–अभिलाषो यस्य स आज्ञारुचिः, जिनाइैव मे तत्त्वं न शेषं युक्तिजातमिति योऽभिमन्यते स आज्ञारुचिरिति भावार्थः,

'सुत्तबीयरुइमेवत्ति' अत्रापि रुचिशब्दः प्रत्येकमभिसंबध्यते, सूत्रम्–आचाराङ्गाद्यङ्गप्रविष्टं अङ्गबाह्यम्–आवश्यकदशवैकालिकादि तेन रुचिर्यस्य स तथा, सूत्रमाचारादिकमङ्गप्रविष्यमङ्गबाह्यावश्यकादिकमधीयानो यः सम्यक्त्वमवगाहते प्रसत्रप्रसत्रतराध्यवसायश्च भवति स सूत्ररुचिरिति भावार्थः, बीजमिव बीजं–यदेकमप्यनेकार्थप्रबोधोत्पादकं वचः तेन रुचिर्यस्य स बीजरुचिः, अनयोश्च पदयोः समाहारद्वन्द्वः तेन नपुंसकनिर्देशः, एवेति समुच्चये,

'अहिगमवित्थाररुइत्ति' अत्रापि रुचिशब्दस्य प्रत्येकमभिसंबन्धः, अधिगमरुचिर्विस्ताररुचिश्च, तत्राधिगमो– विशिष्टं परिज्ञानं तेन रुचिर्यस्यासावधिगमरुचिः, विस्तारोव्यासः सकलद्वादशाङ्गस्य नयैः पर्यालोचनमिति भावः, तेनोपबृंहिता रुचिर्यस्य स विस्ताररुचिः,

'किरियासंखेव धम्मरुइत्ति' रुचिशब्दस्यात्रापि प्रत्येकं संबन्धात् क्रियारुचिः संक्षेपरुचिर्धर्मरुचिरिति द्रष्टव्यं, तत्र क्रिया–सम्यक्संयमानुष्ठानं तत्र रुचिर्यस्य स क्रियारुचिः,

संक्षेपः–संग्रहः तत्र रुचिर्यस्य विस्तरार्थापरिज्ञानात् स संक्षेपरुचिः

धर्मेअस्तिकायधर्मे श्रुतधर्मादौ वा रुचिर्यस्य स धर्मरुचिरिति गाथासंक्षेपार्थः ॥

मू. (१७७) *भूयत्थेणाहिगया जीवाजीवे य पुन्नापावं च ।*
सहसंमुइया आसवसंवरे य रोएइ उ निसग्गो ॥

वृ. व्यासार्थं तु सूत्रकृदेव स्वत आह–'भूयत्थेण' इत्यादि, 'भूयत्थेण' इति भावप्रधानो निर्देशः, ततोऽयमर्थः–भूतार्थत्वेन–सद्भूता अमी पदार्था इत्येवंरूपेण यस्याधिगताः–परिज्ञाता जीवाजीवाः पुण्यं पापमाश्रवं संवरः चशब्दाद् बन्धादयश्च, कथमधिगताः ? इत्याह–'सहसम्मुइआ' इति आर्षत्वाद् विभक्तिलोपाच्च सहसंमत्या सह–आत्मना या संगता मतिः सा सहसंमतिः तया, किमुक्तं भवति ?–परोपदेशनिरपेक्षया जातिस्मरणप्रतिभादिरूपया मत्या, न केवलमधिगताः, किन्तु तान् जीवादीन् पदार्थान् वेदयतेऽनुरोचयति च तत्त्वरूपतयाऽऽत्मसात्परिणामयति चेति भावः, एष निसर्गरुचिर्विज्ञेय इति शेषः । अमुमेवार्थं स्पष्टतरमभिधत्सुराह–

मू. (१७८) *जो जिनदिट्ठे भावे चउव्विहे सद्दहाइ सयमेव ।*
एमेव नन्नहत्ति य निसग्गरुइत्ति नायव्वो ॥

वृ. 'जो जिनदिट्ठे भावे' इत्यादि, यो जिनदृष्टान् भावान् द्रव्यक्षेत्रकालभावभेदतो नामादिभेदतो वा चतुर्विधान् स्वयमेव–उपदेशनिरपेक्षश्रः श्रद्दधाति, केनोल्लेखेन श्रद्दधाति ?, तत आह–'एवमेव एतत्–जीवादि यथा जिनैर्दृष्टं नान्यथा इति, चः समुच्चये, एषा निसर्गरुचिरिति ज्ञातव्यः ॥

मू. (१७९) *एए चेव उ भावे उवदिट्ठे जो परेण सद्दहइ ।*
छउमत्थेण जिनेन व उवएसरुइत्ति नायव्वो ॥

वृ. उपदेशरुचिमाह-'एए चेव' इत्यादि, एतानेव जीवादिभावान् परेण छद्मस्थेन जिनेन वोपदिष्टान् श्रद्दधाति एष उपदेशरुचिरिति ज्ञातव्यः ।

मू. (१८०) *जो हेउमयाणंतो आणाए रोयए पवयणं तु ।*
एमेव नन्नहति य एसो आणारुई नाम ॥

वृ. आज्ञारुचिमाह-'जो हेउमयानंतो' इत्यादि, यो हेतुं-विवक्षितार्थगमकमजानानः प्रवचनमाज्ञयैव तुशब्द एवकारार्थः केवलया रोचते, कथम्? इत्याह-एवमेतत्प्रवचनोक्तमर्थजातं नान्यथेति एष आज्ञारुचिर्नाम ।

मू. (१८१) *जो सुत्तमहिज्जंतो सुएण ओगाहई उ सम्मत्तं ।*
अंगेण बाहिरेण व सो सुत्तरुइत्ति नायव्वो ॥

वृ. सूत्ररुचिमाह-'जो सुत्तं' इत्यादि, यः सूत्रम्-अङ्गप्रविष्टमङ्गबाह्यं वा अधीयानस्तेन श्रुतेना-ङ्गप्रविष्टेनाङ्गबाह्येन वा सम्यकत्वमवगाहते स सूत्ररुचिरिति ज्ञातव्यः ।

मू. (१८२) *एगपएनेगाइं पदाइं जो पसरई उ सम्मत्तं ।*
उदएव्व तिल्लबिंदू सो बीयरुइत्ति नायव्वो ॥

वृ. बीजरुचिमाह-'एगपएनेगाइं' इत्यादि, एकेन पदेन प्रक्रमाज्जीवादीनामनेकानि पदानि प्राकृतत्वेन विभक्तिव्यत्ययादनेकेषु जीवादिषु पदेषु यः सम्यकत्वमिति धर्मधर्मिणोरभेदोपचारात् सम्यकत्ववान् आत्मा प्रसरति तुशब्दोऽवधारणारथः प्रसरत्येव, कथम्? इत्याह-उदक इव तैलबिन्दुः, किमुक्तं भवति?-यथा उदकैकदेशगतोऽपि तैलबिन्दुः समस्तमुदकमाक्रमति तथैकदेशोत्पन्नरुचिरप्यात्मा तथाविधक्षयोपशमभावादशेषेषु तत्त्वेषु रुचिमान् भवति स एवंविधो बीजरुचिरिति ज्ञातव्यः ।

मू. (१८३) *सो होइ अभिगमरुई सुयनाणं जस्स अत्थओ दिट्ठं ।*
इक्कारस अंगाइं पइन्नगा दिट्ठिवाओ य ॥

वृ. अधिगमरुचिमाह-'सो होइ' इत्यादि, यस्य श्रुतज्ञानमर्थतो दृष्टमेकादशाङ्गन, प्रकीर्णकमित्यत्र जातावेकवचनं, ततोऽयमर्थः-प्रकीर्णकानि उत्तराध्ययनादीनि दृष्टिवादः चशब्दागुपाङ्गानि च स भवत्यधिगमरुचिः ।

मू. (१८४) *दव्वाण सव्वभावा सव्वपमाणेहिं जस्स उवलद्धा ।*
सव्वाहिं नयविहीहिं वित्थाररुइत्ति नायव्वो ॥

वृ. विस्ताररुचिमाह-'दव्वाण' इत्यादि, द्रव्याणां-धर्मास्तिकायादीनामशेषाणामपि सर्वे भावाः-पर्याया यथायोगंसर्वप्रमाणैः-प्रत्यक्षादिभिः सर्वैश्च नयविधिभिः-नैगमादिनयप्रकारैः उपलब्धाः स विस्ताररुचिरिति ज्ञातव्यः, सर्ववस्तुपर्यायप्रपञ्चावगमेन तस्या रुचेरतिनिर्मलरूपतया भावात् ।

मू. (१८५) *दंसणनाणचरित्ते तवविनए सव्वसमिइगुत्तीसु ।*
जो किरियाभावरुई सो खलु किरियारुई नाम ॥

वृ. क्रियारुचिमाह-'दंसण' इत्यादि, दर्शनं च ज्ञानं च चारित्रं च दर्शनज्ञानचारित्रसमाहारो

द्वन्द्वः तस्मिन् तथा तपसि विनये च तथा सर्वासु समितिषु–ईर्यासमित्यादिषु सर्वासु च गुप्तिषु–मनोगुप्तिप्रभृतिषु यः क्रियाभावः स क्रियारुचिः, किमुक्तं भवति ? –यस्य भावतो दर्शनाद्याचारानुष्ठाने रुचिरस्ति स खलु क्रियारुचिर्नाम ।

मू. (१८६) *अनभिग्गहियकुदिट्ठी संखेवरुइति होइ नायव्वो ।*
अविसारओ पवयणे अनभिग्गहिओ य सेसेसु ॥

वृ. संक्षेपरुचिमाह– 'अनभिग्गहिय' इत्यादि, नाभिगृहीता कुत्सिता दृष्टिर्येनासावनभिगृहीतकुदृष्टिः, अविशारदः प्रवचने जिनप्रणीते शेषेषु च कपिलादिप्रणीतेषु प्रवचनेषु अनभिगृहीतो – न विद्यते आभिमुख्येनोपादेयतया गृहीतं–ग्रहणमस्य इत्यनभिगृहीतः, पूर्वमनभिगृहीतकुदृष्टिरित्यनेन दर्शनान्तरपरिग्रहः प्रतिषिद्धः अनेन परदर्शनपरिज्ञानमात्रमपि निषिद्धमिति विशेषः, स इत्थंभूतः संक्षेपरुचिरिति ज्ञातव्यः ॥

मू. (१८७) *जो अत्थिकायधम्मं सुयधम्मं खलु चरित्तधम्मं च ।*
सद्दहइ जिनाभिहियं सो धम्मरुइति नायव्वो ॥

वृ. धर्मरुचिमाह–'जो अत्थिकाय' इत्यादि, यः खलु जीवोऽस्तिकायानांधर्मास्ति-कायादीनधर्म-गत्युपष्टम्भकत्वादिरूपं स्वभावं श्रुतधर्मं चारित्रधर्मं च जिनाभिहितं श्रद्दधाति स धर्मरुचिरिति ज्ञातव्यः ॥

मू. (१८८) *परमत्थसंथवो वा सुदिट्ठपरमत्थसेवणा वावि ।*
वावन्नकुदंसणवज्जणा य सम्मत्तसद्दहणा ॥

वृ. तदेवं निसर्गाद्युपादिभेदाद् दशधा रुचिरूपं दर्शनमुक्तं, सम्प्रति यैर्लिङ्गैरिदमुत्पन्नमस्ति इति निश्चीयते तानि लिङ्गान्युपदर्शयन्नाह–'परमत्थसंथवो वा' इत्यादि, परमाश्च–तात्त्विकाश्च तेऽर्थाश्च–जीवादयस्ते परमार्थः तेषु संस्तवः–परिचयः, तात्पर्येण बहुमानपुरस्सरं जीवादिपदा- र्थावगमायाभ्यास इतियावत्, वाशब्दः समुच्चये, सुष्ठु–सम्यग्रीत्या दृष्टाः परमार्थाः–जीवादयो यैस्ते सुदृष्टपरमार्थाः तेषां सेवना–पर्युपास्तिः सुदृष्टपरमार्थसेवनं, स्त्रीत्वं प्राकृतत्वात्, वाशब्दोऽ- नुक्तसमुच्चये, यथाशक्ति तद्वैयावृत्यप्रवृत्तिश्च, अपिः समुच्चये, तथा 'वावन्नकुदंसणत्ति' दर्शनशब्दः- प्रत्येकमभिसंबध्यते, व्यापन्नं–विनष्टं दर्शनं येषां ते व्यापन्नदर्शनाः–निह्नवादयः तथा कुत्सितं दर्शनं येषां ते कुदर्शनाः–शाक्यादयस्तेषां वर्जनं व्यापन्नकुदर्शनवर्जनम्, 'सम्मत्त सद्दहणा' इति सम्यक्त्वश्रद्धानं, एतैः परमार्थसंस्तवादिभिः सम्यक्त्वमस्तीति श्रद्धीयते इत्यर्थः ।

मू. (१८९) *निस्संकिय निक्कंखिय निव्वितिगिच्छा अमूढदिट्ठी य ।*
उववूहथिरीकरणे वच्छल्लपभावणे अट्ठ ॥

वृ. अस्य च दर्शनस्याचारा अष्टौ, ते च सम्यक् परिपालनीयाः, तदतिक्रमेण दर्शनस्यैवातिक्रमभावात्, अतस्तानुपदर्शयितुमाह–'निस्संकिय' इत्यादि शङ्कनं शङ्कितं, देशशङ्का सर्वशङ्का चेत्यर्थः, निर्गतं शङ्कितं यस्मादसौ निःशङ्कितः, देशर्वसङ्कारहित इति भावार्थः, तत्र देशशङ्का–समानो जीवत्वे कथमेको भव्यः अपरस्त्वभव्य इति ?, सर्वशङ्का–प्राकृतनिबन्धत्वात्सकलमेवेदं प्रवचनं परिकल्पितं भविष्यतीति, न चेयं देशशङ्का सर्वशङ्का वा युक्ता, यत इह द्विविधा भावाः, तद्यथा

हेतुग्राह्या अहेतुग्राह्याश्च, तत्र हेतुग्राह्याय जीवास्तित्वादयः, तत्साधकप्रमाणसद्भावात्, अहेतुग्राह्या अभव्यत्वादयः, अस्मदाद्यपेक्षया तत्साधकहेतूनामसंभवात्, प्रकृष्टज्ञानगोचरत्वात् तद्धेतूनमिति, प्राकृतोऽपि च निबन्धः प्रवचनस्य् बालाद्यनुग्रहार्थः, उक्तं च-

॥ १ ॥ बालस्त्रीमूढमूर्खाणां, नृणां चारित्रकाङ्क्षिणाम्,
अनुग्रहार्थंतत्त्वज्ञैः सिद्धान्तः प्राकृतः स्मृतः ॥

"अपि च-प्राकृतोऽपि निबन्धः प्रवचनस्य दृष्टेष्टाविरोधी अतः
कथमवान्तरपरिकल्पनाशङ्का ?, सर्वज्ञमन्तरेणान्यस्य दृष्टेष्टाविरोधिवचनासंभवात्,

निःशङ्कित इति जीव एवार्हच्छासनप्रतिपन्नो दर्शनाचरणात् तत्राधान्यविवक्षायां दर्शनाचार उच्यते, एतेन दर्शनदर्शिनोः कथंचिदभेदमाह, एकान्तभेदे तु अदर्शिनेव इव तत्फलायोगतो मोक्षाभावप्रसङ्गः, एवमुत्तरेष्वपि त्रिषु पदेषु भावना कार्या,

तथा 'निष्काङ्क्षश्रित' इति, काङ्क्षणं काङ्क्षितं निर्गतं काङ्क्षितं यस्मादसौ निष्काङ्क्षितः, देशसर्वकाङ्क्षरहित इत्यर्थः, तत्र देशकाङ्क्ष-एकं दिगम्बरादिदर्शनमभिकाङ्क्षते सर्वकाङ्क्ष-सर्वाण्येव दर्शनानि शोभनानीत्येवमनुचिन्तनं, इयं च द्विधाऽप्ययुक्ता, शेषदर्शनेषु षड्जीवनिकायपीडाया असत्प्ररूपणायाश्च भावात्।

तथा विचिकित्सा-मतिविभ्रमः फलं प्रति संशय इतियावत् निर्गता विचिकित्सा यस्मादसौ निर्विचिकित्सः, 'साध्वेवं जिनशासनं, किन्तु प्रवृत्तस्य सतो ममास्मात् फलं भविष्यति न वा ?, क्रियायाः कृषिबलादिषु उभयथाऽप्युपलब्धेः' इतिविकल्परहितः, न ह्यविकल उपाय उपेयवस्तुप्रापको न भवतीति संजातनिश्चयो निर्विचिकित्स इति भावः, एतावताऽनेन निःशङ्किताद् भिन्नः, यद्वा 'निव्विदुगुंछो' इति निर्विद्धजुगुप्सः साधुजुगुप्सारहित इत्यर्थः, उदाहरणं च विद्धजुगुप्सायां श्रावकदुहिता। तथा 'अमूढदिट्ठी यत्ति' बालतपस्वितपोविद्यातिशयदर्शनैर्न मूढा-स्वभावाच्चलिता दृष्टिः-सम्यग्दर्शनरूपा यस्यासावमूढदृष्टिः, अत्रोदाहरणं सुलसाश्राविका, सा ह्यम्बडपरिव्राजकसमृद्धीरुपलभ्यापि न संमोहं गता।

तदेवं गुणिप्रधान आचार उक्तः, सम्प्रति गुणप्रधानमाह-'उववूह' इत्यादिउपबृंहणं च स्थिरीकरणं च उपबृंहणस्थिरीकरणे, तत्रोपबृंहणं नाम समानधानर्मिकाणां सद्गुणप्रशंसनेन तद्वृद्धिकरणं, स्थिरीकरणं धर्माद् विषीदतां तत्रैव स्थापनं। वात्सल्यं च प्रभावना च वात्सल्यप्रभावने, तत्र वात्सल्यं समानधार्मिकाणां प्रीत्योपकारकरणं, प्रभावना धर्मकथादिभिस्तीर्थप्रख्यापना।

अयं च गुणप्रधाननिर्देशो गुणगुणिनोः कथञ्चिदभेदख्यापनार्थः अन्यथा एकान्ताभेदे गुणनिवृत्तौ गुणिनोऽपि निवृत्तेः शून्यतापत्तिः। एतेऽष्टौ दर्शनाचाराः॥

मू. (१९०) से त्तं सरागदंसणाररिया। से किं तं वीयरायदंसणा रिया ?, विहा पं०, तं०-उवसंतकसायवीय- रायदंसणा रिया य खीणकसायवीयरायदंसणा रिया य। से कं तं उवसंतकसायवीयरायदंसणा रिया ?, उवसंत० रिया दुविहा पं०, तं०-पढमसमयउवसंतकसाय-वीयरायदंसणा रियाय अपढमसमयउवसंतकसायवीयरायदंसणा रिया य, अहवा चरिमसमयउवसंतकसायवीयरायदंसणा रियाय अचरिमसमयउवसंतकसाय- वीयरादंसणा रिया य।

से किं तं खीणकसायवीयरायदंसणा रिया ?, खीणकसायवीयरायदंसणा रिया दुविहा पं०, तं०–छउमत्थखीणकसायवीयरायदंसणा रिया ये केवलिखीणकसायवीयरायदंसणा रिया य।

से किं तं छउमत्थखीणकसायवीयरायदंसणा रिया ?, छउमत्थखीणकसायवीयरायदंसणायरिया दुविहा पं०, तं०–सयंबुद्धछउमत्थखीणकसायवीयरायदंसणारिया य बुद्धबोहियछउमत्थखीणकसायवीयरायदंसणा रिया य,

से किं तं सयंबुद्धछउमत्थखीणकसायवीयरायदंसणा रिया ?, सयंबुद्धछउमत्थखीणकसायवीयरायदंसणा रिया दुविहा पं०, तं०–पढमसमयसयंबुद्धछउमत्थखीणकसायवीयरायदंसणा रिया य अपढमसमयसयंबुद्धछउमत्थखीणकसायवीयरायदंसणारिया य, अहवा चरिमसमयसयंबुद्धछउमत्थखीणकसायवीयरायदंसणारिया य अचरिमसमयसयंबुद्धछउमत्थखीणकसायवीयरायदंसणा रियाय, से त्तं सयंबुद्धछउमत्थखीणकसायवीयरायदंसणारिया।

से किं तं बुद्धबोहियछउमत्थखीणकसायवीयरायदंसणारिया ?, बुद्धबोहियछउमत्थखीणकसायवीयरायदंसणा रिया दुविहा पं०, तं–पढमसमयुद्धबोहियखीणकसायवीयरायदंसणारिया य अपढमसमयबुद्धबोहियछउमत्थखीणंकसायवीयरायदंसणारिया य, अहवा चरिमसमयबुद्धबोहियछउमत्थखीणकसायवीयरायदंसणारिया य अचरिमसमयबुद्धबोहियछउमत्थखीणकसायवीयरायदंसणारिया य, सेत्तं बुद्धबोहियछउमत्थखीणकसायवीयरायदंसणा रिया, सेत्तं छउमत्थखीणकसायवीयरायदंसणा रिया।

से किं तं केवलिखीणकसायवीयरायदंसणा रिया ?, दुविहा पं०, तं०–सजोगिकेवलिखीणकसायवीयरायदंसणा रिया य अजोगिकेवलिखीण- कसायवीयरायदंसणा रिया य।

से किं तं सजोगिकेवलिखीणकसायवीयरायदंसणा रिया ?, सजोगिकेवलसिखीणकसायवीयरादंसणा रिया दुविहा पं०, तं०–पढमसमयजोगिकेवलिखीणकसायवीययरायदंसणा रिया य अपढमसमयजोगिकेवलिखीणकसायवीयरायदंसणारिया य, अहवा चरिमसमयजोगिकेवलिखीणकसायवीयरायदंसणारिया य अचरिमसमयजोगिकेवलिखीणकसायवीयरायदंसणारिया य। सेत्तं सजोगिकेवलिखीणकसायवीयरायदंसणारिया।

से किं तं अजोगिकेवलिखीणकसायवीयरायदंसणारिया ?, अजोगिकेवलिखीणकसायवीयरायदंसणा रिया दुविहा पं०, तं०–पढमसमयअजोगिकेवलिखीणकसायवीयरायदंसणा रिया य अपढमसमयअजोगिकेवलिखीणकसायवीयरायदंसणा रिया य, अहवा चरिमसमयजोगिकेवलिखीणकसायवीयरायदंसणारिया य अचरिमसमयअजोगिकेवलिखीणकसायवीयरायदंसणा रिया य, सेत्तं अजोगिकेवलिखीणकसायवीयरायदंसणा रिया, सेत्तं केवलिखीणकसायवीयरायदंसणारिया, सेत्तं खीणकसायवीयरायदंसणारिया, सेत्तं दंसणारिया ॥

वृ. तदेवमुक्ताः सरागदर्शनभेदाः, तदभिधानाच्चाभिहिताः सरागदर्सनार्यभेदाः ॥ सम्प्रति वीतरागदर्शनार्यादिभेदानाह– (से किं तमित्यादि, तदेवं दर्शनार्यभेदानुक्त्वा चारित्रार्यभेदानाह–)

मू. (१९१) *से किं तं चरित्तारिया ?, चरित्तारिया दुविहा पं०, तं०–सरागचरित्तारिया य वीयरागचरित्तारिया य, से किं तं रागचरित्तारिया ?, सरागचरित्तारिया दुविहा पं०, तं०–सुहुमसंपरायसरागचरित्ता- रिया य बायरसंपरायसरागचरित्तारिया य।*

से किं तं सुहुमसंपरायसरागचरित्तारिया ?, सुहुमसंपरायसरागचरित्तारिया दुविहा पं०, तं०–पढमसमयसुहुमसंपरायसरागचरित्तारिया य अपढमसमयसुहुमसंपरायसरागचरित्तारियाय, अहवा चरिमसमयसुहुमसंपरायसरागचरित्तारिया य अचरिमसमयसुहुमसंपरायसरागचरित्तारिया य, अहवा सुहुमसंपरायसरागचरित्तारिया दुविहा पं०, तं०–संकिलिस्समाणा य विसुज्झमाणा य, सेत्तं सुहुमसंपरायसरागचरित्तारिया।

से किं तं बादरसंपरायसरागचरित्तारिया ?, बादर० दुविहा पं०, तं०–पढमसमयबादरसंपरायसरागचरित्तारिया अपढमसमयबादरसंपरायसरागचरित्तारिया य, अहवा चरिमसमयबादरसंपरायसरागचरित्तारिया य अचरिमसमयबादरसंपरायसरागचरित्तारिया य, अहवा बादरसंपरायसरागचरित्तारिया दिविहा पं०, तं०–पडिवाई य अपडिवाई य, सेत्तं बादरसंपरायसराग-रित्तारिया, सेत्तं सरागचरित्तारिया।

से किं तं वीयरायचरित्तारिया ?, वीयरायचरित्तारिया दुविहा पं०, तं०–उवसंतकसायवीयरायचारित्तारिया य खीणकसायवीयरायचारित्तारिया य।

से किं तं उवसंतकसायवीयरायचरित्तारिया ?, उवसंतकसायवीयरायचरित्तारिया दुविहा पं०, तं०–पढमसमयउवसंतकसायवीयरायचरित्तारिया य अपढमसमयउवसंतकसायवीयरायचरित्तारिया य, अहवा चरिमसमयउवसंतकसायवीयरायचरित्तारिया य अचरिमसमयउवसंतकसायवीयरायचरित्तारिया य, सेत्तं उवसंतकसायवीयरायचरित्तारिया।

से किं तं खीणकसायवीयरायचरित्तारिया ?, खीणकसायवीयरायचरित्तारिया दुविहा पं०, छउमत्थखीणकसायवीयरायचरित्तारिया य केवलिखीणकसायवीयरायचरित्तारिया य।

से किं तं छउमत्थखीणकसायवीयरायचरित्तारिया ?, छउमत्थखीणकसायवीयरायचरित्तारिया दुविहा पं०, तं०–सयंबुद्धछउमत्थखीणकसायवीयरायचरित्तारिया य बुद्धबोहियछउमत्थखीणकसायवीयरायचरित्तारिया य।

से किं तं सयंबुद्धछउमत्थखीणकसायवीयरायचरित्तारिया ?, सयंबुद्धछउमत्थखीणकसायवीयरायचरित्तारिया दुविहा पं०, तं०–पढमसमयसयंबुद्धछउमत्थखीणकसायवीयरायचरित्तारिया य अपढमसमयसयंबुद्धछउमत्थखीणकसायवीयरायचरित्तारिया य, अहवा चरिमसमयसयंबुद्धछउमत्थखीणकसायवीयरायचरित्तारिया य अचरिमसमयसयंबुद्धछउमत्थखीणकसायवीयरायचरित्तारिया य। सेत्तं सयंबुद्धखीणकसायवीयरायचरित्तारिया।

से किं तं बुद्धबोहियछउमत्थखीणकसायवीयरायचरित्तारिया ?, बुद्धबोहियछउमत्थखीणकसायवीयरायचरित्तारिया दुविहा पं०, तं०–पढमसमयबुद्धबोहियछउमत्थखीणकसायवीयरायचरित्तारिया य अपढमसमयबुद्धबोहियछउमत्थखीणकसायवीयरायचरित्तारिया य, अहवा चरिमसमयबुद्धबोहियछउमत्थखीणकसायवीयरायचरित्तारिया य अचरिमसमयबुद्धबोहियछउमत्थखीणकसायवीयरायचरित्तारिया य, सेत्तं बुद्धबोहियछउमत्थखीणकसायवीयरायचरित्तारिया, सेत्तं छउमत्थखीणकसायवीयरायचरित्तारिया।

से किं तं केवलिखीणकसायवीयरायचरित्तारिया ?, दुविहा पं०, तं० सजोगिकेवलिखीणकसायवीयरायचरित्तारिया य अजोगिकेवलिखीण- कसायवीयरायचरित्तारिया य।

तद्यथा-पर्याप्तसूक्ष्मपृथिवीकायिकाश्चापर्याप्तसूक्ष्मपृथिवीकायिकाश्च, तत्र पर्याप्तिर्नाम आहारादिपुद्गलग्रहणपरिणमनहेतुरात्मनः शक्तिविशेषः, स च पुद्गलोपचयादुपजायते, किमुक्तं भवति उत्पत्तिदेशमागतेन प्रथमं ये गृहीताः पुद्गलास्तेषां तथाऽन्येषामपि प्रतिसमयं गृह्यमाणानां तत्सम्पर्कतः तद्रूपतया जातानां यः शक्तिविशेषः आहारादिपुद्गलखलरसरूपताऽऽपादानहेतुर्यथोदरान्तर्गतानां पुद्गलविशेषाणामाहारपुद्गलखलरसरूपतापरिणमनहेतुः,

सा च पर्याप्तिः षोढा-आहारपर्याप्तिः शरीरपर्याप्तिरिन्द्रियपर्याप्तिःप्राणापानपर्याप्तिर्भाषापर्याप्तिर्मनः पर्याप्तिश्च, तत्र यया बाह्यमाहारमादाय खलरसरूपतया परिणमयति सा आहारपर्याप्तिः, यया रसीभूतमाहारं रसासृगमांसमेदोऽस्थिमज्जाशुक्रलक्षणसप्तधातुरूपतया परिणमयति सा शरीरपर्याप्तिः, यया धातुरूपतया परिणमितमाहारमिन्द्रियरूपतया परिणमयतसा इन्द्रियपर्याप्तिः, तथा चायमर्थोऽन्यत्रापि भङ्ग्यन्तरेणोक्तः, पञ्चानामिन्द्रियाणां प्रायोग्यान् पुद्गलान् गृहीत्वाऽनाभोगनिर्वर्तितेन वीर्येण तद्भावनयनशक्तिरिन्द्रियपर्याप्तिरिति, यया पुनरुच्छ्वासप्रायोग्यान् पुद्गलानादायोच्छ्वासरूपतया परिणमय्यालम्ब्य च मुञ्चति सा उच्छ्वासपर्याप्तिः,

यया तु भषाप्रयायोग्यान् पुद्गलानादाय भाषात्वेन परिणमय्यालम्ब्य च मुञ्चति सा भाषापर्याप्तिः, यया पुनर्मनःप्रायोग्यान् पुद्गलानादाय मनस्त्वेन परिणमय्यालम्ब्य च मुञ्चति सा मनःपर्याप्तिः, एताश्च यथाक्रममेकेन्द्रियाणां संज्ञिवर्जानां द्वीन्द्रियादीनां संज्ञिनां चतुः''पञ्चषट्संख्या भवन्ति, उक्तं च प्रज्ञापनामूलटीकाकृता-

''एकेन्द्रियाणां चतस्र विकलेन्द्रियाणां पञ्च सञ्जिजनां षट्'' इति, उत्पत्तिप्रथमसमय एव एता यथायथं सर्वा अपि युगपन्निष्पादयितुमारभ्यन्ते, क्रमेण च निष्ठामुपयान्ति, तद्यथा-प्रथमाहारपर्याप्तिस्ततः'' शरीरपर्याप्तिस्तत इन्द्रियपर्याप्तिरित्यादि, आहारपर्याप्तिश्च प्रथमसमय एव निष्पत्तिमुपपद्यते, शेषास्तु प्रत्येकमन्तर्मुहूर्तेन कालेन, अथाहारपर्याप्तिः प्रथमसमय एव निष्पद्यते इति कथमवसीयते?, उच्यते, यतआहारपदे द्वितीयोद्देशके सूत्रमिदम्-'आहारपज्जत्तिए अपज्जत्तए णं भंते! किं आहारए अनाहारए?, गोयमा! नो आहारए अनाहारए' इति, तत आहारपर्याप्तयाऽपर्याप्तो विग्रहगतावे-वोपपद्यते, नोपपातक्षेत्रमागतोऽपि, उपपातक्षेत्रमागतस्य प्रथमसमयएवाहारकत्वात्, तत एकसामयिकी आहारपर्याप्तिनिर्वृत्तिः, यदि पुनरुपपातक्षेत्रमागतोऽप्याहारपर्याप्तयाऽपर्याप्तः स्यात् तत एवं सति व्याकरणसूत्रमित्थं भवेत्-''सिय आहारए सिय अनाहारए' यथा शरीरादिपर्याप्तिषु 'सिय आहारए सिय अनाहारए'' इति,

सर्वासामपि च पर्याप्तीनां परिसमाप्तिकालोऽन्तर्मुहूर्तप्रमाणः, पर्याप्तयो विद्यन्ते येषां ते पर्याप्ता ''अश्वादिभ्य' इति मत्वर्थीयोऽप्रत्ययः, पर्याप्तकाश्च ते सूक्ष्मपृथिवीकायिकाश्च पर्याप्तसूक्ष्मपृथिवीकायिकाः, चशब्दो लब्धिपर्याप्तकरणपर्याप्तरूपस्वगतभेदद्वयसूचकः, ये पुनः स्वयोग्यपर्याप्तिपरिसमाप्तिविकलास्तेऽपर्याप्ताः अपर्याप्ताश्च ते सूक्ष्मपृथिवीकायिकाश्चापर्याप्तसूक्ष्मपृथिवीकायिकाः, चशब्दः करणलब्धिनिबन्धनस्वगतभेदद्वयसूचकः, तथाहि-द्विविधाः सूक्ष्मपृथिवीकायिकाः अपर्याप्तास्तद्यथा -लब्ध्या करणैश्च, तत्र येऽपर्याप्तका एव सन्तो म्रियन्ते ते लब्ध्यपर्याप्तकाः, ये पुनः करणानि शरीरेन्द्रियादीनि न तावन्निर्वर्तयन्ति अथाचावश्यं निर्वर्तयिष्यन्ति ते करणापर्याप्ताः उक्तं च तामाह-'तेसि' मित्यादि, त एते सूक्ष्मपृथिवीकायिकाः ॥ तदे-

एव सामायिकं विनयादेराकृतिगणतया "विनयादिभ्यः" इत्यनेन स्वार्थिक इकण्, तद्य सर्वसावद्यविरतिरूपं, यद्यपि च सर्वमपि चारित्रमविशेषतः सामायिकं तथाऽपि छेदादिविशेषैर्विशेष्यमाणमर्थःतशब्दान्तरतश्च नानात्वं भजते, प्रथमं पुनरविशेषणात् सामान्यशब्दएवावतिष्ठते सामायिकमिति, तद्य द्विधा-इत्वरं यावत्कथिकं च, तत्रेत्वरं भरतैरावतेषु एकयमपश्चिमतीर्थकरतीर्थयेष्वनारोपितमहाव्रतस्य शैक्षकस्य विज्ञेयं, यावत्कथिकं प्रव्रज्याप्रतिपत्तिकालादारभ्याप्राणोपरमात्, तद्य भरतैरावतभाविमध्यद्वाविंशतितीर्थकरतीर्थान्तरगतानां विदेहतीर्थकरतीर्थान्तरगतानां च साधूनवामवसेयं, तेषामुपस्थापनाया अभावात्, उक्तं च-

॥ १॥ "सव्वमिणं सामाइय छेयाइविसेसियं पुन विभिन्नं ।
अविसेसं सामाइय चियमिह सामन्नसन्नाए ॥

॥ २ ॥ "सावज्जजोगविरइत्ति तत्थ सामाइयं दुहा तं च ।
इत्तरमावकहंति य पढमं पढमंतिमजिणाणं ॥

॥ ३ ॥ तित्थेसु अणारोवियवयस्स सेहस्स थोवकालीयं ।
सेसाणमावकहियं तित्थेसु विदेहयाणं च ॥"

ननु च इत्वरमपि सामायिकं करोमि भदन्त ! सामायिकं यावज्जीवमित्येवं यादवदायुरागृहीतं, तत उपस्थापनाकाले तत्परित्यजतः कथं न प्रतिज्ञाभङ्गः ?, उच्यते, ननुप्रागेवोक्तं-सर्वमेवेदं चारित्रमविशेषतः सामायिकं, सर्वत्रापि सावद्ययोगविरतिसद्भावात्, केवलं छेदादिविशुद्धिविशेषैर्विशेष्यमणमर्थतः शब्दान्तरतश्च नानात्वं भजते, ततो यथा यावत्कथिकं सामायिकं छेदोपस्थापनं च परमविशुद्धिवेशेषरूपसूक्ष्मसंपरायादिचारित्रावाप्तौ न भङ्गमास्कन्दति तथेत्वरमपि सामायिकं विशुद्धिविशेषरूपच्छेदोपस्थापनावाप्तौ, यदि हि प्रव्रज्या परित्यज्यते तर्हि तद् भङ्गमापद्यते, न तस्यैव विशुद्धिविशेषावाप्तौ, उक्तं च-

॥ १ ॥ "उन्निक्खमओ भंगो जो पुन तं चिय करेइ सुद्धयरं ।
सन्नमेत्तविसिट्ठं सुहुमंपिव तस्स को भंगो ? ॥

तथा छेदः पूर्वपर्यायस्य उपस्थापना च महाव्रतेषु यस्मिन् चारित्रे तच्छेदोपस्थापनं, तद्य द्विधा-सातिचारं निरतिचारं च, तत्र निरतिचारं यदित्वसामायिकतवः शैक्षकस्यारोप्यते तीर्थान्तरसंक्रान्तौ वा, यथा पारअश्वनाथतीर्थाद् वर्द्धमानतीर्थं संक्रामतः पञ्चयामप्रतिपत्तौ, सातिचारं यन्मूलगुणाधातिनः पुनर्व्रतोच्चारणं, उक्तं च-

॥ १ ॥ "सेहस्स निरइयारं तित्थन्तरसंकमे व तं होज्जा ।
मूलगुणघाइणो साइयारमुभयं च ठियकप्पे ॥"

'उभयं चेति' सातिचारं निरतिचारं च 'स्थितकल्पे' इति प्रथमपश्चिमतीर्थकरतीर्थकाले ।

तथा परिहरणं परिहारः-तपोविशेषः तेन विशुद्धिर्यस्मिन् चारित्रे तत्परिहारविशुद्धिकं, तद्य द्विधा-निर्विशमानकं निर्विष्टकायिकं च, तत्र निर्विशमानका विवक्षितचारित्रासेवकाः, निर्विष्टकायिका आसेवितविवक्षितचारित्रकायाः, तदव्यतिरेकाच्चारित्रमप्येवमुच्यते । इह नवको गणः-चत्वारो निर्विशमानकाश्चत्वारश्चानुचारिणः एकः कल्पस्थितो वाचनाचार्यः, यद्यपि च सर्वेऽपि श्रुतातिशयसंपन्नाः तथाऽपि कल्पत्वात् तेषामेकः कश्चित् कल्पस्थितोऽवस्थाप्यते ।

निर्विशमानकानां चायं परिहारः –

॥ १ ॥ "परिहारियाण उ तवो जहन्न मज्झो तहेव उक्कोसो ।
सीउण्हवासकाले भणिओ धीरेहि पत्तेयं ॥

॥ २ ॥ तत्थ जहन्नो गिम्हे चउत्थ छट्ठं तु होइ मज्झिमओ ।
अट्ठमिह उक्कोसो एत्तो सिसिरे पवक्खामि ॥

॥ ३ ॥ सिसिरे उ जहन्नाई छट्ठाई दसमचरिमगो होइ ।
वासासु अट्ठमाई बारसपज्जंतगो नेओ ॥

॥ ४ ॥ पारणगे आयामं पंचसु अगहो दोसुऽभिग्गहो भिक्खे ।
कप्पट्ठिया पइदिणं करेंति एमेव आयाम ॥

॥ ५ ॥ एवं छम्मासतवं चरिउं परिहारगा अनुचरंति ।
अनुचरगे परिहारियपयट्ठिए जाव छम्मासा ॥

॥ ६ ॥ कप्पट्ठिएवि एवं छम्मसतवं करेइ सेसा उ ।
अनुपरिहारिगभावं वयंति कप्पट्ठियत्तं च ॥

॥ ७ ॥ एवेसो अट्ठारसमासपमाणो उ वण्णिओ कप्पो ।
संखेवओ विसेसो विसेससुत्ताउ नायव्वो ॥

॥ ८ ॥ कप्पसमत्तीए तयं जिनकप्पं वा उविंति गच्छं वा ।
पडिवज्जमाणगा पुन जिनस्सगासे पवज्जंति ॥

॥ ९ ॥ तित्थयरसमीवासेवगस्स पासे व नो उअन्नस्स ।
एएसिं जं चरणं परिहारविसुद्धियं तं तु ॥

अथ एते परिहारविशुद्धिकाः कस्मिन् क्षेत्रे काले वा भवन्ति ?, उच्यते, इह क्षेत्रादिनिरूपणार्थं विंशतिद्वाराणि, तद्यथा–१ क्षेत्रद्वारं २ कलद्वारं ३ चारित्रद्वारं ४ तीर्थद्वारं ५ पर्यायद्वारं ६ आगमद्वारं ७ वेदद्वारं ८ कल्पद्वारं ९ लिङ्गद्वारं १० लेश्याद्वारं ११ ध्यानद्वारं १२ गणद्वारं १३ अभिग्रहद्वारं १४ प्रव्रज्याद्वारं १५ मुण्डापनद्वारं १६ प्रायश्चित्तविधिद्वारं १७ कारणद्वारं १८ निष्प्रतिकर्मताद्वारं १९ भिक्षाध्वारं २० बन्धद्वारम् । तत्र क्षेत्रे द्विधा मार्गणा–जन्मतः सद्भावतश्च, यत्र क्षेत्रे जातस्तत्र जन्मतः मार्गणा, यत्र च कल्पे स्थितो वर्तते तत्र सद्भावतः, उक्तं च–

॥ १ ॥ "खेत्ते दुहेह मग्गण जम्मणओ चेव संतिभावे य ।
जम्मणओ जहिं जात संतीभावो य जहि कप्पो ॥"

तत्र जन्मतः सद्भावतश्च पञ्चसु भरतेषु पञ्चस्वैरावतेषु, न तु महाविदेहेषु, न चैतेषां संहरणमस्ति, येन जिनकल्पिक इव संहरणतः सर्वासु कर्मभूमिषु वा प्राप्येरन्, उक्तं च–

"खेत्ते भरहेरवएसु होंति संहरणवज्जिया नियमा" १ ।

कालद्वारे–अवसर्पिण्यां तृतीये चतुर्थे वाऽरके जन्म, सद्भावः पञ्चमेऽपि, उत्सर्पिण्यां द्वितीये तृतीये चतुर्थे वा जन्म, सद्भावः पुनः तृतीये चतुर्थे वा, उक्तं च–

॥ १ ॥ "ओसप्पिणीए दोसुं जम्मणओ तीसु संतीभावेण ।
उस्सप्पिणि विवरीओ जम्मणओ संतिभावेण ॥"

नोत्सर्पिण्यवसर्पिणीरूपे तु चतुर्थारकप्रतिभागकाले न संभवन्ति, महाविदेहक्षेत्रे तेषामसंभवात् २। चारित्रद्वारे-संयमस्थानद्वारेण मार्गणा, तत्र सामायिकस्य छेदोपस्थापनस्य च चारित्रस्य यानि जघन्यानि संयमस्थानानि तानि परस्परं तुल्यानि, समापरिणामत्वात्, ततोऽसंख्येयलोका-काशप्रदेशप्रमाणनि संयमस्थानान्यतिक्रम्योर्ध्वं यानि संयमस्थानानि तानि परिहारविशुद्धिक- योग्यानि, तान्यपि च केवलिप्रज्ञया परिभाव्यमानानि असंख्येयलोकाकाशप्रदेशप्रमाणानि, तानि प्रथमद्वितीयचारित्राविरोधीनि, तेष्वपि संभवात्, तत ऊर्ध्वं यानि संख्यातीतानि संयमस्थानानि तानि सूक्ष्मसंपराययथाख्यतचारित्रयोग्यानि, उक्तं च-

॥१॥ "तुल्ला जहन्नठाणे संजमठाणाणि पढमबिइयाणं।
तत्तो असंखलोए गंतुं परिहारियट्ठाण ॥
॥२॥ तेऽवि असंखा लोगा अविरुद्धा चेव पढमबिइयाणं।
उपरिंपि तउ असंखा संजमठाणा उ दोण्हंपि ॥"

तत्र परिहारविशुद्धिककल्पप्रतिपत्तिः स्वकीयेष्वेव संयमस्थानेषु वर्तमानस्य भवति न शेषेषु, यदा त्वतीतयथाधिकृत-पूर्वप्रतिपन्ने विवक्ष्यते तदा शेषेष्वपि संयमस्थानेषु भवति, परिहारविशुद्धिकल्पसमाप्तयनन्तरमन्येष्वपि चारित्रेषु संभवात्, तेष्वपि च वर्तमानस्यातीतनयमपेक्ष्य पूर्वप्रतिपन्नत्वाविरोधात्, उक्तं च-

॥१॥ "सट्ठाणे पडिवत्ती अन्नेसुवि होज्ज पुव्वपडिवन्नो।
तेसुवि वट्टंतो सो तीतनयं पप्प वुच्चति उ ॥ ३ ।

तीर्थद्वारे परिहारविशुद्धिको नियमतस्तीर्थे प्रवर्तमाने एव सति भवति, न तच्छेदे नानुत्पत्त्यां वा तदभावे जातिस्मरणादिना, उक्तं च-

॥१॥ "तित्थत्ति नियमतोच्चतिय होइ स तित्थंमि न उण तदभावे।
विगएऽणुप्पन्ने वा जाइसरणाइएहिंतो ॥ ४ ।

पर्यायद्वारे-पर्यायो द्विधा-गृहस्थपर्यायो यतिपर्यायश्च, एकैकोऽपि द्विधा-जघन्यत उत्कृष्टश्च, तत्र गृहस्थपर्यायो जघन्यत एकोनत्रिंशद् वर्षाणि, यतिपर्यायो विंशतिः, द्वावपि च उत्कर्षतो देशोनपूर्वकोटिप्रमाणौ, उक्तं च-

॥१॥ "एयस्स एस नेओ गिहिपज्जाओ जहन्निगुणतीसा।
जइपज्जाओ वीसा दोसुवि उक्कोस देसूणा ॥ ५ ।

आगमद्वारे-अपूर्वमागमं स नाधीते, यस्मात् तं कल्पमधिकृत्य प्रगृहीतोचितयोगाराधनत एव स कृतकृत्यतां भजते, पर्वाधीतं तु विस्रतसिकाक्षयनिमित्तं नित्यमेवैकाग्रमनाः सम्यक् प्रायेणानुस्मरति, आह च-

॥१॥ "अप्पुव्वं नाहिज्जइ आगममेसो पडुच्च तं कप्पं।
जमुचियपगहिअजोगाराहणओ चेव कयकिच्चो ॥
॥२॥ पुव्वाहीयं तु तयं पायमनुसरइ निच्चमेवेस।
एगग्गमणो सम्मं विस्सोयसिगाइखयहेऊ ॥ ६ ।

वेदद्वारे-प्रवृत्तिकाले वेदतः पुरुष वेदो वा भवेत् नपुंसकवेदो वा, न स्त्रीवेदः, स्त्रियाः

परिहारविशुद्धिकल्पप्रतिपत्त्यसंभवात्, अतीतनयमधिकृत्य पुनः पूर्वप्रतिपन्नश्चिन्त्यमानः सवेदो वा भवेत् अवेदो वा, तत्र सवेदः श्रेणिप्रतिपत्त्यभावे उपशमश्रेणिप्रतिपत्तौ वा, क्षपकश्रेणिप्रतिपत्तौ त्ववेद इति, उक्तं च–

॥ १ ॥ "वेदो पवित्तिकाले इत्थीवज्जो उ होइ एगयरो।
पुव्वपडिवन्नगो पुण होज्ज सवेदो अवेदो वा ॥ ७।"

कल्पद्वारे–स्थितकल्पे एवायं नास्थितकल्पे, "ठियकप्पंमि य नियमा" इति वचनात्, तत्राचेलक्यादिषु दशस्वपि स्थानेषु ये स्थिताः साधवः तत्कल्पः स्थितकल्प उच्यते, ये पुनश्चतुर्षु शय्यातरपिण्डादिष्वस्थितेषु कल्पेषु स्थिताः शेषेषु चाचेलक्यादिषु षट्स्वस्थिताः तत्कल्पोऽस्थितकल्पः, उक्तं च–

॥ १ ॥ "ठियठियओ य कप्पो आचेलक्काइएसु ठाणेसु।
सव्वेसु ठिया पढमो चउ ठिय छसु अट्ठिया बीओ ॥"

–आचेलक्यादीनि च दश स्थानान्यमूनि–

॥ १ ॥ "आचेलक्कुद्देसियसेज्जायररायपिंडकिइकम्मे।
वयजेट्ठपडिक्कमणे मासं पज्जोसवणकप्पो ॥"

–चत्वारश्चावस्थिताः कल्पा इमे–

॥ १ ॥ "सेज्जायरपिंडम्मी चाउज्जामे य पुरिसजेट्ठे य।
किइकम्मस्स य करणे चत्तारि अवट्ठिया कप्पा ॥ ८।"

लिङ्गद्वारे–नियमतो द्विविधेऽपि लिङ्गे भवति, तद्यथा–द्रव्यलिङ्गे भावलिङ्गे च, एकेनापि विना विवक्षितकल्पोचितसामाचार्ययोगात् ९।

लेश्याद्वारे–तेजःप्रभृतिकासूत्तरासु तिसृषु विशुद्धासु लेश्यासु परिहारविशुद्धिकं कल्पं प्रतिपद्यते, पूर्वप्रतिपन्नः पुनः सर्वास्वपि कथञ्चिद् भवति, तत्रापीतरास्वविशुद्धलेश्यासु नात्यन्तसंक्लिष्टासु वर्तते, तथाभूतासु वर्तमानो(ऽपि)न प्रभूतकालमवतिष्ठते, किंतु स्तोकं, यतः स्ववीर्यवशात् झटित्येव ताभ्यो व्यावर्तते, अथ प्रथमत एव कस्मात् प्रवर्तते?, उच्यते, कर्मवशात्, उक्तं च–

॥ १ ॥ "लेसासु विसुद्धासुं पडिवज्जइ तीसु न उण सेसासु।
पुव्वपडिवन्नओ पुन होज्जा सव्वासुवि कहंचि ॥
॥ २ ॥ नऽच्चंतसंकिलिट्ठासु थेवं कालं च हंदि इयरासु।
चित्ता कम्माण गई तहा विवरीयं फलं देइ ॥" १०।

ध्यानद्वारे–धर्मध्यानेन प्रवर्धमानेन परिहारविशुद्धिकं कल्पं प्रतिपद्यते, पूर्वप्रतिपन्नः पुनरार्त्तरौद्रयोरपि भवति, केवलं प्रायेण निरनुबन्धः, आह च–

॥ १ ॥ "झाणंमिवि धम्मेणं पडिवज्जइ सो पवड्ढमाणेणं।
इयरेसुवि झाणेसुं पुव्वपवन्नो न पडिसिद्धो ॥
॥ २ ॥ एवं च झाणजोगे उद्दामे तिव्वकम्मपरिणामा।
रोहऽट्टेसुवि भावो इमस्स पायं निरनुबन्धो ॥" ११।

गणनाद्वारे–जघन्यतः त्रयोगणाः प्रतिपद्यन्ते, उत्कर्षतस्तु शतसंख्याः, पूर्वप्रतिपन्नाजघन्यत

उत्कृष्टतो वा शतशः, पुरुषगणनया जघन्यतः प्रपिद्यमानाः सप्तविंशतिः उत्कर्षतः सहस्रं, पूर्वप्रतिपन्नकाः पुनर्जघन्यतः शतशः उत्कर्षतः सहस्रशः, आह च--

॥१॥ "गणओ तिन्नेव गणा जहन्न पडिवत्ति सहस उक्कोसा।
उक्कोस जहन्नेणं सयसोऽथिय पुव्वपडिवन्ना ॥
॥२॥ सत्तावीस जहन्ना सहस्समुक्कोसओ य पडिवत्ती।
सयसो सहस्ससो वा पडिवन्न जहन्नउक्कोसा ॥"

अन्यच्च यदा पूर्वप्रतिपन्नः कल्पमध्यादेको निर्गच्छति अन्यः प्रविशति तदोनप्रक्षेपे प्रतिपत्तौ कदाचिदेकोऽपि भवति पृथक्त्वं वा पूर्वप्रतिपन्नोऽप्येवं भजनया कदाचिदेकः प्राप्यते पृथक्त्वं वा, उक्तं च-

॥१॥ "पडिवज्जमाणा भयणाए होज्ज एक्कोऽवि ऊणपक्खेवे।
पुव्वपडिवन्नयावि य भइआ एक्को पुहुत्तं वा ॥" १२।

अभिग्रहद्वारे-अभिग्रहाश्चतुर्विधाः, तद्यथा--द्रव्याभिग्रहाः क्षेत्राभिग्रहाः कालाभिग्रहाः भावाभिग्रहाश्च, एते चान्यत्र चर्चिता इति न भूयश्चर्च्यन्ते, तत्र परिहानविशुद्धिकस्यैतेऽभिग्रहा न भवन्ति, यस्मादेतस्य कल्प एव यथोदितरूपोऽभिग्रहो वर्तते, उक्तं च -

॥१॥ "दव्वाईअभिग्गह विचित्तरूवा न होंति पुण केइ।
एअस्स जीअकप्पो कप्पोच्चियऽभिग्गहो जेणं ॥
॥२॥ एयंमि गोयराई निच्चा नियमेण निरववादा य।
तप्पालणं चिय परं एअस्स विसुद्धिठाणं तु ॥" १३।

प्रव्रज्याद्वारे-नासावन्यं प्रव्रजयति, कल्पस्थितिरेषेतिकृत्वा, आह च-"पव्वावेइ न एसो अन्नं कप्पट्ठिइत्ति काउणं" इति, उपदेशं पुनर्यथवक्ति प्रयच्छति १४। मुण्डापनद्वारेऽपि नासावन्यं मुण्डयति, अथ प्रव्रज्यानन्तरं नियमतो मुण्डनमिति प्रव्रज्या- ग्रहणेनैव तद् गृहीतमिति किमर्थं पृथग्द्वारं ?, तयुक्तं, प्रव्रज्याद्वारे निश्चमतो मुण्डनस्यासंभवात्, अयोग्यस्य कथञ्चिद्दत्तायामपि प्रव्रज्यायां पुनरयोग्यतापरिज्ञाने मुण्डनायोगात्, अतः पृथगिदं द्वारमिति १५।

प्रायश्चित्तविधिर्दृष्टः- मनसाऽपि सूक्ष्ममप्यतिचारमापन्नस्य नियमतश्चतुर्गुरुकं प्रायश्चित्तमस्य, यत एष कल्प एकाग्रताप्रधानः, ततस्तद्भङ्गे गुरुतरो दोष इति १६।

कारणद्वारे-तथा कारणं नामालम्बनं तत्पुनः सुपरिशुद्धं ज्ञानादिकं तच्चास्य न विद्यते येन तदाश्रित्यापवादसेविता स्यात्, एष हि सर्वत्र निरपेक्षश्चः क्लिष्टकर्मक्षयनिमित्तं प्रारब्धमेव स्वं कल्पं यथाक्तविधिना समापयन् महात्मा वर्तते, उक्तं च-

॥१॥ "कारणमलंबणमो तं पुण नाणाइअं सुपरिसुद्धं।
एअस्स तं न विज्जइ उचियं तवसाहणो पायं ॥
॥२॥ सव्वकत्थ निरवयक्खो आढत्तं चिय दढं समाणंतो।
वहइ एस महप्पाविलिचइकम्मक्खयनिमित्तं ॥" १७।

निष्प्रतिकर्मताद्वारे-एष महात्मा निष्प्रतिकर्मशरीरः अक्षिमलादिकमपि सदाचिन्नापनयति, न च प्राणान्तिकेऽपि समापतिते व्यसने द्वितीयं पदं सेवते, उक्तं च-

॥१॥ "निप्पडिकम्मसरीरो अच्छिमलाईवि नावणेइ सया ।
पायंतिएऽवि य महावराणंमि न वहए वीए ॥
॥२॥ अप्पबहुत्तालोयणविसयातीओ उड्ढं एसत्ति ।
अहवा सुहभावाओ बहुगं एयं चिय इमस्स ॥" १८ ।

भिक्षाद्वारे--भिक्षा विहारक्रमश्च तृतीयस्यां पौरुष्यां भवति, शेषासु च पौरुषीषु कायोत्सर्गः, निद्राऽपि चास्याल्पा द्रष्टव्या, यदि पुनः कथमपि जङ्घाबलमस्य पक्षीणं भवति तथाऽप्येषोऽविहरन्नपि महाभागोन द्वितीयपदमापद्यते, किन्तु तत्रैव यथाकल्पमात्मीयं योगं विदधतीति, उक्तं च–

॥१॥ "तइयाए पोरसीए भिक्खाकालो विहारकालो उ ।
सेसासुं उस्सग्गो पायं अप्पा य निद्दत्ति ॥
॥२॥ जंघाबलंमि खीणे अविहरमाणोऽवि न परमावज्जे ।
तत्थेव अहाकप्पं कुणइ उ जोगं महाभागो ॥" १९ ।

(ब्रन्थेऽष्टसप्त वा २०) एते च परिहारविशुद्धिका द्विविधाः, तद्यथा–इत्वरा यावत्कथिकाश्च, तत्र ये कल्पसमाप्तयनन्तरं कल्पं गच्छं वा समुपयास्यन्ति ते इत्वराः, ये पुनः कल्पसमाप्तयनन्तरमव्यवधानेन जिनकल्पं प्रतिपत्स्यन्ते ते यावत्कथिकाः, उक्तं च–"इत्तरिय थेरकप्पे जिनकप्पे आवकियत्ति" अत्र स्थविरकल्पग्रहणमुपलक्षणं, स्वकल्पे चेति द्रष्टव्यं, तत्रेत्वराणां कल्पप्रभावाद् देवमनुष्यतैर्यग्योनिकृता उपसर्गाः सघोघातिन आतङ्का अतीवाविषह्याश्च वेदना न प्रादुष्यन्ति, यावत्कथिकानां संभवेयुरपि, ते हि जिनकल्पं प्रतिपत्स्यमाना जिनकल्पभावमनुविदधति, जिनकल्पिकानां चोपसर्गादयः संभवन्तीति, उक्तं च– "इत्तरियाणुवसग्गा आतंका वेयणा य न हवन्ति । आवकहियाण भइआ०" इति ।

तथा सूक्ष्मो लोभाशावशेषाःसंपरायः– कषायोदयो यत्र तत् सूक्ष्मसंपरायं, तच्च द्विधा-विशुध्यमानकं संक्लिश्यमानकं च, तत्र विशुध्यमानकं क्षपकश्रेणिमिपशमश्रेणिं वा समारोहतः, संक्लिश्यमानकं तूपशमश्रेणितः प्रच्यवमानस्य ।

'अथाख्यत'मिति अथसब्दो यथार्थे आङ् अभिविधौ याथातथ्येनाभिविधिना वा यत्ख्यातं–कथितं अकषायं चारित्रमिति तदथाख्यातं, उक्तं च–

॥१॥ "अहसद्दो(उ) जहत्थे आङोऽभिविहीए कहियमक्खायं ।
चरणमकसायमुइयं तमहक्खायं जहक्खायं ॥"

'यथाख्यात'मिति द्वितीयं नाम, तस्यायमन्वर्थः–यथा सर्वस्मिन् लोके ख्यातं–प्रसिद्धं अकषायं भवति चारित्रमिति तथैव यद् तद् यथाख्यातं, तच्च द्विधा–छाद्मस्थिकं कैवलिकं च, तत्र छाद्मस्थिकमुपशान्तमोहगुणस्थानके क्षीणमोहगुणस्थानके वा कैवलिकं सयोगिकेवलिभवमयोगिकेवलिभवं च । 'सेत्तं' इत्यादि उपसंहारकदम्बसूत्रं सुगमं ।

तदेवमुक्ता मनुष्याः, सम्प्रति देवप्रतिपादनार्थमाह–

मू. (१९१) से किं तं देवा ?, देवा चउव्विहा पं०, तं०–भवनवासी वाणमंतरा जोइसिआ वेमाणिआ । से किं तं भवनवासी ?, भवनवासी दसविहा पं०, तं०–असुरकुमारा नागकुमारा सुवन्न- कुमारा विज्जुकुमारा अग्गिकुमारा दीवकुमारा उदहिकुमारा दिसाकुमारा वाउकुमारा

थणियकुमारा, ते समासओ दुविहा पं०, तं०-पज्जत्तगा य अपज्जत्तगा य, सेत्तं भवनवासी।

से किं तं वाणमंतरा?, वाणमंतरा अट्ठविहा पं०, तं०-किन्नरा किंपुरिसा महोरगा गंधव्वा जक्खा रक्खसा भूया पिसा वा, ते समासओ दुविहा पं०, तं०-पज्जत्तगा य अपज्जत्तया य, सेत्तं वाणमंतरा। से किं तं जोइसिया?, जोइसिया पंचविहा पं०, तं०-चंदा सूरा गहा नक्खत्ता तारा, ते समासओ दुविहा पं०, तं०-पज्जत्तगा य अपज्जत्तगा य, सेत्तं जोइसिया॥

से किं तं वेमाणिया?, वेमाणिआ दुविहा पं०, तं०-कप्पोवगा य कप्पाईया य, से किं तं कप्पोवगा?, कप्पोवगा बारसविहा पं०, तं०-सोहम्मा ईसाणा सणंकुमारा माहिंदा बंभलोया लंतया महासुक्का सहस्सारा आणया पाणया आरणा अच्चुया, ते समासओ दुविहा प० तं०-पज्जत्तगा य अपज्जत्तगा य, से तं कप्पोवगा। से किं तं कप्पाईया? दुविहा पं०, तं०-गेविज्जगा य अनुत्तरोववाइया य, से किं तं गेविज्जगा?, गेविज्जगा नवविहा पं०, तं०-हिट्ठिमहिट्ठिमगेविज्जगा हिट्ठिममज्झिमगेविज्जगा हिट्ठिमउवरिमगेविज्जगा मज्झिमहेट्ठिमगेविज्जगा मज्झिममज्झिमगेविज्जगा मज्झिमउवरिमगेविज्जगा उवरिमहेट्ठिमगेविज्जगा उवरिममज्झिमगेविज्जगा उवरिमउवरिमगेविज्जगा, ते समासओ दुविहा पं०, तं०-पज्जत्तगा य अपज्जत्तगा य, सेत्तं गेविज्जगा,।

से किं तं अनुत्तरोववाइया?, अनुत्तरोववाइया पंचविहा पं०, तं०-विजया वेजयंता जयंता अपराजिता सव्वट्ठसिद्धा, ते समासओ दुविहा पं०, तं०-पज्जत्तगा य अपज्जत्तगा य, सेत्तं अनुत्तरोववाइआ, सेत्तं कप्पाईया, सेत्तं वेमाणिआ, सेत्तं देवा, सेत्तं पंचिंदिया, सेत्तं संसारसमावन्नजीवपन्नवणा, से तं जीवपन्नवणा, सेत्तं पन्न०॥ पन्नवणाए भगवईए पढमपयं समत्तं।

वृ. 'से किं तं' इत्यादि, अथ के ते देवाः?, सूरिराह-देवाश्चतुर्विधाः प्रज्ञप्ताः तद्यथा-भवनवासिनो व्यन्तरा ज्योतिष्का वैमानिकाः, तत्र भवनेषु वसन्तीत्येवंशीला भवनवासिनः, एतद् बाहुल्यतो नागकुमाराद्यपेक्षया द्रष्टव्यं, ते हि प्रायो भवनेषु वसन्ति कदाचिदावासेषु, असुरकुमारास्तु प्राचुर्येणावासेसु कदाचिद् भवनेषु, अथ भवनानामावासानां च कः प्रतिविशेषः, उच्यते, भवनानि बहिर्वृत्तान्यन्तः समचतुरस्राणि अधः पुष्करकर्णिकासंस्थानानि, आवासाः कायमानस्थानीया महामण्डपा विविधमणिरत्नप्रदीपप्रभासितसकलदिक्चक्रवाला इति। अन्तरं नामावकाशः, तच्चेहाश्रयरूपं द्रष्टव्यं, विविधं भवननगरावासरूपमन्तरं येषां ते व्यन्तराः।

तत्र भवनानि रत्नप्रभायाः प्रथमे रत्नकाण्डे उपर्यधश्च प्रत्येकं योजनशतमपहाय शेषे अष्टयोजनशतप्रमाणे मध्यभागे भवन्ति, नगराण्यपि तिर्यग्लोके, तत्र तिर्यग्लोके यथा जम्बूद्वीपद्वाराधिपतेर्विजयदेवस्यान्यस्मिन् जम्बूद्वीपे द्वादशयोजनसहस्रप्रमाणा नगरी, आवासाः त्रिष्वपि लोकेषु, तत्रोर्ध्वलोके पण्डकवनादाविति।

अथवा विगतमन्तरं मनुष्येभ्यो येषां ते व्यन्तराः तथाहि-मनुष्यानपि चक्रवर्तिवासुदेवप्रभृतीन् भृत्यवदुपचरन्त केचिद् व्यन्तरा इति मनुष्येभ्यो विगतान्तराः, यदि वा विविधमन्तरं-शैलान्तरं कन्दरान्तरं वनान्तरं वा आश्रयरूपं येषां ते व्यन्तराः, प्राकृतत्वाच्च सूत्रे 'वाणमन्तरा' इति पाठः, यदिवा 'वानमन्तराः' इति पदसंस्कारः, तत्रेयं व्युत्पत्तिः-वनानामन्तराणि वनान्तराणि तेषु भवाः वानमन्तराः, पृषोदरादित्वाद् उभयपदान्तरालवर्तिमकारागमः,

तथा द्योतयन्ति-प्रकाशयन्ति जगदिति ज्योतींषिविमानानि, औणादिकी शब्दव्युत्पत्तिः,तेषु

भवा ज्योतिष्काः "अध्यात्मादिभ्यः" इति इकण्, तत "इवर्णोवर्णदोसिसुसः" इति इकण् आदेरिकारस्य लोपः, अनभिधानाद्य वृध्यभावः, यदिवा द्योतयन्ति–शिरोमुकुटोपगूहिभिः प्रभामण्डलकल्पैः सूर्यादिमण्डलैः प्रकाशयन्तीति ज्योतिषो–देवाः सूर्यादयः, तथाहि–सूर्यस्य सूर्याकारं मुकुटाग्रभागे चिह्नं चन्द्रस्य चन्द्राकारं नक्षत्रस्य नक्षत्राकारं ग्रहस्य ग्रहाकारं तारकस्य तारकाकारं तैः प्रकाशयन्तीति, आह च तत्त्वार्थभाष्यकृत्–"द्योतवन्तीति ज्योतींषि–विमानानि तेषु भवा ज्योतिष्काः, यदिवा ज्योतिषो–देवाः ज्योतिष एव ज्योतिष्काः, मुकुटैः शिरोमुकुटोपगूहिभिः प्रभामण्डलैरुज्ज्वलैः सूर्यचन्द्रग्रहनक्षत्रतारकाणां मण्डलैर्यथास्वं चिह्नैर्विराजमाना द्युतिमन्तो ज्योतिष्का भवन्ती"ति ।

तथा विविधं मान्यन्ते–उपभुज्यन्ते पुण्यवद्भिर्जीवैरिति विमानानि तेषु भवा वैमानिकाः

सम्प्रति एतेषामेव क्रमेण भेदानभिधित्सुराह–'से किं तं भवणवासी' इत्यादि, असुराश्च ते कुमाराश्च असुरकुमाराः, एवं नागकुमारा इत्यादयपि भावनीयम्, अथ कस्मादेते कुमारा इति व्यपदिश्यन्ते ?, उच्यते, कुमारवद्येष्टनात्, तथाहि–कुमारा इवैते सुकुमारा मृदुमधुरललितगतयः शृङ्गाराभिप्रायकृतविशिष्टविशिष्टतरोत्तररूपक्रियाः कुमारवद्योद्धतरूपवेषभाषाभरणप्रहरणावरणयानवाहनाः कुमारवद्योल्बणरागाः क्रीडनपराश्च ततः कुमारा इव कुमारा इति ॥

'किंनरा' इत्यादि किन्नरा दशविधाः, तद्यथा–किन्नराः किंपुरुषाः किंपुरुषोत्तमाः किंनरोत्तमाः हृदयङ्गमा रूपशालिनः अनिन्दिताः मनोरमा रतिप्रिया रतिश्रेष्ठाः । किंपुरुषा दशविधाः, तद्यथा–पुरुषाः सत्पुरुषा महापुरुषाः पुरुषवृषभाः पुरुषोत्तमा अतिपुरुषा महादेवा मरुतः मेरुप्रभाः यशस्वन्तः । महोरगा दशविधाः, तद्यथा–भुजगा भोगशालिनः महाकाया अतिकायाः स्कन्धशालिनो मनोरमा महावेगा महे(हा) यक्षा मेरुकान्ता भास्वन्तः । गन्धर्वा द्वादशविधाः, हाहाः हूहूः तुम्बरवः नारदाः ऋषिवादिका भूतिवादिकाः कादम्बा महाकादम्बा रैवताः विश्वावसवः गीतरतयः गीतयशसः

यक्षास्त्रयोदशविधाः, तद्यथा–पूर्णभद्रा माणिभद्रा श्वेतभद्रा हरितभद्राः सुमनोभद्रा व्यतिपातिकभद्राः सुभद्राः सर्वतोभद्रा मनुष्ययक्षा वनाधिपतयः वनाहारा रूपयक्षा यक्षोत्तमाः । राक्षसाः सप्तविधाः, तद्यथा–भीमा महाभीमा विघ्ना विनायका जलराक्षसा राक्षसराक्षसा ब्रह्मराक्षसाः भूता नवविधाः, तद्यथा–सुरूपाः प्रतिरूपा अतिरूपा भूतोत्तमाः स्कन्दो महास्कन्दा महावेगाः प्रतिच्छन्ना आकाशगाः । पिशाचाः षोडशविधाः, तद्यथा–कूष्माण्डाः पटकाः सुजोषा आह्निकाः कौला महा-कालाः चोक्षा अचोक्षाः तालपिशाचा मुखरपिशाचा अधस्तारका देहा विदेहा महादेहाः तूष्णीका वनपिशाचा इति । 'कप्पोवगा कप्पाईय'त्ति कल्पः–आचारः स चेह इन्द्रसामानिकत्रायस्त्रिंशादिव्यवहाररूपः तमुपगाः–प्राप्ताः कल्पोपगाः सौधर्मेशानादिदेवलोकनिवासिनः, यथोक्तरूपं कल्पमतीताः– अतिक्रान्ताः कल्पातीताः–अधस्तनाधस्तनग्रैवेयकादिनिवासिनः, ते हि सर्वेऽप्यहमिन्द्राः, ततो भवन्ति कल्पातीताः । कल्पोपगान् दर्शयति–'सोहम्मा ईसाणा' इत्यादि, सौधर्मदेवलोकनिवासिनः सौधर्माः ईशानदेवलोकनिवासिन ईशानाः एवं सर्वत्रापि भावनीयं, भवति च तात्स्थ्यात् तद्व्यपदेशः, यथा 'पञ्चालदेशनिवासिनः पञ्चाला इति ।'

पदं – १ – समाप्तम्

मुनि दीपरत्न सागरेण संशोधिता सम्पादिता प्रज्ञापना उपाङ्ग सूत्रे
प्रथम पदस्य मलयगिरि (आचार्येण) विरचिता टीका परिसमाप्ता ।

पदं – २ – "स्थानं"

वृ. तदेवं व्याख्यातंप्रथमपदं, सम्प्रति द्वितीयं पदमारभ्यते, तस्य चायमभिसंबन्धः–प्रथमपदे पृथ्वीकायादयः प्ररूपिताः, इह तु तेषामेव स्थानादि प्ररूप्यते, तत्र चेदमादिसूत्रम्–

मू. (१९२) *कहि णं भंते ! बादरपुढवीकाइयाणं पज्जत्तगाणं ठाणा प० ?, गोयमा ! सट्ठाणेणं अट्ठसु, तं०–रयणप्पभाए सक्करप्पभाए वालुयप्पभाए पंकप्पभाए धूमप्पभाए तमप्पभाए तमतमप्पभाए ईसीप्पब्भाराए, अहोलोए पायालेसु भवणेसु भवणपत्थडेसु निरएसु निरयावलियासु निरयत्थडेसु, उड्ढलोए कप्पेसु विमाणेसु विमाणवलियासु विमाणपत्थडेसु, तिरियलोए टंकेसु कूडेसु सेलेसु सिहरीसु पब्भारेसु विजएसु वक्खारेसु वासेसु वासहरपव्वएसु वेलासु वेइयासु दारेसु तोरणेसु दीवेसु समुद्देसु, एत्थ णं बायरपुढवीकाइयाणं पज्जत्तगाणं ठाणा प०, उववाएणं लोयस्स असंखेज्जभागे समुग्घायेणं लोयस्स, असंखेज्जभागे सट्ठाणेणं लोगस्स असंखेज्जभागे।*

कहि णं भंते ! बादरपुढवीकाइयाणं अपज्जत्तगाणं ठाणा पं० ?, गोयमा ! जत्थेव बादरपुढवीकाइयाणं पज्जत्तगाणं ठाणा पन्नत्ता तत्थेव बादरपुढवीकाइयाणं अपज्जत्तगाणं ठाणा प०, उववाएणं सव्वलोए समुग्घाएणं सव्वलोए सट्ठाणेणं लोयस्स असंखेज्जइभागे। कहि णं भंते ! सुहुमपुढवीकाइयाणं पज्जत्तगाणं अपज्जत्तगाण य ठाणा प० ?, गोयमा ! सुहुमपुढवीकाइया जे पज्जत्तगा जे अपज्जत्तगा ते सव्वे एगविहा अविसेसाअनाणत्ता सव्वलोयपरियावन्नगा प० समणाउसो

कहि णं भंते ! बादरआउकाइयाणं पज्जत्तगाणं ठाणा प० ?, गोयमा ! सट्ठाणेणं सत्तसु घनोदहीसु सत्तसु घनोदहिवलयेसु अहोलोए पायालेसु भवणेसु भवणपत्थडेसु उड्ढलोए कप्पेसु विमाणेसु विमाणावलियासु विमाणपत्थडेसु तिरियलोए अगडेसु तलायेसु नदीसु दहेसु वावीसु पुक्खरिणीसु दीहियासु गुंजालियासु सरेसु सरपंतियासु सरसरपंतियासु बिलेसु बिलपंतियासु उज्झरेसु निज्झरेसु चिल्ललएसु पल्ललएसु वप्पणेसु दीवेसु समुद्देसु सव्वेसु चेव जलासएसु जलट्ठाणेसु एत्थ णं बादरआउकाइयाणं पज्जत्तगाणं ठाणा पं०, उववाएणं लोयस्स असंखेज्जइभागे समुग्घायेणं लोयस्स असंखेज्जइभागे सट्ठाणेणं लोयस्स असंखेज्जइभागे।

कहि णं भंते ! बादरआउकाइयाणं अपज्जत्तगाणं ठाणा पं० ?, गोयमा ! जत्थेव बादरआउकाइयाणं पज्जत्तगाणं ठाणा प० तत्थेव बादरआउकाइयाणं अपज्जत्तगाणं ठाणा प० उववाएणं सव्वलोए समुग्घायेणं सव्वलोए सट्ठाणेणं लोयस्स असंखेज्जइभागे।

कहि णं भंते ! सुहुमआउकाइयाणं पज्जत्तगाणं अपज्जत्तगाणं ठाणा प० ?, गोयमा ! सुहुमआउकाइया जे पज्जत्तगा जे अपज्जत्तगा ते सव्वे एगविहा अविसेसा अनाणत्ता सव्वलोयपरियावन्नगा प० समणाउसो ! ।

कहि णं भंते ! बायरतेउकाइयाणं पज्जत्तगाणं ठाणा प०, गोयमा ! सट्ठाणेणं अंतोमणुस्सखेत्ते अड्ढाइज्जेसु दीवसमुद्देसु निव्वाघायेणं पन्नरससु कम्मभूमीसु वाघायं पडुच्च पंचसु महाविदेहेसु एत्थ णं बादरतेउकाइयाणं पज्जत्तगाणं ठाणा प० उववाएणं लोयस्स असंखेज्जइभागे समुग्घाएणं लोगस्स असंखेज्जइभागे सट्ठाणेणं लोयस्स असंखेज्जइभागे।

कहि णं भंते ! बायरतेउकाइयाणं अपज्जत्तगाणं ठाणा पं०, गोयमा ! जत्थेव बायरतेउकाइयाणं पज्जत्तगाणं ठाणा तत्थेव बायरतेउकाइयाणं अपज्जत्तगाणं ठाणा पं०, उववाएणं लोयस्स दोसु उड्ढकवाडेसु तिरियलोयतट्टे य समुग्घाएणं सव्वलोए सट्ठाणेणं लोयस्स असंखेज्जइभागे कहि णं भंते ! सुहुमतेउकाइयाणं पज्जत्तगाण य अपज्जत्तगाण य ठाणा प० ?, गोयमा ! सुहुमतेउकाइआ जे पज्जत्तगा जे अपज्जत्तगा ते सव्वे एगविहा अविसेसा अनाणत्ता सव्वलोयपरियावन्नगा प० समणाउसो ! !

वृ. 'कहिं'ति कस्मिन्, णंशब्दो वाक्यालङ्कारे, भदन्तेति परमगुर्वामन्त्रणे, बादरपृथ्वीकायिकानां पर्याप्तानां स्थानानि–स्वस्थानादीनि 'प्रज्ञप्तानि ?' प्ररूपितानि, एवं गौतमस्वामिना प्रश्ने कृते भगवानाह वर्धमानस्वामी–'गोयमा ! सट्ठाणेणं' इत्यादि,

ननु गौतमोऽपि भगवानुपचितकुशलमूलो गणधरः तीर्थंकरभाषितमातृकापदश्रवणमात्रावाप्तप्रकृष्टश्रुतज्ञानावरणक्षयोपशमश्चतुर्दशपूर्ववित् सर्वाक्षरसन्निपातीति विवक्षितार्थप्रतिज्ञानसमन्वित एव ततः किमर्थं पृच्छति ?, न हि चतुर्दशपूर्ववित्सर्वोत्कृष्टश्रुतलब्धिसमन्वितस्य किञ्चिदप्रज्ञापनीयमविदितमस्ति, यत उक्तम्–

॥ १ ॥ "संखाईए वि भवे साहइ जं वा परो उ पुच्छेज्जा ।
न य णं अणाइसेसी वियाणई एस छउमत्थो ।।"

सत्यमेतत्, केवलं जानन्नेव गौतमस्वामी भगवानन्यत्र विनेयेभ्यः प्रतिपाद्य तत्संप्रत्ययनिमित्तं विवक्षितमर्थं पृच्छति, यदिवा प्रायः सर्वत्र गणधरप्रश्नतीर्थंकरनिर्वचनरूपं सूत्रमतो भगवानार्यश्यामोऽपि इत्थमेव सूत्रं रचयति, अथवा संभवति तस्यापि गणभृतो गौतमस्वामिनोऽनाभोगः, छद्मस्थत्वात्, उक्तं च–

॥ १ ॥ "न हि नामानाभोगश्छद्मस्थस्येह कस्यचिद् नास्ति ।
ज्ञानावरणीयं हि ज्ञानावरणप्रकृति कर्म ।।"

ततो जातसंशयः सन् पृच्छतीति न कश्चिद् दोषः, 'गोयमा' इति लोकप्रथितमहाविशिष्टगोत्राभिधायकोऽयमामन्त्रणध्वनिः, हे गौतमगोत्रेति भावार्थः ।

'सट्ठाणेणं' इति स्वस्थानं यत्रासते बादरपृथ्वीकायिकाः पर्याप्ताः आसीनाश्च वर्णादिविभागेनादेष्टुं शक्यन्ते तत्स्वस्थानमिति भावः, स्वस्थानग्रहणमुपपातसमुद्घातस्थाननिवृत्त्यर्थं, तेन स्वस्थानेन स्वस्थानमङ्गीकृत्येति भावः । अष्टासु पृथ्वीषु सर्वत्र बादरपृथ्वीकायिकानां पर्याप्तानां स्थानानीति योगः,ता एव अष्टौ पृथ्वीनामग्राहमाह–'तंजहा' इत्यादि रत्नप्रभायां यावदष्टम्यामीषत्प्राग्भारायाम, तथाऽधोलोके पातालेषु पातालकलशेषुवलयामुखप्रभृतिषु भवनेषु–भवनपतिनिकायावासरूपेषु, भवन-प्रस्तटेषु–भवनभूमिकारूपेषु, इह भवनग्रहणेन भवनानामेव केवलानां ग्रहणं, भवनप्रस्तटग्रहणेन तु भवनानामपान्तरालस्यापि

तथा नरकेषु–प्रकीर्णकरूपेषु नरकावासेषु, नरकावलिकासु–आवलिकाव्यवस्थितेषु नरकावासेषु, नरकप्रस्तटेषु–नरकभूमिरूपेषु, अत्रापि नरकनरकावलिकाग्रहणेन केवला एव नरकावासाः परिगृह्यन्ते, नरकप्रस्तटग्रहणेन तु नरकापान्तरालमपि ।

ऊर्ध्वलोके कल्पेषु–सौधर्मिकादिकल्पेषु, अनेन द्वादशदेवलोकपरिग्रहः, विमानेषुप–

ग्रैवेयकसंबन्धिषु प्रकीर्णकरूपेषु, विमानावलिकासु-आवलिकाप्रविष्टेषु ग्रैवयकादिविमानेषु, विमानप्रस्तटेषु विमानभूमिकारूपेषु, अत्रापि प्रस्तटग्रहणं विमानापान्तरालभाविनामपि यथासंभवभाविनां बादरपर्याप्तपृथ्वीकायिकानांस्थानपरिग्रहार्थं, तथातिर्यग्लोके टङ्केषु०-छिन्नटङ्केषु कूटेषु-सिद्धायतनकूटप्रभृतिषु शैलेषु-शिखरहीनपर्वतेषु शिखरिषु-शिखरयुक्तेषु पर्वतेषु प्राग्भारेषु-ईषत्कुनेषु विजयेषु-कच्छादिषु वक्षस्कारेषु-विद्युत्प्रभादिषु पर्वतेषु वर्षेषु-भरतादिषु वर्षधरेषु-हिमवदादिपर्वतेषु वेलासु-समुद्रादिपानीयरमणभूमिषु वेदिकासु-जम्बूद्वीपजगत्यादिसंबन्धिनीषु द्वारेषु-विजयादिषु तोरणेषु-द्वारादिसंबन्धिषु, किं बहुना ?, सामस्त्येन सर्वेषु द्वीपेषसर्वेषु समुद्रेषु, 'एत्थ णं' इत्यादि, अत्रैतेषु स्थानेषु बादरपृथ्वीकायिकानां पर्याप्तानां स्थानानि प्रज्ञप्तानि मया अन्यैश्च तीर्थकृद्भिः, 'उववाएणं' इत्यादि उपपतनमुपपातः, बादरपृथ्वीकायिकानां पर्याप्तानां यदनन्तरमुक्तं स्थानं तदाश्रयाभिमुख्यमिति भावः, तेनोपपातेन, उपपातमङ्गीकृत्येति भावः, लोकस्य- चतुर्दशरज्वात्मकस्यासंख्येये भागे, अत्रैके व्याचक्षते-ऋजुसूत्रनयो विचित्रः ततो यदा परिस्थूरऋजुसूत्रनय-दर्शनेन बादरपृथ्वीकायिकाः पर्याप्ताश्चिन्त्यन्ते तदा ये स्वस्थानप्राप्ता आहारादिपर्याप्तिपरिसमाप्तया विशिष्टविपाकतो बादरपर्याप्तपृथ्वीकायिकायुर्वेदयन्ते ते एव द्रष्टव्याः, नापान्तरालगतावपि, तदानीं विपाकायुर्वेदनासंभवात्,

स्वस्थानं च तेषां रत्नप्रभादिकं समुदितमपि लोकस्यासंख्येयभागे वर्तते, तत उपपातेनापि लोकस्यासंख्येयभागता वेदितव्या, अन्ये त्वमिदधति-पर्याप्ता हि नाम बादरपृथ्वीकायिकाः सर्वस्तोकाः, ततस्तेऽपान्तरालगतावपि परिगृह्यमाणा लोकस्यासंख्येयभागेएवेति न कश्चिद्दोषः,तथा च समुद्घातेनापि लोकस्यासंख्येयभागे एव वक्ष्यन्ते, अन्यथा समुद्घातावस्थायामपि स्वस्थानातिरेकेण क्षेत्रान्तरवर्तित्वसंभवादसंख्येयभागवर्तिता नोपपद्यते इति, तत्त्वं पुनः केवलिनो विदन्ति विशिष्टश्रुतविदो वा।तथा 'समुग्घाएणं० इति समुद्घातेन-समुद्घातमधिकृत्य लोकस्यासंख्येयभागे, इयमत्र भावना-यदा बादरपर्याप्ताः पृथ्वीकायिकाः सोपक्रमायुषो निरुपक्रमायुषो वा त्रिभागाद्यवशेषायुषः पारभविकमायुर्बद्धा मारणान्तिकसमुद्घातेन समवहन्यन्ते तदा ते विक्षिप्तात्मप्रदेशदण्डा अपि लोकस्यासंख्येयतमे एव भागे वर्तन्ते, स्तोकत्वाद्, बादरपृथ्वीकायिकपर्याप्तायुश्चाद्याप्यक्षीणमिति पर्याप्तबादरपृथ्वीकायिका अपि लभ्यन्ते।

इह पूर्वं पृथ्व्यादिषु स्वस्थानमात्रमुक्तम्, इदानीं स्वस्थानेनानपि कियति लोकस्य भागे वर्तन्ते इति निरूपयति-'सट्ठाणेणं लोगस्स असंखिज्जे भागे' इति, स्वस्थानं रत्नप्रभादि, तच्च समुदितमपि लोकस्यासंख्येयभागवर्ति, तथाहि-रत्नप्रभा अशीतियोजनसहस्राधिकलक्षणप्रमाणपिण्डभावा, एवं शेषा अपि पृथ्व्यः स्वस्वघनभावेन वक्तव्याः पातालकलशा अपि योजनलक्षावगाहा नरकावासाः त्रिसहस्रयोजनोच्छ्रयाः विमानान्यपि द्वात्रिंशद्योजनशतबाहल्यानि ततः सर्वेषामपि परिमितभावात् समुदितानामप्यसंख्येयभागवर्तितैवेति।

बादरापर्याप्तपृथ्वीकायिकसूत्रे 'उववाएणं सव्वलोए समुग्घाएणं सव्वलोएइति, इहापर्याप्ता बादरपृथ्वीकायिका अपान्तरालगतावपि स्वस्थानेऽपि चापर्याप्तबादरपृथ्वीकायिकायुर्विशिष्टविपाकतो वेदयन्ततथा देवनैरयिकवर्जेभ्यः शेषसर्वकायेभ्यश्चोत्पद्यन्ते, उद्वृत्ता अपि च

देवनैरयिकवर्जेषु शेषेषु सर्वेष्वपि स्थानेषु गच्छन्ति, ततोऽपान्तरालगतावपि वर्तमाना अमी गृह्यन्ते, अतिप्रभूताश्च स्वभावतोऽपी (तोऽमी इ)त्युपपातेन समुद्घातेन (च) सर्वलोके वर्तन्ते।

अन्ये त्वभिदधति–स्वभावत एवामी बहव इति उपपातेन समुद्घातेन च सर्वलोकव्यापिनः, तत्रोपपातः केषांचिद् ऋजुगत्या केषांचिद् वक्रगत्या। तत्र ऋजुगतिः सुप्रतीता, वक्रस्थापना चैवम्, अत्र यदैव परथमं वक्रमेके संहरन्ति तदैवापरे तद्वक्रदेशमापूरयन्ति, एवं द्वितीयवक्रदेशसंहरणेऽपि वक्रोत्पत्तावपि प्रवाहतो निरन्तरमापूरणं भावनीयम्।

'सट्ठाणेणं लोगस्स असंखेज्जइभागे' इति यथा पर्याप्तानां भावितं तथाऽपर्याप्तानामपि भावनीयम्, तन्निश्रया तेषामुत्पादभावात्।

सूक्ष्मपृथिवीकायिकपर्याप्तापर्याप्तसूत्रे 'जे पज्जत्ता अपज्जत्ता ते सव्वे एगविहा अविसेसा अनाणत्ता सवलोलयपरियावन्नगा' इति सूक्ष्मपृथिवीकायिका ये पर्याप्ता ये चापर्याप्ताः ते सर्वेयेकविधाः–एकप्रकाराः, प्राक्कृतं स्वस्थानादिविचारमधिकृत्य भेदाभावात्, अविशेषा–विशेष-रहिताः, यथा पर्याप्तस्तथेतरेऽपीति भावः 'अनानात्वा' नानात्ववर्जिताः, देशभेदेनालक्षितनानात्वा इत्यर्थः, किमुक्तं भवति ?–एष्वाधारभूतेष्वाकाशप्रदेशेषु एके तेष्वेव इतरेऽपीति, सर्वलोकपर्यापन्नाः–सर्वलोकव्यापिनः, उपपातसमुद्घातस्वस्थानैः प्रज्ञप्ताः मया अन्यैश्च ऋषभादिभिस्तीर्थकृद्भिः, अनेन आगमस्य कथंचिद् नित्यत्वमावेदितम्, हे श्रमण! हे आयुष्मन् आमन्त्रणमिदं भगवत्प्रयुक्तं गौतमस्य।

एवमप्कायिकसूत्राण्यपि बादरसूक्ष्मविषयाणि। नवरं–पर्याप्तबादराप्कायिकसूत्रे 'सत्तसु घनोदहिवलएसुत्ति' सप्त घनोदधिवलयानि स्वस्वपृथिवीपर्यन्तवेष्टकानि वलयाकाराणि। 'अहोलोए पायालेसुत्ति' पातालकलएसुत्ति' सप्त घनोदधिवलयानि स्वस्वपृथिवीपर्यन्तवेष्टकानि वलयाकाराणि 'अहोलोए पायालेसुत्ति' पातालकलशेषु वलयामुखभृतिषु, वलयामुखप्रभृतिषु, तेष्वपि द्वितीये त्रिभागे देशतः, तृतीये त्रिभागे सर्वाला जलभावात्। भवनेषु कल्पेषु विमानेषु च जलं वाप्यादिषु, विमानादीनि चात्र कल्पगतानि वेदितव्यानि, ग्रैवेयकादिषु वापीनामसंभवतो जला संभवात्। अवटाः कूपाः। तडागानि प्रतीतानि। नद्यो गङ्गासिन्धुप्रभृतयः। ह्रदाः पद्मह्रदादयः। वाप्यश्चतुरस्राकाराः। ता एव वृत्ताकाराः पुष्करिण्यः, यदिवा पुष्कराणि पद्मानि विद्यन्ते यासु ताः पुष्करिण्यः। दीर्घिका ऋजुलधनुषः ता एव वक्रा गुंजालिका। बहूनि केवलकेवलानि पुष्पावकीर्णानि सरांसीत्युच्यन्ते। तथा बहूनि सरांसि एकपङ्क्तया व्यवस्थितानि सरपङ्क्तिस्ता बह्वयः सरःपङ्क्तयः। तथा येषु सरःसु पङ्क्तया व्यवस्तितेषु कूपोदकं प्रणालिकया संचरति सा सरःसरःपङ्क्तिः, ता बह्वयः सरःसरःपङ्क्तयः। बिलानीव बिलानि स्वभावनिष्पन्ना जगत्यादिषु कूपिकास्तेषां पङ्क्तयो बिलपङ्क्तयः। उज्झरा गिरिष्वम्भसां प्रस्रवाः। ते एव सदावस्थायिनो निर्झराः। छिल्लराणि–अखाताः स्तोकजलाश्रयभूता भूप्रदेशा गिरिप्रदेशा वा। पल्वलानि अखातानि सरांसि। वप्राः

। किं बहुना ?, सर्वेष्वेव जलाशयेषु, एतदेव व्याचष्टे–जलस्थानेषु। शेषभावना प्राग्वत्,

अधुना बादरपर्याप्ततेजःकायिकस्थानानि पृच्छति–'कहि णं भंते! बादरतेउकाइयाणं' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–'गोयमा!' इत्यादि, गौतम! 'स्वस्थानेन' स्वस्थानमङ्गीकृत्य अन्तर्मनुष्यक्षेत्रे–मनुष्यक्षेत्रमध्ये इत्यर्थः, अर्द्धतृतीयं येषां ते अर्द्धतृतीयाः तत्रान्तर्मनुष्यक्षेत्रस्यार्द्ध

तृतीयं समुद्राणां न विद्यते इतीदं विशेषणं द्वीपानां द्रष्टव्यं, द्वीपाश्च समुद्रौ च द्वीपसमुद्रा स्तेषु 'निर्व्याघातेन' व्याघातस्याभावो निव्याघातं तेन निव्याघातेन "वा तृतीयायाः" इति पाक्षिकोऽमादेशाभावः, व्याघाताभावेनेत्यर्थः, 'पञ्चदशसु कर्मभूमिषु' पञ्चभरतपञ्चैरावतपञ्चमहाविदेहरूपासु 'व्याघातं प्रतीत्य' व्याघाते सतीति भावः पञ्चसु महाविदेहेषु, इयमत्र भावना-व्याघातो नाम अतिस्निग्धोऽतिरूक्षो वा कालः, तस्मिन् सत्यग्निव्यवच्छेदात्, ततो यदा पञ्चसु भरतेषु पञ्चस्वैरावतेषु सुषमसुषमासुषमासुषमदुष्षमा वा वर्तते तदाऽतिस्निग्धः कालः दुष्षमदुष्षमायां चातिरूक्ष इत्यस्ति व्यवच्छेदः तस्मिन् सति पञ्चसु महाविदेहेषु, शेषकालं पञ्चदशस्वपिकर्मभूमिषु,

'एत्थ णं' इत्यादि, अत्र-एतेषु स्थानेषु बादरतेजःकायिकानां स्थानानि प्रज्ञप्तानि, 'उववाएणं' इत्यादि, 'उपपातेन' यथोक्तस्थानप्राप्तयाऽऽभिमुख्येन, अपान्तरालगतावपीति भावः, विन्त्यमाना लोकस्यासंख्येये भागे, स्तोकत्वात्, समुद्घातेनेनापि चिन्त्यमाना लोकस्यासंख्येये भागे, मारणान्तिकसमुद्घातवशतो विक्षिप्तात्मप्रदेशदण्डानामपि स्तोकतया लोकासंख्येयभागमात्रव्यापित्वात्, स्वस्थानेन लोकस्यासंख्येयभागे, मनुष्यक्षेत्रस्य पञ्चत्वारिंशदयोजनलक्षप्रमाणायामविष्कम्भतया लोकासंख्येयभागमात्रत्वात्, ।

अपर्याप्तबादरतेजःकायिकस्थानानि पृच्छति-'कहि णं भंते !' इत्यादि प्रश्नसूत्रं गतार्थं, भगवानाह-'गोयमा !' इत्यादि, गौतम ! यत्रैव बादरतेजः-कायिकानां पर्याप्तानां स्थानानि तत्रैव बादरतेजःकायिकानामपर्याप्तानामपि स्थानानि प्रज्ञप्तानि, पर्याप्तनिश्रयैवापर्याप्तानामवस्थानात्, 'उववाएणं लोगस्स दोसु उड्ढकवाडेसु तरियलोयतट्टे य' इति, इहार्धतृतीयद्वीपसमुद्रनिः-सृते अर्द्धतृतीयद्वीपसमुद्रप्रमाणबाहल्ये पूर्वापरदिणोत्तरस्वयम्भूरमणपर्यन्ते ये कपाटे केवलिसमुद्घातकपाटवकत् ऊर्ध्वमपि लोकान्तं स्पृष्टे ते अधोऽपि च लोकान्तं स्पृष्टे ते ऊर्ध्वंकपाटे तयोः ऊर्द्धकपाटयोः, तथा 'तिरियलोयतट्टे य' इति, तट्टं-स्थालं तिर्यग्लोके तट्टमिव तिर्यग्लोकतट्टं तस्मिंश्च स्वयम्भूरमणसमुद्रवेदिकापर्यन्ते अष्टादशयोजनशतबाहल्ये, समस्ततिर्यग्लोके चेत्यर्थः,

उपपातेन बादरतेजः कायिकानामपर्याप्तानां स्थानानि प्रज्ञप्तानि, केचित् 'तिरियलोयतट्टे य' इत्येवं व्याचक्षते-तयोः-कपाटयोः स्थितः तिर्यग्लोकश्चासौ तत्स्थः, तयोरूर्ध्वंकपाटयोरन्तर्वर्तितिर्यग्लोक इत्यर्थः तस्मिंश्च, किमुक्तं भवति ?-द्वयोरूर्ध्वंकपाटयोर्यथोक्तस्वरूपयोस्तिर्यग्लोकेऽपि च तयोरेव कपाटयोरन्तर्गते नान्यत्र, शेषतिर्यग्लोककव्यवच्छेदपरमेतद् वाक्यं, न विधानपरं, विधानस्य कपाटग्रहणेनैव सिद्धत्वात्, तत्त्वं पुनः केवलिना विशिष्टश्रुतविदा वा गम्यं,

इयमत्र भावना-इह त्रिविधा बादरपर्याप्ततेजःकायिकाः, तद्यथा एकभविका बद्धायुषोऽभिमुखनामगोत्राश्च, तत्र ये एकस्माद् विवक्षिताद् भवादनन्तरं बादरापर्याप्ततेजःकायिकत्वेनोत्पत्स्यन्ते ते एकभविकाः, ये तु पूर्वभवत्रिभागादिसमयैर्बद्धबादरापर्याप्ततेजःकायिकनामायुष्कास्ते बद्धायुषः, ये पुनर्बादरापर्याप्ततेजःकायिकानुनामगोत्राणि पूर्वभवमोचनानन्तरं साक्षाद् वेदयन्ते तेऽभिमुखनामगोत्राः, तत्रैकभविका बद्धायुषश्च द्रव्यतो बादरापर्याप्ततेजःकायिका न भावतः, तदाऽऽयुर्नामगोत्रवेदनाभावात्, ततो न तैरिहाधिकारः, किन्तु अभिमुखनामगोत्रैः, तेषामेवोपपातस्य स्वस्थानप्राप्तयाभिमुख्यलक्षणस्य लभ्यमानत्वात्, तत्र यद्यपि ऋजुसूत्रनयदर्शनेन

बादरापर्याप्ततेजः कायिकायुर्नामगोत्रवेदनाद् यथोक्तकपाटद्वयतिर्यग्लोकबाह्यव्यवस्थिता अपि बादरापर्याप्ततेजःकायिकव्यपदेशं लभन्ते तथाप्यत्र व्यवहारनयदरअशनाभ्युपगमाद् ये स्वस्थानसमश्रेणिकपाटद्वयव्यवस्थिताः ये च स्वस्थानानुगते तिर्यग्लोके प्रविष्टास्ते एव बादरापर्याप्ततेजः-कायिका व्यपदिश्यन्ते न शेषाः कक्षाद्यन्तरालव्यवस्थिताः विष्कम्भबाहल्यात्,

तेन येऽद्यापि कपाटद्वयं न प्रविशन्ति नापि तिर्यग्लोकं ते किल पूर्वभवावस्था एवेति न गण्यन्ते, उक्तं च–

॥१॥ "पणयाललक्खपिहुला दुन्नि कवाडा य छद्दिसिं पुट्ठा।
लोगंते तेसिऽतो जे तेऊ ते उ घिप्पंति॥"

तत उक्तं–'उववाएणं दोसु उड्ढकवाडेसु तिरियलोयतट्ठे य' इति, तदेवमिदं सूत्रं व्यवहारनयप्रदर्शनेन व्याख्यातं, तथासंप्रदायात्, युक्तं चैतत् "विचित्रा सूत्राणां गतिः" इति वचनादिति

'समुग्घाएणं सव्वलोए' इति, इह द्वयोः कपाटयोर्यथोक्तस्वरूपयोर्यान्यपान्तरालानि तेषु ये सूक्ष्मपृथिवीकायिकादयो बादरापर्याप्ततेजःकायिकेषूत्पद्यमाना मारणान्तिकसमुद्घातेन समवहताः ते किलविष्कम्भबाहल्याभ्यां शरीरप्रमाणमात्रायामत उत्कर्षतो लोकान्तं यावदात्मप्रदेशान् विक्षिपन्ति, तथा चावगाहनासंस्थानपदे वक्ष्यते–

"पुढवीकाइअस्स णं भंते! मारणंतियसमुग्घाएणं समोहयस्स तेयासरीरस्स के महालिया सरीरोगाहणा प० ?, गोयमा! सरीरपमाणमेत्तविक्खंभबाहल्लेणं आयामेणं जहन्नेणं अंगुलस्स असंखेज्जइभागे उक्कोसेणं लोगंतो" इति, ततस्ते सूक्ष्मपृथिवीकायिकादय उत्पत्तिदेशं यावद् विक्षिप्तात्मप्रदेशदण्डा अपान्तरालगतौ वर्तमाना बादरापर्याप्ततेजःकायिकायुर्वेदनाद् लब्धबादरापर्याप्तेजःकायिकव्यपदेशाः समुद्घातगता एवापान्तराल गतौ वर्तमाना इति, समुद्घातगताश्च सकललोकमापूरयन्ति, उक्तं च–'समुद्घातेन सर्वलोके' इति, अन्ये त्वभिदधति–अतिबहवः खलु बादरा- पर्याप्ततेजःकायिकाः, एकैकपर्याप्तनिश्रया असंख्येयानामपर्याप्तानामुत्पादात्, ते च सूक्ष्मेष्वपि समुत्पद्यन्ते, सूक्ष्माश्च सर्वत्र विद्यन्ते इति, बादरापर्याप्ततेजःकायिकाः स्वस्वभवपर्यन्ते कृतमारणान्ति- कसमुद्घाताः सन्तः सकलमपि लोकमापूरयन्ति इति न कश्चिद्दोषः, अपि तु निरुपचरिततेजः कायिकसमुद्घातप्ररूपणागुणः, स्वस्थानेन लोकस्यासंख्येये भागे इति, पर्याप्तनिश्रयाऽपर्याप्तानामुत्पादात्, पर्याप्तानां च स्थानं मनुष्यक्षेत्रं, तच्च लोकासंख्येयतमभागमात्रमिति। सूक्ष्मपर्याप्तापर्याप्ततेजःकायिकसूत्रं सूक्ष्मपर्याप्तापर्याप्तपृथिवीकायिकसूत्रवद् भाव०

मू. (१९२) कहि णं भंते! बादरवाउकाइयाणं ठाणा प० ?, गोयमा! सट्ठाणेणं सत्तसु घनवाएसु सत्तसु घनवायवलएसु सत्तसु तनुवाएसु सत्तसु तनुवायवलयेसु अहोलोए पायालेसु भवणेसु भवणपत्थडेसु भवणछिद्देसु भवणनिक्खुडेसु निरएसु निरयावलियासु निरयपत्थडेसु निरयछिद्देसु निरयनिक्खुडेसु उड्ढलोए कप्पेसु विमाणेसु विमाणावलियासु विमाणपत्थडेसु विमाणछिद्देसु विमणनिक्खुडेसु तिरियलोए पाईणपडीणदाहिणउदीण सव्वेसु चेव लोगागासछिद्देसु लोगनिक्खुडेसु य,

एत्थ णं बादरवाउकाइआणं पज्जत्तगाणं ठाणा प०, उववाएणं लोयस्स असंखेज्जेसु भागेसु, समुग्घाएणं लोयस्स असंखेज्जेसु भागेसु, सट्ठाणेणं लोयस्स असंखेज्जइ भागेसु।

कहि णं भंते! अपज्जत्तबादरवाउकाइयाणं ठाणा प० ?, गोयमा! जत्थेव बादरवाउकाइयाणं पज्जत्तगाणं ठाणा तत्थेव बादरवाउकाइयाणं अपज्जत्तगाणं ठाणा प०, उववाएणं सव्वलोए समुग्घाएणं सव्वलोए, सट्ठाणेणं लोयस्स असंखेज्जेसु भागेसु।

कहि णं भंते! सुहुमवाउकाइयाणं पज्जत्तगाणं अपज्जत्तगाणं ठाणा प० ?, गोयमा! सुहुमवाउकाइया जे पज्जत्तगा जे य अपज्जत्तगा ते सव्वे एगविहा अविसेसा अनाणत्ता सव्वलोयपरियावन्नगा प० समणाउसो!। कहि णं भंते! बादरवणस्सइकाइयाणं पज्जत्तगाणं ठाणा प० ?, गो० सट्ठाणेणं सत्तसु घनोदहिसु सत्तसु घनोदहिवलयेसु अहोलए पायालेसु भवणेसु भवणपत्थडेसु, उड्ढलोए कप्पेसु विमाणेसु विमाणावलियासु विमाणपत्थडेसु, तिरियलोए अगडेसु तडागेसु नदीसु दहेसु वावीसु पुक्खरिणीसु दीहियासु गुंजालियासु सरेसु सरपंतियासु सरसरपंतियासु विलेसु विलपंतियासु उज्झरेसु निज्झरेसु चिल्ललेसु पल्ललेसु वप्पिणेसु दीवेसु समुद्देसु सव्वेसु चेव जलासएसु जलठाणेसु, एत्थ णं बादरवणस्सइकाइयाणं पज्जत्तगाणं ठाणा प०, उववाएणं सव्वलोए समुग्घाएणं सव्वलोए सट्ठाणेणं लोयस्स असंखेज्जइभागे।

कहि णं भंते! बादरवणस्सइकाइयाणं अपज्जत्तगाणं ठाणा प० ?, गोयमा! जत्थेव बादरवणस्सइकाइयाणं पज्जत्तगाणं ठाणा तत्थेव बादरवणस्सइकाइयाणं अपज्जत्तगाणं ठाणा प०, उववाणं सव्वलोए समुग्घाएणं सव्वलोए सट्ठाणेणं लोयस्स असंखेज्जइभागे।

कहि णं भंते! सुहुमवणस्सइकाइयाणं पज्जत्तगाणं अपज्जत्तगाण य ठाणा प० ? गोयमा! सुहुमवणस्सइकाइया जे य पज्जत्तगा जे य अपज्जत्तगा ते सव्वे एगविहा अविसेसा अनाणत्ता सव्वलोयपरियावन्नगा प० समणाउसो!॥

वृ. एवं बादरवायुकायिकवनस्पतिकायिकसूत्राण्यपि प्रत्येकं त्रीणि त्रीणि भावनीयानि, नवरं बादरपर्याप्तवायुकायिकसूत्रे भवनच्छिद्राणि–भवनानामवकाशान्तराणि भवननिष्कुटा–घवाक्षादिकल्पाः केचन भवनप्रदेशाः नरकच्छिद्राणि नरकनिष्कुटा–गवाक्षादिकल्पा नरकावासप्रदेशाः, एवं विमानच्छिद्राणि विमाननिष्कुटाश्च प्रतिपत्तव्याः, 'उववाएणं लोगस्स असंखेज्जेसु भागेसु' इत्यादि, वायवो हि पर्याप्ता अतिबहवः, यतो यत्र सुषिरं तत्र वायुः, सुषिरबहुलश्च लोक इति त्रिष्वप्युपपातादिषु लोकस्यासंख्येयेषु भागेष्वित्युक्तं।

अपर्याप्तबादरवायुकायिकसूत्रे 'उववाएणं समुग्घाएणं य सव्वलोए' इति, इह देवनारकवर्जेभ्यः शेषकायेभ्यः सर्वेभ्यो बादरापर्याप्तवायुकायेषु समुत्पद्यन्ते, बादरापर्याप्ताश्चा-पान्तरालगतावपि लभ्यन्ते, बहूनि च स्वस्थानानि बादरपर्याप्तापर्याप्तवायुकायिकानां, ततो व्यवहारनयमतेनाप्युपपातमधिकृत्य सकलसलोकव्यापिता घटते इति न काचित् क्षतिः, समुद्घातेन च सकलसलोकव्यापिता सुप्रतीतैव, सर्वेषु सूक्ष्मेषु सर्वत्र च लोके तेषां समुत्पादसंभवात्।

बादरपर्याप्तवनस्पतिकायिकसूत्रे 'उववाएणं सव्वलोए' इह पर्याप्तबादरवनस्पतिकायिकानां स्वस्थानं घनोदध्यादि, तत्र बादरनिगोदानां शैवालादीनां संभवात्, सूक्ष्मनिगोदानां भवस्थितिरन्त-र्मुहूर्तं ततस्ते बादरनिगोदेषु पर्याप्तेषु समुत्पद्यमाना बादरनिगोदपर्याप्तायुरनुभवन्तः सुविशुद्ध-ऋजुसूत्रनय-दर्शनाभ्युपगमेन लब्धबादरपर्याप्तवनस्पतिकायिकव्यपदेशा उपपातेन सकलकालं सर्वलोकं व्याप्नुवन्ति, तत उक्तम्–'उपपातेन सर्वलोके' इति। 'समुग्घाएणं सव्वलोए' इति,

यदा बादरनिगोदाः सूक्ष्मनिदोगेषु आयुर्द्धा पर्यन्ते मारणान्तिक- समुद्घातेन समवहता आत्मप्रदेशानुत्पत्तिदेशं यावद् विक्षिपन्ति तदा बादरनिगोदपर्याप्तयुरधाप्य- क्षीणमिति बादरपर्याप्तनिगोदा एव समुद्घातगताश्च सकललोकव्यापिनश्चेति समुद्घातेन सर्वलोके, स्वस्थानेन लोकस्यासंख्येयतमे भागे, धनोदध्यादीनां सर्वेषामपि समुदितानांम लोकस्यासंख्येय-भागप्रवर्तित्वात्, शेषं सुगमं ॥

मू. (१९४) *कहि णं भंते! वेइंदियाणं पज्जत्तापज्जत्तगाणं ठाणा प० ?, गोयमा! उड्ढलोए तदेक्कदेसभागे अहोलोए तदेक्कदेसभाहे तिरियलोए अगडेसु तलाएसु नदीसु दहेसु वावीसु पुक्खरिणीसु दीहियासु गुंजालियासु सरेसु सरपंतियासु सरसरपंतियासु बिलेसु बिलपंतियासु उज्झरेसु निज्झरेसु चिल्ललेसु पल्ललेसु वप्पिणेसु दीवेसु समुद्देसु सव्वेसु चेव जलसयेसु जलठाणेसु एत्थ णं वेइंदियाणं पज्जत्तापज्जत्तगाणं ठाणा पं०, उववाएणं लोगस्स असंखेज्जइभागे, समुग्घाएणं लोगस्स असंखेज्जइभागे, सट्ठाणेणं लोयस्स असंखेज्जइभागे। कहि णं भंते! तेइंदियाणं पज्जत्तापज्जत्तगाणं ठाणा प० ?, गोयमा! उड्ढलोए तदेक्कदेसभाए अहोलोए तदेक्कदेसभाए तिरियलोए अगडेसु तलाएसु नदीसु दहेसु वावीसु पुक्खरिणीसु दीहियासु गुंजालियासु सरेसु सरपंतियासु सरसरपंतियासु बिलेसु बिलपंतियासु उज्झरेसु निज्झरेसु चिल्ललेसु पल्ललेसु वप्पिणेसु दीवेसु समुद्देसु सव्वेसु चेव जलासएसु जलठाणेसु एत्थ णं तेइंदियाणं पज्जत्तापज्जत्तगाणं ठाणा प० उववाएणं लोयस्स असंखेज्जइभागे समुग्धाएणं लोयस्स असंखेज्जइभागे सट्ठाणेणं लोयस्स असंखेज्जइभागे ॥*

कहि णं भंते! चउरिंदियाणं पज्जत्ता पज्जत्तगाणं ठाणा प० ?, गोयमा! उड्ढलोए तदेक्कदेसभागे अहोलोए तदेक्कदेसभागे तिरियलोए अगडेसु तलाएसु नदीसु दहेसु वावीसु पुकअखरिणीसु दीहियासु गुंजालियासु सरेसु सरपंतियासु सरसरपंतियासु बिलेसु बिलपंतियासु उज्झरेसु निज्झरेसु चिल्ललेसु पल्ललेसु वप्पिणेसु दीवेसु समुद्देसु सव्वेसु चेव जलासएसु जलठाणसु एत्थ णं चउरिंदियाण पज्जत्तापज्जत्ताणं ठाणा प०, उववाएणं लोयस्स असंखेज्जइभागे, समुग्धाएणं लोयस्स असंखेज्जइभागे, सट्ठाणेणं लोयस्स असंखेज्जइबागे ॥

कहि णं भंते! पंचिंदियाणं पज्जत्तापज्जत्तगाणं ठाणा प० ?, गोयमा! उड्ढलोयस्स तदेक्कदेस-भाए अहोलोयस्स तदेक्कदेसभाए तिरियलोए अगडेसु तलाएसु नदीसु दहेसु वावीसु पुक्खरिणीसु दीहियासु गुंजालियासु सरेसु सरपंतियासु सरसरपंतियासु बिलेसु बिलपंतियासु उज्झरेसु निज्झरेसु चिल्ललेसु पल्ललेसु वप्पिणेसु दीवेसु समुद्देसु सव्वेसु चेव जलासएसु जलठाणेसु एत्थ णं पंचिंदियाण पज्जत्तापज्जत्ताणं ठाणा प०, उववाएण लोयस्स असंखेज्जइभागे, समुग्घाएणं लोयस्स असंखेज्जइभागे, सट्ठाणेणं लोयस्स असंखेज्जइभागे ॥

वृ. एवं द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियसामान्यपञ्चेन्द्रियसूत्राण्वपि भावनीयानि, नवरं द्वीन्द्रियादयो बहवो जलसंभूताः शङ्खप्रभृतय इति सर्वेष्वपि सूत्रेषु स्थानान्यवटादीन्युक्तानि, तथा ऊर्ध्वलोके तदेकदेशभागे—मन्दरादिवाप्यादिषु, अधोलोके तदेकदेशे (शभागे)—अधोलौकिक-ग्रामकूपतडागादिषु, शेषमुपरयुज्य स्वयं परिभावनीयम् ॥

अधुना पर्याप्तापर्याप्तनैरयिकस्थानप्ररूपणार्थमाह—

मू. (१९५) *कहि णं भंते! नेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प० ?, कहि णं भंते! नेरइय*

परिवसंति?, गोयमा! सट्ठाणेणं सत्तसु पुढवीसु, तं०-रयणप्पभाए सक्करप्पभाए वालुयप्पभाए पंकप्पभाए धूमप्पभाए तमप्पभाए तमतमप्पभाए,-

-एत्थ णं नेरइयाणं चउरासीइ निरयावाससयसहस्सा भवंतीति मक्खायं, ते णं नरगा अंतो वट्टा बाहिं चउरंसा अहे खुरप्पसंठाणसंठिया निच्चंधयारतमसा ववगयगहचंदसूरनक्खत्त-जोइसियपहा मेदवसापूयपडलरुहिरमांसचिक्खिल्ललित्ताणुलेवणतला असुइवीसा परमदुब्भिगंधा काउयअगणिवन्नाभा कक्खडफासा दुरहियासा असुभा नरगा असुभा नरगेसु वेयणाओ

एत्थ णं नेरइयाणं पज्जत्तापज्जत्तगाणं ठाणा प०, उववाएणं लोयस्स असंखेज्जइभागे, समुग्घाएणं लोयस्स असंखेज्जइभागे, सट्ठाणेणं लोयस्स असंखेज्जइभागे, एत्थ णं बहवे नेरइया परिवसंति, काला कालोभासा गंभीरलोमहरिसा भीमा उत्तासणगा परमकण्हा वन्नेणं प० समणाउसो

ते णं तत्थ निच्चं भीता निच्चं तत्था निच्चं तसिया निच्चं उव्विग्गा निच्चं परममसुहसंबद्धं नरगभयं पच्चनुभवमाणा विहरंति।

वृ. 'कहि णं भंते! नेरइयाणं' इत्यादि, कस्मिन् प्रदेशे भदन्त! नैरयिकानां पर्याप्तपर्याप्तानां स्थानानि प्रज्ञप्तानि?, एतदेव व्यक्तं पृच्छति यथा अन्येऽप्यवबुध्यन्ते-'कहि णं' इति कस्मिन् प्रदेशे 'णं' इति वाक्यालंकृतौ नैरयिकाः परिवसन्ति?, भगवानाह-गौतम! स्वस्थानेन सप्तसु पृथिवीषु, ता एव नामग्राहमाह-रयणप्पभाए' इत्यादि, गतार्थं, 'एत्थ णं' इत्यादि, अत्र-एतासु सप्तसु पृथिवीषु नैरयिकाणां सर्वसंख्यया चतुरशीतिर्नरकावासशतसहस्राणि भवन्ति, तथाहि-

रत्नप्रभायां त्रिंशन्नरकावासशतसहस्राणि भवन्ति, शर्कराप्रभायां पञ्चविंशतिः शतसहस्राणि, वालुकाप्रभायां पञ्चदश लक्षाः, पङ्कप्रभायां दश लक्षाः, धूमप्रभायां त्रीणि लक्षाः, तमः-प्रभायामेकं शतसहस्रं पञ्चोनं, तमस्तमःप्रभायां पञ्चेति, सर्वसंख्यया चतुरशीतिर्लक्षा नरकावासानामित्याख्यातं मया शेषैस्तीर्थकृद्भिः 'ते णं नरकावासा' इत्यादि, ते नरकावासाश्चतुरशीतिर्लक्षणप्रमाणाः

सर्वेऽपि प्रत्येकमन्तः-मध्यभागे (वृत्ता) वृत्ताकारा बहिर्भागे चतुरस्राः-चतुरस्रकाराः, इदं च पीठोपरिवर्तिनं मध्यभागमधिकृत्य प्रोच्यते, सकलपीठाद्यपेक्षया त्वावलिकाप्रविष्टा वृत्तत्र्यस्रचतुरस्रसंस्थानाः, पुष्पावकीर्णास्तु नानासंस्थानाः प्रतिपत्तव्याः, 'अहे खुरप्पसंठाण-संठिया' इति अधो-भूमीतले क्षुरप्रस्येव-प्रहरणविशेषस्य यत्संस्थानम्-आकारविशेषस्तीक्ष्ण-तालक्षणस्तेनसंस्थिताः- तथाहि-तेषु नरकावासेषु भूमितले मसृणत्वाभावतः शर्करिले पादेषु न्यस्यमानेषु शर्कारामात्रसंस्पर्शेऽपि क्षुरप्रेणेव पादाः कृत्यन्ते, 'निच्चंधयारतमसा' इति तमसा नित्यान्धकाराः- उद्योताभावतो यत्तमः तदिह तम उच्यते तेन तमसा नित्यं-सर्वकालमन्धकाराः, आपवर- कादिष्वपि तमोऽन्धकारोऽस्ति केवलं बहिः सूर्यप्रकाशे मन्दतमो भवति, नरकेषु तु तीर्थकरजन्म- दीक्षादिकालव्यतिरेकेणान्यदा सर्वकालमप्युद्योतलेशस्याप्यभावतो जात्यन्धस्येव मेघच्छन्न- कालार्धरात्र इवातीव बहलतरो वर्तते तत उक्तं-

तमसा नित्यान्धकाराः, तमश्च तत्र सदाऽवस्थितं, उद्योतकारिणामसंभवात्, तथा चाह-'ववगयगहचंदसूरनक्खत्तजोइसियपहा' व्यपगतः-परिभ्रष्टो ग्रहचन्द्रसूर्यनक्षत्ररूपाणा उपलक्षणमेतत् तारारूपाणां च ज्योतिष्काणा पन्था-मार्गो येभ्यस्ते व्यपगतग्रहचन्द्रसूर्यनक्षत्र-ज्योतिष्कपथाः, तथा 'मेयवसापूयरुधिरमांसचिक्खिल्ललित्ताणुलेवणतला' इति स्वभावसंपन्नैर्मेदोव-

सापूतिरुधिरमांसैर्यश्चिक्खिल्लः—कर्दमः तेन लिप्तं—उपदिग्धमनुलेपनेन—सकृद्विलिप्तस्य पुनः पुनरुपलेपनेन तलं—भूमिका येषां ते भवेदवसापूतिरुधिरमांसचिक्खिल्ललिप्तानुलेपनतलाः, अत एवाशुचयः—अपवित्रा बीभत्साः दर्सनेऽप्यतिजुगुप्सोत्पत्तेः, क्वचिद् 'वीसा' इति पाठः, तत्र विस्रा—आमगन्धिकाः परमदुरभिगन्धा मृतगवादिकडेवरेभ्योऽप्यतीवानिष्टदुरभिगन्धाः।

'काउयअगणिवन्नाभा' इति, लोहे धम्यमाने यादृक् कपोतो बहुकृष्णारूपोऽग्नेर्वर्णः, किमुक्तं भवति ?—यादृशी बहुकृष्णवर्णभूता अग्निज्वाला विनिर्गच्छतीति तादृश्याभा—आकारो येषां ते कपोताग्निवर्णाभाः, धम्यमानलोहाग्निज्वालाकल्पा इति भावः, नारकोत्पत्तिस्थानव्यतिरेकेणान्यत्र सर्वत्राप्युष्णरुपत्वात्, एतच्च षष्ठसप्तमपृथ्वीवर्जमवसेयं, तथा च वक्ष्यति—'नवरं छट्ठसत्तमीसु णं काउअगणिवन्नाभा न भवन्ति' तथा कर्कशः—अतिदुःसहोऽसिपत्रस्येव स्पर्शो येषु ते कर्कशस्पर्शाः, अत एव 'दुरहियासा' इति, दुःखेनाध्यास्यन्ते—सह्यन्ते दुरध्यासा अशुभा दर्शनतो नरकाः, तथा गन्धरसस्पर्श- शब्दैरशुभा—अतीवासातरूपा नरकेषु वेदना,

'एत्थ णं' इत्यादि, यावत् तत्थ णं बहवे निरया परिवसन्ति' 'काला' इत्यादि, कालाः—कृष्णाः, तत्र कोऽपि निष्प्रभतया मन्दकृष्णोऽपि भवति ततस्तदाशङ्काव्यवच्छेदार्थं विशेषणान्तरमाह—कालावभासाः—कालः—कृष्णोऽवभासः—प्रभाविनिर्गमो येभ्यस्ते कालावभासाः, कृष्णप्रभापटलैर्पाचिता इति भावः, अत एव गम्भीरलोकमहर्षाः—गम्भीरः—अतीवोत्कटो लोमहर्षो—लोमोद्धर्षो भयवशाद् येभ्यस्ते गम्भीरलोमहर्षाः, किमुक्तं भवति ?—

एवं नाम कृष्णाः कृष्णावभासायद् दर्शनमात्रेऽपि शेषनारकजन्तूनां भयसंपादनेन मात्रातिगं लोमहर्षमुत्पादयन्तीति, अत एव 'भीमाः' भयानकाः, भीमत्वादेव उत्त्रासनकाः—उत्त्रास्यन्ते शेषनारकजन्तव एभिरित्युत्त्रासनाः उत्त्रासना एवोत्त्रासनकाः, किं बहुना ?—'वर्णेन' वर्णमधिकृत्य परमकृष्णाः, यत ऊर्ध्वं न किमपि कृष्णमस्ति भयानकं वा, बहूत्कर्षप्राप्तकृष्णवर्णाः प्रज्ञप्ता मया शेषैश्च तीर्थकरैः हे श्रमण ! हे आयुष्मन् !

'ते णं निच्चं भीया' इत्यादि, ते नैरयिकाः 'णं' इति वाक्यालङ्कारे 'नित्यं' सर्वकालं क्षेत्रस्वभावजनितमहानिबिडान्धकारदर्शनतो भीताः 'नित्यं' सर्वकालं त्रस्ताः परमाधार्मिकपरस्परोदीरितदुःखसंपातभयादग्रेऽपि त्रास(स)मुपपन्नाः 'नित्यं' सर्वकालं परमाधार्मिकैः परस्परं वा त्रासिताः—त्रासं ग्राहिताः तथा 'नित्यं' सर्वकालं यथायोगं परमदुःसहशीतोष्णवेदनानुभवतः परमाधार्मिकपरस्परोदीरितदुःखानुभवतश्चोद्विग्नाः—तद्गतवासपराङ्मुखचित्ताः एवं 'नित्यं' सर्वकालं परममशुभं—एकान्तेनाशुभं संबद्धम्—अनुबद्धं न तु जातुचिदपि मनागप्यपान्तराले व्यवच्छिन्नसंतानं 'नरकभयं' नरकदुःखं 'प्रत्यनुभवन्तः' प्रत्येकं वेदयमाना 'विहरन्ति' अवतिष्ठन्ते।

मू. (१९६) *कहि णं भंते ! रयणप्पभापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प० ?, कहि णं भंते ! रयणप्पभापुढवीनेरइआ परिवसंति ?,*

गोयमा ! इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरि एगं जोयणसहस्समोगाहित्ता हेट्ठा चेगं जोयणसहस्सं वज्जित्ता मज्झे अट्ठहुत्तरे जोयणसयसहस्से एत्थ णं रयणप्पभापुढवीनेरइयाणं तीसं निरयावाससयसहस्सा भवन्तीति मक्खायं,

ते णं नरगा अंतो वट्टा बाहिं चउंसा अहे खुरप्पसंठाणसंठिया निच्चंधयारतमसा ववगयगह-

चंदसूरनक्खत्तजोइसप्पहा मेदवसापूयपडलरुहिरमांसचिक्खिल्ललित्ताणुलेवणतला असुइवीसा परमदुब्भिगंधा काउअगणिवन्नाभा कक्खडफासा दुरहियासा असुभा नरगा असुभा नरगेसु वेयणाओ,

एत्थ णं रयणप्पभापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प०, उववाएणं लोयस्स असंखेज्जइभागे, समुग्घाएणं लोयस्स असंखेज्जइभागे, सट्ठाणेणं लोयस्स असंखेज्जइभागे, तत्थ णं बहवे रयणप्पभापुढवीनेरइया परिवसंति, काला कालोभासा गंभीरलोमहरिसा भीमा उत्तासणगा परमकिण्हा वन्नेणं प० समणाउसो!,

ते णं निच्चं भीता निच्चं तत्था निच्चं तसिया निच्चं उव्विग्गा निच्चं परममसुहसंबद्धं नरगभयं पच्चणुभवमाणा विहरंति। कहि णं भंते! सक्करप्पभापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प०

कहि णं भंते! सक्करप्पभापुढवीनेरइया परिवसंति?, गोयमा! सक्करप्पभापुढवीए बत्तीसुत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहित्ता हेट्ठा चेगं जोयणसहस्सं वज्जित्ता मज्झे तीसुत्तरे जोयणसहयसहस्से एत्थ णं सक्करप्पभापुढवीनेरइयाणं पणवीसं निरयावाससयसहस्सा भवंतीति मक्खायं, ते णं नरगा अंतो वट्टा बाहिं चउरंसा अहे खुरप्पसंठाणसंठिया निच्चंधयारतमसा ववगयगहचंदसूरनक्खत्तजोइसियप्पहा मेदवसापूयपडलरुहिरमांसचिक्खिल्ललित्ताणुलेवणतला असुइवीसा परमदुब्भिगंधा काउअगणिवन्नाभा कक्खडफासा दुरहियासा असुभा नरगा असुभा नरगेसु वेयणाओ,

एत्थ णं सक्करप्पभापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प०, उववाएणं समुग्घाएणं सट्ठाणेणं लोगस्स असंखेज्जइभागे, तत्थ णं बहवे सक्करप्पभापुढवीनेइआ परिवसंति, काला कालोभासा गंभीरलोमहरिसा भीमा उत्तासणगा परमकिण्हा वन्नेणं प० समणाउसो! ते णं निच्चं भीता निच्चं तत्था जाव निच्चं परममसुहसंबद्धं नरगभयं पच्चनुभवमाणा विहरंति।

कहि णं भंते वालुयप्पभापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प०?, कहि णं भंते! वालुयप्पभापुढवीनेरइया परिवसंति?, गोयमा! वालुयप्पभापुढवीए अट्ठावीसुत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहित्ता हेट्ठा चेगं जोयणसहस्सं वज्जित्ता मज्झे छव्वीसुत्तरजोयणसयसहस्से एत्थ णं वालुयप्पभापुढवीनेरइयाणं पन्नरसनरयावाससयसहस्सा भवंतीति मक्खायं, ते णं नरगा अंतो वट्टा बाहिं चउरंसा अहे खुरप्पसंठाणसंठिया निच्चंधयारतमसा ववग- यगहचंदसूरनक्खत्तजोइसप्पहा मेदवसापूयपडलरुहिरमंसचिक्खिल्ललित्ताणुलेवणतला असुइवीसा परमदुब्भिगंधा काउअगणिवन्नाभा कक्खडफासा जाव असुभा नरगेसु वेयनओ

एत्थ णं वालुयप्पभापुढवीनेरइयाणं पज्जत्तपज्जत्ताणं ठाणा प०, उववाएणंलोयस्स असंखेज्जइभागे, समुग्घाएणं लोयस्स असंखेज्जइभागे, सट्ठाणेणं लोयस्स अंसखेज्जइभागे, तत्थ णं बहवे वालुयप्पभापुढवीनेरइया परिवसंति, काला कालोभासा गंभीरलोमहरिसा भीमा उत्तासणगा परमकिण्हा वन्नेणं प० समणाउसो!, ते णं निच्चं भीता निच्चं तत्था निच्चं तसिआ निच्चं उव्विग्गा निच्चं परममसुहं संबद्धं णरगभयं पच्चणुभवमाणा विहरंति।

कहि णं भंते! पंकप्पभापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प०?, कहि णं भंते! पंकप्पभापुढवीनेरइया परिवसंति?, गो० पंकप्पभापुढवीए वीसुत्तरजोयणसयसहस्सबाहल्लाए

उवरिं एगं जोयणसहस्सं ओगाहित्ता हिट्ठा चेगं जोयणसहस्सं वज्जित्ता मज्झे अट्ठारसुत्तरे जोयणसयसहस्से एत्थ णं पंकप्पभापुढवीनेरइयाणं दस निरयावाससयसहस्सा भवन्तीति मक्खायंते णं नरगा अंतो वट्टा बाहिं चउरंसा अहे खुरप्पसंठाण- संठिया निच्चंधयारतमसा जाव मेदवसापूयपडल- रुहिरमंस- चिक्खिल्ललित्ताणुलेवणतला असुइवीसा परमदुब्भिगंधा काउअगणिवन्नाभा कक्खडफासा दुरहियासा असुभा नरगा असुभा नरगेसु वेयणाओ.

एत्थ णं पंकप्पभापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा पं०, उववाएणंलोयस्स असंखेज्जइभागे, समुग्घाएणं लोयस्स असंखेज्जइभागे, सट्ठाणेणं लोयस्स असंखेज्जइभागे, तत्थ णं बहवे पंकप्पभापुढवीनेरइआ परिवसंति, काला कालोभासा गंभीरलोमहरिसा भीमा उत्तासणगा परमकिण्हा वन्नेणं प० समणाउसो! ते णं निच्चं भीया निच्चं तत्था निच्चं तसिया निच्चं परममसुहसंबद्धं नरगभयं पच्चणुभवमाणा विहरंति। कहि णं भंते! धूमप्पभापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प० ?, कहि णं भंते! धूमप्पभापुढवीनेरइआ परिवसंति?, गोयमा! धूमप्पभापुढवीए अट्ठारसुत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहित्ता हेट्ठा चेगं जोयणसहस्सं वज्जित्ता मज्झे सोलसुत्तरजोयणसयसहस्से एत्थ णं धूमप्पभापुढवीनेरइयाणं तिन्नि निरयावाससयसहस्सा भवन्तीति मक्खायं,

ते णं नरगा अंतो वट्टा बाहिं चउरंसा अहे खुरप्पसंठाणसंठिया निच्चंधयारतमसा ववगयगहचंदसूरनक्खत्तजोइसियपहामेदवसापूयपडलरुहिरमंसचिक्खिल्ललित्ताणुलेवणतला असुइवीसा परमदुब्भिगंधा काउअगणिवन्नाभा कक्खडफासा दुरहियासा असुभा नरगा असुभा नरगेसु वेयणाओ एत्थ णं धूमप्पभापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प०, उववाएणं लोयस्स असंखेज्जइभागे समुग्घाएणं लोयस्स असंखेज्जइभागे सट्ठाणेणं लोयस्स असंखेज्जइभागे,

तत्थ णं बहवे धूमप्पभापुढवीनेरइया परिवसंति, काला कालोभासा गंभीरलोमहरिसा भीमा उत्तासणगा परमकिण्हा वन्नेणं प० समणाउसो!, ते णं नरगा निच्चं भीता निच्चं तत्था निच्चं तसिया निच्चं उव्विग्गा निच्चं परममसुहसंबद्धं नरगभयं पच्चणुभवमाणा विहरंति।

कहि णं भंते! तमापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प० ?, कहि णं भंते! तमापुढवीनेरइया परिवसंति ?, गोयमा! तमाए पुढवीए सोलसुत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहित्ता हिट्ठा चेगं जोयणसहस्सं वज्जित्ता मज्झे चउदसुत्तरजोयणसयसहस्से एत्थ णं तमप्पभापुढवीनेरइयाणं एगे पंचूणे नरगावाससयसहस्से हवन्तीति मक्खायं, ते णं नरगा अंतो वट्टा बाहिं चउरंसा अहे खुरप्पसंठाणसंठिया निच्चंधयारतमसा ववगयगहचंदसूरनक्खत्तजोइसियपहा मेदवसापूयपडलरुहिरमंसचिक्खिल्ललित्ताणुलेवणतला असुइवीसा परमदुब्भिगंधा कक्खडफासा दुरहियासा असुभा नरगा असुभा नरगेसु वेयणाओ, एत्थ णं तमापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प०, उववाएणं लोयस्स असंखेज्जइभागे समुग्घाएणं लोयस्स असंखेज्जइभागे सट्ठाणेणं लोयस्स असंखेज्जइभागे,

तत्थ णं बहवे तमप्पभापुढवीनेरइया परिवसंति, काला कालोभासा गंभीरलोमहरिसा भीमा उत्तासणगा परमकिण्हा वन्नेणं प० समणाउसो!,ते णं निच्चं भीता निच्चं परमसुहसंबद्धं नरगभयं पच्चणुभवमाणा विहरंति।

कहि णं भंते ! तमतमा- पुढवीनेरइयाणं पज्जत्तापज्जत्ताणं ठाणा प० ?, कहि णं भंते ! तमतमापुढवीनेरइया परिवसंति ?, गोयमा ! तमतमाए पुढवीए अट्ठोत्तरजोयणसयसहस्सबाहल्लाए उवरिं अद्धतेवन्नं जोयणसहस्साइं ओगहित्ता हेट्ठावि अद्धतेवन्नं जोगाणसहस्साइं वज्जित्ता मज्झे तीसु जोयणसहस्ससु एत्थ णं तमतमापुढवीनेरइयाणं पज्जत्तापज्जत्ताणं पंचदिसि पंच अनुत्तरा महइमहालया महानिरया प०, तं०-काले महाकाले रोरुए महारोरुए अपइट्ठाणे,

ते णं नरगा अंतो वट्टा बाहिं चउरंसा अहे खुरप्पसंठाणसंठिआ निच्चंधयारतमसा ववगयगहचंदसूरनक्खत्तजोइसियपहा मेदवसापूयपडलरुहिरमंसचिक्खिल्ललित्ताणुलेवणतला असुइवीसा परमदुब्भिगंधा कक्खडफासा दुरहियासा असुभा नरगा असुभा नरगेसु वेयणाओ, एत्थ णं तमतमापुढवीनेरइयाणं ठाणा प०, उववाएणं लोयस्स असंखेज्जइभागे समुग्घाएणं लोयस्स असंखेज्जइभागे सट्ठाणेणं लोयस्स असंखेज्जइभागे तत्थ णं बहवे तमतमापुढवीनेरइया परिवसंति, काला कालोभासा गंभीरलोमहरिसा भीमा उत्तासणगा परमकिण्हा वन्नेणं प० समणाउसो !,

ते णं निच्चं भीता निच्चं तत्था निच्चं तसिया निच्चं उव्विग्गा निच्चं परममसुहसंबद्धं नरगभयं पच्चणुभवमाणा विहरंति ॥

वृ. तदेवं सामान्यतो नैरयिकसूत्रं व्याख्यातं, एवं रत्नप्रभादिविषयाण्यपि सूत्राणि यथायोगं परिभावनीयानि, प्राय उक्तव्याख्यानुसारेण सुगमत्वात्, केवलं षष्ठपृथिव्यां सप्तमपृथिव्यां च नरकावासाः कपोताग्निवर्णाभा न वक्तव्याः, नारकोत्पत्तिसअधानव्यतिरेकेणान्यत्र सर्वत्रापि तेषां शीतपरिणामत्वात्, तथा चाह-''नवरं छट्ठसत्तमीसु णं काउअगणिवन्नाभा न भवन्ति'' ।

सम्प्रति यथोक्तपृथिवीबाहल्यपरिमाणप्रतिपादिकां संग्रहणीगाथामाह-

मू. *(१९७)* *आसीयं बत्तीसं अट्ठावीसं च हुंति वीसं च ।*
अट्ठारससोलसगं अट्ठुत्तरमेव हिट्ठिमिया ॥

वृ. 'आसीयं बत्तीसं' इत्यादि, आशीतं-अशीतिसहस्राधिकंशतसहस्रं रत्नप्रभाया बाहल्यं द्वात्रिंशं-द्वात्रिंशत्सहस्राधिकं शर्कराप्रभायाः 'अट्ठावीसं' अष्टाविंशतिसहस्राधिकं वालुकाप्रभायाः विंशतिसहस्राधिकं पङ्कप्रभायाः अष्टादशसहस्राधिकं धूमप्रभायाः षोडशसहस्राधिकं तमःप्रभायाः अष्टोत्तरम्-अष्टसहस्राधिकं लक्षं 'हेट्ठिमिया' सर्वाधस्तन्यास्तमस्तमःप्रभाया इति ।

मू. *(१९८)* *अट्ठुत्तरं च तीसं छव्वीसं चेव सयसहस्सं तु ।*
अट्ठारस सोलसगं चउद्दसमहियं तु छट्ठीए ॥

मू. *(१९९)* *अद्धतिवन्नसहस्सा उवरिमहे वज्जिऊण तो भणियं ।*
मज्झे तिसहस्सेसुं होन्ति उ नरगा तमतमाए ॥

वृ. संप्रति उपर्यधश्चैकैकं योजनसहस्रं मुक्त्वा यावत्प्रमाणं नरकावासयोग्यं पृथिवीबाहल्यं तावत्संग्रहीतुकाम आह- 'अट्ठुत्तरं च' इत्यादिगाथाद्वयं, रत्नप्रभाया हि अशीतिसहस्राधिकं लक्षं बाहल्यपरिमाणं तस्योपरितनमेकं योजनसहस्रमेकं चाधो योजनसहस्रं वर्जयित्वा शेषं नरकावासाधारभूतं, अतो रत्नप्रभाया नरकावासयोग्यं बाहल्यपरिमाणमष्टसप्ततिसहस्राधिकं लक्षं भवति, एवं सर्वत्राप्युपयुज्य भावनीयं ।

मू. *(२००)* *तीसा य पन्नवीसा पन्नरस दसेव सयसहस्साइं ।*
तिन्नि य पंचूणेगं पंचेव अणुत्तरा नरगा ॥

वृ. साम्प्रतं नरकावाससंख्याप्रतिपादनाय संग्रहणीगाथामाह–'तीसा य' इत्यादि, गतार्था

मू. (२०१) *कहि णं भंते ! पंचिंदियतिरिक्खजोणियाणं पज्जत्तापज्जत्ताणं ठाणा प० ?, गोयमा ! उड्ढलोए तदेक्कदेसभाए अहोलोए तदेक्कदेसभाए तिरियलोए अगडेसु तलायेसु नदीसु दहेसु वावीसु पुक्खरिणीसु दीहियासु गुंजालियासु सरे सु सरपंतियासु सरसरपंतियासु बिलेसु बिलपंतियासु उज्झरेसु निज्झरेसु चिल्ललेसु पल्ललेसु वप्पिणेसु दीवेसु समुद्देसु सव्वेसु चेव जलासएसु जलठाणेसु एत्थ णं पंचिंदियतिरिक्खजोणियाणं पज्जत्तापज्जत्ताणं ठाणा प०, उववाएणं लोयस्स असंखेज्जइभागे, समुग्घाएणं सव्वलोयस्स असंखे० सट्ठाणेणं सव्वलोयस्स असंखे०*

वृ. तिर्यक्पञ्चेन्द्रियसूत्रं प्राग्वत्, नवरमूर्ध्वलोके तदेकदेशे–तिर्यक्पञ्चेन्द्रिया मत्स्यादयो मन्दराद्दिवाप्यादिषु, अधोलोके तदेकदेशे–अधोलौकिकग्रामादिष्वित्यर्थः ।

मू. (२०२) *कहि णं भंते ! मणुस्साणं पज्जत्तापज्जत्ताणं ठाणा प० ?, गोयमा ! अंतो मणुस्सखेत्ते पणयालीसाए जोयणसयसहस्सेसु अड्ढाइज्जेसु दीवसमुद्देसु पन्नरससु कम्मभूमीसु तीसाए अकम्मभूमीसु छप्पन्नाए अंतरदीवेसु एत्थ णं मणुस्साणं पज्जत्तापज्जत्ताणं ठाणा प०, उववाएणं लोयस्स असंखेज्जइभागे, समुग्घाएणं सव्वलोए, सट्ठाणेणं लोयस्स असंखेज्जइभागे ।।*

वृ. मनुष्यसूत्रमपि सुगमं, नवरं 'समुग्घाएणं सव्वलोए' इति केवलिसमुद्घातमधिकृत्य सम्प्रति भवनपतिस्थानप्रतिपादनार्थमाह–

मू. (२०३) *कहि णं भंते ! भवणवासीणं देवाणं पज्जत्तापज्जत्ताणं ठाणा प० ?, कहि णं भंते ! भवणवासी देवा परिवसंति ?, गोयमा ! इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहित्ता हेट्ठा चेगं जोयणसहस्सं वज्जित्ता मज्झे अट्ठहुत्तरे जोयणसयसहस्से एत्थ णं भवणवासीणं देवाणं सत्त भवणकोडीओ बावत्तरि भवणावाससयसहस्सा भवंतीति मक्खायं, ते णं भवणा बाहिं वट्टा अंतो चउरंसा अहे पुक्खरकण्णियासंठाणसंठिया उक्किण्णंतरविउलगंभीरखातफलिहा पागारट्टालयकवाडतोरणपडिदुवारदेसभागा जंतसयग्घिमुसंढिरियारिया अउज्झा सदाजया सदागुत्ता अडयालकोट्ठगरइया अडयालकयवणमाला खेमा सिवा किंकरामरदंडोवरक्खिया लाउल्लोइयमहिया गोसीससरसरत्तचंदनदद्दरदिन्नपंचंगुलितला उवचियचंदनकलसा चंदनघडसुकयतोरणपडिदुवारदेसभागा आसत्तोसत्तविउलवट्टवग्घारियमल्लदामकलावा पंचवन्नसरससुरभिमुक्कपुप्फपुंजोवयारकलिया –*

–कालागुरुपवरकुंदुरुक्कतुरुक्कधूवमघमघंतगंधुद्धुयाभिरामा सुगंधवरगंधिया गंधवट्टिभूया अच्छरगणसंघसंविगिन्ना दिव्वतुडियसद्दसंपणातिया सव्वरयणामया अच्छा सण्हा लण्हा घट्ठा मट्ठा नीरया निम्मला निप्पंका निक्कंकडच्छाया सप्पहा सस्सिरिया समिरिया सउज्जोया पासादीया दरिसणिज्जा अभिरूवा पडिरूवा, एत्थ णं भवणवासिदेवाणं पज्जत्तापज्जत्ताणं ठाणा पं०, उववाएणं लोयस्स असंखेज्जइभागे, समुग्घाएणं लोयस्स असंखेज्जइभागे, सट्ठाणेणं लोयस्स असंखेज्जइभागे, तत्थ णं बहवे भवणवासी देवा परिवसंति, तं०–

वृ. 'कहि णं भंते ! भवणवासीणं देवाणं' इत्यादि, 'असीउत्तरजोयणसयसहस्सबाहल्लाए' इति अशीत्युत्तरं–अशीतिसहस्राधिकयोजनशतसहस्रं बाहल्यं यस्याः सा तथा तस्याः 'सत्त भवणकोडीओ बावत्तरि भवणावाससयसहस्सा भवन्तीति मक्खायं' इति असुरकुमाराणां हि चतुःषष्टिशत-

सहस्राणि भवनानां, ततः सर्वसंख्याया यथोक्तं भवनसंख्यानं भवति,

'ते णं भवणा' इत्यादि, तानि 'णं' इति वाक्यालङ्कारे, पुंस्त्वं प्राकृतत्वात्, भवनानि बहिर्वृत्तानि–वृत्ताकाराणि अन्तः समचतुरस्राणि अधस्तनभागे पुष्करकर्णिकासंस्थानसंस्थितानि कर्णिका नाम उन्नतसमचित्रबिन्दुकिनी 'उक्किण्णंतरविउलगंभीरखातफलिहा' इति उत्कीर्णमिवोत्कीर्णमतीव व्यक्तमित्यर्थः, उत्कीर्णमन्तरं यासां खातपरिखाणां ता उत्कीर्णान्तराः, किमुक्तं भवति ?–

खातानां च परिखाणां च स्पष्टवैविक्त्योन्मीलनार्थमपान्तराले महती पाली समस्तीति, खातानि च परिखाश्च खातपरिखाः उत्कीर्णान्तरा विपुला–विस्तीर्णा गम्भीरा–अलब्धमध्यभागा खातपरिखा येषां भवनानां परितस्तानि उत्कीर्णान्तरविपुलगम्भीरखातपरिखानि, खातपरिखानां चायं प्रतिविशेषः–परिखा उपरि विशाला अधः संकुचिता, खातं तु उभयत्रापि सममिति, 'पागारट्टालयकवाडतोरणपडिदुवारादेसभागा' इति, प्रतिभवनं प्राकारेषु–सालेषु अट्टालककपाटतोरणप्रतिद्वाराणि–अट्टालककपाटतोरणप्रतिद्वाररूपा देशभागा–देशविशेषा येषु तानि प्राकाराट्टालककपाटतोरणप्रतिद्वारदेशभागानि, तत्राट्टालकाः–प्राकारस्योपरि भृत्याश्रयविशेषाः कपाटानि–प्रतोलीद्वारसत्कानि, एतेन प्रतोल्यः सर्वत्र सूचिताः, अन्यथा कपाटानामसंभवात्, तोरणानि प्रतोलीद्वारेषु प्रतिद्वाराणि–स्थूलद्वारापान्तरालवर्तीनि लघुद्वाराणि,

तथा 'जंतसयग्घिमुसलमुसंढिपरिवारिया' इति यन्त्राणि–नानाप्रकाराणि शतघ्नयो–महायष्टयो महाशिला वा याः' पातिताः सत्यः पुरुषाणां शतानि घ्नन्ति मुशलानि–प्रतीतानि मुसण्ढयः–प्रहरणविशेषाः तैः परिवारितानि–समन्ततो वेष्टितानि, अत एवायोध्यानि–पर्योद्धुमशक्यानिअयोध्यत्वादेव च 'सदाजयानि' सदा–सर्वकालं जयो येषु तानि सदाजयानि, सर्वकालं जयवन्तीत्यर्थः, तथा सदा–सर्वकालं गुप्तानि प्रहरणैः पुरुषैश्च योद्ध भिः सर्वतः–समन्ततो निरन्तरं परिवारिततया परेषामसहमानानां मनागपि प्रवेशासंभवात्, 'अडयालकोट्ठगरइया' इति अष्टचत्वारिंशद्भेदभिन्नविच्छित्तिकलिताः कोष्ठका–अपवरका रचिताः–स्वयमेव रचनां प्राप्ता येषु तानि अष्टचत्वारिंशत्कोष्ठकरचितानि, सुखादिदर्शनात् पाक्षिको निष्ठान्तस्य परनिपातः,

तथा अष्टचत्वारिंशद्भेदभिन्नविच्छित्तयः कृता वनमाला येषुतानि अष्टचत्वारिंशत्कृतवनमालानि, अन्ये त्वमिदधति–अडयालशब्दो देशीवचनत्वात् प्रशंसावाची, ततोऽयमर्थः–प्रशस्तकोष्ठकरचितानि प्रशस्तकृतवनमालानीति, तथा क्षेमाणि–परकृतोपद्रवरहितानि, शिवानि–सदामङ्गलोपेतानि, तथा किङ्कराः–किङ्करभूता येऽमरास्तैर्दण्डैः कृत्वोपरक्षितानि सर्वतः–समन्ततो रक्षितानि किङ्करामरदण्डोपरक्षितानि, 'लाउल्लोइयमहिया' इति लाइयं नाम–यद् भूमेर्गोमयादिनोपलेपनं उल्लोइयं–कुड्यानां मालस्य च सेटिकादिभिः संमृष्टीकरणं, लाउल्लोइयाभ्यां महितानि–पूजितानि लाउल्लोइयमहितानि, तथा गोशीर्षेण–गोशीर्षनामकचन्दनेन सरसरक्तचन्दनेन च ददरेण–बहलेन चपेटाप्रकारेण वा दत्ताः पञ्चाङ्गुलयस्तला–हस्तका येषु तानि गोशीर्षसरसरक्तचन्दनददरदत्तपञ्चाङ्गुलितलानि, तथा उपचिता–निवेशिताः चन्दनकलशा–माङ्गल्यकलशा येषु तानि उपचितचन्दनकलशानि, 'चन्दनघडसुकयतोरणपडिदुवारदेसभागा' इति चन्दनघटैः–चन्दनकलशैः सुकृतानि सुष्ठुकृतानि शोभितानीति तात्पर्यार्थः यानि तोरणानि तानि चन्दनघटसुकृततोरणानि प्रतिद्वारदेशभागे येषु तानि चन्दनघटसुकृततोरणप्रतिद्वारदेशभागानि तथा

'आसत्तोसत्तविउलवट्टवग्घारियमल्लावा' इति आ–अवाङ्अधोभूमौ सक्त आसक्तो भूमौ लग्न इत्यर्थः ऊर्ध्वं सक्त उत्सक्तः उल्लोचकले उपरि संबद्ध इत्यर्थः विपुला–विस्तीर्णः वृत्तो–वर्तुलः 'वग्घारिय' इति प्रलम्बितो माल्यदामकलापः–पुष्पमालासमूहो येषु तान्यासक्तोत्सक्तविपुलवृत्त-प्रलम्बितमाल्यदामकलापानि, तथा पञ्चवर्णेन सुरभिणा मुक्तेन–क्षिप्तेन पुष्पपुञ्जलक्षणेन उपचारेण–पूजया कलितानिपञ्चवर्णसुरभिमुक्तपुष्पपुञ्जोपचारकलितानि,

'कालागुरुपवरकुन्दुरुक्कतुरुक्कधूवमघमघंतगन्धुद्धूयाभिरामे' इति कालागुरुः प्रसिद्धः प्रवरः–प्रधानः कुन्दुरुक्कः–चीडा तुरुष्कं–सिल्हकं कालागुरुश्च प्रवरकुन्दुरुक्कतुरुष्के च कालागुरु-प्रवरकुन्दुरुक्कतुरुष्काणि तेषां धूपस्य यो मघमघायमानो गन्ध उद्धूत –इतस्ततो विप्रसृतस्तेनाभिरामाणि–रमणीयानि कालागुरुप्रवरकुन्दुरुक्कतुरुष्कधूपमघमघायमानगन्धोद्धूताभिरामाणि, तथा शोभनो गन्धो येषां ते सुगन्धाः ते च ते वरगन्धाश्च–वासाः सुगन्धवरगन्धास्तेषां गन्धः स एवास्तीति सुगन्धवरगनधगन्धिकानि, ''अतोऽनेकस्वरात्'' इति इकप्रत्ययः, अत एव गन्धवर्तिभूतानि–सौरभ्यातिशयाद् गन्धद्रव्यगुटिकाकल्पानीति भावः, तथा अप्सरोगणानां संघः–समुदायः तेन सम्यक्–रमणीयताय विकीर्णानि–व्याप्तानि अप्सरोगणसङ्घविकीर्णानि, तथा दिव्यानां त्रुटितानाम्–आतोद्यानां वेणुवीणामृदङ्गादीनां ये शब्दास्तैः संप्रणदितानि –सम्यक्–श्रोतृमनोहारितया प्रकर्षेण सर्वकालं नदितानि–शब्दवन्ति,

'सर्वरत्नमयानि' सर्वात्मना–सामस्त्येन न त्वेकदेशेन रत्नमयानि समस्तरत्नमयानि वा, अच्छानि–आकाशस्फटिकवदतिस्वच्छानि, श्लक्ष्णानि–श्लक्ष्णपुद्गलस्कन्धनिष्पन्नानि श्लक्ष्णद-लनिष्पन्नपटवत्, 'लण्हानि' मसृणानि घुण्टितपटवत्, 'घट्ठा' इति घृष्टानीव घृष्टानि खरशाणया पाषाणप्रतिमावत्, 'मट्ठा' इति, मृष्टानि, सुकुमारशाणया पाषाणप्रतिमेव,

अत एव नीरजांसि स्वाभाविकरजोरहितत्वाद् निर्मलानि आगन्तुकमलाभावात् निष्पङ्कानि–कलङ्कविकलानि कर्दमरहितानि वा 'निक्कंकडच्छाया' इति निष्कङ्कटा–निष्कवचा निरावरणा निरुपघातेति भावार्थः छाया–दीप्तिर्येषां तानि निष्कङ्कटच्छायानि, सप्रभाणि–स्वरूपतः प्रभावन्ति, समरीचीनिबहिर्विनिर्गतकिरणजलानि, सोद्योतानि–बहिव्यवस्थितवस्तुस्तोमप्रकाशनकराणि, 'प्रसादीयानि' प्रसादाय–मनःप्रसत्तये हितानि प्रसादीयानि–मनःप्रसत्तिकारीणीति भावः, तथा दर्शनीयानि–दर्शनयोग्यानि यानि पश्यतः चक्षुषी न श्रमं गच्छत इति तात्पर्यार्थः 'अभिरूपा' इति अभि–सर्वेषां द्रष्टृणां मनःप्रसादानुकूलतया अभिमुखं रूपं येषां तानि अभिरूपाणि अत्यन्त-कमनीयानीत्यर्थः,अत एव 'पडिरूवा' इति प्रतिविशिष्टं रूपं येषां तानि प्रतिरूपाणि, अथवा प्रतिक्षणं नवं नवं रूपं येषां तानि प्रतिरापाणि ।

मू. (२०४) *असुरा नाग सुवन्ना विज्जू अग्गी य दीव उदही य ।*
सिपवणथणियनामा दसहा एए भवणवासी ॥

मू. (२०५) *चूडामणिमउडरयणभूसणणागफडगरुलवइरपुन्नकलसंकउप्फेसा सीहमवरगयंक- अस्सवरवद्धमाणनिउत्तचित्तचिंधगता सुरूवा महड्ढिया महज्जुइआ महब्बला महायसा महानुभावा महासोक्खा हारविराइअवच्छा कडगतुडियथंभियभुआ अंगदकुंडलमट्ठगंड-तलकन्नपीढधारी विचित्तहत्थाभरणा विचित्तमालामउलिमउडा कल्लाणगपवरत्थपरिहिया*

कल्लाणगपवरमल्लाणुलेवण- धरा भासुरबोंदिपलंबवणमालधरा दिव्वेणं वन्नेणं दिव्वेणं गंधेणं दिव्वेणं फासेणं दिव्वेणं संघयणेणं दिव्वेणं संठाणेणं दिव्वाए इड्ढीए दिव्वाए जुईए दिव्वाए पभाए छायाए दिव्वाए अच्चीए दिव्वेणं तेएणं दिव्वाए लेसाए दस दिसाओ उज्जोवेमाणा पभासेमाणा।

ते णं तत्थ साणं साणं भवणावाससयसहस्साणं साणं साणं सामानियसाहस्सीणं साणं साणं तायत्तीसाणं साणं साणं लोगपालाणं साणं साणं अग्गमहिसीणं साणं साणं परिसाणं साणं साणं अनिआणं साणं साणं अनिआहिवईणं साणं साणं आयरक्खदेवसाहस्सीणं –

–अन्नेसिं च बहूणं भवणवासीणं देवाण य देवीण य आहेवच्चं पोरेवच्चं सामित्तं भट्टित्तं महत्तरगत्तं आणाईसरसेणावच्चं कारेमाणा पालेमाणा महताहतनट्टगीयवाइयतंतितलतालतुडिय-घणमुइंगपडुप्पवाइयरवेणं दिव्वाइं बोगबोगाइं भुंजमाणा विहरंति।

वृ. 'एते भवणवासी' इत्यादि, एते अनन्तरोक्ता असुरकुमारादयो भवनवासिनो यथाक्रमं चूडामणिमुटुकटरत्नभूषणनियुक्तानागस्फटादिचित्रचिह्नधराश्च, तथाहि–असुरकुमारभवन-वासिनश्च चूडामणिमुकुटरत्नाः, चूडामणिर्नाम मुकुटे रत्नं चिह्नभूतं येषां ते तथा, नागकुमारा भूषणनियुक्तनागस्फटारूपचिह्नधराः, सुवर्णकुमारा भूषणनियुक्तगरुडरूपचिह्नधराः, विद्युत्कुमारा भूषणनियुक्तवज्ररूपचिह्नधराः, वज्रं नाम शक्रस्यायुधं, अग्निकुमारा मुकुटनिक्तपूर्णकलशरूप-चिह्नधराः, द्वीपकुमारा भूषणनियुक्तसिंहरूप (चिह्न) धराः, उदधिकुमारा भूषणनियुक्तहयवररूप-चिह्नधराः दिक्कुमारा भूषणनियुक्तगजरूपचिह्नधराः, वायुकुमारा भूषणनियुक्तमकररूपचिह्नधराः, स्तनितकुमारा भूषणनियुक्तवरवर्द्धमानरूपचिह्नधराः, वर्द्धमानकं–शरावसंपुटं।

अक्षरगमनिका त्वेवम्–भूषणेषु नागस्फटागरुडवज्राणि येषां ते भूषणनागस्फटागरुड-वज्राः, पूर्णकलशेनाङ्कित उप्फे सो–मुकुटो येषां ते पूर्णकलशाङ्कितोप्फेसाः, तथा सिंहहयवरगजा अङ्का अर्थाद् भूषणेषु येषां ते सिंहहयवरगजाङ्काः, तथा मकरवर्द्धमानके नियुक्ते–भूषणेषु नियोजिते चित्रे–आश्चर्यभूते चिह्ने गते–स्थिते येषां ते मकरवर्द्धमानकनियुक्तचित्रचिह्नगतास्ततः पूर्वपदैर्द्वन्द्वसमासः।

पुनः सर्वे कथंभूताः ? इत्याह–'सुरूपाः' शोभनं रूपं येषां ते तथा, अत्यन्तकमनीयरूपा इत्यर्थः, तथा 'महिड्ढिया' इति महती ऋद्धिः–भवनपरिवारादिका येषां ते महर्द्धिकाः, तथा महती द्युतिः–शरीरगता आभरणगता च येषामिति महाद्युतयः, तथा महद् बलं–शारीरः प्राणो येषां ते महाबलाः, तथा महद् यशः–ख्यातिर्येषां ते महायशसः तथा महाननुभागः–सामर्थ्ये शापानुग्रहविषयं येषां ते महानुभागाः, तथा 'महेसक्खा' इति महान् ईश–ईश्वर इत्याख्या–प्रसिद्धिर्येषां ते महेशाख्याः, अथवा ईशनमीशो भावे धञ्प्रत्ययः ऐश्वर्यमित्यर्थः 'ईश ऐश्वर्ये' इति वचनात् तमीशम्–ऐश्वर्यमात्मनां ख्यान्ति–अन्तर्भूतण्यर्थतया ख्यापयन्ति प्रथयन्ति इतिईशाख्याः महान्तश्च ते ईशाख्याश्च महेशाख्याः, क्वचिद् 'महासोक्खा' इति पाठः तत्र महत् सौख्यं प्रभूतसद्वेद्योदयवशाद् येषां ते महासौख्याः, अन्ये पठन्ति–'महासक्खा' इति, तत्रायं शब्दासंस्कारो–महाश्वाक्षाः,

इयं चात्र पूर्वसूरिप्रदर्शिता व्युत्पत्तिः–आशुगमनावश्वो–मनः अक्षाणि चेत्यश्वाक्षाणि महान्त्यश्वाक्षाणि येषां ते महाश्वाक्षाः, 'हारविराइयवच्छा' इति हारैर्विराजितं वक्षो येषां ते हारविरा-जितवक्षसः, 'कडगतुडियथंभियभुया' इति कटकानि–कलाचिकाऽऽभरणानि त्रुटितानि–बाहुर-

श्रकास्तैः स्तम्भितौ इव स्तम्भितौ भुजौ येषां ते कटकत्रुटितस्तम्भितभुजाः, तथा अङ्गदानि–बाहुशीर्षाऽऽभरणविशेषरूपाणि कुण्डले–कर्णाभरणविशेषरूपे तथा मृष्टौ–मष्टीकृतौ गण्डौ–कपोलौ यैस्तानि मृष्टगण्डानि, कर्णपीठानि–कर्णाभरणविशेषरूपाणि धारयन्तीत्येवंशीला अङ्गदकुण्डलमृष्टगण्डकर्णपीठधारिणः, तथा विचित्राणि–नानारूपाणि हस्ताभरणानि येषां ते विचित्रहस्ताभरणाः, तथा 'विचित्तमालामउलिमउडा' विचित्रा माला–कुसुमस्रग् मौलौ–मस्तके मुकुटं च येषां ते विचित्रमालामौलिमुकुटाः,तथा कल्याणकं–कल्याणकारि प्रवरं वस्त्रं परिहितं यैस्ते कल्याकप्रवरवस्त्रपरिहिताः, सुखादिदर्शनाद् निष्ठन्तस्यात्र पाक्षिकः परनिपातः,

तथा कल्याणकं–कल्याणकारि यत् प्रवरं माल्यं–पुष्पदाम यच्चानुलेपनं तद् धरन्तीति कल्याणकप्रकारमाल्यानुलेपनधराः, तथा भास्वरा–देदीप्यमाना बोन्दिः–स्त्रीशरीरं येषां ते भास्वरबोन्दयः, तथा प्रलम्ब इति–प्रलम्बा या वनमाला ता धरन्तीति प्रलम्बवनमालाधराः 'दिव्वेणं संघयणेणं' ति शक्तिविशेषमपेक्ष्य संहननेनेव संहननेन न तु साक्षात् संहननेन, देवानां संहननासंभवात्, संहननं हि अस्थिरचनात्मकं, न च देवानां अस्थीनि सन्ति, तथा चोक्तं जीवाभिगमे–

"देवा असंघयणी, जम्हा तेसिं नेवट्ठी नेव सिरा" इत्यादि, 'दिव्वाए इड्ढीए' दिव्यया–प्रधानया ऋध्या–परिवारादिकया दिव्यया द्युत्या–इष्टार्थसंप्रयोगलक्षणया 'द्यु अभिगमने' इति वचनात्, दिव्यय प्रभया–भवनावासगतया, दिव्यय छायया–समुदाय शोभया, दिव्येनार्चिषा–शरीरस्थरत्नादितेजोज्वालया, दिव्येन तेजसा शरीरप्रभवेन, दिव्यया लेश्यया–देहवर्णसुन्दरतया दश दिशः उद्योतयन्तः–प्रकाशयन्तः 'पभासेमाणा' शोभमानास्ते भवनवासिनो देवा 'णं' इति वाक्यालङ्कारे, तत्र स्वस्थाने 'साणं साणं' इति स्वेषां स्वेषामात्मीयात्मीयानामित्यर्थः,

'आहेवच्चं पोरेवच्चं' इत्यादि अधिपतेः कर्म आधिपत्यं रक्षा इत्यर्थः, सा च रक्षा सामान्येनाप्यारक्षकेणेव क्रियते तत आह–पुरस्य पतिः पुरपतिः तस्य कर्म पौरपत्यं सर्वेषामात्मीयनामग्रेसरत्वमिति भावः, तच्चाग्रेसरत्वं नायकत्वमन्तरेणापि स्वनायकनियुक्ततथाविधगृहचिन्तकसामान्यपुरुषस्येव भवति ततो नायकत्वप्रतिपत्त्यर्थमाह–स्वामित्वं–स्वमस्यास्तीति स्वामी तद्भावः स्वामित्वं नायकत्वमित्यर्थः, तदपि च नायकत्वं कस्यचित् पोषकत्वमन्तरेणापि भवति यथा हरिणाधिपतेर्हरिणस्य तत आह–भर्तृ–त्वं–पोषकत्वं, अत एव महत्तरकत्वं, तदपि महत्तरकत्वं कस्यचिदात्राविकलस्यापि भवति यथा कस्यचिद् वणिजः स्वदासवर्गं प्रति तत आह–

'आणाईसरसेणावच्चं' आज्ञाया ईश्वर आज्ञेश्वरः सेनायाः पतिः सेनापतिः आज्ञेश्वरश्चासौ सेनापतिश्च आज्ञेश्वरसेनापतिस्तस्य कर्म आज्ञेश्वरसेनापत्यं स्वस्वसैन्यं प्रत्यद्भुतमाज्ञाप्राधान्यमिति भावः, कारयन्तोऽन्यैर्नियुक्तकैः पुरुषैः पालयन्तः स्वयमेव महता रवेणेति योगः, 'अहयत्ति आख्यानकप्रतिबद्धानि यदिवा अहतानि–अव्याहतानि नित्यानुबन्धीनीति भावः ये नाट्यगीतेनाट्यं–नृत्यं गीतं–गानं यानि च वादितानि–तन्त्रीतलतालत्रुटितानि तत्र तन्त्री–वीणा तलौ–हस्ततली तालः–कंसिका त्रुटितानि–वादित्राणि तथा यश्च घनमृदङ्गः पटुना पुरुषेणप्रवादितः तत्र घनमृदङ्गो नाम घनसमानध्वनिर्यो मृदङ्गः,

तत एतेषां द्वन्द्वः, तेषां रवेण दिव्यान्–दिवि भवान् प्रधानिति भावः, भोगार्हाः भोगाः–शब्दादयो भोगभोगास्तान् भुञ्जाना 'विहरन्ति' आसते ॥

मू. (२०५-चतति)) कहि णं भंते ! असुरकुमाराणं देवाणं पज्जत्तापज्जत्ताणं ठाणा प० ?, कहि णं भंते ! असुरकुमारा देवा परिवसंति ?, गोयमा ! इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरि एगं जोयणसहस्सं ओगाहित्ता हेट्ठा चेगं जोयणसहस्सं वज्जित्ता मज्झे अट्ठहुत्तरे जोयणसयसहस्से एत्थ णं असुरकुमाराणं देवाणं चउसट्ठिं भवणावाससयसहस्सा भवंतीति मक्खायं । ते णं भवणा बाहिं वट्टा अंतो चउरंसा अहे पुक्खरकण्णियासंठाणसंठिया उक्किण्णंतरविउलगंभीरखायफलिहा पागारट्टालयकवाडतोरणपडिदुवारदेसभागा जंतयसयग्घिमुसलमुसंढिपरियारिया अउज्झा सदाजया सदागुत्ता अडयालकोट्ठगरइया अडयालकयवणमाला खेमा सिवा किंकरामरदंडोवरक्खिया लाउल्लोइयमहिया गोसीससरसरत्तचंदणदद्दरदिन्नपंचंगुलितला उवचितचंदनकलसा चंदनघडसुकयतोरणपडिदुवारदेसभागा आसत्तोसत्तविउलवट्टवग्घारिय- मल्लदामकलावा पंचवन्नसरसुरभिमुक्कपुप्फपुंजोवयारकलिया –

–कालागुरुपवरकुंदुरुक्कतुरुक्कडज्झंतधूवमघमघंतगंधुद्धुयाभिरामा सुगंधवरगंधिया गंधवट्टिभूया अच्छरगणसंघसंविगिन्ना दिव्वतुडियसद्दसंपणादिया सव्वरयणामया अच्छा सण्हा लण्हा घट्ठा मट्ठा नीरया निम्मला निप्पंका निक्कंकडच्छाया सप्पभा सस्सिरीया समिरीया सउज्जोया पासादीया दरिसणिज्जा अभिरूवा पडिरूवा एत्थ णं असुरकुमाराणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता,

उववाएणं लोयस्स असंखेज्जइभागे, समुग्घायेणं लोयस्स असंखेज्जइभागे, सट्ठाणेणं लोयस्स असंखेज्जइभागे, तत्थ णं बहवे असुरकुमारा देवा परिवसंति, काला लोहियक्खतिव्वोट्ठा धवलपुप्फदंता असियकेसा वामे एगकुंडलधरा अहचंदनानुलित्तगत्ता ईसीसिलिंधपुप्फपगासाइं असंकिलिट्ठाइं सुहुमाइं वत्थाइं पवरपरिहिया वयं च पढमं समइक्कंता बिइयं च वयं असंपत्ता भद्दे जोव्वणे वट्टमाणा तलभंगयतुडियपवरभूसणनिम्मलमणिरयणमंडितभुया दसमुद्दामंडियग्गहतअथा चूडामणिविचित्तविंधगया सुरूवा महिड्ढिया महज्जुइया जाव महासोक्खा हारविराइयवच्छा कडयतुडियथंभियभुया अंगयकुंडलमट्ठगंडयलकन्नपीढधारी विचित्तहत्थाभरणा विचित्तमालामउली कल्लाणगपवरवत्थपरिहिया कल्लाणगमल्लाणुलेवणधरा भासुरबोंदी पलंबवणमालधरा ।–

–दिव्वेणं वन्नेणं दिव्वेणं गंधेणं दिव्वेणं फासेणं दिव्वेणं संघयणेणं दिव्वेणं संठाणेणं दिव्वाए इड्ढीए दिव्वाए जुईए दिव्वाए पभाए दिव्वाए छायाए दिव्वाए अच्चीए दिव्वेणं तेएणं दिव्वाए लेसाए दस दिसाओ उज्जोवेमाणा पभासेमाणा ते णं तत्थ साणं साणं भवणावाससयसहस्साणं साणं साणं सामानियसाहस्सीणं साणं साणं तायत्तीसाणं साणं साणं लोगपालाणं साणं साणं अग्गमहिसीणं साणं साणं परिसाणं साणं साणं अनियाणं साणं साणं अनियाहिवईणं साणं साणं आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं भवणवासीणं देवाण य देवीण य आहेवच्चं पोरेवच्चं सामित्तं भट्टित्तं महत्तरगत्तं आणाईसरसेणावच्चं कारेमाणा पालेमाणा महताहतनट्टगीतवाइयतंतीतलतालतुडियघणमुइंगपडुप्पवाइयरवेणं दिव्वाइं भोगभोगाइं भुंजमाणा विहरंति ।।

चमरबलिणो इत्थ दुवे असुरकुमारिंदा असुरकुमारायणो परिवसंति, काला महानीलसरिसा णीलगुलिअगवलयअसिकुसुमप्पगासा वियसियसयवत्तणिम्मलईसिसितरत्ततंबणयणा गरुलायतउज्जुतुंगनासा उवचियसियप्पवालबिंबफलसंनिहाहरोट्ठा पंडुरससिसगलविमलनिम्मल-

दहिधणसंखगोक्खीरकुंददगरयमुणालियाधवलदंतसेढीहुयवहनिद्धंतधोयततततवनिज्जरत्ततलतालुजीहा अंजणघणकसिणगरुयगरमणिज्जणिद्धकेसा वामेयकुंडलधरा अद्दचंदनानुलित्तगत्ता ईसिसिलिंधपुप्फपगासाइं असंकिलिट्ठाइं सुहुमाइं वत्थाइं पवरपरिहिया वयं च पढमं समइक्कंता बइयं तु असंपत्ता भद्दे जोव्वणे वट्टमाणा तलभंगयतुडियपवरभूसणणिम्मलमणिरयणमंडियभुया दसमुद्दामंडियग्गहत्था चूडामणिचित्तचिंधगया

-सुरूवा महड्ढिया महज्जुईआ महायसा महाबला महानुभागा महासोक्खा हारविराइयवच्छा कडयतुडियथंभियभुया अंगदकुंडलमट्ठगंडतलकन्नपीढधारी विचित्तहत्थाभरणा विचित्तमालामउली कल्लाणगपवरवत्थपरिहिया कल्लाणगपवरमल्लाणुलेवणधरा भासुरबोंदी पलंबवणमालधरा दिव्वेणं वन्नेणं दिव्वेणं गंधेणं दिव्वेणं फासेणं दिव्वेणं संघयणेणं दिव्वेणं संठाणेणं दिव्वाए इड्ढीए दिव्वाए जुईए दिव्वाए पभाए दिव्वाए छायाए दिव्वाए अच्चीए दिव्वेणं तेएणं दिव्वाए लेसाए दस दिसाओ उज्जोवेमाणा पभासेमाणा ते णं तत्थ साणं साणं भवणावाससयसहस्साणं साणं साणं सामानियसाहस्सीणं साणं साणं तायत्तीसाणं साणं साणं लोगपालाणं साणं साणं अग्गमहिसीणं साणं साणं परिसाणं साणं साणं अनियाणं साणं साणं अनियाहिवईणं साणं साणं आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं भवणवासीणं देवाण य देवीण य आहेवच्चं पोरेवच्चं सामित्तं भट्टित्तं महत्तरगत्तं आणाईसरसेणावच्चं कारेमाणा पालेमाणा महयाहतनट्टगीयवाइयतंतीतलतालतुडियघणमुइंगपडुप्पवाइयरवेणं दिव्वाइं भोगभोगाइं भुंजमाणा विहरंति ।

वृ. असुरकुमारसूत्रे कालाः-कृष्णवर्णाः 'लोहियक्खाबिम्बोट्ठा' लोहिताक्षरत्नवद् बिम्बीफलवद्वा ओष्ठौ येषां ते लोहिताक्षबिम्बोष्ठाः, आरक्तोष्ठा इति भावः, धवलपुष्पदन्तसमाख्यात् कुन्दकलिका इव दन्ता येषां ते धवलपुष्पदन्ताः, असिताः-कृष्णाः केशा येषां ते असितकेशाः, दन्ताः केशाश्चामीषां वैक्रिया द्रष्टव्याः, न स्वाभाविकाः, वैक्रियशरीरत्वात् 'वामेय (एग) कुंडलधराः एककवर्णावसक्तकुण्डलधारिणः, तथा आर्द्रेण-सरसेन चन्दनेनानुलिप्तं गात्रं यैस्ते आर्द्रचन्दनानुलिप्तगात्राः, तथा ईषद्-मनाक् शिलिन्ध्रपुष्पकाशानि-शिलिन्ध्रपुष्पसदृशवर्णानि ईषद्रक्तानीत्यर्थः असंक्लिष्टानि-अत्यन्तसुखजनकतया मनागपि संक्लेशानुत्पादकानि सूक्ष्माणि-मृदुलघुस्पर्शानि अच्छानि चेति भावः वस्त्राणि प्रवराणि अत्र सूत्रे विभक्तिलोपः प्राकृतत्वात् 'परिहिता;' परिहितवन्तः, तथा वयः प्रथमं-कुमारत्वलक्षणमतिक्रान्तास्तत्परयन्तवर्तिन इति भावः द्वितीयं च-मध्यमलक्षणं वयोऽसंप्राप्ताः, एतदेव व्यक्तीकरोति-भद्रे-अतिप्रशस्ये यौवने वर्तमानाः 'तलभंगयतुडियवरभूसण- निम्मलमणिरयणमंडियभुजा' इति तलभङ्गका-बाह्याभरणविशेषाः तुटितानि-बाहुरक्षिकाः अन्यानि च यानि वराणि भूषणानि बाह्याभरणानि तेषु ये निर्मला मणयः-चन्द्रकान्ताद्या यानि रत्नानि च-इन्द्रनीलादीनि तैर्मण्डितौ भुजौ-हस्ताग्रौ येषां ते तथा, तथा दशभिर्मुद्राभिर्मण्डितौ अग्रहस्तौ येषां ते दशमुद्रामण्डिताग्रहस्ताः, 'चूडामणिविचित्तचिंधगया' इति चूडामणिनामकं चित्रम्-अद्भुतं चिह्नं गतं स्थितं येषां ते चूडामणिचित्रचिह्नगताः ॥

थमरबलिसामान्यसूत्रे कालाः-कृष्णवर्णाः, एतदेवोपमानतः प्रतिपादयति-'महानीलसरिसा' महानीलं यत् किमपि वस्तुजातं लोके प्रसिद्धं तेन सदृशाः, एतदेव व्याचष्टे-नीलगुटिका-नील्या गुटिका गवलं-माहिषं शृङ्गं अतसीकुसुमंप्रतीतं तेषामिव प्रकाशः-प्रभा येषां ते नीलगुटिकागव-

वलातसीकुसुमप्रकाशाः, तथा विकसितशतपत्रमिव निर्मले ईषद्–देशविभागेन मनाक् सिते रक्ते ताम्रे च नयने येषां ते विकसितशतपत्रनिर्मलेषत्सितरक्तताम्रनयनाः, गरुडस्येवायता–दीर्घा ऋज्वी–अकुटिला तुङ्गा–उन्ता नासा–नासिका येषां ते गरुडायतर्जुतुङ्गनासाः,

तथा उवचियं–तेजितं यत् शिलाप्रवालं–विद्रुमरलं यश्च बिम्बफलं–बिम्ब्याः सत्कं फलं तत्सन्निभोऽधरोष्ठो येषां ते तथा, तथा पाण्डुरं न तु सन्ध्याकालभाव्यारक्तं शशिव्यकलं–चन्द्रखण्डं तदपि च कथंभूतमित्याह–विमलं–रजसा रहितं कलङ्कविकलं वा तथा निर्मलो यो दधिघनः शङ्खो गोक्षीरं यानि कुन्दानि–कुन्दकुसुमानि दकरजः–पानीयकणाः मृणालिका च तद्वद् धवला दन्तश्रेणिर्येषां ते तथा, विमलशब्दस्य विशेष्यात् परनिपातः प्राकृतत्वात्,

तथा हुतवहेन–वैश्वानरेण निष्मातं सद् यज्जायते धौतं–निर्मलं तप्तम्–उक्तचसं तपनीयमारक्तं सुवर्णं तद्वद् रक्तानि हस्तपादतलानि तालुजिह्वे च येषां ते हुतवहनिष्मातधौततप्ततपनीयरक्ततलतालुजिह्वाः, तथा अञ्जनं–सौवीराञ्जनं घनः–प्रावृट्कालभावी मेघस्तद्वत्कृष्णा रुचकरलवद रमणीया स्निग्धाश्च केशा येषां ते अञ्जनघनकृष्णरुचकरमणीयस्निग्धकेशाः ॥

मू. (२०५-वर्त्तते) कहिं णं भंते ! दाहिणिल्लाणं असुरकुमाराणं देवाणं पज्जत्तापज्जत्ताणं ठाणा प० ?, कहि णं भंते ! दाहिणिल्ला असुरकुमारा देवा परिवसंति ?, गोयमा ! जंबूदीवे दीवे मंदरस्स पव्वयस्स दाहिणेणं इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहित्ता हिट्ठा चेगं जोयणसहस्सं वज्जित्ता मज्झे अट्ठहुत्तरे जोयणसयसहस्से एत्थ णं दाहिणिल्लाणं असुरकुमाराणं देवाणं चउत्तीसं भवणावाससयसहस्सा भवन्तीति, मक्खायं, ते णं भवणा बाहिं वट्टा अंतो चउरंसा सो चेव वण्णओ जाव पडिरूवा, एत्थ णं दाहिणिल्लाणं असुरकुमाराणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता, तीसुवि लोगस्स असंखेज्जइभागे, तत्थ णं बहवे दाहिणिल्ला असुरकुमारा देवा देवीओ परिवसंति, काला लोहियक्खा तहेव जाव भुंजमाणा विहरंति, एएसिणं तहेव तायत्तीसगलोगपाला भवंति, एवं सव्वत्थ भाणियव्वं ।

भवणवासी णं चमरे इत्थ असुरकुमारिंदे असुरकुमारराया परिवसति काले महानीलसरिसे जाव पभासेमाणे, से णं तत्थ चउतीसाए भवणावाससयसहस्साणं चउसट्ठीए सामानियसाहस्सीणं तायत्तीसाए तायत्तीसगाणं चउण्हं लोगपालाणं पंचण्हं अग्गमहिसीणं सपरिवाराणं तिण्हं परिसाणं सत्तण्हं अनियाणं सत्तण्हं अनियाहिवईणं चउण्ह य चउसट्ठीणं आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं दाहिणिल्लाणं देवाणं देवीण य आहेवच्चं पोरेवच्चं जाव विहरंति ॥

कहि णं भंते ! उत्तरिल्लाणं असुरकुमाराणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता ?, कहि णं भंते ! उत्तरिल्ला असुरकुमारा देवा परिवसंति ?, गोयमा ! जंबूदीवे दीवे मंदरस्स पव्वयस्स उत्तरेणं इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहित्ता हट्ठा चेगं जोयणसहस्सं वज्जित्ता मज्झे अट्ठहुत्तरे जोयणसयसहस्से एत्थ णं उत्तरिल्लाणं असुरकुमाराणं देवाणं तीसं भवणावाससयसहस्सा भवंती मक्खायं,

ते णं भवणा बाहिं वट्टा अंतो चउरंसा सेसं जहा दाहिणिल्लाणं जाव विहरंति, बली एतत्थ वइरोयणिंदे वइरोयणराया परिवसति काले महानीलसरिसे जाव पभासेमाणे । से णं तत्थ तीसाए भवणावाससयसहस्साणं सट्ठीए सामानियसाहस्सीणं तायत्तीसाए तायत्तीसगाणं चउण्हं लोगपालाणं

पंचण्हं अग्गमहिसीणं सपरिवाराणं तिण्हं परिसाणं सत्तण्हं अनियाणं सत्तण्हं अनियाहिवईणं चउण्ह य सट्ठीणं आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं उत्तरिल्लाणं असुरकुमाराणं देवाण य देवीण य आहेवच्चं पोरेवच्चं कुव्वमाणे विहरइ ॥ कहि णं भंते ! नागकुमाराणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता ?, कहि णं भंते ! नागकुमारा देवा परिवसंति ?, गोयमा ! इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसय- सहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहित्ता हेट्ठा चेगं जोयणसहस्सं वज्जित्ता मज्झे अट्ठहुत्तरे जोयणसयसहस्से एत्थ णं नागकुमाराणं देवाणं पज्जत्तापज्जत्ताणं चुलसीइ भवणावा- ससयसहस्सा भवंतीतिमक्खायं,

ते णं भवणा बाहिं वट्टा अंतो चउरंसा जाव पडिरूवा, तत्थ णं नागकुमाराणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता, तीसुवि लोगस्स असंखेज्जइभागे, तत्त णं बहवे नागकुमारा देवा परिवसंति महिड्ढिया महज्जुईआ सेसं जहा ओहियाणं जाव विहरंति । धरणभूयानंदा एत्थ णं दुवे नागकुमारिंदा नाग-कुमाररायाणो परिवसंति महड्ढिया सेसं जहा ओहियाणं जाव विहरंति ।

कहि णं भंते ! दाहिणिल्लाणं नागकुमाराणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता ?, कहि णं भंते ! दाहिणिल्ला नागकुमारा देवा परिवसंति ?, गोयमा! जंबूदीवे दीवे मंदरस्स पव्वयस्स दाहिणेणं इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्सं ओगाहित्ता हट्ठा चेगं जोयणसहस्सं वज्जित्ता मज्झे अट्ठहुत्तरे जोयणसयसहस्से एत्थ णं दाहिणिल्लाणं नागकुमाराणं देवाणं चउयालीसं भवणावाससयसहस्सा भवन्तीतिमक्खायं,

ते णं भवणा बाहिं वट्टा जाव पडिरूवा, एत्थ णं दाहिणिल्लाणं नागकुमाराणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता, तीसुवि लोयस्स असंखेज्जइभागे, एत्थ णं दाहिणिल्ला नागकुमारा देवा परिवसंति महिड्ढिया जाव विहरंति, धरणे इत्थ नागकुमारिंदे नागकुमारराया परिवसइ महड्ढिए जाव पभासेमाणे से णं तत्थ चउयालीसाए भवणावाससयसहस्साणं छण्हं सामानियसाहस्सीणं तायत्तीसाए तायत्तीसगाणं चउण्हं लोगपालाणं छण्हं अग्गमहिसीणं सपरिवाराणं तिण्हं परिसाणं सत्तण्हं अनियाणं सत्तण्हं अनियाहिवईणं चउव्वीसाए आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं दाहिणिल्लाणं नागकुमाराणं देवाण य देवीण य आहेवच्चं पोरेवच्चं कुव्वमाणे विहरइ ।

कहि णं भंते उत्तरिल्लाणं नागकुमाराणं देवाणं पज्जत्तापज्जत्ताणं ठाण पन्नत्ता ?, कहि ण भंते ! उत्तरिल्ला नागकुमारा देवा परिवसंति ?, गोयमा ! जंबुद्दीवे दीवे मंदरस्स पव्वयस्स उत्तरेण इमीसे रयणप्पभाए पुढवीए असीउत्तरजोयणसयसहस्सबाहल्लाए उवरिं एगं जोयणसहस्स ओगाहित्ता हेट्ठा चेगं जोयणसहस्सं वज्जित्ता मज्झे अट्ठहुत्तरे जोयणसयसहस्से एत्थ णं उत्तरिल्लाण नागकुमाराणं देवाणं चत्तालीसं भवणावाससयसहस्सा भवन्तीतिमक्खायं,

ते णं भवणा बाहिं वट्टा सेसं जहा दाहिणिल्लाणं जाव विहरंति, भूयाणंदे एत्थ नागकुमारिं नागकुमारराया परिवसइ, महिड्ढीए जाव पभासेमाणे, से णं तत्थ चत्तालीसाए भवणावाससयसह स्साणं आहेवच्चं जाव विहरिइ ॥ कहि णं भंते ! सुवन्नकुमाराणं देवाणं पज्जत्तापज्जत्ताणं ठाण पन्नत्ता ?, कहि णं भंते ! सुवन्नकुमारा देवा परिवसंति ?, गोयमा ! इमीसे रयणप्पभाए पुढवी जाव एत्थ णं सुवन्नकुमाराणं देवाणं बावत्तरि भवणावाससयसहस्सा भवंतीतिमक्खायं ।

ते णं भवणा बाहिं वट्टा जाव पडिरूवा, तत्थ णं सुवन्नकुमाराणं देवाणं पज्जत्तापज्जत्ता

ठाणा पन्नत्ता, जाव तिसुवि लोगस्स असंखेज्जइभागे, तत्थ णं बहवे सुवन्नकुमारा देवा परिवसंति महिड्ढिया सेसं जहा ओहियाणं जाव विहरंति, वेणुदेवे वेणुदाली य इत्थ दुवे सुवण्णकुमारिंदा सुवण्णकुमाररायाणो परिवसंति, महड्ढिया जाव विहरंति।

कहि णं भंते! दाहिणिल्लाणं सुवण्णकुमाराणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता?, कहि णं भंते! दाहिणिल्ला सुवण्णकुमारा देवा परिवसंति?, गोयमा! इमीसे जाव मज्झे अट्ठहुत्तरे जोयणसयसहस्से एत्थ णं दाहिणिल्लाणं सुवण्णकुमाराणं अट्ठतीसं भवणावाससयसहस्सा भवन्तीतिमक्खायं। ते णं भवणा बाहिं वट्टा जाव पडिरूवा, एत्थ णं दाहिणिल्लाणं सुवण्णकुमाराणं पज्जत्ताप- ज्जत्ताणं ठाणा पन्नत्ता, तिसुवि लोगस्स असंखेज्जइभागे, एत्थ णं बहवे सुवण्णकुमारा देवा परिवसंति, वेणुदेवे चये इत्थ सुवत्रिंदे सुवन्नकुमारराया परिवसइ, सेसं जहा नागकुमाराणं कहि णं भंते! उत्तरिल्लाणं सुवन्नकुमाराणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता?,

कहि णं भंते! उत्तरिल्ला सुवन्नकुमारा देवा परिवसंति?, गोयमा! इमीसे रयणप्पभाए जाव एत्थ णं उत्तरिल्लाणं सुवन्नकुमाराणं चउतीसं भवणावाससयसहस्सा भवन्तीतिमक्खायं,

ते णं भवणा जाव एत्थ णं बहवे उत्तरिल्लाणं सुवन्नकुमारा देवा परिवसंति महिड्ढिया जाव विहरंति, वेणुदाली इत्थ सुवन्नकुमारिंदे सुवन्नकुमारराया परिवसइ महिड्ढीए सेसं जहा नागकुमाराणं ॥ एवं जहा सुवन्नकुमाराणं वत्तव्वया भणिया तहा सेसाणवि चउदसण्हं इंदाणं भाणियव्वा, नवरं भवणनाणत्तं इंदनाणत्तं वन्ननाणत्तं परिहाणनाणत्तं च इमाहिं गाहाहिं अनुगंतव्वं–

मू. 'तीसुवि लोगस्स असंखेऊइभागे' इति स्वस्थानोपपातसमुद्घातरूपेषु त्रिष्वपि स्थानेषु लोकस्यासंख्येतमे भागे वक्तव्यानि। 'चउसट्ठिं असुराणं' इत्यादिगाथाद्वयं सामान्यतोऽसुरकुमारादीनां भवनसंख्याप्रतिपादकं सुगमं। 'चउतीसा चउयाला' इत्यादिका गाथा दाक्षिणात्यानामसुरकुमारादीनां भवनसंख्याऽभिधायिका,

तस्या व्याख्या–दक्षिणतोऽसुरकुमाराणं भवनानि चतुस्त्रिंशच्छतसहस्राणि, नागकुमाराणां चतुश्चत्वारिंशत्, सुवर्णकुमाराणामष्टात्रिंशत्, वायुकुमाराणां पञ्चाशत् द्वीपदिगुदधिविद्युत्स्तनिताग्निकुमाराणां षण्णां प्रत्येकं चत्वारिंछतसहस्राणि भवनाना ॥

'तीसा चत्तालीसा' इत्यादि, उत्तरतः–उत्तरस्यां दिशि असुरकुमाराणां भवनानि त्रिंशच्छतसहस्राणि, नागकुमाराणां चत्वारिंशत्, सुवर्णकुमाराणां चतुस्त्रिंशत्, वायुकुमाराणां षट्चत्वारिंशत्, द्वीपदिगुदधिविद्युत्स्तनिताग्निकुमाराणां प्रत्येकं षट्त्रिंशत् भवनशतसहस्राणि। सम्प्रति सामानिकात्मरक्षकदेवसंख्यासंग्रहार्थमाह–

मू. (२०६) *चउसट्ठिं असुराणं चुलसीतं चेव होंति नागाणं।*
बावत्तरिं सुवन्ने वाउकुमाराण छन्नउई ॥

मू. (२०७) *दीवदिसाउदहीणं विज्जुकुमारिंदथणियमग्गीणं।*
छण्हंपि जुअलयाणं बावत्तरिमो सयसहस्सा ॥

मू. (२०८) *चउतीसा चउयाला अट्ठतीसं च सयसहस्साइं।*
पन्ना चत्तालीसा दाहिणओ हुंति भवणाइं ॥

मू. (२०९) *तीसा चत्तालीसा चउतीसं चेव सयसहस्साइं।*

छायाला छत्तीसा उत्तरओ हुंति भवणाइं ॥

मू. (२१०) चउसट्ठी सट्ठी खलु छच्च सहस्साइं असुरवज्जाणं ।
सामाणिआ उ एए चउग्गुणा आयरक्खा उ ॥

मू. (२११) चमरे धरणे तह वेणुदेवे हरिकंत अग्गिसीहे य ।
पुन्ने जलकंते या अमिय विलंबे य घोसे य ॥

मू. (२१२) बलि भूयनंदे वेणुदालि हरिस्सहे अग्गिमानव विसिट्ठे ।
जलपह तहऽमियवाहणे पभंजणे य महाघोसे ॥

वृ. 'चउसट्ठी सट्ठी खलु' इत्यादि, दाक्षिणात्यस्यासुरकुमारेन्द्रस्य सामानिका देवाः चतुःषष्टिसहस्राणि, उत्तराहस्य षष्टिसहस्राणि, असुरवर्जानाम्—असुरकुमारेन्द्रवर्जानां शेषाणां सर्वेषामपि दाक्षिणात्यानामौत्तराहाणां च षट् षट् सहस्राणि प्रत्येकं 'सामाणिआ उ एए' इति एतेऽनन्तरोक्तसंख्यायका देवाः सामानिका ज्ञातव्याः, आत्मरक्षकाः पुनःसर्वत्रापि सामानिकचतुर्गुणाः प्रतिपत्तव्याः

इदानीं दाक्षिणात्यानामौत्तराहाणां चासुरकुमारादीनां यथाक्रमेन्द्रान् निर्दिशति—'चमरे धरणे' इत्यादि, दाक्षिणात्यानामसुरकुमाराणामधिपतिश्चमरः, नागकुमाराणां धरणः, सुवर्णकुमाराणां वेणुदेवः, विद्युत्कुमाराणां हरिकान्तः, अग्निकुमाराणामग्निसिंहः द्वीपकुमाराणां पूर्णः, उदधिकुमाराणां जलकान्तः, दिक्कुमाराणाममितः, वायुकुमाराणां वेलम्बः, स्तनितकुमाराणां घोषः । 'बलिभूयानंदे' इत्यादि, उत्तरदिग्वर्तिनामसुरकुमाराणामिन्द्रो बलिः, नागकुमाराणां भूतानन्दः, सुवर्णकुमाराणां वेणुदालिः, विद्युत्कुमाराणां हरिस्सहः, अग्निकुमाराणामग्निमाणवः, द्वीपकुमाराणां विशिष्टः उदधिकुमाराणां जलप्रभः, दिक्कुमाराणाममितवाहनः, वायुकुमाराणां प्रभञ्जनः, स्तनितकुमाराणां महाघोषः ॥

मू. (२१३) उत्तरिल्लाणं जाव विहरंति काला असुरकुमारा नागा उदही य पंडुरा दोवि।
वरकणगनिहसगोरा हुंति सुवन्ना दिसा थणिया ॥

मू. (२१४) उत्तत्तकणगवन्ना विज्जू अग्गी य होंति दीवा य ।
सामा पियंगुवन्ना वाउकुमारा मुणेयव्वा ॥

वृ. सम्प्रति वर्णसंग्रहार्थमाह—'काला असुरकुमारा' इत्यादि गाथाद्वयं, असुरकुमाराः सर्वेऽपि कालाः—कृष्णवर्णाः, नागकुमारा उदधिकुमाराश्चैते उभयेऽपि पाण्डुराः—श्वेतवर्णाः, वरं—जात्यं यत्कनकं तस्य निघर्षः—कषपट्टके रेखा तद्वद् गौरा भवन्ति सुवर्णकुमारा दिक्कुमाराः स्तनितकुमाराश्च, तथा विद्युत्कुमारा अग्नुकुमारा द्वीपकुमारा भवन्त्युत्तप्तकनकवर्णाः, ईषद्रक्तवर्णा इति भावः, वायुकुमाराः श्यामाः, श्यामत्वमेव स्पष्टयति—प्रियङ्गुवर्णः ॥

मू. (२१५) असुरेसु हुंति रत्ता सिलिंधपुप्फप्पभा य नागुदही ।
आसासगवसणधरा होंति सुवन्ना दिसा थणिया ॥

मू. (२१६) नीलाणुरागवसणा विज्जू अग्गी य हुंति दीवा य ।
संझाणुरागवसणा वाउकुमारा मुणेयव्वा ॥

वृ. सम्प्रति वस्त्रगतवर्णप्रतिपादनार्थमाह—'असुरेसु हुंति रत्ता' इत्यादि गाथाद्वयं, असुरेषु—असुरकुमारेषु भवन्ति वस्त्राणि रक्तानि, नागकुमारेषूदधिकुमारेषु च शिलिन्ध्रपुष्पप्रभाणि नीलवर्णा

नीत्यर्थः, सुवर्णकुमारा दिक्कुमाराः स्तनितकुमाराश्चाश्वास्यगवसनधराः-अश्वस्यास्यं-मुखं अश्वास्यं तत्र गतो यः फेनः सोऽश्वास्यगतः तद्वद् धवलं यद् वस्त्रं तद् धरन्तीत्यश्वास्यगवसनधराः, बाहुल्येन श्वेतवस्त्रपरिधानशीला इत्यर्थः, विद्युत्कुमारा द्वीपकुमारा अग्निकुमाराश्च नीलानुरागवसनाः, वायुकुमाराः सन्ध्यानुरागवसनाः ॥

मू. (२१७) *कहि णं भंते ! वाणमंतराणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता ?, कहि णं भंते ! वाणमंतरा देवा परिवसंति ?, गोयमा ! इमीसे रयणप्पभाए पुढवीए रयणामयस्स कंडस्स जोयणसहस्सबाहल्लस्स उवरिं एगं जोयणसयं ओगाहित्ता हिट्ठावि एगं जोयणसयं वज्जित्ता मज्झे अट्ठसु जोयणसएसु एत्थ णं वाणमंतराणं देवाणं तिरियमसंखेज्जा भोमेज्जनगरावाससयसहस्सा भवंतीतिमक्खायं, ते णं भोमेज्जा नगरा बाहिं वट्टा अंतो चउरंसा अहे पुक्खरकन्नियासंठाणसंठिया उक्किन्नंतरविउलगंभीरखायफलिहा पागारट्टालयकवाडतोरणपडिदुवारदेसभागा जंतसयग्घि-मुसलमुसंढिपरिवारिया अउज्झा सदाजया सदागुत्ता अडयालकोट्ठगरइया अडयालकयवणमाला खेमा सिवा किंकरामरदंडोवरक्खिया लाउल्लोइयमहिया गोसीससरसरत्तचंदनदद्दरदिन्नपंचंगुलितला उवचियचंदनकलससा चंदनघडसुकयतोरणपडिदुवारदेसभागा आसत्तोसत्तविउलवट्टवग्घारिय-मल्लदामकलावा पंचवण्णसरससुरहिमुक्कपुप्फपुंजोवयारकलिया-*

-कालागुरुपवरकुंदुरुक्कतुरुक्कधूवमघमघंतगंधुद्धुयाभिरामा सुगंधवरगंधिया गंधवट्टिभूया अच्छरगणसंघसंविकिन्ना दिव्वतुडियसद्दसंपणाइया पडागमालाउलाभिरामा सव्वरयणामया अच्छा सण्हा लण्हा घट्ठा मट्ठा नीरया निम्मला निप्पंका निक्कंकडच्छाया सप्पहा सस्सिरिया समिरीया सउज्जोया पासाइया दरिसणिज्जा अभिरूवा पडिरूवा एत्थ णं वाणमंतराणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता, तिसुवि लोयस्स असंखेज्जइभागे, तत्थ णं बहवे वाणमंतरा देवा परिवसंति, तंजहा-

पिसाया भूया जक्खा रक्खसा किंनरा किंपुरिसा भुयगवइणो महाकाया गंधव्वगणा य निउणगंधव्ववगीयइणो अणवन्नियपणवन्नियइसिवाइयभूयवाइयकंदियमहाकंदिया य कुहंडपयंगदेवा चंचलचलचवलचित्तकीलणदवप्पिया गहिरहसियगीयणच्चणरइ वणमालामेल-मउडकुंडलसच्छंदविउव्वियाभरणचारुभूसणधरा सव्वोउयसुरभिकुसुमसुरइयपलंबसोहंत-कंतविहसंतचित्तवणमालरइयवच्छा कामकामाकामरूवदेहधारी नानाविहवण्णरागवरवत्थल-लंतचित्तचिल्लगनियंसणा विविहदेसिनेवत्थगहियवेसा पमुइयकंदप्पकलहकेलिकोलाहलप्पिया हासबोलबहुला असिमुग्गरसत्तिकुंतहत्था अनेगमणिरयणविविहविचित्तचिंधगया

महिड्ढिया महज्जुइया महायसा महाबला महानुभागा महासुक्खा हारविराइयवच्छा कडयतुडियथंभियभुया संगयकुंडलमट्ठगंडयलकन्नपीढधारी विचित्तहत्थाभरणा विचित्तमालामउली कल्लाणगपवरवत्थअहपरिहिया कल्लाणगपवरमल्लाणुलेवणधरा भासुरबोंदी पलंबवणमालधरा दिव्वेणं वन्नेणं दिव्वेणं गंधेणं दिव्वेणं फासेणं दिव्वेणं संघयणेणं दिव्वेणं संठाणेणं दिव्वाए इड्ढीए दिव्वाए जुईए दिव्वाए पभाए दिव्वाए छायाए दिव्वाए अच्चीए दिव्वेणं तेएणं दिव्वाए लेस्साए दस दिसाओ उज्जोवेमाना पभासेमाणा -

-ते णं तत्थ साणं साणं असंखेज्जभोमेज्जनगरावाससयसहस्साणं साणं साणं सामानि-यसाहस्सीणं साणं साणं अग्गमहिसीणं साणं साणं परिसाणं साणं साणं अनीयाणं साणं साणं

अनीयाहिवइणं साणं साणं आयक्खदेवसाहस्सीणं अन्नेसिं च बहूणं वाणमंतराणं देवाण य देवीण य आहेवच्चं पोरेवच्चं सामित्तं भट्टित्तं महत्तरगत्तं आणाईसरसेणावच्चं कारेमाणा पालेमाणा महयाहयनट्टगीयवाइयतंतीतलतुडियघणमुइंगपडुप्पवाइयरवेणं दिव्वाइं भोगभोगाइं भुंजमाणा विहरंति

वृ. वानमन्तरसूत्रे 'तिसुवि लोगस्स असंखेज्जइभागे' इति, स्वस्थानोपपातसमुद्घातरूपेषु त्रिष्वपि स्थानेषु लोकस्यासंख्येय (तमे) भागे वक्तव्यानि, तता 'भुयगवइणो महाकाया महोरगा' किंविशिष्टास्ते ? इत्याह–भुजंगपतयः गन्धर्व०णा:–गन्धर्वसमुदा०:, किंविशिष्टास्ते ? इत्याह– 'निपुणगन्धर्वगीतरतयः' निपुणाः–परमपकौशलोपेता ये गन्धर्वाः–गन्धर्वजातीयाः देवास्तेष यद् गीतं तत्र रतिर्येषां ते तथा, एते व्यन्तराणामष्टौ मूलभेदाः, इमे चान्येऽवान्तरभेदा अष्टौ 'अण पन्निय' इत्यादि, कथंभूता एते षोडशापि ? इत्यत आह –

'चंचलचलयवलचित्तकीलणदवप्पिया' चञ्चलाः''–अनवस्थितचित्तास्तथा चलचपलम्– अतिशयेन चपलं यत्क्रीडनं यश्च चित्ते द्रवः–परिहासः तौ प्रियौ येषां ते चलचपलचित्तक्रीडनद्रवप्रिया ततश्च चञ्चलशब्देन विशेषणसमासः, तथा 'गहिरहसियगीयणच्चणरई' गम्भीरेषु हसितगीतनर्तनेषु रतिर्येषां ते तथा, 'वमणमालामेलमउडकुंडलसच्छंदविउव्वियाभरणचारुभूसणधरा' इति वनमाला मयानि यानि आमेलमुकुटकुण्डलानि 'आमेल' इति आपीडशब्दस्य प्राकृतलक्षणवशात् आपीडः– शेखरकः, तथा स्वच्छन्दं विकुर्वितानि यानि आभरणानि तैर्यत् चारु भूषणं–मण्डनं तद् धरन्तीति वनमालापीडमुकुटकुण्डलस्वच्छन्दविकुर्वितामरणचारुभूषणधराः,

तथा सर्वर्तुकैः–सर्वर्तुभाविभिः सुरभिकुसुमैः सुरचिता–सुष्ठु निर्वर्तिता तथा प्रलम्बा इति प्रलम्बा शोभते इति शोभमाना कान्ता–कमनीया विकसन्ती–अम्लानकुसुमतया अम्लानपुष्पमय चित्रानानाप्रकारा वनमालारचिता वक्षसि यैस्ते सर्वर्तुकसुरभिकुसुमसुरचितप्रलम्बशोभ मानकान्तविकसच्चित्रवनमालारचितवक्षसः, तथा कामं–स्वेच्छया गमो येषां ते कामगमाः–स्वेच्छ चारिणः, क्वचित् 'कामकामा' इति पाठः, तत्र कामेन–स्वेच्छया कामो–मैथुनसेवा येषां ते कामका अनियतकामा इत्यर्थः, तथा कामं–स्वेच्छया रूपं येषां ते कामरूपास्ते च ते देहाश्च कामरूपदेहास्ता धरन्तीत्येवंशीलाः कामरूपदेहाधारिणः, स्वेच्छाविकुर्वितनानारूपदेहधारिण इत्यर्थः,

तथा नानाविधैर्वर्णै रागो–रक्तता येषां तानि नानाविधवर्णरागाणि वराणि–प्रधानानि चित्राणि–नानाविधानि अद्भुतानि वा चञ्चलानि देशीवचनत्वात् देदीप्यमानानि वस्त्राणि निवसनं–परिधानं येषां ते नानाविधवर्णरागवरवस्त्रचित्रचिञ्चलगनिवसनाः, तथा विविधै शीनेपथ्यैर्गृहीतो वेषो यैस्ते विविधदेशीनेपथ्यगृहीतवेषाः, तथा 'पमुइयकंदप्पकलहकेलिकोल हलप्पिया' इति कन्दर्पः–कामोद्दीपनं वचनं चेष्टा च कलहो–राटी केलिः–क्रीडा कोलाहलो–बो कन्दर्पकलहकेलिकोलाहलाः प्रिया येषां ते कन्दर्पकलहकेलिकलाहलप्रियाः,

ततः प्रमुदितशब्देन सह विशेषणसमासः, 'हासबोलबहुला' इति हासबोली बहुलौ अतिप्रभूतौ येषां ते हासबोलबहुलाः, तथा असिमुद्गरशक्तिकुन्ता हस्ते येषां ते असिमुद्गरशक्ति कुन्तहस्ताः, 'अनेगमणिरयणविहिननिजुत्तचित्तचिंधगया' इति मणयश्च–चन्द्रकान्ताद्या रत्नानि कर्केतनादीनि अनेकैर्मणिरत्नैर्विविधं–नानाप्रकारं नियुक्तानि विचित्राणि नानाप्रकाराणि चिह्न गतानि–स्थितानि येषां ते तथा, शेषं सुगमम् ।

मू. (२१८) कहि णं भंते ! पिसायाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता ?, कहि णं भंते ! पिसाया देवा परिवसंति ?, गोयमा ! इमीसे रयणप्पभाए पुढवीए रयणामयस्स कंडस्स जोयणसयसहस्सबाहल्लस्स उवरिं एगं जोयणसयं ओगाहित्ता हेट्ठा चेगं जोयणसयं वज्जित्ता मज्झे अट्ठसु जोयणसएसु एत्थ णं पिसायाणं देवाणं तिरियमसंखेज्जा भोमेज्जनगरावाससयसहस्सा भवंतीति मक्खायं, ते णं भोमेज्जनगरा बाहिं वट्टा जहा ओहिओ भवणवन्नओ तहा भा० जाव पडि० एत्थ णं पिसायाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा प० तिसुवि लोगस्स असंखेज्जइभागे

तत्थ बहवे पिसाया देवा परिवसंति, महिड्ढिया जहा ओहिया जाव विहरन्ति कालमहाकाला इत्थ दुवे पिसायिंदा पिसायरायाणो परिवसंति, महिड्ढिया महज्जुइया जाव विहरंति ।

कहि णं भंते ! दाहिणिल्लाणं पिसायाणं देवाणं ठाणा पन्नत्ता ?, कहि णं भंते ! दाहिणिल्ला पिसाया देवा परिवसंति ?, गोयमा ! जंबूदीवे दीवे मंदरस्स पव्वयस्स दाहिणेणं इमीसे रयणप्पभाए पुढवीए रयणामयस्स कंडस्स जोयणसयसहस्सबाहल्लस्स उवरिं एगं जोयणसहस्सं ओगाहित्ता हेट्ठा चेगं जोयणसयं वज्जित्ता मज्झे अट्ठसप जोयणसएसु एत्थ णं दाहिणिल्लाणं पिसायाणं देवाणं तिरियमसंखेज्जा भोमेज्जनगरावाससहस्सा भवंतीतिमक्खायं,

ते णं भवणा जहा ओहिओ भवणवन्नओ तहा भाणियव्वो जाव पडिरूवा, एत्थ णं दाहिणिल्लाणं पिसायाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता ?, तिसुवि लोगस्स असंखेज्जइभागे, तत्थ णं बहवे दाहिणिल्ला पिसाया देवा परिवसंति, महिड्ढिया जहा ओहिया जाव विहरंति । काले एत्थ पिसायिंदे पिसायराया परिवसइ, महिड्ढिए जाव पभासेमाणे ।

से णं तत्थ तिरियमसंखेज्जाणं भोमेज्जनयरावाससयसहस्साणं चउण्हं सामानियसाहस्सीणं चउण्हं य अग्गमहिसीणं सपरिवाराणं तिण्हं परिसाणं सत्तण्हं अनियाणं सत्तण्हं अनियाहिवईणं सोलसण्हं आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं दाहिणिल्लाणं वाणमंतराणं देवाण य देवीण य आहेवच्चं जाव विहरइ ।

उत्तरिल्लाणं पुच्छा, गोयमा ! जहेव दाहिणिल्लाणं वत्तव्वया तहेव उत्तरिल्लाणंपि, नवरं मंदरस्स पव्वयस्स उत्तरेणं महाकाले एत्थ पिसायिंदे पिसायराया परिवसइ, जाव विहरइ । एवं जहा पिसायाणं तहा भूयाणंपि, जाव गंधव्वाणं, नवरं इंदेसु नाणत्तं भाणियव्वं इमेण विहिणा – भूयाणं सुरूवडिरूवा, जक्खाणं पुन्नभद्दमाणिभद्दा, रक्खसाणं भीममहाभीमा, किन्नराणं किन्नरकिंपुरिसा, किंपुरिसाणं सप्पुरिसमहापुरिसा, महोरगाणं अइकायमहाकाया, गंधव्वाणं गीयरइगीयजसा, जाव विहरइ ।

मू. (२१९) काले य महाकाले सुरूव पडिरूव पुन्नभद्दे य
तह चेव माणिभद्दे भीमे य तहा महाभीमे ।

मू. (२२०) किन्नर किंपुरिसे खलु सप्पुरिसे खलु तहा महापुरिसे ।
अइकायमहाकाए गीयरई चेव गीयजसे ॥

मू. (२२१) कहि णं भंते ! अणवन्नियाणं देवाणं ठाणा पन्नत्ता, कहि णं भंते ! अणवन्निया देवा परिवसंति ?, गोयमा ! इमीसे रयणप्पभाए पुढवीए रयणामयस्स कंडस्स जोयणसयसहस्सबाहल्लस्स उवरिं जाव जोयणसएसु एत्थ णं अणवन्नियाणं देवाणं तिरियमसंखेज्जा

नगरावाससहस्सा भवंतीतिमक्खायं, ते णं जाव पडिरूवा, एत्थ णं अणवन्नयाणं देवाणं ठाणा, उववाएणं लोयस्स असंखेज्जइभागे समुग्घाएणं लोयस्स असंखेज्जइभागे सट्ठाणेणं लोयस्स असंखेज्जइभागे, तत्थ णं बहवे अणवन्निया देवा परिवसंति महिड्ढिया जहा पिसाया जाव विहरंति, सन्निहियसामाणा इत्थ दुवे अणवन्निंदा अणवन्नियकुमाररायाणो परिवसंति महिड्ढीया, एवं जहा कालमहाकालाणं दोण्हंपि दाहिणिल्लाणं उत्तरिल्लाण य भणिया तहा सन्निहियसामाणाणंपि भाणियव्वा संगहणीगाहा–

मू. (२२२) अणवन्नियपणवन्नियइसिवाइयभूयवाइया चेव।
कंदियमहाकंदियकोहंडा पयगए चेव॥

मू. (२२३) (इमे इंदा) – 'सन्निहिया सामाणा धायविधाए इसी य इसिवाले।
ईसरमहेसरा (विय) हवइ सुवच्छे विसाले य॥

मू. (२२४) हासे हासरई विय सेए य तहा भवे महासेए।
पयए अ पयगवई य नेयव्वा आनुपुव्वीए॥

वृ. नवरं 'काले य महाकाले' इत्यादि, दक्षिणोत्तराणां पिशाचानां यथाक्रममिन्द्रौ कालमहाकालौ, भूतानां सुरूपप्रतिरूपौ, यक्षाणां पूर्णभद्रमाणिभद्रौ, राक्षसानां भीममहाभीमौ, किन्नराणां किन्नरकिंपुरिषौ, किंपुरुषाणां सत्पुरुषमहापुरुषौ, महोरगाणमतिकायमहाकायौ, गन्धर्वाणां गीतरतिगीतयशसौ॥

मू. (२२५) *कहि णं भंते! जोइसियाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता?, कहि णं भंते! जोइसिया देवा परिवसंति?, गोयमा! इमीसे रयणप्पभाए पुढवीए बहुसमरमणिज्जाओ भूमिभागाओ सत्तणउइजोयणसए उड्ढं उप्पइत्ता दसुत्तरजोयणसयबाहल्लेतिरियमसंखेज्जे जोइसविसए एत्थ णं जोइसियाणं देवाणं तिरियमसंखेज्जा जोइसियविमाणावाससयसहस्सा भवंतीतिमक्खायं,*

ते णं विमाणा अद्धकविट्ठगसंठाणसंठिया सव्वफालिहमया अब्भुग्गयभूसियपहसिया इव विविहमणिकणगरयणभत्तिचित्ता वाउद्धुयविजयवेजयंतीपडागाछत्ताइछत्तकलिया तुंगा गगनतलमहिलंघमाणसिहरा जालंतररयणपंजलुम्मिलियव्व मणिकणगथूभियागा वियसियसयवत्तपुंडरीया तिलयरयणद्धचंदचित्ता नानामणिमयदामालंकिया अंतो बहिं च सण्हा तवणिज्जरुइलवालुयापत्थडा सुहफासा सस्सिरीया सुरूवा पासाइया दरिसणिज्जा अभिरूवा पडिरूवा एत्थ णं जोइसियाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता तिसुवि लोगस्स असंखेज्जइभागे।

तत्थ णं बहवे जोइसिया देवा परिवसंति, तंजहा– बहस्सई चंदा सूरा सुक्का सनिच्छरा राहू धूमकेऊ बुधा अंगारगा तत्ततवणिज्जकणगवन्ना जे य गहा जोइसन्निचारं चरंति केऊ य गइरइया अट्ठावीसइविहा नक्खत्तदेवतगणा नानासंठाणसंठियाओ पंचवन्नाओ तारयाओ ठियलेसाचारिणो अविस्साममंडलगई पत्तेयनामंकपागडियचिंधमउडा महिड्ढिया जाव पभासेमाणा, ते णं तत्थ साणं २ विमाणावाससयसहस्साणं साणं २ सामानियसाहस्सीणं साण२ अग्गमहिसीणं सपरिवाराणं साणं २ परिसाणं साणं २ अणियाणं साणं २ अणियाहिवईणं साणं २ आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं दजोइसियाणं देवाणं देवीण य आहेवच्चं जाव विहरंति। चंदिमसूरिया इत्थ दुवे जोइसिंदा जोइसियरायाणो परिवसंति, महिड्ढिया जाव पभासेमाणा, ते णं तत्थ साणं २

जोइसियविमाणावाससयसहस्साणं चउण्हं सामानियसाहस्सीणं चउण्हं अग्गमहिसीणं सपरिवाराणं तिण्हं परिसाणं सत्तण्हं अनीयाणं सत्तण्हं अनीयाहिवईणं सोलसण्हं आयरक्खदेवसाहस्सीणं जाव अन्नेसिं च बहूणं जोइसियाणं देवाणं देवीण य आहेवच्चं जाव विहरंति

वृ. ज्योतिष्कसूत्रे 'अद्धकविट्ठगसंठाणसंठियाइं' अर्द्धकपित्थस्य अर्द्धकपित्थं तस्य संस्थानं तेन संस्थितानि, अत्राक्षेपपरिहारौ चन्द्रप्रज्ञप्टिटीकायां सूर्यप्रज्ञप्तिटीकायां चाभिहिताविति ततोऽवधार्यौ, 'सव्वफालिहमया' इति सर्वात्मना स्फटिकमयानि, तथा अभुयद्गता–आभिमुख्येन सर्वतो विनिर्गता उत्सृष्टा–प्रबलतया सर्वासु दिक्षु प्रसृता या प्रभा–दीप्तिस्तया सितानि–धवलानि अभ्युद्गतोत्सृतप्रभासितानि, तथा विविधानां मणिकनकरत्नानां या भक्तयोविच्छित्तिविशेषास्ताभिश्चित्राणि–आश्चर्यभूतानि विविधमणिकनकभक्तिचित्राणि, 'वाउद्धूयविजयवेजयंतीपडागाछत्ताइछत्तकलिया' वातोद्धूता–वायुकम्पिता विजयः··· अभ्युदयस्तत्संसूचिका वैजयन्त्यभिधाना या पताका अथवा विजय इति वैजयन्तीनां पार्श्वकर्णि- कोच्यते तत्प्रधाना वैजयन्त्यः–पताकास्ता एव विजयवर्जिता वैजयन्त्यः पताकाःछत्रातिच्छत्राणि–उपर्युपरिस्थितानि छत्राणि तैः कलितानि वातोद्धूतविजयवैजयन्तीपताकाच्छत्रातिच्छत्रकलितानि तुङ्गानि–उच्चानि,

तथा गगनतलम्–अम्बरतलं अनुलिखद्–अतिलङ्घयत् शिखरं येषां तानि गगनतलानलिखच्छिखराणि, तथा जालानि–जालकानि तानि च भवनभित्तिषु लोके प्रतीतानि, तदन्तरेषु विशिष्टशोभानिमित्तं रत्नानि यत्र तानि तथा, पञ्जरादुन्मीलितमिव–बहिष्कृतमिव पञ्जरोन्मीलितवद्, तथाहि–किल किमपि वस्तु पञ्जरात्– वंशादिमयप्रच्छादनविशेषाद् बहिष्कृतमत्यन्ताविनष्टच्छायत्वात् शोभते तथा तान्यपि विमानानीति भावः, तथा मणिकनकानां सम्बन्धिनी स्तूपिका–शिखरं येषां तानि मणिकनकस्तूपिकानि, ततः पूर्वपदाभ्यां सह विशेषणसमासः, तथा विकसितानि यानि शतपत्राणि पुण्डरीकाणि च द्वारादौ प्रतिकृतित्वेन स्थितानि तिलकाश्चमित्त्यादिषु पुण्ड्राणि रत्नमयाश्चार्द्धचन्द्रा द्वारादिषु तैश्चित्राणि विकसितशतपत्रपुण्डरीकतिलकरत्नार्द्धचन्द्रचित्राणि,

तथा नानामणियमयीभिर्दामभिरलङ्कृतानि नानामणिमयदामालङ्कृतानि, तथा अन्तर्बहिश्च श्लक्ष्णानि–मसृणानि तथा तपनीयसुवर्णविशेषस्तन्मय्या रुचिरायाः वालुकायाः–सिकतायाः प्रस्तटः–प्रस्तरो येषु तानि तपनीयरुचिरवालुकाप्रस्तटानि, तथा सुखस्पर्शानि शुभस्पर्शानि वा,

शेषं प्राग्वत् यावत् 'बहस्सई चंदा' इत्यादि, बृहस्पतिचन्द्रसूर्यशुक्रशनैश्चरराहुधूमकेतुबुधाङ्गारकाः, कथंभूता ? इत्याह–तप्ततपनीयकनकवर्णा–ईषद्रक्तवर्णाः, तथा ये च ग्रहा–उक्तव्यतिरिक्ता ज्योतिश्चक्रे चारं चरन्ति केतवो ये च गतिरतिकाः ये चाष्टाविंशतिविधा नक्षत्रदेवगणास्ते सर्वेऽपि नानासंस्थानसंस्थिताः, चशब्दात् तपनीयकनकवर्णाः, तारकाः पञ्चवर्णाः,

एते च सर्वेऽपि स्थितलेश्या–अवस्थिततेजोलेश्याकाः तथा ये चारिणः–चाररतास्तेऽविश्राममण्डलगतिकाः, तथा सर्वेऽपि प्रत्येकं नामाङ्केन–स्वस्वनामाङ्केन प्रकटितं चिह्नं मुकुटे येषां ते प्रत्येकस्वनामाङ्कप्रकटितचिह्नमुकुटाः, किमुक्तं भवति ? –चन्द्रस्य मुकुटे चन्द्रमण्डललाञ्छनं स्वनामाङ्कप्रकटितं सूर्यस्य सूर्यमण्डलं ग्रहस्य ग्रहमण्डलं नक्षत्रस्य नक्षत्राकारं तारकस्य तारकाकारमिति ॥

मू. (२२६) *कहिणं भंते ! वेमाणियाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता ?, कहि णं भंते ! वेमाणिया देवा परिवसंति ?, गोयमा ! इमीसे रयणप्पभाए पुढवीए बहुसमरमणिज्जाओ भूमिभागाओ उड्ढं चंदिमसूरियगहनक्खत्ततारारूवाणं बहूइं जोयणसयाइं बहूइं जोयणसहस्साइं बहूइं जोयणसयसहस्साइं बहुगाओ जोयणकोडीओ बहुगाओ जोयणकोडाकोडीओ उड्ढं दूरं उप्पइत्ता*

—एत्थ णं सोहम्मीसाणसणंकुमारमाहिंदबंभलोयलंतगमहासुक्कसहस्सारणयपाणयआरण-अच्चुयगेवेज्जणुत्तरेसु एत्थ णं वेमाणियाणं देवाणं चउरासीइ विमाणावाससयसहस्सा सत्ताणउइं च सहस्सा तेवीसं च विमाणा भवंतीतिमक्खायं, ते णं विमाणा सव्वरयणामया अच्छा सण्हा लण्हा घट्टा मट्ठा नीरया निम्मला निप्पंक [illegible] सस्सिरीया सउज्जोया पासादीया दरिसणिज्जा अभिरूवा पडिरूवा, एत्थ णं वेमाणियाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता, तिसुवि लोयस्स असंखेज्जइभागे, तत्थ णं बहवे वेमाणिया देवा परिवसंति ?, तं०—

सोहम्मीसाणसणंकुमारमाहिंदबंभलोगलंतगमहासुक्कसहस्सारआणयपाणयआरण-अच्चुयगेवेज्जणुत्तरोववाइया देवा, ते णं मिगमहिसवराहसीहछगलदद्दुरहयगयवइभुयगखग्ग-उसभविडिमपागडियचिंधमउडा पसिढिलवरमउडकिरीडधारिणो वरकुंडलुज्जोइयाणणा मउडदित्त-सिरिया रत्ताभा पउमपम्हगोरा सेया सुहवन्नगंधफासा उत्तमवेउव्विणो पवरवत्थगंधमल्लानुलेवणधरा महिड्ढिया महज्जुइया महायसा महाबला महानुभागा महासोक्खा हारविराइयवच्छा कडयतुडियथंभियभुया अंगदकुंडलमट्ठगंडतलकन्नपीढधारी विचित्तहत्थाभरणा विचित्तमालामउली कल्लाणगपवरवत्थपरिहिया कल्लाणगपवरमल्लाणुलेवणा भासुरबोंदी पलंबवणमालधरा—

—दिव्वेणं वन्नेणं दिव्वेणं गंधेणं दिव्वेणं फासेणं दिव्वेणं संघयणेणं दिव्वेणं संठाणेणं दिव्वाए इड्ढीए दिव्वाए जुईए दिव्वाए पभाए दिव्वाए छायाए दिव्वाए अच्चीए दिव्वेणं तेएणं दिव्वाए लेसाए दस दिसाओ उज्जोवेमाणा पभासेमाणा ते णं तत्थ साणं साणं विमाणावाससयसहस्साणं साणं साणं सामानियसाहस्सीणं साणं साणं तायत्तीसगाणं साणं साणं लोगपालाणं साणं साणं अग्गमहिसीणं सपरिवाराणं साणं साणं परिसाणं साणं साणं अणियाणं साणं साणं अणियाहिवईणं साणं साणं आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं वेमाणियाणं देवाण य देवीण य आहेवच्चं पोरेवच्चं जाव दिव्वाइं भोगभोगाइं भुंजमाणा विहरंति।

वृ. वैमानिकसूत्रे चतुरशीतिर्विमानलक्षाणि सप्तनवतिर्विमानसहस्राणि त्रयोविंशतिर्विमानानीति, 'बत्तीसट्ठावीसा बारसअट्ठचउरो सयसहस्सा' इत्यादिसंख्यामीलनेन परिभावनीयानि, 'ते णं मिगमहिस' इत्यादि,

सौधर्मदेवा मृगरूपप्रकटितचिह्नमुकुटाः ईशानदेवा महिषरूपप्रकटितचिह्नमुकुटाः सनत्कुमारदेवा वराहरूपप्रकटितचिह्नमुकुटाः माहेन्द्रदेवा सिंहरूपप्रकटितमुकुटचिह्नाः ब्रह्मलोकदेवाः छगलरूपप्रकटितमुकुटचिह्नाः लान्तकदेवा दर्दुररूपप्रकटितमुकुटचिह्नाः शुक्रकल्पदेवा हयमुकुटचिह्नाः सहस्रारकल्पदेवा गजपतिमुकुटचिह्नाः आनतकल्पदेवा भुजगमुकुटचिह्नाः प्राणतकल्पदेवाः खड्गमुकुटचिह्नः खड्गः—चतुष्पदविशेष आटव्यः आरणकल्पदेवा वृषभमुकुटचिह्नाः अच्युतकल्पदेवा वडिमुकुटचिह्नाः, 'वरकुंडलुज्जोइआणणा' इति वराभ्यां कुण्डलाभ्यामुद्द्योतितं-भास्वरीकृतमाननं येषां ते तथा, शेषं सुगमं ॥

सू. (२२७) कहि णं भंते ! सोहम्मगदेवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता ? कहि णं भंते सोहम्मगदेवा परिवसंति ?, गोयमा ! जंबूदीवे दीवे मंदरस्स पव्वयस्स दाहिणेण इमीसे रयणप्पभाए पुढवीए बहुसमरमणिज्जाओ भूमिभागाओ जाव उड्ढं दूरं उप्पइत्ता एत्थ णं सोहम्मे नामं कप्पे पन्नत्ते पाईणपडीणायए उदीणदाहिणविच्छिन्ने अद्धचंदसंठाणसंठिए अच्चिमालिभासरासिवण्णाभे असंखेज्जाओ जोयणकोडीओ असंखेज्जाओ जोयणकोडाकोडीओ आयामविक्खंभेणं असंखेज्जाओ जोयणकोडाकोडीओ परिक्खेवेणं सव्वरयणामए अच्छे जाव पडिरूवे,

तत्थ णं सोहम्मगदेवाणं बत्तीसविमाणावाससयसहस्सा भवंतीतिमक्खायं, ते णं विमाणा सव्वरयणामया जाव पडिरूवा, तेसिणं विमाणाणं बहुमज्झदेसभागे पंच वडिंसया पन्नत्ता, तंजहा–

असोगवडिंसए सत्तवण्णवडिंसए चंपगवडिंसए चूयवडिंसए मज्झे इत्थ सलोहम्मवडिंसए, ते णं वडिंसया सव्वरयणामया अच्छा जाव पडिरूवा, एत्थ णं सोहम्मगदेवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता, तिसुवि लोगस्स असंखिज्जइभागे, तत्थ णं बहवे सोहम्मगदेवा परिवसंति महिड्ढिया जाव पभासेमाणा, ते णं तत्थ साणं २ बत्तीसविमाणावाससयसहस्साणं साणं २ अग्गमहिसीणं साणं २ सामानियसाहस्सीणं एवं जहेव ओहियाणं तहेव एएसिंपि भा० जाव आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं सोहम्मगकप्पवासीणं वेमाणियाणं देवाण य देवीण य आहेवच्चं जाव विहरंति।

सक्के इत्थ देविंदे देवराया परिवसइ, वज्जपाणी पुरंदरे सयक्कतू सहस्सक्खे मघवं पागसासणे दाहिणड्ढलोगाहिवई बत्तीसविमाणावाससयसहस्साहिवई एरावणवाहणे सुरिंदे अयरंबरवत्थधरे आलइयमालमउडे नवहेमचारुचित्तचंचलकुंडलविलिहिज्जमाणगंडे महिड्ढिए जाव पभासेमाणे से णं तत्थ बत्तीसाए विमाणावाससयसहस्साणं चउरासीए सामानियसाहस्सीणं तायत्तीसाए तायत्तीसगाणं चउण्हं लोगपालाणं अट्ठण्डं अग्गमहिसीणं सपरिवाराणं तिण्हं परिसाणं सत्तण्हं अनीयाणं सत्तण्हं अनीयाहिवईणं चउण्हं चउरासीणं आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं सोहम्मकप्पवासीणं वेमाणियाणंदेवाण य देवीण य आहेवच्चं पोरेवच्चं कुव्वेमाणे जाव विहरइ ॥

वृ. सौधर्मकल्पसूत्रे 'अच्चिमालिभासरासिवन्नाभे' इति (अर्चिषां मालावत् भसां राशिवत् वर्णकान्तिर्यस्य) 'वज्जपाणी' इति वज्रं पाणावस्य इति वज्रपाणिः, असुरादिपुरदारणात् पुरन्दरः 'सयक्कतू' इति शतं क्रतूनां प्रतिमानामभिग्रहविशेषाणां श्रमणोपासकपञ्चमप्रतिमारूपाणां वा कार्तिकश्रेष्ठिभवापेक्षया यस्यासौ शतक्रतुः 'सहस्सक्खे' इति सहस्रमक्ष्णां यस्यासौ सहस्राक्षः,

इन्द्रस्य हि किल मन्त्रिणां पञ्च शतानि संति, तदीयानां चाक्ष्णामिन्द्रप्रयोजनव्यापृततया इन्द्रसम्बन्धित्वेन विवक्षणात् सहस्राक्षत्वमिन्द्रस्य 'मघवं' इति मघा–महामेघास्ते यस्य वशे सन्ति स मघवान् तथा ('पागसासणे'त्ति)पाको नाम बलवान् रिपुः स शिष्यते–निराक्रियते येन स पाकशासनः, 'अरयंबरवत्थधरे' अरजांसि–रजोरहितानि स्वच्छतया अम्बरवदम्बराणि वस्त्राणि धारयति अरजोऽम्बरवस्त्रधरः, 'आलइयमालमउडे' इति माला च मुकुटश्च मालामुकुटं आलिंगितम्–आविद्धं मालामुकुटं येन स आलंगितमालामुकुटः

'नवहेमचारुचित्तचंचलकुंडलविलिहिज्जमाणगंडे' इति नवमिव–अत्युत्कटचारुवर्णतया प्रत्यग्रमिव हेम यत्र ते नवहेमनी नवहेमभ्यां चारुचित्राभ्यां चञ्चलाभ्यां कुण्डलाभ्यां विलिख्यमानौ गण्डौ यस्य स तथा ॥

मू. (२२८) कहि णं भंते ! ईसाणाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता?, कहि णं भंते ईसाणगदेवा परिवसंति ?, गोयमा ! जंबूदीवे दीवे मंदरस्स पव्वयस्स उत्तरेणं इमीसे रयणप्पभाए पुढवीए बहुसमरमणिज्जाओ भूमिभागाओ उड्ढं चंदिमसूरियगहनक्खत्ततारारूवाणं बहूइं जोयणसयाइं बहूइं जोयणसहस्साइं जाव उड्ढं उप्पइत्ता एत्थ णं ईसाणे नामं कप्पे पन्नत्ते पाईणप- डीणायए उदीणदाहिणविच्छिण्णे एवं जहा सोहम्मे जाव पडिरूवे,

तत्थ णं ईसाणगदेवाणं अट्ठावीसं विमाणावाससयसहस्सा भवतीतिमक्खायं, ते णं विमाणा सव्वरयणामया जाव पडिरूवा, तेसिणं बहुमज्झदेसभागे पंच वडिंसया पन्नत्ता, तंजहा–

अंकवडिंसए फलिहवडिंसए रयणवडिंसए जातरूववडिंसए मज्झे इत्थ ईसानवडिंसए ते णं वडिंसया सव्वरयणामया जाव पडिरूवा, एत्थ णं ईसाणगदेवाणं पज्जत्तपज्जत्ताणं ठाणा पन्नत्ता, तिसुवि लोगस्स असंखेज्जइभागे, सेसं जहा सोहम्मगदेवाणं जाव विहरंति,

ईसाणे इत्थ देविंदे देवराया परिवसइ, सूलपाणी वसहवाहणे उत्तरड्ढलोगाहिवई अट्ठावीस-विमाणावाससयसहस्साहिवई अरयंबरवत्थधरे सेसं जहा सक्कस्स णवरं उत्तरासेमाणे, से णं तत्थ अट्ठावीसाए विमाणावाससयसहस्साणं असीईए सामानियसाहस्सीणं तायत्तीसाए तायत्तीसगाणं चउण्हं लोगपालाणं अट्ठण्हं अग्गमहिसीणं सपरिवाराणं तिण्हं परिसाणं सत्तण्हं अनियाणं सत्तण्हं अणियाहिवईणं चउण्हं असीईणं आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं ईसाणकप्पावासीणं वेमानियाणं देवाण य देवीण य आहेवच्चं जाव विहरइ ॥

कहि णं भंते ! सणंकुमारदेवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता ?, कहि णं भंते ! सणंकुमारा देवा परिवसंति ?, गोयमा ! सोहम्मस्स कप्पस्स उप्पिं सपक्खिं सपडिदिसिं बहूइं जोयणाइं बहूइं जोयणसयाइं बहूइं जोयणसहस्साइं बहूइं जोयणसयसहस्साइं बहुगाओ जोयणकोडीओ बहुगाओ जोयणकोडाकोडीओ उड्ढं दूरं उप्पइत्ता एत्थ णं सणंकुमारे नामं कप्पे प० पाईणपडीणायए उदीणदाहिणविच्छिण्णे जहा सोहम्मे जाव पडिरूवे,

तत्थ णं सणंकुमाराणं देवाणं बारस विमाणावाससयसहस्सा भवंतीतिमक्खायं, ते णं विमाणा सव्वरयणामया जाव पडिरूवा, तेसिणं विमाणाणं बहुमज्झदेसभागे पंच वडिंसगा पन्नत्ता, तंजहा–असोगवडिंसए सत्तवन्नवडिंसए चंपगवडिंसए चूयवडिंसए मज्झे एत्थ सणंकुमारा-वडिंसए, ते णं वडिंसया सव्वरयणामया अच्छा जाव पडिरूवा,

एत्थ णं सणंकुमारदेवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता, तिसुवि लोगस्स असंखेज्जइभागे, तत्थ णं बहवे सणंकुमारदेवा परिवसंति, महिड्ढिया जाव पभासेमाणा विहरंति, नवरं अग्गमहिसीओ नत्थि, सणंकुमारे इत्थ देविंदे देवराया परिवसइ, अरयंबरवत्थधरे, सेसं जहा सक्कस्स, से णं तत्थ बारसण्हं विमाणावाससयसहस्साणं बावत्तरीए सामाणियसाहस्सीणं सेसं जहा सक्कस्स अग्गमहिसीवज्जं, नवरं चउण्हं बावत्तरीणं आयरक्खदेवसाहस्सीणं जाव विहरइ ॥

कहि णं भंत ! माहिंददेवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता ?, कहि णं भंते ! माहिंदगदेवा परिवसंति ?, गोयमा ! ईसाणस्स कप्पस्स उप्पिं सपक्खिं सपडिदिसिं बहूइं जोयणाइं जाव बहुयाओ जोयणकोडाकोडीओ उड्ढं दूरं उप्पइत्ता एत्थ णं माहिंदे नामं कप्पे प० पाईणपडीणायए, जाव एवं जहेव सणंकुमारे, नवरं अट्ठ विमाणावाससयसहस्सा, वडिंसया जहा ईसाणे, नवरं मज्झे इत्थ

माहिंदवडिंसए, एवं जहा सणंकुमाराणं देवाणं जाव विहरंति, माहिंदे इत्थ देविंदे देवराया परिवसइ, अरयंबरवत्थधरे, एवं जगा सणंकुमारे जाव विहरइ, नवरं अट्ठण्हं विमाणावाससयसहस्साणं सत्तरिए सामाणियसाहस्सीणं चउण्हं सत्तरीणं आयरक्खदेवसाहस्सीणं जाव विहरइ ॥

कहि णं भंते! बंभलोगदेवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता ?, कहि णं भंते! बंभलोगदेवा परिवसंति ?, गोयमा! सणंकुमारमाहिंदाणं कप्पाणं उप्पिं सपक्खिं सपडिदिसिं बहूइं जोयणाइं जाव उप्पइत्ता एत्थ णं बंभलोए नामं कप्पे पाईणपडीणायए उदीणदाहिणविच्छिण्णे पडिपुन्नचंदसंठाणसंठिए अच्चिमालीभासरासिप्पभे, अवसेसं जहा सणंकुमाराणं, नवरं चत्तारि विमाणावाससयसहस्सा वडिंसया जहा सोहम्मवडिंसया नवरं मज्झे इत्थ बंभलोयवडिंसए, एत्थ णं बंभलोगदेवाणं ठाणा पन्नत्ता, सेसं तहेव जाव विहरंति, बंभे इत्थ देविंदे देवराया परिवसइ अरयंबरवत्थधरे एवं जहा सणंकुमारे जाव विहरइ, नवरं चउण्हं विमाणावाससयसहस्साणं सट्ठीए सामानियसाहस्सीणं चउण्हं सट्ठीए आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं जाव विहरइ ॥

कहि णं भंते! लंतगदेवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता ?, कहि णं भंते! लंतगदेवा परिवसंति ?, गोयमा! बंभलोगस्स कप्पस्स उप्पिं सपक्खिं सपडिदिसिं बहूइं जोयणाइं जाव बहुगाओ जोयणकोडाकोडीओ उड्ढं दूरं उप्पइत्ता एत्थ णं लंतए नामं कप्पे पन्नत्ते पाईणपडीणायए जहा बंभलोए, नवरं पन्नासं विमाणावाससहस्सा भवंतीतिमक्खायं, वडिंसगा जहा ईसाणवडिंसगा नवरं मज्झे इत्थ लंतगवडिंसए देवा तहेव जाव विहरंति, लंतए एत्थ देविंदे देवराया परिवसइ, जहा सणंकुमारे, नवरं पन्नासाए विमाणावाससहस्साणं पन्नासाए सामानियसाहस्सीणं चउण्ह य पन्नासाणं आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं जाव विहरइ ॥

कहि णं भंते! महासुक्काणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता ?, कहि णं भंते! महासुक्का देवा परिवसंति ?, गोयमा! लंतगस्स कप्पस्स उप्पिं सपक्खिं सपडिदिसिं जाव उप्पइत्ता एत्थ णं महासुक्के नामं कप्पे पन्नत्ते पाईणपडीणायए उदीणदाहिणविच्छिण्णे, जहा बंभलोए, नवरं चत्तालीसविमाणावाससहस्सा भवंतीतिमक्खायं, वडिंसगा जहा सोहम्मवडिंसगा, नवरं मज्झे इत्थ महासुक्कवडिंसए जाव विहरंति, महासुक्के इत्थ देविंदे देवराया जहा सणंकुमारे, नवरं चत्तालीसाए विमाणावाससहस्साणं चत्तालीसाए सामानियसाहस्सीणं चउण्ह य चत्तालीसाणं आयरक्खदेवसाहस्सीणं जाव विहरइ ॥

कहि णं भंते! सहस्सारदेवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता ?, कहि णं भंते! सहस्सारदेवा परिवसंति ?, गोयमा! महासुक्कस्स कप्पस्स उप्पिं सपक्खिं सपडिदिसिं जाव उप्पइत्ता एत्थ णं सहस्सारे नामं कप्पे पन्नत्ते पाईणपडीणायए, जहा बंभलोए, नवरं छव्विमाणावाससहस्सा भवंतीतिमक्खायं, देवा तहेव, जाव वडिंसगा जहा ईसाणस्स वडिंसगा, नवरं मज्झे इत्थ सहस्सारवडिंसए जाव विहरंति, सहस्सारे इत्थ देविंदे देवराया परिवसइ जहा सणंकुमारे, नवरं छण्हं विमाणावाससहस्साणं तीसाए सामानियसाहस्सीणं चउण्ह य तीसाए आयरक्खदेवसाहस्सीणं जाव आहेवच्चं कारेमाणे विहरइ ॥

कहि णं भंते! आणयपाणयाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता ?, कहि णं भंते! आणयपाणया देवा परिवसंति ?, गोयमा! सहस्सारस्स कप्पस्स उप्पिं सपक्खिं सपडिदिसिं जाव

उप्पइत्ता एत्थ णं आणयपाणयनामा दुवे कप्पा पन्नत्ता पाईणपडीणायया उदीणदाहिणविच्छिन्ना अद्धचंदसंठाणसंठिया अच्चिमालीभासरासिप्पभा, सेसं जहा सणंकुमारे जाव पडिरूवा,

तत्थ णं आणयपाणयदेवाणं चत्तारि विमाणावाससया भवंतीतिमक्खायं जाव पडिरूवा, वडिंसगा जहा सोहम्मे कप्पे, नवरं मज्झे इत्थ पाणयवडिंसए, ते णं वडिंसगा सव्वरयणामया अच्छा जाव पडिरूवा, एत्थ णं आणयपाणयदेवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता, तिसुवि लोगस्स असंखेज्जइभागे, तत्थ णं बहवे आणयपाणयदेवा परिवसंति महिड्ढिया जाव पभासेमाणा, ते णं तत्थ साणं साणं विमाणावाससयाणं जाव विहरंति, पाणए इत्थ देविंदे देवराया परिवसइ जहा सणंकुमारे, नवरं चउण्हं विमाणावाससयाणं बीसाए सामानियसाहस्सीणं असीईए आयरक्खदेवसाहस्सीणं अन्नेसिं च बहूणं जाव विहरइ ॥

कहि णं भंते ! आरणच्चुयाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता ?, कहि णं भंते ! आरणच्चुया देवा परिवसंति ?, गोयमा ! आणयपाणयाणं कप्पाणं उप्पिं सपक्खिं सपडिदिसिं एत्थ णं आरणच्चुया नामं दुवे कप्पा पन्नत्ता, पाईणपडीणायया उदीणदाहिणविच्छिन्ना अद्धचंदसंठाणसंठिया अच्चिमालीभासरासिवण्णाभा असंखिज्जाओ जोयणकोडाकोडीओ आयामविक्खंभेणं असंखिज्जाओ जोयणकोडाकोडीओ परिक्खेवेणं सव्वरयणामया अच्छा सण्हा लण्हा घट्टा मट्ठा नीरया निम्मला निप्पंका निक्कंकडच्छाया सप्पभा सस्सिरिया सउज्जोया पासादीया दरिसणिज्जा अभिरूवा पडिरूवा, एत्थ णं आरणच्चुयाणं देवाणं तिन्नि विमाणावाससया भवंतीतिमक्खायं,

ते णं विमाणा सव्वरयणामया अच्छा सण्हा लण्हा घट्टा मट्ठा नीरया निम्मला निप्पंका निक्कंकडच्छाया सप्पभा सस्सिरिया सउज्जोया पासादीया दरिसणिज्जा अभिरूवा पडिरूवा, तेसिणं विमाणाणं कप्पाणं बहुमज्झदेसभाए पंच वडिंसया पन्नत्ता, तंजहा—अंकवडिंसए फलिहवडिंसए रयणवडिंसए जायरूववडिंसए मज्झे एत्थ अच्चुयवडिंसए, ते णं वडिंसया सव्वरयणामया जाव पडिरूवा, एत्थ णं आरणच्चुयाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता, तिसुवि लोगस्स असंखेज्जइभागे, तत्थ णं बहवे आरणच्चुया देवा परिवसंति, अच्चुए इत्थ देविंदे देवराया परिवसइ, जहा पाणए जाव विहरइ, नवरं तिण्हं विमाणावाससयाणं दसण्हं सामाणियसाहस्सीणं चत्तालीसाए आयरक्खदेवसाहस्सीणं आहेवच्चं कुव्वमाणे जाव विहरइ ।

मू. (२२९) बत्तीसअट्ठवीसा बारसअट्ठचउरो(य) सयसहस्सा ।
पन्ना चत्तालीसा छच्च सहस्सा सहस्सारे ॥

मू. (२३०) आणयपाणयकप्पे चत्तारि सयाऽऽरणच्चुए तिन्नि ।
सत्त विमाणसयाइं चउसुवि एएसु कप्पेसु

मू. (२३१) (सामानियसंगहणीगाहा—) चउरासीईअसीई बावत्तरी सत्तरी य सट्ठी य ।
पन्ना चत्तालीसा तीसा वीसा दस सहस्सा ॥

मू. (२३२) एए चेव आयरक्खा चउग्गुणा ।

कहि णं भंते ! हिट्ठिमगेविज्जगाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता ?, कहि णं भंते ! हिट्ठिमगेविज्जगा देवा परिवसंति ?, गोयमा ! आरणच्चुयाणं कप्पाणं उप्पिं जाव उड्ढं दूरं उप्पइत्ता एत्थ णं हिट्ठिमगेविज्जगाणं देवाणं तओ गेविज्जगविमाणपत्थडा पन्नत्ता पाईणपडीणायया उदीणदाहिण-

विच्छिन्ना पडिपुन्नचंदसंठाणसंठिया अच्चिमालीभासरासिवण्णाभा सेसं जहा बंभलोगे जाव पडिरूवा, तत्थ णं हेट्ठिमगेविज्जगाणं देवाणं एक्कारसुत्तरे विमाणावाससए भवंतीतिमक्खायं, ते णं विमाणा सव्वरयणामया जाव पडिरूवा, एत्थ णं हेट्ठिमगेविज्जगाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता, तिसुवि लोगस्स असंखेज्जइभागे, तत्थ णं बहवे हेट्ठिमगेविज्जगा देवा परिवसंति, सव्वे समिड्ढिया सव्वे समजुइया सव्वे समजसा सव्वे समबला सव्वे समानुभावा महासुक्खा अनिंदा अपेस्सा अपुरोहिया अहमिंदा नामं ते देवगणा पन्नत्ता समणाउसो ! ।।

कहि णं भंते ! मज्झिमगाणं गेविज्जगाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता ?, कहि णं भंते ! मज्झिमगेविज्जगा देवा परिवसंति ?, गोयमा ! हेट्ठिमगेविज्जगाणं उप्पिं सपक्खिं सपडिदिसिं जाव उप्पइत्ता एत्थ णं मज्झिमगेविज्जगदेवाणं तओ गेविज्जगाणं पत्थडा पन्नत्ता, पाईणपडीणायया जगा हेट्ठिमगेविज्जगाणं, नवरं सत्तुत्तरे विमाणावाससए भवन्तीतिमक्खायं, ते णं विमाणा जाव पडिरूवा, एत्थ णं मज्झिमगेविज्जगाणं जाव तिसुवि लोगस्स असंखिज्जइभागे, तत्थ णं बहवे मज्झिमगेविज्जगा देवा परिवसंति जाव अहमिंदा नाम ते देवगणा पन्नत्ता समणाउसो ! ।

कहि णं भंते ! उवरिमगेविज्जगाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता ?, कहि णं भंते ! उवरिमगेविज्जए देवा परिवसंति ?, गोयमा ! मज्झिमगेविज्जगाणं उप्पिं जाव उप्पइत्ता एत्थ णं उवरिमगेविज्जगाणं तओ गेविज्जगविमाणपत्थडा पन्नत्ता पाईणपडीणायया सेसं जहा हेट्ठिमगेविज्जगाणं, नवरं एगे विमाणावाससए भवंतीतिमक्खायं, सेसं तहेव भाणियव्वं जाव अहमिंदा नामं ते देवगणा पन्नत्ता समणाउसो ! ।

मू. (२३३) *एक्कारसुत्तरं हेट्ठिमेसु सत्तुत्तरं च मज्झिमए ।*
सयमेगं उवरिमए पंचेव अनुत्तरविमाणा ।।

मू. (२३४) कहि णं भंते ! अनुत्तरोववाइयाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता ?, कहि णं भंते अनुत्तरोववाइया देवा परिवसंति ?, गोयमा ! इमीसे रयणप्पभाए पुढवीए बहुसमरमणिज्जाओ भूमिभागाओ उड्ढं चंदिमसूरियगहगणनक्खत्ततारारूवाणं बहूइं जोयणसयाइं बहूइं जोयणसहस्साइं बहूइं जोयणसयसहस्साइं बहुगाओ जोयणकोडीओ बहुगाओ जोयणकोडाकोडीओ उड्ढं दूरं उप्पइत्ता सोहम्मीसाणसणंकुमारा जाव आरणअच्चुयकप्पा तिन्निअट्ठारसुत्तरे गेविज्जगविमाणावाससए वीइवइत्ता तेण परं दूरंगया नीरया निम्मला वितिमिरा विसुद्ध पंचदिसिं पंच अनुत्तरा महइमहालया महाविमाणा पन्नत्ता, तंजहा–

विजए वेजयंते जयंते अपराजिए सव्वट्ठसिद्धे, ते णं विमाणा सव्वरयणामया अच्छा सण्हा लण्हा घट्ठा मट्ठा नीरया निम्मला निप्पंका निक्कंकडच्छाया सप्पभा सस्सिरिया सउज्जोया पासाइया दरिसणिज्जा अभिरूवा पडिरूवा, एत्थ णं अनुत्तरोववाइयाणं देवाणं पज्जत्तापज्जत्ताणं ठाणा पन्नत्ता, तिसुवि लोगस्स असंखेज्जइभागे, तत्थ णं बहवे अनुत्तरोववाइया देवा परिवसंति, सव्वे समिड्ढिया सव्वे समबला सव्वे समानुभावा हमासुक्खा अनिंदा अप्पेस्सा अपुरोहिया अहमिंदा नामं ते देवगणा पन्नत्ता समणाउसो ! ।।

वृ. सनन्कुमाराकल्पे 'सपक्खिं सपडिदिसं'ति समानाः पक्षाः–पूर्वापरदक्षिणोत्तररूपाः

पार्श्वा यस्मिन् दूरमुत्पतने तत्सपक्षं 'समानस्य धर्मादिषु चे'ति समानस्य समावः 'सपडिदिसि'ति समानाः प्रतिदिशो–विदिशो यत्र तत् सप्रतिदिक् ॥

सामानिकसंग्रहणीगाथा 'चउरासीइ' इत्यादि, सौधर्मेन्द्रस्य चतुरशीतिः सामानिकसहस्राणि ईशानेन्द्रस्याशीतिः सनत्कुमारेन्द्रस्य द्वासप्ततिः माहेन्द्रदेवराजस्य सप्ततिः ब्रह्मलोकेन्द्रस्य षष्टिः लान्तकेनद्रस्य पञ्चाशत् महाशुक्रेन्द्रस्य चत्वारिंशत् सहस्रारेन्द्रस्य त्रिंशत् आनतप्राणतेन्द्रस्य विंशतिः आरणाच्युतेन्द्रस्य दश सामानिकसहस्राणि, अवतंसकाश्चातिदेशोनोक्ता इति दुरवबोधाः ततो विनेयजनानुग्रहार्थं वैविक्तयेन मूलत आरभ्योपदर्श्यन्ते–

सौधर्मे पूर्वस्यामशोकावतंसकः दक्षिणतः सप्तपर्णावतंसकः पश्चिमायां चम्पकावतंसकः उत्तरतश्चूतावतंसकः मध्ये सौधर्मावतंसकः, एवं पूर्वादिक्रमेण ईशाने अङ्कावतंसकः स्फटिकावतंसकः रत्नावतंसकः जातरूपावतंसकः मध्ये ईशानावतंसकः, सनत्कुमारे अशोकसप्तपर्णचंपकचूतसनत्कुमारावतंसकाः, माहेन्द्रे अङ्कस्फटिकरत्नजातरूपमाहेन्द्रावतंसकाः, ब्रह्मलोके अशोकसप्तपर्णचम्पकचूतब्रह्मलोकावतंसकाः, लान्तके अङ्कस्फटिकरत्नजातरूपलान्तकावतंसकाः महाशुक्रे अशोकसप्तपर्णचम्पकचूतमहाशुक्रावतंसकाः, सहस्रारे अङ्कस्फटिकरत्नजातरूपसहस्रारावतंसकाः, प्राणते अशोकसप्तपर्णचम्पकचूतप्राणतावतंसकाः अच्युते अङ्कस्फटिकरत्नजातरूपअच्युतावतंसका इति ॥

ग्रैवेयकसूत्रे 'समिद्धिया' समा ऋद्धिर्येषां ते समर्द्धिकाः, एवं 'समजुइया' इत्याद्यपि भावनीयं, 'अनिंदा' इति न विद्यते इन्द्रः–अधिपतिर्येषां ते अनिन्द्राः 'अपेस्सा' इति न विद्यते प्रेष्टः–प्रेष्यत्वं येषा ते अप्रेष्याः 'अपुरोहि या' इति न विद्यते पुरोहितः–शान्तिकर्मकारी येषां अशान्तेरभावात् ते अपुरोहिताः, किंरूपाः पुनस्ते? इत्याह–अहमिन्द्रा नाम ते देवगणाः प्रज्ञप्ता हे श्रमण! हे आयुष्मन् ॥

मू. (२३५) *कहि णं भंते! सिद्धाणं ठाणा प० कहि णं भंते! सिद्धा परिवसंति?, गोयमा सव्वट्ठसिद्धस्स महाविमाणस्स उवरिल्लाओ थूभियग्गाओ दुवालस जोयणे उड्ढं अबाहाए एत्थ णं ईसीपब्भारा नामं पुढवी पन्नत्ता, पणयालीसं जोयणसयसहस्साइं आयामविक्खंभेणं एगा जोयणकोडी बायालीसं च सयसहस्साइं तीसं च सहस्साइं दोन्नि य अउणापन्ने जोयणसए किंचि विसेसाहिए परिक्खेवेणं पन्नत्ता, ईसिपब्भाराए णं पुढवीए बहुमज्झदेसभाए अट्ठजोयणिए खेत्ते अट्ठ जोयणाइं बाहल्लेणं पन्नत्ते, तओ अनंतरं च णं मायाए मायए पएसपरिहाणीए परिहायमाणी परिहायमाणी सव्वेसु चरमंतेसु मच्छियपत्ताओ तणुयतरी अंगुलस्स असंखेज्जइभागं बाहल्लेणं पन्नत्ता, ईसीपब्भाराए णं पुढवीए दुवालस नामधिज्जा पन्नत्ता, तंजहा–*

ईसि इ वा ईसीपब्भारा इ वा तणू इ वा तणुतणू इ वा सिद्धित्ति वा सिद्धालए वा मुत्तित्ति वा मुत्तालए इ वा लोयग्गेत्ति वा लोयग्गथूभियत्ति वा लोयग्गपडिवुज्झणा इ वा सव्वपाणभूयजीवसत्तसुहावहा इ वा, ईसीपब्भारा णं पुढवी सेया संखदलविमलसोत्थियमुणालदगरयतुसारगोक्खीरहारवण्णा उत्ताणयछत्तसंठाणसंठिया सव्वज्जुणसुवन्नमई अच्छा सण्हा लण्हा घट्ठा मट्ठा नीरया निम्मला निप्पंका निक्कंकडच्छाया सप्पभा सस्सिरिया सउज्जोया पासाईया दरिसणिज्जा अभिरूवा पडिरूवा, ईसीपब्भाराए णं पुढवीए सीआए जोयणम्मि लोगंतो तस्स णं जोयणस्स जे से उवरिल्ले गाउए तस्सणं गाउयस्स जे से उवरिल्ले छब्भागे एत्थ णं सिद्धा भगवंतो साइया अपज्जवसिया

अनेगजाइजरामरणजोनिसंसारलंकलीभावपुणब्भवगब्भवासवसहीपवंचसमइक्कंता सासयमणागयद्धं कालं चिट्ठअट्टंति, तत्थवि य ते अवेया अवेयणा निम्ममा असंगा य संसारविप्पमुक्का पएसनिव्वत्तसंठाणा।

वृ. सिद्धसूत्रे 'एगा जोयणकोडी' इत्यादि परिरयपरिमाणं 'विक्खंभवग्गदहगुण०' इत्यादिकरणवशात् स्वयमानेतव्यं, सुगमत्वात्, क्षेत्रसमासटीका वा परिभावनीया, तत्र पञ्चचत्वारिंश ल्लक्षप्रमाणविष्कम्भवमनुष्यक्षेत्रपरिरयस्य एतावत्प्रमाणस्य सविस्तरं भावितत्वात्, तस्याश्च ईषत्प्राग्भाराया: पृथिव्या: बहुमध्यदेशभागे अष्टयोजनिकम्–आयामविष्कम्भाभ्या- मष्टयोजनप्रमाणं क्षेत्रं च, अष्टौ योजनानि बाहल्येन चोच्चत्वेन–उच्चैस्त्वेनेति भावः, प्रज्ञप्ता, तदनन्तरं सर्वासु दिक्षु विदिक्षु च मात्रया स्तोकया स्तोकया प्रदेशपरिहान्या परिहीयमाना सर्वेषु चरमान्तेषु मक्षिकापत्रतोऽप्यतितन्वी अङ्गुला संख्येयभागं बाहल्येन प्रज्ञप्ता, 'ईसि इ वा' इति, पदैकदेशे पदसमुदायोपचारात् १ ईषत्प्राग्भारा इति वा २ 'तणुइत्ति वा' तन्वी वा शेषपृथिव्यपेक्षयाऽतितनुत्वात् ३ 'तणुतणूइत्ति वा' इति तनुभ्योऽपि जगत्प्रसिद- अणुभ्यस्तन्वी मक्षिकापत्रतोऽपि पर्यन्तदेशेऽतितनुत्वात् तनुतन्वी ४ 'सिद्धिरिति वा' सिद्धक्षेत्रस्य प्रत्यासन्नत्वात् ५,

'सिद्धालय इति वा' सिद्धक्षेत्रस्य प्रत्यासन्नतयोपचारतः सिद्धानामालयः सिद्धालयः ६ एवं मुक्तिरिति वा मुक्तालय इति वेदपि परिभाव्यं तथा लोकाग्रे चर्तनत्वात् लोकाग्रमिति ९ लोकाग्रस्य स्तूपिकेव लोकाग्रस्तूपिका १० तथा लोकाग्रेण प्रत्यूह्यते इति लोकाग्रप्रतिवाहिनी ११।

'सव्वपाणभूयजीवसत्तसुहावहा' इति प्राणा–द्वित्रिचतुरिन्द्रिया इति भूताः–तरवः जीवाः–पञ्चेन्द्रियाः शेषाः प्राणिनः सत्त्वाः, उक्तं च–

॥१॥ "प्राणा द्वित्रिचतुः प्रोक्ताः, भूताश्च तरवः स्मृताः।
जीवाः पञ्चेन्द्रिया ज्ञेयाः, शेषाः सत्त्वा उदीरिताः॥"

सर्वेषां प्राणभूतजीवसत्त्वानां सुखावहा उपद्रवकारित्वाभावात् सर्वप्राणभूतजीवसत्त्वसु खावहा १२। सा च ईषत्प्राग्भारा पृथ्वी श्वेता, श्वेतत्वमेवोपमयाप्रकटयति–'संखदलविमल' इत्यादि, शङ्खदलस्य–शङ्खदलचूर्णस्य विमलो–निर्मलःस्वस्तिकः शङ्खदलविमलस्वस्तिक; स च मृणालं च दकरजश्च तुषारं च हिमं च गोक्षीरं च हारश्च तेषामिव वर्णो यस्याः सा तथा, उत्तानकं–उत्तानीकृतं यत् छत्रं तस्य यत्संस्थानं तेन संस्थिता उत्तानकच्छत्रसंस्थानसंस्थितत्वं च प्रागुपदर्शितस्थापनातो भावनीयं।

'सव्वज्जुणसुवण्णमयी' सर्वात्मना श्वेतसुवर्णमयी 'ईसीपब्भाराए णं' इत्यादि ईषत्प्राग्भारायाः पृतिव्या ऊर्ध्वं 'सीयाए' इति निःश्रेणिगत्या योजने लोकान्तो भवति, तस्य च योजनस्य यदुपरितनं गव्यूतं चतुरथं तस्य च गव्यूतस्य यः सर्वोपरितनो षड्भागो अत्र 'णं' इति वाक्यालङ्कारे सिद्धा भगवन्तः सादिकाः कर्मक्षयानन्तरं सिद्धत्वभावात्,

एतेन अनादिशुद्धपुरुषप्रवादप्रतिक्षेप आवेदितो द्रष्टव्यः, अपर्यवसिता रागाद्यभावेन प्रतिपातासंभवात्, रागादयो हि सिद्धत्वाच्यावयितुं प्रभविष्णवः, न च ते भगवतां सन्ति, तेषां निर्मूलकाषंकषितत्वात्, न च निर्मूलकाषंकषिता अपि भूयः प्रादुर्भवन्ति, बीजाभावादिति,

तथा अनेकैर्जातिजरामरणैः–जन्मजरामृत्युभिर्यश्च तासु तासु योनिषु संसारः–संसरणं

तेन च यः कलंकलीभावः—कदर्थ्यमानता यश्च दिव्यसुखमनुप्राप्तानामपि पुनर्भवे—संसारे गर्भवसतिप्रपञ्चः तौ प्रतिहन्ता अत एव लोकाग्रमागत्य [illegible] इत्यादि, तत्रापि च—सिद्धक्षेत्रे गताः सन्तस्ते—भगवन्तः 'अवेदाः' पुरुषवेदादिवेदरहिताः 'अवेदनाः' सातासातवेदनाभावात् 'निर्ममा' ममत्वरहिताः 'असंगा' बाह्याभ्यन्तरसङ्गरहिताः, कस्मादेवम् ? अत आह—'संसारविप्रमुक्ताः' हेतौ प्रथमा, यतः संसाराद् विप्रमुक्तास्तस्मादवेदा अवेदना निर्ममा असङ्गाश्च, पुनः कथंभूताः ? इत्याह 'पएसनिवत्तसंठाणाः प्रदेशैः—आत्मप्रदेशैर्न तु बाह्यपुद्गलैः शरीरपञ्चकस्यापि सर्वात्मना त्यक्तत्वात् निर्वृत्तं—निष्पन्नं संस्थानं येषां ते प्रदेशनिर्वृत्तसंस्थानाः अत्र शिष्यः पृच्छन्नाह—

मू. (२३६) *कहिं पडिहया सिद्धा, कहिं सिद्धा पइट्ठिया ।*
कहिं बोंदिं चइत्ता णं, कत्थ गंतूण सिज्झइ ? ॥

वृ. 'कहिं पडिहया सिद्धा' इत्यादि 'कहिं' इत्यत्र सप्तमी तृतीयार्थे प्राकृतत्वात्, यथा 'तिसु तेसु अलंकिया पुढवी' इत्यादि, ततोऽयमर्थः—स्वकेन प्रतिहताः ?—केन स्खलिताः ? सिद्धाः—मुक्ताः, तथा क्व—कस्मिन् स्थाने सिद्धाः प्रतिष्ठिताः— अवस्थिताः, तथा क्व—कस्मिन् क्षेत्रे बोन्दिस्तनुः शरीरमित्यनर्थान्तरम् तां त्यक्त्वा क्वगत्वा सिद्धयन्ति ? निष्ठितार्था भवन्ति ?, 'सिज्झइ' इत्यत्रानुस्वारलोपो द्रष्टव्यः, अथवा एकवचनोपन्यासोऽपि सूत्रशैल्या न विरोधभाक्, तथा चान्यत्रा ऽप्येवं प्रयोगः—

॥ १ ॥ "वत्थगंधमलंकारं, इत्थीओ सयणाणि य ।
अच्छंदा जे न भुंजंति, न से चाइत्ति वुच्चइ ॥" इति,

एवं शिष्येण प्रश्ने कृते सूरिराह—

मू. (२३७) *अलोए पडिहया सिद्धा, लोयग्गे य पइट्ठिया ।*
इहं बोंदिं चइत्ता णं, तत्थ गंतूण सिज्झइ ॥

वृ. 'अलोए पडिहया सिद्धा' इत्यादि, अत्रापि सप्तमी तृतीयार्थे, अलोकेन—केवलाकाशास्तिकायरूपेण प्रतिहताः—स्खलिताः सिद्धाः, इह तत्र धर्मास्तिकायाद्यभावात् तदानन्तर्यवृत्तिरेव प्रतिस्खलनम्, न तु सम्बन्धे सति विघातः अप्रतिघत्वात्, सप्रतिघानां हि सम्बन्धे सति विघातः, नान्येषामिति, तथा लोकस्य—पञ्चास्तिकायात्मकस्याग्रे—मूर्धनि प्रतिष्ठिताः—अपुनरागत्या व्यवस्थिताः, तथा इह मनुष्यलोके बोन्दीं—तनुं त्यक्त्वा तत्र—लोकाग्रे समयान्तरप्रदेशान्तरास्पर्शनेन गत्वा सिध्यन्ति—निष्ठितार्था भवन्ति ॥ सम्प्रति तत्रगतानां यत्संस्थानं तदभिधित्सुराह—

मू. (२३८) *दीहं वा हस्सं वा जं चरिमभवे हविज्ज संठाणं ।*
तत्तो तिभागहीणा सिद्धाणोगाहणा भणिया ॥

वृ. 'दीहं वा हस्सं वा' इत्यादि, दीर्घं वा—पञ्चधनुःशतप्रमाणं ह्रस्वं वा—हस्तद्वयप्रमाणं वाशब्दाद् मध्यमं वा विचित्रं यच्चरमभवे—पश्चिमभवे भवेत् संस्थानं ततः—तस्मात् संस्थानात् त्रिभागहीना—वदनोदरादिरन्ध्रपूरणेन तृतीयभागेन हीना सिद्धानामवगाहना, अवगाहन्तेऽस्यामित्यवगाहना—स्वावस्थैव भणिता तीर्थकरगणधरैरिति, अत्रगतसंस्थानप्रमाणा- पेक्षया त्रिभागहीनं तत्र संस्थानमिति भावः ॥ एतदेव स्पष्टतरमुपदर्शयति—

मू. (२३९) *जं संठाणं तु इहं भवं चयंतस्स चरिमसमयंमि ।*
आसी य पदेसघनं तं संठाणं तहिं तस्स ॥

वृ. 'जं संठाणं तु इहं' इत्यादि, यत्संस्थानं-यावत्प्रमाणं संस्थानं इह-मनुष्यभवे आसीत् तदेव भवन्ति प्राणिनः कर्मवशवर्तिनोऽस्मिन्निति भवं-शरीरं त्यजतः-परित्यजतः, काययोगं परिजिहानस्येति भावः, चरमसमये सूक्ष्मक्रियाऽप्रतिपातिध्यानबलेन वदनोदरादिरन्ध्रपूरणात् त्रिभागेन हीनं प्रदेशघनमासीत्, 'तं संठाणं तहिं तस्स' इति तदेव च प्रदेशघनं मूलप्रमाणापेक्षया त्रिभागहीनप्रमाणं संस्थानं तत्र-लोकाग्रे तस्य-सिद्धस्य, नान्यदिति ॥ साम्प्रतमुत्कृष्टावगाहनादिभेदभिन्नामवगाहनामभिधित्सुराह-

मू. (२४०) *तिन्नि सया तित्तीसा धनुत्तिभागो य होइ नायव्वो ।*
एसा खलु सिद्धाणं उक्कोसोगाहणा भणिया ।

वृ. 'तिन्नि सया तेत्तीसा' इत्यादि, त्रीणि शतानि त्रयस्त्रिंशानि-त्रयस्त्रिंशदधिकानि धनुस्त्रिभागश्च भवति बोद्धव्या, एषा खलु सिद्धानामुत्कृष्टावगाहना भणिता तीर्थंकरगणधरैः, सा च पञ्चधनुःशततनुकानामवसेया, ननु मरुदेवी नाभिकुलकरपत्नी, नाभेश्च पञ्चविंशत्यधिकानि पञ्चधनुःशतानि शरीरप्रमाणं, यदेव च तस्य शरीरमानं तदेव मरुदेवाया अपि, 'संघयणं संठाणं उच्चत्तं चेव कुलगरेहिं समं'इति वचनात्, मरुदेवी भगवती च सिद्धा, ततस्तस्या देहमानस्य त्रिभागे पातिते सिद्धावस्थायाःसार्धानि त्रीणि धनुःशतान्येवावगाहना प्राप्नोति, कथमुक्तप्रमाणा उत्कृष्टावगाहना घटते ? इति, नैष दोषः, मरुदेवाया नाभेः किञ्चिदून- प्रमाणा भवन्ति, ततो मरुदेवाऽपि पञ्चधनुःशतप्रमाणेति न कश्चिद्दोषः, अपिच-हस्तिस्कन्धाधिरूढा संकुचिताङ्गी सिद्धा ततः शरीरसंकोचभावाद् नाधिकावगाहनासंभव इत्यविरोधः, आह च भाष्यकृत्-

॥१॥ "कह मरुदेवामाणं ? नाभीतो जेण किञ्चिदूणा सा ।
तो किर पंचसयच्चिय अहवा संकोचओ सिद्धा ॥"

मू. (२४१) *चत्तारि य रयणीओ रयणी तिभागूणिया य बोद्धव्वा ।*
एसा खलु सिद्धाणं मज्झिमओगाहणा भणिया ॥

वृ. 'चत्तारि रयणीओ' इत्यादि, चतस्रोरत्नयो रत्निश्च त्रिभागोना च सा बोद्धव्या एषा खलु सिद्धानामवगाहना भणिता मध्यमा। आह-जघन्यपदे सप्तहस्तोच्छ्रितानामागमे सिद्धिरुक्ता, तत एषा जघन्या प्राप्नोति, कथं मध्यमा ?, तदयुक्तं, वस्तुतत्त्वापरिज्ञानात्, जघन्यपदे हि सप्तहस्तानां सिद्धिरुक्ता तीर्थकरापेक्षया, सामान्यकेवलिनां तु हीनप्रमाणानामपि भवति, इदमपि चावगाहनामानं चिन्त्यते सामान्यसिद्धापेक्षया, ततो न कश्चिद्दोषः ।

मू. (२४२) *एगा य होइ रयणी अट्ठेव य अंगुलाइं साहि या ।*
एसा खलु सिद्धाणं जहन्नओगाहणा भणिया ॥

वृ. 'एगा य होइ' इत्यादि, एका रत्निः परिपूर्णा अष्टौ चाङ्गुलान्यधिकानि एषा भवति सिद्धानामवगाहना जघन्या, सा च कूर्मापुत्रादीनां द्विहस्तानामवसेया, यदिवा सप्तहस्तोच्छ्रितानामपि यन्त्रपीलनादिना संवर्तितशरीराणां, आह च भाष्यकृत-

॥१॥ "जेट्ठा उ पंचधनुसयतनुस्स मज्झा य सत्तहत्थस्स
देहत्तिभागहीणा जहन्निया जा बिहत्थस्स ॥

॥ २ ॥ सत्तूसियएसु सिद्धी जहन्नओ कहमिहं बिहत्थेसु ? ।
सा किर तित्थयरेसु सेसाणं सिज्झमाणाणं ॥
॥ ३ ॥ ते पुण होज्ज बिहत्था कुम्मापुत्तादयो जहन्नेणं ।
अन्ने संवट्टियसत्तहत्थसिद्धस्स हीणत्ति ॥''

साम्प्रतमुक्तानुवादेनैवसंस्थानलक्षणं सिद्धानामभिधत्सुराह–

मू. (२४३) *ओगाहणाइ सिद्धा भवत्तिभागेण होंति परिहीणा ।*
संठाणमनित्थंथं जरामरणविप्पमुक्काणं ॥

वृ. 'ओगाहणाओ' इत्यादि, सुगमं, नवरं 'अनित्थंथं' इति इदंप्रकारमापन्नमित्थं इत्थं तिष्ठतीति इत्थंस्थं न इत्थंस्थं अनित्थंस्थं–वदनादिशुषिरप्रतिपूरणेन पूर्वाकारान्यथाभावतोऽनियताकारत्वमिति भावः, योऽपि च सिद्धादिगुणेषु 'सिद्धे न दीहे न हस्से' इत्यादिना दीर्घत्वादीनां प्रतिषेधः कृतः सोऽपि पूर्वाकारापेक्षया संसअथानस्यानित्थंसंस्थत्वात्च् प्रतिपत्तव्यो, न पुनःसर्वथा संस्थानस्याभावतः, आह च भाष्यकृत्–

॥ १ ॥ ''सुसिरकपरिपूरणाओ पुव्वागारन्नहाववत्थाओ ।
संठाणमणित्थंथं जं भणियं वित्थरत्थं ॥
॥ २ ॥ एत्तोच्चिय पडिसेहो सिद्धाइगुणेसु दीहयाईणं ।
जमणित्थंथं पुव्वागाराविक्खाए नाभावो ॥''

नन्वेते सिद्धाः परस्परं देशभेदेने व्यवसथिता उत नेति ? नेति तद् ब्रूमः कस्मादिति चेत्,

मू. (२४४) *जत्थ य एगो सिद्धो तत्थ अणंता भवक्खयविमुक्का ।*
अन्नोऽन्नसमोगाढा पुट्ठा सव्वेवि लोगंते ॥

वृ. 'जत्थ य' इत्यादि, यत्रैव देशे चशब्दस्य एवकारार्थत्वात् एकः सिद्धो–निवृ–तस्तत्रानन्ता भवक्षयविमुक्ताः, अत्र भवक्षयग्रहणेन स्वेच्छया भवावतरणशक्तिमत्सिद्धव्यवच्छेदमाह, अन्योऽन्यसमवगाढाः, तथाविधाचिन्त्यपरिणामत्वात्, धर्मास्तिकायादिवत्, तथा स्पृष्टा–लग्नाः सर्वेऽपि लोकान्ते ।

मू. (२४५) *फुसइ अनंते सिद्धे सव्वपएसेहिं नियमसो सिद्धा ।*
तेऽवि य असंखिज्जगुणा देसपएसेहिं पुट्ठा ॥

वृ. 'फुसइ' इत्यादि, स्पृशत्यनन्तान् सिद्धान् सर्वप्रदेशैरात्मसंबन्धिभिर्नियमशः सिद्धः, तथा तेऽपि सिद्धाः सर्वप्रदेशस्पृष्टेभ्योऽसंख्येयगुणा वर्तन्ते ये देशप्रदेशैः स्पृष्टाः कथमिति चेत्, उच्यते, इहैकस्य सिद्धस्य यदवगाहनक्षेत्रं तत्रैकस्मिन्नपि परिपूर्णेऽवगाढा अन्येऽप्यनन्ताः सिद्धाः प्राप्यन्ते, अपरे तु ये तस्य क्षेत्रस्यैकैकं प्रदेशमाक्रम्यावगाढास्तेऽपि प्रत्येकमनन्ताः, एवं द्वित्रिचतुःपञ्चादिप्रदेशवृध्द्या येऽवगाढास्तेऽपि प्रत्येकमनन्ताः, तथा तस्य मूलक्षेत्रस्यैकैकं प्रदेशं परित्यज्य येऽवगाढास्तेऽपि प्रत्येकमनन्ताः, एवं द्वित्रिचतुः- पञ्चादिप्रदेशहान्या येऽवगाढास्तेऽपि प्रत्येकमनन्ताः, एवं सति प्रदेशपरिवृद्धिहानिभ्याये समवगाढास्ते परिपूर्णैकक्षेत्रावगाढेभ्योऽसंख्येयगुणा भवन्ति, अवगाढंप्रदेशानमसंख्यातत्वात्, आह च–

॥ १ ॥ ''एगक्खेत्तेऽनंता पएसपरिवुड्ढिहाणिओ तत्तो ।
हुंति असंखेज्जगुणाऽसंखपएसो जमवगाढो ॥''

सम्प्रति सिद्धानेव लक्षणतः प्रतिपादयति–

मू. (२४६) *असरीरा जीवघना उवउत्ता दंसणे य नाणे य ।*
सागारमनागारं लक्खणमेयं तु सिद्धाणं ।।

वृ. 'असरीरा' इत्यादि, अविद्यमानशरीरा अशरीरा औदारिकादिपञ्चविधशरीररहिता इत्यर्थः, जीवाश्च ते घनाश्च वनदोदरादिशुषिरापूरणात् जीवघना उपयुक्ता दर्शने– केवलदर्शने ज्ञाने च–केवलज्ञाने यद्यपि सिद्धत्वप्रादुर्भावसमये केवलज्ञानमिति ज्ञानं प्रधानं तथाऽपि सामान्यसिद्धलक्षणमेतदिति ज्ञापनार्थमादौ सामान्यावलम्बनं दर्शनमुक्तं,

तथा च सामान्यविषयं दर्शनं विशेषविषयं ज्ञानमिति, ततः साकारानाकारं सामान्यविशेषोपयोगरूपमित्यर्थः, सूत्रे मकारोऽलाक्षणिको, लक्षणं–तदन्यव्यावृत्तिस्वरूपमेतत्–अनन्तरोक्तं, तुशब्दो वक्ष्यमाणनिरुपमसुखविशेषणार्थं, सिद्धानां–निष्ठितार्थानामिति । सम्प्रति केवलज्ञानकेवलदर्शनयोरशेषविषयतामुपदर्शयति–

मू. (२४७) *केवलनाणुवउत्ता जाणंता सव्वभावगुणभावे ।*
पासंता सव्वओ खलु केवलविट्ठीहिऽनंताहिं ।।

वृ. 'केवलनाणुवउत्ता' इत्यादि. केवलज्ञानेनोपयुक्ता न त्वन्तः करणेन तदभावादिति केवलज्ञानोपयुक्ता जानन्ति–अवगच्छन्ति सर्वभावगुणभावान्–सर्वपदार्थगुणपर्यायान्, प्रथमो भावशब्दः पदार्थवचनः द्वितीयः पर्यायवचनः, गुणपर्याययोस्त्वयं विशेषः–सहवर्तिनो गुणाः क्रमवर्तिनः पर्याया इति, तथा पश्यन्ति सर्वतः खलु–खलुशब्दस्यावधारणार्थत्वात् सर्वत एव, केवलदृष्टिभिरनन्ताभिः, अनन्तैः केवलदर्शनैरित्यर्थः, केवलदर्शनानां चानन्तता सिद्धानामनन्तत्वात्, इहादौ ज्ञानग्रहणं प्रथमतया तदुपयोगस्थाः सिध्यन्तीति ज्ञापनार्थं ।।

सम्प्रति निरुपमसुखभाजस्ते इति दर्शयति–

मू. (२४८) *नवि अत्थि माणुसाणं तं सुक्खं नवि य सव्वदेवाणं ।*
जं सिद्धाणं सुक्खं अव्वाबाहं उवगयाणं ।।

वृ. 'नवि अत्थि' इत्यादि, नैवास्ति मनुष्याणां चक्रवर्त्यादीनामपि तत्सौख्यं, नैवास्ति सर्वदेवानामनुत्तरपर्यन्तानामपि यत् सिद्धानां सौख्यमव्याबाधामुपगतानां–न विविधाऽऽबाधा अव्याबाधा तां उप–सामीप्येन गतानां–प्राप्तानां ।। यथा नास्ति तथा भङ्ग्योपदर्शयति–

मू. (२४९) *सुरगणसुहं समत्तं सव्वद्धापिंडियं अनंतगुणं ।*
नवि पावइ मुत्तिसुहं नंताहिं वग्गवग्गूहिं ।।

वृ. 'सुरगणसुहं' इत्यादि, 'सुरगणसुखं' देवसंघातसुखं 'समस्तं' संपूर्णमतीतानागतवर्तमानकालोद्भवमित्यर्थः, पुनः 'सर्वाद्धापिण्डितं' सर्वकालसमयगुणितं तथाऽनन्तगुणमिति, तदेवंप्रमाणं किलासत्कल्पनया एकैकाकाशप्रदेशे स्थाप्यते इत्येवं सकलाकाशप्रदेशपूरणेन यद्यप्यनन्तं भवति तदनन्तमप्यनन्तैर्वर्गैर्वर्गितं तथाऽप्येवं प्रकर्षगतमपि मुक्तिसुखं–सिद्धिसुखं न प्राप्नोति ।। एतदेव स्पष्टतरं भङ्ग्यन्तरेण प्रतिपादयति–

मू. (२५०) *सिद्धस्स सुहो रासी सव्वद्धापिंडिओ जइ हवेज्जा ।*
सोऽनंतवग्गभइओ सव्वागासे न माइज्जा ।।

वृ. 'सिद्धस्स सुहो रासी' इत्यादि, सुखानां राशिः सुखराशिः–सुखसंघातः सिद्धस्य सुखराशिः

सिद्धसुखराशिः 'सर्वाद्धापिण्डितः' सर्वयासाद्धपर्यवसितया अद्धया, यत्सुखं सिद्धः प्रतिसमयमनुभवति तदेकत्र पिण्डीकृतमिति भावः, सोऽनन्तवर्गभक्तः—अनन्तैर्वर्गमूलैरपवर्तितः, अनन्तैर्वर्गमूलैः तावदपवर्तितो यावत् सर्वाद्धालक्षणेन गुणकारेण गुणने यदधिकं जातं तस्य सर्वस्याप्यपवर्तनैः सिदअथात्वाद्धसमयभाविसुखमात्रत्तां प्राप्त इति भावः,

सर्वाकाशे न माति—एतावन्मात्रोऽपि सर्वाकाशे न माति सर्वस्तु दूरापास्तप्रसर एवेति ज्ञापनार्थं पिण्डयित्वा पुनरपवर्तनं सुखराशेः, इयमत्र भावना—इह किल विशिष्टाह्लादरूपं सुखं परिगृह्यते, ततश्च यत आरभ्य शिष्टानां सुखशब्दप्रवृत्तिस्तमाह्लादमवधिकृत्य एकैकगुणवृद्धितारतम्येन तावदसावाह्लादो विशिष्यते यावदनन्तगुणवृध्या निरतिशयनिष्ठामुपगतः,

सोऽयमत्यन्तोपमातीतैकान्तौत्सुक्यविनिवृत्तिरूपस्तिमितसमकल्पः परमाह्लादः सदा सिद्धानां, तस्माच्चारतः प्रथमाद्योध्वमधस्तान्तरालवर्तिनो ये गुणास्तारतम्येनाह्लादविशेषरूपास्ते सर्वाकाशप्रदेशेभ्योऽप्यतिभूयांसः, ततः किलोक्तं—'सव्वागासे न माइज्जा' इति, अन्यथा यत् सर्वाकाशे न माति तत् कथमेकस्मिन् सिद्धे मायाद् ? इति पूर्वसूरिसंप्रदायः ॥

साम्प्रतमस्य निरुपमतां प्रतिपादयति—

मू. (२५१) *जह नाम कोइ मिच्छो नगरगुणे बहुविहे वियाणंतो ।*
न चएइ परिकहेउं उवमाए तहिं असंतीए ॥

वृ. 'जह नाम' इत्यादि, यथा नाम कश्चिद् म्लेच्छो नगरगुणान्—गृहनिवासादीन् बहुविधान्—अनेकप्रकारान् विजानन् अरण्यगतः सन् अन्यम्लेच्छेभ्यो न शक्नोति परिकथयितुं, कस्मान्न शक्नोति ? इत्यत आह—उपमायां तत्रासत्यां "निमित्तकारणहेतुषु सर्वासां विभक्तीनां प्रायो दर्शनम्" इति न्यायाद् हेतौ सप्तमी, तत उपमाया अभावादिति द्रष्टव्यं, एष गाथाऽक्षरार्थः, भावार्थः कथानकादवसेयः, एगो महारण्णवासी मिच्छो रन्ने चिट्ठति, इतो य एगो राया आसेण अवहरितो तं अडविं पवेसिओ तेण दिट्ठो, सक्कारिऊण जनवयं नीतो, रन्नावि सो नगरं नीओ, पच्छा उवगारिति गाढमुपचरितो, जहा राया तहा चिट्ठइ, धवलघराइभोगेण विभासा, कालेण रन्नंसरिउमारद्धो, रन्ना विसज्जिओ, तत्तो रन्निगा पुच्छंति—'केरिसं नयरंति' ? सो वियाणंतोऽवि तत्योवमाभावा न सक्कइ नयरगुणे परिकहेउं । एस दिट्ठंतो, अयमर्थोपनयः—

मू. (२५२) *इय सिद्धाणं सोक्खं अनोवमं नत्थि तस्स ओवम्मं ।*
किंचि विसेसेणित्तो सारिक्खमिणं सुणए वोच्छं ॥

वृ. 'इय सिद्धाणं' इत्यादि, इत्येवं सिद्धानां सौख्यमनुपमं वर्तते, किमिति ?, तत आह—यतो नास्ति तस्यौपम्यं, तथाऽपि बालजनप्रतिपत्तये किञ्चिद् विशेषेण 'इतो' इति आर्षत्वाद् अस्येत्यर्थः, साधर्म्यमिदं—वक्ष्यमाणं शृणुत—

मू. (२५३) *जह सव्वकामगुणियं पुरिसो भोत्तूण भोयणं कोई ।*
तण्हाछुहाविमुक्को अच्छेज्ज जहा अमियतित्तो ॥

वृ. 'जह सव्व' इत्यादि, यथेत्युदाहरणोपदर्शनार्थः, भुज्यते इति भोजनं 'सर्वकामगुणितं' सकलसौन्दर्यसंस्कृतं कोऽपि पुरुषो भुक्त्वा क्षुत्तृड्विप्रमुक्तः सन् यथा अमृततृप्तस्तथा तिष्ठति,

मू. (२५४) *इय सव्वकालतित्ता अतुलं निव्वाणमुवगया सिद्धा ।*
सासयमव्वाबाहं चिट्ठंति सुही सुहं पत्ता ॥

वृ. 'इय' इत्यादि, एवं निर्वाणं–मोक्षमुपगताः सिद्धाः सर्वकालं–साद्यपर्यवसितं कालं तृताः–सर्वथौत्सुक्यविनिवृत्तिभावतः परमसंतोषमधिगता अतुलम्–अनन्यसदृशमुपमाऽतीतत्वात् शाश्वतं प्रतिपाताभावात् अव्याबाधं लेशतोऽपि व्याबाधाया असंभवात् सुखं प्राप्ता अत एव सुखिनः तिष्ठन्तीति ॥ एतदेव सविशषतरं भावयति–

मू. (२५५) *सिद्धति य बुद्धति य पारगयति । य परंपरगयति उ*
म्मुक्ककम्मकवया अजरा अमरा असंगा य ॥

वृ. 'सिद्धत्ति य' इत्यादि, सितं–बद्धमष्टप्रकारं कर्म ध्मातं–भस्मीकृतं यैस्ते सिद्धाः "पृषोदरादयः" इति रूपनिष्पत्तिः, निर्दग्धानेकभवकर्मेन्धना इत्यर्थः, ते च सामान्यतः कर्मादिसिद्धा अपि भवन्ति, यत उक्तम्–

॥ १ ॥ "कम्मे सिप्पे य विज्जाए, मंते जोगे य आगमे ।
अत्थजत्ताअभिप्पाए, तवे कम्मक्खए इय ॥"

ततः कर्मादिसिद्धव्यपोहाय आह–'बुद्धा' इति, अज्ञाननिद्राप्रसुप्ते जगत्यपरोपदेशेन जीवादिरूपं तत्त्वं बुद्धवन्तो बुद्धाः, सर्वज्ञसर्वदर्शिस्वभावबोधरूपा इति भावः, एतेऽपि च संसारनिर्वाणोभयपरित्यागेन स्थितवन्तः कैश्चिदिष्यन्ते–

॥ १ ॥ "संसारे न च निर्वाणे, स्थितो भुवनभूतये ।
अचिन्त्यः सर्वलोकानां, चिन्तारत्नाधिको महान् ॥"

इति वचनात्, ततस्तन्निरासार्थमाह–'पारगता' इति, पारं–पर्यन्तं संसारस्य प्रयोजनव्रातस्य वा गताः पारगताः, तथाभव्यत्वाक्षिप्तसकलप्रयोजनसमाप्तया निरवशेषकर्तव्यशक्तिविप्रमुक्ता इति भावः, इत्थंभूता अपि कैश्चिद् यदृच्छावादिभिरक्रमसिद्धत्वेनापि गीयन्ते, तथोक्तम्–

॥ १ ॥ "नैकादिसंख्याक्रमतो, वित्तप्राप्तिर्नियोगतः ।
दरिद्रराज्यचारित्ररूपया, तद्वन्मुक्तिः क्वचिन्नकिम् ? ॥"

ततस्तन्मतव्यपोहाय 'परम्परागता' इति परम्परया–ज्ञानदर्शनचारित्ररूपया मिथ्यादृष्टिसासादन–सम्यग्मिथ्यादृष्टयअविरत सम्यग्दृष्टिदेशविरतिप्रमत्ताप्रमत्तनिवृत्त्यनिवृत्तिबादरसंपरायसूक्ष्मसंपरायोपशान्तमहक्षीण मोहसयोगिकेवल्ययोगिकेवलिगुणस्थानभेदभिन्नया गताः परम्परागताः, एते च कैश्चित् तत्त्वतोऽनुन्मुक्तकर्मकवचा अभ्युपगम्यन्ते 'तीर्थनिकारदर्सनादिहागच्छन्ति' इति वचनतः पुनः संसारावतरणाभ्युपगमात्, अतस्तन्मतापाकरणार्थमाह–

'उन्मुक्तकर्मकवचाः' उत्–प्राबल्येनापुनर्भवरूपतया मुक्तं–परित्यक्तं कर्म कवचमिव कर्मकवचं यैस्ते उन्मुक्तकर्मकवचाः, अत एवाजराः शरीराभावतो जरसोऽभावात् अमरा अशरीरत्वादेव प्राणत्यागासंभवात्, उक्तं च–

॥ १ ॥ "वयसो हाणीह जरा, पाणच्चाओ य मरणमादिट्ठं ।
सइ देहंमि तदुभयं तदभावे तं न कस्सेव ॥"

मू. (२५६) *निच्छिन्नसव्वदुक्खा जाइजरामरणबंधणविमुक्का ।*
अव्वाबाहं सोक्खं अणुहोंती सासयं सिद्धा ॥

वृ. असङ्ख्या बाह्याभ्यन्तरसङ्गरहितत्वात् 'निच्छिन्न' इत्यादि, निस्तीर्णं–लङ्घितं सर्वदुःखं यैस्ते निस्तीर्णसर्वदुःखाः, कुतः ? इत्याह–'जातिजरामरणबंधणविमुक्का' जातिः–जन्म जरा–वयोहानिलक्षणा मरणं–प्राणत्यागरूपं बन्धनानि–तन्नबन्धनरूपाणि कर्माणि तैर्विशेषतो–निःशेषा-

पगमनेन मुक्ता जातिजरामरणबन्धनविमुक्ताः, हेतावियं प्रथमा, यतो जातिजरामरणबन्धनविप्रमुक्तास्ततो निस्तीर्णसर्वदुःखाः, कारणाभावात्, ततोऽव्याबाधं सौख्यं शाश्वतं सिद्धा अनुभवन्ति

पदं – २ – समाप्तम् ।

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापना उपाङ्गसूत्रे द्वीतीयपदस्य मलयगिरिविरचिताटीका परिसमाप्ता ।

पदं – ३ – अल्पबहुत्वम् (बहुवक्तव्य)

वृ. व्याख्यातं द्वितीयं पदं, अधुना तृतीयपदमारभ्यते, तस्य चायमभिसम्बन्धः–इह प्रथम पदे पृथिवीकायिकादयः प्रज्ञप्ताः द्वितीये ते एव स्वस्थानादिना चिन्तिताः अस्मिंस्तु तेषां दिग्विभागादिनाऽल्पबहुत्वादि निरूप्यते, तत्रेदमादौ द्वारसङ्ग्रहगाथाद्वयम्–

मू. (२५७) *दिसि गइ इंदिय काए जोए वेए कसाय लेसा य ।*
सम्मत्तं नाणदंसणं संजयउवओगआहारे ।।

वृ. प्रथमं दिग्द्वारं १, तदनन्तरं गतिद्वारं, २, तत इन्द्रियद्वारं ३, ततः कायद्वारं ४, ततो योगद्वारं ५, तदनन्तरं वेदद्वारं ६, ततः कषायद्वारं, ७, ततो लेश्याद्वारं ८, ततः सम्यक्त्वद्वारं ९, तदनन्तरं ज्ञानद्वारं १०, ततो दर्शनद्वारं ११, ततः संयतद्वारं १२, तत उपयोगद्वारं १३, तत आहारद्वारं १४,

मू. (२५८) *भासगपरित्तपज्जत सुहुमसन्नी भवऽत्थिए चरिमे ।*
जीवे य खित्तबंधे पुग्गलमहदंडए चेव ।।

वृ. ततो भाषकद्वारं १५, ततः 'परित्त' इति परित्ताः–प्रत्येकशरीरिणः शुक्लपाक्षिकाश्च तद्वारं १६, तदनन्तरं पर्याप्तद्वारं १७, ततः सूक्ष्मद्वारं १८, तदनन्तरं संज्ञिद्वारं १९, ततो 'भव'त्ति भवसिद्धिकद्वारं २०, ततोऽस्तीति अस्तिकायद्वारं २१, ततश्चरमद्वारं २२, तदनन्तरं जीवद्वारं, २३, ततः क्षेत्रद्वारं २४, ततो बन्धद्वारं २५, ततः पुद्गलद्वारं २६, ततो महादण्डकः २७, इति सर्वसङ्ख्यया सप्तविंशतिः द्वाराणि । तत्र प्रथमं द्वारमभिधित्सुराह–

–: पदं – २ – द्वारं – १ :– "दिसा":–

मू. (२५९) *दिसाणुवाएणं सव्वत्थोवा जीवा पच्छिमेणं, पुरच्छिमेणं विसेसाहिया, दाहिणेणं विसेसाहिया, उत्तरेणं विसेसाहिया ।*

वृ. इह दिशः प्रथमे आचाराख्ये अङ्गे अनेकप्रकारा व्यावर्णिताः, तत्रेह क्षेत्रदिशः प्रतिपत्तव्याः, तासां नियतत्वात्, इतरासां च प्रायोऽनवसअथितत्वात् अनुपयोगित्वाद्व, क्षेत्रदिशां च प्रभवस्तिर्यग्लोकमध्यगतादष्टप्रदेशकाद्रुचकात्, यत उक्तम्–

॥ १ ॥ "अट्ठपएसो रुयगो तिरियलोयस्स मज्झयारम्मि ।
एस पभवो दिसाणं एसेव भवे अनुदिसाणं ।।" इति,

दिशामनुपातो दिगनुपातो–दिगनुसरणं तेन दिशोऽधिकृत्येति तात्पर्यार्थः, सर्वस्तोका जीवाः पश्चिमेन –पश्चिमायां दिशि, कथमिति चेत् ?, उच्यते, इदं ह्यल्पबहुत्वं बादरानधिकृत्य द्रष्टव्यं, न सूक्ष्मान्, सूक्ष्माणां सर्वलोकापन्नानां प्रायः सर्वत्रापि समत्वात्,

बादरेष्वपि मध्ये [illegible] तत्र तेषां प्राप्यमाणत्वात्, ततो यत्र ते बहवस्तत्र बहुत्वं जीवानां, यत्र त्वल्पे तत्राल्पत्वं, वनस्पतयश्च तत्र बहवो यत्र प्रभूता आपः, 'जत्थ जलं तत्थ वणं' इति वचनात् तत्रावश्यं पनकसेवालादीनां भावात्, ते च पनकसेवालादयो बादरनामकर्मोदये वर्त्तमाना अपि अत्यन्तसूक्ष्मावगाहनत्वात् अतिप्रभूतपिण्डीभावाच्च सर्वत्र सन्तोऽपि न चक्षुषा ग्राह्याः,

तथा चोक्तमनुयोगद्वारेषु– "ते णं वालग्गा सुहुमपनगजीवस्स सरीरोगाणाहिंतो असंखेज्जगुणा" इति, ततो यत्रापि नैते दृश्यन्ते तत्रापि ते सन्तीति प्रतिपत्तव्याः, आह च मूलटीकाकार;– "इह सर्वबहवो वनस्पतय इतिकृत्वा यत्र ते सन्ति तत्र बहुत्वं जीवानां, तेषां च बहुत्वं "जत्थ आउकाओ तत्थ नियमा वणस्सइकाइया इति पनगसेवालहढाई बायरावि होंति सुहुमा आणागेज्झा न चक्खुणा" इति, उदकं च प्रभूतं समुद्रादिषु, द्वीपात् द्विगुणविष्कम्भत्वात्, तेष्वपि च समुद्रेषु प्रत्येकं प्राचीप्रतीच्योर्दिशोर्यथाक्रमं चन्द्रसूर्यद्वीपाः, यावति च प्रदेशे चन्द्रसूर्यद्वीपा अवगाढास्तावत्युद- काभवः, उदकाभावाच्च वनस्पतिकायिकाभावः, केवलं प्रतीच्यां दिशि लवणसमुद्राधिपसुस्थितनाम- देवावासभूतो गौतमद्वीपो लवणसमुद्रेऽभ्यधिको वर्त्तते, तत्र चोदकाभावाद्वनस्पतिकायिकानाम- भावात् सर्वस्तोका जीवाःपश्चिमायां दिशि, तेभ्यो विशेषाधिकाः पूर्वस्यां दिशि, तत्र हि गौतमद्वीपो न विद्यते, ततस्तावता विशेषेणातिरिच्यते इति,

तेभ्योऽपि दक्षिणस्यां दिशि विशेषाधिकाः, यतस्तत्र चन्द्रसूर्यद्वीपा न विद्यन्ते, तदभावात्तत्रोदकं प्रभूतं, तत्प्राभूत्याच्च वनस्पतिकायिका अपि प्रभूता इति विशेषाधिकाः, तेभ्योऽप्युदीच्यां दिशि विशेषाधिकाः, किं कारणमिति चेत् ?, उच्यते, उदीच्यां हि दिशि सङ्ख्येययोजनेषु द्वीपेषु मध्ये कस्मिंश्चित् द्वीपे आयामविष्कम्भाभ्यां सङ्ख्येययोजनकोटीप्रमाणं मानसं नाम सरः समस्ति, ततो दक्षिणदिग्पेक्षया अस्यां प्रभूतमुदकम्, उदकबाहुल्याच्च प्रभूता वनस्पतयः, प्रभूता द्वीन्द्रियाः शङ्खादयः प्रभूतास्तटलग्न- शङ्खादिकलेवराश्रितास्त्रीन्द्रियाः पिपीलिकादयः प्रभूताःपद्मादिषु चतुरिन्द्रियाः भ्रमरादयः प्रभूताः पञ्चेन्द्रिया मत्स्यादय इति विशेषाधिकाः ॥

तदेवं सामान्यतो दिगनुपातेन जीवानामल्पबहुत्वमुक्तम् ॥ इदानीं विशेषेण तदाह–

सू. (२६०) *दिसाणुवाएणं सव्वत्थोवा पुढविकाइया दाहिणेणं उत्तरेणं विसेसाहिया पुरच्छिमेणं विसेसाहिया पच्छिमेणं विसेसाहिया। दिसाणुवाएणं सव्वत्थोवा आउकाइया पच्छिमेणं, पुरच्छिमेणं विसेसाहिया, दाहिणेणं विसेसाहिया, उत्तरेणं विसेसाहिया॥ दिसाणुवाएणं सव्वत्थोवा तेउकाइया दाहिणुत्तरेणं, पुरच्छिमेणं संखेज्जगुणा, पच्छिमेणं विसेसाहिया॥*

दिसाणुवाएणं सव्वत्थोवा वाउकाइया पुरच्छिमेणं, पच्छिमेणं विसेसाहिया, उत्तरेणं विसेसाहिया, दाहिणेणं विसेसाहिया॥ दिसाणुवाएणं सव्वत्थोवा वणस्सइकाइया पच्छिमेणं पुरच्छिमेणं विसेसाहिया दाहिणेणं विसेसाहिया उत्तरेणं विसेसाहिया॥

निसाणुवाएणं सव्वत्थोवा बेइंदिया पच्छिमेणं पुरच्छिमेणं विसेसाहिया दक्खिणेणं विसेसाहिया उत्तरेणं विसेसाहिया। दिसाणुवाएणं सव्वत्थोवा तेइंदिया पच्चत्थिमेणं, पुरच्छिमेणं विसेसाहिया, दाहिणेणं विसेसाहिया, उत्तरेणं विसेसाहिया। दिसाणुवाएणं सव्वत्थोवा चउरिंदिया पच्चत्थिमेणं, पुरच्छिमेणं विसेसाहिया, दाहिणेणं विसेसाहिया, उत्तरेणं विसेसाहिया।

दिसाणुवाएणं सव्वत्थोवा नेरइया पुरच्छिमपच्चत्थिमउत्तरेणं, दाहिणेणं असंखेज्जगुणा। दिसाणुवाएणं सव्वत्थोला रयणप्पभापुढवीनेरइया पुरच्छिमपच्चत्थिमउत्तरेणं, दाहिणेण असंखेज्जगुणा दिसाणुवाएणं सव्वत्थोवा सक्करप्पभापुढवीनेरइया पुरच्छिमपच्चत्थिमउत्तरेणं, दाहिणेणं असंखेज्जगुणा। दिसाणुवाएणं सव्वत्थोवा वालुयप्पभापुढवीनेरइया पुरच्छिमपच्चत्थिमउत्तरेणं, दाहिणेणं असंखेज्जगुणा। दिसाणुवाएणं सव्वत्थोवा पंकप्पभापुढवीनेरइया पुरच्छिमपच्चत्थिमउत्तरेणं, दाहिणेणं असंखेज्जगुणा। दिसाणुवाएणं सव्वत्थोवा धूमप्पभापुढवीनेरइया पुरच्छिमपच्चत्थिमउत्तरेणं, दाहिणेणं असंखेज्जगुणा। दिसाणुवाएणं सव्वत्थोवा तमप्पभापुढवीनेरइया पुरच्छिमपच्चत्थिमउत्तरेणं, दाहिणेणं असंखेज्जगुणा। दिसाणुवाएणं सव्वत्थोवा अहे सत्तमापुढवीनेरइया पुरच्छिम-पच्चत्थिमउत्तरेणं, दाहिणेणं असंखेज्जगुणा।

दाहिणेहिंतो अहेसत्तमापुढवीनेरइएहिंतो छट्ठाए तमाए पुढवीए नेरइया पुरच्छिमपच्चत्थिम-उत्तरेणं असंखेज्जगुणा, दाहिणेणं असंखेज्जगुणा, दाहिणिल्लेहिंतो तमाए पुढवीनेरइएहिंतो पंचमाए धूमप्पभाए पुढवीए नेरइया पुरच्छिमपच्चत्थिमउत्तरेणं असंखेज्जगुणा, दाहिणेणं असंखेज्जगुणा, दाहिणिल्लेहिंतो धूमप्पभापुढवीनेरइएहिंतो चउत्थीए पंकप्पभाए पुढवीए नेरइया पुरच्छिमप-च्चत्थिमउत्तरेणं असंखेज्जगुणा, दाहिणेणं असंखेज्जगुणा, दाहिणिल्लेहिंतो पंकप्पभापुढवीनेरइएहिंतो तइया वालुयप्पभाए पुढवीए नेरइया पुरच्छिमपच्चत्थिमउत्तरेणं असंखेज्जगुणा, दाहिणेणं असंखेज्जगुणा, दाहिणिल्लेहिंतो वालुयप्पभापुढवीनेरइएहिंतो दुइयाए सक्करप्पभाए पुढवीए नेरइया पुरच्छिमपच्चत्थिमउत्तरेणं असंखेज्जगुणा, दाहिणेणं असंखेज्जगुणा, दाहिणिल्लेहिंतो सक्करप्पभापुढवी-नेरइएहिंतो इमीसे रयणप्पभाए पुढवीए नेरइया पुरच्छिमपच्चतअथिमउत्तरेणं असंखेज्जगुणा, दाहिणेणं असंखेज्जगुणा। दिसाणुवाएणं सव्वत्थोवा पंचिंदिया तिरिक्खजोणिया पच्छिमेणं, पुरच्छिमेणं विसेसाहिया, दाहिणेणं विसेसाहिया, उत्तरेणं विसेसाहिया। दिसाणुवाएणं सव्वत्थोवा मणुस्सा दाहिणउत्तरेणं, पुरच्छिमेणं संखेज्जगुणा पच्चत्थिमेणं विसेसाहिया।

दिसाणुवाएणं सव्वत्थोवा भवणवासी देवा पुरच्छिमेणं पच्चत्थिमेणं, उत्तरेणं असंखेज्जगुणा, दाहिणेणं असंखेज्जगुणा। दिसाणुवाएणं सव्वत्थोवा वाणमंतरा देवा पुरच्छिमेणं, पच्चत्थिमेणं विसेसाहिया, उत्तरेणं विसेसाहिया, दाहिणेणं विसेसाहिया। दिसाणुवाएणं सव्वत्थोवा जोइसिया देवा पुरच्छिमपच्चत्थिमेणं, दाहिणेणं विसेसाहिया, उत्तरेणं विसेसाहिया।

दिसाणुवाएणं सव्वत्थोवा देवा सोहम्मे कप्पे पुरच्छिमपच्चत्थिमेणं, उत्तरणं असंखेज्जगुणा, दाहिणेणं विसेसाहिया। दिसाणुवाएणं सव्वत्थोवा देवा ईसाणे कप्पे पुरच्छिमपच्चत्थिमेणं, उत्तरेणं असंखेज्जगुणा, दाहिणेणं विसेसाहिया। दिसाणुवाएणं सव्वत्थोवा देवा सणंकुमारे कप्पे पुरच्छिमप-च्चत्थिमेणं, उत्तरेणं असंखेज्जगुणा, दाहिणेणं विसेसाहिया। दिसाणुवाएणं सव्वत्थोवा देवा सणंकुमारे कप्पे पुरच्छिमपच्चत्थिमेणं, उत्तरेणं असंखेज्जगुणा, दाहिणेणं विसेसाहिया। दिसाणुवाएणं सव्वत्थोवा देवा माहिंदे कप्पे पुरच्छिमपच्चत्थिमेणं, उत्तरेणं असंखेज्जगुणा, दाहिणेणं विसेसाहिया। दिसाणुवाएणं सव्वत्थोवा देवा बंभलोए कप्पे पुरच्छिमपच्चत्थिमउत्तरेणं, दाहिणेणं असंखेज्जगुणा। दिसाणुवाएणं सव्वत्थोवा देवा लंतए कप्पे पुरच्छिमपच्चत्थिमउत्तरेणं, दाहिणेणं असंखेज्जगुणा। दिसाणुवाएणं सव्वत्थोवा देवा महासुक्के कप्पे पुरच्छिमपच्चत्थिमउत्तरेणं, दाहिणेणंअसंखेज्जगुणा। दिसाणुवाएणं

सव्वत्थोवा देवा सहस्सारे कप्पे पुरच्छिमपच्चत्थिमउत्तरेणं, दाहिणेणं असंखेज्जगुणा।

–तेण परं बहुसमोववन्नगा समणाउसो! ॥ दिसाणुवाएणं सव्वत्थोवा सिद्धा दाहिणेणं उत्तरेणं, पुरच्छिमेणं संखेज्जगुणा, पच्चत्थिमेणं विसेसाहिया ॥ दारं ॥

वृ. दिगनुपातेन–दिगनुसारेण दिशोऽधिकृत्येतिभावः, पृथिवीकायिकाश्चिन्त्यमानाः सर्वस्तोका दक्षिणस्यां दिशि, कथमिति चेद्?, उच्यते, इह यत्र घनं तत्र बहवः पृथिवीकायिकाः यत्र सुषिरं तत्र स्तोकाः, दक्षिणस्यां दिशि बहूनि भवनपतीनां भवनानि बहवो नरकावासास्ततः सुषिरप्राभूत्यसंभवात् सर्वस्तोका दक्षिणस्यां दिशि पृथिवीकायिकाः,

तेभ्य उत्तरस्यां दिशि विशेषाधिकाः, यत उत्तरस्यां दिशि दक्षिणदिगपेक्षया स्तोकानि भवनानि स्तोका नरकावासाः, ततो घनप्राभूत्यसंभवात् बहवः पृथिवीकायिका इति विशेषाधिकाः, तेभ्योऽपि पूर्वस्यां दिशि विशेषाधिकाः, रविशशिद्वीपानां तत्र भावात्,

तेभ्योऽपि पश्चिमायां दिशि विशेषाधिकाः, किं कारणमिति चेत्?, उच्यते, यावन्तो रविशशिद्वीपाः पूर्वस्यां दिशि तावन्तः पश्चिमायामपि, न तु एतावता साम्यं, परं लवणसमुद्रे गौतमनामा द्वीपः पश्चिमायामधिकोऽस्ति, तेन विशेषाधिकाः, अत्र पर आह–

ननु यथा पश्चिमायां दिशि गौतमद्वीपोऽभ्यधिकः समस्ति, तथा तस्यां पश्चिमायां दिशि अधोलौकिकग्रामा अपि योजनसहस्रावगाहाः सन्ति, ततः ज्ञातपूरितन्यायेन तत्र तुल्या एव पृथिवीकायिकाः प्राप्नुवन्ति न विशेषाधिकाः, नैतदेवं, यतोऽधोलौकिकग्रामावगाहो योजनसहस्रं, गौतमद्वीपस्य पुनः षट्सप्तत्यधिकं योजनसहस्रमुच्चैस्त्वं, विष्कम्भस्तस्य द्वादश योजनसहस्राणि, यच्च मेरोराभ्याधोलौकिकग्रामेभ्योऽर्वाक् हीनत्वं हीनतरत्वं तत् पूर्वस्यामपि दिशि प्रभूतगर्त्तादिसंभवात् समानं, ततो यद्यधोलौकिकग्रामच्छिद्रेषु बुद्ध्या गौतमद्वीपः प्रक्षिप्यते तथापि स समधिक एव प्राप्यते न तुल्य इति तेन समधिकेन विशेषाधिकाः पश्चिमायां दिशि पृथिवीकायिकाः ॥

उक्तं दिगनुपातेन पृथिवीकायिकानामल्पबहुत्वं, इदानीमप्कायिकानामल्पबहुत्वमाह–सर्वस्तोका अप्कायिकाः पश्चिमायां दिशि, गौतमद्वीपस्थाने तेषामभावात्, तेभ्योऽपि विशेषाधिकाः पूर्वस्यां दिशि, गौतमद्वीपाभावात्, तेभ्योऽपि विशेषाधिका दक्षिणस्यां दिशि, चन्द्रसूर्यद्वीपाभावात्, तेभ्योऽप्युत्तरस्यां दिशि विशेषाधिकाः, मानससरःसद्भावात् ॥

तथा दक्षिणस्यामुत्तरस्यां च दिशि सर्वस्तोकास्तेजःकायिकाः, यतो मनुष्यक्षेत्रे एव बादरास्तेजःकायिका नान्यत्र, तत्रापि यत्र बहवो मनुष्यास्तत्रैते बहवः, बाहुल्येन पाकारम्भसम्भवात्, यत्र त्वल्पे तत्र स्तोकाः, तत्र दक्षिणस्यां दिशि पञ्चसु भरतेषु उत्तरस्यां दिशि पञ्चस्वैरावतेषु क्षेत्रस्याल्पत्वात् स्तोका मनुष्याः, तेषां स्तोकत्वेन तेजःकायिका अपि स्तोकाः, अल्पपाकारम्भसम्भवात्, ततः सर्वस्तोका दक्षिणोत्तरयोर्दिशोस्तेजःकायिकाः, स्वस्थाने तु प्रायः समानाः, तेभ्यः पूर्वस्यां दिशि सङ्ख्येयगुणाः, क्षेत्रस्य सङ्ख्येयगुणत्वात्, ततोऽपि पश्चिमायां दिशि विशेषाधिकाः, अधोलौकिकग्रामेषु मनुष्यबाहुल्यात् ॥

इह यत्र सुषिरं तत्र वायुः यत्र घनं तत्र वाय्वभावः, तत्र पूर्वस्यां दिशि प्रभूतं घनमित्यल्पा वायवः, पश्चिमायां दिशि विशेषाधिकाः, अधोलौकिकग्रामसम्भवात्, उत्तरस्यां दिशि विशेषाधिकाः, भवननरकावासबाहुल्येन सुषिरबाहुल्यात्, ततोऽपि दक्षिणस्यां दिशि विशेषाधिकाः,

उत्तरदिगपेक्षया दक्षिणस्यां दिशिभवनानां नरकावासानां बाहुल्यात्प्रभूतत्वात्।

तथा यत्र प्रभूता आपस्तत्र प्रभूताः पनकादयोऽनन्तकायिका वनस्पतयः प्रभूताः शङ्खादयो द्वीन्द्रियाः प्रभूताः पिण्डीभूतसेवालाद्याश्रिताः कुन्थ्वादयस्त्रीन्द्रियाः प्रभूताः पद्माद्याश्रिता भ्रमरादयश्चतुरिन्द्रिया इति हेतोर्वनस्पत्यादिसूत्राणि चतुरिन्द्रियसूत्रपर्यन्तानि अप्कायिकसूत्रवद् भावनीयानि

नैरयिकसूत्रे सर्वस्तोकाः पूर्वोत्तरपश्चिमदिग्विभागभाविनो नैरयिकाः, पुष्पावकीर्णनरकावासानां तत्राल्पत्वात्, बहूनां प्रायः सङ्ख्येययोजनविस्तृतत्वाच्च, तेभ्यो दक्षिणदिग्विभागभाविनोऽसङ्ख्येयगुणाः, पुष्पावकीर्णनरकावासानां तत्र बाहुल्यात्, तेषां च प्रायोऽसङ्ख्येययोजनविस्तृतत्वात्, कृष्णपाक्षिकाणां तस्यां दिशि प्राचुर्येणोत्पादाच्च, तथाहि—द्विविधा जन्तवः, शुक्लपाक्षिकाः कृष्णपाक्षिकाश्च, तेषां [illegible] शुक्लपाक्षिकाः, अधिकतरसंसारभाजिनस्तु कृष्णपाक्षिकाः, उक्तं च—

॥ १ ॥ "जेसिमवड्ढो पुग्गलपरियट्टो सेसओ य संसारो।
ते सुक्कपक्खिया खलु अहिए पुन कण्हपक्खी उ॥"

अत एव च स्तोकाः शुक्लपाक्षिकाः, अल्पसंसारिणां स्तोकत्वात्, बहवः कृष्णपाक्षिकाः, प्रभूतसंसारिणामतिप्रचुरत्वात्, कृष्णपाक्षिकाश्च प्राचुर्येण दक्षिणस्यां दिशि समुत्पद्यन्ते, न शेषासु दिक्षु, तथास्वाभाव्यात्, तच्च तथास्वाभाव्यं पूर्वाचार्यैरेवं युक्तिभिरुपबृंहते, तद्यथा—

कृष्णपाक्षिका दीर्घतरसंसारभाजिन उच्यन्ते, दीर्घतरसंसारभाजिनश्च बहुपापोदयाद् भवन्ति, बहुपापोदयाश्च क्रूरकर्माणः, क्रूरकर्माणश्च प्रायस्तथास्वाभाव्यात् तद्भवसिद्धिका अपि दक्षिणस्यां दिशि समुत्पद्यन्ते, न शेषासु दिक्षु, यत उक्तं—

॥ १ ॥ "पायमिह क्रूरकम्मा भवसिद्धियावि दाहिणिल्लेसुं।
नेरइयतिरियमणुसायसुराइठाणेसु गच्छंति॥"

ततो दक्षिणस्यां दिशि बहूनां कृष्णपाक्षिकाणामुत्पादसम्भवात् पूर्वोक्तकारणद्वयाच्च सम्भवन्ति पूर्वोत्तरपश्चिमदिग्विभागभाविभ्यो दाक्षिणात्या असङ्ख्येयगुणाः।

यथा च सामान्यतो नैरयिकाणां दिग्विभागेनाल्पबहुत्वमुक्तं, एवं प्रतिपृथिव्यापि वक्तव्यं, युक्तेः सर्वत्रापि समानत्वात्। तदेवं प्रतिपृथिव्यपि दिग्विभागेनाल्पबहुत्वमभिहितं, इदानीं सप्तापि पृथिवीरधिकृत्य दिग्विभागेनाल्पबहुत्वमाह—

सप्तमपृथिव्यां पूर्वोत्तरपश्चिमदिग्भाविभ्यो नैरयिकेभ्यो ये सप्तमपृथिव्यामेव दाक्षिणात्यास्तेऽसङ्ख्येयगुणाः, तेभ्यः षष्ठपृथिव्यां तमःप्रभाभिधानायां पूर्वोत्तरपश्चिमदिग्भाविनोऽसङ्ख्येयगुणाः, कथमिति चेद् ?, उच्यते, इह सर्वोत्कृष्टपापकारिणः संज्ञिपञ्चेन्द्रियतिर्यग्मनुष्याः सप्तमनरकपृथिव्यामुत्पद्यन्ते, किञ्चिद्हीनहीनतरपापकर्मकारिणश्च षष्ठ्यादिषु पृथिवीषु,

सर्वोत्कृष्टपापकर्मकारिणश्च सर्वस्तोकाः बहवश्च यथोत्तरं किञ्चिद्धीनहीनतरादिपापकर्मकारिणः ततो युक्तमसङ्ख्येयगुणत्वं सप्तमपृथिवीदाक्षिणात्यनारकापेक्षया षष्ठपृथिव्यां पूर्वोत्तरपश्चिमनारकाणां, एवमुत्तरोत्तपृथिवीरप्यधिकृत्य भावयितव्यम्, तेभ्योऽपि तस्यामेव षष्ठपृथिव्यां दक्षिणस्यां दिशि नारका असङ्ख्येयगुणाः, युक्तिरत्र प्रागेवोक्ता, तेभ्योऽपि पञ्चमपृथिव्यां धूमप्रभाभिधानायां पूर्वोत्तरपश्चिमदिग्भाविनोऽसङ्ख्येयगुणाः, तेभ्योऽपि तस्यामेव पञ्चमपृथिव्यां

दाक्षिणात्या असङ्ख्येयगुणाः, एवं सर्वास्वपि क्रमेणं वाच्यम् ॥

तिर्यक्पञ्चेन्द्रियसूत्रं त्वकायसूत्रवद् भावनीयम् ॥ सर्वस्तोका मनुष्या दक्षिणस्यामुत्तरस्यां च, पञ्चानां भरतक्षेत्राणां पञ्चानामैरावतक्षेत्राणामल्पत्वात्, तेभ्यः, पूर्वस्यां दिशि सङ्ख्येयगुणाः, क्षेत्रस्य सङ्ख्येयगुणत्वात्, तेभ्योऽपि पश्चिमायां दिशि विशेषाधिकाः, स्वभावत एवायोलौकिकग्रामेषु मनुष्यबाहुल्यभावात् ॥ दिसाणुवाएणं सव्वत्थोवा भवणवासी' इत्यादि, सर्वस्तोका भवनवासिनो देवाः पूर्वस्यां पश्चिमायां च दिशि, तत्र भवनानामल्पत्वात्, तेभ्य उत्तरदिग्भाविनोऽसङ्ख्येयगुणाः, स्वस्थानतया तत्र भवनानां बाहुल्यात्, तेभ्योऽपि दक्षिणदिग्भाविनोऽसङ्ख्येयगुणाः, तत्र भवनानामतीव बाहुल्यात्, तथाहि–निकाये निकाये चत्वारि चत्वारि भवनशतसहस्राण्यतिरिच्यन्ते, कृष्णपाक्षिकाश्च बहवस्तत्रोत्पद्यन्ते, ततो भवन्त्यसङ्ख्येयगुणाः ।

व्यन्तरसूत्रे भावना–यत्र सुषिरं तत्र व्यन्तराः प्रचलन्ति, यत्र धनं तत्र न, ततः पूर्वस्यां दिशि धनत्वात् स्तोका व्यन्तराः, तेभ्योऽपरस्यां दिशि विशेषाधिकाः, अधोलौकिकग्रामेषु सुषिरसंभवात्, तेभ्योऽप्युत्तरस्यां दिशि विशेषाधिकाः, स्वस्थानतया नगरावासबाहुल्यात्, तेभ्योऽपि दक्षिणस्यां दिशि विशेषाधिकाः, अतिप्रभूतनगरावासबाहुल्यात् ।

तथा सर्वस्तोका ज्योतिष्काः पूर्वस्यां पश्चिमायां च दिशि, चन्द्रादित्यद्वीपेषूद्यानकल्पेषु कतिपयानामेव तेषां भावात्, तेभ्योऽपि दक्षिणस्यां दिशि विशेषाधिकाः, विमानबाहुल्यात् कृष्णपाक्षिकाणां दक्षिणदिग्भावित्वाच्च, तेभ्योऽप्युत्तरस्यां दिशि विशेषाधिकाः, यतो मानसे सरसि बहवो ज्योतिष्काः क्रीडास्थानमिति क्रीडनव्यापृता नित्यमासते, मानसरसि च ये मत्स्यादयो जलचरास्ते आसन्नविमानदर्शनतः समुत्पन्नजातिस्मरणाः किञ्चिद् व्रतं प्रतिपद्यानशनादि च कृत्वा कृतनिदानस्तत्रोत्पद्यन्ते ततो भवन्ति उत्तराहा दाक्षिणात्येभ्यो विशेषाधिकाः ॥

तथा सौधर्मे कल्पे सर्वस्तोकाः पूर्वस्यां पश्चिमायां च दिशि वैमानिका देवाः, यतो यान्यावलिकाप्रविष्टानि विमानानि तानि चतसृष्वपि दिक्षु तुल्यानि, यानि पुनः पुष्पावकीर्णानि तानि प्रभूतानि असङ्ख्येययोजनविस्तृतानि, तानि च दक्षिणस्यामुत्तरस्यां दिशि नान्यत्र, ततः सर्वस्तोकाः पूर्वस्यां पश्चिमायां च दिशि, तेभ्य उत्तरस्यां दिशि असङ्ख्येयगुणाः, पुष्पावकीर्णकविमानानां बाहुल्यात् असङ्ख्येययोजनविस्तृतत्वाच्च, तेभ्योऽपि दक्षिणस्यां दिशि विशेषाधिकाः, कृष्णपाक्षिकाणां प्राचुर्येण तत्र गमनात् । एवमीशानसनत्कुमारमाहेन्द्रकल्पसूत्राण्यपि भावनीयानि ।

ब्रह्मलोककल्पे सर्वस्तोकाः पूर्वोत्तरपश्चिमदिग्भाविनो देवाः, यतो बहवः कृष्णपाक्षिकास्तिर्यग्योनयो दक्षिणस्यां दिशि समुत्पद्यन्ते शुक्लपाक्षिकाश्च स्तोका इति पूर्वोत्तरपश्चिमदिग्भाविनः सर्वस्तोकाः, तेभ्यो दक्षिणस्यां दिशि असङ्ख्येयगुणाः, कृष्णपाक्षिकाणां बहूनां तत्रोत्पादात् ।एवं लान्तकशुक्रसहस्रारसूत्राण्यपि भावनीयानि ।

आनतादिषु पुनर्मनुष्या एवोत्पद्यन्ते, तेन प्रतिकल्पं प्रतिग्रैवेयकं प्रत्यनुत्तरविमानं चतसृषु दिक्षु प्रायो बहुसमा वेदितव्याः, तथा चाह–

'तेण परं बहुसमोववन्नगा समणाउसो !' इति ॥ सर्वस्तोकाः सिद्धा दक्षिणस्यामुत्तरस्यां च दिशि, कथमिति चेत् ?, उच्यते, इह मनुष्या एव सिध्यन्ति, नान्ये, मनुष्या अपि सिध्यन्तो येष्वाकाशप्रदेशेष्विह चरमसमयेऽवगाढास्तेष्वेवाकाशप्रदेशेषूर्ध्वमपि गच्छन्ति तेष्वेव

चोपर्यवतिष्ठन्ते न मनागपि वक्रं गच्छन्ति,

सिध्यन्ति च तत्र दक्षिणस्यां दिशि पञ्चसु भरतेषु उत्तरस्यां दिशि पञ्चस्वैरावतेषु मनुष्या अल्पाः, क्षेत्रस्याल्पत्वात् सुषमसुषमादौ च सिध्यभावादिति तत्क्षेत्रसिद्धाः सर्वस्तोकाः, तेभ्यः पूर्वस्यां दिशि सङ्ख्येयगुणाः, पूर्वविदेहाना भरतैरावतक्षेत्रेभ्यः सङ्ख्येयगुणतया तद्गतमनुष्याणामपि सङ्ख्येयगुणत्वात् तेषां च सर्वकालं सिद्धिभावात्, तेभ्यः पश्चिमायां दिशि विशेषाधिकाः, अधोलौकिकग्रामेषु मनुष्यबाहुल्यात् । गतं दिग्द्वारं इदानीं गतिद्वारम्, तत्रेदमादिसूत्रम्–

–: पदं – ३ – द्वारं – २ :– "गतिः" :–

सू. *(२६१) एएसि णं भंते ! नेरइयाणं तिरक्खजोणियाणं मणुस्साणं देवाणं सिद्धाण य पंचगति० समणेणं कतरे कतरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा सव्वत्थोवा मणुस्सा नेरइया असंखेज्जगुणा देवा असंखेज्जगुणा सिद्धा अनंतगुणा तिरिक्खजोणिया अनंतगुणा ॥ एएसि णं भंते ! नेरइयाणं तिरिक्खजोणियाणं तिरिक्खजोणीणीणं मणुस्साणं मणुस्सीणं देवाणं देवीणं सिद्धाण य अट्ठगति० समसेणं कतरे कतरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवाओ मणुस्सीओ, मणुस्सा असंखेज्जगुणा, नेरइया असंखेज्जगुणा, तिरिक्खजोणिणीओ असंखेज्जगुणाओ, देवा असंखेज्जगुणा, देवीओ संखेज्जगुणाओ, सिद्धा अनंतगुणा, तिरिक्खजोणिया अनंतगुणा ॥*

वृ. सर्वस्तोका मनुष्याः, षन्नवतिच्छेदनकच्छेदराशिप्रमाणत्वात्, स च षन्नवतिच्छेदनकदायी राशिरग्रे दर्शयिष्यते, तेभ्यो नैरयिका असङ्ख्येयगुणाः, अङ्गुलमात्रक्षेत्रप्रदेशराशेः सम्बन्धिनि प्रथमवर्गमूले द्वितीयवर्गमूलेन गुणिते यावान् प्रदेशराशिर्भवति तावत्प्रमाणासु घनीकृतस्य लोकस्यैकप्रादेशिकीषु श्रेणिषु यावन्तो नभः प्रदेशास्तावत्प्रमाणत्वात्, तेभ्यो देवा असङ्ख्येयगुणाः, व्यन्तराणां ज्योतिष्काणां च प्रत्येकं प्रतरासङ्ख्येयभागवर्तिश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात्, तेभ्यः सिद्धा अनन्तगुणाः, अभव्येभ्योऽनन्तगुणत्वात्, तेभ्यस्तिर्यग्योनिका अनन्तगुणाः, वनस्पतिकायिकानां सिद्धेभ्योऽप्यनन्तगुणत्वात् ।

तदेवं नैरयिकतिर्यग्योनिकमनुष्यदेवसिद्धरूपाणां पञ्चनामल्पबहुत्वमुक्तम्, इदानीं नैरयिकतिर्यग्योनिकतैर्यग्योनिकीमनुष्यामानुषीदेवदेवीसिद्धलक्षणानामष्टानामल्पबहुत्वमभिधित्सुरिदमाह–सर्वस्तोका मानुष्यो – मनुष्यस्त्रियः, सङ्ख्येयकोटीकोटीप्रमाणत्वात्, ताभ्यो मनुष्या असङ्ख्येयगुणाः, इह मनुष्या इति संमूर्च्छनजा अपि गृह्यन्ते, वेदस्याविवक्षणात्, ते च संमूर्च्छनजा वान्तादिषु नगरनिर्द्धमनान्तेषु जायमाना असङ्ख्येयाः प्राप्यन्ते, तेभ्यो नैरयिका-असङ्ख्येयगुणाः, मनुष्या हि उत्कृष्टपदे ऽपि श्रेणयसङ्ख्येयभागगतप्रदेशराशिप्रमाणा लभ्यन्ते नैरयिकास्त्वङ्गुलमात्रक्षेत्रप्रदेशराशिसत्कतृतीयवर्गमूलगुणितप्रथमवर्गमूलप्रमाणश्रेणिगताकाश प्रदेशराशिप्रमाणाः ततो भवन्त्यसङ्ख्येयगुणाः तेभ्यस्तिर्यग्योनिकाः स्त्रियोऽसङ्ख्येयगुणाः, प्रतरासङ्ख्येयभागवर्त्तच्यसङ्ख्येयश्रेणिनभः-प्रदेशराशिप्रमाणत्वात्, ताभ्योऽपि देवा असङ्ख्येय-गुणाः, असङ्ख्येयगुणप्रतरासङ्ख्येयभागवर्त्य- सङ्ख्येयश्रेणिगतप्रदेशराशिमानत्वात्, तेभ्योऽवि देव्यः सङ्ख्येयगुणाः, द्वात्रिंशद्गुणत्वात्, ताभ्योऽपि सिद्धा अनन्तगुणाः, तेभ्योऽपि तिर्यग्यो निका अनन्तगुणाः, अत्र युक्तिः प्रागेवोक्ता ॥ गतं गतिद्वारम् ॥ इदानीं इन्द्रियद्वारमधिकृत्याह–

-: पदं - ३ - द्वारं - ३ :- "इन्द्रिय" :-

मू. (२६२) एएसि णं भंते ! सइंदियाणं एगिंदियाणं बेइंदियाणं तेइंदियाणं चउरिंदियाणं पंचिंदियाणं अनिंदियाणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा पंचिंदिया चउरिंदिया विसेसाहिया तेइंदिया विसेसाहिया बेइंदिया विसेसाहिया अनिंदिया अनंतगुणा एगिंदिया अनंतगुणा सइंदिया विसेसाहिया ॥

एएसि णं भंते ! सइंदियाणं एगिंदियाणं बेइंदियाणं तेइंदियाणं चउरिंदियाणं पंचिंदियाणं अपज्जत्तगाणं कतरे कतरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ? गोयमा ! सव्वत्थोवा पंचिंदिया अपज्जत्तगा चउरिंदिया अपज्जत्तगा विसेसाहिया तेइंदिया अपज्जत्तगा विसेसाहिया बेइंदिया अपज्जत्तगा विसेसाहिया एगिंदिया अपज्जत्तगा अनंतगुणा सइंदिया अपज्जत्तगा विसेसाहिया ॥

एएसिं णं भंते ! सइंदियाणं एगिंदियाणं बेइंदियाणं तेइंदियाणं चउरिंदियाणं पंचिंदियाणं पज्जत्ताणं कतरे कतरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा चउरिंदिया पज्जत्तगा पंचिंदिया पज्जत्तगा विसेसाहिया बेइंदिया पज्जत्तया विसेसाहिया तेइंदिया पज्जत्तगा विसेसाहिया एगिंदिया पज्जत्तगा अनंतगुणा सइंदिया पज्जत्तगा विसेसाहिया ॥

एएसि णं भंते ! सइंदियाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा सइंदिया अपज्जत्तगा सइंदिया पज्जत्तगा संखेज्जगुणा ॥

एएसिणं भंते ! एगिंदियाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिआ वा ?, गोयमा ! सव्वत्थोवा एगिंदिया अपज्जत्तगा एगिंदिया पज्जत्तगा संखेज्जगुणा ।एएसि णं भंते ! बेइंदियाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिआ वा ?, गोयमा ! सव्वत्थोवा बेइंदिया पज्जत्तगा बेइंदिया अपज्जत्तगा असंखेज्जगुणा

एएसि णं भंते ! तेइंदियाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिआ वा ?, गोयमा ! सव्वत्थोवा तेइंदिया पज्जत्तगा तेइंदिया अपज्जत्तगा असंखेज्जगुणा एएसि णं भंते ! चउरिंदियाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिता वा ?, गोयमा ! सव्वत्थोवा चउरिंदिया पज्जत्तगा चउरिंदिया अपज्जत्तगा असंखेज्जगुणा

एएसि णं भंते ! पंचिंदियाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिआ वा ?, गोयमा ! सव्वत्थोवा पंचेंदिया पज्जत्तगा पंचेंदिया अपज्जत्तगा असंखेज्जगुणा

एएसि णं भंते सइंदियाणं एगिंदियाणं बेइंदियाणं तेइंदियाणं चउरिंदियाणं पंचिंदियाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्प वा बहुया वा तुल्ला वा विसेसाहिआ वा ?, गोयमा ! सव्वत्थोवा चउरिंदिया पज्जत्तगा पंचिंदिया पज्जत्तगा विसेसाहिआ बेइंदिया पज्जत्तगा विसेसाहिआ तेइंदिया पज्जत्तगा विसेसाहिआ पंचिंदिया अपज्जत्तगा असंखेज्जगुणा चउरिंदिया अपज्जत्तगा विसेसाहिआ तेइंदिया अपज्जत्तगा विसेसाहिआ बेइंदिया अपज्जत्तगा विसेसाहिआ एगिंदिया अपज्जत्तगा अनंतगुणा सइंदिआ अपज्जत्तगा विसेसाहिआ एगिंदिया पज्जत्तगा संखेज्जगुणा सइंदिआ पज्जत्तगा विसेसाहिआ सइंदिया विसेसाहिआ ।

वृ. सर्वस्तोकाः पञ्चेन्द्रियाः सङ्ख्येययोजनकोटीकोटीप्रमाणविष्कम्भसूचीप्रमितप्रतरासङ्ख्येय-

भागवत्यसङ्ख्येययश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात्, तेभ्यश्चतुरिन्द्रिया विशेषाधिकाः, विष्कम्भसूच्यास्तेषां प्रभूतसङ्ख्ययोजनकोटीकोटीप्रमाणत्वात्, तेभ्योऽपि त्रीन्द्रिया विशेषाधिकाः-,तेषा विष्कम्भसूच्या प्रभूततरसङ्ख्येययोजनकोटीकोटीप्रमाणत्वात्, तेभ्योऽपि द्वीन्द्रिया विशेषाधिकाः, तेषा विष्कम्भसूच्या प्रभूततमसङ्ख्ययोजनकोटीकोटीप्रमाणत्वात्, तेभ्योऽपि द्वीन्द्रिया विशेषाधिकाः, तेषा विष्कम्भसूच्या प्रभूततमसङ्ख्ययोजनकोटीकोटीप्रमाणत्वात्, तेभ्योऽपि अनिन्द्रिया अनन्तगुणाः,सिद्धानामनन्तत्वात्, तेभ्योऽपि एकेन्द्रिया अनन्तगुणाः, वनस्पतिकायिकानां सिद्धेभ्योऽप्यनन्तगुणत्वात्, तेभ्योऽपि सेन्द्रिया विशेषाधिकाः द्वीन्द्रियादीनामपि तत्र प्रक्षेपात् तदेवमुक्तमेकमौधिकानामल्पबहुत्वम्, इदानीं तेषामेवापर्याप्तानां द्वितीयमल्पबहुत्वमाह--

सर्वस्तोकाः पञ्चेन्द्रिया अपर्याप्ताः, एकस्मिन्प्रतरे यावन्त्यङ्गुलासङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणत्वात् तेषां, तेभ्यश्चतुरिन्द्रिया अपर्याप्ता विशेषाधिकाः, प्रभूताङ्गुल- सङ्ख्येयभागखण्ड-प्रमाणत्वात्, तेभ्यस्त्रीन्द्रिया अपर्याप्ता विशेषाधिकाः, प्रभूततरप्रतराङ्गुलासङ्ख्येय- भागखण्डमानत्वात्, तेभ्योऽपि द्वीन्द्रिया अपर्याप्ता विशेषाधिकाः, प्रभूततमप्रतराङ्गुलासङ्ख्येय- भागखण्डप्रमाणत्वात्, तेभ्य एकेन्द्रिया अपर्याप्ता अनन्तगुणाः, वनस्पतिकायिकानामपर्याप्तानाम- नन्ततया सदा प्राप्यमाणत्वात्, तेभ्योऽपि सेन्द्रिया अपर्याप्ता विशेषाधिकाः, द्वीन्द्रियाद्यपर्याप्तनामपि तत्र प्रक्षेपा गतं द्वितीयमल्पबहुत्वम्, अधुना एतेषामेव पर्याप्तनामल्पबहुत्वमाह--सर्वस्तोका- श्चतुरिन्द्रियाःपर्याप्ताः, यतोऽल्पायुषश्चतुरिन्द्रियास्तत; प्रभतकालमवस्थानाभावात् पृच्छासमये स्तोका अवाप्यन्ते, ते च स्तोका अपि प्रतरे यावन्त्यङ्गुलंसङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणा वेदितव्याः, तेभ्यः पञ्चेन्द्रियाः पर्याप्ता विशेषाधिकाः, प्रभूतप्रतराङ्गुलसङ्ख्येयभा गखण्डमानत्वात्, तेभ्योऽपि द्वीन्द्रियाः पर्याप्ता विशेषाधिकाः, प्रभूततरप्रतराङ्गुलसङ्ख्येयभागखण्डमानत्वात्, तेभ्योऽपि त्रीन्द्रियाः पर्याप्ता विशेषाधिकाः, स्वभावत एव तेषां प्रभूततमप्रतराङ्गुलसङ्ख्येयभागखण्डप्रमाणत्वात्, तेभ्य एकेन्द्रियाः पर्याप्ता अनन्तगुणाः, वनस्पतिकायिकानां पर्याप्तानामनन्तमानत्वात्, तेभ्यः सेन्द्रियाः पर्याप्ता विशेषाधिकाः, द्वीन्द्रियादीनामपि पर्याप्तानां तत्र प्रक्षेपात् । (गतं) तृतीयमल्पबहुत्वं, सम्प्रत्येतषामेव सेन्द्रियादीनां प्रत्येकं पर्याप्तापर्याप्तगतान्यल्पबहुत्वान्याह--

सर्वस्तोकाः सेन्द्रिया अपर्याप्तकाः, इह सेन्द्रियेषु मध्ये एकेन्द्रिया एव बहवः तत्रापि च सूक्ष्माः तेषां सर्वलोकापन्नत्वात् सूक्ष्माश्चापर्याप्ताःसर्वस्तोकाः पर्याप्ताः सङ्ख्येयगुणा इति सेन्द्रिया अपर्याप्ताः सर्वस्तोकाः, पर्याप्ताः सङ्ख्येयगुणाः, एवमेकेन्द्रिया अपि अपर्याप्ताः सर्वस्तोकाः, पर्याप्ताः सङ्ख्येयगुणा भावनीयाः । तथा सर्वस्तोका द्वीन्द्रियाःपर्याप्तकाः, यावन्ति प्रतरेऽङ्गुलस्य सङ्ख्येयभाग-मात्राणि खण्डानि तावत्प्रमाणत्वात् तेषां, तेभ्योऽपर्याप्ताः असङ्ख्येयगुणाः, प्रतरगताङ्गुलासङ्ख्येयभाग-खण्डप्रमाणत्वात्, एवं त्रिचतुरिन्द्रियपञ्चेन्द्रियाल्पबहुत्वान्यपि वक्तव्यानि । गतं षडल्पबहुत्वात्मकं चतुर्थमल्पबहुत्वम् । सम्प्रत्येतेषां सेन्द्रियादीनां समुदितानां पर्याप्तापर्याप्तानामल्पबहुत्वमाह--

'एएसिणं भंते' इत्यादि । इदं प्रागुक्तद्वितीयतृतीयाल्पबहुत्वभावनानुसारेण स्वयं भावनीयं, तत्त्वतो भावितत्वात् । गतमिन्द्रियद्वारम्, इदानीं कायद्वारमधिकृत्याह--

—: पदं – ३ – द्वारं – ४ :– "काय:" :–

मू. (२६३) एएसि णं भंते ! सकाइयाणं पुढविकाइयाणं आउकाइयाणं तेउकाइयाणं वाउकाइयाणं वणस्सइकाइयाणं तसकाइयाणं अकाइयाणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिआ वा ?, गोयमा ! सव्वत्थोवा तसकाइया तेउकाइया असंखेज्जगुणा पुढविकाइया विसेसाहिया आउकाइया विसेसाहिया वाउकाइया विसेसाहिया अकाइया अनंतगुणा वणस्सइकाइया अनंतगुणा सकाइया विसेसाहिया ॥

एएसि णं भंते ! सकाइयाणं पुढविकाइयाणं आउकाइयाणं तेउकाइयाणं वाउकाइयाणं वणस्सइकाइयाणं तसकाइयाणं अपज्जत्तगाणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा तसकाइया अपज्जत्तगा तेउकाइया अपज्जत्तगा असंखेज्जगुणा पुढविकाइया अपज्जत्तगा विसेसाहिया आउकाइया अपज्जत्तगा विसेसाहिया वाउकाइया अपज्जत्तगा विसेसाहिया वणस्सइकाइया अपज्जत्तगा अनंतगुणा सकाइया अपज्जत्तगा विसेसाहिया ॥

एएसि णं भंते ! सकाइयाणं पुढविकाइयाणं आउकाइयाणं तेउकाइयाणं वाउकाइयाणं वणस्सइकाइयाणंतसकाइयाणं पज्जत्तगाणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा तसकाइया पज्जत्तगा तेउकाइया पज्जत्तगा असंखेज्जगुणा पुढविकाइया पज्जत्तगा विसेसाहिया आउकाइया पज्जत्तगा विसेसाहिया वाउकाइया पज्जत्तगा विसेसाहिया वणस्सइकाइया पज्जत्तगा अनंतगुणा सकाइया पज्जत्तगा विसेसाहिया ॥

एएसि णं भंते ! सकाइयाणं पज्जत्तापज्जत्तगाणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा सकाइया अपज्जत्तगा सकाइया पज्जत्तगा संखेज्जगुणा

एएसि णं भंते ! पुढविकाइयाणं पज्जत्तापज्जत्तगाणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा पुढविकाइया अपज्जत्तगा पुढवीकाइया पज्जत्तगा संखेज्जगुणा ॥ एएसि णं भंते ! आउकाइयाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वाबहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा आउकाइया अपज्जत्तगा आउकाइया पज्जत्तगा संखेज्जगुणा ॥

एएसिणं भंते ! तेउकाइयाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा तेउकाइया अपज्जत्तगा तेउकाइया पज्जत्तगा संखेज्जगुणा

एएसि णं भंते ! वाउकाइयाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा वाउकाइया अपज्जत्तगा वाउकाइया पज्जत्ता संखेज्जगुणा ॥ एएसि णं भंते ! वणस्सइकाइयाणं पज्जत्तपज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा वणस्सइकाइया अपज्जत्तगा वणस्सइकाइया पज्जत्तगा संखेज्जगुणा ॥

एएसि णं भंते ! तसकाइयाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, सव्वत्थोवा तसकाइया पज्जत्तगा अपज्जत्तगा असंखेज्जगुणा ॥

एएसि णं भंते ! सकाइयाणं पुढविकाइआणं आउकाइआणं तेउकाइआणं वाउकाइआणं वणस्सइकाइआणं तसकाइयाण य पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा

विसेसाहिआ वा ?, गोयमा ! सव्वत्थोवा तसकाइआ पज्जत्तगा तसकाइआ अपज्जत्तगा संखेज्जगुणा तेउकाइआ अपज्जत्तगा असंखेज्जगुणा पुढविकाइआ अपज्जत्ता विसेसाहिया वाउकाइआ अपज्जत्तगा विसेसाहिआ तेउकाइआ पज्जत्तगा संखेज्जगुणा पुढविकाइआ पज्जत्ता विसेसाहिआ आउकाइआ पज्जत्ता विसेसाहिया वाउकाइआ पज्जत्ता विसेसाहिआ वणस्सइकाइआ अपज्जत्ता अनंतगुणा सकाइआ अपज्जत्तगा विसेसाहिया वणस्सइकाइआ पज्जत्तगा विसेसाहिआ सकाइया विसेसाहिया

वृ. सर्वस्तोकास्त्रसकायिकाः, द्वीन्द्रियादीनामेव त्रसकायिकत्वात्, तेषा च शेषकायापेक्षया अल्पत्वात्, तेभ्यस्तेजःकायिका असङ्ख्येयगुणाः, असङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्, तेभ्यः पृथिवीकायिका विशेषाधिकाः, प्रभूतासङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्, तेभ्योऽप्कायिका विशेषाधिकाः, प्रभूततरासङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्, तेभ्यो वायुकायिका विशेषाधिकाः, प्रभूततमासङ्ख्येयलोकाकाशप्रदेशमानत्वात्, तेभ्योऽकायिका अनन्तगुणाः, सिद्धानामनन्तत्वात्, तेभ्यो वनस्पतिकायिका अनन्तगुणाः, अनन्तलोकाकाशप्रदेशराशिप्रमाणत्वात्, तेभ्यः सकायिका विशेषाधिकाः, पृथिवीकायिकादीनामपि तत्र प्रक्षेपात् । उक्तमौधिकानामल्पबहुत्वम्, इदानीमेतेषामेववापर्याप्तानां द्वितीयमल्पबहुत्वमाह–

'एएसि णं भंते ! सकाइयाणं' इत्यादि सुगमं ॥ सम्प्रत्येतेषामेव पर्याप्तानां तृतीयमल्पबहुत्वमाह– 'एएसि णं भंते ! सकाइयाणं' इत्यादि सुगमं, सामप्रतमेतेषामेव सकायिकादीनां प्रत्येकं पर्याप्तापर्याप्तगमल्पबहुत्वमाह– 'एएसि णं भंते !सकाइयाणं पज्जत्तापज्जत्ताणं' इत्यादि सुगमम् सम्प्रत्येतेषामेव सकायिकादीनां समुदितानां पर्याप्तापर्याप्तानामल्पबहुत्वमाह–

'एएसि णं भंते ! सकाइयाणं' इत्यादि, सर्वस्तोकास्त्रसकायिकाः पर्याप्तकाः, तेभ्यस्त्रसकायिका एवापर्याप्तका असङ्ख्येयगुणाः, द्वीन्द्रियादीनामपर्याप्तानां पर्याप्तद्वीन्द्रियादिभ्योऽसङ्ख्येयगुणत्वात्, ततः तेजःकायिका अपर्याप्ता असङ्ख्येयगुणाः, असङ्ख्ययोलाकाशप्रदेशप्रमाणत्वात्, ततः पृथिव्यम्बुवायवोऽपर्याप्तकाः क्रमेण विशेषाधिकाः, ततः तेजःकायिकाः पर्याप्ताः सङ्ख्येगुणाः, सूक्ष्मेष्वपर्याप्तेभ्यः पर्याप्तानां सङ्ख्येयगुणत्वात्, ततःपृथिव्याम्बायवः पर्याप्ताः क्रमेण विशेषाधिकाः, ततो वनस्पतयोऽपर्याप्ता अनन्तगुणाः, पर्याप्ताः सङ्ख्येयगुणाः ।।

तदेवं कायद्वारे सामान्येन पञ्च सूत्राणि प्रतिपादितानि, सम्प्रत्यस्मिन्नेव द्वारे सूक्ष्मबादरादिभेदेन पञ्चदश सूत्राण्याह–

सू. (२६४) एएसि णं भंते ! सुहुमाणं सुहुमपुढविकाइयाणं सुहुमआउकाइआणं सुहुमतेउकाइआणं सुहुमवाउकाइआणं सुहुमवणस्सइकाइयाणं सुहुमनिओयाणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिआ वा ?, गोयमा ! सव्वत्थोवा सुहुमतेउकाइया सुहुमपुढविकाइआ विसेसाहिया सुहुमआउकाइआ विसेसाहिया सुहुमवाउकाइआ विसेसाहिआ सुहुमनिगोदा असंखेज्जगुणा सुहुमवणस्सइकाइया अनंतगुणा सुहुमा विसेसाहिया ॥

एएसि णं भंते ! सुहुमअपज्जत्तगाणं सुहुमपुढविअपज्जत्तगाणं सुहुमआउअपज्जत्तयाणं सुहुमतेउअपज्जत्तयाणं सुहुमवण० अपज्जत्तयाणं सुहुमनिगोदाअपज्जत्ताण य कयरे कयरेहिंतो अप्पा वा ४ ?, गोयमा ! सव्वत्थोवा सुहुमतेउअपज्जत्तया सुहुमपुढवि० अप० विसे० सुहुमआउ० अप० विसे० सुहुमवाउ० अप० विसे० सुहुमनिगोदा अप० असंखे० सुहुमवण० अपज्जत्तया

अणंतगुणा सुहुमा अपज्जत्तया विसेसा० एएसि णं भंते ! सुहुमपज्जत्त० सुहुमपुढविका० पज्जत्त० सुहुमआउका० पज्जत्त० सुहुमते- उका० पज्जत्त० सुहुमवाउका० पज्जत्तगाणं सुहुमवणस्सइका० पज्जत्त० सुहुमनिगोदपज्जत्तगाण य कयरे कयरेहिंतो अप्पा वा ४ ?,

गोयमा ! सव्वत्थोवा सुहुमतेउका० पज्जत्ता सुहुमपुढविका० पज्जत्तगा विसेसा० सुहुमआउका० पज्जत्तगा विसेसा० सुहुमआउका० पज्जत्तगा विसेसा० सुहुमवाउका० पज्जत्त० विसेसा० सुहुमनिगोया पज्जत्तगा असंखेज्जगुणा सुहुमवण० पज्जत्त० अनंत० सुहुमपज्जत्त० विसेसा० एएसि णं भंते ! सुहुमाणं पज्जत्तापज्जत्तगाणं कयरे कयरेहिंतो अप्पा वा ४ ?, गोयमा ! सव्वत्थोवा सुहुमअपज्जत्तगा सुहुमपज्जत्तगा संखे० ! एएसि णं भंते ! सुहुमपुढवी० पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा ४ ?, गोयमा ! सव्वत्थोवा सुहुमपुढविकाइया अपज्जत्तया सुहुमपुढविकाइया पज्जत्तया संखेज्जगुणा । एएसि णं भंते ! सुहुमआउ० पज्जत्तापज्जत्तगाणं कयरे कयरेहिंतो अप्पा ४ गोयमा ! सव्वत्थोवा सुहुमआउका० अपज्जत्त० सुहुमाउका० पज्जत्तगा संखेज्जगुणा । एएसि णं भंते ! सुहुमतेउ० पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा ४ ?, गोयमा ! सव्वत्थोवा सुहुमतेउका० अपज्जत्त० सुहुमतेउका० पज्जत्ता संखे० ।

एएसि णं भंते ! सुहुमवाउका० पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा ४ ?, गोयमा सव्वत्थोवा सुहुमवाउका० अपज्जत्त० वाउका० पज्जत्त० संखेज्ज० ।

एएसि णं भंते ! सुहुमवण० पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा ४ ?, गोयमा ! सव्वत्थोवा सुहुमवण० अपज्ज० सुहुमवणस्सइपज्जत्त० संखे० ।

एएसि णं भंते ! सुहुमनिगोयाणं कयरे कयरेहिंतो अप्पा वा ४ ?, गोयमा ! सव्वत्थोवा सुहुमनिगोया अपज्जत्त० सुहुमनिगोया पज्जत्त० संखेज्जगुणा ।

एएसि णं भंते ! सुहुमाणं सुहुमपुढ० सुहुमआउ० सुहुमतेउ० सुहुमवाउ० सुहुमवण० सुहुमनिगोदाण य पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा ४ ?, गोयमा ! सव्वत्थोवा सुहुमतेउकाइया अपज्जत्तया सुहुमपुढवीअपज्ज० विसेसा० सुहुमआउ० अपज्ज० विसेसा० सुहुमवाउ० अपज्ज० विसेसा० सुहुमतेउ० अपज्ज० संखेज्जगुणा सुहुमपुढवीपज्जत्त० विसेसा० सुहुमाउ० पज्जत्त० विसेसा० सुहुमवाउ० पज्जत्त० विसेसा० सुहुमनिगोदा अपज्ज– असंखे० सुहुमनिगोदा पज्जत्त० संखे० सुहुमवण० अपज्ज० अणंतगुणा सुहुमअपज्ज० विसेसा० सुहुमवण० पज्जत्त० संखेज्ज० सुहुमपज्जत्त० विसेसा० सुहुमा विसेसाहिया ।

वृ. सर्वस्तोकाः सूक्ष्माः तेजःकायिकाः, असङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वा, तेभ्यः सूक्ष्मपृथिवीकायिका विशेषाधिकाः, प्रभूतासङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्, तेभ्यः सूक्ष्माप्कायिका विशेषाधिकाः, प्रभूततरासङ्ख्येयलोकाकाशप्रदेशमानत्वात्, तेभ्यः सूक्ष्मवायुकायिका विशेषाधिकाः प्रभूततमासङ्ख्येयलोकाकाशप्रदेशराशिमानत्वात्, तेभ्यः सूक्ष्मनिगोदा असङ्ख्येयगुणाः, सूक्ष्मग्रहणं बादरव्यवच्छेदार्थं, द्विविधा हि निगोदाः—सूक्ष्मा बादराश्च, तत्र बादराः सूरणकन्दादिषु, सूक्ष्माः सर्वलोकापन्नाः, ते च प्रतिगोलकमसङ्ख्येया इति सूक्ष्मवायुकायिकेभ्योऽसङ्ख्येयगुणाः, तेभ्यः सूक्ष्मवनस्पतिकायिका अनन्तगुणाः, प्रतिनिगोदमनन्तानां जीवानां भावात्, तेभ्यः सामानिकाः सूक्ष्मजीवा विशेषाधिकाः, सूक्ष्मपृथिवीकायिकादीनामपि तत्र प्रक्षेपात् ।

गतमौधिकानामिदमल्पबहुत्वम्, इदानीमेतेषामेवापर्याप्तानामाह–'एएसि णं भंते ! सुहुम-अपज्जत्तगाणं' इत्यादि, सर्वं प्राग्वद्भावनीयम्। सम्प्रत्येतेषामेव पर्याप्तनां तृतीयमल्पबहुत्वमाह–

'एएसि णं भंते ! सुहुमपज्जत्तगाणं' इत्यादि, इदमपि प्रागुक्तक्रमेणैव भावनीयं। अधुना अमीषामेव सूक्ष्मादीनां प्रत्येकं पर्याप्तपर्याप्तगतान्यल्पबहुत्वान्याह–

'एएसि णं भंते ! सुहुमाणं पज्जत्तापज्जत्ताणं' इत्यादि, इह बादरेषु पर्याप्तेभ्योऽपर्याप्ता असङ्ख्येययगुणाः, एकैकपर्याप्तनिश्रयाऽसङ्ख्ययानामपर्याप्तानामुत्पादात्, तथा चोक्तं प्राक् प्रथमे प्रज्ञापनाख्ये पदे–"पज्जत्तगनिस्साए अपज्जत्तगा वक्कमंति, जतअथ एगो तत्त नियमा असंखेज्जा" इति, सूक्ष्मेषु पुनर्नायं क्रमः, पर्याप्ताश्चापर्याप्तापेक्षया चिरकालावस्थायिन इति सदैव ते बहवो लभ्यन्ते, तत उक्तं सर्वस्तोकाः सूक्ष्मा अपर्याप्ताः, तेभ्यःसूक्ष्माः पर्याप्तकाः सङ्ख्येयगुणाः, एवं पृथिवीकायिकादिष्वपि प्रत्येकं भावनीयम्। गतं चतुर्थमल्पबहुत्वम्, इदानीं सर्वेषां समुदितानां पर्याप्तपर्याप्तगतं पञ्चममल्पबहुत्वमाह– 'एएसि णं भंते ! सुहुमाणं सुहुमपुढविकाइयाणं' इत्यादि, सर्वस्तोकाः सूक्ष्मतेजःकायिका अपर्याप्ताः, कारणं प्रागेवोक्तं, तेभ्यः सूक्ष्मपृथिवीकायिका अपर्याप्ता विशेषाधिकाः तेभ्यः सूक्ष्माप्कायिका अपर्याप्ता विशेषाधिकाः तेभ्यः सूक्ष्मवायुकायिका अपर्याप्ता विशषाधिकाः, अत्रापि कारणं प्रागेवोक्तं, तेभ्यः सूक्ष्मतेजःकायिकाः पर्याप्ताः सङ्ख्येयगुणाः, अपर्याप्तेभ्यो हि पर्याप्ताःसङ्ख्येयगुणा इत्यनन्तरं भावितं,

–तत्र सर्वस्तोकाःसूक्ष्मतेजःकायिका अपर्याप्ता उक्ताः इतरे च सूक्ष्मापर्याप्तपृथिवी-कायिकादयो विशेषाधिकाः, विशेषाधिकत्वं च मनागधिकत्वं न द्विगुणत्वं न त्रिगुणत्वं वा, ततः सूक्ष्मतेजःकायिकेभ्योऽपर्याप्तेभ्यः पर्याप्ताः सूक्ष्मतेजःकायिकाः सङ्ख्येयगुणाः सन्तःसूक्ष्मवायुकायि-कापर्याप्तेभ्योऽपि सङ्ख्येयगुणा भवन्ति,

तेभ्यःसूक्ष्मपृथिवीकायिकाः पर्याप्ताः विशेषाधिकाः तेभ्यः सूक्ष्माप्कायिकाः पर्याप्ता विशेषाधिकाः तेभ्योऽपि सूक्ष्मवायुकायिकाः पर्याप्ता विशेषाधिकाः तेभ्यः सूक्ष्मनिगोदाः अपर्याप्ता असङ्ख्येययगुणाः, तेषामतिप्राचुर्यात्, तेभ्यः सूक्ष्मनिगोदाःपर्याप्ताःसङ्ख्येयगुणाः, सूक्ष्मेष्वपर्याप्तेभ्यः पर्याप्तानामोघतः सङ्ख्येयगुणत्वात्, तेभ्यः सूक्ष्मवनस्पतिकायिका अपर्याप्तका अनन्तगुणाः प्रतिनिगोदमनन्तानां तेषां भावात्, तेभ्यः सामान्यतःसूक्ष्मा अपर्याप्तका विशेषाधिकाः, सूक्ष्मपृथिवी-कायिकादीनामपि तत्र प्रक्षेपात्, तेभ्यः सूक्ष्मवनस्पतिकायिकाः पर्याप्तकाः सङ्ख्येयगुणाः, सूक्ष्मेषु ह्यपर्याप्तेभ्यः पर्याप्तकाः सङ्ख्येयगुणाः, यच्चापान्तराले विशेषाधिकत्वं तदल्पमिति न सङ्ख्येयगुण-त्वव्याघातः, तेभ्यः सूक्ष्माः पर्याप्तका विशेषाधिकाः, सूक्ष्मपृथिव्यादीनामपि पर्याप्तानां तत्र प्रक्षेपात्, तेभ्यःसूक्ष्मा विशेषाधिकाः, अपर्याप्तानामपि तत्र प्रक्षेपात्, । तदेवमुक्तानि सूक्ष्माश्रितानि पञ्च सूत्राणि, सम्प्रति बादराश्रितानि पञ्चोक्तक्रमेणा- भिधित्सुराह–

मू. (२६५) एएसि णं भंते! बादराणं बादरपुढविकाइयाणं बादरआउकाइयाणं बादरतेउ-काइयाणं बादरवाउकाइयाणं बादरवणस्सइकाइयाणं पत्तेयसरीरबादरवणस्सइकाइयाणं बादरनिगोदाणं बादरतसकाइयाणं कयरे कयरेहिंतो अप्पा वा ४ ?, गोयमा! सव्वत्थोवा बादरतस-काइया बादरतेउकाइया असंखेज्जगुणना पत्तेयसरीरबादरवणस्सइकाइया असंखेज्जगुणा बादरनिगोदा असंखेज्जगुणा बादरा पुढवी० असंखे० बादरा आउकाइया असं० बादरा वाउकाइया

असंखे० बादरा वणस्स० अनंतगुणा बादरा विसेसाहिया।

एएसि णं भंते! बादरपुढविकाइयअपज्जत्तगाणं बादरआउअपज्जत्तगाणं बादरतेउअपज्जत्तगाणं बादरवाउअपज्जत्तगाणं बादरवणस्सइअपज्जत्तगाणं पत्तेयसरीरबादरवणस्सइअपज्जत्तगाणं बादरनिगोदअपज्जत्तगाणं बादरतसकाइयअपज्जत्तगाण य कयरे कयरेहिंतो अप्प वा बहुया वा तुल्ला वा विसेसाहिया वा?, गोयमा! सव्वत्थोवा बादरतसकाइया अपज्जत्तगा बादरतेउकाइया अपज्जत्तगा असंखेज्जगुणा पत्तेयसरीरबादरवणस्सइकाइया अपज्जत्तगा असंखेज्जगुणा बादरनिगोदा अपज्जत्तगा असंखेज्जगुणा बायरपुढवीकाइया अपज्जत्तगा असंखेज्जगुणा बादरआउकाइया अपज्जत्तगा असंखेज्जगुणा बादरवाउकाइया अपज्जत्तगा असंखेज्जगुणा बादरवणस्सइकाइया अपज्जत्तगा अनंतगुणा बादरअपज्जत्तगा विसेसाहिया।

एएसि णं भंते! बायरपज्जत्तयाणं बादरपुढवीकाइयाणं पज्जत्तयाणं बायरआउकाइयाणं पज्जत्तयाणं बायरतेउकाइयाणं पज्जत्तयाणं बायरवाउकाइयाणं पज्जत्तयाणं पत्तेयसरीरबायरवणस्सइकाइयाणं पज्जत्तयाणं बायरनिगोदपज्जत्तयाणं बायरतसकाइयपज्जत्तगाण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा?, गोयमा! सव्वत्थोवा बायरतेउकाइया पज्जत्तया बायरतसकाइया पज्जत्तया असंखेज्जगुणा पत्तेयसरीरबायरवणस्सइकाइया पज्जत्तया असंखेज्जगुणा बायरनिगोदा पज्जत्तया असंखेज्जगुणा बादरपुढवीकाइया पज्जत्तया असंखेज्जगुणा बायरआउकाइया पज्जत्तया असंखेज्जगुणा बायरवाउकाइया पज्जत्तया असंखेज्जगुणा बायरवणस्सइकाइया पज्जत्तया अनंतगुणा बायरपज्जत्तया विसेसाहिया।

एएसि णं भंते! बायराणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा?, गोयमा! सव्वत्थोवा बायरपज्जत्तया बायरअपज्जत्तया असंखेज्जगुणा। एएसि णं भंते! बायरपुढवीकाइयाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा?, गोयमा! सव्वत्थोवा बायरपुढवीकाइया पज्जत्तया बायरपुढविकाइया अपज्जत्तया असंखेज्जगुणा। एएसि णं भंते! बायरआउकाइयाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा?, गोयमा! सव्वत्थोवा बायराउकाइया पज्जत्तया बायरआउकाइया अपज्जत्तया असंखेज्जगुणा।

एएसि णं भंते! बायरतेउकाइयाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा?, गो० सव्वत्थोवा बायरतेउकाइया पज्जत्तया अपज्जत्तया असंखेज्जगुणा

एएसि णं भंते! बायरवाउकाइयाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिं तो अप्पावा बहुया वा तुल्ला वा विसेसाहिया वा?, गोयमा! सव्वत्थोवा बादरवाउकाइया पज्जत्तया बायरवाउकाइया अपज्जत्तया असंखेज्जगुणा। एएसि णं भंते! बायरवणस्सइकाइयाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिआ वा?, गोयमा! सव्वत्थोवा बायरवणस्सइकाइया पज्जत्तया बायरवणस्सइकाइया अपज्जत्तया असंखेज्जगुणा।

एएसि णं भंते! पत्तेयसरीरबायरवणस्सइकायइयाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा?, गोयमा! सव्वत्थोवा पत्तेयसरीरबायरवणस्सइकाइया पज्जत्तया पत्तेयसरीरबायरवणस्सइकाइया अपज्जत्तया असंखेज्जगुणा। एएसि णं भंते!

बायरनिगोयाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा बायरनिगोया पज्जत्ता बायरनिगोया अपज्जत्ता असंखेज्जगुणा । एएसि णं भंते ! बायरतसकाइयाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा बायरतसकाइया पज्जत्ता बायरतसकाइया अपज्जत्ता असंखेज्जगुणा ।

एएसि णं भंते ! बायराणं बायरपुढवीकाइयाणं बायरआउकाइयाणं बायरतेउकाइयाणं बायरवाउकाइयाणं बायरवणस्सइकाइयाणं पत्तेयसरीरबायरवणस्सइकाइयाणं बायरनिगोयाणं बायरतसकाइयाणं पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा

—गोयमा ! सव्वत्थोवा बायरतेउकाइया पज्जत्तया बायरतसकाइया पज्जत्तया असंखेज्जगुणा बायरतसकाइया अपज्जत्तया असंखेज्जगुणा पत्तेयसरीरबायरवणस्सइकाइया पज्जत्तया असंखेज्जगुणा बायरनिगोया पज्जत्तया असंखेज्जगुणा बादरपुढवीकाइया पज्जत्तया असंखेज्जगुणा बायरआउकाइया पज्जत्तया असंखेज्जगुणा बायरवाउकाइया पज्जत्तया असंखेज्जगुणा बायरतेउकाइया अपज्जत्तया असंखेज्जगुणा पत्तेयसरीरबायरवणस्सइकाइया अपज्जत्तया असंखेज्जगुणा बायरनिगोया अपज्जत्तया असंखेज्जगुणा बायरपुढवीकाइया अपज्जत्तया असंखेज्जगुणा बायरआउकाइया अपज्जत्तया असंखेज्जगुणा बायरवाउकाइया अपज्जत्तया असंखेज्जगुणा बायरवणस्सइकाइया पज्जत्तया अनंतगुणा बायरवणस्सइकाइया अपज्जत्तया असंखेज्जगुणा बायरअपज्जत्तया विसेसा० बायरा विसेसा० ।

वृ. 'एएसि णं भंते! बायराणं बायरपुढवीकाइयाणं' इत्यादि, सर्वस्तोका बादरत्रसकायिकाः, द्वीन्द्रियादीनामेव बादरत्रसत्वात्, तेषां च शेषकायेभ्योऽल्पत्वात्, तेभ्यो बादरतेजःकायिका असङ्ख्येयगुणाः, असङ्ख्ययलोकाकाशप्रदशप्रमाणत्वात्, तेभ्योऽपि प्रत्येकशरीरबादरवनस्पतिकायिका असङ्ख्येयगुणाः, स्थानस्यासङ्ख्येयगुणत्वात्, बादरतेजःकायिका हि मनुष्यक्षेत्रे एव भवन्ति, तथा चोक्तं द्वितीये स्थानाख्ये पदे–

"कहि णं भंते ! बादरतेउकाइयाणं पज्जत्तगाणं ठाणा पन्नत्ता ?, गोयमा ! सट्ठाणेणं अंतो मणुस्सखित्ते अड्ढाइज्जेसु दीवसमुद्देसु निव्वाघाएणं पन्नरससु कम्मभूमीसु वाघाएणं पंचसु महाविदेहेसु, एत्थ णं बायरतेउकाइयाणं पज्जत्तगाणं ठाणा पन्नत्ता" तथा "जत्थेव बायरतेउकाइयाणं पज्जत्तगाणं ठाणा तत्थेव बायरतेउकाइयाणं अपज्जत्तगाणं ठाणा पन्नत्ता" इति, बादरवनस्पतिकायिकास्तु त्रिष्वपि लोकेषु भवनादिषु, तता चोक्तं तस्मिन्नेव द्वितीये स्थानाख्ये पदे–

"कहि णं भंते ! बायरवणस्सइकाइयाणं पज्जत्तगाणं ठाणा पन्नत्ता ?, गोयमा ! सट्ठाणेणं सत्तसु घनोदहिसु सत्तसु घनोदहिवलयेसु अहोलोए पायालेसु भवणेसु भवणपत्थडेसु उड्ढलोए कप्पेसु विमाणेसु विमाणावलियासु विमाणपत्थडेसु तिरियलोए अगडेसु तलाएसु नदीसु दहेसु वावीसु पुक्खरिणीसु दिहियासु गुंजालियासु सरेसु सरपंतियासु सरसरपंतियासु बिलेसु बिलपंतियासु उज्झरेसु निज्झरेसु चिल्ललेसु पल्ललेसु वप्पिणेसु दीवेसु समुद्देसु सव्वेसु चेव चलासएसु जलठाणेसु,

एत्थ णं बायरवणस्सइकाइयाणं पज्जत्तगाणं ठाणा पन्नत्ता" तथा "जत्थेव बायरवणस्सइकाइयाणं पज्जत्तगाणं ठाणा तत्थेव बायरवणस्सइकाइयाणं अपज्जत्तगाणं ठाणा पन्नत्ता" इति, ततः क्षेत्रस्यासङ्ख्येयगुणत्वादुपपद्यन्ते बादरतेजःकायिकेभ्योऽसङ्ख्येयगुणाः प्रत्येकशरीरबादरवनस्पतिकायिकाः, तेभ्यो बादरनिगोदा असङ्ख्येयगुणाः, तेषामत्यन्तसूक्ष्मावगाहनत्वात्,

जलेषु सर्वत्रापि च भावात्, पनकसेवालादयो हि जलेऽवश्यंभाविनः ते च बादरानन्तकायिका इति,

तेभ्योऽपि बादरपृथिवीकायिका असङ्ख्येयगुणाः, अष्टासु पृथिवीषु सर्वेषु विमानभवन पर्वतादिषु भावात्, तेभ्योऽसङ्ख्येयगुणा बादराप्कायिकाः समुद्रेषु जलप्राभूत्यात्, तेभ्यो बादरवायुकायिका असङ्ख्येयगुणाः, सुषिरे सर्वत्र वायुसंभवात्, तेभ्यो बादरवनस्पतिकायिका अनन्तगुणाः, प्रतिबादरनिगोदमनन्तानं जीवानां भावात्, तेभ्यः सामान्यतो बादरा जीवा विशेषाधिकाः, बादरत्रसकायिकादीनामपि तत्र प्रक्षेपात्। गतमेकमौधिकानां बादराणामल्पबहुत्वम्, इदानीमेतेषामेवापर्याप्तानां द्वितीयमाह– 'एएसि णं भंते! बायरापज्जत्तगाणं' इत्यादि, सर्वस्तोका बादरत्रसकायिका अपर्याप्तकाः, युक्तिरत्र प्रागुक्तैव, तेभ्यो बादरतेजःकायिका अपर्याप्ता असङ्ख्येयगुणाः, असङ्ख्येयलोकाकाश- प्रदेशप्रमाणत्वात्, इत्येवं प्रागुक्तक्रमेणेदमप्यल्पबहुत्वं भावनीयं। गतं द्वितीयमल्पबहुत्वम्, इदानीमेतेषामेव पर्याप्तानां तृतीयमल्पबहुत्वमाह–

'एएसि णं भंते! बायरपज्जत्तगाणं' इत्यादि, सर्वस्तोका बादरतेजःकायिकाः पर्याप्ताः, आवलिकासमयवर्गस्य कतिपयसमन्यूनैरावलिकासमयैर्गुणितस्य यावान्यसमयराशिर्भवति तावत्प्रमाणत्वात्तेषा, उक्तं च–''आवलियवग्गो ऊणावलिए गुणिओ हु बायरा ते उ'' इति तेभ्यो बादरत्रसकायिकाः पर्याप्ता असङ्ख्येयगुणाः, प्रतरे यावन्त्यङ्गुलसङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणत्वात्तेषां, तेभ्यः प्रत्येकशरीरबादरवनस्पतिकायिकाः पर्याप्ताः असङ्ख्येयगुणाः, प्रतरे यावन्त्यङ्गुलासङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणत्वात्तेषां, उक्तं च– ''पत्तेयपज्जवणकाइयाओ पयरं हरंति लोगस्स। अङ्गुलअसंखभागेण भाइय''मिति तेभ्यो बादरनिगोदाः पर्याप्तका असङ्ख्येयगुणाताः, तेषामत्यन्तसूक्ष्मावगाहनन्तावज्जलाशयेषु च सर्वत्र भावात्, तेभ्यो बादरपृथिवीकायिकाः पर्याप्ताः असङ्ख्येयगुणाः, अतिप्रभूतसङ्ख्यप्रतराङ्गुलासङ्ख्येयभाग-खण्डमानत्वात्, तेभ्योऽपि बादराप्कायिकाः पर्याप्ता असङ्ख्येयगुणाः, अतिप्रभूततरसङ्ख्यप्रतराङ्गुलासङ्ख्येयभागखण्डमानत्वात्, तेभ्यो बादरवायुकायिकाः पर्याप्ता असङ्ख्येयगुणाः, घनीकृतस्य लोकस्यासङ्ख्येयेषु सङ्ख्याततमभागवर्त्तिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणत्वात्तेषां, तेभ्यो बादरवनस्पतिकायिकाः पर्याप्ता अनन्तगुणाः, प्रतिबादरैकैकनिगोदमनन्तानां जीवानां भावात्, तेभ्यः सामान्यतो बादरपर्याप्तका विशेषाधिकाः, बादरतेजःकायिकादीनामपि पर्याप्तानां तत्र प्रक्षेपात्। गतं तृतीयमल्पबहुत्वम्, इदानीमेतेषामेव पर्याप्तपर्याप्तगतान्यल्पबहुत्वान्याह–

'एएसि णं भंते! बायराणं पज्जत्तापज्जत्ताणं' इत्यादि, इह बादरैकैकपर्याप्तनिश्रया असङ्ख्येया बादरा अपर्याप्ता उत्पद्यन्ते, 'पज्जत्तगनिस्साए अपज्जत्तगा वक्कमंति, जत्थ एगो तत्त नियमा असंखेज्जा' इति वचनात्, ततः सर्वत्र पर्याप्तेभ्योऽपर्याप्ता असङ्ख्येयगुणा वक्तव्याः, त्रसकायिकसूत्रं प्रागुक्तयुक्त्या भावनीयं। गतं चतुर्थमल्पबहुत्वम्, सम्प्रत्येतेषामेव समुदितानां पर्याप्तापर्याप्तानां पञ्चममल्पबहुत्वमाह– 'एएसि णं भंते! बायराणं बायरपुढवीकाइयाणं' इत्यादि, सर्वस्तोकाः बादरतेजःकायिकाः पर्याप्तकाः तेभ्यो बादरत्रसकायिकाः पर्याप्ता असङ्ख्येयगुणाः तेभ्यो बादरत्रसकायिका अपर्याप्ता असङ्ख्येयगुणाः तेभ्यो बादरप्रत्येकवनस्पतिकायिकाः पर्याप्ता असङ्ख्येयगुणाः तेभ्यो बादरनिगोदा; पर्याप्तका असङ्ख्येयगुणाः तेभ्यो बादरप्रत्येकवनस्पतिकायिकाः पर्याप्ता असङ्ख्येयगुणाः तेभ्यो बादरनिगोदाः पर्याप्तका असङ्ख्येयगुणाः तेभ्यो बादरपृथिवीकायिकाः

पर्याप्तका असङ्ख्येय- गुणाःतेभ्यो बादराप्कायिकाः पर्याप्तका असङ्ख्येयगुणाः, तेभ्यो बादरवायु-कायिकाः पर्याप्ता असङ्ख्येयगुणाः, एतेषु पदेषु युक्तिः प्रागुक्ताऽनुसरणीया, तेभ्यो बादरतेजः-कायिका अपर्याप्तका असङ्ख्येयगुणाः, यतो बादरवायुकायिकाः पर्याप्ताः असङ्ख्येयेषु प्रतरेषु यावन्त आकाशप्रदेशास्तावः- त्प्रमाणाः, बादरतेजःकायिकाश्चपर्याप्ता असङ्ख्येयलोकाकाश-प्रदेशप्रमाणाः, ततो भवन्त्य सङ्ख्येयगुणाः,

—ततः प्रत्येकबादरवनस्पतिकायिका अपर्याप्तका असङ्ख्येयगुणाः ततो बादरनिगोदा अपर्याप्तका असङ्ख्येयगुणाः ततो बादरपृथिवीकायिका अपर्याप्तका असङ्ख्येयगुणाः ततो बादराप्का-यिका अपर्याप्तका असङ्ख्येयगुणाः बादरवायुकायिका अपर्याप्ता यथोत्तरमसङ्ख्येयगुणाः वक्तव्याः, यद्यपि चैते प्रत्येकसमङ्ख्येयलोकाकाशप्रदेशप्रमाणास्तथाप्यसङ्ख्यातस्यासङ्ख्यातभेदभिन्नत्वात् इत्थं यथोत्तरमसङ्ख्येयगुणत्वं न विरुध्यते, तेभ्यो बादरवायुकायिकापर्याप्तेभ्यो बादरवनस्पतिकायिका जीवाः पर्याप्ता अनन्तगुणाः, प्रतिबादरैकैकनिगोदमनन्तानां जीवानां भावात्, तेभ्यः सामान्यतो बादराः पर्याप्तका विशेषाधिकाः, बादरतेजःकायिकादीनां पर्याप्तानां तत्र प्रक्षेपात्, तेभ्यो बादरवन-स्पतिकायिका अपर्याप्तका असङ्ख्येयगुणाः,

—एकैकपर्याप्तबादरवनस्पतिकायिकनिगोदनिश्रयाऽसङ्ख्येयानामपर्याप्तबादर-वनस्पतिकायिकनिगोदानामुत्पादात्, तेभ्यःसामान्यतो बादरा अपर्याप्ता विशेषाधिकाः, बादरतेजःकायिकादीनामप्यपर्याप्तानां तत्र प्रक्षेपात्, तेभ्यः पर्याप्तापर्याप्तविशेषणरहिताः सामान्यतो बादरा विशेषाधिकाः, बादरपर्याप्ततेजःकायिकादीनामपि तत्र प्रक्षेपात् ॥

गतानि बादराश्रितान्यपि पञ्च सूत्राणि, सम्प्रति सूक्ष्मबादरसमुदायगतां पञ्चसूत्रीमभिधित्सुः प्रथमत औधिकं सूक्ष्मबादरसूत्रमाह—

मू. (२६६) एएसि णं भंते ! सुहुमाणं सुहुमपुढवीकाइयाणं सुहुमआउकाइयाणं सुहुमतेउ-काइयाणं सुहुमवाउकाइयाणं सुहुमवणस्सइकाइयाणं सुहुमनिगोयाणं बायराणं बायरपुढवीकाइयाणं बायराउकाइयाणं बायरतेउकाइयाणं बायरवाउकाइयाणं बायरवणस्सइकाइयाणं पत्तेयसरीरबायर-वणस्सइकाइयाणं बायरनिगोयाणं तसकाइयाण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा बायरतसकाइया बायरतेउकाइया असंखेज्जगुणा पत्तेयसरीरबाय-वणस्सइकाइया असंखेज्जगुणा बायरनिगोया असंखेज्जगुणा बायरपुढवीकाइया असंखेज्जगुणा बायरआउकाइया असंखेज्जगुणा बायरवाउकाइया असंखेज्जगुणा सुहुमतेउकाइया असंखेज्जगुणा सुहुमपुढवीकाइया विसेसाहिया सुहुमआउकाइया विसेसाहिया सुहुमवाउकाइया विसेसाहिया सुहुमनिगोया असंखेज्जगुणा बायरवणस्सइकाइया अनंतगुणा बायरा विसेसाहिया सुहुमवणस्सइ- काइया अनंतगुणा सुहुमा विसेसाहिया ॥

एएसि णं भंते ! सुहुमअपज्जत्तयाणं सुहुमपुढवीकाइयाणं अपज्जत्तयाणं सुहुमआउकाइयाणं अपज्जत्तयाणं सुहुमतेउकाइयाणं अपज्जत्तयाणं सुहुमवाउकाइयाणं अपज्जत्तयाणं सुहुमवणस्सइ-काइयाणं अपज्जत्तयाणं सुहुमनिगोयाणं अपज्जत्तयाणं बायरअपज्जत्तयाणं बायरपुढवीकाइयाणं अपज्जत्तयाणं बायरआउकाइयाणं अपज्जत्तयाणं बायरतेउकाइयाणं अपज्जत्तयाणं बायरवाउ-काइयाणं अपज्जत्तयाणं बायरवणस्सइकाइयाणं अपज्जत्तयाणं पत्तेयसरीरबायरवणस्सइकाइयाणं

अपज्जत्तयाणं बायरनिगोयाणं अपज्जत्तयाणं बायरतसकाइयाणं अपज्जत्तयाणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा बायरतसकाइया अपज्जत्तया बायरतेउकाइया अपज्जत्तया असंखेज्ज- गुणा पत्तेयसरीरबायरवणस्सइकाइया अपज्जत्तया असंखेज्जगुणा बायरनिगोया अपज्जत्तया असंखेज्ज- गुणा बायरपुढवीकाइया अपज्जत्तया असंखेज्जगुणा बादरआउकाइया अपज्जत्तया असंखेज्जगुणा बायरवाउकाइया अपज्जत्तया असंखेज्जगुणा सुहुमतेउकाइया अपज्जत्तया असंखेज्जगुणा सुहुमपुढवी- काइया अपज्जत्तया विसेसाहिया सुहुमआउकाइया अपज्जत्तया विसेसाहिया सुहुमवाउकाइया अपज्जत्तया विसेसाहिया सुहुमनिगोया अपज्जत्तया असंखेज्जगुणा बायरवणस्सइकाइया अपज्जत्तया अनंतगुणा बायरा अपज्जत्तया विसेसाहिया सुहुमवणस्सइकाइया अपत्तज्जया असंखेज्जगुणा सुहुमा अपज्जत्तया विसेसाहिया ॥

एएसि णं भंते ! सुहुमपज्जत्तयाणं सुहुमपुढविकाइया पज्जत्तयाणंसुहुमआउकाइया पज्जत्तयाणं सुहुमतेउकाइया पज्जत्तयाणं सुहुमवाउकाइया पज्जत्तयाणं सुहुमवणस्सइकाइया पज्जत्तयाणं सुहुमनिगोया पज्जत्तयाणं बायरपज्जत्तयाणं बायरपुढवीकाइया पज्जत्तयाणं बायरआउकाइया पज्जत्तयाणं बायरतेउकाइया पज्जत्तयाणं बायरवाउकाइया पज्जत्तयाणं बायरवणस्सइकाइया पज्जत्तयाणं पत्तेयसरीरबायरवणस्सइकाइया पज्जत्तयाणं बायरनिगोया पज्जत्तयाणं बायरत-सकाइयपज्जत्तयाण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?,

गोयमा ! सव्वत्थोवा बायरतेउकाइया पज्जत्तया बायरतसकाइया पज्जत्तया असंखेज्जगुणा पत्तेयसरीरबायरवणस्सइकाइया पज्जत्तया असंखेज्जगुणा बायरनिगोया पज्जत्तया असंखेज्जगुणा बायरपुढविकाइया पज्जत्तया असंखेज्जगुणा बायरआउकाइया पज्जत्तया असंखेज्जगुणा बायरवाउ-काइया पज्जत्तया असंखेज्जगुणा सुहुमतेउकाइया पज्जत्तया असंखेज्जगुणा सुहुमपुढवीकाइया पज्जत्तया विसेसाहिया सुहुमआउकाइया पज्जत्तया विसेसाहिया सुहुमवाउकाइया पज्जत्तया विसेसाहिया सुहुमनिगोया पज्जत्तया असंखेज्जगुणा बायरवणस्सइकाइया पज्जत्तया अनंतगुणा बायरपज्जत्तया विसेसाहिया सुहुमवणस्सइकाइया पज्जत्तया असंखेज्जगुणा बायरवणस्सइकाइया पज्जत्तया अनंतगुणा बायरपज्जत्तया विसेसाहिया सुहुमवणस्सइकाइया पज्जत्तया असंखेज्जगुणा सुहुमपज्जत्तया विसेसाहिया ॥ एएसि णं भंते ! सुहुमाणं बायराण य पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा बायरा पज्जत्तया बायरअपज्जत्तया असंखेज्जगुणा सुहुमअपज्जत्तया असंखेज्जगुणा सुहुमपज्जत्तया संखेज्जगुणा ॥

एएसि णं भंते ! सुहुमपुढविकाइयाणं बायरपुढविकाइया य पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा बायरपुढविकाइया पज्जत्तया बायरपुढविकाइया अपज्जत्तया असंखेज्जगुणा सुहुमपुढवीकाइया अप्प० असं० सुहुमपुढविकाइया पज्जत्तया संखेज्जगुणा ॥ एएसि णं भंते ! सुहुमआउकाइयाणं बायरआउकाइयाण य पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा बायरआउ-काइया पज्जत्तया बायरआउकाइया अपज्जत्तया असंखेज्जगुणा सुहुमआउकाइया अपज्जत्तया असंखेज्जगुणा सुहुमआउकाइया पज्जत्तया संखेज्जगुणा ॥

एएसि णं भंते! सुहुमतेउकाइयाणं बायरतेउकाइयाण य पज्जत्ताऽपज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा! सव्वत्थोवा बायरतेउकाइया पज्जत्तया बायरतेउकाइया अपज्जत्तया असंखेज्जगुणा सुहुमतेउकाइया अपज्जत्तया असंखेज्जगुणा सुहुमतेउकाइया पज्जत्तया संखेज्जगुणा ॥ एएसि णं भंते सुहुमवाउकाइयाणं बायरवाउकाइयाण य पज्जत्तपज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा! सव्वत्थोवा बायरवाउकाइया पज्जत्तया बायरवाउकाइया अपज्जत्तया असंखेज्जगुणा सुहुमवाउकाइया अपज्जत्तया असंखेज्जगुणा सुहुमवाउकाइया पज्जत्तया संखेज्जगुणा ॥

एएसि णं भंते! सुहुमवणस्सइकाइयाणं बायरवणस्सइकायाण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा! सव्वत्थोवा बायरवणस्सइकाइया पज्जत्तया बायरवणस्सइकाइया अपज्जत्तया असंखेज्जगुणा सुहुमवणस्सइकाइया अपज्जत्तया असंखेज्जगुणा सुहुमवणस्सइकाइया पज्जत्तया संखेज्जगुणा ॥ एएसि णं भंते! सुहुमनिगोयाणं बायरनिगोयाण य पज्जत्तपज्जत्ताणं कयरे कयरेहिंतो अप्प वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा! सव्वत्थोवा बायरनिगोयया पज्जत्तया बायरनिगोयया अपज्जत्तया असंखेज्जगुणा सुहुमनिगोयया अपज्जत्तया असंखेज्जगुणा सुहुमनिगोयया पज्जत्तया संखेज्जगुणा ॥

एएसि णं भंते! सुहुमाणं सुहुमपुढवीकाइयाणं सुहुमआउकाइयाणं सुहुमतेउकाइयाणं सुहुमवाउकाइयाणं सुहुमवणस्सइकाइयाणं सुहुमनिगोयाणं बायराणं बायरपुढविकाइयाणं बायरआउकाइयाणं बायरतेउकाइयाणं बायरवाउकाइयाणं बायरवणस्सइकाइयाणं पत्तेयसरीरबायरवणस्सइकाइयाणं बायरनिगोयाणं बायरतसकाइयाण य पज्जत्तापज्जत्ताणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा! सव्वत्थोवा बादरतेउकाइया पज्जत्तया बायरतसकाइया पज्जत्तया असंखेज्जगुणा बायरतसकाइया अपज्जत्तया असंखेज्जगुणा पत्तेयसरीरबायरवणस्सइकाइया पज्जत्तया असंखेज्जगुणा बायरनिगोया पज्जत्तया असंखेज्जगुणा बायरपुढवीकाइया पज्जत्तया असंखेज्जगुणा बायरआउकाइया पज्जत्तया असंखेज्जगुणा बायरवाउकाइया पज्जत्तया असंखेज्जगुणा बायरतेउकाइया अपज्जत्तया असंखेज्जगुणा पत्तेयसरीरबायरवणस्सइकाइया अपज्जत्तया असंखेज्जगुणा बायरनिगोया अपज्जत्तया असंखेज्जगुणा बायरपुढवीकाइया अपज्जत्तया असंखेज्जगुणा बायरआउकाइया अपज्जत्तया असंखेज्जगुणा बायरवाउकाइया अपज्जत्तया असंखेज्जगुणा सुहुमतेउकाइया अपज्जत्तया असंखेज्जगुणा सुहुमपुढवीकाइया अपज्जत्तया विसेसाहिया सुहुमआउकाइया अपज्जत्तया विसेसाहिया सुहुमवाउकाइया अपज्जत्तया विसेसाहिया सुहुमतेउकाइया पज्जत्तया असंखेज्जगुणा सुहुमपुढवीकाइया पज्जत्तया विसेसाहिया सुहुमआउकाइया पज्जत्तया विसेसाहिया सुहुमवाउकाइया पज्जत्तया विसेसाहिया सुहुमनिगोया अपज्जत्तया असंखेज्जगुणा सुहुमनिगोया पज्जत्तया संखेज्जगुणा बायरवणस्सइकाइया पज्जत्तया अणंतगुणा बायरपज्जत्तया विसेसाहिया बायरवणस्सइकाइया अपज्जत्तया असंखेज्जगुणा बायर अपज्जत्तया विसेसाहिया बायरा विसेसाहिया सुहुमवणस्सइकाइया अपज्जत्तया असंखेज्जगुणा सुहुमअपज्जत्तया विसेसाहिया सुहुमवणस्सइकाइया पज्जत्तया संखेज्जगुणा सुहुमपज्जत्तया विसेसाहिया सुहुमा विसेसाहिया।

वृ. 'एएसि णं भंते !' इत्यादि, इह प्रथमं बादरगतमल्पबहुत्वं बादरपञ्चसूत्र्यां यत्प्रथमं सूत्रं तद्वद्भावनीयं यावद्बादरवायुकायपदं, तदनन्तरं यत्सूक्ष्मगतमल्पबहुत्वं तत्सूक्ष्मपञ्चसूत्र्यां यत्प्रथमं सूत्रं तद्वत्तावद् यावत्सूक्ष्मनिगोदचिन्ता, तदनन्तरं बादरवनस्पतिकायिका अनन्तगुणाः, प्रतिबादर-निगोदामनन्तानां जीवानां भावात्, तेभ्यो बादरा विशेषाधिकाः, बादरतेजःकायिकादीनामपि तत्र प्रक्षेपात्, तेभ्यः सूक्ष्मवनस्पतिकायिका असङ्ख्येयगुणाः, बादरनिगोदेभ्यः-सूक्ष्मनिगोदानाम-सङ्ख्येयगुणत्वात्, तेभ्यः सामान्यतःसूक्ष्मा विशेषाधिकाः, सूक्ष्मतेजः कायिकादीनामपि तत्र प्रक्षेपात्। गतमेकमल्पबहुत्वम्, इदानीमेतेषामेवापर्याप्तानां द्वितीयमाह–

'एएसि णं भंते !' इत्यादि, सर्वस्तोका बादरत्रसकायिका अपर्याप्ताः ततो बादरतेजः-कायिकबादरप्रत्येकवनस्पतिकायिकबादरनिगोदबादरपृथिवीकायिकबादराप्कायिक-बादरवायुकायिका अपर्याप्ताः क्रमेण यथोत्तरमसङ्ख्येयगुणाः, अत्र भावना बादरपञ्चसूत्र्यां यद्द्वितीयमपर्याप्तकसूत्रं तद्वत्कर्तव्या, ततो बादरवायुकायिकेभ्योऽसङ्ख्येयगुणाः सूक्ष्मतेजः-कायिका अपर्याप्ताः, अतिप्रभूतासङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्, तेभ्यः सूक्ष्मपृथिवीकायिक-सूक्ष्मा-प्कायिकसूक्ष्मवायुकायिकसूक्ष्मनिगोदा अपर्याप्ता यथोत्तरमसङ्ख्येयगुणाः, अत्र भावना सूक्ष्म- पञ्चसूत्र्यां यद् द्वितीयं सूत्रं तद्वत्, तेभ्यः सूक्ष्मनिगोदापर्याप्तेभ्यो बादरवनस्पतिकायिका जीवा अपर्याप्ताः अनन्तगुणाः, प्रतिबादरैकैकनिगोदमनन्तानां जीवानां सद्भावात्, तेभ्यः सामान्यतो बादरापर्याप्तका विशेषाधिकाः, बादरत्रसकायिकापर्याप्तादीनामपि तत्र प्रक्षेपात्, तेभ्यः सूक्ष्मवनस्पतिकायिका अपर्याप्ता असङ्ख्येयगुणाः, बादरनिगोदापर्याप्तेभ्यः सूक्ष्मनिगोदापर्याप्तानाम-सङ्ख्येयगुणत्वात्, तेभ्यः सामान्यतः सूक्ष्माः पर्याप्ता विशेषाधिकाः, सूक्ष्मतेजःकायिकापर्याप्तादीनामपि तत्र प्रक्षेपात्। गतं द्वितीयमल्पबहुत्वम्, अधुना एतेषामेव पर्याप्तानां तृतीयमल्पबहुत्वमाह–

'एएसि णं भंते ! सुहुमपज्जत्तयाणं' इत्यादि, सर्वस्तोकाबादरतेजःकायिकाः पर्याप्ताः तेभ्यो बादरत्रसकायिकबादरप्रत्येकवनस्पतिकायिकबादरनिगोदबादरपृथिवीकायिकबादरप्का-यिकबादरवायुकायिकाः पर्याप्ता यथोत्तरमसङ्ख्येयगुणाः, अत्र भावना बादरपञ्चसूत्र्यां यत्तृतीयं पर्याप्तसूत्रं तद्वत् कर्त्तव्या, बादरपर्याप्तवायुकायिकेभ्यः सूक्ष्मतेजःकायिकाः पर्याप्ता असङ्ख्येयगुणाः, बादरवायुकायिका हि असङ्ख्येयप्रतरप्रदेशराशिप्रमाणाः सूक्ष्मतेजःकायिकास्तु पर्याप्ता असङ्ख्येय-लोकाकाशप्रदेशराशिप्रमाणास्ततोऽसङ्ख्येयगुणाः, ततः सूक्ष्मपृथिवीकायिकसूक्ष्माप्कायिक-सूक्ष्मवायुकायिकाः, पर्याप्ताः क्रमेण यथोत्तरं विशेषाधिकाः ततः सूक्ष्मवायुकायिकेभ्यः पर्याप्तेभ्यः सूक्ष्मनिगोदाः पर्याप्तका असङ्ख्येयगुणाः, तेषामतिप्रभूततया प्रतिगोलकं भावात्, तेभ्यो बादरवन-स्पतिकायिका जीवाः पर्याप्तका अनन्तगुणाः, प्रतिबादरैरैकनिगोदमनन्तानां भावात्, तेभ्यः सामान्यतो बादराः पर्याप्तका विशेषाधिकाः, बादरतेजःकायिकादीनामपि पर्याप्तानां तत्र प्रक्षेपात्, तेभ्यः सूक्ष्मवनस्पतिकायिकाः पर्याप्ता असङ्ख्येयगुणाः, बादरनिगोदपर्याप्तेभ्यः सूक्ष्मनिगोदपर्याप्ता-नामसङ्ख्येयगुणत्वात्, तेभ्यः सामान्यतः सूक्ष्माः पर्याप्ता विशेषाधिकाः, सूक्ष्मतेजःकायिकादीनामपि पर्याप्तानां तत्र प्रक्षेपात्, । गतं तृतीयमल्पबहुत्वम्, इदानीमेतेषामेव सूक्ष्मबादरादीनां प्रत्येकं पर्याप्तापर्याप्तानां पृथग् पृथगल्पबहुत्वमाह– 'एएसि णं भंते ! सुहुमाणं बायराणं पज्जत्तापज्जत्ताणं' इत्यादि, सर्वत्रेयं भावना–सर्वस्तोका बादराः पर्याप्ताः, परिमितक्षेत्रवर्त्तित्वात्, तेभ्यो बादरा अपर्याप्ताः,

असङ्ख्येयगुणाः, एकैकबादर-पर्याप्तनिश्रया असङ्ख्येयानां बादरापर्याप्तानामुत्पादात्, तेभ्यः सूक्ष्मा अपर्याप्ताः असङ्ख्येयगुणाः, सर्वलोकापन्नतया तेषां क्षेत्रस्यासङ्ख्येयगुणत्वात्, तेभ्यः सूक्ष्मपर्याप्तकाः सङ्ख्येयगुणाः, चिरकाला- वस्थायितया तेषां सदैव सङ्ख्येयगुणतयाऽऽप्यमानत्वात् । गतं चतुर्थमल्पबहुत्वम्, इदानीमेतेषामेव सूक्ष्मसूक्ष्मपृथिवीकायिकादीनां बादरबादरपृथिवीकायिकादीना च प्रत्येकं पर्याप्तापर्याप्तानां च समुदायेन पञ्चममल्पबहुत्वमाह--

सर्वस्तोका बादरतेजःकायिकाः पर्याप्ताः, आवलिकासमयवर्गे कतिपयसमयन्यूनैरावलिकासमयैर्गुणिते यावान्समयराशिस्तावत्प्रमाणत्वात् तेषां, तेभ्यो बादरत्रसकायिकाः पर्याप्ता असङ्ख्येयगुणाः, प्रतरे यावत्यङ्गुलसङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणत्वात् तेषां, तेभ्यो बादरत्रसकायिका अपर्याप्ता असङ्ख्येयगुणाः, प्रतरे यावत्यङ्गुलासङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणत्वात् तेषां, तेभ्यः प्रत्येकबादरवनस्पतिकायिकबादरनिगोदबादरपृथिवीकायिकबादराप्कायिकबादरवायुकायिकाः पर्याप्ता यथोत्तरमसङ्ख्येयगुणाः, यद्यप्येते प्रत्येकं प्रतरे यावत्यङ्गुलासङ्ख्येयभागमात्राणि खण्डानि तावत्प्रमाणास्तथाप्यङ्गुलासङ्ख्येयभागस्यासङ्ख्येयभेदभिन्नत्वात् इत्थं यथोत्तरमसङ्ख्येयगुणत्वमभिधीयमानं न विरुध्यते, तेभ्यो बादरतेजःकायिका अपर्याप्ता असङ्ख्येयगुणाः, असङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्,

ततः प्रत्येकशरीरबादरवनस्पतिकायिकाबादरनिगोदबादरपृथिवीकायिकबादराप्कायिकबादरवायुका यिका अपर्याप्ता यथोत्तरमसङ्ख्येयगुणाः, ततो बादरवायुकायिकेभ्योऽपर्याप्तेभ्यः सूक्ष्मतेजःकायिका अपर्याप्ता असङ्ख्येयगुणाः ततः सूक्ष्मपृथिवीकायिकसूक्ष्मप्कायिकसूक्ष्मवायुकायिका अपर्याप्ता यथोत्तरंविशेषाधिकाः ततः सूक्ष्मपर्याप्ततेजःकायिकाः सङ्ख्यातगुणाः, सूक्ष्मेष्वपर्याप्तेभ्यः पर्याप्तानां ओघत एव सङ्ख्येयगुणत्वात्, ततः सूक्ष्मपृथिवीकायिकसूक्ष्माप्कायिकसूक्ष्मवायुकायिकाः पर्याप्ताः यथोत्तरं विशेषाधिकाः तेभ्यः सूक्ष्मनिगोदा अपर्याप्तका असङ्ख्येयगुणाः, तेषामतिप्राभूत्येन सर्वलोकेषु भावात्, तेभ्यः सूक्ष्मनिगोदाः पर्याप्तकाः सङ्ख्येयगुणाः, सूक्ष्मेष्वपर्याप्तेभ्यः पर्याप्तानामोघत एव सदा सङ्ख्येयगुणत्वात्, एते च बादरापर्याप्ततेजःकायिकादयः पर्याप्तसूक्ष्मनिगोदापर्यवसानाः षोडश पदार्था यद्यप्यन्यत्राविशेषेणासङ्ख्येयलोकाकाशप्रदेशप्रमाणतया संगीयन्ते तथाप्यसङ्ख्येयत्वस्यासंख्येयभेदभिन्नत्वाद् इत्थमसङ्ख्येयगुणत्वं विशेषाधिकत्वं सङ्ख्येयगुणत्वं च प्रतिपाद्यमानं न विरोधभागिति, तेभ्यः पर्याप्तसूक्ष्मनिगोदेभ्यो बादरवनस्पतिकायिकाः पर्याप्ता अनन्तगुणाः, प्रतिबादरैकैकनिगोदमनन्तानां जीवानां भावात्, तेभ्यः सामान्यतो बादराः पर्याप्ता विशेषाधिकाः, बादरपर्याप्ततेजःकायिकादीनामपि तत्र प्रक्षेपात्, तेभ्यो बादरवनस्पतिकायिका अपर्याप्तका असङ्ख्येयगुणाः, एकैकपर्याप्तबादरनिगोदनिश्रया असङ्ख्येयानां बादरनिगोदापर्याप्तानामुत्पादात्, तेभ्यः सामान्यतो बादरा अपर्याप्ता विशेषाधिकाः, बादरतेजःकायिकादीनामप्यपर्याप्तानां तत्र प्रक्षेपात्, तेभ्यः सामान्यतो बादरा विशेषाधिकाः, पर्याप्तानामपि तत्र प्रक्षेपात्, तेभ्यः सूक्ष्मवनस्पतिकायिका अपर्याप्ता असङ्ख्येयगुणाः, बादरनिगोदेभ्यः सूक्ष्मनिगोदानामपर्याप्तानामप्यसङ्ख्येयगुणत्वात्,

ततः सामान्यतः सूक्ष्मापर्याप्तका विशेषाधिकाः, सूक्ष्मपृथिवीकायिकादीनामप्यपर्याप्तानां तत्र प्रक्षेपात्, तेभ्यः सूक्ष्मवनस्पतिकायिकाः पर्याप्ताः सङ्ख्येयगुणाः, सूक्ष्मवनस्पतिकायिकाप-

र्याप्तिभ्यो हि सूक्ष्मवनस्पतिकायिकपर्याप्ताः सङ्ख्येयगुणाः, सूक्ष्मेष्वोघतोऽपर्याप्तिभ्यः पर्याप्तानां सङ्ख्येयगुणत्वात् ततः सूक्ष्मापर्याप्तिभ्योऽपि सङ्ख्येयगुणाः, विशेषाधिकत्वस्य सङ्ख्येयगुणत्वबाधनायोगात्, तेभ्यः सामान्यतः सूक्ष्माः पर्याप्ता विशेषाधिकाः, पर्याप्तसूक्ष्मपृथिवीकायिकादीनामपि तत्र प्रक्षेपात्, ततः सामान्यतः सूक्ष्माः पर्याप्तपर्याप्तविशेषणरहिता विशेषाधिकाः, अपर्याप्तानामपि तत्र प्रक्षेपात् । गतं सूक्ष्मबादरसमुदायगतं पञ्चममल्पबहुत्वं, तद्गतौ समर्थितानि पञ्चदशापि सूत्राणीति ॥ गतं कायद्वारम्, इदानीं योगद्वारमाह–

–: पदं – ३ – द्वारं – ५ :– "योगः" :–

मू. *(२६७) एएसि णं भंते ! जीवाणं सयोगीणं मणजोगीणं वइजोगीणं कायजोगीणं अयोगीण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसाहिया वा ?, गो० सव्वत्थोवा जीवा मणयोगी वययोगी असंखे० अयोगी अनंतगुणा काययोगी अनंत० सयोगी विसे० ॥*

वृ. सर्वस्तोका मनोयोगिनः, संज्ञिनः पर्याप्ता एव हि मनोयोगिनः ते च स्तोका इति, तेभ्यो वाग्योगिनोऽसङ्ख्येयगुणाः, द्वीन्द्रियादीनां वाग्योगिनां संज्ञिभ्योऽसङ्ख्यातगुणत्वात्, तेभ्योऽयोगिनोऽनन्तगुणाः, सिद्धानामनन्तत्वात्, तेभ्यः काययोगिनोऽनन्तगुणाः, वनस्पतीनामनन्तत्वात्, यद्यपि निगोदजीवानामनन्तानामेकं शरीरं तथापि तेनैकेन शरीरेण सर्वेऽप्याहारादिग्रहणं कुर्वन्तीति सर्वेषामपि काययोगित्वाश्चानन्तगुणत्वाव्याघातः तेभ्यः सामान्यतः सयोगिनो विशेषाधिकाः, द्वीन्द्रियादीनामपि वाग्योगादीनां तत्र प्रक्षेपात् ॥

गतं योगद्वारम्, इदानीं वेदद्वारमाह–

–: पदं – ३ – द्वारं – ६ :– "वेद" :–

मू. *(२६८) एएसिणं भंते! जीवाणं सवेयगाणं इत्थीवेयगाणं पुरिसवेयगाणं नपुंसकवेयगाणं अवेयगाण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गो० सव्वत्थोवा जीवा पुरिसवेयगा इत्थी० संखे० अवेयगा अनंतगुणा नपुंसक० अनंत० सवेयगा विसेसाहिया*

वृ. सर्वस्तोकाः पुरुषवेदाः, संज्ञिनामेव तिर्यग्मनुष्याणां देवानां च पुरुषवेदभावात्, तेभ्यः स्त्रीवेदाः सङ्ख्येयगुणाः, यत उक्तं जीवाभिगमे– "तिरिक्खजोणियपुरिसेहिंतो तिरिक्खजोणियइत्थीओ तिगुणीओ तिरूवाहियाओ य, तहा मणुस्सपुरिसेहिंतो मणुस्सइत्थीओ सत्तावीसगुणाओ सत्तावीसरूवुत्तराओ य, तथा देवपुरिसेहिंतो देवित्थीओ बत्तीसगुणाओ बत्तीसरूवुत्तराओ" इति, वृद्धाचार्यैरप्युक्तं–

॥ १ ॥ "तिगुणा तिरूवअहिया तिरियाणं इत्थिया मुणेयव्वा ।
सत्तावीसगुणा पुन मणुयाणं तदहिया चेव ॥
॥ २ ॥ बत्तीसगुणा बत्तीसरूवअहिया य तहय देवाणं ।
देवीओ पन्नत्ता जिनेहिं जियरागदोसेहिं ॥"

अवेदका अनन्तगुणाः, सिद्धानामनन्तत्वात्, तेभ्यो नपुंसकवेदा अनन्तगुणाः, वनस्पतिकायिकानां सिद्धेभ्योऽप्यनन्तगुणत्वात्, सामान्यतः सवेदकाः विशेषाधिकाः, स्त्रीवेदकपुरुषवेदकानामपि तत्र प्रक्षेपात्, ॥ गतं वेदद्वारम्, इदानीं कषायद्वारमाह–

–: पदं – ३ – द्वारं – ७ :– "कषाय" :–

मू. *(२६९) एएसिं णं भंते ! सकसाईणं कोहकसाईणं मानकसाईणं मायाकसाईणं*

लोहकसाईणं अकसाईण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा अकसाई मानकसाई अनंतगुणा कोहकसाई विसेसाहिया मायाकसाई विसेसाहिया लोहकसाई विसेसाहिया सकसाई विसेसाहिया ।

वृ. सर्वस्तोका अकषायिणः, सिद्धानां कतिपयानां च मनुष्याणामकषायित्वात्, तेभ्यो मानकषायिणो–मानकषाययपरिणामन्तोऽनन्तगुणाः, षट्स्वपि जीवनिकायेषु मानकषाय-परिणामस्याबाधमानत्वात्, तेभ्यः क्रोधकषायिणो विशेषाधिकाः तेभ्योऽपि मायाकषायिणो विशेषाधिकाः तेभ्योऽपि लोभकषायिणो विशेषाधिकाः, मानकषायपरिणामकालापेक्षया क्रोधादि-कषायपरिणामकालस्य यथोत्तरं विशेषाधिकतया क्रोधादिकषायाणामपि यथोत्तरं विशेषाधि-कत्वभावात्, लोभकषायिभ्यः सामान्यतः सकषायिणो विशेषाधिकाः, मानादिकषायिणामपि तत्र प्रक्षेपात्, सकषायिण इत्यत्रैवं व्युत्पत्तिः–कषायशब्देन कषायोदयः परिगृह्यते, तथा च लोके व्यवहारः–सकषायोऽयं कषायोदयवानित्यर्थः, सह कषायेण–कषायोदयेन ये वर्त्तन्ते ते सकषा- योदयाः–विपाकावस्थां प्राप्ताः स्वोदयमुपदर्शयन्तः कषायकर्मपरमाणवस्तेषु सत्सु जीवस्यावश्यं कषायोदयसम्भवात्, सकषाया विद्यन्ते येषां ते सकषायिणः कषायोदयसहिता इति तात्पर्यार्थः गतं कषायद्वारम्, इदानीं लेश्याद्वारम् –

–: पदं – ३ – दारं – ८ :– "लेश्या" :–

सू. (२७०) *एएसि णं भंते ! जीवाणं सलेसाणं किण्हलेसाणं नीललेस्साणं काउलेस्साणं तेउलेस्साणं पम्हलेस्साणं सुक्कलेस्साणं अलेस्साण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा सुक्कलेस्सा पम्हलेस्सा संखेज्जगुणा तेउलेस्सा संखेज्जगुणा अलेस्सा अनंतगुणा काउलेस्सा अनंतगुणा नीललेस्सा विसे० कण्हलेसा विसे० सलेस्सा विसे०*

वृ. सर्वस्तोकाः शुक्ललेश्याः, लान्तकादिषश्चेवानुत्तरपर्यवसानेषु वैमानिकेषु देवेषु कतिपयेषु च गर्भव्युत्क्रान्तिकेषु कर्मभूमिकेषु सङ्ख्येयवर्षायुष्केषु मनुष्येषु तिर्यक्स्त्रीपुंसेषु च कतिपयेषु सङ्ख्येयवर्षायुष्केषु तस्याः संभवात्, तेभ्यः पद्मलेश्याकाः सङ्ख्येयगुणाः, सा हि पद्मलेश्या सनत्कुमारमाहेन्द्रब्रह्मलोककल्पवासिषु देवेषु तथा प्रभूतेषु गर्भव्युत्क्रान्तिकेषु कर्मभूमिजेषु सङ्ख्येयवर्षायुष्केषु मनुष्यस्त्रीपुंसेषु तथा गर्भव्युत्क्रान्तिकतिर्यग्योनिकस्त्रीपुंसेषु सङ्ख्येयवर्षायुष्केष्व-वाप्यते, सनत्कुमारादिदेवादयश्च समुदिता लान्तकादिदेवादिभ्यः सङ्ख्येयगुणा इति भवन्ति शुक्ललेश्याकेभ्यः पद्मलेश्याकाः सङ्ख्येयगुणाः, तेभ्यस्तेजोलेश्याकाः सङ्ख्येयगुणाः, सर्वेषां सौधर्मेशानज्योतिष्कदेवानां कतिपयानां च भवनपतिव्यन्तरगर्भव्युत्क्रान्तिकतिर्यक्प ञ्चेन्द्रिय-मनुष्याणां बादरपर्याप्तैकेन्द्रियाणां च तेजोलेश्याभावात्, नन्वसङ्ख्येयगुणाः कस्मान्न भवन्ति ?, कथं भवन्तीति चेत्, उच्यते,

इह ज्योतिष्काः भवनवासिभ्योऽप्यसङ्ख्येयगुणाः किं पुनः सनत्कुमारादिदेवेभ्यः, ते च ज्योतिष्कास्तेजोलेश्याकाः तथा सौधर्मेशानकल्पदेवाश्च, ततः प्राप्नुवन्त्यसङ्ख्येयगुणाः, तदयुक्तं, वस्तुतत्त्वापरिज्ञानात्, लेश्यापदे हि गर्भव्युत्क्रान्तिकतिर्यग्योनिकानां संमूर्च्छिमपञ्चेन्द्रियतिर्यग्योनि-कानां च कृष्णलेश्याद्यल्पबहुत्वे सूत्रं वक्ष्यति–'सव्वत्थोवा गब्भवक्कंतियतिरिक्खजोणिया सुक्कलेसा तिरिक्खजोणिणीओ संखेज्जगुणाओ, पम्हलेसा गब्भवक्कंतियतिरिक्खजोणिया संखेज्जगुणा

तिरिक्खजोणिणीओ संखेज्जगुणाओ, तेउलेसागब्भवक्कंतियतिरिक्खजोणिया संखेज्जगुणा तेउलेसाओ तिरिक्खजोणिणीओ संखेज्जगुणाओ" इति, महादण्डके च तिर्यग्योनिकस्त्रीभ्यो व्यन्तरा ज्योतिष्काश्च सङ्ख्येयगुणा वक्ष्यन्ते, ततो यद्यपि भवनवासिभ्योऽप्यसङ्ख्येयगुणा ज्योतिष्काः तथापि पद्मलेश्याकेभ्यस्तेजोलेश्यकाः सङ्ख्येयगुणा एव, इदमेव तात्पर्यं–

यदि केवलान् देवानेव पद्मलेश्याधिकृत्य देवा एव तेजोलेश्याकाश्चिन्त्यन्ते ततो भवन्त्यसङ्ख्येयगुणाः यावता तिर्यक्सम्मिश्रतया पद्मलेश्याकेभ्यस्तिर्यक्सम्मिश्रा एव तेजोलेश्याकाश्चिन्त्यन्ते तिर्यञ्चश्च पद्मलेश्या अपि अतिबहवस्ततः सङ्ख्येयगुणा एव लभ्यन्ते नासङ्ख्येयगुणा इति, तेभ्योऽवलेश्याका अनन्तगुणाः, सिद्धानामप्यनन्तत्वात्, तेभ्यः कापोतलेश्या अनन्तगुणाः, वनस्पतिकायिकानामपि कापोतलेश्यायाः संभवात्, वनस्पतिकायिकानां च सिद्धेभ्योऽप्यनन्तगुणत्वात्, तेभ्योऽपि नीललेश्या विशेषाधिकाः, प्रभूततराणां नीललेश्यासंभवात्, तेभ्योऽपि कृष्णलेश्याका विशे०, प्रभूततमानां कृष्णलेश्याकत्वत्, तेभ्यः सामान्यतः सलेश्या विशे० नीललेश्याकादीनामपि तत्र प्रक्षेपात् ॥ गतं लेश्याद्वारम्, इदानीं सम्यकत्वद्वारमाह–

–: पदं – ३ – द्वारं – ९ :– "सम्यकत्वं"

मू. *(२७१) एएसि णं भंते ! जीवाणं सम्मद्दिट्ठीणं मिच्छादिट्ठीणं सम्मामिच्छादिट्ठीणं य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा सम्मामिच्छदिट्ठी सम्मदिट्ठी अनंतगुणा मिच्छादिट्ठी अनंतगुणा ।*

वृ. सर्वस्तोकाः सम्यग्मिथ्यादृष्टयः, सम्यग्मिथ्यादृष्टिपरिणामकालस्यान्तर्मुहूर्तप्रमाणतयाऽतिस्तोकत्वेन तेषां पृच्छासमये स्तोकानामेव लभ्यमानत्वात्, तेभ्यः सम्यग्दृष्टयोऽनन्तगुणाः,सिद्धानामनन्त्वात्, तेभ्योऽपि मिथ्यादृष्टयोऽननतगुणाः, वनस्पतिकायिकानांसिद्धेभ्योऽप्यनन्तगुणत्वात्, तेषां च मिथ्यादृष्टित्वादिति ॥ गतं सम्यकत्वद्वारम्, अधुना ज्ञानद्वारमाह–

–: पदं – ३ – द्वारं – १० :– "ज्ञान"

मू. *(२७२) एएसि णं भंते ! जीवाणं आभिनिबोहियनाणीणं सुयनाणीणं ओहिनाणीणं मनपज्जवनाणीणं केवलनाणीण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा गोयमा ! सव्वत्थोवा जीवा मनपज्जवनाणी ओहीनाणी असंखेज्जगुणा आभिनिबोहियनाणी सुयनाणी दोवि तुल्ला विसेसाहिया केवलनाणी अनंतगुणा ।*

एएसि णं भंते ! जीवाणं मइअन्नाणीणं सुयअन्नाणीणं विभंगणाणीय कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा विभंगनाणी मइअन्नाणी सुयअन्नाणी दोवि तुल्ला अनंतगुणा । एएसि णं भंते ! जीवाणं आभिनिबोहियनाणीणं सुयना० ओहिना० मनपज्जवनाणीणं केवलनाणीणं मइन्नाणीणं सुयअन्नाणीणं विभंगनाणीय य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गो० सव्वत्थोवा जीवा मणपज्जवनाणी ओहिनाणी असंखेज्जगुणा आभिणि सुयनाणी दोवि तुल्ला विसे० विभंगनाणी असंखेज्जगुणा केवलनाणी अनंतगुणा मइअन्नाणी सुयअन्नाणी य दोवि तुल्ला अनंतगुणा ।

वृ. सर्वस्तोका मनःपर्यवज्ञानिनः, संयतानमेवामर्षौषध्यादिऋद्धिप्राप्तानां मनःपर्यवज्ञान-

संभवात्, तेभ्योऽसङ्ख्येयगुणा अवधिज्ञानिनः, नैरयिकतिर्यक्पञ्चेन्द्रियमनुष्यदेवानामप्यवधिज्ञानसंभवात्, तेभ्य आभिनिबोधिकज्ञानिनः श्रुतज्ञानिनश्च विशेषाधिकाः, संज्ञितिर्यक्पञ्चेन्द्रियमनुष्याणामेवावधिज्ञानविकलानामपि केषाञ्चिदाभिनिबोधिकश्रुतज्ञानभावात्, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः, "जत्थ मइनाणं तत्थ सुयनाणं जत्थ सुयनाणं तत्थ मइनाणं" इति वचनात्, तेभ्यः केवलज्ञानिनोऽनन्तगुणाः, सिद्धानामनन्त्वात् ॥ उक्तं ज्ञानिना मल्पबहुत्वम्, इदानीं तत्प्रतिपक्षभूतानामज्ञानिनामल्पबहुत्वमाह–

सर्वस्तोका विभङ्गज्ञानिनः, कतिपयानामेव नैरयिकदेवतिर्यक्पञ्चेन्द्रियमनुष्याणां विभङ्गभावात्, तेभ्यो मत्यज्ञानिनः श्रुताज्ञानिनोऽनन्तगुणाः, वनस्पतीनामपि मत्यज्ञानश्रुताज्ञानभावात् तेषां चानन्तत्वात् स्वस्थाने तु परस्परंतुल्याः "जत्थ मइअन्नाणं तत्थ सुयअन्नाणं जत्थ सुयअन्नाणं तत्थ मइअन्नाणं" इति वचनात् ॥ सम्प्रत्युभयेषां ज्ञान्याज्ञानिनां समुदायेनाल्पबहुत्वमाह–

सर्वस्तोका मनःपर्यवज्ञानिनः तेभ्योऽसङ्ख्येयगुणा अवधिज्ञानिनः तेभ्य आभिनिबोधिकज्ञानिनः श्रुतज्ञानिनश्च विशेषाधिकाः, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः, अत्र भावना प्रागेवोक्ता, तेभ्योऽसङ्ख्येयगुणा विभङ्गज्ञानिनः, यस्मात्सुरगतौ निरयगतौ च सम्यग्दृष्टिभ्यो मिथ्यादृष्टयोऽसङ्ख्येयगुणाः पठ्यन्ते, देवनैरयिकाश्च सम्यग्दृष्टोऽवधिज्ञानिनो मिथ्यादृष्टो विभङ्गज्ञानिन इत्यसङ्ख्येयगुणाः, तेभ्यः केवलज्ञानिनोऽनन्तगुणाः, सिद्धानामनन्तत्वात्, तेभ्यो मत्यज्ञानिनः श्रुतज्ञानिनश्चानन्तगुणाः, वनस्पतिकायिकानां सिद्धेभ्योऽप्यनन्तत्वात्, तेषां च मत्यज्ञानिश्रुताज्ञानित्वात्, स्वस्थाने तु द्वयेऽपि परस्परं तुल्याः ॥

गतं ज्ञानद्वारम्, इदानीं दर्शनद्वारमाह–

–: पदं – ३ – द्वारं – ११ :– "दर्शनं"

मू. *(२७३) एएसि णं भंते ! जीवाणं चक्खुदंसणीणं अचक्खुदंसणीणं ओहिदंसणीणं केवलदंसणीण य कयरे कयरेहिंतो अप्पा वा जाव विसेसाहिया वा ?, गो० सव्वत्थोवा जीवा ओहिदंसणी चक्खुदंसणी असंखेज्जगुणा केवलदंसणी अनंतगुणा अचक्खुदंसणी अनंतगुणा ।*

वृ. सर्वस्तोका अवधिदर्शनिनः, देवनैरयिकाणां कतिपयानां च संज्ञिपञ्चेन्द्रियतिर्यग्मनुष्याणामवधिदर्शनभावात्, तेभ्यश्चक्षुर्दर्शनिनोऽसङ्ख्येयगुणाः, सर्वेषां देवनैरयिकगर्भजमनुष्याणां संज्ञितिर्यक्पञ्चेन्द्रियाणां असंज्ञितिर्यक्पञ्चेन्द्रियाणां चतुरिन्द्रियाणां च चक्षुर्दर्शनभावत्, तेभ्यः केवलदर्शनिनोऽनन्तगुणाः, सिद्धानामनन्त्वात्व, तेभ्योऽचक्षुर्दर्शनिनोऽनन्तगुणाः, वनस्पतिकायिकानां सिद्धभ्योऽप्यननत्वात् ॥ गतं दर्शनद्वारम्, अधुना संयतद्वारमाह–

–: पदं – ३ – द्वारं – १२ :– "संयतः"

मू. *(२७४) एएसि णं भंते ! जीवाणं संयताणं असंयताणं संजयासंजयाणं नोसंजयनोअसंजयनोसंजयासंजयाण य कयरो कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा संजया संजया संयता असंखेज्जगुणा नोसंयतानोअसंजयानोसंयतासंयता अनंतगुणा असंजया अनंतगुणा ॥*

वृ. सर्वस्तोकाः संयताः, उत्कृष्टपदेऽपि तेषां कोटीसहस्रपृथक्त्वप्रमाणतया लभ्यमानत्वात्,

"कोडिसहस्सपुहुत्तं मणुयलोए संजयाणं" इति वचनात्, तेभ्यः संयतासंयताः–देशविरता असङ्ख्येयगुणाः, तिर्यक्पञ्चेन्द्रियाणामसङ्ख्ययातानां देशविरतिसद्भावात्, तेभ्यो नोसंयतनोऽसंयत-नोसंयासंयता अनन्तगुणाः, प्रतिषेधत्रयवृत्ता हि सिद्धास्ते चानन्ता इति, तेभ्योऽसंयता अनन्त-गुणाः, वनस्पतीनां सिद्धेभ्योऽप्यनन्तत्वात् ॥ गतं संयतद्वारम्, सम्प्रत्युपयोगद्वारमाह–

–: पदं – ३ – द्वारं – १३ :– "उपयोगः"

मू. (२७५) एएसि णं भंते ! जीवाणं सागारोवउत्ताणं अनागारोवउत्ताण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसा हिया वा ?, गोयमा ! सव्वत्थोवा जीवा अनागारोवउत्ता सागारोवउत्ता संखेज्जगुणा ।

वृ. इहानाकारोपयोगकालः सर्वस्तोकः साकारोपयोगकालस्तु सङ्ख्येयगुणः ततो जीवा अप्यनाकारोपयोगोपयुक्ताः सर्वस्तोकाः, पृच्छासमये तेषां स्तोकानामेवावाप्यमानत्वात्, तेभ्यः साकारोपयोगोपयुक्ताः सङ्ख्येयगुणाः, साकारोपयोगकालस्य दीर्घतया तेषां पृच्छासमये बहूनां पर्याप्यमाणत्वात् ॥ गतमुपयोगद्वारम्, इदानीमाहारद्वारमाह–

–: पदं – ३ – द्वारं – १४ :– "आहार"

मू. (२७६) एएसि णं भंते ! जीवाणं आहारगाणं अनाहारगाण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा अनाहारगा आहारगा असंखेज्जगुणा ।

वृ. सर्वस्तोका जीवा अनाहारकाः, विग्रहगत्यापन्नादीनामेवानाहारकत्वात्, उक्तं च–

॥ १ ॥ "विग्गहगइमावन्ने केवलिणो समुहया अयोगी य ।
सिद्धा य अनाहारा सेसा आहारगा जीवा ॥"

तेभ्यः आहारका असङ्ख्येयगुणाः, ननु वनस्पतिकायिकानां सिद्धेभ्योऽप्यनन्तत्वात् तेषां चाहारकतयापि लभ्यमानत्वात् कथमनन्तगुणा न भवन्ति ?, तदयुक्तं, वस्तुतत्त्वापरिज्ञानात्, इह सूक्ष्मनिगोदाः सर्वसङ्ख्ययाप्यसङ्ख्येयाः, तत्रापयन्तर्मुहूर्तसमयराशितुल्याः सूक्ष्मनिगोदाः सर्वकालं विग्रहे वर्त्तमाना लभ्यन्ते, ततोऽनाहारका अप्यतिबहवः सकलजीवराश्यसङ्ख्येयभागतुल्या इति तेभ्यः आहारका असङ्ख्येयगुणा एव नानन्तगुणाः ॥ गतमाहारद्वारम्, इदानीं भाषकद्वारमाह–

–: पदं – ३ – द्वारं – १५ :– "भाषकः"

मू. (२७७) एएसि णं भंते ! जीवाणं भासगाणं अभासगाण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा भासगा अभासगा अनंतगुणा

वृ. सर्वस्तोका भाषकाः–भाषालब्धिसम्पन्नाः, द्वीन्द्रियादीनामेव भाषकत्वात्, अभाषका–भाषालब्धिहीना अनन्तगुणाः, वनस्पतिकायिकानामनन्तत्वात् ॥ गतं भाषकद्वारं, सम्प्रति परीत्तद्वारमाह–

–: पदं – ३ – द्वारं – १६ :– "परित्तः"

मू. (२७८) एएसि णं भंते ! जीवाणं परित्ताणं अपरित्ताण य नोपरित्तनोअपरित्ताण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा

परीत्ता नोपरीत्तानोअपरीत्ता अनंतगुणा, अपरीत्ता अनंतगुणा ।

वृ. इह परीत्ता द्विविधाः–भवपरित्ताः कायपरीताश्च, तत्र भवपरीत्ता येषां किञ्चिदूनोऽपार्धपुद्गलपरावर्त्तमात्रसंसारः, कायपरीत्ताः–प्रत्येकशरीरिणः, तत्रोभयेऽपि परीत्ताः सर्वस्तोकाः, शुक्लपाक्षिकाणां प्रत्येकशरीरिणां चाशेषजीवापेक्षयाऽस्तिकत्वात्, ततो नोपरीत्तानोअपरीत्ता अनन्तगुणाः, उभयप्रतिषेधवृत्ता हि सिद्धाः ते चानन्ता इति, तेभ्योऽपरीत्ता अनन्तगुणाः, कृष्णपाक्षिकाणां साधारणवनस्पतीनां वा सिद्धेभ्योऽप्यनन्तगुणत्वात् ॥ गतं परीत्तद्वारं, सम्प्रति पर्याप्तद्वारमाह–

–: पदं – ३, – द्वारं – १७ :– "पर्याप्तः"

मू. *(२७९) एएसि णं भंते ! जीवाणं पज्जत्ताणं अपज्जत्ताणं नोपज्जत्तानोअपज्जत्ताण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा नोपज्जत्तानोअपज्जत्तगा अपज्जत्तगा अणंतगुणा पज्जत्तगा संखिज्जगुणा ।*

वृ. सर्वस्तोका नोपर्याप्तकनोअपर्याप्तकाः, उभयप्रतिषेधवर्त्तिनो हि सिद्धाः ते चापर्याप्तकादिभ्यः सर्वस्तोका इति, तेभ्योऽपर्याप्तका अनन्तगुणाः, साधारणवनस्पतिकायिकानां सिद्धेभ्योऽप्यनन्तगुणाना सर्वकालमपर्याप्तत्वेन लभ्यमानत्वात्, तेभ्यः पर्याप्ताः सङ्ख्येयगुणाः, इह सर्वबहवो जीवाः सूक्ष्माः, सूक्ष्माश्च सर्वकालमपर्याप्तेभ्यः पर्याप्ताः सङ्ख्येयगुणा इति सङ्ख्येयगुणा उक्ताः ॥ गतं पर्याप्तद्वारं, सम्प्रति सूक्ष्मद्वारमाह–

–: पदं – ३ – द्वारं – १८ :– "सूक्ष्मं"

मू. *(२८०) एएसि णं भंते ! जीवाणं सुहुमाणं बायराणं नोसुहुमनोबायराणय कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा नोसुहुमानोबायरा बायरा अनंतगुणा सुहुमा असंखेज्जगुणा ।*

वृ. सर्वस्तोका जीवा नोसूक्ष्मनोबादराः सिद्धा इत्यर्थः, तेषां सूक्ष्मजीवराशेर्बादरजीवराशेश्चानन्तभागकल्पत्वात्, तेभ्यो बादरा अनन्तगुणाः, बादरनिगोदजीवानां सिद्धेभ्योऽप्यनन्तगुणत्वात्, तेभ्यः सूक्ष्मा असङ्ख्येयगुणाः, बादरनिगोदेभ्यः सूक्ष्मनिगोदानामसङ्ख्येयगुणत्वात् ॥ गतं सूक्ष्मद्वारम्, इदानीं संज्ञिद्वारम्–

–: पदं – ३ – द्वारं – १९ :– "संज्ञी"

मू. *(२८१) एएसि णं भंते ! जीवाणं सन्नीणं असन्नीणं नोसन्नीनोअसन्नीणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा सन्नी नोसन्नीनोअसन्नी अनंतगुणा असन्नी अणनंतगुणा ।*

वृ. सर्वस्तोकाः संज्ञिनः, समनस्कानामेव संज्ञित्वात्, तेभ्यो नोसंज्ञिनोनोअसंज्ञिनः अनन्तगुणाः, उभयप्रतिषेधवृत्ता हि सिद्धाः ते च संज्ञिभ्योऽनन्तगुणा एवेति, तेभ्योऽसंज्ञिनोऽनन्तगुणाः, वनस्पतीनां सिद्धेभ्योऽप्यनन्तगुणत्वात् ॥ गतं संज्ञिद्वारम्, इदानीं भवसिद्धिकद्वारमाह–

–: पदं – ३ – द्वारं – २० :– "भवः"

मू. *(२८२) एएसि णं भंते ! जीवाणं भवसिद्धियाणं अभवसिद्धियाणं नोभवसिद्धियानो-*

अभवसिद्धियाण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा अभवसिद्धिया नोभवसिद्धियानोअभवसिद्धिया अनंतगुणा भवसिद्धिया अनंतगुणा ।

वृ. सर्वस्तोका अभवसिद्धिकाः–अभव्याः, जघन्ययुक्तानन्तकपरिमाणत्वात्, उक्तं चानुयोगद्वारेषु–"उक्कोसए परित्तानंतए रूव पक्खित्ते जहन्नयं जुत्तानंतयं होइ, अभवसिद्धियावि तत्तिया चेवे"ति, तेभ्यो नोभवसिद्धिकनोअभवसिद्धिका अनन्तगुणाः, यत उभयप्रतिषेधवृत्तयः सिद्धाः ते चाजघन्योत्कृष्टयुक्तानन्तकपरिमाणा इत्यनन्तगुणाः, तेभ्योऽपि भवसिद्धिका अनन्तगुणाः यतो भव्यनिगोदस्यैकस्यानन्तभागकल्पाः सिद्धाः भव्यजीवराशिनिगोदाश्चासङ्ख्येया लोके इति। गतं भवसिद्धिकद्वारं, साम्प्रतमस्तिकायद्वारमाह–

–: पदं – ३ – द्वारं – २१ :– "अस्तिकायः"

मू. *(२८३) एएसि णं भंते ! धम्मत्थिकायअधम्मत्थिकायआगासत्थिकायजीवत्थिकायपोग्गलत्थिकायअद्धासमयाणं दव्वट्ठयाए कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! धम्मत्थिकाए अधम्मत्थिकाए आगासत्थिकाए एए णं तिन्निएवि तुल्ला दव्वट्ठयाए सव्वत्थोवा, जीवत्थिकाए दव्वट्ठाए अनंतगुणे, पोग्गलत्थिकाए दव्वट्ठाए अनंतगुणे, अद्धासमए दव्वट्ठयाए अनंतगुणे । एएसि णं भंते ! धम्मत्थिकायअधम्मत्थिकायआगासत्थिकायजीवत्थिकायपोग्गलत्थिकाय- अद्धासमयाणं पएसट्ठयाए कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! धम्मत्थिकाए अधम्मत्थिकाए एए णं दोवि तुल्ला पएसट्ठयाए सव्वत्थोवा, जीवत्थिकाए पएसट्ठयाए अनंतगुणे, पोग्गलत्थिकाए पएसट्ठयाए अनंतगुणे, अद्धासमए पएसट्ठयाए अनंतगुणे, आगासत्थिकाए पएसट्ठयाए अनंतगुणे ।*

एएयस्स णं भंते ! धम्मत्थिकायस्स दव्वट्ठपएसट्ठयाए कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवे एगे धम्मत्थिकाए दव्वट्ठयाए से चेव पएसट्ठयाए असंखेज्जगुणे । एयस्स णं भंते ! अधम्मत्थिकायस्स दव्वट्ठपएसट्ठयाए कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवे एगे अधम्मत्थिकाए दव्वट्ठाए से चेव पएसट्ठयाए असंखेज्जगुणे ।

एयस्स णं भंते ! आगासत्थिकायस्स दव्वट्ठपएसट्ठयाए कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवे एगे आगासत्थिकाए दव्वट्ठयाए से चेव पएसट्ठयाए अणनतगुणे । एयस्स णं भंते ! जीवत्थिकायस्स दव्वट्ठपएसट्ठयाए कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवे जीवत्थिकाए व्वट्ठयाए से चेव पएसट्ठयाए असंखेज्जगुणे,

एयस्स णं भंते ? पोग्गलत्थिकायस्स दव्वट्ठपएसट्ठयाए कयरे कयरेहिंतो अप्पा वा जाव विसेसाहिया वा ?, गोयमा ! सव्वत्थोवे पोग्गलत्थिकाए दव्वट्ठयाए ते चेव पएसट्ठयाए असंखेज्जगुणे अद्धासमये न पुच्छिज्जइ पएसाभावा । एएसि णं भंते ! धम्मत्थिकायअधम्मत्थिकायआगासत्थिकायजीवत्थिकायपोग्गलत्थिकायअद्धासमयाणं दव्वट्ठपएसट्ठयाए य कयरे कयरेहिंतो जाव विसेसाहिया वा ?, गोयमा ! धम्मत्थिकाए अधम्मत्थिकाए आगासत्थिकाए एए तिन्निवलि तुल्ला

दव्वट्ठयाए सव्वत्थोवा, धम्मत्थिकाए अधम्मत्थिकाए य एएसि णं दोण्हंवि तुल्ला पएसट्ठयाए असंखेज्जगुणा, जीवत्थिकाए दव्वट्ठयाए अणंतगुणे से चेव पएसट्ठयाए असंखेज्जगुणे, पोग्गलत्थिकाए दव्वट्ठयाए अणंतगुणे से चेव पएसट्ठयाए असंखेज्जगुणे, अद्धासमए दव्वट्ठ पएसट्ठयाए अणंतगुणे, आगासत्थिकाए पएसट्ठयाए अनंतगुणे।

वृ. धर्मास्तिकायोऽधर्मास्तिकाय आकाशा एते त्रयोऽपि द्रव्यार्थतया–द्रव्यमेवार्थो द्रव्यार्थः तस्य भावो द्रव्यार्थता तया द्रव्यरूपतया इत्यर्थः तुल्याः–समानानंन्ताः, प्रत्येकमेकसङ्ख्याकत्वात्, अत एव सर्वस्तोकाः,तेभ्यो जीवास्तिकायो द्रव्यार्थतया अन्तगुणाः, जीवानां प्रत्येकं द्रव्यत्वात् तेषां च जीवास्तिकाये अनन्तत्वात्, तस्मादपि पुद्गलास्तिकायो द्रव्यार्थतयाऽनन्तगुणः, कथमिति चेत्, उच्यते, इह परमाणुद्विप्रदेशकादीनि पृथक् पृथक् द्रव्याणि, तानि च सामान्यतस्त्रिधा, तद्यथा–प्रयोगपरिणतानि मिश्रपरिणतानि विश्रसापरिणतानि च, तत्र प्रयोगपरिणतान्यपि तावज्जीवेभ्योऽनन्तगुणानि, एकैकस्य जीवस्यानन्तैः प्रत्येकं ज्ञानावरणीयदर्शनावरणीयादिकर्मपुद्गलस्कन्धैरावेष्टितत्वात्, किं पुनः शेषाणि ?, ततः प्रयोगपरिणतेभ्यो मिश्रपरिणतान्यनन्तगुणानि, तेभ्यो विश्रसापरिणतान्यनन्तगुणानि, तथा चोक्तं प्रज्ञापनायां–''सव्वत्थोवा पुग्गला पयोगपरिणया मीसपरिणया अनंतगुणा वीससापरिणया अनंतगुणा'' इति, ततो भवति जीवास्तिकायात् पुद्गलास्तिकायो द्रव्यार्थतयाऽनन्तगुणः,

तस्मादप्यद्धासमयो द्रव्यार्थतयाऽनन्तगुणः, कथमिति चेत्, उच्यते, इहैकस्यैव परमाणोरनागते काले तत्र द्विप्रदेशिकत्रिप्रदेशकयावद्दशप्रदेशिकसङ्ख्यातप्रदेशिकासङ्ख्यातप्रदेशिकानन्तप्रदेशिकस्कन्धान्तःपरिणामितया अनन्ता भाविनः संयोगा पृथक्पृथक्कालाः केवलवेदसोपलब्धाः, यथा चैकस्य परमाणोस्तथा सर्वेषां प्रत्येकं द्विप्रदेशादिस्कन्धानां चानन्ताः संयोगाः पुरस्कृताः पृथक्पृथक्काला उपलब्धाः, सर्वेषामपि मनुष्यलोकक्षेत्रान्तर्वर्त्तितया परिणाम संभवात्, तथा क्षेत्रतोऽप्ययं परमाणुरमुष्मिन्नाकाशप्रदेशे अमुष्मिन् कालेऽवगाहिष्यते इत्येवमनन्ता एकस्य परमाणोर्भाविनः संयोगाः, यथैकस्य परमाणोस्तथा सर्वेषां परमाणूनां, तथा द्विप्रदेशकादीनामपि स्कन्धानामनन्तप्रदेशस्कन्धपर्यन्तानां प्रत्येकं तत्तदेकप्रदेशाद्यवगाहभेदतो भिन्नभिन्नकाला अनन्ता भाविनः संयोगाः, तथा कालतोऽप्ययं परमाणुरमुष्मिन्नाकाशप्रदेशे एकसमयस्थितिको द्विसमयस्थितिक इत्येवमेकस्यापि परमाणोरेकस्मिन्नाकाशप्रदेशेऽसङ्ख्येया भाविनः संयोगाः एवं सर्वेष्वपि आकाशप्रदेशेषु प्रत्येकमसङ्ख्येया भाविनः संयोगाः ततो भूयो भूयस्तेष्वाकाशप्रदेशेषु परावृत्तौ कालस्यानन्तत्वादनन्ताः कालतो भाविनः संयोगाः,

यथा चैकस्य परमाणोस्तथा सर्वेषां परमाणूनां सर्वेषां च प्रत्येकं द्विप्रदेशिकादीनां स्कन्धानां, तथा भावतोऽप्ययं परमाणुरमुष्मिन् काले एकगुणकालको भवतीत्येवमेकस्यापि परमाणोर्भिन्नभिन्नकाला अनन्ताः संयोगाः, यथा चैकस्य परमाणोस्तथा सर्वेषां परमाणूनां सर्वेषां च द्विप्रदेशिकादीनां स्कन्धानां पृथक् पृथक् अनन्ता भावतः पुरस्कृतसंयोगाः, तदेवमेकस्यापि परमाणोर्द्रव्यक्षेत्रकालभावविशेषसम्बन्धवशादनन्ता भाविनः समया उपलब्धाः, यथैकस्य परमाणोस्तथा सर्वेषां परमाणूनां सर्वेषां च प्रत्येकं द्विप्रदेशिका(दी)नां स्कन्धानां, न चैतत् परकिणामिकालवस्तव्यतिरेके परिणामिपुद्गलास्तिकायादिव्यतिरेकेचोपपद्यते, ततः सर्वमिदं तात्त्विकमवसेयं, उक्तं च–

॥१॥ "संयोगपुरस्कारश्च नाम भाविनि हि युज्यते काले ।
न हि संयोगपुरस्कारो ह्यसतां केषांचिदुपपन्नः ॥" इति,

यथा च सर्वेषां परमाणूनां सर्वेषां च द्विप्रदेशिकादीनां स्कन्धानां प्रत्येकं द्रव्यक्षेत्रकालभावविशेषसम्बन्धवशादनन्ता भाविनोऽद्धासमयाः तथा अतीता अपीति सिद्धः पुद्गलास्तिकायदनन्तगुणोऽद्धासमयो द्रव्यार्थतयेति ।

उक्तं द्रव्यार्थतया परस्परमल्पबहुत्वम्, इदानीमेतेषामेव प्रदेशार्थतया तदाह–

धर्म्मास्तिकायोऽधर्म्मास्तिकाय एतौ द्वावपि परस्परं प्रदेशार्थतया तुल्यौ, उभयोरपि लोकाकाशप्रदेशपरिमाणप्रदेशत्वात्, शेषास्तिकायाद्धासमयापेक्षया च सर्वस्तोकौ, ततो जीवास्तिकायः प्रदेशार्थतया अनन्तगुणः, जीवास्तिकाये जीवानामनन्तत्वात् एकैकस्य च जीवस्य लोकाकाशप्रदेशपरिमाणप्रदेशत्वात्, तस्मादपि पुद्गलास्तिकायः प्रदेशार्थतयाऽनन्तगुणः, कथमिति चेत्, उच्यते, इह कर्मस्कन्धप्रदेशा अपि तावत् सर्वजीवप्रदेशेभ्योऽनन्तगुणाः, एकैकस्य जीवप्रदेशस्यानन्तानन्तैः कर्मपरमाणुभिरावेष्टितपरिवेष्टितत्वात्, किं पुनः सकलपुद्गलास्तिकायप्रदेशाः ?, ततो भवति जीवास्तिकायात् पुद्गलास्तिकायः प्रदेशार्थतयाऽनन्तगुणः, तस्मादप्यद्धासमयः प्रदेशार्थतयाऽनन्तगुणः, एकैकस्य पुद्गलास्तिकायप्रदेशस्य प्रागुक्तक्रमेण तत्तद्रव्यक्षेत्रकालभावविशेषसम्बन्धवा वतोऽनन्तानामतीताद्धासमयानामनन्तानामनागतसमयानां भावात्, तस्मादाकाशास्तिकायः प्रदेशार्थतयाऽनन्तगुणः, अलोकस्य सर्वतोऽप्यनन्तताभावात् ॥ गतं प्रदेशार्थतयाऽल्पबहुत्वम्, इदानीं प्रत्येकं द्रव्यार्थप्रदेशार्थतयाऽल्पबहुत्वमाह–

सर्वस्तोको धर्म्मास्तिकायो द्रव्यार्थतया, एकत्वात्, प्रदेशार्थतयाऽसङ्ख्येयगुणः, लोकाकाशप्रदेशपरिमाणप्रदेशात्मकत्वात्, एवमधर्म्मास्तिकायसूत्रमपि भावनीयम्, आकाशास्तिकायो द्रव्यार्थतया सर्वस्तोकः, एकत्वात्, प्रदेशार्थतयाऽनन्तगुणः, अपरिमितत्वात्, जीवास्तिकायो द्रव्यार्थतया सर्वस्तोकाः, प्रदेशार्थतयाऽसङ्ख्येयगुणः, प्रतिजीवं लोकाकाशप्रदेशपरिमाणप्रदेशभावात्, तथा सर्वस्तोकः पुद्गलास्तिकायो द्रव्यार्थतया, द्रव्याणां सर्वत्रापि स्तोकत्वात्, स एव पुद्गलास्तिकायस्तत्तद्रव्यापेक्षया प्रदेशार्थतया चिन्त्यमानोऽसङ्ख्येयगुणः, ननु बहवः खलु जगत्यनन्तप्रदेशका अपि स्कन्धा विद्यन्ते ततोऽनन्तगुणाः कस्मान्न संभवन्ति ?, तदयुक्तं, वस्तुतत्त्वापरिज्ञानात्, इह हि खल्पा अनन्तप्रदेशकाः स्कन्धाः परमाण्वादयस्त्वतिबहवः, तथा च वक्ष्यति सूत्रम्–

"सव्वत्थोवा अनंतपएसिया खंधा दव्वट्ठयाए, परमाणुपोग्गला दव्वट्ठयाए अनंतगुणा, संखेज्जपएसिया खंधा दव्वट्ठयाए संखेज्जगुणा, असंखेज्जपएसिया खंधा दव्वट्ठयाए असंखेज्जगुणा" इति, ततो यदा सर्व एव पुद्गलास्तिकायः प्रदेशार्थतया चिन्त्यते तदाऽनन्तप्रदेशकानां स्कन्धानामतिस्तोकत्वात् परमाणूनां चातिबहुत्वात् तेषां च पृथक् पृथक् द्रव्यत्वात् असङ्ख्येयप्रदेशकानां च स्कन्धानां परमाण्वपेक्षयाऽसङ्ख्येयगुणत्वादसङ्ख्येयगुण एवोपपद्यते नानन्तगुण इत्यर्थः, 'अद्धासमए न पुच्छिज्जइ' इति, अद्धासमयो द्रव्यार्थप्रदेशार्थतया न पृच्छ्यते, कुतः ?

इत्याह–प्रदेशाभावात्, आह–कोऽयमद्धासमयानां द्रव्यार्थतानियमो ?, यावता प्रदेशार्थताऽपि तेषां विद्यते एव, तथाहि–यथाऽनन्तानां परमाणूनां समुदायः स्कन्धो भण्यते स च द्रव्यं

तदवयवाश्च प्रदेशाः तथेहापि सकलः कालो द्रव्यं तदवयवाश्च समयाः प्रदेशा इति, तदयुक्तं, दृष्टान्तदार्ष्टान्तिकवैषम्यात्, परमाणूनां समुदायः तदा स्कन्धो भवति यदा ते परस्परसापेक्षतया परिणमन्ते, परस्परनिरपेक्षाणां केवलपरमैणूनामिव स्कन्धत्वायोगात्, अद्धासमयास्तु परस्परनिरपेक्षा एव, वर्त्तमानसमयभावे पूर्वापरसमययोरभावात्, ततो न स्कन्धत्वपरिणामः, तथाचाद्य नाद्धासमयाः प्रदेशाः, किं तु पृथग् द्रव्याण्येवेति ॥ सम्प्रत्यमीषां धर्म्मास्तिकायादीनां सर्वेषां युगपत् द्रव्यार्थप्रदेशार्थतयाऽल्पबहुत्वमाह–

धर्म्मास्तिकायोऽधर्म्मास्तिकाय आकाशास्तिकाय एते त्रयोऽपि द्रव्यार्थतया तुल्याः सर्वस्तोकाश्च, प्रत्येकमेकसङ्ख्याकत्वात्, तेभ्यो धर्मास्तिकायोऽधर्म्मास्तिकाय एतौ द्वावपि प्रदेशार्थतयाऽसङ्ख्येयगुणौ, स्वस्थाने तु परस्परं तुल्यौ, ताभ्यां जीवास्तिकायो द्रव्यार्थतयाऽनन्तगुणः, अनन्तानां जीवद्रव्याणां भावात्, स एव जीवास्तिकायः प्रदेशार्थतयाऽसङ्ख्येयगुणः, प्रतिजीवमसङ्ख्येयानां प्रदेशानां भावात्, तस्मादपि प्रदेशार्थतया जीवास्तिकायात् पुद्गलास्तिकायो द्रव्यार्थतयाऽनन्तगुणः, प्रतिजीवप्रदेशं ज्ञानावरणीयादिकर्म्मपुद्गलस्कन्धानामप्यनन्तानां भावात्, स एव पुद्गलास्तिकायः प्रदेशार्थतयाऽसङ्ख्येयगुणः, अत्र भावना प्रागिव, तस्मादपि प्रदेशार्थतया पुद्गलास्तिकायात् अद्धासमयो द्रव्यार्थप्रदेशार्थतयाऽनन्तगुणः, अत्रापि भावना प्रागिव, तस्मादप्याकाशास्तिकायः प्रदेशार्थतया अनन्तगुणः, सर्वास्वपि दिक्षु तस्यान्ताभावात्, अद्धासमयस्य च मनुष्यक्षेत्रमात्रभावात् ॥ गतमस्तिकायद्वारम्, इदानीं चरमद्वारमाह–

–: पदं – ३ – द्वारं – २२ :– "चरम"

मू. (२८४) एएसि णं भंते ! जीवाणं चरिमाणं अचरिमाण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा अचरिमा चरिमा अनंतगुणा ।

वृ. इह येषां चरमो भवः संभवी योग्यतयाऽपि ते चरमा उच्यन्ते, ते चार्थात् भव्याः, इतरे अचरमा–अभव्याः सिद्धाश्च, उभयेषामपि चरमभवाभावात्, तत्र स्तोका अचरमाः, अभव्यानां सिद्धानां च समुदितानामप्यजघन्योत्कृष्टयुक्तानन्तकपरिमाणत्वात्, तेभ्योऽनन्तगुणाश्चरमाः, अजघन्योत्कृष्टानन्तानन्तकपरिमाणत्वात् ॥ गतं चरमद्वारम्, अधुना जीवद्वारमाह–

–: पदं – ३ – द्वारं – २३ :– "जीवः"

मू. (२८५) एएसि णं भंते ! जीवाणं पोग्गलाणं अद्धासमयाणं सव्वदव्वाणं सव्वपएसाणं सव्वपज्जवाण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा जीवा पोग्गला अनंतगुणा अद्धासमया अनंतगुणा सव्वदव्वा विसेसाहिया सव्वपएसा अनंतगुणा सव्वपज्जवा अनंतगुणा । दारं ।

वृ. सर्वस्तोका जीवाः, तेभ्यः पुद्गला अनन्तगुणाः, तेभ्योऽद्धासमया अनन्तगुणाः, अत्र भावना प्रागेव कृता, तेभ्योऽद्धासमयेभ्यः सर्वद्रव्याणि विशेषाधिकानि, कथमिति चेत्, उच्यते, इह येऽनन्तरमद्धासमयाः पुद्गलेभ्योऽनन्तगुणा उक्तास्ते प्रत्येकं द्रव्याणि ततो द्रव्यचिन्तायां तेऽपि परिगृह्यन्ते तेषु च मध्ये सर्वजीवद्रव्याणि सर्वपुद्गलद्रव्याणि धर्म्माधर्म्माकाशास्तिकायद्रव्याणि च प्रक्षिप्यन्ते तानि च समुदितान्यप्यद्धासमयानामनन्तभागकल्पानीति तेषु प्रक्षिप्तेष्वपि मनागधिकत्वं जातं इत्यद्धासमयेभ्यः सर्वद्रव्याणि विशेषाधिकानि, तेभ्यः सर्वप्रदेशा अनन्तगुणाः,

आकाशानन्तत्वात्, तेभ्यः सर्वपर्यवा अनन्तगुणाः, एकैकस्मिन्नाकाशप्रदेशेऽनन्तानामगुरुलघुपर्यायाणां भावात् ॥ गतं जीवद्वारम्, अधुना क्षेत्रद्वारमाह–

–: पदं – ३ – द्वारं – २४ :– "क्षेत्रं"

मू. (२८६) खेत्ताणुवाएणं सव्वत्थोवा जीवा उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखेज्जगुणा तेलुक्कं असंखेज्जगुणा उड्ढलोए असंखेज्जगुणा अहोलोए विसेसाहिया।

वृ. क्षेत्रस्यानुपातः–अनुसारः क्षेत्रानुपातः तेन चिन्त्यमाना जीवाः सर्वस्तोका ऊर्ध्वलोकतिर्यग्लोके, इह ऊर्ध्वलोकस्य यदधस्तनमाकाशप्रदेशप्रतरं यच्च तिर्यग्लोकस्य सर्वोपरितनमाकाशप्रदेशप्रतरमेष ऊर्ध्वलोकतिर्यग्लोकः, तथाप्रवचनप्रसिद्धेः, इयमत्र भावना–इह सामास्त्येन चतुर्दशरज्वात्मको लोकः, स च त्रिधा भिद्यते, तद्यथा–ऊर्ध्वलोकः तिर्यग्लोकोऽधोलोकश्च, रुचकाश्चैतेषां विभागः,

तथाहि–रुचकस्याधस्तान्नवयोजनशतानि रुचकस्योपरिष्टान्नवयोजनशतानि तिर्यग्लोकः, तस्य च तिर्यग्लोकस्याधस्तादधोलोकः उपरिष्टादूर्ध्वलोकः, देशोनसप्तरज्जुप्रमाण ऊर्ध्वलोकः सप्तधिकसप्तरज्जुप्रमाणोऽधोलोकः मध्येऽष्टादशयोजनशतोच्छ्रयस्तिर्यग्लोकः, तत्र रुचकसमादूभूतलभागान्नवयोजनशतानि गत्वा यज्ज्योतिश्चक्रस्योपरितनं तिर्यग्लोकसम्बन्धिन एकप्रादेशिकमाकाशप्रतरं तत्तिर्यग्लोकप्रतरं तस्य चोपरि यदेकप्रादेशिकमाकाशप्रतरं तदूर्ध्वलोकप्रतरं ते द्वे अपूर्द्धलोकतिर्यग्लोक इति व्यवहियते, तथाअनादिप्रवचनपरिभाषाप्रसिद्धेः,

तत्र वर्त्तमानाः जीवाः सर्वस्तोकाः, कथमिति चेत्, उच्यते, इह ये ऊर्द्धलोकात्तिर्यग्लोके तिर्यग्लोकादूर्ध्वलोके (च) समुत्पद्यमाना विवक्षितं प्रतरद्वयं स्पृशन्ति ये च तत्रस्था एव केचन तत्प्रतरद्वयाध्यासिनो वर्त्तन्ते ते किल विवक्षिते प्रतरद्वये वर्त्तन्ते, नान्ये, ये पुनरूर्ध्वलोकादधोलोके समुत्पद्यमानास्तत्प्रतरद्वयं स्पृशन्ति ते न गण्यन्ते, तेषां सूत्रान्तरविषयत्वात्, ततः स्तोका एवाधिकृतप्रतरद्वयवर्त्तिनो जीवाः, ननूर्ध्वलोकगतानामपि सर्वजीवानामसङ्ख्येयो भागोऽनवरतं म्रियमाणोऽवाप्यते, ते च तिर्यग्लोके समुत्पद्यमाना विवक्षितं प्रतरद्वयं स्पृशन्तीति कथमधिकृतप्रतरद्वयसंस्पर्शिनः स्तोकाः ?, तदयुक्तं, वस्तुतत्त्वापरिज्ञानात्,

तथाहि–यद्यपि नामोर्द्धलोकगतानां सर्वजीवानामसङ्ख्येयो भागोऽनवरतं म्रियमाणोऽवाप्यते तथापि न ते सर्व एव तिर्यग्लोके समुत्पद्यन्ते, प्रभूततराणामधोलोके ऊर्ध्वलोके च समुत्पादात्, ततोऽधिकृतप्रतरद्वयवर्त्तिनः सर्वस्तोका एव, तेभ्योऽधोलोकतिर्यग्लोके विशेषाधिकाः, इह यदधोलोकस्योपरितनमेकप्रादेशिकमाकाशप्रदेशप्रतरं यच्च तिर्यग्लोकस्य सर्वाधस्तनमेकप्रादेशिकमाकाशप्रदेशप्रतरमेतद्वयमप्यधोलोकतिर्यग्लोक इत्युच्यते, तथाप्रवचनप्रसिद्धेः, तत्र ये विग्रहगत्या तत्रस्थतया वा वर्त्तन्ते ते विशेषाधिकाः, कथमिति चेत्, उच्यते, इह येऽधोलोकात्तिर्यग्लोके तिर्यग्लोकाद्वाऽधोलोके ईलिकागत्या समुत्पद्यमाना अधिकृतप्रतरद्वयं स्पृशन्ति ये च तत्रस्था एव केचन तत्प्रतरद्वयमध्यासीना वर्त्तन्ते ते विवक्षितप्रतरद्वयवर्तिनो, ये पुनरधोलोकादूर्ध्वलोके समुत्पद्यमानास्तत्प्रतरद्वयं स्पृशन्ति ते न परिगृह्यन्ते, तेषां सूत्रान्तरविषयत्वात्, केवलमूर्ध्वलोकादधोलोके विशेषाधिका इत्यधोलोकात्तिर्यग्लोके समुत्पद्यमाना ऊर्ध्वलोकापेक्षया

तिर्यग्लोकवर्त्तिनश्च जीवास्तिर्यग्योनिकस्त्रीत्वेनाधोलौकिकग्रामेष्वपि च ते च तथोत्पद्यमाना यथोक्तं प्रतरद्वयं स्पृशन्ति तिर्यग्योनिकस्त्यायुःप्रतिसंवेदनाच्च तिर्यग्योनिकास्त्रियोऽपि, तथाऽधोलौकिकग्रामा योजनसहस्रावगाहाः पर्यन्तेऽर्वाक् क्वचित्प्रदेशे नवयोजनशतावगाहा अपि तत्र काश्चित्तिर्यग्योनिकस्त्रियोऽवसअथानेनापि यथोक्तप्रतरद्वयाध्यासिन्यो वर्त्तन्ते ततो भवन्ति पूर्वोक्ताभ्यः सङ्ख्येयगुणाः, ताभ्योऽधोलोके सङ्ख्येयगुणाः, यतोऽधोलौकिकग्रामाः सर्वेऽपि च समुद्रा योजनसहस्रावगाहाः ततो नवयोजनशतानामधस्तात् या वर्त्तन्ते मत्सीप्रभृतिकास्तिर्यग्योनिकस्त्रियस्ताः स्वस्थानत्वात् प्रभूता इति सङ्ख्येयगुणाः, क्षेत्रस्य सङ्ख्येयगुणत्वात्, ताभ्यस्तिर्यग्लोके सङ्ख्येयगुणाः उक्तं तिर्यग्गतिमप्यधिकृत्याल्पबहुत्वम्, इदानीं मनुष्यगतिविषयमाह–

क्षेत्रानुपातेन मनुष्याश्चिन्त्यमानास्त्रैलोक्ये–त्रैलोक्यसंस्पर्शिनः सर्वस्तोकाः, यतो ये ऊर्ध्वलोकादधोलौकिकग्रामेषु समुत्पित्सवो मारणान्तिकसमुद्घातेन समवहता भवन्ति ते केचित् समुद्घातवशाद् बहिर्निर्गतैः स्वात्मप्रदेशैस्त्रीनपि लोकान् स्पृशन्ति येऽपि चान्ये वैक्रियसमुद्घातमाहारकसमुद्घातं वा गताः प्राप्ताः तथाविधप्रयत्नविशेषात् दूरतरमूर्द्धाधोविक्षिप्तात्मप्रदेशाः ये च केवलिसमुद्घातगतास्तेऽपि त्रीन्पि लोकान् स्पृशन्ति स्तोकाश्चेति सर्वस्तोकाः,

तेभ्य ऊर्ध्वलोकतिर्यग्लोके–ऊर्ध्वलोकतिर्यग्लोकसंज्ञकप्रतरद्वयसंस्पर्शिनोऽसङ्ख्येयगुणाः, यत इह वैमानिकदेवाः शेषकायाश्च यथासंभवमूर्ध्वलोकात्तिर्यग्लोके मनुष्यत्वेन समुत्पद्यमाना यथोक्तप्रतरद्वयसंस्पर्शिनो भवन्ति विद्याधराणामपि च मन्दरादिषु गमनं तेषां च शुक्ररुधिरादिपुद्ग- लेषु संमूर्च्छिमनुष्याणामुत्पाद इति ते विद्याधरा रुधिरादिपुद्गलसम्मिश्रा यदा गच्छन्ति तदा संमूर्च्छिममनुष्या अपि यथोक्तप्रतरद्वयसंस्पर्शवन्त उपजायन्ते ते चातिबहव इत्यासङ्ख्येयगुणाः,

तेभ्योऽधोलोकतिर्यग्लोके–अधोलोकतिर्यग्लोकसंज्ञे प्रतरद्वये सङ्ख्येयगुणाः, यतोऽधोलौकिकग्रामेषु स्वभावत एव बहवो मनुष्याः, ततो ये तिर्यग्लोकात् मनुष्येभ्यः शेषकायेभ्यो वाऽधोलौकिकग्रामेषु ग्रभव्युत्क्रान्तिकमनुष्यत्वेन संमूर्च्छिममनुष्यत्वेन वा समुत्पित्सवो ये चाधोलोकादधोलौकिकग्रामरूपात् शेषाद्वा मनुष्येभ्यः शेषकायेभ्यो वा तिर्यग्लोके गर्भव्युत्क्रान्तिकमनुष्यत्वेन वा संमूर्च्छिममनुष्यत्वेन वा समुत्पत्तुकामास्ते यथोक्तं किल प्रतरद्वयं स्पृशन्ति बहुतराश्च ते तथा स्वस्थानतोऽपि केचिदधोलौकिकग्रामेषु यथोक्तप्रतरद्वयसंस्पर्शिन इति ते प्रागुक्तेभ्यः सङ्ख्येयगुणाः, तेभ्यः ऊर्ध्वलोके सङ्ख्येयगुणाः, सौमनसादिक्रीडार्थं चैत्यवन्दनिमित्तं वा प्रभूततराणां विद्याधरचारणमुनीनां भावात् तेषां च यथायोगं रुधिरादिपुद्गलयोगतः संमूर्च्छिमम- नुष्यसंभवात्, तेभ्योऽधोलोके सङ्ख्येयगुणाः, स्वस्थानत्वेन बहुत्वभावात्, तेभ्यस्तिर्यग्लोके सङ्ख्येय- गुणाः, क्षेत्रस्य सङ्ख्येयगुणत्वात् स्वस्थानत्वाच्च । सम्प्रति क्षेत्रानुपातेन मानुषीविषयमल्पबहुत्वमाह–

क्षेत्रानुपातेन मानुष्यश्चिन्त्यमानाः सर्वस्तोकाःत्रैलोक्यस्पर्शिन्यः, ऊर्ध्वलोकादधोलोके समुत्पित्सूना मारणान्तिकसमुद्घातवशविनिर्गतदूरतरात्मप्रदेशानामथवावैक्रियसमुद्घातगतानां केवलिसमुद्घातगतानां वा त्रैलोक्यसंस्पर्शनात् तासां चातिस्तोकत्वमिति सर्वस्तोकाः,

ताभ्य ऊर्ध्वलोकतिर्यग्लोके–ऊर्ध्वलोकतिर्यग्लोकसंज्ञे प्रतरद्वये सङ्ख्येयगुणाः वैमानिकदेवानां शेषकायाणां चोर्ध्वलोकात् तिर्यग्लोके मनुष्यस्त्रीत्वेनोत्पद्यमानानां तथा

तिर्यग्लोकगतमनुष्यस्त्रीणामूर्ध्वलोके समुत्पित्सूनां मारणान्तिकसमुद्घातवशात् दूरतरमूर्द्धविक्षिप्तात्मप्रदेशानामद्यापि कालमकुर्वन्तीनां यथोक्तप्रतरद्वयसंस्पर्शनभावात् तासां चोभयासामपि बहुतरत्वात्, ताभ्योऽधोलोकतिर्यग्लोके–प्रागुक्तस्वरूपे प्रतरद्वयरूपे सङ्ख्येयगुणाः, तिर्यग्लोकाद् मनुष्यस्त्रीभ्यः शेषेभ्यो वाऽधोलौकिकग्रामेषु यदिवाऽधोलौकिकग्रामरूपात् शेषाद्वा तिर्यग्लोके मनुष्यस्त्रीतेवेनोत्पित्सूनां कासाञ्चिदधोलौकिकग्रामेष्ववस्थानतोऽयथोक्तप्रतरद्वयसंस्पर्शसंभवात् तासां च प्रागुक्ताभ्योऽतिबहुत्वात्, ताभ्योऽपि ऊर्ध्वलोके सङ्ख्येयगुणाः, क्रीडार्थं चैत्यवन्दनिमित्तं वा सौमनसादिषु प्रभूततराणां विद्याधरीणां (गमन)–संभवात्, ताभ्योऽप्यधोलोके सङ्ख्येयगुणाः, स्वस्थानत्वेन तत्रापि बहुतराणां भावात्, ताभ्यस्तिर्यग्लोके सङ्ख्येयगुणाः, क्षेत्रस्य सङ्ख्येयगुणत्वात् स्वस्थानत्वाच्च । गतं मनुष्यगतिमधिकृत्याल्पबहुत्वम्, इदानीं देवगतिमधिकृत्याह–

क्षेत्रानुपातेन चिन्त्यसमाना देवाः सर्वस्तोकाः ऊर्ध्वलोके, वैमानिकानामेव तत्र भावात् तेषां चाल्पत्वात्, येऽपि भवनपतिप्रभृतयो जिनेन्द्रजन्ममहोत्सवादौ मन्दरादिषु गच्छन्ति तेऽपि स्वल्पा एवेति सर्वस्तोकाः, तेभ्य ऊर्ध्वलोकतिर्यग्लोके–ऊर्ध्वलोकतिर्यग्लोकसंज्ञे प्रतरद्वयेऽसङ्ख्येयगुणाः, तद्धि ज्योतिष्कप्रत्यासन्नमिति स्वस्थानं, तथा [illegible] मन्दरादौ सौधर्मादिकल्पगताः स्वस्थाने गमागमेन तथा ये सौधर्मादिषु देवत्वेनोत्पित्सवो देवायुः प्रतिसंवेदयमानाः स्वोत्पत्तिदेशमभिगच्छन्ति ते यथोक्तं प्रतरद्वयं स्पृशन्ति ततः सामान्येन यथोक्तप्रतरद्वयसंस्पर्शिनः परिभाव्यमाना अतिबहव इति पूर्वोक्तेभ्योऽसङ्ख्येयगुणाः, तेभ्यस्त्रैलोक्यसंस्पर्शिनः सङ्ख्येयगुणाः, यतो भवनपतिव्यन्तरज्योतिष्कवैमानिका देवाः तथाविधप्रयत्नविशेषवशतो वैक्रियसमुद्घातेन समवहताः सन्तः त्रीनपि लोकान् स्पृशन्ति ते चेत्थं समवहताः प्रागुक्तप्रतरद्वयस्पर्शिभ्यः सङ्ख्येयगुणाः केवलवेदसोपलभ्यन्ते इति सङ्ख्येयगुणाः,

तेभ्योऽधोलोकतिर्यग्लोके–अधोलोकतिर्यग्लोकसंज्ञे प्रतरद्वये वर्त्तमानाः सङ्ख्येयगुणाः, तद्धि प्रतरद्विकं भवनपतिव्यन्तरदेवानां प्रत्यासन्नतया स्वस्थानं तथा बहवो भवनपतयः स्वभवनस्थाः तिर्यग्लोकगमागमेन तथोद्वर्त्तमानाः तथा वैक्रियसमुद्घातेन समवहतास्तथा तिर्यग्लोकवर्त्तिनस्तिर्यक्पञ्चेन्द्रियमनुष्या वा भवनपतित्वेनोत्पद्यमाना भवनपत्यायुरनुभवन्तो यथोक्तप्रतरद्वयसंस्पर्शिनोऽतिबहव इति सङ्ख्येयगुणाः, तेभ्योऽधोलोके सङ्ख्येयगुणाः, भवनपतीनां स्वस्थानमितिकृत्वा, तेभ्यस्तिर्यग्लोते सङ्ख्येयगुणाः, ज्योतिष्कव्यन्तराणां स्वस्थानत्वात् । अधुना देवीरधिकृत्याल्पबहुत्वमाह– *'खेत्ताणुवाएणं' इत्यादि, सर्वं देवसूत्रमिवाविशेषेण भावनीयं ।*

तदेवमुक्तं देवविषयमौधिकमल्पबहुत्वम्, इदानीं भवनपत्यादिविशेषविषयं प्रतिपिपादयिषुः प्रथमतो भवनपतिविषयमाह–

सू. (२८८) *खेत्ताणुवाएणं सव्वत्थोवा भवणवासी देवा उड्ढलोए उड्ढलोयतिरियलोए असंखेज्जगुणा तेलोक्के संखेज्जगुणा अहोलोयतिरियलोए असंखेज्जगुणा तिरियलोए असंखेज्जगुणा अहोलोए असंखेज्जगुणा । खेत्ताणुवाएणं सव्वत्थोवाओ भवणवासिणीओ देवीओ उड्ढलोए उड्ढलोयतिरियलोए असंखेज्जगुणाओ तेलोक्के संखेज्जगुणाओ अहोलोयतिरियलोए असंखेज्जगुणाओ तिरियलोए असंखेज्जगुणाओ अहोलोए असंखेज्जगुणाओ ॥*

खेत्ताणुवाएणं सव्वत्थोवा वाणमंतरा देवा उड्ढलोए उड्ढलोयतिरियलोए असंखेज्जगुणा

तेलोक्के संखेज्जगुणा अहोलोयतिरियलोए असंखेज्जगुणा अहोलोए संखेज्जगुणा तिरियलोए संखेज्जगुणा खेत्ताणुवाएणं सव्वत्थोवाओ वाणमंतरीओ देवीओ उड्ढलोए उड्ढलोयतिरियलोए असंखेज्जगुणाओ तेलोक्के संखेज्जगुणाओ अहोलोयतिरियलोए असंखेज्जगुणाओ अहोलोए संखेज्जगुणाओ तिरियलोए संखेज्जगुणाओ ॥ खेत्ताणुवाएणं सव्वत्थोवा जोइसिया देवा उड्ढलोए उड्ढलोयतिरियलोए असंखेज्जगुणा तेलोक्के संखेज्जगुणा अहोलोयतिरियलोए असंखेज्जगुणा अहोलोए संखेज्जगुणा तिरियलोए असंखेज्जगुणा । खेत्ताणुवाएणं सव्वत्थोवाओ जोइसिणीओ देवीओ उड्ढलोए उड्ढलोयतिरियलोए असंखेज्जगुणाओ तेलोक्के संखेज्जगुणाओ अहोलोयतिरियलोए असंखेज्जगुणाओ अहोलोए संखेज्जगुणाओ तिरियलोए असंखेज्जगुणाओ ॥

खेत्ताणुवाएणं सव्वत्थोवा वेमाणिया देवा उड्ढलोयतिरियलोए तेलोक्के संखेज्जगुणा अहोलोयतिरियलोए संखि० अहोलोए संखि० तिरियलोए संखे० उड्ढलोए असंखि० खित्ताणुवाएणं सव्वत्थोवाओ वेमाणिणीओ देवीओ उड्ढलोयतिरियलोए तेलोक्के संखेज्जगुणाओ अहोलोयतिरियलोए संखेज्जगुणाओ अहोलोए संख० तिरियलोए संखेज्जगुणाओ उड्ढलोए असंखेज्जगुणाओ

वृ. क्षेत्रानुपातेन भवनवासिनो देवाश्चिन्त्यमानाः सर्वस्तोका ऊर्ध्वलोके, तथाहि–केषाञ्चिसौधर्मादिष्वपि कल्पेषु पूर्वसंगतिकनिश्रया गमनं भवति, केषाञ्चिन्मन्दरे तीर्थकरजन्ममहिमानिमित्तमञ्जनदधिमुखेष्वष्टाह्निकनिमित्तमपरेषां मन्दरादिषु क्रीडानिमित्तं गमनमेते च सर्वेऽपि स्वल्पा इति सर्वस्तोका ऊर्ध्वलोके, तेभ्य ऊर्ध्वलोकतिर्यग्लोकसंज्ञे प्रतरद्वये असङ्ख्येयगुणाः, तथमिति चेत् ?, उच्यते, इह तिर्यग्लोकस्था वैक्रियसमुद्घातेन समवहता ऊर्ध्वलोकं तिर्यग्लोकं च स्पृशन्ति तथा ये तिर्यग्लोकस्था एव मारणान्तिकसमुद्घातेन समवहता ऊर्ध्वलोके सौधर्मादिषु देवलोकेषु बादर-पर्याप्तपृथिवीकायिकतया बादरपर्याप्ताप्कायिकतया बादरपर्याप्तप्रत्येकवनस्पतिकायिकतया च शुरेषु मणिविधानादिषु स्थानेषूत्पत्तुकामा अद्यापि स्वभवायुः प्रतिसंवेदयमानाः, न पारभविकं पृथिवीकायिकाद्यायुः, द्विविधा हि मारणान्तिकसमुद्घातसमवहताः–केचित्पारभविकमायुः प्रतिसंवेदयन्ते केचिन्नेति, तथा चोक्तं प्रज्ञप्तौ–"जीवे णं भंते ! मारणंतियसमुग्घाएणं समोहए समोहणित्ता जे भविए मंदरस्स पव्वयस्स पुरच्छिमे णं बायरपुढविकाइयत्ताए उववज्जित्तए से णं भंते ! किं तत्थगए उववज्जेज्जा उयाहु पडिनियत्तित्ता उववज्जइ ?, गोयमा ! अत्थेगइए तत्थगए चेव उववज्जइ अत्थेगइए ततो पडिनियत्तित्ता दोच्चंपि मारणंतियसमुग्घाएणं समोहणति, समोहणित्ता तओ पच्छा उववज्जइ" इति, स्वभवायुःप्रतिसंवेदनाश्च ते भवनवासिन एव लभ्यन्ते, ते इत्थंभूता उत्पत्तिदेशे विक्षिप्तात्मप्रदेशदण्डाः तथोर्द्धलोके गमनागमनसप्रतरद्वयप्रत्यासन्नक्रीडास्थानतश्च यथोक्तं प्रतरद्वयं स्पृशन्ति ततः प्रागुक्तेभ्योऽसङ्ख्येयगुणाः,

–तेभ्यस्त्रैलोक्ये–त्रैलोक्यसंस्पर्शिनः सङ्ख्येयगुणाः यतो ये ऊर्ध्वलोक तिर्यक्पञ्चेन्द्रिया भवनपतित्वेनोत्पत्तुकामा ये च स्वस्थाने वैक्रियसमुद्घातेन मारणान्तिकप्रथमसमुद्घातेन वा तथाविधतीव्रप्रयत्नविशेषेण समवहतास्ते त्रैलोक्यसंस्पर्शिन इति सङ्ख्येयगुणाः, परस्थानसमवहतेभ्यः स्वस्थानसमवहतानां सङ्ख्येयगुणत्वात्, तेभ्योऽधोलोकतिर्यग्लोके–अधोलोकतिर्यग्लोकसंज्ञे प्रतरद्वयेऽसङ्ख्येयगुणाः, स्वस्थानप्रत्यासन्नतया तिर्यग्लोके गमनागमनभावतश्च

स्वस्थानस्थितक्रोधादिसमुद्घातगमनतश्च बहूनां यथोक्तप्रतरद्वयसंस्पर्शभावात्, तेभ्यस्तिर्यग्लोकेऽसङ्ख्येयगुणाः, समवसरणादौ वन्दननिमित्तं द्वीपेषु च रमणीयेषुक्रीडानिमित्तमागमनसंभवात् आगतानां च चिरकालमप्यवस्थानात्, तेभ्योऽधोलोकेऽसङ्ख्येयगुणाः, भवनवासिनामधोलोकस्य स्वस्थानत्वात्। एवं भवनवासिदेवीगतमप्यल्पबहुत्वं भावनीयं। सम्प्रति व्यन्तरगतमल्पबहुत्वमाह–

क्षेत्रानुपातेन चिन्त्यमाना व्यन्तराः सर्वस्तोका ऊर्द्धलोके, कतिपयानामेव पण्डकवनादौ तेषां भावात्, तेभ्य ऊर्ध्वलोकतिर्यग्लोके प्रतरद्वरूपेऽसङ्ख्येयगुणाः, केषांचित् स्वस्थानान्तर्वर्तितया अपरेषां स्वस्थानप्रत्यासन्नतया अन्येषां बहूनां मन्दरादिषु गमनागमनभावतो यथोक्तप्रतरद्वयसंस्पर्शात्, तेषां समुदायेन चिन्त्यमानामातिबहुत्वभावात्, तेभ्यस्त्रैलोक्ये सङ्ख्येयगुणाः, यतो लोकत्रयवर्त्तिनोऽपि व्यन्तरास्तथाविधप्रयत्नविशेषवशतो वैक्रियसमुद्घातेन समवहताः सन्तस्त्रीनपि लोकानात्मप्रदेशैः स्पृशन्ति, ते च प्रागुक्तेभ्योऽतिबहव इति सङ्ख्येयगुणाः,

तेभ्योऽधोलोकतिर्यग्लोके प्रतरद्वयरूपे असङ्ख्येयगुणाः, तद्धि बहूनां व्यन्तराणां स्वस्थानं ततस्तत्संस्पर्शिनो बहव इत्यसङ्ख्येयगुणाः, अधोलोके सङ्ख्येयगुणाः, अदोलौकिकग्रामेषु तेषां स्वस्थानभावात् बहूनामधोलोके क्रीडार्थं गमनभावात्, तेभ्यस्तिर्यग्लोके सङ्ख्येयगुणाः, तिर्यग्लोकस्य तेषां स्वस्थानत्वात्। एवं व्यन्तरदेवीविषयमप्यल्पबहुत्वं द्रष्टव्यं। सम्प्रति ज्योतिष्कविषयमल्पबहुत्वमाह–

क्षेत्रानुपातेन चिन्त्यमाना ज्योतिष्काः सर्वस्तोका ऊर्ध्वलोके, केषाञ्चिदेव मन्दरे तीर्थकरजन्म- महोत्सवनिमित्तमञ्जनदधिमुखेष्वष्टाह्निकानिमित्तं च परेषां केषाञ्चिन्मन्दरादिषु क्रीडानिमित्तं गमनसंभवात्, तेभ्य ऊर्ध्वलोकतिर्यग्लोके प्रतरद्वयरूपे असङ्ख्येयगुणाः, तद्धि प्रतरद्वयं केचित् स्वस्थानस्थिता अपि स्पृशन्ति, प्रत्यासन्नत्वात्, अपरे वैक्रियसमुद्घातसमवहताः, अन्ये ऊर्ध्वलोक- गमनागमनभावतः, ततोऽधिकृतप्रतरद्वयस्पर्शिनः पूर्वोक्तेभ्योऽसङ्ख्येयगुणाः, तेभ्यस्त्रैलोक्ये– त्रैलोक्यसंस्पर्शिनः सङ्ख्येयगुणाः, ये हि ज्योतिष्कास्तथाविधतीव्रप्रयत्नवैक्रियसमुद्घातेन समवहतास्त्रीनपि लोकान् स्वप्रदेशैः स्पृशन्ति ते स्वभावतोऽप्यतिबहव इति पूर्वोक्तेभ्यः सङ्ख्येयगुणाः, तेभ्योऽधोलोकतिर्यग्लोके प्रतरद्वये वर्त्तमाना असङ्ख्येयगुणाः, यतो बहवोऽधोलौकिक- ग्रामेषु समवसरणादिनिमित्तमधोलोके क्रीडानिमित्तं गमनागमनभावतो बहवश्चाधोलोकात् ज्योति- ष्केषु समुत्पद्यमाना यथोक्तं प्रतरद्वयं स्पृशन्ति, ततो घटन्ते पूर्वोक्तेभ्योऽसङ्ख्येयगुणाः, तेभ्यः सङ्ख्येयगुणा अधोलोके, बहूनामधोलोके क्रीडानिमित्तधोलौकिकग्रामेषु समवसरणादिषु चिरका- लावस्थानात्, तेभ्योऽसङ्ख्येयगुणास्तिर्यग्लोके, तिर्यग्लोकस्य तेषां स्वस्थानत्वात्। एवं ज्योतिष्क- देवीसूत्रमपि भावनीयं। सम्प्रति वैमानिकदेवविषयमल्पबहुत्वमाह–

'क्षेत्रानुपातेन' क्षेत्रानुसारेण चिन्त्यमाना वैमानिका देवाः सर्वस्तोकाः ऊर्ध्वलोकतिर्यग्लोके–ऊर्ध्वलोकतिर्यग्लोकसंज्ञे प्रतरद्वये, यतो येऽधोलोके तिर्यग्लोके वा वर्तमाना जीवा वैमानिकेषूत्प- द्यन्ते ये च तिर्यग्लोके वैमानिका गमनागमनं कुर्वन्ति ये च विवक्षितप्रतरद्वयाध्यासितं क्रीडास्थानं संश्रिता ये च तिर्यग्लोकस्थिता एव वैक्रियसमुद्घातं मारणान्तिकसमुद्घातं वा कुर्वाणास्तथाविधप्रय- त्नविशेषादूर्द्धमात्मप्रदेशान् निसृजन्ति ते विवक्षितं प्रतरद्वयं स्पृशन्ति ते

चाल्पे इति सर्वस्तोकाः, तेभ्यस्त्रैलोक्ये सङ्ख्येयगुणाः, कथमिति चेत् ?, उच्यते,

इह येऽधोलौकिकग्रामेषु समवसरणादिनिमित्तमधोलोके वा क्रीडानिमित्तं गताः सन्तो वैक्रियसमुद्घातं मारणान्तिकसमुद्घातं वा कुर्वाणास्तथाविधप्रयत्नविशेषाद् दूरतरमूर्द्धविक्षिप्तात्मप्रदेशदण्डा ये च वैमानिकभवादीलिकागत्या व्यवमाना अधोलौकिकग्रामेषु समुत्पद्यन्ते ते किलत्रीनपि लोकान् स्पृशन्ति बहवश्च पूर्वोक्तेभ्य इति सङ्ख्येयगुणाः, तेभ्योऽप्यधोलोकतिर्यग्लोके–अधोलोकतिर्यग्लोकसंज्ञे प्रतरद्वये सङ्ख्येयगुणाः, अधोलौकिकग्रामेषु समवसरणादौ गमनागमनभावतो ववक्षितप्रतरद्वयाध्यासितसमवसरणादौ चावस्थानतो बहूनां यथोक्तप्रतरद्वयसंस्पर्शभावात्,

–तेभ्योऽधोलोके सङ्ख्येयगुणाः, अधोलौकिकग्रामेषु बहूनां समवसरणादाववस्थानभावात्, तेभ्यस्तिर्यग्लोके सङ्ख्येयगुणाः, बहुषु समवसरणेषु बहुषु च क्रीडास्थानेषु बहूनामवस्थानभावात्, तेभ्य ऊर्ध्वलोकेऽसङ्ख्येयगुणाः, ऊर्ध्वलोकस्य स्वस्थानत्वात्, तत्र च सदैव बहुतरभावात्। एवं वैमानिकदेवीविषयं सूत्रमपि भावनीयं ॥ सम्प्रत्येकेन्द्रियादिगतमल्पबहुत्वमाह–

मू. (२८९) खेत्ताणुवाएणं सव्वत्थोवा एगिंदिया जीवा उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया। खेत्ताणुवाएणं सव्वत्थोवा एगिंदिया जीवा अपज्जत्तगा उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखेज्जगुणा उड्ढलोए असंखेज्जगुणा अहोलोए विसेसाहिया।

खेत्ताणुवाएणं सव्वत्थोवा एगिंदिया जीवा पज्जत्तगा उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया।

वृ. क्षेत्रानुपातेन चिन्त्यमाना एकेन्द्रिया जीवाः सर्वस्तोका ऊर्ध्वलोकतिर्यग्लोके–ऊर्ध्वलोकतिर्यग्लोकसंज्ञा प्रतरद्वये, यतो ये तत्रस्था एव केचन ये चोर्द्धलोकात्तिर्यग्लोके तिर्यग्लोकादूर्द्धलोके समुत्पित्सवः कृतमारणान्तिकसमुद्घातास्ते किल विवक्षितं प्रतरद्वयं स्पृशन्ति स्वल्पाश्च ते इति सर्वस्तोकाः, तेभ्योऽधोलोकतिर्यग्लोके विशेषाधिकाः, यतो ये अधोलोकात्तिर्यग्लोके तिर्यग्लोकाद्वाऽधोलोके ईलिकागत्या समुत्पद्यमाना विवक्षितं प्रतरद्वयं स्पृशन्ति तत्रस्थाश्च ऊर्ध्वलोकाद्वाधोलोके विशेषाधिकास्ततो बहवोऽधोलोकात्तिर्यग्लोके समुत्पद्यमाना अवाप्यन्ते इति विशेषाधिकाः, तेभ्यस्तिर्यग्लोकेऽसङ्ख्येयगुणाः, उक्तप्रतरद्विकक्षेत्रात्तिर्यग्लोकक्षेत्रस्यासङ्ख्येयगुणत्वात्, तेभ्यस्त्रैलोक्येऽसङ्ख्येयगुणाः, बहवो ह्यूर्ध्वलोकादयोलोके अधोलोकादूर्द्धलोके च समुत्पद्यन्ते, तेषां च मध्ये बहवो मारणान्तिकसमुद्घातवशाद्विक्षिप्तात्मप्रदेशदण्डास्त्रीनपि लोकान् स्पृशन्ति ततो भवत्यसङ्ख्येयगुणाः, तेभ्य ऊर्ध्वलोकेऽसङ्ख्येयगुणाः, उपपातक्षेत्रस्यातिबहुत्वात्, तेभ्योऽधोलोके विशेषाधिकाः, ऊर्ध्वलोकक्षेत्रादधोलोकक्षेत्रस्य विशेषाधिकत्वात्।

एवमपर्याप्तविषयं पर्याप्तविषयं च सूत्रं भावयितव्यम् ॥

अधुना द्वीन्द्रियविषयमल्पबहुत्वमाह–

मू. (२९०) खेत्ताणुवाएणं सव्वत्थोवा विइंदिया उड्ढलोए उड्ढलोयतिरियलोए असंखिज्जगुणा तेलुक्के असंखिज्जगुणा अहोलोयतिरियलोए असंखिज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए

संखिज्जगुणा। खित्ताणुवाएणं सव्वत्थोवा बेइंदिया अवज्जत्तया उड्ढलोए उड्ढलोयतिरियलोए असंखिज्ज-गुणा तेलोक्के असंखेज्जगुणा अहोलोयतिरियलोए असंखेज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए संखिज्जगुणा। खित्ताणुवाएणं सव्वत्थोवा बेइंदिया पज्जत्ता उड्ढलोए उड्ढलोयतिरियलोए असंखिज्जगुण तेलोक्के असंखि० अहोलोयतिरियलोए असंखि० अहोलोए संखि० तिरियलोए संखि० ॥

खित्ताणुवाएणं सव्वत्थोवा तेइंदिया उड्ढलोए उड्ढलोयतिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा अहोलोयतिरियलोए असंखिज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए संखिज्जगुणा खित्ताणुवाएणं सव्वत्थोवा तेइंदिया अपज्जत्तया उड्ढलोए उड्ढलोयतिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा अहोलोयतिरियलोए असंखिज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए संखिज्जगुणा खित्ताणुवाएणं सव्वत्थोवा तेइंदिया पज्जत्तया उड्ढलोए उड्ढलोयतिरियलोए असंखिज्जगुणा तेलुक्के असंखिज्जगुणा अहोलोयतिरियलोए असंखिज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए संखिज्जगुणा

खित्ताणुवाएणं सव्वत्थोवा चउरिंदिया जीवा उड्ढलोए उड्ढलोयतिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा अहोलोयतिरियलोए असंखिज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए संखिज्जगुणा। खित्ताणुवाएणं सव्वत्थोवा चउरिंदिया जीवा अपज्जत्तया उड्ढलोए उड्ढलोयतिरियलोए असंखिज्जगुणा तेलुक्के असंखिज्जगुणा अहोलोयतिरियलोए असंखिज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए संखिज्जगुणा। खित्ताणुवाएणं सव्वत्थोवा चउरिंदिया जीवा पज्जत्तया उड्ढलोए उड्ढलोयतिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा अहोलोयतिरियलोए असंखिज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए संखिज्जगुणा।

वृ. 'क्षेत्रानुपातेन' क्षेत्रानुसारेण चिन्त्यमाना द्वीन्द्रियाः सर्वस्तोका ऊर्ध्वलोके, ऊर्ध्वलोकस्यैकदेशे तेषां संभवात्, तेभ्य ऊर्ध्वलोकतिर्यग्लोके प्रतरद्वयरूपेऽसङ्ख्येयगुणाः, यतो ये ऊर्ध्वलोकात्तिर्यग्लोके तिर्यग्लोकादूर्ध्वलोके द्वीन्द्रियत्वेन समुत्पत्तुकामास्तदायुरनुभवन्त ईलिकागत्या समुत्पद्यंते ये च द्वीन्द्रिया एव तिर्यग्लोकादूर्ध्वलोके ऊर्ध्वलोकाद्वा तिर्यग्लोके द्वीन्द्रियत्वेनान्यत्वेन वा समुत्पत्तुकामाः कृतप्रथममारणान्तिकसमुद्घाताः अत एव द्वीन्द्रियायुः प्रतिसंवेदयमानाः समुद्घातवशाच्च दूरतरविक्षिप्तनिजात्मप्रदेशदण्डा ये च प्रतरद्वयाध्यासितक्षेत्रस-मासीनास्ते यथोक्तप्रतरद्वयसंस्पर्शिनः बहवश्चेति पूर्वोक्तेभ्योऽसङ्ख्येयगुणाः, तेभ्यस्त्रैलोक्येऽ-सङ्ख्येयगुणाः,

यतो द्वीन्द्रियाणां प्राचुर्येणोत्पत्तिस्थानान्यधोलोके तस्माच्चातिप्रभूतानि तिर्यग्लोके, तत्र ये द्वीन्द्रिया अधोलोकादूर्ध्वलोके द्वीन्द्रियत्वेनान्यत्वेन वा समुत्पत्तुकामाः कृतप्रथममारणान्तिक-समुद्घाताः समुद्घातवशाच्चोत्पत्तिदेशं यावत् विक्षिप्तात्मप्रदेशदण्डास्ते द्वीन्द्रियायुः प्रतिसंवेदयमानाः ये चोर्ध्वलोकादधोलोके द्वीन्द्रियाः शेषकाया वा यावत् द्वीन्द्रियत्वेन समुत्पद्यमाना द्वीन्द्रिया-युरनुभवन्ति ते त्रैलोक्यसंस्पर्शिनः ते च बहव इति पूर्वोक्तेभ्योऽसङ्ख्येयगुणाः, तेभ्योऽधोलोक-तिर्यग्लोकप्रतरद्वयरूपेऽसङ्ख्येयगुणाः, यतो येऽधोलोकात्तिर्यग्लोके तिर्यग्लोकाद्वाऽधोलोके द्वीन्द्रियत्वेन समुत्पत्तुकामास्तदायुरनुभवन्त लिकागत्या समुत्पद्यन्ते ये च द्वीन्द्रियास्तिर्यग्लोका-दधोलोके द्वीन्द्रियत्वेन शेषकायत्वेन वोत्पित्सवः कृतप्रथममारणान्तिकसमुद्घाता द्वीन्द्रियायुरनु-

भवन्तः समुद्घातवशेनोत्पत्तिदेशं यावद् विक्षिप्तात्मप्रदेशदण्डास्ते यथोक्तं प्रतरद्वयं स्पृशन्ति प्रभूताश्चेति पूर्वोक्तेभ्योऽसङ्ख्येयगुणाः,

तेभ्योऽधोलोके सङ्ख्येयगुणाः, तत्रोत्पत्तस्थानानामतिप्रचुराणां भावात्, तेभ्योऽपि तिर्यग्लोके सङ्ख्येयगुणाः, अतिप्रचुरतराणां योनिस्थानानां तत्र भावात्, यथेदमौधिकं द्वीन्द्रियसूत्रं तथा पर्याप्तापर्याप्तद्वीन्द्रियसूत्रौधिकत्रीन्द्रियपर्याप्तापर्याप्तौधिकचतुरिन्द्रियपर्याप्तापर्याप्तसूत्राणि भावनीयानि ॥ साम्प्रतमौधिकपञ्चेन्द्रियविषयमल्पबहुत्वमाह–

मू. (२९१) *खित्ताणुवाएणं सव्वत्थोवा पंचिंदिया तेलुक्के उड्ढलोयतिरियलोए संखिज्जगुणा अहोलोयतिरियलोए संखिज्जगुणा उड्ढलोए संखिज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए असंखिज्जगुणा। खित्ताणुवाएणं सव्वत्थोवा पंचिंदिया अपज्जत्तया तेलोक्के उड्ढलोयतिरियलोए संखेज्जगुणा अहोलोयतिरियलोए संखिज्जगुणा उड्ढलोए संखिज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए असंखिज्जगुणा।*

खित्ताणुवाएणं सव्वत्थोवा पंचिंदिया पज्जत्ता उड्ढलोए उड्ढलोयतिरियलोए असंखिज्जगुणा तेलुक्के संखि० अहोलोयतिरियलोए संखि० अहोलोए संखि० तिरियलोए असंखि०।

वृ. क्षेत्रानुपातेन चिन्त्यमानाः पञ्चेन्द्रियाः सर्वस्तोकास्त्रैलोक्ये–त्रैलोक्यसंस्पर्शिनः, यतो येऽलोकादूर्ध्वलोके ऊर्ध्वलोकाद्वाऽधोलोके शेषकायाः पञ्चेन्द्रियायुरनुभवन्त ईलिकागत्या समुत्पद्यन्ते ये च पञ्चेन्द्रिया ऊर्ध्वलोकादधोलोके अधोलोकादूर्ध्वलोके शेषकायत्वेन पञ्चेन्द्रियत्वेन [illegible] कृतवैक्रियसमुद्घातः [illegible] समुद्घातवशादुत्पत्तिदेश यावत् विक्षिप्तात्मप्रदेशदण्डाः पञ्चेन्द्रियायुरद्याप्यनुभवन्ति ते त्रैलोक्यसंस्पर्शिनः ते चात्र्ये इति सर्वस्तोकाः,

–तेभ्य ऊर्ध्वलोकतिर्यग्लोके प्रतरद्वयरूपे असङ्ख्येयगुणाः, प्रभूततराणामुपपातेन समुद्घातेन वा यथोक्तप्रतरद्वयसंस्पर्शसंभवात्, तेभ्योऽधोलोकतिर्यग्लोके सङ्ख्येयगुणाः, अतिप्रभूततराणामुपपातसमुद्घाताभ्यामधोलोकतिर्यग्लोकसंज्ञप्रतरद्वयसंस्पर्शभावात्, तेभ्य ऊर्ध्वलोके सङ्ख्येयगुणाः, वैमानिकानामवस्थानभावात्, तेभ्योऽधोलोके सङ्ख्येयगुणाः, वैमानिकदेवेभ्यः सङ्ख्येयगुणानां नैरयिकाणां तत्र भावात्, तेभ्यस्तिर्यग्लोकेऽसङ्ख्येयगुणाः, संमूर्च्छिमजलचरखचरादीनां व्यन्तर- ज्योतिष्काणां संमूर्च्छिममनुष्याणां तत्र भावात्। एवं पञ्चेन्द्रियापर्याप्तसूत्रमपि भावनीयं।

पञ्चेन्द्रियपर्याप्तसूत्रमिदम्–'खेत्ताणुवाएणं' इत्यादि, क्षेत्रानुपातेन चिन्त्यमानाः पञ्चेन्द्रियाः पर्याप्ताः सर्वस्तोका ऊर्ध्वलोके, प्रायो वैमानिकानामेव तत्र भावात्, तेभ्य ऊर्ध्वलोकतिर्यग्लोके प्रतरद्वयरूपेऽसङ्ख्येयगुणाः, विवक्षितप्रतरद्वयप्रत्यसन्नज्योतिष्काणां तदध्यासितक्षेत्राश्रित-व्यन्तरतिर्यक्पञ्चेन्द्रियाणां वैमानिकव्यन्तरज्योतिष्कविद्याधरचारणमुनितिर्यक्पञ्चेन्द्रियाणा-मूर्ध्वलोके तिर्यग्लोके च गमनागमने कुर्वतामधिकृतप्रतरद्वयसंस्पर्शात्, तेभ्यस्त्रैलोक्ये ये त्रैलोक्य-संस्पर्शिनः सङ्ख्येयगुणाः, कथमिति चेत्, उच्यते, यतो ये भवनपतिव्यन्तरज्योतिष्कवैमानिकाः विद्याधरा वाऽधोलोकस्थाः कृतवैक्रियसमुद्घातस्यात्विधप्रयत्नविशेषादूर्ध्वलोके विक्षिप्तात्म-प्रदेशदण्डास्ते त्रीनपि लोकान् स्पृशन्ति इति सङ्ख्येयगुणाः,

–तेभ्योऽधोलोकतिर्यग्लोके प्रतरद्वयरूपे सङ्ख्येयगुणाः, बहवो हि व्यन्तराः स्वस्थानप्रत्या-

सन्नतया भवनपतयस्तिर्यग्लोके ऊर्ध्वलोके वा व्यन्तरज्योतिष्कवैमानिका देवा अधोलौकिकग्रामेषु समवसरणादौ अधोलोके क्रीडादिनिमित्तं च गमनागमनाकरणतः तथा समुद्रेषु केचित्तिर्यक्पञ्चेन्द्रियाः स्वस्थानप्रत्यासन्नतया अपरे तदध्यासितक्षेत्राश्रिततया यथोक्तं प्रतरद्वयं स्पृशन्ति ततः सङ्ख्येयगुणाः, तेभ्योऽधोलोके सङ्ख्येयगुणाः, नैरयिकाणां भवनपतीनां च तत्रावस्थानात्, तेभ्यस्तिर्यग्लोकेऽसङ्ख्येयगुणाः, तिर्यक्पञ्चेन्द्रियमनुष्यव्यन्तरज्योतिष्काणामवस्थानात्।

तदेवमुक्तं पञ्चेन्द्रियाणामल्पबहुत्वम्, इदानीमेकेन्द्रियभेदानां पृथवीकायिकादीनां पञ्चानामौधिकपर्याप्तापर्याप्तभेदेन प्रत्येक त्रीणि त्रीण्यल्पबहुत्वान्याह–

सू. (२९२) खित्ताणुवाएणं सव्वत्थोवा पुढविकाइया उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया। खित्ताणुवाएणं सव्वत्थोवा पुढविकाइया अपज्जत्तया उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया। खित्ताणुवाएणं सव्वत्थोवा पुढविकाइया पज्जत्तया उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलुक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया॥

खित्ताणुवाएणं सव्वत्थोवा आउकाइया उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलुक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया। खित्ताणुवाएणं सव्वत्थोवा आउकाइया अपज्जत्तया उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया। खित्ताणुवाएणं सव्वत्थोवा आउकाइया पज्जत्तया उड्ढलोयतिरियोलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया॥

खित्ताणुवाएणं सव्वत्थोवा तेउकाइया उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया खित्ताणुवाएणं सव्वत्थोवा तेउकाइया अपज्जत्तया उडअढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया। खित्ताणुवाएणं सव्वत्थोवा तेउकाइया पज्जत्तया उड्ढलो यतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा उड्ढलोए असंखेज्जगुणा अहोलोए विसेसाहिया॥ खित्ताणुवाएणं सव्वत्थोवा वाउकाइया अपज्जत्तया उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलुक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया। खित्ताणुवाएणं सव्वत्थोवा वाउकाइया पज्जत्तया उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलुक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया॥

खित्ताणुवाएणं सव्वत्थोवा वणस्सइकाइया उड्ढलोयतिरियलोए अहोलोयतिरियलोए वसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए

विसेसाहिया। खित्ताणुवाएणं सव्वत्थोवा वणस्सइकाइया अपज्जत्तया उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलुक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया। खित्ताणुवाएणं सव्वत्थोवा वणस्सइकाइया पज्जत्तया उड्ढलोयतिरियलोए अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा तेलोक्के असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया।

वृ. इमानि पञ्चदशापि सूत्राणि प्रागुक्तेकेन्द्रियसूत्रवद्भावनीयानि साम्प्रतमौधिकत्रसकायापर्याप्तपर्याप्तत्रसकायसूत्राण्ह–

मू. (२९३) *खित्ताणुवाएणं सव्वत्थोवा तसकाइया तेलोक्के उड्ढलोयतिरियलोए असंखिज्जगुणा अहोलोयतिरियलोए संखिज्जगुणा उड्ढलोए संखिज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए असंखिज्जगुणा। खित्ताणुवाएणं सव्वत्थोवा तसकाइया अपज्जत्तया तेलोक्के उड्ढलोयतिरियलोए असंखिज्जगुणा अहोलोयतिरियलोए संखिज्जगुणा उड्ढलोए संखिज्जगुणा अहोलोए संखिज्जगुणा तिरियलोए असंखिज्जगुणा।*

खित्ताणुवाएणं सव्वत्थोवा तसकाइया पज्जत्तया तेलोक्के उड्ढलोयतिरियलोए असंखिज्जगुणा अहोलोयतिरियलोए संखि० उड्ढलोए संखि० अहोलोए संखि० तिरियलोए असंखि०॥

वृ. इमानि पञ्चेन्द्रियसूत्रवद् भावनीयानि। गतं क्षेत्रद्वारम्, इदानीं बन्धद्वारं वक्तव्यं– बन्धोपलक्षितं द्वारं, तदाह–

–: पदं – ३ – द्वारं – २५ :– "बन्ध"

मू. (२९४) *एएसि णं भंते! जीवाणं आउयस्स कम्मस्स बंधगाणं अबंधगाणं पज्जत्ताणं अपज्जत्ताणं सुत्ताणं जागराणं समोहयाणं असमोहयाणं सायावेयगाणं असायावेयगाणं इंदिओवउत्ताणं नोइंदिओवउत्ताणं सागारोवउत्ताणं अनागारोवउत्ताण य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा?,*

गोयमा! सव्वत्थोवा जीवा आउयस्स कम्मस्स बंधगा १ अपज्जत्तया संखेज्जगुणा २ सुत्ता संखेज्जगुणा ३ समोहया संखेज्जगुणा ४ सायावेयगा संखेज्जगुणा ५ इंदिओवउत्ता संखेज्जगुणा ६ अनागारोवउत्ता संखेज्जगुणा ७ सागारोवउत्ता संखेज्जगुणा ८ नोइंदिओवउत्ता विसेसाहिया ९ असायावेयगा विसेसाहिया १० असमोहया विसेसाहिया ११ जागरा विसेसाहिया १२ पज्जत्तया विसेसाहिया १३ आउयस्स कम्मस्स अबंधया विसेसाहिया १४।

वृ. इहायुःकर्मबन्धकाबन्धकानां पर्याप्तपर्याप्तानां सुप्तजाग्रतां समवहतासमवहतानां सातवेदकासातवेदकानां इन्द्रियोपयुक्तनोइन्द्रियोपयुक्तानां साकारोपयुक्तानाकारोपयुक्तानां समुदायेनाल्पबहुत्वं वक्तव्यं, तत्र प्रत्येकं तावत् ब्रूमः येन समुदायेन सुखेन तदवगम्यते, तत्र सर्वस्तोकाः आयुषो बन्धका अबन्धकाः सङ्ख्येयगुणाः, यतोऽनुभूयमानभवायुषः त्रिभागावशेषे पारभविकमायुर्जीवा बध्नन्ति त्रिभागत्रिभागाद्यवशेषे वा ततो द्वौ त्रिभागावबन्धकाल एकस्त्रिभागो बन्धकाल इति बन्धकेभ्योऽबन्धकाः सङ्ख्येयगुणाः।

तथा सर्वस्तोका अपर्याप्तकाः पर्याप्तकाः सङ्ख्येयगुणाः, एतच्च सूक्ष्मजीवानधिकृत्य वेदितव्यं, सूक्ष्मेषु हि बाह्यो व्याघातो न भवति ततस्तद्भावाद् बहूनां निष्पत्तिःस्तोकानामेव चानिष्पत्तिः।

तथा सर्वस्तोकाः सुप्ताः, जागराः सङ्ख्येयगुणाः, एतदपि सूक्ष्मानेकेन्द्रियानधिकृत्य वेदितव्यं, यस्मादपर्याप्ताः सुप्ता एव लभ्यन्ते, पर्याप्ता जागरा अपि, [अत्रैव च मूलटीकायां–"जम्हा अपज्जत्ता सुत्ता लब्भंति, केइ अपज्जत्तगा जेसिं संखिज्जा समया अतीता ते य थोवा इयरेऽवि थोवगा चेव सेसा, जागरा पज्जत्ता ते संखिज्जगुणा" इति] जागराः पर्याप्तस्तेन सङ्ख्येयगुणा इति।

तथा समवहताःसर्वस्तोकाः, यत इह समवहता मारणान्तिकसमुद्घातेन परिगृह्यन्ते, मारणान्तिकश्च समुद्घातो मरणकाले न शेषकालं, तत्रापि न सर्वेषामिति सर्वस्तोकाः, तेभ्योऽसमवहता असङ्ख्येयगुणाः, जीवनकालस्यातिबहुत्वात्।

तथा सर्वस्तोकाः सातवेदकाः, यत इह बहवः साधारणशरीरा अल्पे च प्रत्येकशरीरिणः, साधारणशरीराश्च बहवोऽसातवेदकाः स्वल्पाः सातवेदिनः प्रत्येकशरीरिणस्तु भूयांसः सातवेदकाः स्तोका असातवेदिनः, ततः स्तोकाः सातवेदकाः तेभ्योऽसातवेदकाः सङ्ख्येयगुणाः।

तथा सर्वस्तोका इन्द्रियोपयुक्ताःतेभ्यो नोइन्द्रियोपयुक्ताः सङ्ख्येयगुणाः,इन्द्रियोपयोगो हि प्रत्युत्पन्नार्कालविषयः ततस्तदुपयोगकालस्य स्तोकत्वात् पृच्छासमये स्तोका अवाप्यन्ते, यदा तु तमेवार्थमिन्द्रियेण दृष्ट्वाविचारयत्योघसंज्ञयाऽपि तदा नोइन्द्रियोपयुक्तः स व्यपदिश्यते ततो नोइन्द्रियोपयोगस्यातीतानागतकालविषयतया बहुकालत्वात् सङ्ख्येयगुणा नोइन्द्रियोपयुक्ताः

तथा सर्वस्तोका अनाकारोपयुक्ताः, अनाकारोपयोगकालस्य स्तोकत्वात्, साकारोपयुक्ताः सङ्ख्येयगुणाः,अनाकारोपयोगकालात् साकारोपयोगकालस्य सङ्ख्येयगुणत्वात्॥

इदानीं समुदायगतं सूत्रोक्तमल्पबहुत्वं भाव्यते–

सर्वस्तोका जीवा आयुःकर्मणो बन्धकाः, आयुर्बन्धकालस्य प्रतिनियतत्वात्, तेभ्योऽपर्याप्ताः सङ्ख्येयगुणाः, यस्मादपर्याप्ता अनुभूयमानभवत्रिभागाधवशेषायुषः पारभविकमायुर्बध्नन्ति ततो द्वौ त्रिभागावबन्धकाल एको बन्धकाल इति बन्धकालादबन्धकालःसङ्ख्येयगुणः तेन सङ्ख्येयगुणा एवापर्याप्ता आयुर्बन्धकेभ्यः, तेभ्योऽपर्याप्तेभ्य सुप्ताः सङ्ख्येयगुणाः, यस्मादपर्याप्तेषु पर्याप्तेषु च सुप्ता लभ्यन्ते, पर्याप्ताश्चापर्याप्तेभ्यः सङ्ख्येयगुणा इत्यपर्याप्तेभ्यः सुप्ताः सङ्ख्येयगुणाः, तेभ्यः समवहताःसङ्ख्येयगुणाः, बहूनां पर्याप्तेष्वपर्याप्तेषु मारणान्तिकसमुद्घातेन समवहतानां सदा लभ्यमानत्वात्, तेभ्यः सङ्ख्येयगुणाः, आयुर्बन्धकापर्याप्तसुप्तेष्वपि सातवेदकानां लभ्यमानत्वात्,

–तेभ्य इन्द्रियोपयुक्ताः सङ्ख्येयगुणाः असातवेदकानामपि इन्द्रियोपयोगस्य लभ्यमानत्वात्, तेभ्योऽनाकारोपयोगोपयुक्ताः सङ्ख्येयगुणाः,इन्द्रियोपयोगेषु नोइन्द्रियोपयोगेषु चानाकारोपयोगस्य लभ्यमानत्वात्, तेभ्यःसाकारोपयुक्ताः सङ्ख्येयगुणाः, इन्द्रियोपयोगेषु नोइन्द्रियोपयोगेषु च साकारोपयोगकालस्य बहुत्वात्, तेभ्यो नोइन्द्रियोपयोगोपयुक्ता विशेषाधिकाः, नोइन्द्रियानाकारोपयुक्तानामपि तत्र प्रक्षेपात्, अत्र विनेयजनानुग्रहार्थमसद्भावस्थापना निदर्शनमुच्यते–इह सामान्यतः किल साकारोपयुक्ता द्विनवत्यधिकं शतं ते च किल द्विधा–इन्द्रियसाकारोपयुक्ता नोइन्द्रियासाकारोपयुक्ताश्च, तत्रेन्द्रियसाकारोपयुक्ताः किलातीव स्तोका इति विंशतिसङ्ख्याः कल्प्यन्ते, शेषं द्विसप्तत्युत्तरशतं नोन्द्रियसाकारोपयुक्ताः, नोइन्द्रियानाकारोपयुक्ताश्च द्विपञ्चाशत्कल्पाः, ततः सामान्यतः साकारोपयुक्तेभ्यः इन्द्रियासाकारोपयुक्तेषु विंशतिकल्पेष्वपनीतेषु द्विपञ्चाशत्कल्पेषु अनाकारोपयुक्तेषु तेषु मध्ये प्रक्षिप्तेषु द्वे शते चतुर्विंशत्यधिके भवतः, ततः साकारोपयुक्तेभ्यो नोइन्द्रियोपयुक्ता विशेषाधिकाः, तेभ्योऽसातवेदका विशेषाधिकाः

इन्द्रियोपयुक्तानामप्यसातवेदकत्वात्, तेभ्योऽसमवहता विशेषाधिकाः, सातवेदकानामप्यसमवहतत्वभावात्, तेभ्यो जागरा विशेषाधिकाः, समवहतानामपि केषांचिज्जागरत्वात्,

तेभ्यः पर्याप्ताः विशेषाधिकाः, सुप्तानामपि केषाञ्चित्पर्याप्तत्वात्, सुप्ता हि पर्याप्ता अपि भवन्ति जागरास्तु पर्याप्ता एवेति नियमः, तेभ्योऽपि पर्याप्तेभ्यः आयुःकर्मबन्धकाः विशेषाधिकाः, अपर्याप्तानामप्यायुःकर्मबन्धकत्वभावात्, इदमेवाल्पबहुत्वं वियेनजनानुग्रहाय स्थापनाराशिभिरुपदर्श्यते—इह द्वेपङ्क्ती उपर्यधोभावेन न्यस्तेते, तत्रोपरितन्या पङ्क्तावायुःकर्मबन्धका अपर्याप्ताः सुप्ताः समवहताः सातवेदका इन्द्रियोपयुक्ताः अनाकारोपयुक्ताःक्रमण स्थाप्यन्ते, तस्या अधस्तन्यां पङ्क्तौ तेषामेवपदानामधस्तात् यथासङ्ख्यमायुरबन्धकाः पर्याप्ता जागरा असमवहता असातवेदका नोइन्द्रियोपयुक्ताः साकारोपयुक्ताः । स्थापना चेयं

आयुर्बन्धकाः १ अपर्याप्ताः २ सुप्ताः ४ समवहताः ८ सातवेदकाः १६ इन्द्रियोपयुक्ताः ३२ अनाकारोपयुक्ताः ६४ आयुरबन्धकाः २५५ पर्याप्ताः २५४ जागराः २५२ असमवहताः २४८ असातवेदकाः २४० नोइन्द्रियोपयुक्ताः २२४ साकारोपयुक्ताः १९२ ॥

अत्रोपरितन्यां पङ्क्तौ सर्वाण्यपि पदानि सङ्ख्येयगुणानि, आयुःपदं सर्वेषामाद्यमिति तत्परिमाणसङ्ख्यायमेकः स्थाप्यते, ततः शेषपदानि किल जघन्येन सङ्ख्येयेन सङ्ख्येयगुणानीति द्विगुणद्विगुणाङ्कः तेषु स्थाप्यते, तद्यथा—द्वौ चत्वारः अष्टौ षोडश द्वात्रिंशत् चतुष्षष्टिः, सर्वोऽपि जीवराशिरनन्तानन्तस्वरूपोऽप्यसत्कल्पनया षट्पञ्चाशदधिकशतद्वयपरिमाणः परिकल्प्यते, ततोऽस्माद् राशेरायुर्बन्धकाविगताः सङ्ख्याः शोधयित्वा यद्यत् शेषमवतिष्ठति तत्तदायुरबन्धकादीनां परिमाणं स्थापयितव्यं, तद्यथा—

आयुरबन्धकादिपदे द्वे शते पञ्चपञ्चाशदधिके, शेषेषु यथोक्तक्रमं द्वे शते चतुः पञ्चाशदधिके द्वे शते द्विपञ्चाशदधिके द्वे शते अष्टचत्वारिंशदधिके द्वे शते चत्वारिंशदधिके द्वे शते चतुर्विंशत्यधिके द्विनवत्यधिकं शतं, एवं च सत्युपरितनपङ्क्तिगतान्यनाकारोपयुक्तपर्यन्तानि पदानि सङ्ख्येयगुणानि द्विगुणद्विगुणा धिकत्वात्, ततः परं साकारोपयुक्तपदमपि सङ्ख्येयगुणं त्रिगुणत्वात्, शेषाणि तु नोइन्द्रियोपयुक्तादीनि प्रतिलोमं विशेषाधिकानि, द्विगुणत्वस्यापि क्वचिदभावात् ॥

तदेवं गतं बन्धद्वारम्, इदानीं पुद्गलद्वारमाह—

—: पदं — ३ — द्वारं — २६ :— "पुद्गल"

सू. (२९५) *खित्ताणुवाएणं सव्वत्थोवा पुग्गला तेलोक्के उड्ढलोयतिरियलोए अणंतगुणा अहोलोयतिरियलोए विसेसाहिया तिरियलोए असंखिज्जगुणा उड्ढलोए असंखिज्जगुणा अहोलोए विसेसाहिया ॥ दिसाणुवाएणं सव्वत्थोवा पुग्गला उड्ढदिसाए अहोलोए विसेसाहिया उत्तरपुरच्छिमेणं दाहिणपच्चत्थिमेण य दोवि तुल्ला असंखिज्जगुणा दाहिणपुरच्छिमेण उत्तरपच्चत्थिमेण य दोवि विसेसाहिया पुरच्छिमेणं असंखिज्जगुणा पच्चत्थिमेणं विसेसाहिया दाहिणेणं विसेसाहिया उत्तरेणं विसेसाहिया ॥*

खित्ताणुवाएणं सव्वत्थोवाइं दव्वाइं तेलोक्के उड्ढलोयतिरियलोए अनंतगुणाइं अहोलोयतिरियलोए विसेसाहियाइं उड्ढलोए असंखिज्जगुणाइं अहोलोए अनंकतगुणाइं तिरियलोए

संखिज्जगुणाइं ।। दिसाणुवाएणं सव्वत्थोवाइं दव्वाइं अहोदिसाए उड्ढदिसाए अनंतगुणाइं उत्तरपुरच्चअछिमेणं दाहिणपच्चत्थिमेण य दोवि तुल्लाइं असंखिज्जगुणाइं दाहिणपुरच्छिमेणं उत्तरपच्चत्थिमेण य दोवि तुल्लाइं विसेसाहियाइं पुरच्छिमेणं असंखिज्जगुणाइं पच्चत्थिमेणं विसेसाहियाइं दाहिणेण विसेसाहियाइं उत्तरेणं विसेसाहियाइं ।

वृ. इदमल्पबहुत्वं पुद्गलानां द्रव्यार्थत्वमङ्गीकृत्य व्याख्येयं, तथासम्प्रदायात्, तत्र 'क्षेत्रानुपातेन' क्षेत्रानुसारेण चिन्त्यमानाः पुद्गलाश्चलोक्ये–त्रैलोक्यसंस्पर्शिनः सर्वस्तोकाः, सर्वस्तोकानि त्रैलोक्यव्यापीनि पुद्गलद्रव्याणीति भावः, यस्मात् महास्कन्धा एव त्रैलोक्यव्यापिनः ते चाल्पा इति, तेभ्य ऊर्ध्वलोकतिर्यग्लोकेऽनन्तगुणाः, यतस्तिर्यग्लोकस्य यत्सर्वोपरितनमेकप्रादेशकं प्रतरं यच्चोर्ध्वलोकस्य सर्वाधस्तनमेकप्रादेशिकं प्रतरमेते द्वे अपि प्रतरे ऊर्ध्वलोकतिर्यग्लोक उच्यते ते चानन्ताः सङ्ख्येयप्रादेशिकाः अनन्ता असङ्ख्ययप्रादेशिका; अनन्ता अनन्तप्रादेशिकाः स्कन्धाः स्पृशन्तीति द्रव्यार्थतयाऽनन्तगुणाः, तेभ्योऽधोलोकतिर्यग्लोकेप्रागुक्तप्रकारेण प्रतरद्वयरूपे विशेषाधिकाः, क्षेत्रस्याऽऽयामविष्कम्भाभ्यां मनाग् विशेषाधिकत्वात्, तेभ्यस्तिर्यग्लोकेऽसङ्ख्येयगुणाः, क्षेत्रस्यासङ्ख्येयगुणत्वात्, तेभ्यऊर्ध्वअधलोकेऽसङ्ख्येयगुणाः, यतस्तिर्यग्लोकक्षेत्रादूर्ध्वलोकक्षेत्रसमङ्ख्येयगुणमिति, तेभ्योऽधोलोके विशेषाधिकाः, ऊर्ध्वलोकादधोलोकस्य विशेषाधिकत्वात्, देशोनसप्तरज्जुप्रमाणो ह्यूर्ध्वलोकः समधिकसप्तरज्जुप्रमाणस्त्वधोलोकः ॥

सम्प्रति दिगनुपातेनाल्पबहुत्वमाह–'दिगनुपातेन' दिगनुसारेण चिन्त्यमानाः पुद्गलाः सर्वस्तोकाः ऊर्ध्वदिशि, इह रत्नप्रभासमभूतलमेरुध्यऽष्यप्रादेशिको रुचकस्तस्माद्विनिर्गता चतुःप्रदेशा ऊर्ध्वदिग् यावल्लोकान्तस्ततस्तत्र सर्वस्तोकाः पुद्गलाः, तेभ्योऽधोदिशि विशेषाधिकाः, अधोदिगपि रुचकादेव प्रभवति चतुष्प्रदेशा यावल्लोकान्तास्तास्या विशेषाधिकत्वात् तत्र पुद्गला विशेषाधिकाः तेभ्य उत्तरपूर्वस्यां दक्षिणपश्चिमायां च प्रत्येकमसङ्ख्येयगुणाः स्वस्थाने तु परस्परं तुल्याः, यतस्ते द्वे अपि दिशौ रुचकाद्विनिर्गते मुक्तावलिसंस्थिते तिर्यग्लोकान्तमधोलोकान्तमूर्ध्वलोकान्तं पर्यवसिते, येन क्षेत्रस्यासङ्ख्येयगुणत्वात्तत्र पुद्गला असङ्ख्येयगुणाः, क्षेत्रं तु स्वस्थाने समामिति पुद्गला अपि स्वस्थाने तुल्याः, ।

–तेभ्योऽपि दक्षिणपूर्वस्यामुत्तरपश्चिमाया च प्रत्येकं विशेषाधिकाः, स्वस्थाने तु परस्परं तुल्याः, कथं विशेषाधिका इति चेत् ?, उच्यते, इह सौमनसगन्धमादनेषु सप्त सप्त कूटानि विद्युत्प्रभमाल्यवतोर्नव नव, तेषु च कूटेषु धूमिका अवश्यायादिसूक्ष्मपुद्गलाः प्रभूताः संभवन्ति ततो विशेषाधिकाः, स्वस्थाने तु क्षेत्रस्य पर्वतादेश्च समानत्वात् तुल्याः, तेभ्यः पूर्वस्यां दिशि असङ्ख्येयगुणाः, क्षेत्रस्यासङ्ख्येयगुणत्वात्, तेभ्यः पश्चिमायां विशेषाधिकाः, अधोलौकिकग्रामेषु शुषिरभावतो बहूनां पुद्गलानामवस्थानभावात्, दक्षिणेन विशेषाधिकाः, बहुभुवनशुषिरभावात्, तेभ्य उत्तरस्यां दिशि विशेषाधिकाः, यत उत्तरस्यामायामविष्कम्भाभ्यां सङ्ख्येययोजनकोटीकोटीप्रमाणं मानसं सरस्तत्र ये जलचराः पनकसेवालादयश्च सत्त्वास्ते अतिबहव इति तेषां ये तैजसकार्मणपुद्गलास्तेऽधिकाः प्राप्यन्ते इति पूर्वोक्तेभ्यो विशेषाधिकाः ॥

तदेवं पुद्गलविषयमल्पबहुत्वमुक्तम्, इदानीं सामान्यतो द्रव्यविषयं क्षेत्रानुपातेनाह–क्षेत्रानुपातेन चिन्त्यमानानि द्रव्याणि सर्वस्तोकानि त्रैलोक्ये–त्रैलोक्यसंस्पर्शानि, यतो

धर्मास्तिकायाधर्मास्तिकायाकाशास्तिकायद्रव्याणि पुद्गलास्तिकायस्य महास्कन्धा जीवास्तिकायस्य मारणान्तिकसमुद्घातोनार्तादं समवहता जीवाः त्रैलोक्यव्यापिनः ते चाल्पे इति सर्वस्तोकानि, तेभ्य ऊर्ध्वलोकतिर्यग्लोके--प्रागुक्तस्वरूपप्रतरद्वयात्मकेऽनन्तगुणानि, अनन्तैः पुद्गलद्रव्यै नन्तैर्जीवद्रव्यैस्तस्य संस्पर्शात्, तेभ्योऽलोकतिर्यग्लोके विशेषाधिकानि, ऊर्ध्वलोकतिर्यग्लोका-दधोलोकतिर्यग्लोकस्य मनाग् विशेषाधिकत्वात्, तेभ्य ऊर्ध्वलोकेऽसङ्ख्येयगुणानि, क्षेत्रस्यासङ्ख्येय-गुणत्वात्, तेभ्योऽधोलोकेऽनन्तगुणानि, कथमिति चेत् ?, उच्यते, इहाधोलौकिकग्रामेषु कालोऽस्ति, तस्य च कालस्य तत्तत्परमाणुसङ्ख्येयासङ्ख्येयमानन्त प्रादेशिकद्रव्यक्षेत्रकालभावपर्यायसम्बन्धवशात् प्रतिपरमाण्वादिद्रव्यमनन्तता ततो भवन्त्येधोएकेऽनन्तगुणानि, तेभ्यस्तिर्यग्लोके सङ्ख्येयगुणानि, अधोलौकिकग्रामप्रमाणानां खण्डानां मुष्यलोके कालद्रव्याधारभूते सङ्ख्येयत्या-नामवाप्यमानत्वात्, ॥ सम्प्रति दिगनुपातेन सामान्यतो द्रव्याणामल्पबहुत्वमाह--'दिगनुपातेन' दिगनुसारेण चिन्त्यमानानि सामान्यतो द्रव्याणि सर्वस्तोकान्यधोदिशि--प्राग्व्यावर्णितस्वरूपायां, तेभ्य ऊर्ध्वदिश्यनन्तगुणानि, किं कारणमिति चेत् ?, उच्यते, इहोर्ध्वलोके मेरोः पञ्चयोजनशतिकं स्फटिकमयं काण्डं, तत्र चन्द्रादित्यभाऽनुप्रवेशात् द्रव्याणां क्षणादिकालप्रतिभागोऽस्ति, कालस्य च प्रागुक्तनीत्या प्रतिपरमाण्वादिद्रव्यमानन्यात् तेभ्योऽनन्तगुणानि, तेभ्य उत्तरपूर्वस्यामीशान्यां दक्षिणपश्चिमायां--नैऋतकोणे इत्यर्थः असङ्ख्येयगुणानि, क्षेत्रस्याङ्ख्येयगुणत्वात्, स्वस्थाने तु द्वयान्यपि परस्परं तुल्यानि, समानक्षेत्रत्वात्,

तेभ्यो दक्षिणपूर्वस्याम्--आग्नेय्यामुत्तरपश्चिमायां--वायव्यकोणे इति भावः विशेषाधिकानि, विद्युदभ्रमाल्यवल्कूटाश्रितानां धूमिकाऽवश्यायादिश्लक्ष्णपुद्गलद्रव्याणां बहूनां संभवात्, तेभ्यः पूर्वस्यां दिश्यसङ्ख्येयगुणानि, क्षेत्रस्यासङ्ख्येयगुणत्वात्, तेभ्यः पश्चिमायां विशेषाधिकानि अधोलौकिकग्रामेषु शुषिकभावतो बहूनां पुद्गलद्रव्याणामवस्थानसंभवात्, ततो दक्षिणस्यां दिशि विशेषाधिकानि, बहुभुवनशुषिरभावात्, तत् उत्तरस्यां विशेषाधिकानि, तत्र मानससरसि जीवद्रव्याणां तदा श्रितानां तैजसकार्मणपुद्गलस्कन्धद्रव्याणां च भूयसां भावात् ॥ सम्प्रति परमाणुपुद्गलानां सङ्ख्येयप्रदेशानामसङ्ख्येयप्रदेशानामनन्तप्रदेशानां परस्परमल्पबहुत्वमाह--

मू. (२९६) एएसि णं भंते ! परमाणुपोग्गलाणं संखेज्जपएसियाणं असंखेज्जपएसियाणं अनंतपएसियाण य खंधाणं दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा अनंतपएसिया खंधा दव्वट्ठयाए परमाणुपोग्गला दव्वट्ठयाए अणंतगुणा संखेज्जपएसिया खंधा दव्वट्ठयाए संखेज्जगुणा असंखपएसिया खंधा दव्वट्ठयाए असंखेज्जगुणा पएसट्ठयाए सव्वत्थोवा अनंतपएसिया खंधा पएसट्ठयाए परमाणुपोग्गला अपएसट्ठयाए अनंतगुणा संखेज्जपएसिया खंधा पएसट्ठयाए संखेज्जगुणा असंखपएसिया खंधा पएसट्ठयाए असंखेज्जगुणा दव्वट्ठापएसट्ठयाए सव्वत्थोवा अनंतपएसिया खंधा दव्वट्ठयाए ते चेव पएसट्ठयाए अनंतगुणा परमाणुपोग्गला दव्वट्ठपएसट्ठयाए अनंतगुणा संखेज्जपएसिया खंधा दव्वट्ठाए संखेज्जगुणा ते चेव पएसट्ठयाए संखेज्जगुणा असंखेज्जपएसिया खंधा दव्वट्ठयाए असंखेज्जगुणा ते चेव पएसट्ठयाए असंखेज्जगुणा ॥

एएसिणं भंते ! एगपएसोगाढाणं संखेज्जपएसोगाढाणं असंखेज्जपएसोगाढाण य पोग्गलाणं

दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा एगपएसोगाढा पोग्गला दव्वट्ठयाए संखेज्जपएसोगाढा पोग्गला दव्वट्ठयाए संखेज्जगुणा असंखेज्जपएसोगाढा पोग्गला दव्वट्ठयाए असंखेज्जगुणा पएसट्ठयाए सव्वत्थोवा एगपएसोगाढा पोग्गला पएसट्ठयाए संखिज्जपएसोगाढा पोग्गला पएसट्ठयाए संखिज्जगुणा असंखिज्जपएसोगाढा पुग्गला पएसट्ठयाए असंखेज्जगुणा दव्वट्ठपएसट्ठयाए सव्वत्थोवा एगपएसोगाढा पुग्गला दव्वट्ठपएसट्ठयाए संखिज्जपएसोगाढा पुग्गला दव्वट्ठयाए संखिज्जगुणा ते चेव पएसट्ठयाए संखिज्जगुणा असंखिज्जपएसोगाढा पुग्गला दव्वट्ठयाए असंखिज्जगुणा ते चेव पएसट्ठयाए असंखिज्जगुणा ।

एएसि णं भंते ! एगसमयठिइयाणं० असंखिज्जसमयठिइयाणं पुग्गलाणं दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! सव्वत्थोवा एगसमयठिइया पुग्गला दव्वट्ठयाए संखिज्जसमठिइया पुग्गला दव्वट्ठयाए संखिज्जगुणा असंखिज्जसमयठिइया पुग्गला दव्वट्ठयाए असंखिज्जगुणा पएसट्ठयाए सव्वत्थोवा एगसमयठिइया पुग्गला पएसट्ठयाए संखिज्जसमयठिइया पुग्गला पएसट्ठयाए संखेज्जगुणा असंखिज्जसमयठिइया पुग्गला पएसट्ठयाए असंखेज्जगुणा दव्वट्ठपएसट्ठयाए सव्वत्थोवा एगसमयठिइया पुग्गला दव्वट्ठपएसट्ठयाए संखिज्जसमयठिइया पुग्गला दव्वट्ठयाए संखिज्जगुणा ते चेव पएसट्ठयाए संखिज्जगुणा असंखिज्जसमयठिइया पुग्गला दव्वट्ठयाए असंखिज्जगुणा ते चेव पएसट्ठयाए असंखिज्जगुणा ।

एएसि णं भंते एगगुणकालगाणं संखिज्जगुणकालगाणं असंखिज्जगुणकालगाणं अनंतगुणकालगाण य पुग्गलाणं दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गोयमा ! जहा पुग्गला तहा भाणियव्वा, एवं संखिज्जगुणकालगाणवि, एवं सेसावि वण्णगंधा रसा फासा भाणियव्वा, फासाण कक्खडमउयगुरुयलहुयाणं जहा एगपएसोगाढाणं भणियं तहा भाणियव्वं । अवसेसा फासा जहा वन्ना तहा भाणियव्वा ॥

वृ. 'एएसि णं भंते ! परमाणुपोग्गलाणं संखेज्जपएसियाणं' इत्यादि पाठसिद्धं, नवरमात्राल्पबहुत्वभावनायां सर्वत्र तथास्वाभाव्यं कारणं वाच्यं । सम्प्रत्येतेषामेव क्षेत्रप्राधान्येनाल्पबहुत्वमाह-

इह क्षेत्राधिकारतः क्षेत्रस्य प्राधान्यात् परमाणुकाद्यनन्ताणुकस्कन्धा अपि विवक्षितैकप्रदेशावगाढा आधाराधेययोरभेदोपचारादेकद्रव्यत्वेन व्यवह्रियन्ते, ते इत्थभूता एकप्रदेशावगाढाः पुद्गलाः -पुद्गलद्रव्याणि सर्वस्तोकानि, लोकाकाशप्रदेशप्रमाणानीत्यर्थः, न हि स कश्चिदेवंभूत आकाशप्रदेशोऽस्ति य एकप्रदेशावगाहनपरिणामपरिणतानां परमाण्वादीनामवकाशदानपरिणामेन परिणतो न वर्त्तते इति,

-तेभ्यः सङ्ख्येयप्रदेशावगाढाः पुद्गला द्रव्यार्थतया सङ्ख्येयगुणाः, कथमिति चेत् ?, उच्यते, इहापि क्षेत्रस्य प्राधान्यात् द्व्यणुकाद्यनन्ताणुकस्कन्धा द्विप्रदेशावगाढा एकद्रव्यत्वेन विवक्ष्यन्ते, तानि च तथाभूतानि पुद्गलद्रव्याणि पूर्वोक्तेभ्यः सङ्ख्येयगुणानि, तथाहि- सर्वलोकप्रदेशास्तत्त्व-तोऽसङ्ख्येया अपि असत्कल्पनया दश परिकल्प्यन्ते, ते च प्रत्येकचिन्तायां दशैवेति दश एकप्रदेशावगाढानि पुद्गलद्रव्याणि लब्धानि, तेष्वेव च दशसु प्रदेशेषु

अन्यग्रहणान्यमोक्षणद्वारेण बहवो द्विकसंयोगा लभ्यन्ते इति भवन्त्येकप्रदेशावगाढेभ्यो द्विप्रदेशावगाढानि पुद्गलद्रव्याणि सङ्ख्येयगुणानि एवं तेभ्योऽपि त्रिप्रदेशावगाढानि एवमुत्तरोत्तरं यावदुत्कृष्टसङ्ख्येयप्रदेशावगाढानि, ततः स्थितमेतत्—एकप्रदेशावगाढेभ्यः सङ्ख्येयप्रदेशावगाढाः पुद्गलाः द्रव्यार्थतया सङ्ख्येयगुणा इति,

—इति तेभ्यो सङ्ख्येयप्रदेशावगाढाः पुद्गला द्रव्यार्थतया असङ्ख्येयगुणाः, असङ्ख्यातस्यासङ्ख्यातभेदभिन्नत्वात्, द्रव्यार्थतासूत्रं प्रदेशार्थतासूत्रं द्रव्यपर्यायार्थतासूत्रं च सुगमत्वात् स्वयं भावनीयं, कालभावसूत्राण्यपि सुगमत्वात् स्वयं भावयितव्यानि, नवरं 'जहा पोग्गला तहा भाणियव्वा' इति यथा प्राक् सामान्यतः पुद्गला उक्तास्तथा एकगुणकालकादयोऽपि वक्तव्याः, ते चैवम्—यतः 'सव्वत्थोवा अनंतपएसिआ खंधा एगगुणकालगा, परमाणुपुग्गला दव्वट्ठयाए एगगुणकालग अनंतगुणा, संखिज्जपएसिया खंधा एगगुणकालगा संखिज्जगुणा, असंखिज्जपएसिआ खंधा एगगुणकालगा असंखिज्जगुणा।

पएसट्ठयाए सव्वत्थोवा अनंतपएसिआ खंधा एगगुणकालगा, परमाणुपुग्गला एगगुणकालगा अनंतगुणा इत्यादि' एवं सङ्ख्येयगुणकालकानमसङ्ख्येयगुणकालकानंमनन्तगुणकालकानामपि वाच्यं, एवं शेषवर्णगन्धरसा अपि वक्तव्याः, कर्कशमृदुगुरुलघवः स्पर्शा यथा एकप्रदेशावगाढा भणितास्तथा वक्तव्याः, ते चैवम्—'सव्वत्थोवा एगपएसोगाढा एगगुणकक्खडफासा दव्वट्ठाए, संखिज्जपएसोगाढा एगगुणकक्खडफासा पोग्गला दव्वट्ठयाए संखिज्जगुणा, असंखिज्जपएसोगाढा एगगुणकक्खडफासा दव्वट्ठयाए असंखिज्जगुणा' इत्यादि, एवं सङ्ख्येयगुणकर्कशस्पर्शा असङ्ख्येयगुणकर्कशस्पर्शा अनन्तगुणकर्कशस्परअशा वाच्याः, एवं मॉदुगुरुलघवः, अवशेषाश्चत्वारः शीतादयः स्पर्शा यथा वर्णादय उक्तास्तथा वक्तव्याः, तत्र पाठोऽप्युक्तानुसारेण स्वयं भावनीयः

गतं पुद्गलद्वारम्, इदानीं महादण्डकं विवक्षुर्गुरुमापृच्छति—

—: पदं – ३ – द्वारं – २७ :– "महादण्डकः"

मू. (२९७) *अहं भंते! सव्वजीवप्पबहुं महादण्डयं वन्नइस्सामि—सव्वत्थोवा गब्भवक्कंतिया मणुस्सा १ मणुस्सीओ संखिज्जगुणाओ २ बायरतेउकाइया पज्जत्तया असंखिज्जगुणा ३ अणुत्तरोववाइया देवा असंखिज्जगुणा ४ उवरिमगेविज्जगा देवा संखिज्जगुणा ५ मज्झिमगेविज्जगा देवा संखिज्जगुणा ६ हिट्ठिमगेविज्जगा देवा संखिज्जगुणा ७ अच्चुए कप्पे देवा संखिज्जगुणा ८ आरणे कप्पे देवा संखिज्जगुणा ९ पाणए कप्पे देवा संखिज्जगुणा १० आणे कप्पे देवा संखिज्जगुणा ११ अहे सत्तमाए पुढवीए नेरइया असंखिज्जगुणा १२ छट्ठीए तमाए पुढवी नेरइया असंखिज्जगुणा १३ सहस्सारे कप्पे देवा असंखिज्जगुणा १४ महासुक्के कप्पे देवा असंखिज्जगुणा १५ पंचमाए धूमप्पभाए पुढवीए नेरइआ असंखिज्जगुणा १६ लंतए कप्पए देवा असंखिज्जगुणा १७ चउत्थीए पंकप्पभाए पुढवीए नेरइया असंखिज्जगुणा १८ बंभलोए कप्पे देवा असंखिज्जगुणा १९ तच्चाए वालुयप्पभाए पुढवीए नेरइआ असंखिज्जगुणा २० माहिंदे कप्पे देवा असंखिज्जगुणा २१ सणंकुमारे कप्पे देवा असंखिज्जगुणा २२ दोच्चाए सक्करप्पभाए पुढवीए नेरइया असंखिज्जगुणा २३ संमुच्छिमा मणुस्सा असंखिज्जगुणा २४ ईसाणे कप्पे देवा असंखिज्जगुणा २५ ईसाणे कप्पे देवीओ संखिज्जगुणाओ २६*

सोहम्मे कप्पे देवा संखिज्जगुणा २७ सोहम्मे कप्पे देवीओ संखेज्जगुणाओ २८ भवणवासी देवा असंखेज्जगुणा २९ भवणवासिणीओ देवीओ संखेज्जगुणाओ ३० इमीसे रयणप्पभाए पुढवीए नेरइआ असंखिज्जगुणा ३१ खहयरपंचिंदियतिरि- क्खजोणिया पुरिसा असंखिज्जगुणा ३२ खहयरपंचिंदियतिरिक्खजोणिणीओ संखिज्जगुणाओ ३३ थलयरपंचिंदियतिरिक्खजोणिआ पुरिसा संखिज्जगुणा ३४ थलयरपंचिंदियतिरिक्खजोणिणीओ संखिज्जगुणाओ ३५ जलयरपंचिंदियति- रिक्खजोणिआ पुरिसा संखिज्जगुणा ३६ जलयरपंचिंदियति- रिक्खजोणिणीओ संखिज्जगुणाओ ३७ वाणमंतरा देवा संखिज्जगुणा ३८ वाणमंतरीओ देवीओ संखिज्जगुणाओ ३९ जोइसिया देवा संखिज्जगुणा ४० जोइसिणीओ देवीओ संखिज्जगुणाओ ४१ खहयरपंचिंदियतिरिक्खजोणिआ नपुंसगा संखिज्जगुणा ४२ थलयरपंचिंदियतिरिक्खजोणिआ नपुंसगा संखिज्जगुणा ४३ जलयर- पंचिंदियतिरिक्खजोणिआ नपुंसगा संखिज्जगुणा ४४ चउरिंदिया पज्जत्तया संखिज्जगुणा ४५ पंचिंदिया पज्जत्तया विसेसाहिया ४६ बेइंदिया पज्जत्तया विसेसाहिया ४७ तेइंदिया पज्जत्तया विसेसाहिया ४८ पंचिंदिया अपज्जत्तया असंखेज्जगुणा ४९ चउरिंदिया अपज्जत्तया विसेसाहिया ५० ।

-तेइंदिया अपज्जत्तया विसेसाहिया ५१ बेइंदिया अपज्जत्तया विसेसाहिया ५२ पत्तेयसरी- रबायरवणस्सइकाइया पज्जत्तया असंखिज्जगुणा ५३ बायरनिगोया पज्जत्तया असंखिज्जगुणा ५४ बायरपुढवीकाइया पज्जत्तगा असंखिज्जगुणा ५५ बायराउकाइया पज्जत्तया असंखिज्जगुणा ५६ बायरवाउकाइया पज्जत्तगा असंखिज्जगुणा ५७ बायरतेउकाइया अपज्जत्तगा असंखिज्जगुणा ५८ पत्तेयसरीरबायरवणस्सइकाइया अपज्जत्तगा असंखिज्जगुणा ५९ बायरनिगोया अपज्जत्तया असंखिज्जगुणा ६० बायरपुढवीकाइया अपज्जत्तया असंखिज्जगुणा ६१ बायराउकाइया अपज्जत्तया असंखिज्जगुणा ६२ बायरवाउकाइया अपज्जत्तया असंखिज्जगुणा ६३ सुहुमतेउकाइया अपज्जत्तया असंखिज्जगुणा ६४ सुहुमपुढवीकाइया अपज्जत्तया विसेसाहिया ६५ सुहुमआउकाइया अपज्जत्तया विसेसाहिआ ६६ सुहुमवाउकाइया अपज्जत्तया विसेसाहिया ६७ सुहुमतेउकाइया पज्जत्तया संखिज्जगुणा ६८ सुहुमपुढवीकाइया पज्जत्तया विसेसाहिआ ६९ सुहुमआउकाइया पज्जत्तया विसेसाहिआ ७० सुहुमवाउकाइया पज्जत्तया विसेसाहिआ ७१ सुहुमनिगोया अपज्जत्तया असंखिज्जगुणा ७२ सुहुमनिगोया पज्जत्तया संखिज्जगुणा ७३ अभवसिद्धिआ अणंतगुणा ७४ परिवडियसम्मद्दिट्ठि अणंतगुणा ७५ ।

-सिद्धा अनंतगुणा ७६ बायरवणस्सइकाइया पज्जत्तगा अनंतगुणा ७७ बायरपज्जत्ता विसेसा- हिआ ७८ बायरवणस्सइकाइया अपज्जत्तगा असंखिज्जगुणा ७९ बायरअपज्जत्तगा विसेसाहिआ ८० बायरा विसेसाहिआ ८१ सुहुमवणस्सइकाइया अपज्जत्तया असंखिज्जगुणा ८२ सुहुमअपज्जत्तया विसेसाहिया ८३ सुहुमवणस्सइकाइया पज्जत्तया संखिज्जगुणा ८४ सुहुमपज्जत्तया विसेसाहिआ ८५ सुहुमा विसेसाहिया ८६ भवसिद्धिया विसेसाहिया ८७ निगोयजीवा विसेसाहिया ८८ वणस्सइ- जीवा विसेसाहिआ ८९ एगिंदिया विसेसाहिया ९० तिरिक्खजोणिया विसेसाहिया ९१ मिच्छादिट्ठी विसेसाहिआ ९२ अविरया विसेसाहिया ९३ सकसाई विसेसाहिआ ९४ छउमत्था विसेसाहिआ ९५ सजोगी विसेसाहिआ ९६ संसारत्था विसेसाहिआ ९७ सव्वजीवा विसेसाहिआ ९८ ॥ पन्नवणाए भगवईए बहुवत्तव्वयपयं समत्तं ।

वृ. अथ भदन्त ! सर्वजीवाल्पबहुत्वं–सर्वजीवाल्पबहुत्ववक्तव्यतात्मकं महादण्डकं वर्णयिष्यामि–रचयिष्यामीति तात्पर्यार्थः, अनेन एतद् ज्ञापयति–तीर्थकरानुज्ञामात्रसापेक्ष एव भगवान् गणधरः सूत्ररचनां प्रति प्रवर्तते न पुनः श्रुताभ्यासपुरःसरमिति, यद्वा एतद् ज्ञापयति–कुशलेऽपि कर्मणि विनेयेन गुरुमनापृच्छ्य च न प्रवर्तितव्यं, किंतु तदनुज्ञापुरःसरं, अन्यथा विनेयत्वायोगात्, विनेयस्य हि लक्षणमिदम्–

॥ १ ॥ "गुरोर्निवेदितात्मा यो, गुरुभावानुवर्तकः ।
मुक्तर्थं चेष्टते नित्यं, स विनेयः प्रकीर्तितः ॥"

–गुरुरपि यः प्रच्छनीयःस एवंरूपः–

॥ १ ॥ "धर्मज्ञो धर्मकर्ता च, सदा धर्मप्रवर्तकः ।
सत्त्वेभ्यो धर्मशास्त्रार्थदेशको गुरुरुच्यते ॥" इति,

महादण्डकं वर्तयिष्यामि इत्युक्तं ततः प्रतिज्ञातमेव निर्वाहयति–'सव्वत्थोवा गब्भवक्कंतिया मणुस्सा' इत्यादि, सर्वस्तोका गर्भव्युत्क्रान्तिकमनुष्याः, सङ्ख्येयकोटीकोटीप्रमाणत्वात् १, तेभ्यो मानुष्यो–मनुजस्त्रीयः सङ्ख्येयगुणाः, सप्तविंशतिगुणत्वात्, उक्तं च–"सत्तावीसगुणा पुण मणुयाणं तदहिआ चेव" २, ताभ्यो बादरतेजःकायिका पर्याप्ता असंख्येयगुणाः, कतिपयवर्गन्यूनावलिकाधन-समयप्रमाणत्वात् ३, तेभ्योऽनुत्तरोपपातिनो देवा असंख्येयगुणाः, क्षेत्रपल्योपमासंख्येयभागवर्ति-नभःप्रदेशराशिप्रमाणत्वात् ४, तेभ्य उपरितनग्रैवेयकत्रिकदेवाः संख्येयगुणाः, बृहत्तरपल्योप-मासंख्येयभागवर्तिनभप्र देशराशिप्रमाणत्वात्, एतदपि कथमवसेयं ? इति चेत्, उच्यते, विमान-बाहुलस्यात्, तथाहि–अनुत्तरदेवाना पञ्चविमानानि विमानशतं तूपरितनग्रैवेयकत्रिके प्रतिविमानं घासङ्ख्येया देवाः यथा यथा चाधोऽधो-वर्तीनि विमानानि तथा तथा देवा अपि प्राचुर्येण लभ्यन्ते ततोऽवसीयते–अनुत्तरोपपातिकदेवेभ्यो बृहत्तरक्षेत्रपल्योपमासङ्ख्येयभागवत्याकाश-प्रदेशराशिप्रमाणा उपरितनग्रैवेयकत्रिकदेवाः (संख्येयगुणाः) ५,

–एवमुत्तरत्रापि भावना कार्या यावदानतकल्पः तेभ्योऽप्युपरितनग्रैवेयकत्रिकदेवेभ्यो मध्यमग्रैवेयकत्रिकदेवाः सङ्ख्येयगुणाः ६ तेभ्योऽप्यधस्तनग्रैवेयकत्रिकदेवाः सङ्ख्येयगुणाः ७ तेभ्योऽप्यच्युतकल्पदेवाः सङ्ख्येयगुणाः ८ तेभ्योऽप्यारणकल्पदेवा सङ्ख्येयगुणाः ९, यद्यप्यारणाच्यु-तकल्पौ समश्रेणिकौ समविमानसङ्ख्याकौ च तथाऽपि कृष्णपाक्षिकास्तथास्वाभाव्यात् प्राचुर्येण दक्षिणस्यां दिशि समुपयन्ते नोत्तरस्यां बहवश्च कृष्णपाक्षिकाः स्तोकाः शुक्लपाक्षिकाः ततोऽच्युत-कल्पदेवापेक्षया आरणकल्पदेवाः सङ्ख्येयगुणाः, तेभ्योऽपि प्राणतकल्पदेवाः सङ्ख्येयगुणाः १०

– तेभ्योऽप्याननतकल्पदेवाः सङ्ख्येयगुणाः, भावना आरणकल्पवत्कर्तव्या ११, तेभ्योऽधः-सप्तमनरकपृथिव्यां नैरयिका असङ्ख्येयगुणाः, श्रेण्यसङ्ख्येयभागगतनभःप्रदेशराशि-प्रमाणत्वात् १२, तेभ्यः षष्ठपृथिव्यां नैरयिका असङ्ख्येयगुणाः, एतच्च प्रागेव दिगनुपातेन नैरयिकाल्पबहुत्व- चिन्तायां भावितं १३

तेभ्योऽपि सहस्रारकल्पदेवा असङ्ख्येयगुणाः, षष्ठपृथिवीनैरयिकपरिमाणहेतुश्रेण्य-सङ्ख्येयभागापेक्षया सहस्रारकल्पदेवपरिमाणहेतोः श्रेण्यसङ्ख्येयभागस्य असङ्ख्येयगुणत्वात् १४ तेभ्यो महाशुक्रे कल्पे देवा असङ्ख्येयगुणाः, विमानबाहुल्यात् षट् सहस्राणि विमानानां सहस्रारे

कल्पे चत्वारिंशत्सहस्राणि महाशुक्रे, अन्यद्याधोऽधोविमानवासिनो देवा बहुबहुतराः स्तोकाः स्तोकतराश्चोपरितनोपरितनविमानवासिनः, तत् सहस्रारदेवेभ्यो महाशुक्रकल्पदेवा असङ्ख्येयगुणाः १५ तेभ्योऽपि पञ्चमधूमप्रभाभिधानरकपृथिव्यां नैरयिका असङ्ख्येयगुणाः, बृहत्तमश्रेण्यसङ्ख्येयावर्तिनभःप्रदेशराशिप्रमाणत्वात् १६ तेभ्योऽपि लान्तककल्पे देवा असङ्ख्येयगुणाः, अतिबृहत्तमश्रेण्यसङ्ख्येयवर्गगतनभःप्रदेशराशिप्रमाणत्वात् १७ तेभ्योऽपि चतुर्थ्यां पङ्कप्रभायां पृथिव्यां नैरयिका असङ्ख्येयगुणाः, युक्तिः भावनीया १८ तेभ्योऽपि ब्रह्मलोककल्पे देवा असङ्ख्येयगुणाः, युक्तिः प्रागुक्तैव १९ तेभ्योऽपि तृतीयस्यां वालुकाप्रभायां पृथिव्यां नैरयिका असङ्ख्येयगुणाः २०

-तेभ्योऽपि माहेन्द्रे कल्पे देवा असङ्ख्येयगुणाः २१ तेभ्योऽपि सनत्कुमारकल्पे देवा असङ्ख्येयगुणाः युक्तिः सर्वत्रापि प्रागुक्तैव २२ तेभ्यो द्वितीयस्यां शर्कराप्रभायां पृथिव्यां नैरयिका असङ्ख्येयगुणाः २३, एते च सप्तमपृथिवीनारकादयो द्वितीयपृथिवीनारकपर्यन्ताः प्रत्येकं स्वस्थाने चिन्त्यमानाः सर्वेऽपिधनीकृतलोकश्रेण्यसङ्ख्येयभागवर्तिनभःप्रदेशराशिप्रमाणा द्रष्टव्याः, केवलं श्रेण्यसङ्ख्येयभागोऽसङ्ख्येयभेदभिन्नः तत इत्थमसङ्ख्येयगुणतया अल्पबहुत्वमभिधीयमानं न विरुध्यते, तेभ्योऽपि द्वितीयनरकपृथिवीनारकेभ्यः संमूर्च्छिममनुष्या असङ्ख्येयगुणाः २४

-ते हि अङ्गुलमात्रक्षेत्रप्रदेशराशेः संबन्धिनि द्वितीयवर्गमूले तृतीयवर्गमूलेन गुणिते यावान् प्रदेशराशिर्भवति तावत्प्रमाणाः, तेभ्योऽपि ईशाने कल्पे देवा असङ्ख्येयगुणाः यतो धनीकृतस्य लोकस्यैकप्रादेशिकीषु श्रेणिषु यावन्तो नभःप्रदेशाः तावत्प्रमाण ईशानकल्पगतो देवदेवीसमुदायः तद्गतकिंचिदूनद्वात्रिंशद्भागकल्पा ईशानदेवाः, ततो देवाः संमूर्च्छिममनुष्येभ्योऽसङ्ख्येयगुणाः २५, तेभ्य ईशानकल्पे देव्यः सङ्ख्येयगुणाः, द्वात्रिंशद्गुणत्वात् "बत्तीसगुणा बत्तीसरूवअहिआउ होंति देवीओ" इति वचनात् २६,

-ताभ्यः सौधर्मे कल्पे देवाः सङ्ख्येयगुणाः, तत्र विमानबाहुल्यात्, तथाहि-तत्र द्वात्रिंशच्छतसहस्राणि विमानानां अष्टविंशतिशत सहस्राणि ईशाने कल्पे, अपिच-दक्षिणदिग्वर्ती सौधर्मकल्पः ईशानकल्पस्तूत्तरदिग्वर्ती दक्षिणस्यां च दिशि बहवः कृष्णपाक्षिकाः समुत्पद्यन्ते तत ईशानदेवीभ्यः सौधर्मदेवाः सङ्ख्येयगुणाः, नन्वियं युक्तिमहेन्द्रसनत्कुमारकल्पयोरप्युक्ता, परं तत्र माहेन्द्रकल्पापेक्षया सनत्कुमारकल्पे देवा असङ्ख्येयगुणा उक्ताः, इह तु सौधर्मे कल्पे सङ्ख्येयगुणाः तदेवत् कथम् ?, उच्यते, वचनप्रामाण्यात्, न चात्र पाठभ्रमः, यतोऽन्यत्राप्युक्तम्-

॥ १ ॥ "ईसाणे सव्वत्थवि बत्तीसगुणाओ होंति देवीओ।
संखिज्जा सोहम्मे तओ असंखा भवणवासी ॥" इति २७,

-तेभ्योऽपि तस्मिन्नेव सौधर्मे कल्पे देव्यः सङ्ख्येयगुणाः, द्वात्रिंशद्गुणत्वात्, "सव्वत्थवि बत्तीसगुणाओ हुंति देवीओ" इति वचनात् २८ ताभ्योऽप्यसङ्ख्येयगुणा भवनवासिनः, कथम् इति चेत्, उच्यते, इह अङ्गुलमात्रक्षेत्रप्रदेशराशेः संबन्धिनि प्रथमवर्गमूले तृतीयवर्गमूलेन गुणिते यावान् प्रदेशराशिर्भवति तावत्प्रमाणासु धनीकृतस्य लोकस्य एकप्रादेशिकीषु श्रेणिषु यावन्तो नभःप्रदेशास्तावत्प्रमाणो भवनपतिदेवदेवीसमुदायः, तद्गतकिञ्चिदूनद्वात्रिंशत्तमभागकल्पाश्च भवनपतयो देवाः ततो घटन्ते सौधर्मदेवीभ्यस्तेऽसङ्ख्येयगुणाः २९ तेभ्यो भवनवासिन्यो देव्यः

सङ्ख्येयगुणाःद्वात्रिंशद्गुणत्वात् ३० ताभ्योऽप्यस्यां रत्नप्रभायां पृथिव्यां नैरयिका असङ्ख्येयगुणाः अङ्गुलमात्रक्षेत्रप्रदेशराशेः संबन्धिनि प्रथमवर्गमूले द्वीतीये नवर्गमूलेन गुणिते यावान् प्रदेशराशिस्तावत्प्रमाणासु श्रेणिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणत्वात् ३१ ।

—तेभ्यो पि खचरपञ्चेन्द्रियतिर्यग्योनिकाः पुरुषा असङ्ख्येयगुणाः प्रतरासङ्ख्येयभागवर्त्यसङ्ख्येयश्रेणिनभःप्रदेशराशिप्रमाणत्वात् ३२ तेभ्योऽपि खचरपञ्चेन्द्रियतिर्यग्योनिकाः स्त्रियः सङ्ख्येयगुणाः, त्रिगुणत्वात्, "तिगुणा तिरूवअहिया तिरिआणं इत्थिओ मुणेयव्वा" इति वचनात् ३३ ताभ्यः स्थलचरपञ्चेन्द्रियतिर्यग्योनिकाः पुरुषाः सङ्ख्येयगुणाः, बृहत्तरप्रतरासङ्ख्येयभागवर्त्यसङ्ख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात् ३४ तेभ्यः स्थलचरपञ्चेन्द्रियतिर्यग्योनिकाः स्त्रियः सङ्ख्येयगुणाः त्रिगुणत्वात् ३५ ताभ्यो जलचरपञ्चेन्द्रियतिर्यग्योनिकाः पुरुषाः सङ्ख्येयगुणाः बृहत्तमप्रतरासङ्ख्येयभागवर्त्यसङ्ख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात् ३६ तेभ्यो जलचरपञ्चेन्द्रियतिर्यग्योनिकाः स्त्रियः सङ्ख्येयगुणाः त्रिगुणत्वात् ३७ ताभ्योऽपि व्यन्तरा देवा पुंवेदोदयिनः सङ्ख्येयगुणाः, यतः सङ्ख्येययोजनकोटीकोटीप्रमाणानि सूचिरूपाणि खण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तावन्तःसामान्येन व्यन्तराः, केवलमिह पुरुषा विवक्षिता इति ते सकलसमुदायापेक्षया किञ्चिदूनद्वात्रिंशत्तमभागकल्पा वेदितव्याः, ततो घटन्ते जलचरयुवतिभ्यः सङ्ख्येयगुणाः ३८ तेभ्यः व्यन्तर्यः सङ्ख्येयगुणाः द्वात्रिंसद्गुणत्वात् ३९ ।

—ताभ्यो ज्योतिष्का देवाः सङ्ख्येयगुणाः ते हि सामान्यतः षट्पञ्चादशधिकशतद्वयाङ्गुलप्रमाणानि सूचिरूपाणि खण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तावत्प्रमाणाः, परमिह पुरुषा विवक्षिता इति ते सकलसमुदायापेक्षया किञ्चिदूनद्वात्रिंशत्तमभागकल्पाप्रतिपत्तव्याः, तत उपपद्यन्ते व्यन्तरीभ्यः सङ्ख्येयगुणाः ४० तेभ्यो ज्योतिष्कदेव्यः सङ्ख्येयगुणाः द्वात्रिंशद्गुणत्वात् ४१ ।

—ताभ्यः खचरपञ्चेन्द्रियतिर्यग्योनिका नपुंसकाः सङ्ख्येयगुणाः, क्वचित् 'असङ्ख्येयगुणाः' इति पाठः, स न समीचीनः, यत इत ऊर्ध्वं ये पर्याप्तचतुरिन्द्रिया वक्ष्यन्ते तेऽपि ज्योतिष्कदेवापेक्षया सङ्ख्येयगुणा एवोपपद्यन्ते, तथाहि—षट्पञ्चाशदधिकशतद्वयाङ्गुलप्रमाणानि सूचिरूपाणि खण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तावत्प्रमाणा ज्योतिष्काः, उक्तं च—"छप्पन्नदोसयंगुलसूइपएसेहिं भाइयं पयरं । जोइसिएहिं हीरइ" इति, अङ्गुलसङ्ख्येयभागमात्राणि च सूचिरूपाणि खण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तावत्प्रमाणाश्चतुरिन्द्रियाः, उक्तं च—

॥ १ ॥ "पञ्चत्तापञ्चत्तबितिचउरअसन्नणो अवहरंति ।
अङ्गुलसंखासंखप्पएसभइयं पुढो पयरं ॥"

अङ्गुलसङ्ख्येयभागापेक्षया च षट्पञ्चादशधिकमङ्गुलशतद्वयं सङ्ख्येयगुणं, ततो ज्योतिष्कदेवापेक्षया परिभाव्यमानाः पर्याप्तचतुरिन्द्रिया अपि सङ्ख्येयगुणा एव घटन्ते किं पुनः पर्याप्तचतुरिन्द्रियापेक्षया सङ्ख्येयभागमात्राः खचरपञ्चेन्द्रियनपुंसका इति ? ४२ तेभ्योऽपि स्थलचरपञ्चेन्द्रियनपुंसकाः सङ्ख्येयगुणाः ४३ तेभ्योऽपि जलचरपञ्चेन्द्रियनपुंसकाः सङ्ख्येयगुणाः ४४ तेभ्योऽपि पर्याप्तचतुरिन्द्रियाः सङ्ख्येगुणाः ४५ तेभ्योऽपि पर्याप्ताःसंज्ञ्यसंज्ञिभेदभिन्नाः पञ्चेन्द्रिया विशेषाधिकाः ४६ तेभ्योऽपि पर्याप्ता द्वीन्द्रिया विशेषाधिकाः ४७ ।

-तेभ्योऽपि पर्याप्तास्त्रीन्द्रिया विशेषाधिकाः, यद्यपि च पर्याप्तचतुरिन्द्रियादीनं पर्याप्तत्री-

न्द्रियपर्यन्तानां प्रत्येकमङ्गुलसङ्ख्येयभागमात्राणि सूचिरूपाणि खण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तावत्प्रमाणत्वमविशेषेणान्यत्र वर्ण्यते तथाऽप्यङ्गुलसङ्ख्येयभागस्य सङ्ख्येयभेदभिन्नत्वाद् इत्थं विशेषाधिकत्वमुच्यमानं न विरुद्धं, उक्तं चैत्यमल्पबहुत्वमन्यत्रापि–'तत्तो नपुंसग खहयरा संखेज्जा थलयरजलयरनपुंसगा चउरिंदिय तओ पणबितिपज्जत्त किंचि अहिआ'' इति ४८ तेभ्योऽपि पर्याप्तत्रीन्द्रियेभ्योऽपर्याप्ताः पञ्चेन्द्रिया असङ्ख्येयगुणाः अङ्गुलासङ्ख्येयभागमात्राणि खण्डानि सूचिरूपाणि यावन्त्येकस्मिन् प्रतरे भवन्ति तावत्प्रमाणत्वात् ४९ तेभ्यश्चतुरिन्द्रिया अपर्याप्ता विशेषाधिकाः ५० तेभ्योऽपि त्रीन्द्रिया अपर्याप्ता विशेषाधिकाः ५१

तेभ्योऽपि द्वीन्द्रिया अपर्याप्ता विशेषाधिकाः, यद्यपि चापर्याप्ताः चतुरिन्द्रियादयो अपर्याप्तद्वीन्द्रियपर्यन्ताः प्रत्येकमङ्गुलस्यासङ्ख्येयभागमात्राणि खण्डानि सूचीरूपाणि यावन्त्येकस्मिन् प्रतरे भवन्ति तावत्प्रमाणा अन्यत्राविशेषेणोक्तास्तथाप्यङ्गुलासंख्येयभागस्य विचित्रत्वादित्थं विशेषाधिकत्वमुच्यमानं न विरोधमास्कन्दति ५२, तेभ्योऽपि द्वीन्द्रियापर्याप्तेभ्यः प्रत्येकबादरवनस्पतिकायिकाः पर्याप्ताः असंख्येयगुणाः, यद्यपि चापर्याप्तद्वीन्द्रियादिवत् पर्याप्तबादरवनस्पतिकायिका अपि अङ्गुलासंख्येयभागमात्राणि सूचीरूपाणि खण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तावत्प्रमाणा अन्यत्रोक्तास्तथापि अङ्गुलासङ्ख्येयभागस्यासङ्ख्येयभेदभिन्नत्वाद् बादरपर्याप्तप्रत्येकवनस्पतिपरिमाणचिन्तायामङ्गुलासङ्ख्येयभागोऽसङ्ख्येयगुणहीनः परिगृह्यते ततो न कश्चिद् विरोधः ५३। तेभ्योऽपि बादरनिगोदा अनन्तकायिकशरीररूपाः पर्याप्ता असङ्ख्येयगुणाः ५४

तेभ्योऽपि बादरपृथिवीकायिकाः पर्याप्ता असङ्ख्येयगुणा; ५५ तेभ्योऽपि पर्याप्ता बादराप्कायिका असङ्ख्येयगुणाः, यद्यपि च पर्याप्तबादरप्रत्येकवनस्पतिकायिकपृथिवीकायिकाप्कायिकाः प्रत्येकमङ्गुलासङ्ख- येयभागमात्राणि सूचीरूपाणि खण्डानि यावन्त्येकस्मिन् प्रतरे भवन्ति तावत्प्रमाणा अन्यत्रावि-शेषेणोक्ताः तथाप्यङ्गुलासङ्ख्येयभागस्यासङ्ख्येयभेदभिन्नत्वाद् इत्थम सङ्ख्येयगुणत्वाभिधाने न कश्चिद्दोषः ५६ तेभ्यो बादरपर्याप्ताप्कायिकेभ्यो बादरवायुकायिकाः पर्याप्ता असङ्ख्येयगुणाः, घनीकृतलोकासङ्ख्येयभागवर्त्यसङ्ख्येयप्रतरगतनभः प्रदेशराशिप्रमाणत्वात् ५७ तेभ्यो बादरतेजः-कायिका अपर्याप्ता असङ्ख्येयगुणाः, असङ्ख्येयलोकाकाशप्रदेशराशिप्रमाणत्वात् ५८ तेभ्यः प्रत्येकशरीरबादरवनस्पतिकायिका अपर्याप्ता असङ्ख्येगुणाः ५९

तेभ्योऽपि बादरनिगोदा अपर्याप्त-का असङ्ख्येयगुणाः ६० तेभ्यो बादरपृथिवीकायिका अपर्याप्तका असङ्ख्येयगुणाः ६१ तेभ्यो बादराप्कायिका अपर्याप्तका असंङ्ख्येयगुणाः ६२ तेभ्यो बादरवायुकायिद्य अपर्याप्ता असङ्ख्येयगुणाः ६३ तेभ्यः सूक्ष्मतेजःकायिका अपर्याप्तका असङ्ख्येयगुणाः ६४ तेभ्यः सूक्ष्मपृथिवीद्ययिका अपर्याप्ता विशेषाधिकाः ६५ तेभ्यः सूक्ष्माप्कायिका अपर्याप्ता विशेषाधिकाः ६६ तेभ्यः सूक्ष्मवायुकायिद्य अपर्याप्ता विशेषाधिकाः ६७ तेभ्यः सूक्ष्मतेजःकायिकाः पर्याप्तकाः सङ्ख्येयगुणाः ६८। अपर्याप्तकसूक्ष्मेभ्यः पर्याप्तकसूक्ष्माणां स्वभावत एव प्राचुर्येण भावात्, तथा चाह अस्या एव प्रज्ञापनायाः संग्रहणीकारः–

॥१॥ ''जीवाणमपज्जवा बहुतरगा बायराण विन्नेया।
सुहुमाण य पज्जत्ता ओहेण य केवली बिंति ॥''

–तेभ्योऽपि सूक्ष्मपृथिवीकायिकाः पर्याप्तका विशेषाधिकाः ६९ तेभ्योऽपि सूक्ष्माप्कायिकाः पर्याप्ता विशेषाधिकाः ७० तेभ्योऽपि सूक्ष्मवायुकायिकाः पर्याप्ता विशेषाधिकाः ७१ तेभ्योऽपि

सूक्ष्मनिगोदा अपर्याप्तका असङ्ख्येयगुणाः ७२ तेभ्योऽपि पर्याप्ता; सूक्ष्मनिगोदाः सङ्ख्येयगुणाः ७३ यद्यपि चापर्याप्ततेजःकायिकादयः पर्याप्तसूक्ष्मनिगोदपर्यन्ता अविशेषेणान्वत्रासङ्ख्येयलोकाकाशप्रदेशराशिप्रमाणा उक्तास्तथाऽपि लोकासङ्ख्येयत्वस्यासङ्ख्येयभेदभिन्नत्वाद् इत्थमल्पबहुत्वमभिधीयमानमुपपन्नं द्रष्टव्यं, तेभ्योऽभवसिद्धिका अनन्तगुणाः जघन्ययुक्तानन्तकप्रमाणत्वात् ७४ तेभ्यः प्रतिपतितसम्यग्दृष्टयोऽनन्तगुणाः ७५ तेभ्यः सिद्धा अनन्तगुणाः ७६ तेभ्योऽपि बादरवनस्पतिकायिकाः पर्याप्ता अनन्तगुणाः ७७ तेभ्योऽपि सामान्यतो बादरपर्याप्ता विशेषाधिकाः, बादरपर्याप्तपृथिवीकायिकादीनामपि तत्र प्रक्षेपात् ७८ ।

—तेभ्यो बादरापर्याप्तवनस्पतिकायिका असङ्ख्येयगुणाः, एकैकबादरनिगोदपर्याप्तनिश्रया असङ्ख्येयगुणाना बादरापर्याप्तनिगोदानां संभवात् ७९ तेभ्यः सामान्यतो बादरापर्याप्ता विशेषाधिकाः, बादरापर्याप्तपृथिवीकायिकादीनामपि तत्र प्रक्षेपात् ८० तेभ्यः सामान्यतो बादरा विशेषाधिकाः पर्याप्तापर्याप्तानां तत्र प्रक्षेपात् ८१ तेभ्यः सूक्ष्मवनस्पतिकायिका अपर्याप्ता असङ्ख्येयगुणाः ८२ तेभ्यः सामान्यतः सूक्ष्मा अपर्याप्तका विशेषाधिकाः सूक्ष्मापर्याप्तपृथिवीकायिकादीनामपि तत्र प्रक्षेपात् ८३ तेभ्यः सूक्ष्मवनस्पतिकायिकाः पर्याप्ताः सङ्ख्येयगुणाः, पर्याप्तसूक्ष्माणामप्यान्तेभ्यः सूक्ष्मेभ्यः स्वभावतः सदैव सङ्ख्येयगुणतया प्राप्तमाणत्वात्, तथा केवलवेदसोपलब्धेः ८४ तेभ्योऽपि सामान्यतः सूक्ष्मपर्याप्ता विशेषाधिकाः, पर्याप्तसूक्ष्मपृथीवाकियाकीदीनामपि तत्र प्रक्षेपात् ८५ तेभ्यः पर्याप्तपर्याप्तविशषणरहिताः सूक्ष्मा विशेषाधिकाः, अपर्याप्तसूक्ष्मपृथिव्यप्तेजोवायुवनस्पतिकायिकानामपि तत्र प्रक्षेपात् ८६ तेभ्योऽपि 'भवसिद्धिका' भवे सिद्धिर्येषां ते भवसिद्धिका—भव्या विशेषाधिकाः, जघन्ययुक्तानन्तकमात्राभव्यपरिहारेण सर्वजीवानां भव्यत्वात् ८७ ।

—तेभ्यः सामान्यतो निगोदजीवा विशेषाधिकाः, इह भव्या अभव्याश्चातिप्राचुर्येण सूक्ष्मबादर-निगोदजीवराशावेव प्राप्यन्ते नान्यत्र अन्येषां सर्वेषामपि मिलितानामसंख्येयलोकाकाशप्रदेशराशिप्रमाणत्वात्, अभव्याश्च युक्तानन्तकसंख्यामात्रपरिमाणास्ततो भव्यापेक्षया ते किञ्चिन्मात्राः भव्याश्च प्रागभव्यपरिहारेण चिन्तिताः इदानीं तु बादरसूक्ष्मनिगोदचिन्तायां तेऽपि प्रक्षिप्यन्ते इति विशेषाधिकाः ८८ तेभ्यः सामान्यतो वनस्पतिजीवा विशेषाधिकाः, प्रत्येकशरीराणामपि वनस्पति-जीवानां तत्र प्रक्षेपात् ८९ तेभ्यः सामान्यत एकेन्द्रिया विशेषाधिकाः, बादरसूक्ष्मपृथिवीकायिकादीनामपि तत्र प्रक्षेपात् ९० तेभ्यः सामान्यतस्तिर्यग्योनिका विशेषाधिकाः, पर्याप्तापर्याप्तद्वित्रिचतुरि-न्द्रियतिर्यक्पञ्चेन्द्रियाणमपि तत्र प्रक्षेपात् ९१ ।

—तेभ्यश्चतुर्गतिभाविनो मिथ्यादृष्टयो विशेषाधिकाः, इह कतिपयाविरतसम्यग्दृष्टादिसंज्ञिव्यतिरेकेण शेषाः सर्वेऽपि तिर्यञ्चो मिथ्यादृष्टयः, चातुर्गतिकमिथ्यादृष्टिचिन्तायां चासंख्येया नारकादयस्तत्र प्रक्षिप्यन्ते ततस्तिर्यग्जीवराश्यपेक्षया चतुर्गतिकमिथ्यादृष्टयश्चिन्त्यमाना विशेषाधिकाः ९२ तेभ्योऽप्यविरता विशेषाधिकाः, अविरतसम्यग्दृष्टीनां तत्र प्रेपात् ९३ तेभ्यः सकषायिणो विशेषाधिकाः, देशविरतादीनामपि तत्र प्रक्षेपात् ९४ तेभ्यः छद्मस्था विशेषाधिकाः, उपशान्तमोहादीनामपि तत्र प्रक्षेपात् ९५ तेभ्यः सयोगिनो विशेषाधिकाः, सयोगिकेवलिनामपि तत्र प्रक्षेपात् ९६

तेभ्यः संसारस्था विशेषाधिकाः, अयोगिकेवलिनामपि तत्र प्रक्षेपात् ९७ तेभ्यः सर्वजीवा

विशेषाधिकाः, सिद्धानमापि तत्र प्रक्षेपात् ९८ ॥

पदं – ३ - समाप्तम्

मुनि दीपरत्न सागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे तृतीयपदस्य मलयगिरि आचार्येण विरचिता टीका परिसमाप्ता ।

पदं – ४ – स्थितिः

मू. (२९८) नेरइयाणं भंते! केवइयं कालं ठिई पन्नत्ता?, गोयमा! जहन्नेणं दसवाससहस्साइं, उक्कोसेणं तेत्तीसं सागरोवमाइं। अपज्जत्तनेरइयाणं भंते! केवइयं कालं ठिई पन्नत्ता?, गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं। पज्जत्तगनेरइयाणं केवइयं कालं ठिई पन्नत्ता?, गोयमा! जहन्नेणं दसवाससहस्साइं अंतोमुहुत्तूणाइं, उक्कोसेणं तेत्तीसं सागरोवमाइं अंतोमुहुत्तूणाइं

रयणप्पभापुढविनेरइयाणं भंते! केवइयं कालं ठिई पन्नत्ता?, गोयमा! जहन्नेणं दसवास-सहस्साइं उक्कोसेणं सागरोवमं, अपज्जत्तरयणप्पभापुढविनेरइयाणं भंते! केवइयं कालं ठिई पन्नत्ता गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोसेणावि अंतोमुहुत्तं, पज्जत्तरयणप्पभापुढविनेरइयाणं भंते! केवइयं कालं ठिई पन्नत्ता?, गोयमा! जहन्नेणं दस वाससहस्साइं अंतोमुहुत्तूणाइं उक्कोसेणं सागरोवमं अंतोमुहुत्तूणं॥ सक्करप्पभापुढविनेरइयाणं भंते! केवइयं कालं ठिई पन्नत्ता? गोयमा जहन्नेणं एगं सागरोवमं उक्कोसेणं तिन्नि सागरोवमाइं, अपज्जत्तयसक्करप्पभापुढविनेरइयाणं भंते! केवइयं कालं ठिई पन्नत्ता?, गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं, पज्जत्तयसक्करप्पभापुढविने- रइयाणं भंते! केवइयं कालं ठिई पन्नत्ता?, गोयमा! जहन्नेणं सागरोवमं अंतोमुहुत्तूणं उक्कोसेणं तिन्नि सागरोवमाइं अंतोमुहुत्तूणाइं॥

वालुयप्पभापुढविनेरइयाणं भंते! केवइयं कालं ठिई पन्नत्ता?, गोयमा! जहन्नेणं तिन्नि सागरोवमाइं उक्कोसेणं सत्त सागरोवमाइं, अपज्जत्तयवालुयप्पभापुढविनेरइयाणं भंते! केवइयं कालं ठिई पन्नत्ता?, गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोस्सेवि अंतोमुहुत्तं, पज्जत्तयवालुयप्पभापुढ-विनेरइयाणं भंते! केवइयं कालं ठिई पन्नत्ता?, गोयमा! जहन्नेणं तिन्नि सागरोवमाइं अंतोमुहुत्तूणाइं उक्कोसेणं सत्त सागरोवमाइं अंतोमुहुत्तूणाइं॥ पंकप्पभापुढविनेरइयाणं भंते! केवइयं कालं ठिई पन्नत्ता?, गोयमा! जहन्नेणं सत्त सागरोवमाइं उक्कोसेणं दस सागरोवमाइं, अपज्जत्तय-पंकप्पभापुढविनेरइयाणं भंते! केवइयं कालं ठिई पन्नत्ता?, होयमा! जहन्नेणवि अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं, पज्जत्तयपंकप्पभापुढवि- नेरइयाणं भंते! केवइयं कालं ठिई पन्नत्ता?, गोयमा जहन्नेणं सत्त सागरोवमाइं अंतोमुहुत्तूणाइं उक्कोसेणं दस सागरोवमाइं अंतोमुहुत्तूणाइं॥

धूमप्पभापुढविनेरइयाणं भंते! केवइयं कालं ठिई पन्नत्ता?, गोयमा! जहन्नेणं दस सागरोवमाइं उक्कोसेणं सत्तरससागरोवमाइं, अपज्जत्तयधूमप्पभापुढविनेरइयाणं भंते! केवइयं कालं ठिई पन्नत्ता– गोयमा! जहन्नेणवि अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं, पज्जत्तगधूमप्पभापुढविनेरइयाणं भंते! केवइयं कालं ठिई पन्नत्ता?, गोयमा जहन्नेणं दस सागरोवमाइं अंतोमुहूत्तूणाइं उक्कोसेणं सत्तर- सागरोवमाइं अंतोमुहुत्तूणाइं॥ तमप्पभापुढविनेरइयाणं भंते!

केवइयं कालं ठिई पन्नत्ता ?, गोयमा ! जहन्नेणं सत्तरससागरोवमाइं उक्कोसेणं बावीसं सागरोवमाइं, अपज्जत्तयतमप्पभापुढविनेरइयाणं भंते ! केवइयं कालं ठिई पन्नत्ता ?, गोयमा ! जहन्नेणवि अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं, पज्जत्तगतमप्पभापुढविनेरइ- याणं भंते ! केवइयं कालं ठिई पन्नत्ता ?, गोयमा ! जहन्नेणं सत्तरस सागरोवमाइं अंतोमुहुत्तूणाइं उक्कोसेणं बावीसं सागरोवमाइं अंतोमुहुत्तूणाइं ॥

अहेसत्तमापुढविनेरइयाणं भंते ! केवइयं कालं ठिई पन्नत्ता ?, गोयमा ! जहन्नेणं बावीसं सागरोवमाइं उक्कोसेणं तित्तीसं सागरोवमाइं अपज्जत्तगअहेसत्तमपुढविनेरइयाणं भंते ! केवइयं कालं ठिई पन्नत्ता ?, गोयमा ! जहन्नेणवि अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं, पज्जत्तगअहेसत्तमपुढविनेरइयाणं भंते ! केवइयं कालं ठिई पन्नत्ता ?, गोयमा ! जहन्नेणं बावीसं सागरोवमाइं अंतोमुहुत्तूणाइं उक्कोसेणं तेत्तीसं सागरोवमाइं अंतोमुहुत्तूणाइं ।

मू. इदानीं चतुर्थमारभ्यते, तस्य चायमिसम्बन्धः–इहानन्तरपदे दिगनुपातादिनाऽल्पबहुत्वसङ्ख्या निर्द्धारिता, अस्मिंस्तु तयाऽल्पबहुत्वसङ्ख्यया निर्धारितानां सत्त्वानां जन्मतः प्रभृत्यामरणात् यन्नारकादिपर्यायरूपेणाव्यवच्छिन्नमवस्थानं तच्चिन्त्यते, अनेन सम्बन्धेनायातस्यास्येदमादिसूत्रम्–

'नेरइयाणं भंते ! केवइयं कालं ठिई पन्नत्ता' इति, नैरयिकाणां भदन्त ! कियन्तं कालं स्थितिः प्रज्ञप्ता ?, तत्र स्थीयते–अवस्थीयते अनया आयुःकर्मानुभूत्येति स्थितिः, स्थितिरायुःकर्मानुभूतिर्जीवनमिति पर्यायाः यद्यप्यत्र जीवेन मिथ्यात्वादिभिरुपात्तानां कर्मपुद्गलानां ज्ञानावरणीयादिरूपतया परिणतानां यदवस्थानं सा स्थितिरिति प्रसिद्धं तथापि नारकादिव्यपदेशहेतुरायुःकर्मानुभूतिः, तथाहि–यद्यपि नरगतिपञ्चेन्द्रियजात्यादिनामकर्मोदयाश्रयो नारकत्वपर्यायस्तथापि नारकायुः प्रथमसमयसंवेदनकाल एव तन्निबन्धनं नारकक्षेत्रमप्राप्तोऽपि नारकस्य व्यपदेशं लभते, तथा च मौनीन्द्रं प्रवचनम्–''नेरइए णं भंते ! नेरइएसु उववज्जइ अनेरइए नेरइएसु उव०, गो० नेरइए नेरइएसु उव०नो अनेरइए नेरइएसु उव०''ततः सैवायुःकर्मा- नुभूतिरिह यथोक्तव्युत्पत्त्या स्थितिरभिधीयते, अत्र निर्वचनमाह–'गोयमे'त्यादि, एतच्च पर्याप्ता- प्तविभागाभावेन सामान्यतः उक्तं यदा तु पर्याप्तापर्याप्तविभागेन चिंता, तदेदं सूत्रम्–

'अपज्जत्तनेइयाणं भंते !' इत्यादि, इह अपर्याप्ता द्विविधाः–लब्ध्या करणैश्च, तत्र नैरयिकदेवा असङ्ख्येयवर्षायुषस्तिर्यग्मनुष्याः करणैरेवपर्याप्ताः, न लब्ध्या, लब्ध्यपर्याप्तकानां तेषु मध्ये उत्पादासम्भवात्, तत एते उपपातकाल एव करणैः कियन्तं कालमपर्याप्ता द्रष्टव्याः, शेषास्तु तिर्यग्मनुष्या लब्ध्याऽपर्याप्ताः उपपातकाले च, उक्तं च–

॥ १ ॥ ''नारगदेवा तिरिमणुयगब्भजा जे असंखवासाऊ ।
एए अपज्जत्ता उववाए चेव बोद्धव्वा ॥
॥ २ ॥ सेसा य तिरिमणुया लद्धिं पप्पोववायकाले य ।
दुहओवि य भयइयव्वा पज्जत्तियरे य जिनवयणं ॥''

अपर्याप्तकाश्च जघन्यत उत्कर्षतो वाऽन्तर्मुहूर्तं, अत उक्तम्–'गोयमा ! जहन्नेणवि उक्कोसेणेवि अंतोमुहुत्तं' अपर्याप्ताद्धाऽपगमे च शेषशकालःपर्याप्ताद्धा, तत उक्तं पर्याप्तसूत्रे–गोयमा जहन्नेणं दस वाससहस्साइं अंतोमुहुत्तूणाइं उक्कोसेणं तेत्तीससागरोवमाइं अंतोमुहुत्तूणाइं'' एतच्च

पृथिव्यविभागेनन चिन्तितं, सम्प्रति पृथिवीविभागेन चिन्तयति–'रयणप्पभापुढविनेरइयाणं भंते इत्यादि सुगम, शेषमपि सुप्रसिद्धवदिति सूत्रार्थः ॥

सू. (२९९) देवाणं भंते! केवइयं कालं ठिई पन्नत्ता ?, गोयमा! जहन्नेणं दस वाससहस्साइं उक्कोसेणं तेत्तीसं सागरोवमाइं, अपज्जत्तयदेवाणं भंते ! केवइयं कालं ठिई पन्नत्ता ?, गोयमा ! जहन्नेणवि अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं, पज्जत्तयदेवाणं भंते! केवइयं काले ठिई पन्नत्ता ?, गोयमा! जहन्नेणं दस वाससहस्साइं अंतोमुहूत्तूणाइं उक्कोसेणं तेत्तीसं सागरोवमाइं अंतोमुहुत्तूणाइं

देवीणं भंते! केवइयं कालं ठिई पन्नत्ता ?, गोयमा! जहन्नेणं दस वाससहस्साइं उक्कोसेणं पणपन्नं पलिओवमाइं, अपज्जत्तयदेवीणं भंते! केवइयं कालं ठिई पन्नत्ता ?, गोयमा! जहन्नेणवि अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं, पज्जत्तयदेवीणं भंते! केवइयं कालं ठिई पन्नत्ता ?, गोयमा! जहन्नेणं दस वाससहस्साइं अंतोमुहुत्तूणाइं उक्कोसेणं पणपन्नं पलिओवमाइं अंतोमुहुत्तूणाइं ॥

भवणनवासीणं देवाणं भंते! केवइयं कालं ठिई पन्नत्ता ?, गोयमा! जहन्नेणं दस वाससहस्साइं उक्कोसेणं साइरेगं सागरोवमं, अपज्जत्तयभवणवासीणं भंते! देवाणं केवइयं कालं ठिई पन्नत्ता ?, गोयमा! जहन्नेणवि अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं, पज्जत्तयभवणवासीणं देवाणं भंते! केवइयं कालं ठिई पन्नत्ता ?, गोयमा ! जहन्नेणं दस वाससहस्साइं अंतोमुहुत्तूणाइं उक्कोसेणं साइरेगं सागरोवमं अंतोमुहुत्तूणं ॥

भवणवासिणीणं भंते! देवीणं केवइयं कालं ठिई पन्नत्ता ?, गोयमा! जहन्नेणं दसवाससहस्साइं उक्कोसेणं अद्धपंचमाइं पलिओवमइं, अपज्जत्तयभवणवासिणीणं देवीणं भंते! केवइयं कालं ठिई पन्नत्ता ?, गोयमा! जहन्नेणवि अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं, पज्जत्तियाणं भंते! भवणवासिणीणं देवीणं केवइयं कालं ठिई पन्नत्ता ?, गोयमा ! जहन्नेणं दस वाससहस्साइं अंतोमुहुत्तूणाइं उक्कोसेणं अद्धपंचमाइं पलिओवमाइं अंतोमुहुत्तूणाइं।

असुरकुमाराणं भंते! देवाणं केवइयं कालं ठिई पन्नत्ता ?, गोयमा! जहन्नेणं दस वाससहस्साइं उक्कोसेणं साइरेगं सागरोवमं, अपज्जत्तयअसुरकुमाराणं भंते ! देवाणं केवइयं कालं ठिई पन्नत्ता गोयमा ! जहन्नेणवि अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं, पज्जत्तयअसुरकुमाराणं भंते ! देवाणं केवइयं कालं ठिई पन्नत्ता ?, गोयमा जहन्नेणं दस वाससहस्साइं अंतोमुहूत्तूणाइं उक्कोसेणं साइरेगं सागरोवमं अंतोमुहुत्तूणं ॥ असुरकुमारीणं भंते ! देवाणं केवइयं कालं ठिई पन्नत्ता ?, गोयमा! जहन्नेणं दस वाससहस्साइं उक्कोसेणं अद्धपंचमाइं पलिओवमाइं, अपज्जत्तियाणं असुरकुमारीणं भंते! देवीणं केवइयं कालं ठिईऊ पन्नत्ता ?, गोयमा! जहन्नेणवि अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं, पज्जत्तियाणं असुरकुमारीणं देवीणं भंते ! केवइयं कालं ठिई पन्नत्ता ?, गोयमा ! जहन्नेणं दस वाससहस्साइं अंतोमुहुत्तूणाइं उक्कोसेणं अद्धपंचमाइं पलिओवमाइं अंतोमुहुत्तूणाइं ॥

नागकुमाराणं देवाणं भंते! केवइयं कालं ठिई पन्नत्ता ?, गोयमा! जहन्नेणं दस वाससहस्साइं उक्कोसेणं दो पलिओवमाइं देसूणाइं, अपज्जत्तयाणं भंते! नागकुमाराणं केवइयं कालं ठिई पन्नत्ता गोयमा ! जहन्नेणवि अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं, पज्जत्तयाणं भंते! नागकुमाराणं देवाणं केवइयं कालं ठिई पन्नत्ता ?, गोयमा ! जहन्नेणं दस वाससहस्साइं अंतोमुहुत्तूणाइं उक्कोसेणं दो पलिओवमाइं देसूणाइं अंतोमुहुत्तूणाइं ॥ नागकुमारीणं भंते ! देवीणं केवइयं कालं ठिई पन्नत्ता

?, गोयमा ! जहन्नेणं दस वाससहस्साइं उक्कोसेणं वेसूणं पलिओवमं, अपज्जत्तियाणं भंते ! नागकुमारीणं देवीणं केवइयं कालं ठिई पन्नत्ता गोयमा ! जहन्नेणवि अंतोमुहुत्तं उक्कोसेणवि अंतोमुहूत्तं, पज्जत्तियाणं भंते ! नागकुमारीणं देवीणं केवइयं कालं ठिई पन्नत्ता ?, गोयमा ! जहन्नेणं दस वाससहस्साइं अंतोमुहूत्तूणाइं उक्कोसेणं देसूणं पलिओवमं अंतोमुहूत्तूणं ।

सुवण्णकुमाराणं भंते ! देवाणं केवइयं कालं ठिई पन्नत्ता ?, गोयमा ! जहन्नेणं दस वाससहस्साइं उक्कोसेणं दो पलिओवमाइं देसूणाइं, अपज्जत्तयाणं पुच्छा, गोयमा ! जहन्नेणवि अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं, पज्जत्तयाणं पुच्छा, गोयमा ! जहन्नेणं दस वाससहस्साइं अंतोमुहुत्तूणाइं उक्कोसेणं दो पलिओवमाइं देसूणाइं अंतोमुहुत्तूणाइं । सुवण्णकुमारीणं देवीणं पुच्छा, गोयमा ! जहन्नेणं दस वाससहस्साइं उक्कोसेणं देसूणं पलिओवमं, अपज्जत्तियाणं पुच्छा गोयमा ! जहन्नेणवि अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं, पज्जत्तियाणं पुच्छा गोयमा ! जहन्नेणं दस वाससहस्सआइं अंतोमुहुत्तूणाइं उक्कोसेणं देसूणं पलिओवमं अतोमुहूत्तूणं एवं एएणं अभिलावेणं ओहियअपज्जत्तयपज्जत्तयसुत्तत्तदेवाण य देवीण य नेयव्वं जाव थणियकुमराणं जहा नागकुमाराणं

मू. (३००) पुढविकाइयाणं भंते ! केवइयं कालं ठिई पन्नत्ता ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं बावीसं वाससहस्साइं, अपज्जत्तयपुढविकाइयाणं भंते ! केवइयं कालं ठिती पन्नत्ता गोयमा ! जहन्नेणवि उक्कोसेणवि अंतोमुहुत्तं, पज्जत्तयपुढविकाइयाणं पुच्छा गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं बावीसं वाससहस्साइं अंतोमुहत्तूणाइं, सुहुमपुढविकाइयाणं पुच्छा गोयमा जहन्नेणवि उक्कोसेणवि अंतोमुहुत्तं, अपज्जत्तयसुहुमपुढविकाइयाणं पुच्छा गोयमा ! जहन्नेणवि उक्कोसेणवि अंतोमुहुत्तं, पज्जत्तयसुहुमपुढविकाइयाणं पुच्छा गोयमा ! जहन्नेणवि उक्कोसेणवि अंतोमुहुत्तं, बायरपुढविकाइयाणं पुच्छा गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं बावीसं वाससहस्साइं, अपज्जत्तयबायरपुढविकाइयाणं पुच्छा गोयमा ! जहन्नेणवि उक्कोसेणवि अंतोमुहुत्तं, पज्जत्तबायरपुढविकाइयाणं पुच्छा गो० ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं बावीसं वाससहस्साइं अंतोमुहुतुपत्तूणाइं

वृ. तत्र नैरयिकाणां द्विविधा योनिः--शीता उष्णा च, न तृतीया शीतोष्णा, कस्यां पृथिव्यां का योनिरिति चेत्, उच्यते, रत्नप्रभायां शर्कराप्रभायां वालुकाप्रभायां च यानि नैरयिकाणामुपपातक्षेत्राणि तानि सर्वाण्यपि शीतस्पर्शपरिणामपरिणतानि, उपपातक्षेत्रव्यतिरेकेण चान्यत्सर्वमपि तिसृष्वपि पृथिवीषूष्णस्पर्शपरिणामपरिणतं तेन तत्रत्या नैरयिकाः शीतयोनिका उष्णां वेदनां वेदयन्ते, पङ्कप्रभायां बहून्युपपातक्षेत्राणि शीतस्पर्शपरिणामपरिणतानि स्तोकान्युष्णस्पर्शपरिणामपरिणतानि येषु च प्रस्तटेषु येषु च नरकावासेषु शीतस्पर्शपरिणामान्युपपातक्षेत्राणि तेषु तद्व्यतिरेकेणान्यत्सर्वमुष्णस्पर्शपरिणामं येषु च प्रस्तटेषु येषु च नरकावासेषु उष्णस्पर्शपरिणामानि उपपातक्षेत्राणि तेषु तद्व्यतिरेकेणान्यत्सर्वं शीतस्पर्शपरिणामं तेन तत्रत्या बहवो नैरयिकाः शीतयोनिका उष्णां वेदनां वेदयन्ते स्तोका उष्णयोनिकाः शीतवेदनामिति ।

धूमप्रभायां बहून्युपपातक्षेत्राणि उष्णस्पर्शपरिणामपरिणतानि स्तोकान शीतस्पर्शपरिणामानि, येषु च प्रस्तटेषु येषु च नरकावासेषु चोष्णस्पर्शपरिणामपरिणतानि उपपातक्षेत्राणि तेषु तद्व्यतिरेकेणान्यत्सर्वं शीतपरिणामं, येषु च शीतस्पर्शपरिणामान्युपपातक्षेत्राणि तेष्वन्यदुष्णस्पर्शपरिणामं, तेन तत्रत्या बहवो नारका उष्णयोनिकाः शीतवेदनां वेदयन्ते स्तोकाः शीतयोनिका उष्णवेदानामिति । तमःप्रभायां तमस्तमः-प्रभायां चोपपातक्षेत्राणि सर्वाण्यप्युष्णस्पर्शपरिणामपरिणतानि, तद्व्यतिरेकेण चान्यत्सर्वं तत्र शीतस्पर्शपरिणामं, तेन तत्रत्या नारका उष्णयोनिकाःशीतवेदनां वेदयितार इति ।

भवनवासिनां गर्भव्युत्क्रान्तिकतिर्यक्पञ्चेन्द्रियगर्भव्युत्क्रान्तिकमनुष्याणां व्यन्तरज्योति

ष्कवैमानिकानां चोपपातक्षेत्राणि शीतोष्णरूपोभयस्पर्शपरिणतानि तेन तेषां योनिरुभयस्वभावा न शीता नाप्युष्णा

एकेन्द्रियाणामप्कायिकवर्जानां द्वित्रिचतुरिन्द्रियसंमूर्च्छिमतिर्यक्पञ्चेन्द्रियसंमूर्च्छिममनुष्याणां चोपपातस्थानानि शीतस्पर्शान्युष्णस्पर्शान्युभयस्पर्शान्यपि भवन्तीति तेषां त्रिविधा योनिः। तेजःकायिका उष्णोयोनिकाः (तथा अप्कायिकाः शीतयोनिकाः) तथा प्रत्यक्षत उपलब्धेः

अल्पबहुत्वचिन्तायां सर्वस्तोकाः शीतोष्णयोनयः–शीतोष्णरूपोभययोनिकाः, भवनवासिगर्भजतिर्यक्पञ्चेन्द्रियगर्भजमनुष्यव्यन्तरज्योतिषवैमानिकानामेवोभययोनिकत्वात्, तेभ्योऽसङ्ख्येयगुणा उष्णयोनिकाः, सर्वेषां सूक्ष्मबादरभेदभिन्नानां तेजःकायिकानां प्रभूततराणां नैरयिकाणां कतिपयानां पृथिव्यब्वायुप्रत्येकवनस्पतीनां चोष्णयोनिकत्वात्, अयोनिका अनन्तगुणाः, सिद्धानामनन्तत्वात्, तेभ्यः शीतयोनिका अनन्तगुणाः, अनन्तकायिकानां सर्वेषामपि शीतयोनिकत्वात्, तेषां च सिद्धेभ्योऽपि अनन्तगुणत्वात्।

भूयः प्रकारान्तरेण योनीः प्रतिपिपादयिषुराह–

मू. (३५८) *कतिविहा णं भंते! जोणी पं० ?, गोयमा! तिविहा जोणी प०, तं०–सचित्ता अचित्ता मीसिया।*

नेरइयाणं भंते ! किं सचित्ता जोणी अचित्ता जोणी मीसिया जोणी ?, गोयमा ! नो सचित्ता जोणी अचित्ता जोणी नो मीसिया जोणी। असुरकुमाराणं भंते ! किं सचित्ता जोणी अचित्ता जोणी मीसिया जोणी ?, गोयमा ! नो सचित्ता जोणी अचित्ता जोणी नो मीसिया जोणी, एवं जाव थणियकुमाराणं।

पुढवीकाइआणं भंते ! किं सचित्ता जोणी अचित्ता जोणी मीसिया जोणी ?, गोयमा ! सचित्ता जोणी अचित्ता जोणी मीसियावि जोणी, एवं जाव चउरिंदियाणं॥

संमुच्छिमपंचेंदियतिरिक्खजोणियाणं संमुच्छिममणुस्साण य एवं चेव। गब्भवक्कंतियपंचिंदियतिरिक्खजोणियाणं गब्भवक्कंतियमणुस्साण य नो सचित्ता नो अचित्ता मीसिया जोणी

वाणमंतरजोइसियवेमाणियाणं जहा असुरकुमाराणं। एतेसि णं भंते! जीवाणं सचित्तजोणीणं अचित्तजोणीणं मीसजोणीणं अजोणीण य कयरे २ हिंतो अ० ब० तु० वि० ?, गोयमा सव्वत्थोवा जीवा मीसजोणिया अचित्तजोणिया असंखेज्जगुणा, अजोणिया अनंतगुणा, सचित्तजोणिया अनंतगुणा।

वृ. 'कतिविहा णं भंते ! जोणी पन्नत्ता' इत्यादि, सचित्ता जीवप्रदेशसंबद्धा, अचित्ता सर्वथा जीवविप्रमुक्ता, मिश्रा जीवविप्रमुक्ताविप्रमुक्तस्वरूपा।

तत्र नैरयिकाणां यदुपपातक्षेत्रं तत्र केनचिज्जीवेन परिगृहीतमिति तेषामचित्ता योनिः, यद्यपि सूक्ष्मैकेन्द्रियाः सकललोकव्यापिनस्तथाऽपि न तत्प्रदेशैरुपपातस्थानपुद्गला अन्योऽन्यानुगमसंबद्धा इत्यचित्तैव तेषां योनिः।

एवमसुरकुमारादीनां भवनपतीनां व्यन्तरज्योतिष्कवैमानिकानां चाचित्ता योनिर्भावनीया पृथिवीकायिकादीनां संमूर्च्छिममनुष्यपर्यन्तानामुपपातक्षेत्रं जीवैः'' परिगृहीतमपरिगृहीतमुभयस्वभावं च संभवतीति त्रिविधाऽपि योनिः, गर्भव्युत्क्रान्तितिर्यक्पञ्चेन्द्रियाणां गर्भव्युत्क्रान्तिक-

मनुष्याणां (च) यत्रोत्पत्तिस्तत्राचित्ता अपि शुक्रशोणितादिपुद्गलाः सन्तीति मिश्रा तेषां योनिः ।

अल्पबहुत्वचिन्तायां सर्वस्तोकां जीवा मिश्रयोनिकाः, गर्भव्युत्क्रान्तितिर्यक्पञ्चेन्द्रिय-मनुष्याणामेव मिश्रयोनिकत्वात्, तेभ्योऽचित्तयोनिका असङ्ख्येयगुणाः, नैरयिकदेवानां कतिपयानां च प्रत्येकं पृथिव्यप्तेजोवायुप्रत्येकवनस्पतीनां त्रीन्द्रियचतुरिन्द्रियसंमूर्च्छिमतिर्यक्पञ्चेन्द्रियसंमूर्च्छिम-मनुष्याणामचित्तयोनिकत्वात्, तेभ्योऽप्ययोनिका अनन्तगुणाः, सिद्धानामनन्तत्वात्, तेभ्यः सचित्तयोनिका अनन्तगुणाः, निगोदजीवानां सचित्तयोनिकत्वात् तेषां च सिद्धेभ्योऽप्यनन्तगुणत्वात्

भूयोऽपि प्रकारान्तरेण योनीः प्रतिपादयितुकाम आह–

सू. (३५९) *कइविहा णं भंते ! जोणी पं०, ?, गोयमा ! तिविहा जोणी पं०, तं०–संवुडा जोणी विवडा जोणी संवुडविवडा जोणी ।*

नेरइयाणं भंते ! किं संवुडा जोणी विवडा जोणी संवुडविवडा जोणी ?, गोयमा ! संवुडजोणी, नो विवडजोणी नो संवुडविवडजोणी, एवं जाव वणस्सइकाइयाणं । बेइंदियाणं पुच्छा, गोयमा नो संवुडजोणी विवडजोणी नो संवुडविवडजोणी । एवं जाव चउरिंदियाणं ।

संमुच्छिमपंचिंदियतिरिक्खजोणियाणं संमुच्छिममणुस्साण य एवं चेव । गब्भवक्कंतिय-पंचिंदियतिरिक्खजोणिय० गब्भवक्कंतियमणुस्साण य नो संवुडा जोणी नो विवडा जोणी संवुडविवड जोणी । वाणमंतरजोइसियवेमाणियाणं जहा नेरइयाणं । एतेसि णं भंते ! जीवाणं संवुडजोणियाणं विवडजोणियाणं संवुडविवडजोणियाणं अजोणियाण य कयरे २ हिंतो अ० ब० तु० वि० ?, गोयमा ! सव्वत्थोवा जीवा संवुडविवडजोणिया विवडजोणिया असंखिज्जगुणा अजोणिया अनंतगुणा संवुडजोणिया अनंतगुणा ॥

वृ. 'कइविहा णं भंते ! जोणी पन्नत्ता' इत्यादि, तत्र नारकाणां संवृता योनिः, नरकनिष्कुटानां नारकोत्पत्तिस्थानानां संवृतगवाक्षकल्पत्वात्, तत्र च जाताः सन्तो नैरयिकाः प्रवर्द्धमानमूतेयस्तेभ्यः पतन्ति, शीतेभ्य उष्णेषूष्णेभ्यः शीतेष्विति, भवनपतिव्यन्तरज्योतिष्कवैमानिकानामपि संवृता योनिः, तेषां देवशयनीये देवदूष्यान्तरिते उत्पादात् "देवसयणिज्जंसि देवदूसंतरिए अंगुलासंकेज्जइ-भागमेत्ताए सरीरोगाहणाए उववज्जइ" इति वचनात्, एकेन्द्रिया अपि संवृतयोनिकाः, तेषामपि योनेः स्पष्टमनुपलक्ष्यमानत्वात्,

द्वीन्द्रियादीना चतुरिन्द्रियपर्यन्तानां संमूर्च्छिमतिर्यक्पञ्चेन्द्रियसंमूर्च्छिममनुष्याणां च विवृता योनिः, तेषामुत्पत्तिस्थानस्य जलाशयादेः स्पष्टमुपलभ्यमानत्वात्, गर्भव्युत्क्रान्तिकतिर्यक्पञ्चेन्द्रिय-गर्भव्युत्क्रान्तिकमनुष्याणां च संवृतविवृता योनिः, गर्भस्य संवृतविवृतरूपत्वात्, गर्भो ह्यन्तः स्वरूपतो नोपलभ्यते बहिस्तूरदवृष्ट्यादिनोपलक्ष्यते इति ।

अल्पबहुत्वचिन्तायां सर्वस्तोकाः संवृतविवृतयोनिकाः, गर्भव्युत्क्रान्तिकतिर्यक्पञ्चेन्द्रिय-मनुष्याणमेव संवृतविवृतयोनिकत्वात्, तेभ्यो विवृतयोनिका असंख्येयगुणाः, द्वीन्द्रियादीनां चतुरिन्द्रियपर्यवसानानां संमूर्च्छिमतिर्यक्पञ्चेन्द्रियसंमूर्च्छिममनुष्याणां च विवृतयोनिकत्वात्, तेभ्योऽयोनिका अनन्तगुणाः सिद्धानमनन्तत्वात्, तेभ्यः संवृतयोनिका अनन्तगुणाः, वनस्पतीनां संवृतयोनिकत्वात्, तेषां च सिद्धेभ्योऽप्यनन्तगुणत्वात् ॥

सम्प्रति मनुष्ययोनिविशेषप्रतिपादनार्थमाह–

मू. (३६०) *कइविहा णं भंते! जोणी पं० ?, गोयमा! तिविहा जोणी पं० तं०–कुम्मुण्णया संखावत्ता वंसीपत्ता, कुम्मुण्णा णं जोणीए उत्तमपुरिसा गब्भे वक्कमंति तं०–अरहंता चक्कवट्टी बलदेवा वासु देवा। संखावत्ता णं जोणी इत्थीरयणस्स, संखावत्ताए जोणीए बहवे जीवा य पोग्गला य वक्कमंति विउक्कमंति चयंति उवचयंति, नो चेव णं निप्फज्जंति। वंसीपत्ता णं जोणी पिहुजणस्स, वंसीपत्ताए णं जोणीए पिहुजणे गब्भे वक्कमंति।*

वृ. 'कइविहा णं भंते! जोणी पन्नत्ता' इत्यादि, कूर्मपृष्ठमिवोन्नता कूर्मोन्नता, शङ्खस्येवावर्तो यस्याः सा शङ्खावर्ता, संयुक्तवंशीपत्रद्वयाकारत्वाद् वंशीपत्रा, शेषं सुगमं, नवरं शङ्खावर्तायां योनौ बहवो जीवा जीवसंबद्धा पुद्गलाश्च वक्रमन्ते–आगमच्छन्ति व्युत्क्रामन्ति–गर्भतयोत्पद्यन्ते, तथा चीयन्ते–सामान्यतश्चयमागच्छन्ति, उपचीयन्ते–विशेषत उपचयमायान्ति, परं न निष्पद्यन्ते, अतिप्रबलकामाग्निपरितापतो ध्वंसगमनादिति वृद्धप्रवादः ॥

पदं – ९ – समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे नवमपदस्य मलयगिरिआचार्येण विरचिताटीका परिसमाप्ता।

पदं – १० – "चरम"

वृ. तदेवं व्याख्यातं नवमं पदं, इदानीं दशममारभ्यते, तस्य चायमभिसंबन्धः–इहानन्तरपदे सत्त्वानां योनयः प्रतिपादिताः, अस्मिंश्च यदुपपातक्षेत्रं रत्नप्रभादि तस्य चरमाचरमविभागप्रदर्शनं क्रियते, तत्र चेदमादिसूत्रम्–

मू. (३६१) *कति णं भंते! पुढवीओ पं० ?, गोयमा! अट्ठ पुढवीओ पं०, तं०–रयणप्पभा सक्करप्पभा वालुयप्पभा पंकप्पभा धूमप्पभा तमप्पभा तमतमप्पभा ईसीपब्भारा ॥*

इमा णं भंते! रयणप्पभा पुढवी किं चरमा अचरमा चरमाइं अचरमाइं चरमंतपदेसा अचरमंतपदेसा ?, गोयमा! इमा णं रयणप्पभा पुढवी नो चरमा नो अचरमा नो चरमाति नो अचरमाति नो चरमंतपदेसा नो अचरमंतपदेसा नियमा चरमं चरमाणि य चरमंतपदेसा य अचरमंतपदेसा य, एवं जाव अधेसत्तमा पुढवी, सोहम्माती जाव अनुत्तरविमाणाणं, एवं चेव ईसीपब्भाराविं, एवं चेव लोगेवि, एवं चेव अलोगेवि।

वृ. 'कति णं भंते! पुढवीओ पन्नत्ताओ' इत्यादि सुगमं, नवरमीषत्प्राग्भारका पञ्चचत्वारिंशद्योजनलक्षायामविष्कम्भप्रमाणा शुद्धस्फटिकसंकाशा सिद्धशिला।

'इमा णं भंते! रयणप्पभा पुढवी किं चरमा अचरमे'त्यादि पृच्छा, अथ केयं चरमाचरमपरिभाषा ?, उच्यते, चरमं नाम पर्यन्तवर्ति, तच्चरमत्वमापेक्षिकं, अन्यापेक्षया तस्य भावात्, यथा पूर्वशरीरापेक्षया चरमशरीरमिति, अचरमं अप्राप्तं मध्यवर्तीतियावत्, तदपि चापेक्षिकं, तस्य चरमापेक्षया भावात्, तथा तथाविधान्यशरीरापेक्षया मध्यशरीरमचरमशरीरं, तदेव चरमाऽचरमेत्येकवचनान्तः प्रश्नः कृतः, सम्प्रति बहुवचनान्तमाह–

'चरमाइं अचरमाइं' इति, एतानि चत्वारि प्रश्नसूत्राणि तथाविधैकत्वपरिणामविशिष्टद्रव्यविषयाणि कृतानि, सम्प्रति प्रदेशानधिकृत्य प्रश्नसूत्रद्वयमाह–'चरमंतपएसा य

अचरमंतपएसा य' इति, चरमाण्येवान्तर्वर्तित्वात् अन्ताश्चरमान्तास्तत्प्रदेशाश्च चरमान्तप्रदेशाः, अचरममेव कस्याप्यपेक्षयाऽनन्तवर्तित्वादन्तः अचरमान्तास्तत्प्रदेशा अचरमान्तप्रदेशाः ।

तदेवं षट्सु प्रश्नेषु कृतेषु भगवानाह–गौतम ! सा रत्नप्रभा पृथिवी न चरमा, चरमत्वं ह्यापेक्षिकमित्युक्तं, न चात्रान्यदपेक्षणीयमस्तीति गम्यते, केवलमेव चरम्यनिरपेक्षायाः पृष्टत्वात्, नाप्यचरमा, तत एव हेतोः, तथाहि – अचरमत्वमपि आपेक्षिकं, न चात्रान्यदपेक्षणीयमस्तीति, किमुक्तं भवति ? –इयं रत्नप्रभा पृथिवी न पश्चिमा नापि मध्यमा, तदन्यस्यापेक्षणीयस्याविवक्षणादिति, अत एव न चरमाणि, चरमत्वव्यपदेशस्यैवासंभवतस्तद्विषयबहुवचनासंभवात्, तथाहि–

यदा तस्याश्चरमत्वव्यपदेश एवोक्तयुक्तेर्नोपपद्यते तदा कथं तद्विषयं बहुवचनमुपपत्तुमर्हतीति ? , एवमचरमाण्यपि प्रतिषेधनीयानि, प्रागुक्तयुक्तेरचरमत्वव्यपदेशस्यासंभवात्, तथा न च चरमान्तप्रदेशा नाप्यचरमान्तप्रदेशाः, उक्तयुक्त्या चरमत्वस्याचरमत्वस्य चासंभवतस्तत्प्रदेशकल्पनाया अप्यसंभवात्, यद्येवं तर्हि किंस्वरूपा सा ? इत्यत आह–

'नियमाद्' नियमेनाचरमं चरमाणि च, किमुक्तं भवति ? –यदीयमखण्डरूपा विवक्षितत्वात् पृच्छ्यते तदा यथोक्तभङ्गानामेकेनापि भङ्गेन व्यपदेशो न भवति, यदा त्वसङ्ख्येय प्रदेशावगाढेत्यनेकावयविभागात्मिका विवक्ष्यते तदा यथोक्तनिर्वचनविषया भवति, तथाहि–रत्नप्रभा पृथिवी तावदनेन प्रकारेण व्यवस्थिता, ।

एवमवस्थिताया अस्या यानि प्रान्तेष्ववस्थितानि खण्डानि प्रत्येकं तथाविधविशिष्टैकत्वपरिणामपरिणतानि तानि चरमाणि, यत्पुनर्मध्ये महद्रत्नप्रभायाःखण्डं तत्तथाविधैकत्वपरिणामत्वादेकत्वेन विवक्षितमित्यचरमं, उभयसमुदायरूपा चेयं, अन्यथा तदभावप्रसङ्गात्, तदेवमवयवावयविरूपतया चिन्तायामचरमं चरमाणि चेत्यखण्डैकनिर्वचनविषया प्रतिपादिता, यदा पुनः प्रदेशचिन्ता क्रियते तदैवं निर्वचनम्–चरमान्तप्रदेशाश्च अचरमान्तप्रदेशाश्च, तथाहि–

ये बाह्यखण्डेषु गताः प्रदेशास्ते चरमान्तप्रदेशाः, ये पुनर्मध्यैकखण्डगताः प्रदेशास्ते अचरमान्तप्रदेशाः, अन्ये तु व्याचक्षते–चरमाणि नाम तथाविधप्रविष्टेतरप्रान्तैकप्रादेशिकश्रेणिपटलरूपाणि, मध्यभागोऽचरम इति, तदपि समीचीनं, दोषाभावात्, चरमान्तप्रदेशा यथोक्तरूपप्रान्तैकप्रादेशिकश्रेणिपटलगताः प्रदेशाः, अचरमान्तप्रदेशा मध्यभागगताः प्रदेशाः, अनेन निर्वचनसूत्रेण एकान्तदुर्नयनिरोधप्रधानेन अवयवावयविरूपंरत्नप्रभादिकं वस्तु तयोश्चावयवावयविनोर्भेदाभेद इत्यावेदितं, यथा चावयवावयविरूपतायां न परोक्तदूषणावकाशस्तथा धर्मसंग्रहणिटीकायां बाह्यवस्तुप्रतिष्ठाऽवसरे प्रतिपादितमिति ततोऽवधार्यं । 'एवं जाव अहेसत्तमाए पुढवी'त्यादि, यथा रत्नप्रभा पृथिवी प्रश्ननिर्वचनाभ्यामुक्ता एवं शर्कराद्या अपि पृथिव्यः सौधर्मादीनि च विमानानि अनुत्तरविमानपर्यवसानानि ईषत्प्राग्भारा लोकश्च वक्तव्यः ।

सूत्रपाठोऽपि सुगमत्वात्स्वयं परिभावनीयः, स चैवम्–'सक्करप्पभा णं भंते ! पुढवी किं चरमा अचरमा चरमाणि अचरमाणि' इत्यादि ।

एवं 'अलोगेवि' इति, एवम्–उक्तेन प्रकारेणालोकोऽपि वक्तव्यः, स चैवम्–''अलोए णं भंते ! किं चरमे अचरमे'' इत्यादि प्रश्नसूत्रं तथैव निर्वचनसूत्रं 'गोयमा ! अचरमे चरमाणि य चरमंतपदेसा य अचरमंतपदेसा य' तत्र चरमाणि यानि खण्डानि लोकनिष्कुटेषु प्रविष्टानि शेषमन्य-

सर्वमचरमं, चरमखण्डगताः प्रदेशाःचरमान्तप्रदेशाः अचरमखण्डगताः प्रदेशा अचरमान्तप्रदेशाः

सम्प्रत्येतेषु रत्नप्रभादिषु प्रत्येकं चरमाचरमादिगतमल्पबहुत्वमभिधित्सुरिदमाह-

मू. (३६२) *इमीसे णं भंते ! रयणप्पभाए पुढवीए अचरमस्स य चरमाण य चरमंतपएसाण य अचरमंतपएसाण य दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए कयरे २ हिंतो अ० ब० तु० वि० ?, गोयमा ! सव्वत्थोवा इमीसे रयणप्पभाए पुढवीए दव्वट्ठयाए एगे अचरमे चरमाइं असंखिज्जगुणाइं, अचरमं चरमाणि य दोवि विसेसाहिआ, पएसट्ठयाए सव्वत्थोवा इमीसे रयणप्पभाए पुढवीए चरमंतपदेसा, अचरमंतपदेसा असंखेज्जगुणा, चरमंतपदेसा य अचरमंतपदेसा य दोवि विसेसाहिआ, दव्वट्ठपएसट्ठयाए सव्वत्थोवा इमीसे रयणप्पभाए पुढवीए दव्वट्ठयाए एगे अचरिमे, चरिमाइं असंखेज्जगुणाइं, अचरिमं चरिमाणि य दोवि विसेसाहिआ, चरमंतपएसा असंखेज्जगुणा, अचरमंतपएसा असंखिज्जगुणा, चरमंतपएसा य अचरमंतपएसा य दोवि विसेसाहिआ, एवं जाव अहेसत्तमाए सोहम्मस्स जाव लोगस्स एवं चेव ।*

वृ. 'इमीसे णं भंते ! रयणप्पभाए पुढवीए अचरमस्स य चरमाणय' इत्यादि प्रश्नसूत्रं सुगमं, निर्वचनसूत्रे सर्वस्तोकं द्रव्यार्थतया अस्या रत्नप्रभायाः पृथिव्या अचरमखण्डं, कस्मात् ? इति चेत्, अत आह-एकं, ''निमित्तकारणहेतुषु सर्वासां विभक्तीनां प्रायो दर्शनम्'' इति न्यायदत्र हेतौ प्रथमा, ततोऽयमर्थः-यस्मात्तथाविधैकस्कन्धपरिणामपरिणतत्वादेकं ततःस्तोकं, तस्माद् यानि चरमाणि खण्डानि तान्यसंख्येयगुणानि, तेषामसङ्ख्यातत्वात्, अथाचरमं चरमाणि च समुदितानि चरमाणां तुल्यानि विशेषाधिकानि वा ? इति शङ्कायामाह-अचरमं चरमाणि च समुदितानि विशेषाधिकानि, तथाहि-यदचरमं द्रव्यं तत् चरमद्रव्येषु प्रक्षिप्तं, ततश्चरमेभ्य एकेनाधिकत्वात् विशेषाधिकसमुदायो भवति ।

प्रदेशार्थत्वचिन्तायां सर्वस्तोकाश्चरमान्तप्रदेशाः, यतश्चरमखण्डानि मध्यखण्डापेक्षयाऽतिसूक्ष्माणि, ततस्तेषामसङ्ख्येयानामपि ये प्रदेशास्ते मध्यखण्डगतप्रदेशापेक्षया सर्वस्तोकाः, तेभ्योऽचरमप्रदेशा असङ्ख्येयगुणाः, अचरमखण्डस्यैकस्यापि चरमखण्डसमुदायापेक्षया क्षेत्रतोऽसङ्ख्येयगुणत्वात्, चरमान्तप्रदेशा अचरमान्तप्रदेशाश्च द्वयेऽपि समुदिता अचरमान्तप्रदेशेभ्यो विशेषाधिकाः कथमिति चेत्, उच्यते, इह चरमान्तप्रदेशा अचरमान्तप्रदेशापेक्षया असङ्ख्येयभागप्रमाणाः, ततोऽचरमान्तप्रदेशेषु चरमान्तप्रदेशपेक्षेऽपि तेऽचरमान्तप्रदेशेभ्यो विशेषाधिका एव भवन्ति, द्रव्यार्थप्रदेशार्थचिन्तायां 'अचरमं चरमाणि य दो विसासहियाइं चरमन्तपएसा असंखेज्जगुणा' इति अचरमचरमसमुदायश्चरमान्तप्रदेशा असङ्ख्येयगुणाः, कथं ?, उच्यते, इह यदचरमखण्डं तदसङ्ख्येयप्रदेशावगाढमपि द्रव्यार्थतया एकं, चरमेषु पुनः खण्डेषु प्रत्येकमसङ्ख्येयाः प्रदेशाः, ततो भवन्ति चरमाचरमद्रव्यसमुदायादसङ्ख्येयगुणाश्चरमान्तप्रदेशाः, तेभ्योऽप्यचरमान्तप्रदेशा असङ्ख्येयगुणाः, तेभ्योऽपि चरमाचरमप्रदेशाःसमुदिता इति पूर्ववत् ।

मू. (३६३) *अलोगस्स णं भंते ! अचरमस्स य चरमाण य चरमंतपदेसाण य अचरमंतपदेसाण य दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए कयरे २ हिंतो अ० ब० तु० वि० ?, गोयमा ! सव्वत्थोवे अलोगस्स दव्वट्ठयाए एगे अचरमे चरमाइं असंखिज्जगुणाइं अचरमं चरमाणि*

य दोवि विसेसाहियाइं, पएसट्ठयाए सव्वत्थोवा अलोगस्स चरमंतपदेसा अचरमंतपएसा अनंतगुणा चरमंतपदेसा य अचरमंतपदेसा य दोवि विसेसाहिया, दव्वट्ठएसट्ठयाए सव्वत्थोवे अलोगस्स एगे अचरमे चरमाइं असंखेज्जगुणाइं अचरमं च चरमाणि य दोवि विसेसाहियाइं, चरमंतपएसा असंखेज्जगुणा, अचरमंतपएसा अनंतगुणा, चरमंतपएसा य अचरमंतपएसा य दोवि विसेसाहिया

लोगालोगस्स णं भंते ! अचरमस्स य चरमाण य चरमंतपएसाण य अचरमंतपएसाण य दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए कयरे कयरेहिंतो जाव कतर विo ?, गोयमा ! सव्वत्थोवे लोगालोगस्स दव्वट्ठयाए एगमेगे अचरम, लोगस्स चरमाइं असंखेज्जगुणाइं, अलोगस्स चरमाइं विसेसाहियाइं, लोगस्स (य) अलोगस्स य अचरमं य चरमाणि य दोवि विसेसाहियाइं, पएसट्ठयाते सव्वत्थोवा लोगस्स चरमंतपदेसा, अलोगस्स चरमन्तपदेसा विसेसाहिआ, लोगस्स अचरमंतपएसा असंखेज्जगुणा, अलोगस्स अचरमंतपएसा अणंतगुणा, लोगस्स य अलोगस्स य चरमंतपदेसा च अचरमंतपदेसा य दोवि विसेसाहिया !

दव्वट्ठपएसट्ठयाए सव्वत्थोवे लोगालोगस्स दव्वट्ठयाए एगमेगे अचरमे, लोगस्स चरमाइं असंखेज्जगुणाइं, अलोगस्स चरमाइं विसेसाहियाइं, लोगस्स य अलोगस्स य अचरमं चरमाणि य दोवि विसेसाहियाइं, लोगस्स चरमन्तपदेसा असंखेज्जगुणा, अलोगस्स य चरमंतपएसा विसेसाहिया, लोगस्स अचरमंतपएसा असंखेज्जगुणा, अलोगस्स अचरमंतपएसा अनंतगुणा, लोगस्स य अलोगस्स य चरमंतपएसा य अचरमन्तपएसा य दोवि विसेसाहिया, सव्वदव्वा विसेसाहिया, सव्वपएसा अनंतगुणा, सव्वपज्जवा अनंतगुणा !

वृ. अलोकसूत्रे प्रदेशार्थतायां सर्वस्तोका अलोकस्य चरमान्तप्रदेशाः, लोकनिष्कुटेष्वेवान्तस्तेषां भावात्, तेभ्योऽचरमान्तप्रदेशा अनन्तगुणाः, अलोकस्यानन्तत्वात्, चरमान्तप्रदेशा अचरमान्तप्रदेशाश्च समुदिता विशेषाधिकाः, चरमान्तप्रदेशा ह्यचरमान्तप्रदेशापेक्षया अनन्तभागकल्पाः, ततस्तेषामचरमान्तप्रदेशराशौ प्रक्षेपेऽपि ते अचरमान्तप्रदेशेभ्यो विशेषाधिका एव भवन्ति। सम्प्रति लोकालोकसमुदायविषयं प्रश्नसूत्रमाह—

'लोगालोगस्स णं भंते ! अचरमस्स य चरमाण य' इत्यादि प्रश्नसूत्रं सुगमं, निर्वचनमाह—'गोयमे'त्यादि, लोकस्य अलोकस्य च यदेकैकं चरमखण्डं तल्लोकं, एकत्वात्, तेभ्यो लोकस्य चरमखण्डद्रव्याण्यसङ्ख्येयगुणानि, तेषामसङ्ख्यातत्वात्, तेभ्योऽप्यलोकस्य चरमखण्डानि विशेषाधिकानि, कथम् ? इह यद्यपि लोकस्य चरमखण्डानि तत्तोऽसङ्ख्येयानि तथापि प्रागुपदर्शितपृथिवीन्यासपरिकल्पनया तान्यष्टौ परिकल्प्यन्ते, तद्यथा—एकैकं चतसृषु दिक्षु एकैकं च विदिक्ष्विति, अलोकचरमखण्डानि तन्न्यासपरिकल्पनया परिगण्यमानानि द्वादश, तद्यथा—

एकैकं चतसृषु दिक्षु द्वे द्वे विदिक्ष्विति, द्वादश चाष्टभ्यो न द्विगुणानि न त्रिगुणानि च, किन्तु विशेषाधिकानि, तेभ्योऽलोकस्य चरमखण्डेभ्यो लोकालोकस्य चरमाचरमखण्डानि समुदितानि विशेषाधिकानि, तथाहि—लोकस्य चरमखण्डानि प्रागुक्तपरिकल्पनया अष्टौ एकमचरमखण्डमित्युभयमीलने नव, अलोकस्यापि चरमाचरमखण्डानि समुदितानि त्रयोदश, उभयेषामेकत्र मीलनेन द्वाविंशतिः, सा च द्वादशभ्यो न द्विगुणा नापि त्रिगुणा किन्तु विशेषाधिकेति अलोकस्य चरमखण्डेभ्यो लोकालोकचरमाचरमखण्डानि समुदितानि विशेषाधिकानि।

प्रदेशार्थतायां सर्वस्तोका लोकस्य चरमान्तप्रदेशाः, अष्टखण्डसत्कानामेव प्रदेशानां भावात्, तेभ्योऽलोकस्य चरमान्तप्रदेशा विशेषाधिकाः, तेभ्योऽपि लोकस्य अचरमान्तप्रदेशा असङ्ख्येयगुणाः, क्षेत्रस्यातिप्रभूततया तत्प्रदेशानामप्यतिप्रभूतत्वात्, तेभ्योऽप्यलोकस्याचरमान्तप्रदेशा अनन्तगुणाः, क्षेत्रस्यानन्तगुणत्वात्, तेभ्योऽपि लोकस्य चरमान्तप्रदेशा अचरमान्तप्रदेशा अलोकस्यापि चरमान्तप्रदेशा अचरमान्तप्रदेशा; समुदिता विशेषाधिकाः, कथमिति चेत्, उच्यते, इहालोकस्याचरमान्तप्रदेशराशौ लोकस्य चरमाचरमान्तप्रदेशा अलोकस्य चरमान्तप्रदेशाश्च प्रक्षिप्यन्ते, ते च सर्वसङ्ख्ययाऽप्यसङ्ख्येय(ऽसंख्यया) श्चानन्तराश्यपेक्षयाऽतिस्तोका इति प्रक्षेपेऽपि तेऽलोकस्याचरमान्तप्रदेशेभ्यो विशेषाधिका एव।

एतदनुसारेण द्रव्यार्थप्रदेशार्थचिन्तासूत्रमपि स्वयं परिभावनीयं, नवरं लोकालोकचरमाचरमखण्डेभ्यो लोकस्य चरमान्तप्रदेशा असङ्ख्येयगुणा इति, लोकस्य किल चरमाणि खण्डान्यष्टौ, एकैकस्मिंश्च खण्डदेशे खण्डप्रदेशा असङ्ख्येय लोकालोकचरमाचरमखण्डानि च समुदितानि द्वाविंशतिः, ततो घटन्ते लोकालोकचरमाचरमखण्डेभ्यो लोकस्य चरमान्तप्रदेशा असङ्ख्येयगुणाः, शेषपदभावना प्राग्वत्, 'सव्वदव्वा विसेसाहिया' इति लोकालोकचरमाचरमान्तप्रदेशेभ्यः सर्वद्रव्याणि विशेषाधिकानि, अनन्तानन्तसङ्ख्यानां जीवानां तथा परमाण्वादीनामनन्तपरमाण्वात्मकस्कन्धपर्यन्तानां प्रत्येकानामनन्तसङ्ख्यायनां पृथक् पृथक् द्रव्यत्वात्, तेभ्योऽपि सर्वप्रदेशा अनन्तगुणाः, तेभ्योऽपि सर्वपर्याया अनन्तगुणाः, प्रतिप्रदेशं स्वपरभेदभिन्नानां पर्यायाणामानन्त्यात्, । तदेवं रत्नप्रभादिकं चरमाचरमभेदतश्चिन्तितं, इदानीं परमाण्वादिकं चिन्तयन्नाह–

मू. (३६४) परमाणुपोग्गले णं भंते ! किं चरिमे १ अचरिमे २ अवत्तव्वए ३ चरमाइं ४ अचरमाइं ५ अवत्तव्वाइयं ६ उदाहु चरिमे य अचरिमे य ७ उदाहु चरमे य अचरमाइं ८ उदाहु चरमाइं अचरमे य ९ उदाहु चरमाइं च अचरमाइं च १० पढमा चउभंगी उदाहु चरिमे य अवत्तव्वए य ११ उदाहु चरमे य अवत्तव्वयाइं च १२ उदाहु चरमाइं च अवत्तव्वए य १३ उदाहु चरमाइं च अवत्तव्वयाइं च १४ बीया चउभंगी उदाहु अचरिमे य अवत्तव्वए य १५ उदाहु अचरमे य अवत्तव्वयाइं च १६ उदाहु अचरमाइं च अवत्तव्वए य १७।

उदाहु अचरमाइं च अवत्तव्वयाइं च १८ तइया चउभंगी उदाहु चरमे य अचरमे य अवत्तव्वए य १९ उदाहु चरमे य अचरमे य अवत्तव्वयाइं च २० उदाहु चरमे च अचरमाइं च अवत्तव्वए य २१ उदाहु चरमे य अचरमाइं च अवत्तव्वयाइं च २२ उदाहु चरमाइं च अचरमे य अवत्तव्वए य २३ उदाहु चरमाइं च अचरमे य अवत्तव्वयाइं (च) २४ उदाहु चरमाइं च अचरमाइं च अवत्तव्व य २५ उदाहु चरमाइं च अचरमाइं च अवत्तव्वयाइं च २६, एते छव्वीसं भंगा, गोयमा ! परमाणुपोग्गले नो चरमे नो अचरमे नियमा अवत्तव्वए, सेसा भंगा पडिसेहेयव्वा ॥

वृ. 'परमाणुपोग्गले णं भंते !' इत्यादि, अत्र प्रश्नसूत्रे षडविंशतिर्भङ्गाः, यतस्त्रीणि पदानि चरमाचरमावक्तव्यलक्षणानि, तेषां चैकैकसंयोगे प्रत्येकमेकवचनास्त्रयो भङ्गाः, तद्यथा–चरमोऽचरमोऽवक्तव्यकः त्रयो बहुवचनेन, तद्यथा–चरमाणि १ अचरमाणि २ अवक्तव्यानि ३, सर्वसङ्ख्यया षट्, द्विकसंयोगास्त्रयः, तद्यथा–चरमाचरमपदयोरेकः चरमावक्तव्यपदयोर्द्वितीयः अचरमावक्तव्यकपदयोस्तृतीयः, एकैकस्मिन् चत्वारो भङ्गाः, तत्र प्रथमे द्विकसंयोगे एवं चरमश्चाच-

रमश्च, चरमश्चाचरमाश्च, चरमाश्चाचरमश्च, चरमाश्चचरमाश्च, । एवमेव चतुर्भङ्गी चरमावक्तव्य पदयोः, एवमेवाचरमावक्तव्यपदयोः सर्वसङ्कलनया द्विकसंयोगे द्वादश भङ्गाः त्रिकसंयोगे एकवचनबहुवचनाभ्यामष्टौ, –। सर्वसंकलनया षड्विंशतिः।

अत्र निर्वचनमाह–'परमाणुपोग्गले नो चरमे' इत्यादि, परमाणुपुद्गलश्चरमो न भवति, चरमत्वं ह्यन्यापेक्षं, न चान्यदपेक्षणीयमस्ति तस्य, अविवक्षणात्, न च सांशः परमाणुर्येनांशापेक्षया चरमत्वं प्रकल्प्येत, निरवयवत्वात् (तस्य), तस्मान्न चरमो, नाप्यचरमः, निरवयवतया मध्यत्वायोगात्, किन्त्ववक्तव्यः, चरमाचरमव्यपदेशकारण[तः]शून्यतया चरमशब्देनाचरमशब्देन वा व्यपदेष्टुमशक्यत्वात्, वक्तुं शक्यं हि वक्तव्यं, यत्तु चरमशब्देन अचरमशब्देन वा स्वस्वनिमित्तशून्यतया वक्तुमशक्यं तदवक्तव्यमिति।

शेषास्तु भङ्गाः प्रतिषेध्याः, परमाणौ तेषामसंभवात्, वक्ष्यति च–''परमाणुंमि य तइओ'' अस्यायमर्थः–परमाणौ–परमाणुविषयः तृतीयो भङ्गः [illegible] प्रतिषेध्याः

सू. (३६५) *दुपएसिए णं भंते ! खंधे पुच्छा, गोयमा ! दुपएसिए खंधे सिय चरमे नो अचरमे सिय अवत्तव्वए, सेसा भंगा पडिसेहेयव्वा ॥ तिपएसिए णं भंते ! खंधे पुच्छा, गोयमा ! तिपएसिए खंधे सिय चरमे, नो अचरमे, सिय अवत्तव्वए, नो चरमाइं, नो अचरमाइं, नो अवत्तव्वयाइं, नो चरमे य अचरमे य, नो चरमे य अचरमाइं, सिय चरमाइं च अचरमे य, नो चरमाइं च अचरमाइं च, सिय चरमे य अवत्तव्वए य, सेसा भंगा पडिसेहेयव्वा।*

चउपएसिए णं भंते ! खंधे पुच्छा, गोयमा ! चउपएसिए णं खंधे सिय चरमे १ नो अचरमे २ सिय अवत्तव्वए ३ नो चरमाइं ४ नो अचरमाइं ५ नो अवत्तव्वयाइं ६ नो चरमे य अचरमे य ७ नो चरमे य अचरमाइं च ८ सिय चरमाइं अचरिमे य ९ सिय चरमाइं च अचरमाइं च १० सिय चरमे य अवत्तव्वए य ११ सिय चरमे य अवत्तव्वयाइं च १२ नो चरमाइं च अवत्तव्वए य १३ नो चरमाइं च अवत्तव्वयाइं च १४ नो अचरमे य अवत्तव्वए य १५ नो अचरमे य अवत्तव्वयाइं च १६ नो अचरमाइं च अवत्तव्वए अ १७ नो अचरिमाइं च अवत्तव्वयाइं च १८ नो चरमे य अचरिमे य अवत्तव्वए य १९ नो चरिमे य अचरिमे य अवत्तव्वयाइं च २० नो चरमे य अचरमाइं च अवत्तव्वए य २१ नो चरमे य अचरमाइं च अवत्तव्वयाइं च २२ सिय चरमाइं च अचरिमे च अवत्तव्वए य २३ । सेसा भंगा पडिसेहेयव्वा ॥

पंचपएसिए णं भंते ! खंधे पुच्छा, गोयमा ! पंचपएसिए खंधे सिय चरमे १ नो अचरमे २ सिय अवत्तव्वए ३ नो चरमाइं ४ नो अचरमाइं ५ नो अवत्तव्वयाइं ६ सिय चरमे य अचरमे य ७ नो चरमे य अचरमाइं च ८ सिय चरमाइं च अचरमे य ९ सिय चरमाइं च अचरमाइं च १० सिय चरमे य अवत्तव्वए य ११ सिय चरमे य अवत्तव्वयाइं च १२ सिय चरमाइं च अवत्तव्वए य १३ नो चरमाइं च अवत्तव्वयाइं च १४ नो अचरमे य अवत्तव्वए य १५ नो अचरमे य अवत्तव्वयाइं च १६ नो अचरमाइं च अवत्तव्वए य १७ नो अचरमाइं च अवत्तव्वयाइं च १८ नो चरमे य अचरमे य अवत्तव्वए य १९ नो चरमे य अचरमे य अवत्तव्वयाइं च २० नो चरमे य अचरमाइं च अवत्तव्वए य २१ नो चरमे य अचरमाइं च अवत्तव्वयाइं च २२ सिय चरमाइं च अचरमे य अवत्तव्वए य २३ सिय चरमाइं च अचरमे य अवत्तव्वयाइं च २४ सिय चरमाइं च अचरमाइं च अवत्तव्वए य २५ नो चरमाइं च अचरमाइं च अवत्तव्वायइं च २,६ ।

छप्पएसिए णं भंते ! पुच्छा, गोयमा ! छप्पएसिए णं खंधे सिय चरमे १ नो अचरमे २ सिय अवत्तव्वए ३ नो चरमाइं ४ नो अचरमाइं ५ नो अवत्तव्वयाइं ६ सिय चरमे य अचरमे य ७ सिय चरमे य अचरमाइं च ८ सिय चरमाइं च अचरमे य ९ सियचरमाइं च अचरमाइं च १० सिय चरमे य अवत्तव्वए अ ११ सिय चरमे य अवत्तव्वयाइं च १२ सिय चरमाइं च अवत्तव्वए अ १३ सिय चरमाइं च अवत्तव्वयाइं च १४ नो अचरमे य अवत्तव्वए य १५ नो अचरमे य अवत्तव्वयाइं च १६ नो अचरमाइं च अवत्तव्वए य १७ नो अचरमाइं च अवत्तव्वयाइं च १८ सिय चरमे य अचरमे य अवत्तव्वए य १९ नो चरमे य अचरमे य अवत्तव्वयाइं च २० नो चरमे य अचरमाइं च अवत्तव्वए य २१ नो चरमे य अचरमाइं च अवत्तव्वयाइं च २२ सिय चरमाइं च अचरमे य अवत्तव्वए य २३ सिय चरमाइं च अचरमे य अवत्तव्वयाइं च २४ सिय चरमाइं च अचरमाइं च अवत्तव्वए य २५ सिय चरमाइं च अचरमाइं च अवत्तव्वायाइं च २६ ।

सत्तपएसिए णं भंते ! खंधे पुच्छा, गोयमा ! सत्तपएसिए णं खंधे सिय चरिमे १ नो अचरिमे २ सिय अवत्तव्वए ३ नो चरिमाइं ४ नो अचरिमाइं ५ नो अवत्तव्वयाइं ६ सिय चरमे य अचरमे य ७ सिय चरमे य अचरमाइं च ८ सिय चरमाइं च अचरमे य ९ सिय चरमाइं च अचरमाइं च १० सिय चरमे य अवत्तव्वए य ११ सिय चरमे य अवत्तव्वयाइं च १२ सिय चरमाइं च अवत्तव्वए य १३ सिय चरमाइं च अवत्तव्वयाइं च १४ नो अचरमे य अवत्तव्वए य १५ नो अचरमे य अवत्तव्वयाइं च १६ नो अचरमाइं च अवत्तव्वए य १७ नो अचरमाइं च अवत्तव्वयाइं च १८ सिय चरमे य अचरमे य अवत्तव्वए य १९ सिय चरमे य अचरमे य अवत्तव्वयाइं च २० सिय चरमे य अचरिमाइं च अवत्तव्वए अ २१ नो चरिमे य अचरिमाइं च अवत्तव्वयाइं च २२ सिय चरमाइं च अचरमे य अवत्तव्वए य २३ सिय चरमाइं च अचरमे य अवत्तव्वयाइं २४ सिय चरमाइं च अचरमाइं च अवत्तव्वए य २५ सिय चरमाइं च अचरमाइं च अवत्त २६ ।

अट्ठपएसिए णं भंते ! खंधे पुच्छा, गोयमा ! अट्ठपएसिए खंधे सिय चरमे १ नो अचरमे २ सिय अवत्तव्वए ३ नो चरमाइं ४ नो अचरमाइं ५ नो अवत्तव्वयाइं ६ सिय चरिमे य अचरिमे य ७ सिय चरिमे यअचरिमाइं च ८ सिय चरिमाइं च अचरिमे य ९ सिय चरमाइं च अचरमाइं च १० सिय चरमे य अवत्तव्वए य ११ सिय चरम य अवत्तव्वयाइं च १२ सिय चरिमाइं च अवत्तव्वए य १३ सिय चरिमाइं च अवत्तव्वयाइं च १४ नो अचरिमे य अवत्तव्वए य १५ नो अचरिमे य अवत्तव्वयाइं च १६ नो अचरिमाइं च अवत्तव्वए य १७ नो अचरिमाइं च अवत्तव्वयाइं च १८ सिय चरिमे य अचरिमे य अवत्तव्वए य १९ सिय चरिमे य अचरिमे य अवत्तव्वयाइं च २० सिय चरिमे य अचरिमाइं च अवत्तव्वए अ २१ सिय चरिमे य अचरिमाइं च अवत्तव्वयाइं च २२ सिय चरिमाइं च अचरिमे य अवत्तव्वए अ २३ सियचरिमाइं च अचरिमे यअवत्तव्वयाइं च २४ सिय चरिमाइं चअचरिमाइं च अवत्तव्वए य २५ सिय चरिमाइं च अचरिमाइं च अवत्तव्वयाइं च २६

संखेज्जपेएसिए असंखेज्जपएसिए अनंतपएसिए खंधे०, जहेव अट्ठपएसिए तहेव पत्तेयं भाणियव्वं ।

वृ. 'दुपएसिए णं भंते !' इत्यादि प्रश्नसूत्रं प्राग्वत्, निर्वचनमाह–'सिय चरमे नो अचरमे सिय अवत्तव्वए' इत्यादि, द्विप्रदेशिकःस्कन्धः स्यात्–कदाचित् चरमः, कथमिति चेत्, उच्यते,

इह यदा द्विप्रदेशिकः स्कन्धो द्वयोराकाशप्रदेशयोरवगाढो भवति समश्रेण्या व्यवस्थितया, –तदा एकोऽपि परमाणुपरपरमाण्वपेक्षया चरमः, अदरोऽप्यपरपरमाण्वपेक्षया चरम इति चरमः, अचरमस्तु नम भवति, सर्वद्रव्याणमार्मपि केवलाचरमत्वस्यायोगात्, यदा तु स एव द्विप्रदेशिकः स्कन्धः एकस्मिन्नाकाशप्रदेशे अवगाहते तदा स तथाविधैकत्वपरिणामपरिणततया परमाणुवत् चरमाचरमव्यपदेशकारणशून्यत्वान्न चरम शब्देन व्यपदेष्टुं शक्यते नाप्यचरमशब्देनेति अवक्तव्यः, शेषास्तु भङ्गाः प्रतिषेध्याः, तथा च वक्ष्यति "पढमो तइओ य होइ दुपएसे" अस्यायमर्थः–द्विप्रदेशिके स्कन्धे प्रथमो भङ्गः–चरम इति, तृतीयः–अवक्तव्य इति भवति शेषास्तु प्रतिषेध्याः, असंभवात्, स चासंभवःसुप्रतीत एव।

'तिपएसिए णं भंते ! खंधे' इत्यादि प्रश्नसूत्रं प्राग्वत्, निर्वचनं 'गोयमा ! सिय चरमे' इत्यादि, इह यदा त्रिप्रदेशिकः स्कन्धो द्वयोराकाशप्रदेशशयोः समश्रेण्या व्यवस्थितयोरेवमवगाढो भवति, तदाऽसौचरमः, सा चरमत्वभावना द्विप्रदेशिकस्कन्धवद् भावनीया, अचरमप्रतिषेधः प्राग्वत्, 'स्यादवक्तव्य' इति यदा स एव त्रिप्रदेशिकः स्कन्ध एकस्मिन्नाकाशप्रदेशेऽवगाहते तदा परमाणुवत् चरमाचरमव्यपदेशकारणशून्यतया चरमाचरमशब्दाभ्यां व्यपदेष्टुमशक्यत्वात् अवक्तव्यः चतुर्थादयोऽष्टमपर्यन्ताः प्रतिषेध्यः, असंभवात्, असभवस्तु सुप्रतीतत्वात् स्वयमुपयुज्य वक्तव्यः, नवमस्तु ग्राह्यः, तथा चाह–'सिय चरमाइं च अचरमे य' प्राकृते द्वित्वेऽपि बहुवचनं, ततोऽयमर्थः–स्यात्–कदाचिदयं भङ्गः–चरमौ अचरमश्च, तत्र यदा स त्रिप्रदेशिकः स्कन्धः त्रिष्वाकाशप्रदेषेषु समश्रेण्या व्यवस्थितेष्वेवमवगाहते,

तदाऽऽदिमान्तिमौ द्वौ परमाणू पर्यन्तवर्तित्वाच्चरमौ मध्यमस्तु मध्यवर्तित्वादचरम इति, दशमस्तु प्रतिषेध्यः, स्कन्धस्य त्रिप्रदेशिकतया चरमाचरमशब्दयोर्बहुवचननिमित्तासंभवात्, एकादशस्तु ग्राह्यः, तथा चाह–'सिय चरमे य अवत्तव्वए य' स्यात्–कदाचिदयं भङ्गश्चरमश्चावक्तव्यश्च, तत्र यदा स त्रिप्रदेशिकः समश्रेण्या विश्रेण्या चैवमगाहते स्थापना–तदा द्वौ परमाणू समश्रेण्या व्यवस्थिताविति द्विप्रदेशावगाढद्विप्रदेशस्कन्धवच्चरमव्यपदेशकारणभावतश्चरमः, एकश्च परमाणुर्विश्रेणिस्थश्चरमाचरमशब्दाभ्या व्यपदेष्टुमशक्य इत्यवक्तव्यः, शेषास्तु भङ्गाः सर्वेऽपि प्रतिषेध्याः, वक्ष्यति च "पढमो तइओ नवमो इक्कारसमो य तिपएसे" अस्यायमर्थः–त्रिप्रदेशे स्कन्धे प्रथमो भङ्गश्चरम इति, तृतीयोऽवक्तव्य इति, नवमश्चरमौ चाचरमश्च, एकादशश्चरमश्चावक्तव्यश्चेतिचि भवति, शेषा भङ्गा न घटन्ते ॥

'चउपएसिए णं भंते ! खंधे' इत्यादि प्रश्नसूत्रं प्राग्वत्, निर्वचनमाह–'गोयमा ! सिय चरमे' इत्यादि, अत्र प्रथमतृतीयनवमदशमैकादशद्वादशत्रयोविंशतितमरूपाः सप्त भङ्गा ग्राह्याः, शेषाः प्रतिषेध्याः, तत्र प्रथमभङ्गोऽयम्–'स्याच्चरम' इति, इह यदा चतुष्प्रदेशकः स्कन्धो द्वयोराकाशप्रदेशयोः समश्रेण्या व्यवस्थितयोरेवमगाहते, तदा चरमः, सा च चरमत्वाभावना समश्रेण्या व्यवस्थितद्विप्रदेशावगाढद्विप्रदेशस्कन्धवद् भावनीया, तृतीयो भङ्गः स्यादवक्तव्य इति, स चैवं–यदा स एव चतुष्प्रदेशकः स्कन्ध एकस्मिन्नाकाशप्रदेशेऽवगाहते, तदा परमाणुवदवक्तव्यः,

नवमः 'स्याच्चरमौ चाचरमश्च' स चैवं–यदा स चतुष्प्रदेशात्मकः स्कन्धः त्रिष्वाकाशप्रदेशेष्वेवमवगाहते, तदा आद्यन्तप्रदेशावगाढौ चरमौ मध्यप्रदेशावगाढस्त्वचरमः, दशमः स्याच्चरमौ

चाचरमौ च, तत्र यदा चतुष्प्रदेशात्मकः स्कन्धः समश्रेण्या व्यवस्थितेषु चतुष्वाकाशप्रदेशेषु एवमवगाहते, तदाऽऽद्यन्तद्विप्रदेशावगाढौ द्वौ परमाणू चरमौ द्वयोस्तु मध्यमयोराकाशप्रदेशयोरवगाढौ द्वौ परमाणू अचरमाविति, एकादशः स्याच्चरमश्चावक्तव्यश्च, स चैवं–, यदा स चतुष्प्रदेशकः स्कन्धः त्रिष्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते स्थापना–, तदा समश्रेणिव्यवस्थितद्विप्रदेशावगाढाश्रयः परमाणवो द्विप्रदेशावगाढद्विप्रदेशस्कन्धवत् चरमः एकश्च विश्रेणिस्थः परमाणुरिव चरमाचरमशब्दाभ्यां व्यपदेष्टुमशक्यत्वात् अवक्तव्य इति, द्वादशः स्याच्चरमश्चावक्तव्यौ च, स चैवं–, यदा स चतुष्प्रदेशात्मकः स्कन्धश्चतुष्वाकाशप्रदेशेषु एवमवगाहते–द्वौ परमाणू द्वयोः समश्रेण्या व्यवस्थितयोराकाशप्रदेशयोः द्वौ परमाणू द्वयोर्विश्रेण्या व्यवस्थितयोः, तदा द्वौ परमाणू समश्रेण्या व्यवस्थितौ द्विप्रदेशावगाढद्विप्रदेशस्कन्धवत् चरमः द्वौ च परमाणू विश्रेणिव्यवस्थितौ केवलपरमाणुवच्चरमाचरमशब्दाभ्या व्यपदेष्टुमशक्यावित्यवक्तव्यौ, त्रयोविंशतितमः स्याच्चरमौ चाचरमश्चावक्तव्यश्च, कथमिति चेद्, । उच्यते, इह यदा स चतुष्प्रदेशकः स्कन्धः चतुष्वाकाशप्रदेशेष्वेवमवगाहते– त्रयःपरमाणवस्त्रिषु समश्रेण्या व्यवस्थितेष्वाकाशप्रदेशेषु एको विश्रेणिस्थे प्रदेशे, तदा त्रिषु परमाणुषु समश्रेणिव्यवस्थितेषु मध्ये आद्यन्तौ परमाणू पर्यन्तवर्तित्वाच्चरमौ मध्यमस्त्वचरमः विश्रेणिस्थस्त्व- वक्तव्य इति, वक्ष्यति च–

॥ १ ॥ "पढमो तइओ नवमो दसमो इक्कारसो य बारसमो ।
भङ्गा चउप्पएसे तेवीसइमो य बोद्धव्वो ॥" गतार्था ॥

'पंचपएसिए णं भंते !' इत्यादि प्रश्नसूत्रं प्राग्वत्, निर्वचनमाह–'गोयमा ! सिय चरमे' इत्यादि, इह प्रथमतृतीयसप्तमनवमदशमैकादशद्वादशत्रयोदशत्रयोविंशतितमचतुर्विंशतितमपञ्चविंशतितमरूपा एकादश भङ्गा ग्राह्याः, शेषाः प्रतिषेध्याः, वक्ष्यति च–

॥ १ ॥ "पढमो तइओ सत्तम नवदसइक्कारबारतेसमो ।
तेवीसचउव्वीसा पणवीसइमो य पंचमए ॥"

तत्रायं प्रथमो भङ्गः–स्याच्चरम इति, इह यदा पञ्चप्रदेशात्मकः स्कन्धो द्वयोराकाशप्रदेशयोः समश्रेण्या व्यवस्थितयोरेवमवगाहते, त्रयः परमाणव एकस्मिन्नाकाशप्रदेशे द्वौ द्वितीये, – तदा द्विप्रदेशावगाढद्विप्रदेशस्कन्धवच्चरमः, तृतीयोऽवक्तव्यः, स चैवं– यदा स पञ्चमप्रदेशात्मकःस्कन्धः एकस्मिन् आकाशप्रदेशे अवगाहते, – तदा स परमाणुवदवक्तव्यः, सप्तमः स्याच्चरमश्चाचरमश्च, स चैवम्– यदा स पञ्चप्रदेशकः स्कन्धः पञ्चस्वाकाशप्रदेशेष्वेवमवगाहते, स्थापना–, तदा ये चरमाश्चत्वारः परमाणवस्तेषामेकसंबन्धिपरिणामपरिणतत्वादेकवर्णत्वादेकगन्धत्वादेकरसत्वादेकस्पर्शत्वाच्चैकत्वव्यपदेशे चरम इति व्यपदेशः, मध्यस्तु परमाणुर्मध्यवर्तित्वाद् चरम इति, नवमः चरमौ चाचरमश्च, तत्र यदा स पञ्चपदेशकः स्कन्धस्त्रिष्वाकाशप्रदेशेषु समश्रेण्या व्यवस्तितेष्वेवमवगाहते द्वौ–परमाणू अद्ये आकाशप्रदेशे द्वावन्ते एके मध्ये, तदाऽऽद्यप्रदेशावगाढौ द्वौ चरमो द्वावन्त्यप्रदेशावगाढो चरम इति चरमौ मध्यस्तु मध्यवर्त्तित्वादचरमः, दशमः चरमौ चाचरमौ च, तत्र यदा स पञ्चप्रदेशात्कमः स्कन्धश्चतुष्वाकाशप्रदेशेषु समश्रेणय्या व्यवस्थितेष्वेवमवगाहते–त्रयः परमाणवस्त्रिष्वाकाशप्रदेशेषु एकस्मिन् द्वाविति, –तदा आद्यप्रदेशवर्ती परमाणुश्चरमः द्वौ चान्त्यप्रदेशवर्त्तिनौ चरम इति चरमौ द्वौ च मध्यवर्तित्वादचरमौ, एकादशः चरमश्चाव-

क्तव्यः, कथमिति चेत् ?,

उच्यते, यदा स पञ्चप्रदेशात्मकस्त्र्याकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते–द्वौ द्वौ परमाणू द्वयोराकाशप्रदेशयोः समश्रेण्या व्यवस्थितयोः एको विश्रेणिस्थः, तदा चत्वारः परमाणवो द्विप्रदेशावगाहित्वात् द्विप्रदेशावगाढद्विप्रदेशस्कन्धवच्चरम एकश्च विश्रेणिस्थः परमाणुरवक्तव्यः, द्वादशः चरमश्चावक्तव्यौ च, तत्र यदा स पञ्चप्रदेशात्मकः स्कन्धश्चतुष्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते–द्वौ परमाणू द्वयोराकाशप्रदेशयोः समश्रेण्या व्यवस्थितयोरेको विश्रेणिस्थे द्वौ चान्यस्मिन् विश्रेणिस्थे, तदा द्वौ परमाणू समश्रेणिव्यवस्तितौ द्विप्रदेशावगाढौ द्विप्रदेशावगाढि-प्रदेशस्कन्धवच्चरमः एकौ द्वौ च विश्रेणिस्थपृथगेकैकाकाशप्रदेशावगाढौ चावक्तव्यौ, त्रयोदशः चरमौ चावक्तव्यश्च, तत्र यदा स पञ्चप्रदेशावगाढः पञ्चस्वाकाशप्रदेशेष्वेवमवगाहते–द्वौ परमाणू उपरि द्वयोराकाशप्रदेशयोः समश्रेण्या व्यवस्थितयोरवगाढौ द्वौ च द्वयोस्तथैवाधः एकः पर्यन्ते मध्यसमे, तदा द्वावुपरितनौ द्विप्रदेशावगाढव्यणुकस्कन्धवच्चरमः द्वौ चाधस्तनौ चरम इति चरमौ एकश्च केवलः परमाणुरिवावक्तव्य इति, त्रयोविंशतितमः चरमौ चाचरमश्चावक्तव्यश्च,

स चैवं–यदा पञ्चप्रदेशकः स्कन्धश्चतुष्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते–त्रिष्वाकाशप्रदेशेषु समश्रेण्या व्यवस्थितेष्वाद्ये एकः परमाणुः मध्ये द्वौ अन्ते एकः चतुर्थेऽपि विश्रेणिस्थ एकः, तदा त्रिष्वाकाशप्रदेशेषु मध्ये आद्यन्तप्रदेशावगाढौ चरमौ मध्यप्रदेशवर्ती तु द्व्यणुको मध्यवर्तित्वादचरमो विश्रेणिस्थश्चावक्तव्य इति, चतुर्विंशतितमः चरमौ चाचरमश्चावक्तव्यौ च, कथमिति चेत्, उच्यते, स एव यदा पञ्चप्रदेशकः स्कन्धः पञ्चस्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमगाहते–त्रयः परमाणवस्त्रिष्वाकाशप्रदेशेषु समश्रेणिव्यवस्थितेषु द्वयोराकाश-प्रदेशयोः परमाण्वोर्विश्रेणिस्थयोः, तदा त्रिष्वाकाशप्रदेशेषु मध्ये द्वावाद्यन्तप्रदेशवर्तिनौ चरमौ मध्यश्चाचरमो द्वौ च विश्रेणिस्थावावक्तव्यौ, पञ्चविंशतितमः चरमौ चाचरमौ चावक्तव्यश्च, स चैवं–यदा पञ्चप्रदेशकः स्कन्धः पञ्चस्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते–चत्वारश्चतुष्वाकाशप्रदेशेषुसमश्रेणिव्यवस्तितेषु एको विश्रेणिस्थः, – तदा चतुष्वा-काशप्रदेशेषु मध्ये द्वावाद्यन्तप्रदेशवर्तिनो चरमौ द्वौ च मध्यवर्तिनावचरमौ एको विश्रेणिस्थोऽ-वक्तव्यः ।

'छप्पएसिए णं भंते !' इत्यादि प्रश्नसूत्रं प्राग्वत, निर्वचनं 'गोयमा ! सिय चरमे' इत्यादि, इह द्वितीयचतुष्पञ्चमषष्ठपञ्चदशषोडशसप्तदशाष्टादशविंशतितमैकविंशतितमद्विंशतितमरूपा एकादश भङ्गाः प्रतिषेध्याः, वक्ष्यति च–

॥ १ ॥ "बिचउत्थपञ्चछट्ठं पन्नरसोलं सत्तरट्ठारं ।
वीसेक्कवीस बावीसगं च वज्जेज्ज छट्ठंमि ॥"

शेषास्त्वेकादयः परिग्राह्याः, घटमानत्वात्, तत्र यथा द्व्यादयो न घटन्ते एकादयस्तु घटन्ते तथा भाव्यन्ते–इह यदा षट्प्रदेशकः स्कन्धो द्वयोराकाशप्रदेशयोः समश्रेण्या व्यवस्थितयोरेवम-वगाहते–एकस्मिन्नाकाशप्रदेशे त्रयः परमाणवोऽपरिस्मिन्नपि त्रय इति,– तदा द्विप्रदेशावगाढ-द्विप्रदेशस्कन्धवच्चरमः, अचरमलक्षणस्तु द्वितीयो भङ्गो न घटते, चरमरहितस्य केवलस्याचरम-स्यासंभवात्, न खलु प्रान्ताभावे मध्यं भवतीति भावनीयमेतत्, तृतीयोऽवक्तव्यलक्षणः, स चैवं–यदा स षट्प्रदेशात्मकः स्कन्धः एकस्मिन्नाकाशप्रदेशेऽवगाहते, – तदा परमाणुवच्चरमा-

चरमशब्देन व्यपदेशटुमशक्यत्वादवक्तव्यः, चतुर्थश्चरमाणीति पञ्चमोऽचरमाणीति षष्ठोऽवक्तव्यानीति पञ्चदशोऽचरमश्चावक्तव्यश्च षोडशोऽचरमश्चावक्तव्यानि च सप्तदशोऽचरमाणि चावक्तव्यश्च अष्टादशोऽचरमाणि चावक्तव्यानि चेत्येते सप्त भङ्गा ओघत एव न संभवन्ति,

तथाप्रकाराणा द्रव्याणामेवासंभ[illegible] न ह्येवं जगति क्षेत्राणि चरमाणि [illegible] वन्ति, असंभवश्च प्रागुक्तभावानानुसारेण सुगमत्वात्स्वयं भावनीयः, सप्तमश्च चरमश्चाचरमश्चेत्येवरूप एव, यदा स षट्प्रदेशात्मकः स्कन्धः पञ्चस्वाकाशप्रदेशेष्वेकपरिक्षेपेण व्यवस्थितेष्वेवमवगाहते, द्वौ परमाणू मध्यप्रदेशे एकैकः शेषेषु, तदा तेषां चतुर्णां परमाणूनामेकसंबन्धिपरिणामपरिणतत्वादेकवर्णत्वदेकगन्धत्वादेकरसत्वादेकस्पर्शत्वाद्यैकत्वव्यपदेशः एकत्वव्यपदेशत्वाच्चरम इति व्यपदेशः, यौ तु द्वौ परमाणू मध्ये तावेकत्वपरिणामपरिणतावित्यचरमः, अष्टमश्चरमश्चाचरमौ च, तत्र यदा स एव षट्प्रदेशात्मकः स्कन्धः षट्सु प्रदेशेषु एकपरिक्षेपेणैकाधिकमेवमवगाहते, तदा पर्यन्तवर्तिनः परिक्षेपेणावस्थिताश्चत्वारः परमाणवः प्रागुक्तयुक्तेरेकश्चरमः, द्वौ मध्यवर्तिनावचरमाविति, अन्ये त्वभिदधति–चतुर्णां परमाणूनां क्षेत्रप्रदेशान्तरव्यवहिताधिकत्वपरिणामो न भवति ततभावाद्ध नैष भङ्ग उपपद्यते, प्रतिषिद्धश्च सूत्रे, यतो वक्ष्यति–

''बिचउत्थपंचछट्ठ''मिति प्राकृतशैल्या 'छट्ठ' 'अट्ठ' इत्येतयोः पदयोर्निर्देशः, ततोऽयमर्थः–षष्ठमष्टमं च वर्जयित्वेति, अथ नामैवंरूपोऽपि भङ्गो भवति तदैवं गम्यते–ये एकवेष्टका अव्यवधानेन चत्वारः परमाणवस्ते तथाविधैकत्वपरिणामपरिणतत्वाच्चरमः, तस्मादधिकोऽपि समश्रेण्यैव प्रतिबद्धत्वान्न तदतिरिक्त इति सोऽपि तस्मिन्नेव चरमे गण्यते इत्येकं चरमं, पुनश्च योऽधिकमध्ये व्यवस्थित इति स मध्यवर्तित्वादनेकपरिणामित्वाद्य वस्तुनोऽचरमोऽपि ततोऽ (तश्चरमा) चरमावित्यपि भवति, अत्रापि न कश्चिद् विरोधः, तत्त्वं पुनः केवलिनो विदन्ति, नवमश्चरमौ चाचरमश्च, यदा स एव षट्प्रदेशकः स्कन्धस्त्रिष्वाकाशप्रदेशेषु समश्रेण्या व्यवस्तितेष्वेवमवगाहते–एकैकस्मिन्नाकाशप्रदेशे द्वौ द्वौ परमाणू इति, –तदाऽऽद्यप्रदेशवर्तिनौ द्वौ परमाणू चरमः द्वान्त्यप्रदेशवर्तिनौ चरम इति चरमौ, द्वौ तु मध्यप्रदेशवर्तिनौ एकोऽचरम इति, दशमश्चरमौ चाचरमौ च, स चैवं–यदा स षट्प्रदेशकः स्कन्धश्चतुष्वाकाशप्रदेशेषु समश्रेण्या व्यवस्थितेष्वेवमगाहते–द्वावाद्ये प्रदेशे द्वौ द्वितीये एकस्तृतीये एकश्चतुर्थे इति,

तदा द्वौ परमाणू प्रथमप्रदेशवर्तिनावेकश्चरमः एकोऽन्त्यप्रदेशवर्ती चरम इति चरमौ द्वौ परमाणू द्वितीयप्रदेशवर्तिनावेकोऽचरमः एकस्तृतीयप्रदेशवर्ती अचरम इत्यचरमावपि द्वौ, एकादशश्चरमश्चावक्तव्यश्च, स चैवं–यदा स एव षट्प्रदेशात्मकः स्कन्धस्त्रिष्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते–द्वावाद्ये प्रदेशे द्वौ समश्रेण्या व्यवस्थिते द्वितीये प्रदेशे द्वौ विश्रेणिस्थे तृतीये प्रदेशे, तदा द्विप्रदेशावगाढाश्चत्वारः परमाणवः समश्रेणिव्यवस्थितद्विप्रदेशावगाढद्व्यणुकस्कन्धवदेकश्चरमः द्वौ च विश्रेणिस्थप्रदेशावगाढौ परमाणुवदेकोऽवक्तव्यः, द्वादशश्चरमश्चावक्तव्यौ च, तत्र यदा स षट्प्रदेशात्मकः स्कन्धश्चतुष्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते–द्वौ परमाणू प्रथम् प्रदेशे द्वौ समश्रेणिव्यवस्थिते द्वितीये प्रदेशे एकः ततः परमुपरि तृतीये प्रदेशे एकश्चाधश्चतुर्थे इति,

तदा चत्वारः परमाणवो द्विप्रदेशावगाढाः पूर्ववदेकश्चरमः द्वौ च विश्रेणिस्थप्रदेश-

दवयावगाढाववक्तव्याविति, त्रयोदशश्चरमौ चावक्तव्यश्च, यदा स एव षट्प्रदेशकः स्कन्धः पञ्चस्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते–द्वौ परमाणू द्वयोराकाशप्रदेशयोः समश्रेणिव्यवस्थितयोः द्वौ तयोरेवाधः समश्रेणिव्यवस्तितयोराकाशप्रदेशयोः श्रेणिद्वयमध्यभागसमश्रेणिस्थे चैकस्मिन्नाकाशप्रदेशे द्वाविति, तदा द्विप्रदेशावगाढद्व्यणुकस्कन्धवदुपरितनद्विप्रदेशावगाढौ द्वौ परमाणू एकश्चरमो द्वावधस्तनाविति चरमौ, द्वावेकप्रदेशावगाढौ परमाणुवदेको ऽवक्तव्यः, चतुर्दशश्चरमौ चावक्तव्यौ च, तत्र यदा स एव षट्प्रदेशकः स्कन्धःषट्स्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते--द्वौ परमाणू द्वयोराकाशप्रदेशयोः समश्रेण्या व्यवस्थितयोः द्वौ तयोरेवाधः समश्रेणिव्यवस्तितयोराकाशप्रदेशयोः एकः श्रेणिद्वयमध्यभागसमश्रेणिस्थे प्रदेशे,

एक उपरितनयोर्द्वयोर्विश्रोणिस्थे, तदा द्वावुपरितनावेकश्चरमो द्वावधस्तनाविति चरमौ द्वौ चावक्तव्याविति, एकोनविंशतितमश्चरमश्चारमश्चावक्तव्यः, स चैवं–यदा स षट्प्रदेशकः स्कन्धः षट्स्वाकाशप्रदेशेषु एकपरिक्षेपेण विश्रेणिस्थकैधिकमवगाहते, , तदा एकवेश्टकाश्चत्वारः परमाणवःप्रागुक्तयुक्तरेकश्चरम एकोऽचरमो मध्यवर्ती एकोऽवक्तव्यः, यश्च विंशतितमश्चरमश्चाचरमश्चावक्तव्यौ च, स सप्तमप्रदेशकस्यैवोपपद्यते न षट्प्रदेशकस्य, योऽप्येकविंशतितमश्चरमश्चाचरमौ चावक्तव्यश्च, सोऽपि सप्तप्रदेशकस्यैव न षट्प्रदेशकस्य, यस्तु द्वाविंशतितमश्चरमश्चाचरमौ चावक्तव्यौ च, सोऽप्यतेशकस्यैवेति, त्रयोऽप्येते विंशत्यादयोऽत्र प्रतिषिद्धाः, यश्च त्रयोविंशतितमश्चरमौ चाचरमश्चावक्तव्यः,

स एवं–यदा स एव षट्प्रदेशकः स्कन्धश्चतुष्वाकाशप्रदेशेष्वेवमवगाहते–द्वौ द्वौ परमाणू द्वयोराकाशप्रदेशयोः एकस्तयोरेव समश्रेणिस्थे तृतीये आकाशप्रदेशे एको विश्रेणिस्थे इति, तदा आद्यप्रदेशावगाढौ द्वौ परमाणू चरमस्तृतीयप्रदेशावगाढश्चरम इति द्वौ चरमौ द्वितीयप्रदेशावगाढौ द्वौ परमाणू चरमो विश्रेणिस्थोऽवक्तव्यः, चतुर्विंशतितमः चरमौ चाचरमश्चावक्तव्यौ च, तत्र यदा स एव षट्प्रदेशात्मकः स्कन्धः पञ्चस्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते–त्रिष्काकाशप्रदेशेषु समश्रेण्या व्यवस्थितेष्वाद्ये एकः द्वितीये एकः तृतीये द्वौ द्वयोर्विश्रेणिस्थयोरेकैक इति, तदा आद्यन्त प्रदेशावगाढौ चरमौ मध्यावगाढोऽचरमः विश्रेणिस्थप्रदेशद्वयावगाढौ अवक्तव्यौ, पञ्चविंशतितमः चरमौ चाचरमौ चावक्तव्यश्च, यदा स एव षट्प्रदेशात्मकः स्कन्ध पञ्चसु प्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते–चतुष्वाकाशप्रदेशेषु समश्रेणिव्यवस्थितेष्वाद्यप्रदेशत्रये एकैकश्चतुर्थे द्वौ पञ्चमे विश्रेणिस्थे एकः, तदा आद्यन्तप्रदेशवर्तिनो चरमौ मध्यप्रदेशद्वयवर्तिनौ द्वाचरमौ विश्रेणियप्रदेशस्थ एकोऽवक्तव्यः, षड्विंशतितम; चरमौ चाचरमौ चावक्तव्यौ च, स चैवं–यदा स षट्प्रदेशकः स्कन्धः षट्स्वाकाशप्रदेशेषु समश्रेण्या विश्रेण्या चैवमवगाहते–

तदा आद्यन्तप्रदेशावगाढौ द्वौ चरमौ द्वौ मध्यप्रदेशावगाढावचरमौ द्वौ च विश्रेणिस्थप्रदेशद्वयावगाढववक्तव्याविति। 'सत्तपएसिए णं भंते! खंधे' इत्यादि प्रश्नसूत्रं प्राग्वत, निर्वचनमाह–'गोयमा ! सत्तपएसिए णं खंधे सिय चरमे नो अचरमे' इत्यादि, इह द्वितीयचतुर्थपञ्चमषष्ठपञ्चदशषोडशसप्तदशाष्टादशद्वाविंशतितमरूपा नव भङ्गाः प्रतिषेध्याः, शेषा उपादेयाः, वक्ष्यति च–

॥ १ ॥ "बिचउत्थपंचछट्ठं पन्नरसोलं च सत्तरट्ठारं।
वज्जिय बावीसइमं सेसा भंगा उ सत्तमए ॥"

तत्र द्व्यादीनामष्टादशपर्यन्तानां प्रतिषेधकारणं प्रागुक्तमनुसर्तव्यं न केवलमत्र किन्तु सर्वेष्वप्युत्तरेषु स्कन्धेषु, यस्तु द्वाविंशतितमः सोऽष्टप्रदेशकस्यैव घटते न सप्तप्रदेशकस्येत्युक्तं प्राक्, तत इह प्रतिषेधः, शेषास्तु प्रथमादयः षड्विंशतितमपर्यन्ताः सप्तदश भङ्गाः षट्प्रदेशकस्कन्धस्येव भावनीयाः, केवलं विनेयजनानुग्रहाय स्थापनामात्रेणोपदर्श्यन्ते–प्रथमो भङ्गश्चरमभङ्गः, तृतीयोऽवक्तव्यः, सप्तमश्चरमश्चाचरमश्च अष्टमश्चरमश्चाचरमौ च नवमश्चरमौ चाचरमश्च दशमश्चरमौ चाचरमौ च एकादशश्चरमश्चावक्तव्यश्च द्वादशश्चरमश्चावक्तव्यौ च त्रयोदशश्चरमौ चावक्तव्यश्च चतुर्दशश्चरमौ चावक्तव्यौ च एकोनविंशतितमश्चरमश्चाचरमश्चावक्तव्यश्च विंशतितमश्चरमश्चाचरमश्चावक्तव्यौ च एकविंशतितमश्चरमश्चाचरमौ चावक्तव्यश्च त्रयोविंशतितमश्चरमौ चाचरमश्चावक्तव्यश्च चतुर्विंशतितमश्चरमौ चाचरमश्चावक्तव्यश्च पञ्चविंशतितमश्चरमौ चाचरमौ चावक्तव्यश्च षड्विंशतितमश्चरमौ चाचरमौ चावक्तव्यौ च इह यस्मात्सप्तप्रादेशिकः स्कन्ध एकस्मिन्नाकाशप्रदेशेऽवगाहते द्वयोरि त्रिष्वपि यावत्सप्तस्वपि तत एवं भङ्गाः संभवन्ति ॥

'अट्ठपएसिए णं भंते ! खंधे' इत्यादि प्रश्नसूत्रं प्राग्वत्, निर्वचनसूत्रं 'अट्ठपएसिए णं खंधे सिय चरमे' इत्यादि, अत्र द्वितीयचतुर्थपञ्चमषष्ठपञ्चदशषोडशसप्तदशाष्टादशरूपा अष्टौ भङ्गाः प्रतिषेध्याः, शेषा ग्राह्याः, वक्ष्यति च–

॥ १॥ "विचउत्थपंचछट्ठं पन्नर सोलं च सत्तरऽट्ठारं ।
एए वज्जिय भंगा सेसा सेसेसु खंधेसु ॥"

सुगमा, नवरं 'सेसा सेसेसु खंधेसु' इति शेषाः भङ्गाः शेषेषु सप्तप्रदेशकात् स्कन्धादितरेषु–अष्टप्रदेशादिकेषु सर्वेषु स्कन्धेषु द्रष्टव्याः, अन्ये त्वेवमुत्तरार्द्धं पठन्ति–"एए वज्जिय भंगा तेण परमवट्ठिया सेसा" सुगमं, ते च प्रथमादयो भङ्गाः षड्विंशतिपर्यन्ता अष्टादश भावनातः प्रागवद् भावनीयाः, नवरं 'चरमश्चाचरमौ चावक्तव्यौ च' इत्येवंरूपो द्वाविंशतितमो भङ्गः अथ द्विप्रदेशकादिषु स्कन्धेषु अवक्तव्यौ इत्येवंरूपः षष्ठो भङ्गः कस्मात्प्रतिषिध्यते ?, तस्यापि युक्तितः संभवभावात्, तथाहि–यदैकः परमाणुरेकस्मिन्नाकाशप्रदेशे द्वितीयो विश्रेणिस्थे प्रदेशे, तथा एकोऽप्यवक्तव्यो द्वितीयोऽप्यवक्तव्य इति भवत्यवक्तव्यावितिं भङ्गः, प्रदेशकचिन्तायामेकस्मिन्नेकः परमाणुः अपरस्मिन् द्वौ चतुष्प्रदेशकचिन्तायां प्रत्येकं द्वौ द्वौ परमाणू इत्यादि, सत्यमेतत्, केवलमेवंरूपं जगति द्रव्यमेव नास्ति, कथमेतदवसितम् ? इति चेत्, उच्यते, अत एव प्रतिषेधवचनात्, यदि हि तथारूपं द्रव्यं संभवेदनाचार्यःप्रतिषेधं कुर्यादिति, यदिवा संभवेऽपि जातिपरनिर्देशात् तृतीयभङ्गक एवान्तर्भावो वेदितव्यः

यथा चाष्टप्रदेशके स्कन्धे भङ्गाः प्रतिषेध्या विधेयाश्चोक्तास्तथा संख्यातप्रदेशके असंख्यातप्रदेशके च प्रत्येकं वक्तव्याः, तथा चाह–'संखेज्जपएसिए असंखेज्जपएसिए' इत्यादि, पाठसिद्धं, नवरमियं सर्वत्र भावना–यस्मादेकादिष्वप्याकाशप्रदेशेष्वष्टप्रदेशकादीनां स्कन्धानामवगाहो भवति तथा(तो) घटन्ते यथोक्ताः सर्वेऽपि भङ्गाः, नन्वसंख्यातप्रदेशात्मकस्यानन्तप्रदेशात्मकस्य च स्कन्धस्य कथमेकस्मिन्नाकाशप्रदेशेऽवगाहः ?, उच्यते, [तथा] तथामाहात्म्यात्, न चैतदनुपपन्नं, युक्तितः सम्भाव्यमानत्वात्, तथाहि–अनन्तानन्ता द्विप्रदेशकाः स्कन्धा यावदनन्तानन्ताः संख्येयप्रदेशात्मकाः अनन्तानन्ता असंख्येयप्रदेशात्मकाः स्कन्धा अनन्तानन्ता अनन्तप्रदेशात्मकाः, लोकश्च

सर्वात्मनाऽप्यसंख्येयप्रदेशात्मकस्ते च सर्वेऽपि लोक एवावगाढा नालोके, ततोऽवसीयते सन्त्येकस्मिन्नप्याकाशप्रदेशेऽवगाढा बहवःपरमाणवो बहवो द्विप्रदेशकाः स्कन्धाः यावद्बहवोऽनन्तप्रदेशात्मकाः स्कन्धाः, तथा चात्र पूर्वसूरयः प्रदीपदृष्टान्तमुपदर्णयन्ति–

यथैकस्य प्रदीपस्य गृहमध्ये प्रज्वलितस्य प्रभापरमाणवः सर्वमेव गृहं प्राप्नुवन्ति तथा प्रत्येकं प्रदीपसहस्रस्यापि, न च प्रतिप्रदीपं प्रभापरमाणवो न भिन्नाः, प्रतिप्रदीपे पुरुषस्य मध्यस्थितस्य छायादिदर्शनात्, ततो यथैते स्थूला अपि प्रदीपप्रभापरमाणवः एकस्मिन्नप्याकाशप्रदेशे बहवो मान्ति तथा परमाण्वादयोऽपीति न कश्चिद्दोषः आकाशस्य ततो तथाऽवकाशदानस्वभावतया वस्तूनां च विचित्रपरिणमनस्वभावतया विरोधाभावात्, सम्प्रति परमाण्वादिषु ये भङ्गा ग्राह्याः ये च षष्ठादिषु न ग्राह्यास्तत्सङ्ग्रहिकाः संग्रहणिगाथा आह–

मू. (३६६) *परमाणुम्मि य तइओ पढमो तइओ य होंति दुपएसे।*
पढमो तइओ नवमो एक्कारसमो य तिपएसे॥

मू. (३६७) *पढमो तइओ नवमो दसमो एक्कारसो य बारसमो।*
भंगा चउप्पएसे तेवीसइमो य बोद्धव्वो॥

मू. (३६८) *पढमो तइओ सत्तमनवदसइक्कारबारतेरसमो।*
तेवीसचउव्वीसो पणवीसइमो य पंचमए॥

मू. (३६९) *विचउत्थपंचछट्ठं पनरस सोलं च सत्तरट्ठारं।*
वीसेक्कवीस बावीसगं च वज्जेज्ज छट्ठंमि।

मू. (३७०) *विचउत्थपंचछट्ठं पन्नर सोलं च सत्तरट्ठारं।*
बावलीसइमविहूणा सत्तपदेसंमि खंधम्मि॥

मू. (३७१) *विचउत्थ पंचछट्ठं पन्नर सोलं च सत्तरट्ठारं।*
एते वज्जिय भंगा सेसा सेसेसु खंधेसु॥

वृ. 'परमाणुंमि य तइओ' इत्यादि, पाठसिद्धं, भावितार्थत्वात्, नवरं षट्प्रदेशादिचिन्तायां प्रतिषेध्या भङ्गाः स्तोका इति लाघवार्थं त एव संगृहीताः।

इहानन्तरं स्कन्धानां चरमाचरमादिवक्तव्यतोक्ता, स्कन्धाश्च यथायोगं परिमण्डलादिसंस्थानवन्तो भवन्ति इत्यतः संस्थानवक्तव्यतामाह–

मू. (३७२) *कइ णं भंते! संठाणा पं०, गो० पंच संठाणा पं०, तं०–परिमंडले वट्टे तंसे चउरंसे आयते य। परिमंडला णं भंते! संठाणा किं संखेज्जा असंखेज्जा अणंता?, गो०! नो संखिज्जा नो असंखेज्जा अनंता, एवं जाव आयता। परिमंडले णं भंते! संठाणे किं संखेज्जपएसिए असंखेज्जपदेशिए अनंतपदेसिए?, गो०! सिय संखेज्जपएसिए सिय असंखेज्जपएसिए सिय अनंतपदेसिए एवं जाव आयते।*

परिमंडले णं भंते! संठाणे संखेज्जपएसिए किं संखेज्जपएसोगाढे असंखेज्जपएसोगाढे अनंतपएसोगाढे?, गो०! संखेज्जपएसगोगाढे नो असंखेज्जपएसोगाढे नो अनंतपएसोगाढे, एवं जाव आयते, परिमंडले णं भंते! संठाणे असंखेज्जपएसिए किं संखेज्जपएसोगाढे असंखेज्जपएसोगाढे अनंतपएसोगाढे?, गो०! सिय संखेज्जपएसोगाढे सिय असंखेज्जपएसोगाढे नो अनंतपएसोगाढे

एवं जाव आयते, परिमंडले णं भंते! संठाणे अनंतपएसिए किं संखेज्जपएसोगाढे असंखेज्जपएसोगाढे अनंतपएसोगाढे?, गो० ! सिय संखेज्जपएसोगाढे सिय असंखेज्जपएसो गाढे नो अनंतपएसोगाढे, एवं जाव आयते। परिमंडले णं भंते! संठाणे संखेज्जपएसिए संखेज्जपएसोगाढे किं चरमे अचरमे चरमाइं अचरमाइं चरमंतपएसा अचरमंतपएसा?, गो० ! परिमंडले णं संठाणे संखेज्जपएसिए संखेज्जपएसोगाढे नो चरमे नो अचरमे नो चरमाइं नो अचरमाइं नो चरमंतपएसा नो अचरमंतपएसा, नियमं अचरमं चरमाणि य चरमंतपएसा य अचरमंतपसा य, एवं जाव आयते,

परिमंडले णं भंते! संठाणे असंखेज्जपएसिए संखेज्जपएसोगाढे किं चरमे० पुच्छा, गो० ! असंखेज्जपएसिए संखेज्जप-एसोगाढे जहा संखेज्जपएसिए, एवं जाव आयते, परिमंडले णं भंते! संठाणे असंखेज्जपएसिए असंखेज्जपएसोगाढे किं चरमे पुच्छा, गो० ! असंखिज्जपएसिए असंखिज्जपएसोगाढे नो चरमे जहा संखेज्जपदेशोगाढे एवं जाव आयते, परिमंडले णं भंते! संठाणे अनंतपएसिए संखिज्जपएसोगाढे किं चरमे० पुच्छा, गो० ! तहेव जाव आयते, अणनतपएसिए असंखेज्जपएसोगाढे जहा संखेज्जपए- सोगाढे, एवं जाव आयते।

परिमंडलस्स णं भंते! संठाणस्स संखेज्जपएसियस्स संखेज्जपएसोगाढस्स अचरिमस्स य चरिमाण य चरमंतपदेसाण य अचरमंतपएसाण य दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए कयरे२हिंतो अ० ब० तु० वि०?, गो० ! सव्वत्थोवे परिमंडलस्स संठाणस्स संखेज्जपएसियस्स संखेज्जपएसोगाढस्स दव्वट्ठयाए एगे अचरिमे चरिमाइं संखेज्जगुणाइं अचरमं चरमाणि य दोऽवि विसेसाहियातिं पदेसट्ठयाए सव्वत्थोवा परिमंडलस्स संठाणस्स संखिज्जपएसियस्स संखेज्जपए-सोगाढस्स चरमंतपएसा अचरमंतपएसा संखेज्जगुणा चरमंतपएसा य अचरमंतपएसा य दोऽवि विसेसाहिया दव्वट्ठपएसट्ठयाए सव्वत्थोवे परिमंडलस्स संठाणस्स संखेज्जपएसियस्स संखेज्जपए-सोगाढस्स दव्वट्ठयाए एगे अचरिमे चरिमाइं संखेज्जगुणातिं अचरमं च चरमाणि य दोवि विसेसाहि-यातिं चरमंतपएसा संखेज्जगुणा अचरिमंतपएसा संखेज्जगुणा चरिमंतपएसा य अचरमंतपएसा य दोवि विसेसाहिया एवं वट्टतंसचउरंसायएसुवि जोएयव्वं।

परिमंडलस्स णं भंते! संठाणस्स असंखेज्जपएसियस्स संखेज्जपएसोगाढस्स अचरमस्स चरमाण य चरमंतपएसाण य अचरमंतपएसाण य दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए कयरे २ हिंतो अ० ब० तु० वि०?, गो० ! सव्वत्थोवे परिमंडलस्स संठाणस्स असंखेज्जपएसिअस्स संखेज्जपएसोगाढस्स दव्वट्ठयाए एगे अचरमे चरमातिं संखेज्जगुणातिं, अचरमं च चरमाणि य दोवि विसेसाहियातिं पदेसट्ठयाते सव्वत्थोवा परिमंडलसंठाणस्स असंखेज्जपएसियस्स संखेज्जपएसोगाढस्स चरमंतपएसा अचरमंतपएसा संखिज्जगुणा चरमंतपएसा य अचरमंतपएसा य दोवि विसेसाहिया दव्वट्ठयाएसट्ठयाए सव्वत्थोवे परिमंडलस्स संठाणस्स असंखेज्जपएसियस्स संखेज्जपएसोगाढस्स दव्वट्ठयाए एगे अचरिमे चरमातिं संखेज्जगुणातिं अचरमं च चरमाणि य दोवि विसेसाहियातिं चरमंतपएसा संखेज्जगुणा अचरमंतपएसा संखेज्जगुणा चरमंतपएसा य अचरमंतपएसा य दोवि विसेसाहिया, एवं जाव यआते।

परिमंडलस्स णं भंते! संठाणस्स असंखेज्जपएसियस्स असंखेज्जपएसोगाढस्स अचरमस्स चरमाण य चरमंतपएसाण य अचरमंतपएसाण य दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए

कयरेरहिंतो अ० ब० तु० वि० ?, गो० ! जहा रयणप्पभाए अप्पाबहुयं तहेव निरवसेसं भाणियव्वं, एवं जाव आयते ।

परिमंडलस्स णं भंते ! संठाणस्स अनंतपएसियस्स संखेज्जपएसोगाढस्स अचरिमस्स य ४ दव्वट्ठयाए ३ कयरेरहिंतो अ० ब० तु० वि० गो० ! जहा संखेज्जपएसिअस्स संखेज्जपएसोगाढस्स, नवरं संकमेणं अनंतगुणा, एवं० जाव आयए, परिमंडलस्स णं भंते ! संठाणस्स अनंतपएसियस्स असंखेज्जपएसोगाढस्स अचरमस्स य जहा रयणप्पभाए, नवरं संकमे अनंतगुणा, एवं जाव आयते

वृ. 'कइ णं भंते ! संठाणा पं०' इत्यादि सुगमं, परिमण्डलादीनां संस्थानानां स्वरूपस्याधः प्रथमपद एव सविस्तरं प्ररूपितत्वात् शेषं पाठसिद्धं, नवरं 'परिमंडले णं भंते ! संठाणे संखेज्जपएसिए किं संखेज्जपएसोगाढे पुच्छा, गो० ! संखेज्जपएसोगाढे नो असंखेज्जपएसोगाढे नो अनंतपएसोगाढे' इति यस्मात् तस्य सङ्ख्येया एव प्रदेशास्ततः कथमसङ्ख्येयेष्वनन्तेषु वा प्रदेशेष्ववगाहते इति, असङ्ख्यातप्रदेशात्मकमननअप्रदेशात्मकं वा पुनः परिमण्डलसंस्थानं सङ्ख्येयेष्वसङ्ख्येयेषु वा प्रदेशेष्ववगाहते विरोधाभावान्नानन्तप्रदेशेषु असङ्ख्यातप्रदेशात्मकस्यानन्तेषु प्रदेशेष्वगाहनाविरोधात् अनन्तप्रदेशात्मकस्यापि विरोध एव, यस्माल्लोकोऽप्यसङ्ख्यातप्रदेशात्मक एव, लोकादन्यत्र च पुद्गलानां गत्यसम्भवः, तस्मादनन्तप्रदेशिकमप्यसङ्ख्येयेषु प्रदेशेष्ववगाहते नानन्तेषु, एवं वृत्तादीन्यपि संस्थानानि प्रत्येकं भावनीयानि, सङ्ख्यातप्रदेशासङ्ख्यातप्रदेशानन्तप्रदेशपरिमण्डलादिसंस्थानचरमाचरमादिचिन्तायां निर्वचनसूत्राणि रत्नप्रभाया इव प्रत्येतव्यानि, अनेकावयवावविभागात्मकत्वविवक्षायामचरमं च चरमाणि चेति निर्वचनं प्रदेशविवक्षायां चरमान्तप्रदेशाश्चरमान्तप्रदेशाश्च ।

सम्प्रति सङ्ख्यातप्रदेशस्य सङ्ख्यातप्रदेशावगाढस्य परिमण्डलादेश्चरमाचरमादिविषयमल्पबहुत्वमभिधित्सुराह–'परिमंडलस्स णं भंते !' इत्यादि, सुगमं नवरं द्रव्यार्थतायां 'चरमाणि संखेज्जगुणाइं'; इति सर्वात्मना परिमण्डलसंस्थानस्य सङ्ख्यातप्रदेशात्मकत्वात्, असङ्ख्यातप्रदेशस्यासङ्ख्यातप्रदेशावगाढस्यल्पबहुत्वं रत्नप्रभाया इव भावनीयं, अनन्तप्रदेशकस्याप्यसङ्ख्यातप्रदेशावागढस्य, नवरं 'संकमे अनन्तगुणा' इति क्षेत्रचिन्तातो यदा द्रव्यचिन्तां प्रति सङ्क्रमणं तदा तानि चरमाण्यनन्तगुणानि वक्तव्यानि, तथथा–'सव्वत्थोवे एगे अचरमे चरमाइं खेत्ततो असंखेज्जगुणाइं दव्वओ अनंतगुणाइं अचरमं चरमाणि य दोवि विसेसाहियाइं' इति ॥

तदेवं संस्थानान्यपि चरमाचरमादिविभागेन चिन्तितानि, सम्प्रति जीवादीन् चरमाचरमविभागेन चिन्तयति० ।

मू. (३७३) *जीवे णं भंते ! गतिचरमेणं किं चरमे अचरमे ?, गो० ! सिय चरमे सिय अचरमे, नेरइए णं भंते ! गतिचरमेणं किं चरिमे अचरिमे ?, गो० ! सिय चरमे सिय अचरमे एवं निरंतरं जाव वेमाणिए, नेरइया णं भंते ! गतिचरमेणं किं चरिमा अचरिमा ?, गो० ! चरिमावि अचरिमावि, एवं निरंतरं जाव वेमाणिया ।*

नेरइए णं भंते ! ठितीचरमेणं किं चरमे अचरमे ?, गो० ! सिय चरमे सिय अचरमे, एवं निरंतरं जाव वेमाणिए, नेरइया णं भंते ! ठितीचरमेणं किं चरमा अचरमा ?, गो० ! सिय चरमे सिय अचरमे, एवं निरंतरं जाव वेमाणिए, नेरइया णं भंते ! भवचरमेणं किं चरमा अचरमा ?,

गो० ! चरमावि अचरमावि, एवं निरंतरं जाव वेमाणिया ।

नेरइए णं भंते ! भासाचरमेणं किं चरमे अचरमे ?, गो० ! सिय चरमे सिय अचरमे, एवं निरंतरं जाव वेमाणिए, नेरइया णं भंते ! भासाचरमेणं किं चरमा अचरमा ?, गो० ! चरमावि अचरमावि, एवं जाव एगिंदियवज्जा, निरंतरं जाव वेमाणिया । नेरइए णं भंते ! आणापाणुचरमेणं किं चरमे अचरमे ?, गो० ! सिय चरमे सिय अचरमे, एवं निरंतरं जाव वेमाणिए, नेरइया णं भंते आणापाणुचरमेणं किं चरमा अचरमा ?, गो० ! चरमावि अचरमावि, एवं निरंतरं जाव वेमाणिया

नेरइए णं भंते ! आहारचरमेणं किं चरमे अचरमे ?, गो० ! सिय चरमे सिय अचरमे, एवं निरंतरं जाव वेमाणिए, नेरइया णं भंते ! आहारचरमेणं किं चरमा अचरमा ?, गो० ! चरमावि अचरमावि, एवं निरंतरं जाव वेमाणिया । नेरइए णं भंते ! भावचरमेणं किं चरमे अचरमे ? गो० सिय चरमे सिय अचरमे, एवं निरंतरं जाव वेमाणिए, नेरइया णं भंते ! भावचरमेणं किं चरमा अचरमा ?, गो० ! चरमावि अचरमावि, एवं निरंतरं जाव वेमाणिया ।

नेरइए णं भंते ! वण्णचरमेणं किं चरमे अचरमे !, गो० ! सिय चरमे सिय अचरमे, एवं निरंतरं जाव वेमाणिए, नेरइया णं भंते ! वण्णचरमेणं किं चरमा अचरमा ?, गो० ! चरिमावि अचरिमावि, एवं निरंतरं जाव वेमाणिया । नेरइए णं भंते ! गंधचरमेणं किं चरमे अचरमे ?, गो० सिय चरमे सिय अचरमे, एवं निरंतरं जाव वेमाणिए, नेरइया णं भंते ! गंधचरमेणं किं चरमा अचरमा ?, गो० !चरमावि अचरमावि, एवं निरंतरं जाव वेमाणिया ।

नेरइए णं भंते ! रसचरमेणं किं चरमे अचरमे ?, गो० ! सिय चरमे सिय अचरमे, एवं निरंतरं जाव वेमाणिए, नेरइया णं भंते ! रसचरमेणं किं चरमा अचरमा ?, गो० !चरमावि अचरमावि, एवं निरंतरं जाव वेमाणिया । नेरइए णं भंते ! फासचरमेणं किं चरमे अचरमे ?, गो० ! सिय चरमे सिय अचरमे, एवं निरंतरं जाव वेमाणिए, नेरइया णं भंते ! फासचरमेणं किं चरमा अचरमा ?, गो० ! चरमावि अचरमावि एवं जाव वेमाणिया । संगहणिगाहा

मू. (३७४) *''गतिठिइभवे य भासा आणापाणुचरमे य बोद्धव्वा ।*
आहारभावचरमे वण्णरसे गंधफासे य ॥''

वृ. 'जीवे णं भंते ! गइचरमेणं किं चरमे ?' इत्यादि, गतिपर्यायरूपं चरमं गतिचरमं तेन जीवो भदन्त ! चिन्त्यमानः किं चरमः अचरमः ?, भगवानाह–हे गौतम ! स्यात् चरमः स्यादचरमः, कश्चिच्चरमः कश्चिदचरम इत्यर्थः, तत्र यः पृच्छासमये सामर्थ्यान्मनुष्यगतिरूपे पर्याये वर्त्तमानोऽनन्तरं न किमपि गतिपर्यायमवाप्स्यति, किन्तु मुक्त एव भविता स गतिचरमः, शेषस्त्वगतिचरम इति, 'नेरइए णं भंते ! गइचरमे' इत्यादि, नैरयिको भदन्त ! गतिचरमेण सामर्थ्यान्नरकगतिपर्यायरूपेणं चरमेण चिन्त्यमानः किं चरमः अचरमो वा ?, भगवानाह–गौतम ! स्याच्चरमः स्यादचरमो, नरकगतिपर्यायादुद्धृतो न भूयोऽपि नरकगतिपर्यायमनुभविष्यति स तु चरमः शेषस्त्वचरमः,

एवं चतुर्विंशतिदण्डकक्रमेणं निरन्तरं तावद् वक्तव्यं यावद् वैमानिकावैमानिकसूत्रं, बहुवचनदण्डकसूत्रे निर्वचनं 'चरमावि अचरमावि' इति, पृच्छासमये ये केचन नैरयिकास्तेषां मध्येऽवश्यं केचन नैरयिकगतिपर्यायेण चरमा इतरे त्वचरमास्तत एकमेवेदमत्र निर्वचनं चरमा अपि अचरमा अपि, एवं सर्वस्थानेष्वपि तां तां गतिमधिकृत्य भावनीयं । 'नेरइए णं भंते !

ठिइचरमेणं' इत्यादि, नैरयिको भदन्त ! तत्रैव नरकेषु चरमसमये स्थितिपर्यायरूपेण चरमेण चिन्त्यमानः किं चरमोऽचरमो वा ?, भगवानाह–स्याच्चरमः स्यादचरमः, किमुक्तं भवति ?–यो भूयोऽपि नरकमागत्य स्थितिचरसमयं प्राप्स्यति सोऽचरमः शेषस्तु चरमः, एवं निरन्तरं यावद् वैमानिकः, बहुत्वदण्डकचिन्तायां 'रमावि अचरमावि' इति, इह ये पृच्छासमये स्थितिचरमसमये वर्त्तन्ते, ते चिन्त्यन्ते इत्येतन्न, अन्यथा उद्वर्त्तनाया विरहस्यापि सम्भवात् एकादीनामपि चोद्वर्त्तनाया भावात् 'चरमावि अचरमावी' त्युभयत्राप्यवश्यंभाविना बहुवचनेन निर्वचनं नोपपद्यते, किन्तु ये पृच्छासमये वर्त्तन्ते ते क्रमेण स्वस्वस्थितिचरमसमयं प्राप्ताः सन्तस्तेन रूपेण चरमा अचरमा वा इत्येतच्चिन्तनेन उपपद्यते यथोक्तं निर्वचनमिति, भवचरमसूत्रं गतिचरमसूत्रवत्, 'नेरइए णं भंते ! भासाचरमेण' मित्यादि, भाषाचरमं चरमभाषा, ततोऽयमर्थः–नैरयिको भदन्त ! चरमाया भाषाय किं चरमोऽचरमो वा ?, शेषं सुगमं, बहुवचनसूत्रे प्रश्नभावार्थो–ये पृच्छासमये नारका ते स्वकालक्रमेण चरमां भाषां प्राप्ताः सन्तः तया चरमया भाषया चरमा अचरमा वा इति, ततो निर्वचनसूत्रमप्युपपन्नं, एवमुच्छ्वासाहारसूत्रे अपि भावनीये, भाव औदयिकः, शेषं सुगमं ॥

पदं – १० – समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे
दशमपदस्य मलयगिरिआचार्येण विरचितावृत्तिका धारेसमाप्ता

पदं – ११ – "भाषा"

वृ. तदेवं व्याख्यातं दशमं पदं, इदानीमेकादशमारभ्यते, तस्य चामभिसम्बन्धः, इहानन्तरपदे सत्त्वानां यदुपपातक्षेत्रं रत्नप्रभादि तस्य चरमाचरमविभागः प्रतिपादितः इह [सत्या १ मृषा २ सत्यामृषा ३ असत्यामृषा४] भाषा पर्याप्तानां सत्यादिभाषाविभागोपदर्शनं क्रियते, तत्र चेदमादिसूत्रम्–

मू. (३७५) *से नूनं भंते ! मण्णामीति ओहारिणी भासा चिंतेमीति ओहारिणी भासा अह मण्णामीति ओधारिणी भासा अह चिंतेमीति ओधारणी भासा तह मण्णामीति ओधारिणी भासा तह चिंतेमीति ओहारिणी भासा ?, हंता गो० ! मण्णामीति ओधारिणी भासा चिंतेमीति ओधारिणी भासा अह मण्णामीति ओधारिणी भासा अह चिंतेमीति ओधा० तह मण्णामीति ओधा० तह चिंकतेमीति ओधा०, ओहारिणी णं भंते ! भासा किं सच्चा मोसा सच्चामोसा असच्चामोसा ?, गो० ! सिय सच्चा सिय मोसा सिय सच्चामोसा सिय असच्चामोसा,*

–से केणट्ठेणं भंते ! एवं वुच्चति–ओधारिणी णं भासा सिय सच्चा सिय मोसा सिय सच्चामोसा सिय असच्चामोसा ?, गो० ! आराहिणी सच्चा विराहिणी मा सा आराहणविराहिणी सच्चामोसा जाणेव आराहणी नेव विराहिणी ने वाराहणविराहिणी सा असच्चमोसा नामं सा चउत्थी भासा, से तेणट्ठेणं गोयमा ! एवं वुच्चति–ओहारिणी णं भासा सिय सच्चा सिय मोसा सिय सच्चामोसा सिय असच्चामोसा ॥

वृ. 'से नूनं भंते ! मण्णामि इति ओहारिणी भासा' इत्यादि, सेशब्दो अथशब्दार्थः, स च वाक्योपन्यासे, नूनमुपमानावधारणतर्कप्रश्नहेतुषु इहावधारणे, भदन्त ! इत्यामन्त्रणे, मन्ये–

अवबुध्ये इति–एवं, यदुत् अवधारणी भाषा अवधार्यते–अवगम्यतेऽर्थोनयेत्यवधारणी–अवबोधबीजभूता इत्यर्थः, भाष्यते इति भाषा, तद्योग्यतया परिणामितनिसृज्यमानद्रव्यसंहतिः एष पदार्थः, वाक्यार्थः पुनरयं–अथ भदन्त ! एवमहं मन्ये, यदुतावश्यमवधारणी भाषेति, न चैतत् सकृत अनालोच्यैव मन्ये, किन्तु चिन्तयामि युक्तिद्वारेणापि परिभावयामीति–एवं यदुत अवधारणीयं भाषेति, एवमात्मीयमभिप्रायं भगवते निवेद्याधिकृतार्थविनिश्चयनिमित्तमेवं भगवन्तं पृच्छति 'अह मण्णामी इह ओहारिणी भासा' इति,

'अथ–प्रक्रियाप्रश्नानन्तर्यमङ्गलोप- न्यासप्रतिवचनसमुच्चयेषु' इह प्रश्ने, काक्वा चास्य सूत्रस्य पाठस्ततोऽयमर्थः–अथ–भगवन्नेवमहं मन्येएवमहं मननं कुर्यां, यथा–अवधारणी भाषेति, [illegible] 'अह चिंतेमी ओहारिणी भासा' इति, अथ भगवन् ! एवमहं चिन्तयामि ? – एवमहं चिन्तनं कुर्यां, यदुतावधारिणी भाषेति निरवद्यमेतदित्यभिप्रायः, सम्प्रति पृच्छासमयात् यथा पूर्वं मननं चिन्तनं वा कृतवानिजानीमपि पृच्छासमये तथैव मननं चिन्तनं वा करोमि नान्यथेति भगवतो ज्ञानेन संवादयितुकामः पृच्छति–'तह मन्नामी इति ओहारिणी भासा तह चिंतेमीति ओहारिणी भासा' इति,

'तथेति समुच्चयनिर्देशावधारणसादृश्यप्रश्नेषु' इह निर्देशे, काक्वा चास्यापि पाठः, ततःप्रश्नार्थत्वावगतिः, भगवन् ! यथा पूर्वं मतवानिदानीमप्यहं तथा मन्ये इति–एवं यदुत अवधारिणी भाषेति, किमुक्तं भवतकि ?–नेदानीन्तनमननस्य पूर्वमननस्य च मदीयस्य कश्चिद्विशेषोऽस्त्येतत् भगवनमनिति, तथा यथा पूर्वं भगवन् ! चिन्तितवान् इदानीमप्यहं तथा चिन्तयामि इत–एवं यदुत अवधारणी भाषेति, अस्त्येतदिति ?,एवं गौतमेनाभिप्रायनिवेदने प्रश्ने च कृते भगवानाह–'हंता गोयमा ! मन्नामी इति ओहारिणी भासा' इति, 'हन्तेति सम्प्रेषणप्रत्यवधारणविवादेषु' इह प्रत्यवधारणे, मन्नामी इत्यादीनि क्रियापदानि प्राकृतशैल्या छान्दसत्वाद्वा युष्मदर्थेऽपि प्रयुज्यन्ते, ततोऽयमर्थः–हन्त गौतम ! मन्यसे त्वं यदुत अवधारणी भाषेति जानाम्यहं केवलज्ञानेनेदमित्यभिप्रायः, तथा चिन्तयसि त्वमित्येवं यदुतावधारणी भाषेति इदमप्यहं वेद्मि केवलित्वात्, 'अह मन्नामी इति ओहारिणी भासा' इति अथेत्यानन्तर्ये, मत्सम्मतत्वात्, ऊर्द्धं निःशङ्कं मन्यस्व, इति–एवं यदुतावधारिणी भाषेति, अथ इत ऊर्ध्वं निःशङ्कं चिन्तय इति–एवं यदुतावधारणी भाषेति, अतीवेदं साध्वनवद्यमित्यभिप्रायः,

तथा तथा–अविकलं परिपूर्णं मन्यस्व इति–एवं यदुतावधारणी भाषेति यथा पूर्वं मतवान्, किमुक्तं भवति ?–यथा त्वया पूर्वं मननं कृतमिदानीमपि मत्सम्मतत्वात् सर्वं तथैव मन्यस्व मा मनागपि शङ्कां कार्षीरिति, तथा तथा अविकलं परिपूर्णं चिन्तय इति–एवं यदुत अवधारिणी भाषेति, यथा पूर्वं चिन्तितवान्, मा मनागपि शङ्किष्ठा इति, तदेवं भाषा अवधारणीति निर्णीतमिदानीमियमवधारिणी भाषा सत्या उत मृषेत्यादिनिर्णयार्थं पृच्छति–'ओहारिणी णं भंते !' इत्यादि, अवधारिणी अवबोधबीजभूता, णमिति प्राग्वत्, भदन्त ! भाषा किं सत्या मृषा सत्यामृषा असत्यामृषा इति, तत्र सन्तो मुनयस्तेषामेनव भगवदाज्ञासम्यगाराधकतया परमशिष्टत्वात् सद्भ्यो हिता–इहपरलोकाराधकत्वेन मुक्तिप्रापिका सत्या, युगादिपाठाभ्युपगमात् यः प्रत्ययः, यद्वा यो यस्मि

हितः स तत्र साधुरिति सत्सु साध्वी सत्या,

'तत्र साधो' विति यः प्रत्ययः, यदिवा सन्तो–मूलोत्तरगुणास्तेषामेव जगति मुक्तिपदप्रापकतया परमशोभनत्वात् अथवा सन्तो–विद्यमानास्ते च भगवदुपदिष्ट एव जीवादयः पदार्थाः अन्येषां कल्पनामात्ररचितसत्ताकतया तत्त्वतोऽसत्त्वात् तेभ्यो हिता तेषु साध्वी वा यथावस्थितवस्तुतत्त्वप्ररूपणेन सत्या, विपरीतस्वरूपा मृषा, उभयस्वभावा सत्यामृषा, या पुनस्तिसृष्वपि भाषास्वनधिकृता–तल्लक्षणायोगतस्तत्रानन्तर्भाविनी सा आमन्त्रणाज्ञापनादिविषया असत्यामृषा, उक्तं च–

॥१॥ "सद्धा हिया सयामिह संतो मुनयो गुणा पयत्था वा।
तव्विवरीया मोसा मीसा जा तदुभयसहावा॥

अणहिगया जा तीसुवि सद्दो ह्रिय केवलो असच्चमुसा" इति, भगवानाह–'गोतम ! सिय सच्चा' इत्यादि, स्यात् सत्या सत्याऽपि भवतीत्यर्थः, एवं स्यादसत्या स्यात्सत्यामृषा स्यादसत्यामृषेति, अत्रैवार्थे प्रश्नमाह 'से केणट्ठेणं भंते !' इत्यादि, सुगमं, भगवानाह–गौतम ! आराधनी सत्या, इह विप्रतिपत्तौ सत्यां वस्तुप्रतिष्ठापनुबध्या या सर्वज्ञमतानुसारेण भाष्यते अस्त्यात्मा सदसन्नित्यानित्याद्यनेकधर्मकलापालिङ्गित इत्यादि सा यथावस्थितवस्त्वभिधायिनी आराध्यते मोक्षमार्गोऽनयेत्याराधनी, आराधिनीत्वात् सत्येति, विराधिनी मृषेति, विराध्यते मुक्तिमार्गोऽनयेति विराधिनी, विप्रतिपत्तौ सत्यां वस्तुप्रतिष्ठाशया सर्वज्ञक्रमतप्रातिकूल्येन या भाष्यते यथा नास्त्यात्मा एकान्तनित्यो वेत्यादि तथा सत्याऽपि परपीडोत्पादिका सा विपरीतवलस्त्वभिधानात् परपीडाहेतुत्वाद्वा मुक्तिविराधनाद्विराधनी विराधिनीत्वाद्वा मृषेति, या तु किञ्चन नगरं पत्तनं वाऽधिकृत्य पञ्चसु दारकेषु जातेष्वेवमभिधीयते,

यथाऽस्मिन् अद्य दश दारका जाता इति सा परिस्थूरव्यवहारनयमतेन आराधनविराधिनी, इयं हि पञ्चानां दारकाणां यज्जन्म तावताऽंशेन संवादनसम्भवादाराधिनी, दश न पूर्यन्ते इत्येतावताऽंशेन विसंवादसम्भवात् विराधिनी, आराधिनी चासौ विराधिनी च आराधनविराधिनी, कर्मधारयत्वात् पुंवद्भावः, आराधनविराधिनीत्वाद्वा सत्यामृषा, या तु नैवाराधनी तल्लक्षणविगमात् नापि विराधिनी विपरीतवत्स्वभिधानाभावात् परपीडाहेतुत्वाभावाद्वा नाप्याराधनविराधिनी एकदेशसंवादविसंवादाभावात्, हे साधो ! प्रतिक्रमणं कुरु स्थण्डिलानि प्रत्युपेक्षस्वेत्यादिव्यवहारपतिता आमन्त्रिण्यादिभेदभिन्ना सा असत्यामृषा नाम चतुर्थी भाषा, 'से एएणट्ठेण'मित्याद्युपसंहारवाक्यं। इह यथावस्थितवस्तुतत्त्वाभधायिनी भाषा आराधिनीत्वात् सत्येत्युक्तं, ततः संशयापन्नस्तदपनोदाय पृच्छति–

मू. (३७६) *अह भंते ! गाओ मिया पसू पक्खी पन्नवणी णं एसा भासा न एसा भासा मोसा ?, हंता गो० ! जा य गाओ मिया पसू पक्खी पन्नवणी णं एसा भासा, [पन्नवणी] न एसा भासा मोसा, अह भंते ! जा य इत्थीवऊ जा य पुरिसवऊ जा य नपुंसगवऊ पन्नवणी णं एसा भासा न एसा भासा मोसा ?, हंता गो० ! जा य इत्थीवऊ जा य पुमवऊ जा य नपुंसगवऊ पन्नवणी णं एसा भासा न एसा भासा मोसा,*

अह भंते ! जा य इत्थिआणमणी जा य पुमआणवणी जा य नपुंसगआणमणी पन्नवणी

णं एसा भासा न एसा भासा मोसा ?, हंत गो० ! जा य इत्थिआणवणी जा य पुमआणवणी जा य नपुसंगआणवणी पन्नवणी णं एसा भासा न एसा भासा मोसा ।

अह भंते ! जा य इत्थिपन्नवणी जा य पुमपन्नवणी जा य नपुंसगपन्नवणी पन्नवणी णं एसा भासा न एसा भासा मोसा ?, हंता गो० ! जा य इत्थिपन्नवणी जा य पुमपन्नवणी जा य नपुंसगपन्नवणी, पन्नवणी णं एसा भासा णं एसा भासा मोसा, अह भंते ! जा जायीति इत्थिवऊ जातीय पुमवऊ जातीति नपुंसगवऊ पन्नवणी णं एसा भासा न एसा भासा मोसा ?, हंता ! गो० जातीति इत्थिवऊ जाईति पुमवऊ जातीति नपुंसगवऊ पन्नवणी णं एसा भासा न एसा भास मोसा ।

अह भंते ! जा जातीइ इत्थियाणमणी जाइत्ति पुमआणवणी जातीति नपुंसगाणमणी पन्नवणी णं एसा भासा न एसा भासा मोसा ?, हंता ! गो० ! जातीति इत्थिआणमणी जातीति पुमआणवणी जातीति नपुंसगाणमणी पन्नवणी णं एसा भासा न एसा भासा मोसा ।

अह भंते ! जातीति इत्थिपन्नवणी जातीति पुमपन्नवणी जातीति नपुंसगपपन्नवणी पन्नवणी णं एसा भासा न एसा भासा मोसा ?, हंता ! गो० ! जातीति इत्थिपन्नवणी जाईति पुमपन्नवणी जाईति नपुंसगपन्नवणी पन्नवणीणं एसा भासा नएसा भासा मोसा

वृ. 'अह भंते ! गाओ मिया' इत्यादि, अथ भवन्त ! गावः प्रतीताः, मृगा अपि प्रतीताः, पशवः—अजाः, पक्षिणोऽपि प्रतीताः, प्रज्ञापनी प्रज्ञाप्यतेऽर्थोऽनयेति प्रज्ञापनी, किं अर्थप्रतिपादनी प्ररूपणीयेतियावत्, णमिति वाक्यालङ्कारे, एषा भाषा सत्या नैषा भाषा मृषेति, इयमत्र भावना—गाव इति भाषा गोजातिं प्रतिपादयति, जाती च त्रिलिङ्गा अपर्या अभिधेयाः, लिङ्गत्रयस्यापि जाती सम्भवात्, एवं मृगपशुपक्षिष्वपि भावनीयं, न चैते शब्दास्त्रिलिङ्गाभिधायिनस्तथाप्रतीतेरभावात् किन्तु पुंल्लिङ्गगर्भास्ततः संशयः किमियं प्रज्ञापनी किं वा नेति ?, भगवानाह—

'हंता गोयमा !' हन्तेत्यवधारणे, गौतम ! इत्यामन्त्रेण, गाव इत्यादिका भाषा प्रज्ञापनी, तदर्थकथनाय प्ररूपणीया, यथावस्थितार्थप्रतिपादकतया सत्यत्वात्, तथापि जात्यभिधायिनीयं भाषा, जातिश्च त्रिलिङ्गार्थसमवायिनी, ततो जात्यभिधानेन त्रिलिङ्गा अपि यथासम्भवं विशेषा अभिहिता भवन्तीति भवति यथावस्थितार्थाभिधानादियं प्रज्ञापनी भाषेति,

यदप्युक्तम्—किन्तु पुंल्लिङ्गगर्भा इति, तत्र शब्दे लिङ्गव्यवस्था लक्षणवशात्, लक्षणं च 'स्त्रीपुंनपुंसकसहोक्तौ परं' तथा 'ग्राम्याशिशुद्विशखुरसङ्घे स्त्री प्राय' इत्यादि, ततो भवेत् क्वचित् शब्दे लक्षणवशात् स्त्रीत्वं क्वचित् पुंस्त्वं क्वचित् नपुंसकत्वं वा, परमार्थतःपुनः सर्वोऽपि जातिशब्दस्त्रिलिङ्गानप्यर्थान् तत्तद्देशकालप्रस्तावादिसामर्थ्यवशादभिधत्ते इति न कश्चिद्दोषः, न चेयं परपीडाजनिका नापि विप्रतारणादिदुष्टविवक्षासमुत्था ततो न मृषेति प्रज्ञापनी ।

'अह भंते ! जा य इत्थिवऊ' इत्यादि, अथेति प्रश्ने भवन्त ! इत्यामन्त्रणे, या च स्त्रीवाक्—स्त्रीलिङ्गप्रतिपादिका भाषा खट्वा लतेत्यादिलक्षणा या पुरुषवाक् घटः पट इत्यादिरूपा या च नपुंसकवाक् कुड्यं काण्डमित्यादिलक्षणा प्रज्ञापनीयं भाषा नैषा भाषा मृषेति ?, किमत्र संशयकारणं येनेत्थं पृच्छति ? इति चेत्, उच्यते, इह खट्वाघटकुड्यादयः शब्दाः यथाक्रमं स्त्रीपुंनपुंसकलिङ्गाभिधायिनः, स्त्रीपरुंनपुंसकानां च लक्षणमिदम्—

॥ १ ॥ "योनिर्मृदुत्वमस्थैर्यं, मुग्धता क्लीबता स्तनौ ।

पुंस्कामितेति लिङ्गानि, सप्त स्त्रीत्वे प्रचक्षते ॥
॥ २ ॥ मेहनं खरता दाढ्यं, शौण्डीर्यं श्मश्रु धृष्टता ।
स्त्रीकामितेति लिङ्गानि, सप्त पुंस्त्वे प्रचक्षते ॥
॥ ३ ॥ स्तनादिश्मश्रुकेशादिभावाभावसमन्वितम् ।
नपुंसकं बुधाः प्राहुर्मोहानलसुदीपितम् ॥" तथाऽन्यत्राप्युक्तम्–
॥ १ ॥ "स्तनकेशवती स्त्री स्यान्लोमशः पुरुषः स्मृतः ।
उभयोरन्तरं यच्च, तत्र भावे नपुंसकम् ॥"

न चैवंरूपाणि स्त्र्यादिलक्षणानि खट्वादिषूपलभ्यन्ते, तथाहि–यद्येकैकावयवपृथक्करणेन सम्यग् निभालनं क्रियते तथापि न तेषां स्त्र्यादिलक्षणानां तत्रोपलम्भोऽस्ति ततः प्रज्ञापनीयं भाषा नवेति जातसंशयः तदपनोदाय पृच्छति, अत्र भगवानाह–'हंता गोयमे'त्यादि अक्षरगमनिका प्राग्वत्, भावार्थस्त्वयं–नेह शब्दप्रवृत्तिचिन्तायां यथोक्तानि स्त्र्यादिलक्षणानि स्त्रीलिङ्गादिशब्दाभिधेयानि किन्त्वभिधेयधर्मा इयमयमिदंशब्दव्यवस्थाहेतवः गुरूपदेशपारम्पर्यगम्याः स्त्रीलिङ्गादिशब्दाभिधेयाः, न चैते कल्पनामात्रं, वस्तुतस्तत्तच्छब्दाभिधेयतया परिणमनभावात्, तेषामभिधेयधर्माणां तत्त्वतस्तात्त्विकत्वात्, आह च शकटसूनुरपि–"अयमियमिदमिति-शब्दव्यवस्थाहेतुरभिधेयधर्म उपदेशगम्यः स्त्रीपुंनपुंसकत्वानी"ति, व्यवस्थापितश्चायमर्थो विस्तरकेण स्वोपज्ञशब्दानुशासनविवरण इति, ततः शाब्दव्यवहारापेक्षया यथावस्थितार्थप्रतिपादनात् प्रज्ञापनीयं भाषा, दुष्टविवक्षातःसमुत्पत्तेरभावात् परपीडाहेतुत्वाभावाच्च न मृषेति ।

'अह भंते!' इत्यादि, अथ भदन्त! या च स्त्याज्ञापनी आज्ञाप्यते–आज्ञासम्पादनेप्रयुज्यतेऽनया सा आज्ञापनी स्त्रिया आज्ञापनी स्त्र्याज्ञापनी, स्त्रिया आदेशदयिनीत्यर्थः, या च पुमाज्ञापनी नपुंसकाज्ञापनी, प्रज्ञापनीयं भाषा नैषा भाषा मृषेति ?, अत्रेदं संशयकारणं–किल सत्या भाषा प्रज्ञापनी भवति, इयं च भाषा आज्ञासम्पादनक्रियायुक्ताभिधायिनी, आज्ञाप्यमानश्च स्त्र्यादिः तथा कुर्यान्न वा ?, ततः संशयमापन्नो विनिश्चयाय पृच्छति, अत्र भगवानाह–'हंता गोयमा !' इत्यादि, अक्षरगमनिका सुगमा, भावार्थस्त्वयं–आज्ञापनी भाषा द्विधा–परलोकाबाधिनी इतरा च, तत्र या स्वपरानुग्रहबुध्या शाठ्यमन्तरेण आमुष्मिकफलसाधनाय प्रतिपन्नैहिकालम्बनप्रयोजना विवक्षितकार्यप्रसाधनसामर्थ्ययुक्ता विनीतस्त्रायादिविनेयजनविषया सा परलोकाबाधिनी एषैव च साधूना प्रज्ञापनी परलोकाबाधनात्, इतरा त्वितरविषया, सा च स्वपरसङ्क्लेशजननात् मृषेत्यप्रज्ञापनी साधुवर्गस्य, उक्तं च–

॥ १ ॥ "अविनीयमाणवंतो किलिस्सई भासई मुसं तह य ।
घंटालोहं नाउं को कडकरणे पवत्तेज्जा ? ॥"

क्रिया हि द्रव्यं विनमयति नाद्रव्यमित्यभिप्रायः ।

'अह भंते ! जा य इत्थिपन्नवणी' इत्यादि अथ भदन्त ! या च भाषा स्त्रीप्रज्ञापनी-स्त्रीलक्षणप्रतिपादिका, 'योनिर्मृदुत्वमस्थैर्यं मुग्धते'त्यादिरूपा, या च पुंप्रज्ञापनी–पुरुषलक्षण-प्रतिपादिका 'मेहनं खरता दाढ्यं' इत्यादिरूपा या च नपुंसकप्रज्ञापनी-नपुंसकलक्षणाभिधायिनी 'स्तनादिश्मश्रुकेशादिभावाभावसमन्वितमित्यादिलक्षणा प्रज्ञापनीयं भाषा नैषा भाषा मृषेति ?

कोऽत्राभिप्राय इति चेत्, उच्यते, इह स्त्रीलिङ्गादयः शब्दाःशाब्दव्यवहारबलादन्यत्रापि प्रवर्त्तन्ते, यथा खट्वाघटकुट्यादयः खट्वादिष्वर्थेषु, न खलु तत्र यथोक्तानि स्त्र्यादिलक्षणानि सन्ति यथोक्तं प्राक्, ततः किमियमव्यापकत्वात् स्त्र्यादिलक्षणप्रतिपादिका भाषा न वक्तव्या आहोश्वित् वक्तव्येति संशयापन्नः पृष्टवान्, अत्र भगवानाह–'हंता गोयमे' त्यादि, अक्षरगमनिका सुप्रतीता, भावार्थस्त्वयं–इह स्त्र्यादिलक्षणं द्विधा–शाब्दव्यवहारानुगतं वेदानुगतं च, तत्र यदा शाब्दव्यवहाराश्रितं प्रतिपादयितुमिष्यते तदैवं न वक्तव्यमव्यापकत्वात्, यथा चाव्यापकता तथा प्रागेव लेशतो दर्शिता, विस्तरतस्तु स्वोपज्ञशब्दानुशासनविवरणे, तत इयं तदधिकृत्य प्रज्ञापनी, यदा तु वेदानुगतं प्रतिपादयितुमिष्यते तदा यथावस्थितार्थाभिधानात् प्रज्ञापन्येव, न मृषेति।

'अह भंते ! जा जातीति इत्थिवऊ' इत्यादि, अथ भदन्त ! या जातिः स्त्रीवाक् जातौ स्त्रीवचनं सत्तेति, या जातौ पुंवाक् पुंवचनं भाव इति, या च जातौ नपुंसकवाक् सामान्यमिति, प्रज्ञापनी एषा भाषा नैषा भाषा मृषेति ?, कोऽत्राभिप्राय इति चेत्, उच्यते, जातिरिह सामान्यमुच्यते, सामान्यस्य च न लिङ्गसङ्ख्याभ्यां योगो, वस्तुनामेव लिङ्गसङ्ख्यायभ्यां योगस्य तीर्थान्तरीयैरभ्युपगमात्, ततो यदि परं जातावौत्सर्गिकमेकवचनं नपुंसकलिङ्गं चोपपद्येत न त्रिलिङ्गता, अथ च त्रिलिङ्गाभिधायिनोऽपि शब्दाः प्रवर्त्तन्ते यथोक्तमनन्तरं ततः संशयः–किं एषा भाषा प्रज्ञापनी उत नेति ?, अथ भगवानाह–'हंता गोयमा!' इत्यादि, अक्षरार्थः सुगमः, भावार्थस्त्वयं–जातिर्नाम सामान्यमुच्यते, सामान्यं च न परिकल्पितमेकमनवयवमक्रियं, तस्य प्रमाणबाधितत्वात्, यथा च प्रमाणबाधितत्वं तथा तत्त्वार्थटीकायां भावितमिति ततोऽवधार्यं, किन्तु द्रव्यस्य परिणामे 'वस्तुन एव समानः परिणामो यः स एव सामान्य'मिति वचनात्, समानपरिणामश्चानेकधर्मात्मा, धर्माणां परस्परं धर्मिणोऽपि च सहान्योऽन्यानुवेधाभ्युपगमात् तथा प्रमाणेनोपलब्धेः, ततो घटते जातेरपि त्रिलिङ्गतेति प्रज्ञापन्येषा भाषा, नैषा भाषा मृषेति।

'अह भंते!' इत्यादि, अथ भदन्त! या जातिस्त्रयाज्ञापनी–जातिमधिकृत्य स्त्रिया आज्ञापनी, यथा अमुका ब्राह्मणी क्षत्रिया वा एवं कुर्यादिति, एवं जातिमधिकृत्य पुमाज्ञापनी नपुंसकाज्ञापनी, प्रज्ञापनी एषा भाषा नैषा भाषा मृषेति ?, अत्रापि संशयकारणमिदं–आज्ञापनी हि नाम आज्ञासम्पादनक्रियायुक्तस्त्र्याद्यभिधायिनी, स्त्र्यादिश्चाज्ञाप्यमानस्तथा कुर्यान्न वेति संशयः, किमियं प्रज्ञापनी किं वाऽन्येति ?, अत्र निर्वचनमाह–'हंता ! गोयमा' इत्यादि, अक्षरार्थःसुगमः, भावार्थस्त्वयं–आज्ञापनी हि नाम परलोकाबाधिनी सा प्रोच्यते या स्वपरानुग्रबुध्या विवितार्थसम्पादनसामर्थ्योपेतविनीतस्त्र्यादिविनेयजनविषया, यथा अमुका ब्राह्मणी साध्वी शुभं नक्षत्रमद्येत्युपकमङ्गं श्रुतस्कन्धं च पठेत्यादि सा प्रज्ञापन्येव, दोषाभावात्, शेषा तु स्वपरपीडाजननान्मृषेत्यप्रज्ञापनीति।

'अह भंते!' इत्यादि, अथ भदन्त! या जातिस्त्रीप्रज्ञापनी जातिमधिकृत्य स्त्रिया–स्त्रीलक्षणस्य प्रतिपादिका, यथा स्त्रीः स्वभावात् तुच्छा भवति गौरवबहुला चलेन्द्रिया दुर्बला च धृत्येति, उक्तं च–"तुच्छा गारवबहुला चलिंदिया दुब्बला य धीईए' इत्यादि, या च जातिमधिकृत्य पुम्प्रज्ञापनी–पुरुषलक्षणस्य स्वरूपनिरूपिका, यथा पुरुषः स्वभावात् गम्भीराशयो भवति महत्यामपि चापदि न क्लीबतां भजते इत्यादि, या च जातिमधिकृत्य नपुंसकप्रज्ञापनी नाम–नपुंसक-

जातिप्ररूपिका, यथा नपुंसकः स्वभावात् क्लीबो भवति, प्रबलमोहानलज्वालाकलाप-ज्वलितश्चेत्यादि प्रज्ञापन्येषा भाषा नैषा भाषा मृषेति, अत्रापीदं संशयकारणं वण्यते–खलु जातिगुणाः एवंरूपाः परं क्वचित्कदाचिद् व्यभिचारोऽपि दृश्यते, तथाहि–रामाऽपि काचित् गम्भीराशया भवति धृत्या चातीव बलवती, पुरुषोऽपि च कश्चित्तुच्छप्रकृतिरूपो लभ्यते स्तोकायामपि चापदि क्लीबतां भजते, नपुंसकोऽपि कश्चिन्मन्दमोहानलो दृढसत्त्वश्च,

ततः संशयः–किमेषा प्रज्ञापनी किं वा नेति ?, अत्र भगवानाह–'हंता ! गोयमा !' इत्यादि, अक्षरार्थः सुगमः, परं भावार्थस्त्वयं–इह जातिगुणप्ररूपणं बाहुल्यमधिकृत्य भवति न समस्तव्यक्तयाक्षेपेणात् एव जातिगुणान् प्ररूपयन्तो विमलधियःप्रायः शब्दं समुच्चारयन्ति, प्रायेणेदं द्रष्टव्यं, यत्रापि न प्रायःशब्दश्रवणं तत्रापि स द्रष्टव्यः प्रस्तावात्, ततः क्वचित्कदाचिद् व्यभिचारेऽपि दोषाभावात् प्रज्ञापन्येषा भाषा न मृषेति ॥

इह भाषा द्विधा दृश्यते–एका सम्यगुपयुक्तस्य द्वितीया त्वितरस्य, तत्र यः पूर्वापरानुसन्धानपाटवोपेतः श्रुतज्ञानेन पर्यालोच्यार्थान् भाषते स सम्यगुपयुक्तः, स चैवं जानाति–अहमेतद्भाषे इति, यस्तु करणापटिष्टतया वातादिनोपहतचैतन्यकतया वा पूर्वापरानुसन्धानविकलो यथाकथंचित् मनसा विकल्प्य विकल्प्य भाषते स इतरः, स चैवमपि न जानाति–यथा अहमेतत् भाषे इति, बालादयोऽपि च भाषमाणा दृश्यन्ते, ततः संशयः–किमेते जानन्ति यद्वयमेतत् भाषामहे इति किं वा न जानन्तीति पृच्छति–

मू. (३७७) अह भंते ! मंदकुमाराए वा मंदकुमारिया वा जानति बुयमाणा अहमेसे बुयामीति ?, गो० ! नो इणट्ठे समट्ठे, नन्नत्थ सण्णिणो, अह भंते ! मंदकुमारए वा मंदकुमारिया वा जाणइ आहारं आहारेमाणे अहमेसे आहारमाहारेमित्ति ?, गो० ! नो इणट्ठे समट्ठे, नन्नत्थ सण्णिणो, अह भंते ! मंदकुमारए वा मंदकुमारिया वा जानति अयं मे अम्मापियरो ?, गो० ! नो इणट्ठे समट्ठे, नन्नत्थ सण्णिणो,

अह भंते ! मंदकुमारए वा मंदकुमारिया वा जानति अयं मे अतिराउलो अयं मे अइराउवलेत्ति गो० ! नो तिणट्ठे समट्ठे, नन्नत्थ सण्णिणो, अह भंते ! मंदकुमारए वा मंदकुमारिया वा जानति अयं मे भट्टिदारए अयं मे भट्टिदारियत्ति ?, गो० ! नो इणट्ठे समट्ठे, नन्नत्थ सण्णिणो, अह भंते ! उट्टे गोणे खरे घोडए अए एलतो जाणति बुयमाणे अहमेसे बुयामि ?, गो० ! नो इणट्ठे समट्ठे, नन्नत्थ सण्णिणो,

अह भंते ! उट्टे जाव एलते जानति आहारं आहारेमाणो अहमेसे आहारेमि ?, गो० ! नो इणट्ठे समट्ठे जाव नन्नत्थ सण्णिणो, अह भंते ! उट्टे गोणे खरे घोडए अए एलए जानति, अयं मे अम्मापियरो ?, गो० ! नो इणट्ठे समट्ठे जाव नन्नत्थ सण्णिणो, अह भंते ! उट्टे जाव एलए जाणति, अयं मे अतिराउलेत्ति ?, गो० ! नो इणट्ठे समट्ठे जाव नन्नत्थ सण्णिणो,

अह भंते ! उट्टे जाव एलए जानति अयं मे भट्टिदारए २ ?, गोयमा ! नो इणट्ठे समट्ठे जाव नन्नत्थ सण्णिणो ।

वृ. 'अह भंते ! मंदकुमारए वा' इत्यादि, अथ भदन्त ! मन्दरकुमारकः-उत्तानशयो बालको मन्दकुमारिका–उत्तानशया बालिका भाषमाणाभाषायोग्यान् पुद्गलानादाय भाषात्वेन

परिणमय्य विसृजती एवं जानाति–यथाऽहमेतद् ब्रवीमित इति ?, भगवानाह–गौतम ! नायमर्थः समर्थः–युक्तयुपपन्नो, यद्यपि मनःपर्याप्तया पर्याप्तस्तथापि तस्याद्यापि मनःकरणमपटु अपटुत्वाच्च मनःकरणस्य क्षयोपशमोऽपि मन्दः, श्रुतज्ञानावरणस्य हि क्षयोपशमः प्रायो मनः–करणपटिष्टतामवलम्ब्योपजायते, तथा लोके दर्शनात्, ततो न जानाति मन्दकुमारो मन्दकुमारिका वा भाषमाणा यथाऽहमेतत् ब्रवीमीति, किं सर्वोऽपि न जानातीत्यत आह–'नण्णत्थ सण्णिणो'इति, अन्यत्रशब्दोऽत्र परिवर्जनार्थः, दृष्टश्चान्यत्रापि परिवर्जनार्थो यथा–'अन्यत्र द्रोणभीष्माभ्यां, सर्वे योधाः पराङ्मुखा' इति, द्रोणभीष्मौ वर्जयित्वा इत्यर्थः,

संज्ञी–अवधिज्ञानी जातिस्मरः सामान्यतो विशिष्टमनःपाटवोपेतो वा तस्मादन्यो न जानाति, संज्ञी तु यथोक्तस्वरूपो जानीते ।एवमाहारादिविषयाण्यपि चत्वारि सूत्राणि भावनीयानि, नवरमतिराउले इति देशीपदं, एतत् स्वामिकुलमित्यर्थः, 'भट्टिदारए' इति भर्त्ता–स्वामी तस्य दारकः–पुत्रो भर्तृदारकः, एवमुष्ट्रादिविषयाण्यपि पञ्च सूत्राणि भावयितव्यानि, नवरमुष्ट्रादयोऽतिबालावस्थाः परिग्राह्याः न जरठाः, जरठावस्थायां हि परिज्ञानस्य सम्भवात् ॥

सम्प्रत्येकवचनादिभाषाविषयसंशयापनोदार्थं पृच्छति–

मू. (३७८) अह भंते ! मणुस्से महिसे आसे हत्थी सीहे वग्घे विगे दीविए अच्छे तरच्छे परस्सरे सियाले विराले सुणए कोलसुणए कोकंतिए ससए चित्तए चिल्ललए जे यावन्ने तहप्पगारा सव्वा सा एगवऊ ?, हंता गो० ! मणुस्से जाव चिल्ललए जे यावन्ने त० सव्वा सा एगवऊ ।

अह भंते ! मणुस्सा जाव चिल्ललगा जे याव० तहप्पगारा सव्वा सा बहुवऊ ? हंता गो० ! मणुस्सा जाव चिल्ललगा सव्वा सा बहुवऊ । अह भंते ! मणुस्सी महिसी वलवा हत्थिणिया सीही वग्घी विगी दीविया अच्छी तरच्छी परस्सरा रासभी सियाली विराली सुणिया कोलसुणिया कोकंतिया ससिया चित्तिया चिल्ललिया जे यावन्ने तह० सव्वा सा इत्थिवऊ ?, हंता गो० ! मणुस्सी जाव चिल्ललिगा जे यावन्ने तहप्पगारा सव्वा सा इत्थिवऊ ।

अह भंते ! मणुस्से जाव चिल्ललये जे यावन्ने तहप्पगारा सव्वा सा पुमवऊ ?, हंता गो० ! मणुस्से महिसे जाव चिल्ललए जे यावन्ने तहप्पगारा सव्वा सा पुमवऊ ।

अह भंते ! कंसं कंसोयं परिमंडलं सेलं थूभं जालं थालं तारं रूवं अच्छिपत्तं कुंडे पउमं दुद्दं दहिं नवणीतं असणं सयणं भवणं विमाणं छत्तं चारमं भिंगारं अंगणं निरंगणं आभरणं रयणं जे यावन्ने तहप्पगारा सव्वं तं नपुंसगवऊ ?, हंता गो० ! कंसं जाव रयणं जे यावन्ने तहप्पगारा तं सव्वं नपुंसगवऊ ।

अह भंते ! पुढवी इत्थिवऊ आयत्ति पुमवऊ धन्नित्ति नपुंसगवऊ पन्नवणी णं एसा भासा न एसा भासा मोसा ?, हंता गो० ! पुढवित्ति इत्थिवऊ आउत्ति पुमवऊ धन्नित्ति नपुंसगवऊ पन्नवणी णं एसा भासा न एसा भासा मोसा । अह भंते ! पुढवीत्ति इत्थिआणमणी आउत्ति पुमआणमणी धन्नेत्ति नपुंसगाणमणी पन्नवणी णं एसा भासा न एसा भासा मोसा ? हंता गो० ! पुढवित्ति इत्तिआणमणी आउत्ति पुमआणमणी धण्णेत्ति नपुंसगाणमणी पन्नवणीणं एसा भासा न एसा भासा मोसा ।

अह भंते ! पुढवीति इत्थिपन्नवणी आउत्ति पुमपन्नवणी धन्नेति नपुंसगपन्नवणी आराहणी

णं एसा भासा न एसा भासा मोसा ?, हंता ! गो० ! पुढवीति इत्थिपन्नवणी आउत्ति पुमपन्नवणी धन्नेत्ति नपुंसगपन्नवणी आराहणी णं एसा भासा, न एसा भासा मोसा । इच्चेवं भंते इत्थिवयणं वा पुमनवयणं वा नपुंसगवयणं वा वयमाणे पन्नवणी णं एसा भासा ण एसा भासा मोसा ?, हंता गो० ! इत्थिवयणं वा पुमवयणं वा नपुंसगवयणं वा वयमाणे पन्नवणी णं एसा भासा न एसा भासा मोसा ॥

वृ. अथ भदन्त ! मनुष्यो महिषोऽश्वो हस्ती सिंहो व्याघ्रो वृक एते प्रतीताः, द्वीपी–चित्रकविशेषः ऋक्षः–अच्छभल्लःतरक्षो–व्याघ्रजातिविशेषः परस्सरो–गण्डः शृगालो–गोमायुः विडालो–मार्जारः शुनको–मृगवंशकोलशुनको–मृगयाकुशलः श्वा शशकः–प्रतीतः कोकंतिया–लुङ्कती चित्रकः–प्रतीतः चिल्ललकः–आरण्यः पशुविशेषः, 'जे यावन्ने तहप्पगारा' इति येऽपि चान्ये तथाप्रकारा एकवचनान्ता इत्यर्थः, सर्वा सा एकवाक्–एकत्वप्रतिपादिका वाणी,

अयमत्र प्रश्नहेतुरभिप्रायः–इह वस्तु धर्म्मधर्म्मिसमुदायात्मकं धर्म्माश्च प्रतिवस्त्वनन्ताः मनुष्यं इत्याद्युक्तौ च सकलं वस्तु धर्मधर्मिसमुदायात्मकं परिपूर्णं प्रतीयते, तथा व्यवहारदर्शनात्, एकस्मिंश्चार्थे एकवचनं बहुषु बहुवचनं, अत्र बहवो धर्म्मा अभिधेयाः ततःकथमेकवचनं ?, अथ च दृश्यते लोके एकवचनेनपि व्यवहार इति पृच्छति–सर्वा सा एकत्वप्रतिपादिका वाग् भवति ?, काक्वा चेदं पठ्यते ततः प्रश्नार्थत्वावगतिः, भगवानाह–

'हंता गोयमा !' इत्यादि, अक्षरार्थः सुगमः, भावार्थस्त्वयं– शब्दप्रवृत्तिरिह विवक्षाधीना, विवक्षा च तत्तत्प्रयोजनवशात् वक्तुःक्वचित् कदाचित् कथञ्चित् भवतीत्यनियता, तथाहि–स एवैकः पुरुषो यदाऽयं मे जनक इति पुत्रेण विवक्ष्यते तदा जनक इत्यभिधीयते, स एव यदा तेनैव मामध्यापयतीति विवक्ष्यते तदा तूपाध्याय इति, तत्र यदा उपसर्जनीभूतधर्मा धर्मी प्राधान्येन विवक्ष्यते तदा धर्म्मिण एकत्वात् एकवचनं, धर्माश्च धर्म्मिण्यन्तर्गता इति परिपूर्णवस्तुप्रतीतिर्यथा त्वमिति, यदा तूपसर्जनीभूतधर्मिणो धर्माः पाण्डित्यपरोपकारित्वमहादानदातृत्वादयः प्राधान्येन विवक्ष्यन्ते तदा धर्म्माणां बहुत्वादेकस्मिन्नापि बहुवचनं यथा यूयमिति, तत इहापि मनुष्य इत्यादावुपसर्जनीकृतधर्म्मा धर्म्मी प्राधान्येन विवक्षित इति भवति सर्वाप्येवंजातीया एकत्वप्रतिपादिका वाक् । 'अह भंते ! मणुस्सा' इत्यादि, अक्षरगमनिका प्राग्वत्,

अत्रापीदं संशयकारणं–मनुष्यादयः शब्दा जातिवाचकाः, जातिश्च सामान्यं सामान्यं चैकं 'एकं नित्यं निरवयमक्रियं सर्वगं च सामान्य'-मितिवचनात्, ततः कथमत्र बहुवचनं ?, अथ च दृश्यते बहुवचनेनापि व्यवहार इति पृच्छति–सर्वा सा बहुत्वप्रतिपादिका वाक् भवति ?, काक्वा पाठात् प्रश्नार्थत्वावगतिः अत्र भगवानाह–'हंता गोयमा !' इत्यादि, अक्षरार्थः सुगमः, भावार्थस्त्वयं–यद्यपि नामैते जातिवाचकाःशब्दाः तथापि जातिरभिधीयते समानपरिणामः, समानपरिणामश्चासमानपरिणामविनाभावी, अन्यथैकत्वापत्तितः समानत्वायोगात्, ततो यदा समानपरिणामोऽसमानपरिणामसंलुलितः प्राधान्येन विवक्ष्यतेतदाऽसमानपरिणामस्य प्रतिव्यक्ति भिन्नत्वात् तदभिधाने बहुवचनं, यथा घटा इति, यदा तु स एव एकः समानपरिणामः प्राधान्येन विवक्ष्यते इतरस्त्वसमान परिणाम उपसर्जनीभूतस्तदा सर्वत्रापि समानपरिणामस्य एकत्वात् तदभिधाने एकवचनं, यद्वा सर्वोऽपि घटः पृथुबृघ्नोदराद्याकार इति, अत्रापि मनुष्या इत्यादौ

एतत्परिणामोऽमृतघटपरिणामसंसूचितः प्रधानेन विवक्षित इति, तस्यानेकत्वभावात् बहुवचनं।

'अह भंते ! मणुस्सी'त्यादि, अत्रेदं संशयकारणं–इह सर्वं वस्तु त्रिलिङ्गं, तथाहि–मृद्वपोऽयमिति पुंल्लिङ्गता मृत्परिणतिरियं घटाकारा परिणतिरियमिति स्त्रीलिङ्गता, इदं वस्तित्वति नपुंसकलिङ्गता, तत्रैवं शबलरूपे वस्तुनि व्यवस्थिते कथमेकलिङ्गमात्राभिधायी शब्दस्तदभिधायी भवति, न खलु नरसिंहे सिंहशब्दो नरशब्दो वा केवलस्तदभिधायी भवति, अथ च दृश्यते तदभिधायितयाऽपि लोके व्यवहारस्ततः पृच्छति 'सव्वा सा इत्थिवऊ' इति, सर्वा सा एवंप्रकारा स्त्रीवाक्–स्त्रीलिङ्गविशिष्टार्थप्रतिपादिका वाक् भवति ?, काक्वा पाठात् प्रश्नार्थत्वावगतिः, भगवानाह–'हंता गोयमे' त्यादि, अक्षरार्थः सुगमः, भावार्थस्त्वयं–यद्यपि नाम शबलरूपं वस्तु तथाऽप्येष शाब्दो न्यायः–येन धर्मेण विशिष्टः प्रतिपादयितुमिष्यते स तं प्रधानीकृत्य तेन विशिष्टं न्यग्भूतशेषधर्माणं धर्मिणं प्रतिपादयति, यथा पुरुषत्वे शास्त्रज्ञत्वे दातृत्वे भोक्तृत्वे जनकत्वेऽध्यापयितृत्वे च युगपद् व्यवस्थितेऽपि पुत्रः समागच्छन्तमवलोक्य पिता आगच्छतीति ब्रूते, शिष्यस्तु उपाध्याय इति, एवमिहापि यद्यपि मानुषीप्रभृतिकं सर्वं त्रिलिङ्गात्मकं तथापि योनिर्मृदुकत्वमस्थैर्यादिलक्षणं स्त्रीत्वमत्र प्रतिपादयितुमिष्टमिति ततः प्रधानीकृत्य तेन विशिष्टं न्यग्भूतशेषधर्म्माणं धर्म्मिणं प्रतिपादयतीति भवति सर्वा सा स्त्रीवक्, एवं पुंवाग्नपुंसकवाचावपि भावनीये।

'अह भंते ! पुढवी' इत्यादि सुगमं, नवरं 'आऊ' इति पुंल्लिङ्गता प्राकृतलक्षणवशात्, संस्कृते तु स्त्रीत्वमेव, 'अह भंते ! पुढवीति इत्थीआणवणी' इत्यादि, अथ भदन्त ! पृथिवीं कुरु पृथ्वीमानयेत्येवं स्त्रियां–स्त्रीलिङ्गे पृथिव्या आज्ञापनी एवमाऊ इति पुमाज्ञापनी धान्यमिति नपुंसकाज्ञापनी प्रज्ञापन्येषा भाषा नैषा भाषा मृषेति ?, भगवानाह–'हंता गो० !' इत्यादि सुगमं,

'अह भंते' इत्यादि, अथ भदन्त ! पृथिवी इति स्त्रीप्रज्ञापनी–स्त्रीत्वस्वरूपस्य प्ररूपणी एवं आऊ इति पुंप्रज्ञापनी धान्यमिति नपुंसकप्रज्ञापनी आराधनी–मुक्तिमार्गप्रतिपत्तिनी एषा भाषा नैषा भाषा मृषेति ?, किमुक्तं भवति ? – नैवं वदतो मिथ्याभाषित्वप्रसङ्गः, भगवानाह–आराधनी एषा भाषा, नषा भाषा मृषेति, शाब्दव्यवहारापेक्षया यथावस्थितवस्तुतत्त्वप्ररूपणात्, इह कियत् प्रतिपदं प्रष्टुं शक्यते ततोऽतिदेशेन पृच्छति–

'इच्चेवं भंते !' इत्यादि, इतिः–उपदर्शने एवंशब्दः प्रकारे उपदर्शितेन प्रकारेणान्यदपि स्त्रीवचनं पुंवतचनं नपुंसकवचनं वा वदति साधुस्तदा तस्मिन्नेवं वदति या भाषा सा प्रज्ञापनी भाषा नैषा भाषा मृषेति ?, भगवानाह–प्रज्ञापनी एषा भाषा, शाब्दव्यवहारानुसरणतो दोषाभावात्, अन्यथास्तिथे हि वस्तुन्यन्यथा भाषणं दोषः यदा तु यद्वस्तु यथावस्थितं तत् तथा भाषते, तदा को दोष इति ? ॥ तदेवं भाषाप्रतिपादनविषया ये केचन सन्देहास्ते सर्वेऽप्यपनीताः, सम्प्रति सामान्यतो भाषायाः कारणादि पिपृच्छिषुराह–

मू. (३७९) *भासा णं भंते ! किमादीया किंपवहा किंसंठिया किं पज्जवसिया ?, गो० ! भासा णं जीवादीया सरीरप्पभवा वज्जसंठिया लोगंतपज्जवसिया पन्नत्ता,*

वृ. 'भासा णं भंते ! किमाइया' इत्यादि, भाषा अवबोधबीजभूता, णमिति वाक्यालङ्कारे, किमादिका–उपादानकारणव्यतिरेकेण किमादिः–मौलं कारणं यस्याः सा किमादिका, तथा किंप्रभवा–कस्मात् प्रभव–उत्पादो यस्याः सा किंप्रभवा, सत्यपि मौले कारणे पुनः कस्मात्

कारणान्तरादुत्पद्यते इति भावः, तथा किंसंस्थितेति–केनाकारेण संस्थिता किंसंस्थिता, कस्येव संस्थानमस्या इति भावः, तथा किंपर्यवसिता इति–कस्मिन् स्थाने पर्यवसिता–निष्ठां गता किंपर्यवसिता ?, भगवानाह–गौतम ! 'जीवादिका' जीव आदिः–मौलं कारणं यस्याः सा जीवादिका जीवगततथाविधप्रयत्नमन्तरेणावबोधबीजभूतभाषाया असम्भवात्, आह च भगवान् भद्रबाहुस्वामी–

॥ १ ॥ "तिविहंमि सरीरंमि जीवपएसा हवंति जीवस्स ।
जेहि उ गेण्हइ गहणं तो भासइ भासओ भासं ॥"

मू. (३८०) *'भासा कओ य पभवति, कतिहि व समएहि भासती भासं ।*
भासा कतिप्पगारा कतेवा भासा अणुमया उ ॥

मू. (३८१) *सरीरप्पभवा भासा दोहि य समएहिं भासती भासं ।*
भासा चउप्पगारा दोन्नि य भासा अनुमता उ ॥

वृ. "किंपभवा' इत्यस्य निर्वचनमाह–'शरीरप्रभवा' औदारिकवैक्रियाहाराकान्यतमशरीरसामर्थ्यादेव भाषाद्रव्यविनिर्गतेः, तथा किंसंस्थिता इत्यस्य निर्वचनं 'वज्रसंस्थिता' वज्रस्येव संस्थानं यस्याः सा वज्रसंस्थिता, भाषाद्रव्याणि हि तथाविधप्रयत्ननिसृष्टानि सन्ति सकलमपि लोकमभिव्याप्नुवन्ति, लोकश्च वज्राकारसंस्थित इति सापि वज्रसंस्थिता, 'किंपर्यवसिते'त्यत्र निर्वचनं लोकान्तपर्यवसिता, परतो भाषाद्रव्याणां गत्युपष्टम्भकधर्मास्तिकायाभावतो गमनासम्भवात्, प्रज्ञप्ता मया शेषैश्च तीर्थकृद्भिः –पुनरपि प्रश्नमाह 'भासा कतो य पभवा' इत्यादि, भाषा कुतो–योगात् प्रभव ति–उत्पद्यते काययोगाद्वाग्योगाद्वा ? तथा कतिभिः समयैर्भाषा भाषते ? किमुक्तं भवति ? –कतिभिः समयैर्निसृज्यमानद्रव्यसंहत्यात्मिका भाषा भवति, तथा भाषा कतिप्रकारा–कतिप्रभेदा ? कति वा भाषाः साधूनां वक्तुमनुमता–अनुज्ञाता ?

अत्र निर्वचनं–'सरीरप्पभा' इत्यादि, अत्र शरीरग्रहणेन शरीरयोगः परिगृह्यते, शरीरमात्रप्रभवत्वस्य प्रागेव निर्णीतत्वात्, शरीरप्रभवा इति कोऽर्थः ? –काययोगप्रभवा, तथाहि–काययोगेन भाषायोग्यान् पुद्गलान् गृहीत्वा भाषात्वेन परिणमय्य वाग्योगेन निसृजति, ततः काययोगबलाद्भाषा उत्पद्यते इति काययोगप्रभवेत्युक्तं, आह च भगवान् भद्रबाहुस्वामी– "गिण्हइ य काइएणं निसरइ तह वाइएण जोगेण'मिति, 'कइहि व समएहिं भासाई भास'मित्यस्य निर्वचनं द्वाभ्यां समयाभ्यां भाषते भाषां, तथाहि–एकेन समयेन भाषायोग्यान् पुद्गलान् गृह्णाति द्वितीये समये भाषात्वेन परिणमय्य विसृजतीति, 'भासा कइप्पगारा' इत्यस्य निर्वचनं भाषा सत्यादिभेदाच्चतुःप्रकारा ते च सत्यादयो भेदाः प्रागेव भाविता इति, 'कइ वा भासा अनुमया य' इत्यस्य निर्वचनं सत्यादी द्वे भाषे साधूनां वक्तुमनुमते, तद्यथा–सत्या असत्यामृषा च, अर्थात् ये मृषासत्यामृषे ते नानुज्ञाते, तयोरयथाव-स्थितार्थप्रतिपादनपरतया मुक्तिप्रतिपन्थित्वात्,

मू. (३८२) *कतिविहा णं भंते ! भासा पन्नत्ता ?, गो० ! दुविहा भासा पं०, तं०–पज्जत्तिया य अपज्जत्तिया य, पज्जत्तिया णं भंते ! भासा कतिविहा पं० ?, गो० ! दुविहा पं० तं०–सब्भामोसा य, सब्भा णं भंते ! भासा पज्जत्तिया कतिविहा पं० गो० ! दसविहा, पं० तं०–जाणवयसच्चा १ सम्मयसच्चा २ ठवणासच्चा ३ नामसच्चा ४ रूवसच्चा ५ पडुसच्चा ६ ववहारसच्चा ७ भावसच्चा ८*

जोगसच्चा ९ ओवम्मसच्चा १०, ।

वृ. पुनः प्रश्नयति–'कइविहा ण'मित्यादि, 'पज्जत्तिया अपज्जत्तिया' इति पर्याप्ता नाम या प्रतिनियतरूपतया अवधारयितुं शक्यते सा पर्याप्ता, सा च सत्या मृषा वा द्रष्टव्या, उभयोरपि प्रतिनियतरूपतयाऽवधारयितुं शक्यत्वात्, या तु मिश्रतया उभयप्रतिषेधात्मकतया वा न प्रतिनियतरूपतयाऽवधारयितुं शक्यते सा अपर्याप्ता, सा च सत्यामृषा असत्यामृषा वा द्रष्टव्या, उभयोरपि प्रतिनियतेन रूपेणावधारयितुमशक्यत्वात्, 'पज्जत्तिया णं भंते !' इत्यादि भावितं, नवरं सत्या मृषा चेत्युक्तमतः सत्याभेदावगमाय प्रश्नमाह–'सच्चा णं भंते ! भासा पज्जत्तिया कइविहा पण्णत्ता' इति पाठसिद्धं, भगवानाह–'गोयमा !' इत्यादि ।

मू. (३८३) *जनवय १ सम्मत २ ठवणा नामे ४ रूवे ५ पडुच्चसच्चे ६ य ।*
ववहार ७ भाव ८ जोगे ९ दसमे ओवम्मसच्चे य १० ॥

वृ. 'जनवयसच्चा' इति तं तं जनपदमधिकृत्येषार्थप्रतिपत्तिजनकतया व्यवहारहेतुत्वात् सत्या जनपदसत्या यथा कोङ्कणादिषु पयः पिच्छमित्यादि १,

सम्मतसत्या या सकललोकसाम्मत्येन सत्यतया प्रसिद्धा कुमुदकुवलयोत्पलतामरसानां समानेऽपि पङ्कसंभवत्वे गोपालजना अरविन्दमेव पङ्कजं मन्यन्ते न शेषमित्यरविन्दमेव पङ्कजमिति सम्मतसत्या २ स्थापनासत्या या तथाविधमङ्कादिविन्यासं मुद्राविन्यासं चोपलभ्य प्रयुज्यते यथा एककं पुरतो बिन्दुद्वयसहितमुपलभ्यशतमिदमिति, बिन्दुत्रयसहितं सहस्रमिदमिति, तथा तथाविधं मुद्राविन्यासमुपलभ्य मृत्तिकादिषु माषोऽयं कार्षापणोऽयमिति,

तथा नामतः सत्या नामसत्या यथा कुलमवर्द्धयन्नपि कुलवर्द्धन इति,

तथा रूपतः सत्या रूपसत्या, यथा दम्भतो गृहीतप्रव्रजितरूपः प्रव्रजितोऽयमिति,

तथा प्रतीत्य–आश्रित्य वस्त्वन्तरं सत्या प्रतीत्यसत्या यथा अनामिकाया कनिष्ठामधिकृत्य दीर्घत्वं मध्यमामधिकृत्य ह्रस्वत्वं, न च वाच्यं कथमेकस्यां ह्रस्वत्वं दीर्घत्वं च तात्त्विकं ?, परस्परविरोधादिति, भिन्ननिमित्तत्वेन परस्परविरोधासम्भवात्, तथाहि–तामेव यदि कनिष्ठां मध्यमां वा एकामङ्गुलिमङ्गीकृत्य ह्रस्वत्वं दीर्घत्वं च प्रतिपाद्येत ततो विरोधःसम्भवेत्, एकनिमित्तपरस्परविरुद्धकार्यद्वयासम्भवात्, यदा त्वेकामधिकृत्य ह्रस्वत्वमपरामधिकृत्य दीर्घत्वं तदा सत्त्वासत्त्वयोरिव भिन्ननिमित्तत्वान्न परस्परं विरोधः, अथ यदि तात्त्विके ह्रस्वत्वदीर्घत्वे तत ऋजुत्ववक्रत्वे इव कस्मात्ते परनिरपेक्षे न प्रतिभासेते ?, तस्मात् परोपाधिकत्वात् काल्पनिके इमे इति, तदयुक्तं, द्विविधा हि वस्तुनो धर्माः–सहकारिव्यङ्ग्यरूपा इतरे च, तत्र ये सहकारिव्यङ्ग्यरूपास्ते सहकारिसम्पर्कवशात् प्रतीतिपथमायान्ति, यथा पृथिव्यां जलसम्पर्कतो गन्धः, इतरे त्वेवमेवापि यथा कर्पूरादिगन्धः, ह्रस्वत्वदीर्घत्वेन अपि च सहकारिव्यङ्ग्यरूपे, ततस्ते तं सहकारिणमासाद्याभिव्यक्तिमायात इत्यदोषः,

तथा व्यवहारो–लोकविवक्षा, व्यवहारतः सत्या व्यवहारसत्या, यथा गिरिर्दह्यते गलति भाजनं अनुदरा कन्या अलोमिका एडका, लोका हि गिरिगततृणदाहे तृणादिना सह गिरेरभेदं विवक्षित्वा गिरिर्दह्यते इति ब्रुवन्ति, भाजनादुदके श्रवति उदकभाजनयोरभेदं विवक्षित्वा गलति भाजनमिति, संभोगबीजप्रभवोदराभावे अनुदरा इति, लवनयोग्यलोमाभावे अलोमिकेति, ततो

लोकव्यवहारमपेक्ष्य साधोरपि तथाब्रुवतो भाषा व्यवहारसत्या भवति,

तथा भावो वर्णादिर्भावतः सत्या भावसत्या, किमुक्तं भवति ? –यो भावो वर्णादिर्यस्मिन् शुक्लटो भवति तेन या सत्या भाषा (सा) भावसत्या, यथा सत्यपि पञ्चवर्णसम्भवे बलाका शुक्लेति,

तथा योगः—सम्बन्धः तस्मात् सत्या योगसत्या, तत्र छत्रयोगात् विवक्षितशब्दप्रयोगकाले छत्राभावेऽपि छत्रयोगस्य सम्भवात् छत्री एवं दण्डयोगात् दण्डी,

औपम्यसत्या यथा समुद्रवत्तडागः, अत्रैवार्थे विनेयजनानुग्रहाय सङ्ग्रहणिगाथामाह– 'जनवयसम्मयठवणा' इत्यादि भावितार्था।

मू. (३८४) *मोसा णं भंते ! भासा पज्जत्तिया कतिविहा पं० ?, गो० ! दसविहा पं०, तं० कोहनिस्सिया १ माननिस्सिया २ मायानिस्सिया ३ लोहनिस्सिया ४ पेज्जनिस्सिया ५ दोसनिस्सिया ६ हासनिस्सिया ७ भयनि० ८ अक्खाइयानिस्सिया ९ उवघाइयनिस्सिया १० –*

वृ. मृषाभाषा दशविधा, तद्यथा– 'कोहनिस्सिया' इत्यादि, क्रोधान्निःसृताक्रोधाद्विनिर्गता इत्यर्थः एवं सर्वत्रापि भावनीयं, तत्र क्रोधाभिभूतो विसंवादनबुद्धा परप्रत्ययनाय यत्सत्यमसत्यं वा भाषते तत्सर्वं मृषा, तस्य हि आशयोऽतीव दुष्टस्ततो यदपि घुणाक्षरन्यायेन सत्यमापतति साठ्यबुध्या वोपेत्य सत्यं भाषते तदाऽप्याशयदोषदुष्टमिति मृषेति १,

माननिःसृता यत् पूर्वमननुभूतमप्यैश्वर्यमात्मोत्कर्षख्यापनायानुभूतमस्माभिस्तदानीमैश्वर्यमित्यादि वदतः २ मायानिःसृता यत् परवञ्चनाद्यभिप्रायेण सत्यमसत्यं वा भाषते लोभनिःसृता यल्लोभाभिभूतः कुटतुलादि कृत्वा यथोक्तप्रमाणमिदं तुलादीति वदतः ४ प्रेमनिःसृता यदतिप्रेमवशाद्दासोऽहं तवेत्यादि वदतः ५

द्वेषनिःसृता यदतिनिविष्टः तीर्थकरादीनामप्यवर्णं भाषते ६ हास्यनिःसृता यत्केलिवशतोऽनृतभाषणं ७ भयनिःसृता तस्करादिभयेनासमञ्जसभाषणं ८ आख्यायिकानिःसृता यत्कथास्वसम्भाव्याभिधानं ९ उपघातनिःसृता चौरस्त्वमित्याद्यभ्याख्यानं १०,

मू. (३८५) *'कोहे माणे माया लोभे पिज्जे तहेव दोसे य।*
हास भए अक्खाइय उवघाइयनिस्सिया दसमा ॥'

वृ. अत्रापि सङ्ग्रहणिगाथामाह–'कोहे माणे' इत्यादि, भावितार्थाः।

मू. (३८६) *अपज्जत्तिया णं भंते! कइविहा भासा पं० ?, गो० ! दुविहा पं०, तं०—सद्धामोसा असद्धामोसा य, सद्धामोसा णं भंते ! भासा अपज्जत्तिया कतिविहा पं० ?, गो० ! दसविहा पं० तं०, उप्पन्नमिस्सिया १ विगतमिस्सिया २ उप्पन्नविगतमिस्सिया ३ जीवमिस्सिया ४ अजीवमिस्सिया ५ जीवाजीवमिस्सिया ६ अनंतमि० ७ परित्तमिस्सिया ८ अद्धामिस्सिया ९ अद्धद्धामिस्सिया १० ! असद्धामोसा णं भंते! भासा अपज्जत्तिया कइविहा पं०, गो० ! दुवालसविहा, पं०, तं०–*

वृ. सत्यामृषा दशविधा, तद्यथा–'उप्पन्नमिस्सिया' इत्यादि, उत्पन्ना मिश्रिता अनुत्पन्नैः सह सङ्ख्यायपूर्णार्थैं यत्र सा उत्पन्नमिश्रिता, एवमन्यत्रापि यथायोगं भावनीयं, तत्रोत्पन्नमिश्रिता यथा कस्मिंश्चित् ग्रामे नगरे वा ऊनेष्वधिकेषु वा दारकेषु जातेषु दश दारका अस्मिन्नद्य जाता इत्यादि १, एवमेव मरणकथने विगतमिश्रिता २, तथा जन्मतो मरणस्य च कृतपरिमाणस्याभिधाने

विसंवादेन चोत्पन्नविगतमिश्रिता ३, तथा प्रभूतानां जीवतां स्तोकानां च मृतानां शङ्खशङ्खनकादीनामेकत्र राशौ दृष्टे यदा कश्चिदेवं वदति–अहो महान् जीवराशिरयमिति तदा सा जीवमिश्रिता, सत्यामृषात्वं चास्या जीवत्सु सत्यत्वात् मृतेषु मृषात्वात् ४, तथा यदा प्रभूतेषु मृतेषु स्तोकेषु जीवत्सु एकत्र राशीकृतेषु शङ्खादिष्वेवं वदति–अहो महानयं मृतो जीवराशिरिति तदा सा अजीवमिश्रिता, अस्या अपि सत्यामृषात्वं मृतेषु सत्यत्वात् जीवत्सु मृषात्वात् ५,

तथा तस्मिन्नेव राशौ एतावन्तोऽत्र जीवन्त एतावन्तोऽत्र मृता इति नियमेनावधारयतो विसंवादे जीवाजीवमिश्रिता ६, तथा मूलकादिकमनन्तकायं तस्यैव सलकैः परिपाण्डुपत्रैरन्येन वा केनचिदप्रत्येकवनस्पतिना मिश्रमवलोक्य सर्वोऽप्येषोऽनन्तकायिक इति वदतोऽनन्तमिश्रिता ७, तथा प्रत्येकवनस्पतिसङ्घातमनन्तकायिकेन सह राशीकृतमवलोक्यप्रत्येकवनस्पतिरयं सर्वोऽपीति वदतः प्रत्येकमिश्रिता ८, तथा अद्धा–कालः, स चेह प्रस्तावात् दिवसो रात्रिर्वा परिगृह्यते, स मिश्रितो यया साऽद्धामिश्रिता, यथा कश्चित् कञ्चन त्वरयन् दिवसे वर्त्तमान एव वदति–उत्तिष्ठ रात्रिर्या तेति, रात्रौ वा वर्त्तमानायामुत्तिष्ठोद्गतः सूर्य इति ९, तथा दिवसस्य रात्रेर्वा एकदेशोऽद्धाद्धा सा मिश्रिता यया सा अद्धाद्धामिश्रिता, यथा प्रथमपौरुष्यामेव वर्त्तमानायां कश्चित् कञ्चन त्वरयन् एवं वदति–चल मध्याह्नीभूतं इति। असत्यामृषा द्वादशविधा, तद्यथा–

मू. *(३८७) आमंतणि १ आणमणी २ जायणि ३ तह पुच्छणी य ४ पन्नवणी ५।*
पच्चक्खाणी ६ भासा भासा इच्छाणुलोमा, ७ य॥

वृ. 'आमंताणि' इति तत्र आमन्त्रणी हे देवदत्त इत्यादि, एषा हि प्रागुक्तसत्यादिभाषात्रयलक्षणविकलत्वान्न सत्या नापि मृषा नापि सत्यामृषा केवलं व्यवहारमात्रप्रवृत्तिहेतुरित्यसत्यामृषा १ एवं सर्वत्र भावना कार्या, आज्ञापनी कार्ये परस्य प्रवर्त्तनं, यथेदं कुर्विति २ याचनी कस्यापि वस्तुविशेषस्य देहीति मार्गणं ३ पृच्छनी अविज्ञातस्य सन्दिग्धस्य कस्यचिदर्थस्य परिज्ञानाय तद्विदः पार्श्वे चोदना ४ प्रज्ञापनी विनीतविनयस्य विनेयजनस्योपदेशदानं यथा प्राणिवधान्निवृत्ता भवन्ति भवान्तरे प्राणिनो दीर्घायुष इत्यादि, उक्तं च–

॥१॥ "पाणिवहाउ नियत्ता हवंति दीहाउया अरोगा य य
एमाई पन्नत्ता पन्नवणी वीयरागेहिं॥" ५

याचमानस्य प्रतिषेधवचनं प्रत्याख्यानी ६ इच्छानुलोमा नाम यथा कश्चित्किञ्चित्कार्यमारभमाणः कञ्चन पृच्छति, स प्राह–करोतु भवान् ममाप्येतदभिप्रेतमिति ७।

मू. *(३८८) अणभिग्गहिया भासा ८ भासा य अभिग्गहंमि बोद्धव्वा ९।*
संसयकरणी भासा १० वोगड ११ अव्वोगडा चेव १२॥

वृ. अनभिग्रहा यत्र न प्रतिनियतार्थावधारणं, यथा बहुकार्येष्ववस्थितेषु कश्चित् कञ्चन पृच्छति–किमिदानीं करोमि?, स प्राह–यत्प्रतिभासते तत्कुर्विति ८ अभिगृहीता प्रतिनियतार्थावधारणं, यथा इदमिदानीं कर्त्तव्यमिदं नेति ९ संशयकरणी या वाक् अनेकार्थाभिधायितया परस्य संशयमुत्पादयति, यथा सैन्धवमानीयतामित्यत्र सैन्धवशब्दो लवणवस्त्रपुरुषवाजिषु १० व्याकृता या प्रकटार्था ११ अव्याकृता अतिगम्भीरशब्दार्था अव्यक्ताक्षरप्रयुक्ता वा अविभावितार्थत्वात् १२। शेषं सुगमं, यावत् 'कइ णं भंते! भासज्जाया' इत्यादि।

मू. (३८९) जीवा णं भंते! किं भासगा अभासगा?, गो० ! जीवा भासगावि अभासगावि, से केणट्ठेणं भंते ! एवं वुच्चति जीवा भासगावि अभासगावि ?, गो० ! जीवा दुविहा पं०, तं०– संसारसमावन्नगा य असंसारसमावन्नगा य, तत्थ णं जे ते असंसारसमावन्नगा ते णं सिद्धा सिद्धा णं अभासगा, ।

तत्थ णं जे ते संसारसमावन्नगा ते दुविहा पं०, तं०–, सेलेसीपडिवण्णगा य असेलेसीपडिवण्णगा य, तत्थ णं जे ते सेलेसिपडिवण्णगा ते णं अभासगा, तत्थ णं जे ते असेलेसिपडिवण्णगा ते दुविहा पं०, तं०–एगिंदिया य अणनेगिंदिया य, तत्त णं जे ते एगिंदिया ते णं अभासगा, तत्थ णं जे ते अनेगेंदिया ते दुविहा पं०, तं०–पज्जत्तगा य अपज्जत्तगा य, तत्थ णं जे ते अपज्जत्तगा ते णं अभासगा, तत्थ णं जे ते पज्जत्तगा ते णं भासगा, से एएणट्ठेणं गोयमा ! एवं वुच्चति–जीवा भासगावि अभासगावि। नेरइया णं भंते! किं भासगा अभासगा?, गो० ! नेरइया भासगावि अभासगावि, से केणट्ठेणं भंते ! एवं वुच्चति–नेरइया भासगावि अभासगावि ? गो० ! नेरइया दुविहा, पं० तं०– पज्जत्तगा य अपज्जत्तगा य, तत्थ णं जे ते अपज्जत्तगा ते णं अभासगा, तत्त णं जे ते पज्जत्तगा ते णं भासगा, से एएणट्ठेणं गो० ! एवं वुच्चति–नेरइया भासगावि अभासगावि, एवं एगिंदियवज्जाणं निरंतरं भाणियव्वं ॥

मू. (३९०) कति णं भंते! भासज्जाया पन्नत्ता?, गो० ! चत्तारि भासज्जाया प०, तं०–सच्चमेगं भासज्जायं बितियं मोसं ततियं सच्चामोसं चउत्तं असच्चामोसं, जीवा णं भंते! किं सच्चं भसं भासंति मोसं भासं भासंति सच्चामोसं भासं भासंति असच्चामोसं भासं भासंति ?, गो० ! जीवा संच्चंपि भासं भसंति मोसंपि भासं भासंति सच्चामोसंपि भासं भासंति असच्चामोसंपि भासं भासंति,

नेरइया णं भंते ! किं सच्चं भासं भासंति जाव असच्चामोसं भासं भासंति ?, गो० ! नेरइया णं सच्चंपि भासं भासंति जाव असच्चामोसंपि भासं भासंति, एवं असुरकुमारा जाव थणियकुमारा, बेइंदियतेइंदियचउरिंदिया य नो सच्चं नो मोसं नो सच्चमोसं भासं भासंति असच्चमामोसं भासं भासंति,

पंचिंदियतिरिक्खजोणिया णं भंते ! किं सच्चं भासं भासंति जाव किं असच्चमीमोसं भासं भसंति ?, गो० पंचिंदियतिरिक्खजोणियाणो सच्चं भासं भासंति नो मोसं भासं भासंति णो सच्चामोसं भासं भासंति एगं असच्चामोसं भासं भासंति नन्नत्थ सिक्खापुव्वगं उत्तरगुणलद्धिं वा पडुच्च सच्चंपि भासं भासंति मोसंपि सच्चामोसंपि असच्चामोसंपि भासं भासंति, मणुस्सा जाव वेमाणिया, एते जहा जीवा तहा भाणियव्वा ॥

वृ. कति भदन्त! भाषाजातानि–भाषाप्रकाररूपाणि प्रज्ञप्तानि ?, इदं प्रागुक्तमपि भूयोऽभ्युपात्तं सूत्रान्तरसम्बन्धनार्थं, तान्येव सूत्रान्तराणि दर्शयति–'जीवा णं भंते! किं सच्चं भासं भासंति इत्यादि सुगमं, नवरं द्वित्रिचतुरिन्द्रियेषु सत्यादिभाषात्रयप्रतिषेधस्तेषां सम्यक्परिज्ञानपरवञ्चनाद्यभिप्रायासम्भवात्,

तिर्यक्पञ्चेन्द्रिया अपि न सम्यग्यथावस्थितवस्तुप्रतिपादनाभिप्रायेण भाषन्ते नापि परविप्रतारणबुध्या किन्तु यदा भाषन्ते तदा कुपिता अपि परं मारयितुकामा अप्येवमेव भाषन्ते ततस्तेषामपि भाषा असत्यामृषा, किं सर्वेषामपि तेषामसत्यामृषा ?, नेत्याह–'नन्नत्थे'त्यादि,

सत्यादिकां भाषां न भाषन्ते शिक्षादेरन्यत्र, शिक्षापूर्वकं पुनः शुकसारिकादयः संस्कारविशेषात् तथा कुतश्चित्तथाविधक्षयोपशमविशेषाज्जातिस्मरणरूपां विशिष्टव्यवहारकौशलरूपां वा लब्धिं प्रतीत्य इत्यादिकां चतुर्विधामपि भाषां भाषन्ते, शेषं सुगमं ॥

सम्प्रति भाषाद्रव्यग्रहणादिविषयसंशयापनोदार्थमाह-

मू. (३९१) *जीवे णं भंते ! जाइं दव्वाइं भासत्ताए गिण्हति ताइं किं ठियाइं गेण्हति अठियाइं गेण्हति ?, गो० ! ठियाइं गिण्हति नो अठियाइं गिण्हति, जाइं भंते ! ठियाइं गिण्हति ताइं किं दव्वतो गिण्हति खेत्ततो गिण्हति कालतो गिण्हति भावतो गिण्हति ? गो० ! दव्वओवि गिण्हति खेत्तओवि कालओवि भावओवि गिण्हति,*

जाति भंते ! दव्वओ गेण्हति ताइं किं एगपदेसियाइं गिण्हति दुपदेसियाइं जाव अनंतपदेसियाइं गेण्हति ?, गो० ! नो एगपदेसियाइं गेण्हति जाव नो असंखिज्जपदेसियाइं, गिण्हइ अनंतपदेसियाइं गेण्हति, जाइं खेत्तओ गेण्हति ताइं किं एगपएसोगाढाइं गेण्हति दुपएसोगाढाइं गेण्हति जाव असंखेज्जपएसोगढाइं गेण्हति ?, गो० ! नो एगपएसोगाढइयं गेण्हति जाव नो संखेज्जपएसोगाढाइं गेण्हति असंखेज्जपएसोगाढाइं गेण्हति ?, गो० ! नो एगपएसोगाढाइं गेण्हति जाव नो संखेज्जपएसोगाढइं गेण्पति असंखेज्जपएसोगाढाइं गेण्हति,

जाइं कालतो गेण्हति ताइं किं एगसमयठिइयाइं गेण्हति दुसमयठिइयाइं गिण्हति जाव असंखिज्जसमयठिइयाइं गेण्हति ?, गो० ! एगसमयठितीयाइंपि गेण्हति दुसमयठितीयाइंपि गेण्हति जाव असंखेज्जसमयठितीयाइंपि गेण्हति, जाइं भावतो गेण्हति ताइं किं वण्णमंताइं गेण्हति गंधमंताइं रसमंताइं फासमंताइं गेण्हति ?, गो० ! वण्णमंताइंपि जाव फासमंताइंपि गेण्हपति,

जाइं भायओ वण्णमंताइंपि गेण्हति ताइं किं एगवण्णाइं गेण्हति जाव पंचवण्णाइं गेण्हति गो० ! गहणवव्वाइं पडुच्च एगवण्णाइंपि गेण्हति जाव पंचवण्णाइंपि गेण्हति, सव्वग्गहणं पडुच्च नियमा पंचवण्णाइं गेण्हति, तंजहा-कालाइं नीलाइं लोहियाइं हालिद्दाइं सुक्किलाइं, जाइं वण्णतो कालाइं गेण्हति ताइं किं एगगुणकालाइं गेण्हति जाव अणंतगुणकालाइं गिण्हति ?, गो० ! एगगुणकालाइंपि गिण्हति जाव अनंतगुणकालाइंपि गेण्हति, एवं जाव सुक्किलाइंपि,

जाइं भावतो गंधमंताइं गिण्हति ताइं किं एगगंधाइं गिण्हति दुगंधाइं गिण्हति ?, गो० ! गहणदव्वाइं पडुच्च एगगंधाइंपि दुगंधाइंपि गिण्हति, सव्वग्गहणं पडुच्च नियमा दुगंधाइं गिण्हति; जाइं गंधतो सुब्भिगंधाइं गिण्हति ताइं किं एगगुणसुब्भिगंधाइं गिण्हति जाव अनंतगुणसुब्भिगंधाइंपि गिण्हति ?, गो० ! एगगुणसुब्भिगंधाइंपि जाव अनंतगुणसुब्भिगंधाइंपि गेण्हइ, एवं दुब्भिगंधाइंपि गेण्हइ, जाइं भावतो रसमंताइं गेण्हति ताइं किं एगरसाइं गेण्हति जाव किं पंचरसाइं गेण्हति ?, गो० ! गहणदव्वाइं पडुच्च एगरसाइंपि गेण्हति जाव पंचरसाइंपि गेण्हति सव्वग्गहणं पडुच्च नियमा पंचरसाइं गेण्हति, जाइं रसओ तित्तरसाइं गेण्हति ताइं किं एगगुणतित्तरसाइं गिण्हति जाव अनंतगुणतित्तरसाइं गिण्हति ?, गो० ! एगगुणतित्ताइंपि गिण्हइ जाव अनंतगुणतित्ताइंपि गिण्हति. एवं जाव मधुररसो,

जाइं भावतो फासमंताइं गेण्हति ताइं किं एगफासाइं गेण्हइ जाव अट्ठफासाइं गिण्हति गो० ! गहणदव्वाइं पडुच्च नो एगफासाइं गेण्हति, दुफासाइं गिण्हइ जाव चउफासाइं गेण्हति, नो

पंचफासाइं गेण्हति, जाव नो अट्ठफासाइं गेण्हति, सव्वग्गहणं पडुच्च नियमा चउफासाइं गेण्हति, तंजहा–सीतफासाइं गेण्हति उसिणफासाइं निद्धफासाइं लुक्खफासाइं गेण्हति, जाइं फासतो सीताइं गिण्हति ताइं किं एगगुणसीताइं गेण्हति जाव अनंतगुणसीताइं गेण्हति ?, गो० ! एगगुणसीताइंपि गेण्हति जाव अनंतगुणसीताइंपि गेण्हति, एवं उसिणनिद्धलुक्खाइं जाव अनंतगुणाइंपि गिण्हति,

जाइं भंते ! जाव अनंतगुणलुक्खाइं गेण्हति ताइं किं पुट्ठाइं गेण्हति अपुट्ठाइं गेण्हति ?, गो० ! पुट्ठाइं गेण्हति नो अपुट्ठाइं गेण्हति, जाइं भंते ! पुट्ठाइं गेण्हति ताइं किं ओगाढाइं गेण्हति अनोगाढाइं गेण्हति ?, गो० ! ओगाढाइं गेण्हति नो अनोगाढाइं गेण्हति, जाइं भंते ! ओगाढाइं गेण्हति ताइं किं अनंतरोगाढाइं गेण्हति परंपरोगाढाइं गेण्हति ?, गो० ! अनंतरोगाढाइं गिण्हति नो परंपरोगाढाइं गेण्हति, जाइं भंते ! अनंतरोगाढाइं गेण्हति ताइं भंते ! किं अणूइं गेण्हति बायराइं गेण्हति ?, गो० ! अणूइंपि गेण्हति बायराइंपि गेण्हति,

जाइं भंते ! अणूइं गेण्हति ताइं किं उड्ढं गेण्हति अधे गेण्हति तिरियं गेण्हति ?, गो० ! उड्ढंपि गेण्हति अधेवि गेण्हति तिरियंपि गेण्हति, जाइं भंते ! उड्ढंति गेण्हति अधेवि गेण्हति तिरियंपि गेण्हति ताइं किं आदिं गेण्हति मज्झे गेण्हति पज्जवसाणे गेण्हंते ?, गो० ! आदिंपि गेण्हति मज्झेवि गेण्हति पज्जवसाणेवि गेण्हति, जाइं भंते ! आदिंपि गिण्हति मज्झेवि गेण्हति पज्जवसाणेवि गिण्हति ताइं किं सविसए गिण्हति अविसए गिण्हति ?, गो० ! सविसए गेण्हति नो अविसए गेण्हति,

जाइं भंते ! सविसए गेण्हति ताइं किं आनुपुव्विं गेण्हति अनानुपुव्विं गेण्हति ?, गो० ! आनुपुव्विं गेण्हति, नो अनानुपुव्विं गेण्हति, जाइं भंते ! आनुपुव्विं गेण्हति ताइं किं तिदिसिं गेण्हति जाव छद्दिसिं गेण्हति ?, गो० ! नियमा छद्दिसिं गेण्हति० ।

वृ. 'जीवे णं भंते ! जाइं दव्वाइं भासत्ताए गिण्हइ' इत्यादि, सुगमं नवरं 'ठियाइं' स्थितानि न गमनक्रियावन्ति द्रव्यतश्चिन्तायामनन्तप्रादेशिकानि–अनन्तरपरमाण्वात्मकानि गृह्णति, नैकपरमाण्वाद्यात्मकानि, तेषां स्वभावत एव जीवाना ग्रहणायोग्यत्वात्, क्षेत्रचिन्तायामसङ्ख्यातप्रदेशावगाढानि, एकप्रदेशाद्यवगाढानां तथास्वभावतया ग्रहणायोग्यत्वात्, कालतश्चिन्तायामेकसमयस्थितिकान्यपि यावदसङ्ख्येयसमयस्थितिकान्यपि गृह्णति, पुद्गलानामसङ्ख्येयमपि कालं यावदवस्थानसम्भवात्, तथा चोक्तं व्याख्याप्रज्ञप्तौ सैजनिरेजपुद्गलावस्थानचिन्तायां– 'अनंतपएसिए णं भंते ! खंधे केवइकालं सेए ?, गो० ! जहन्नेणं एक्कं समयं उक्कोसेणं आवलियाए असंखेज्जतिभागं, निरेए जहन्नेणं एक्कं समयं उक्कोसेणं असंखेज्जं काल'मिति, तेषां च गृहीतानां ग्रहणानन्तरसमये अवश्यं निसर्ग इति स्वभावस्यानन्तरसमये ग्रहणं प्रतिपत्तव्यं, अन्ये तु व्याचक्षते–एकसमयस्थितकान्यपीति आदिभाषापरिणामपेक्षया द्रष्टव्यं, विचित्रो हि पुद्गलानां परिणामः, तत एकप्रयत्नगृहीतमुक्ता अपि ते केचिदेकं समयं भाषात्वेनावतिष्ठन्ते केचिद् द्वौ समयौ यावत् केचिदसङ्ख्येयानपि समयानिति, तथा 'गहणदव्वाइं' इति गृह्यन्ते इति ग्रहणानि ग्रहणानि च तानि द्रव्याणि च ग्रहणद्रव्याणि, किमुक्तं भवति ? –

यानि ग्रहणयोग्यानि द्रव्याणि तानि कानिचित् वर्णपरिणामेन एकेन वर्णेनोपेतानि कानिचित्

द्वाभ्यां कानिचित् त्रिभिः कानिचित् चतुर्भिःकानिचित्पञ्चभिः, यदा पुनरेकप्रयत्नगृहीतानामपति सर्वेषां द्रव्याणामपि समुदायो विवक्ष्यते तदा नियमात् पञ्चवर्णानि गृह्णन्ति एवं गन्धरसेष्वपि भावनीयं, स्पर्शतः चिन्तायामेकस्पर्शप्रतिषेध एकस्यापि परमाणोवश्यं स्पर्शद्वयभावात्, तथा चोक्तम्–

॥ १ ॥ "कारणमेव तदन्त्यं सूक्ष्मो नित्यश्च भवति परमाणुः ।
एकरसगन्धवर्णो द्विस्पर्शः कार्यलिङ्गश्च ॥"

द्विस्पर्शानि–मृदुशीतानि मृदूष्णानीत्यादि, जाव चउफासा' इति यावच्छब्दकरणात् त्रिस्पर्शपरिग्रहः, तत्र त्रिस्पर्शान्येवं–कानिचित् द्रव्याणि किल मृदुशीतस्पर्शानि कानिचित् मृदुस्निग्धस्पर्शानि, तत्र मृदुस्पर्शो मृदुस्पर्श एवान्तर्भूत इत्येकस्पर्शः शीतस्निग्धरूपो तु द्वान्यौ स्पर्शाविति समुदायमधिकृत्य त्रिस्पर्शानि, एवं स्पर्शान्तरयोगेऽपि त्रिस्पर्शानि भावनीयानि, कानिचिच्चतुः–स्पर्शानि तत्र चतुःस्पर्शेषु मृदुलघुरूपो द्वौ स्पर्शाववस्थितौ सूक्ष्मस्कन्धेषु तयोरवश्यंभावात्, अन्यौ तु द्वौ स्पर्शौ स्निग्धोष्णौ स्निग्धशीतौ रूक्षोष्णौ रूक्षशीतौ, सर्वसमुदायमपेक्ष्य नियमात्तानि चतुःस्पर्शानि गृह्णाति, तत्र यौ द्वौ मृदुलघुरूपौ स्पर्शाववस्थितौ ताववस्थितत्वादेव व्यभिचारा-भावान्न गण्येते ये त्वन्ये स्निग्धादयश्चत्वारस्ते किल वैकल्पिका इति तानधिकृत्य सूत्रमाह–, तद्यथा–'सीयफासाइं गेण्हइ' इत्यादि सुगमं, यावत् 'जाइं भंते ! अनंतगुणलुक्खाइं गेण्हइ' इह किल चरमं सूत्रमनन्तरमिदमुक्तं 'अनंतगुणलुक्खाइंपि गिण्हइ' ततः सूत्रसम्बन्धवशादिदमुक्तं, जाइं भंते ! जाव अनंतगुणलुक्खाइं गेण्हइ', इति 'यावता जाइं भंते ! एगगुणकालवण्णाइं' इत्याद्यपि द्रष्टव्यं, 'ताइं भंते ! किं पुट्ठाइं' इत्यादि, तानि भदन्त ! किं स्पृष्टानि–आत्मप्रदेशसंस्पृष्टानि गृह्णाति, उतास्पृष्टानि ? भगवानाह–गो० स्पृष्टानि–आत्मप्रदेशैः सह संस्पर्शमागतानि गृह्णाति नास्पृष्टानि, इहात्मप्रदेशैः संस्पर्शनमात्मप्रदेशावगाहक्षेत्राद्बहिरपि सम्भवति ततः प्रश्नयति–

'जाइं भंते !' इत्यादि, अवगाढानि–आत्मप्रदेशैः सह एकक्षेत्रावस्थितानि गृह्णन्ति नानवगाढानि, 'जाइं भंते !' इत्यादि, अनन्तरावगाढानि–अव्यवधानेनावस्थितानि गृह्णानि न परम्परावगाढानि, किमुक्तं भवति ?–येष्वात्मप्रदेशेषु यानि भाषाद्रव्याण्यवगाढानि तैरात्मप्रदेशैस्तान्येव गृह्णाति न त्वेकद्वित्र्यात्मप्रदेशव्यवहितानि, 'जाइं भंते ! अनंतरोगाढाइं' इत्यादि, अणून्यपि–स्तोकप्रदेशान्यपि गृह्णति बादराण्यपि–प्रभूतप्रदेशोपचितान्यपि, इहाणुत्वबादरत्वे तेषामेव भाषायोग्यानां स्कन्धानां प्रदेशस्तोकबाहुल्यापेक्षया व्याख्याते, मूलटीकाकारेण तथाव्याख्यानात्,

'जाइं भंते ! अणूइंपि गेण्हइ' इत्यादि, ऊर्ध्वमपि अधोऽपि तिर्यगपीति, इह जीवस्य यावति क्षेत्रे ग्रहणयोग्यानि भाषाद्रव्याण्यवस्थितानि तावत्येव क्षेत्रे ऊर्ध्वमधस्तिर्यकत्वं द्रष्टव्यं, 'जाइं भंते ! उड्ढंपि गेण्हइ' इत्यादि, यानि भाषाद्रव्याण्यन्तर्मुहूर्तं यावत् ग्रहणोचितानि तानि ग्रहणोचितकालस्य उत्कर्षतोऽन्तर्मुहूर्त्तप्रमाणस्यादावपि–प्रथमसमये गृह्णाति मध्येऽपि–द्वितीयादिष्वपि समयेषु गृह्णाति, पर्यवसानेऽपि–पर्यवसानसमयेऽपि गृह्णति, 'जाइं भंते ! आइंपि गेण्हइ' इत्यादि, स्वविषयान्–स्वगोचरान् स्पृष्टावगाढानन्तरावगाढाख्यान् गृह्णति, न

त्वविषयान् स्पृष्टादिव्यतिरिक्तान्, 'जाइं भंते ! सविसए गेण्हइ' इत्यादिक, आनुपूर्वी नाम ग्रहणापेक्षया यथासन्नत्वं तद्विपरीता अनानुपूर्वी, तत्रानुपूर्व्या गृह्णाति नत्वनानुपूर्व्या, 'जाइं भंते आनुपुव्विं गेण्हइ' इत्यादि 'तिदिसिं'ति त्रिदिशि गृह्णाति तिसृभ्यो दिग्भ्य आगतानि गृह्णाति एवं चतुर्दिशि पञ्चदिशि षड्दिशि च, एवमुक्ते भगवानाह–गौतम ! नियमात् षड्दिशि गृह्णाति–षड्भ्यो दिग्भ्यः आगतानि गृह्णाति, भाषको हि नियमात् त्रसनाड्यां अन्यत्र त्रसकायासम्भवात्, त्रसनाड्यां च व्यवस्थितस्य नियमात् षड्दिगागतपुद्गलसम्भवात् ।

मू. (३९२) *"पुट्ठोगाढअनंतर अणू य तह बायरे य उड्ढमहे ।*
आदिविसयाणुपुव्विं नियमा तह छद्दिसिं चेव ॥"

वृ. एतेषामेवार्यानां सङ्ग्रहणिगाथामाह–'पुट्ठोगाढअनंत'रमित्यादि प्रथमतः स्पृष्टविषयं सूत्रं तदनन्तरमवगाढसूत्रं ततोऽनन्तरावगाढसूत्रं ततोऽणुबादरविषयं सूत्रं तदनन्तरमूर्ध्वाधःप्रभृतिविषयं सूत्रं तत 'आइ' इति उपलक्षणमेतत् आदिमध्यावसानसूत्रं ततो विषयसूत्रं तदनन्तरमानुपूर्वीसूत्रं ततो नियमात् षड्दिशितिसूत्रं, ।

मू. (३९३) *जीवे णं भंते ! जाइं दव्वाइं भासत्ताए गेण्हति ताइं किं संतरं गेण्हति निरंतरं गेण्हति ?, गो० ! संतरंपि गेण्हति, निरंतरंपि गेण्हति, संतरं गिण्हमाणे जहन्नेणं एगं समयं उक्कोसेणं असंखेज्जसमए अंतरं कट्टु गेण्हति, निरंतरं गेण्हमाणे जहन्नेणं दो समए उक्कोसेणं असंखेज्जसमए अणुसमयं अविरहियं निरंतरं गेण्हति,*

जीवे णं भंते ! जाइं दव्वाइं भासत्ताए गहियाइं निसिरइ ताइं किं संतरंनिसरइ निरंतरं निसरइ ?, गो० ? संतरं निसरइ नो निरंतरं निसरइ, संतरं निस्सरमाणे एगेणं समएणं गेण्हति एगेणं समएणं निसरइ, एतेणं गहणनिसरणोवाएणं जहन्नेणं दुसमइयं उक्कोसेणं असंखेज्जसमइयं अंतोमुहुत्तिगं गहणनिसरणोवायं करेति,

जीवे णं भंते ! जाइं दव्वाइं भासत्ताए गहियाइं निसिरति ताइं किं भिण्णाइं निसरति अभिन्नाइं निसरति ?, गो० ! भिन्नाइंपि निस्सरइ अभिन्नाइंपि निस्सरइ, जाइं भिन्नाइं निसरति ताइं अनंतगुणपरिवुड्ढीएणं परिवड्ढमाणाइं लोयंतं फुसंति, जाइं अभिन्नाइं निसरइ ताइं असंखेज्जाओ ओगाहणवग्गणाओ गंता भेदमावज्जंति संखेज्जाति जोअणाति गंता विद्धंसमागच्छंति

वृ. 'जीवाणं भंते ! जाइं दव्वाइं' इधाति, जीवा 'ण'मिति वाक्यालङ्कारे, भदन्त ! यानि द्रव्याणि भाषकत्वेन गृह्णाति तानि किं सान्तरं–सव्यवधानं गृह्णाति किं वा निरनन्तरं–निव्यवधानं भगवानाह–सान्तरमपि गृह्णति निरन्तरमपि, उभयथापि ग्रहणसम्भवात्, तत्र सानतरनिरन्तरग्रहणयोः प्रत्येकं कालमानं प्रतिपादयति–'संतरं गिण्हमाणे' इत्यादि, सान्तरं गृह्णन् जघन्यतः एकं समयं अन्तरं कृत्वा गृण्हाति, एतच्च जघन्यत एकं समयमन्तरं सततं भाषाप्रवृत्तस्य भाषमाणस्यावसेयं, तच्चेवं–

कश्चिद्भाषकस्मिन् समये भाषापुद्गलान् गृहीत्वा तदनन्तरं मोक्षसमये अनुपादानं कृत्वा पुनस्तृतीये समये गृह्णत्येव न मुञ्चति द्वितीये समये प्रथमंसमयगृहीतान् पुद्गलान् मुञ्चति अन्यान्नादत्ते, अथान्येन प्रयत्नविशेषेण ग्रहणमन्येन च प्रयत्नविशेषेण [च] निसर्गः तौ च परस्परं विरुद्धौ परस्परविरुद्धकार्यकरणात् ततः कथमेकस्मिन् समये तौ स्यातां ?,तदयुक्तं, जीवस्य हि

तथास्वाभाव्यात् द्वावुपयोगावेकस्मिन् समये न स्यातां, ये तु क्रियाविशेषास्ते बहवोऽप्येकस्मिन् समये घटन्त एव, तथादर्शनात्, तथाहि–एकापि नर्त्तकी भ्रमणादिनृत्तंविदधाना एकस्मिन्नपि समये हस्तपादादिगता विचित्राः क्रियाः कुर्वती दृश्यते, सर्वस्यापि वस्तुनः प्रत्येकमेकस्मिन् समये उत्पादव्ययावुपजायेते, एकस्मिन्नेव च समये सङ्घातपरिशाटावपि, ततो न कश्चिद्दोषः, आह च भाष्यकृत्–

॥ १ ॥ "गहणनिसग्गपयत्ता परोप्परकविरोहिणो कहं समये ? ।
समए दो उपओगा न होज्ज किरियाण को दोसो ? ॥" इति,

तृतीये पुनः समये तानेव द्वितीयसमयोपात्तान् पुद्गलान् मुञ्चति न पुनरन्यानादत्ते, उत्कर्षेण त्वसङ्ख्येयान् यावन्निरन्तरं गृह्णाति, तथा चाह–उत्कर्षेणासङ्ख्येयान् समयान् गृह्णाति इति योगः, कदाचित्परोऽसङ्ख्येयैः समयैरेकं ग्रहणं मन्येत तत आह–'अनुसमयं' प्रतिसमयं गृह्णाति, तदु कदाचिद्विरहितमपि व्यवहारतोऽनुसमयमित्युच्येत ततस्तदाशङ्क्य व्यवच्छेदार्थमाह–अविरहितं, एवं निरन्तरं गृह्णति, तत्राद्ये समये ग्रहणमेव न निसर्गः, अगृहीतस्य निसर्गाभावात्, पर्यन्तसमये च मोक्ष एव, भाषाभिप्रायोपरमतो ग्रहणासम्भवात्, शेषेषु द्वितीयादिषु समयेषु ग्रहणनिसर्गौ युगपत्करोति

'वा णं भंते ! जाइं दव्वाइं भासत्ताए गहियाइं निसरइ' इत्यादि प्रश्नसूत्रं सुगमं, निर्विचनमाह–सान्तरं निसृजति नो निरन्तरं, इयमत्र भावना–इह तावत् ग्रहणं निरन्तरमुक्तं, तथा चानन्तरसूत्रं 'अणुसमयविरहियं निरंतरं गेण्हइ' इति ततो निसर्गोऽपि प्रथमवर्जेषु शेषेषु समयेषु निरन्तरं प्रतिपत्तव्यो, गृहीतस्यावश्यमनन्तरसमये निसर्गात्, ततो यदुक्तं 'सान्तरं निसृजति नो निरन्तर'मिति, तत्र ग्रहणापेक्षया द्रष्टव्यं, तथाहि–यस्मिन् समये यानि भाषाद्रव्याणि गृह्णाति न तानि तस्मिन्नेव समये मुञ्चति, यथा प्रथमसमये गृहीतानि न तस्मिन्नेव प्रथमसमये मुञ्चति किन्तु पूर्वस्मिन् पूर्वस्मिन् समये ग–हीतानि उत्तरस्मिन् समये, ततो ग्रहणपूर्वो निसर्गोऽगृहीतस्य निसर्गायोगात् इति सान्तरं निसर्ग उक्तः, आह च भाष्यकृत–

॥ १ ॥ "अनुसमयमनंतरियं गहणं भणियं ततो विमोक्खोऽवि ।
जुत्तो निरन्तरोवि य भणइ कहं संतरो भणिओ ? ॥
॥ २ ॥ गहणावेक्खाए तओ निरंतरं जंमि जाइं गहियाइं ।
नउ तम्मि चेव निसरइ जह पढमे निसिरणं नत्थि ॥
निसिरिज्जइ नागहियं गहणंतरियंति संतरं तेणं ।" इति,

एतदेव सूत्रकृदपि स्पष्टयति–'संतरं निसरमाणो एगेणं समएणं गेण्हइ एगेणं संएणं निस्सरइ' इति, एकेन–पूर्वपूर्वरूपेण समयेन गृह्णाति एकेन–उत्तरोत्तररूपेण समयेन निसृति, अथवा ग्रहणापेक्षं निसर्गाभावात् एकेन–आद्येन समयेन गृह्णात्येव न निसृजत्यगृहीतस्य निसर्गाभावात्, तथा एकेन–पर्यवसानसमयेन निसृजत्येव न गृह्णाति, भाषाभिप्रायोपरमतो ग्रहणासम्भवात्, शेषेषु तु द्वितीयादिषु समयेषु युगपद् ग्रहणनिसर्गौ करोति, तौ च निरन्तरं जघन्यतो द्वौ समयौ उत्कर्षतोऽसङ्ख्येयान् समयान्, एतदेवाह–'एतेणं गहणनिसरणो वाएणं जहन्नेणं दुसमइयं उक्कोसेणं असंखेज्जसमइयं अंतोमुहुत्तिगं गहणनिसिरणं करेइ' इति, 'जीवेणं जाइं दव्वाइं' इत्यादि प्रश्नसूत्रं

सुगमं, भगवानाह–गौतम ! भिन्नान्यपि निसृजति अभिन्नान्यपि, इयमत्र भावना–इह द्विविधो वक्ता–मन्दप्रयत्नस्तीव्रप्रयत्नश्च, तत्र यो व्याधिविशेषतोऽनादरतो वा मन्दप्रयत्नः स भाषाद्रव्याणि तथाभूतान्येव स्थूलखण्डात्मकानि निसृजति, यस्तु नीरोगतादिगुणयुक्तस्तथाविधादरभावतस्तीव्रप्रयत्नः स भाषाद्रव्याणि आदाननिसर्गप्रयत्नाभ्यां खण्डशः कृत्वा निसृजति, आह च भाष्यकृत–

॥ १ ॥ "कोई मंदपयत्तो निसिरइ सकलाइं सव्वदव्वाइं ।
अन्नो तिव्वपयत्तो सो मुंचइ भिंदिउं ताइं ।।"

तत उक्तं–'भिन्नाइंपि निसिरइ अभिन्नाइंपि निस्सरइ, जाइं भिन्नाइं निसइ' इत्यादि, यानि तीव्रप्रयत्नो वक्ता प्रथमत एव भिन्नानि निसृजतितानि सूक्ष्मत्वात् बहुत्वाच्च प्रभूतान्यन्यानि द्रव्याणि वासयन्ति, तदन्यद्रव्यासकलादेव चानन्तगुणवृध्या परिवर्द्धमानानि षट्सु दिक्षु लोकान्तं स्पृशन्ति, लोकान्तं प्राप्नुवन्तीत्यर्थः, उक्तं च–

॥ १ ॥ "भिन्नाइं सुहुमयाए अनंतगुणवड्ढियाइं लोगंतं ।
पावंति पूरयंति य भासाए निरंतरं लोगं ।।"

यानि पुनर्मन्दप्रयत्नो वक्ता यथाभूतान्येव प्राक् भाषाद्रव्याण्यासीरन् तथाभूतान्येव सकलान्यभिन्नानि भाषात्वेन परिणमय्य निसृजति तान्यसङ्ख्येया अवगाहनावर्गणा गत्वा, अवगाहनाः–एकैकस्य भाषाद्रव्यस्याधारभूता असङ्ख्येयप्रदेशात्मकक्षेत्रविभागरूपास्तासामवगाहनानां वर्गणाः–समुदायास्तान् असङ्ख्येया अतिक्रम्य भेदमापद्यन्ते, विशरारुतामेव विप्रतीत्यर्थः, विशरारुभावं विप्राणानि च सङ्ख्येयानि योजनानि गत्वा विध्वंसमागच्छन्ति, शब्दपरिणामं विजहतीत्यर्थः, उक्तं च–

॥ १ ॥ "गंतुमसंखेज्जाओ अवगाहणवग्गणा अभिन्नाइं ।
भिज्जंति धंसमेंति य संखिज्जे जोयणे गंतुं ।।"

भिन्नान्यपि निसृजतीत्युक्तं, तत्र कतिविधः शब्दद्रव्याणां भेद इति पृच्छति–

मू. (३९४) तेसि णं भंते ! दव्वाणं कतिविहे भेए पन्नत्ते ?, गो० ! पञ्चविधे भेदे पं०, तं०–खंडाभेदे पयरभेदे चुन्नियाभेदे अनुतडियाभेदे उक्करियाभेदे, से किं तं खंडाभेदे ?, २ जण्णं अयखंडाण वा तउखंडाण वा तंबखंडाण वा सीसखंडाण वा रययखंडाण वा जातरूवखंडाण वा खंडएण भेदे भवति से तं खंडाभेदे १ ।

से किं तं पयराभेदे ?, २ जण्णं बंसाण वा वेत्ताण वा नलाण वा कदलीथंभाण वा अब्भपडलाण वा पयरेणं भेदे भवति, से तं पयराभेदे २ ।

से किं तं चुन्नियाभेदे ?, २ जण्णं तिलचुण्णाण वा मुग्गचुण्णाण वा मासचुण्णाणवा पिप्पलीचुण्णाण वा मिरीयचु० वा सिंगबेरचुण्णाण वा चुण्णियाए भेदे भवति से तं चुण्णियाभेदे ३ ।

से किं तं अनुतडियाभेदे ?, २ जण्णं अगडाण वा तडागाण वा दहाण वा नदीण वा वावीण वा पुक्खरिणीण वा दीहियाण वा गुंजालियाण वा सराण वा सरसराण वा सरपंतियाण वा सरसरपंतियाण वा अणुतडियाभेदे भवति, से तं अनुतडियाभेदे ४ ।

से किं तं उक्करियाभेदे ?, २ जण्णं मूसाण वा मंडूसाण वा तिलसिंगाण वा मुग्गसिंगाण

वा मासलिंगाण वा एरंडबीयाण वा फुडिता उक्करियाभेदे भवति, से तं उक्करियाभेदे ५ ।

एएसि णं भंते ! दव्वाणं खंडाभेएणं पयराभेदेणं चुण्णियाभेदेणं अणुतडियभेदेणं उक्करियाभेदेण य भिज्जमाणाणं कयरे२ हिंतो अ० ब० तु० वि० ?, गो० ! सव्वत्थोवाइं दव्वाइं उक्करियाभेदेणं भिज्जमाणाइं अणुतडियाभेएणं भिज्जमाणाइं अणंतगुणाइं चुण्णियाभेदेणं भिज्जमाणाइं अनंतगुणाइं पयराभेदेणं भिज्जमाणइं अनंतगुणाइं खंडाभेदेणं भिज्जमाणाइं अणनतगुणाइं ।।

वृ. 'तेसि णं भंते ! दव्वाण'मित्यादि, तत्र खण्डभेदो लोहखण्डादिवत् प्रतरभेदोऽभ्रमपटलभूर्यपत्रादिवत् चूर्णिकाभेदः क्षिप्तपिष्टवत् अनुतटिकाभेद इक्षुत्वगादिवत् उत्कटिकाभेदः प्रत्याघर्षवत् । एतानेव भेदान् व्याख्यातुकामः प्रश्ननिर्वचनसूत्राण्याह–'से किं तं खंडभेदे ?' इत्यादि पाठसिद्धं, नवरमनुतटिकाभेदे अवटाः–कूपाः तडागानि–प्रतीतानि, ह्रदा अपि प्रतीताः, नद्यो–गिरिनद्यादयः, वाप्यः–चतुरस्राकारास्ता एव वृत्ताकारा पुष्करिण्यः दीर्घिकाः–ऋज्व्यो नद्यः वक्रा नद्यो गुञ्जालिकाः लतूनि लोकप्रसिद्धानि पुष्करकरात् विप्रकीर्णानि सरांसि तान्येव एकैक पङ्क्तया व्यवस्थितानि सरःपङ्क्तयः येषु सरस्सु पङ्क्तया व्यवस्थितेषु कूपोदकं प्रणालिकया सञ्चरति सा सरःसरःपङ्क्तिः अप्रतीता भेदा लोकतः प्रत्येतव्याः, अल्पबहुत्वं सूत्रप्रमाण्यात् तथेति प्रतिपत्तव्यं, युक्तेरविषयत्वात्,

मू. (३९५) *नेरइए णं भंते ! जाइं दव्वाइं भासत्ताए गेण्हति ताइं किं ठियाइं गेण्हति अठियाइं गेण्हति ?, गो० ! एवं चेव जहा जीवे वत्तव्वया भणिया तहा नेरइयस्सवि जाव अप्पाबहुयं एवं एगिंदियवज्जो दंडतो जाव वेमाणिता जीवा णं भंते ! जाइं दव्वाइं भासत्ताए गेण्हंति ताइं किं ठियाइं गेण्हति अठियाइं गेण्हंति ?, गो० ! एवं चेव पुहुत्तेणवि नेतव्वं, जाव वेमाणिया २ ।*

जीवे णं भंते ! जाइं दव्वाइं सच्चभासत्ताए गेण्हति ताइं किं ठियाइं गेण्हति अठियाइं गेण्हति ?, गो० ! जहा ओहियदंडओ तहा एसोऽवि, नवरं विगलिंदिया ण पुच्छिज्जंति, एवं मोसाभासाएवि, सच्चमोसाभासाएवि, असच्चामोसाभासाएवि एवं चेव, नवरं असच्चामोसाभासाए विगलिंदिया पुच्छिज्जंति इमेणं अभिलावेणं –

विगलिंदिए णं भंते १ जाइं दव्वाइं असच्चामोसाभासाए गिण्हइ ताइं किं ठियाइं गेण्हइ अठियाइं गेण्हइ ?, गो० ! जहा ओहियदंडओ, एवं एए एगत्तपुहुत्तेणं दस दंडगा भाणियव्वा

मू. (३९६) *जीवे णं भंते ! जाइं दव्वाइं सच्चभासत्ताए गिण्हति ताइं किं सच्चभासत्ताए निसिरइ मोसभासत्ताए निसरइ सच्चामोसभासत्ताए निसरति असच्चमोसभासत्ताए निसरइ ?, गो० ! सच्चभासत्ताए निसरइ नो मोसभासत्ताए निसरति नो सच्चामोसभासत्ताए निसरति नो असच्चामोसभासत्ताए निसरइ, एवंएगिंदियविगलिंदियवज्जो दंडतो जाव वेमाणिया, एवं पुहुत्तेणवि*

जीवे णं भंते ! जाइं दव्वाइं मोसभासत्ताए गिण्हति ताइं किं सच्चभासत्ताए निसरति मोसभासत्ताए सच्चमोसभा सत्ताए असच्चामोसभासत्ताए निसरइ ?, गो० ! नो सच्चभासत्ताए निसरति मोसभासत्ताए निसरति णो सच्चामोस० नो असच्चमोसभासत्ताए निसरति । एवं सच्चामोसभासत्ताएवि, असच्चामोसभासत्ताएवि एवं चेव, नवरं असच्चामोसभासत्ताए विगलिंदिया तहेव पुच्छिज्जंति, जाए चेव गिण्हति ताए चेव निसरति, एवं एते एगत्तपुहुत्तिया अट्ठ दंडगा भाणियव्वा ।

मू. (३९७) कतिविहे णं भंते! वयणे पं० ?, गो० ! सोलसविहे वयणे पं०, तं०–एगवयणे दुवयणे बहुवयणे इत्थिवयणे पुमवयणे नपुंसगवयणे अज्झत्थवयणे उवनीयवयणे अवनीयवयणे उवनीयावनीयवयणे अवनीयोवनीयवयणे तीतवयणे पडुप्पन्नवयणे अनागयवयणे पच्चक्खवयणे परोक्खवयणे। इच्चेइतं भंते ! एगवयणं वा जाव परोक्खवयणं वा वदमाणे पन्नवणी णं एसा भासा न एसा मासा मोसा ?, हंता गो० ! इच्चेइतं एगवयणं वा जाव परोक्खवयणं वा वदमाणे पन्नवणी णं एसा भासा न एसा मासा मोसा।

वृ. शेषं सूत्रं सर्वमपि पाठसिद्धं, 'जाव कतिविहे णं भंते ! वयणे वण्णत्ते' इति,

एकवचनं पुरुष इति द्विवचनं पुरुषाविति बहुवचनं पुरुषा इति, स्त्रीवचनमियं स्त्री, पुरुषवचनमयं पुमान्, नपुंसकवचनमिदं कुण्डं, अध्यात्मवचनं यदन्यच्चेतसि निधाय विप्रतारकबुध्याऽन्यद् ब्रिमणिषरपि सहसा यच्चेतसि तदेव ब्रूते, उपनीतवचनं-प्रशंसावचनं यथा रूपवतीयं स्त्री, अपनीतवचनं–निन्दावचनं यथेयं कुरूपा स्त्री, उपनीतापनीतवचनं–यत्प्रशस्य निन्दति, यथा रूपवतीयं स्त्री परं दुःशीलाअपनीतोपनीतवचनं-यन्निन्दित्वा प्रशंसति यथेयं कुरूपा परं सुशीलेति, अतीतवचनमकरोदित्यादि प्रत्युत्पन्नवचनं–वर्त्तमानकालवचनं करोतीत्यादि अनागतकालवचनं–करिष्यतीत्यादि, प्रत्यक्षवचनं–अयमित्यादि परोक्षवचनं–स इत्यादि ॥

एतानि च षोडशापि वचनानि यथावस्थितवस्तुविषयाणि न काल्पनिकानि, ततो यदैतानि सम्यगुपयुज्य वदति तदा सा भाषा प्रज्ञापनी द्रष्टव्या, तथा चाह–'इच्चेइयं भंते ! एगवयणं दुवयण'मित्यादि, भावितार्थमेतदर्थः प्रतीत एव ॥

सम्प्रति प्रागुक्तमेव सूत्रं सूत्रान्तरसम्बन्धनार्थं भूयः पठति,

मू. (३९८) कति णं भंते ! भासज्जाया पन्नत्ता ?, गो० ! चत्तारि भासज्जाया पं०, तं०–सच्चमेगं भासज्जायं बितियं मोसं भासज्जातं तइयं सच्चामोसं भासज्जातं चउत्थं असच्चामोसं भासज्जातं, इच्चेइयाइं भंते ! चत्तारि भासज्जायाइं भासमाणे किं आराहते विराहते ?, गो० ! इच्चेइयाइं चत्तारि भासज्जाइं आउत्तं भासमाणे आराहते नो विराहते, तेण परं असंजतअविरयअपडितहतअपच्चक्खायपावकम्मे सच्चं भासं भासंतो मोसं वा सच्चामोसं वा असच्चामोसं वा भासं भासमाणे नो आराहते विराहते।

वृ. 'कइ णं भंते ! भासज्जाया पन्नत्ता' इत्यादि सुगमं, नवरं 'आउत्तं भासमाणे' इति सम्यक् प्रवचनमालिन्यादिरक्षणपरतया भाषमाणः, तथाहि–प्रवचनोड्डाहरक्षणादिनिमित्तं गुरुलाघवपर्यालोचनेन मृषापि भाषमाणः साधुराराधक एवेति, 'तेण पर'मित्यादि, तत आयुक्तभाषमाणात्परोऽसंयतो–मनोवाक्कायसंयमविकलोऽविरतोविरमति स्म विरतो न विरतोऽविरतः सावद्यव्यापारादनिवृत्तमना इत्यर्थः अत एव न प्रतिहतं–मिथ्यादुष्कृतदानप्रायश्चित्तप्रतिपत्त्यादिना न नाशितमतीतं तथा न प्रत्याख्यातं भूयोऽकरणतया निषिद्धमनागतं पापकर्म येनासावप्रतिहताप्रत्याख्यातपापकर्मा, शेषं पाठसिद्धं।

मू. (३९९) एतेसि णं भंते ! जीवाणं सच्चभासगाणं मोसभासगाणं सच्चामोसभासगाणं असच्चामोसभासगाणं अभासगाण य कयरे२हिंतो अ० ब० तु० वि० ?, गो० ! सव्वत्थोवा जीवा सच्चभासगा सच्चामोसभासगा असंखिज्जगुणा मोसभासगा असंखेज्जगुणा असच्चामोसभासगा असंखेज्जगुणा अभासगा अनंतगुणा ॥ पन्नवणाए भगवईए भासापदं समत्तं ॥

वृ. अल्पबहुत्वचिन्तायां सर्वस्तोकाः सत्यभाषकाः, इह यः सम्यगुपयुज्यसर्वज्ञमतानुसारेण वस्तुप्रतिक्षनबुध्या भाषते स सत्यभाषकस्तस्ते च पृच्छाकाले कतिपया एव लभ्यन्तेइति सर्वस्तोकाः, तेभ्योऽसङ्ख्येयगुणाः सत्यमृषाभाषकाः, बहूनां प्रायो यथा तथा वा सत्यामृषाभाषणसम्भवात्, लोके तथा दर्शनात्, तेभ्योऽसङ्ख्येयगुणा मृषाभाषकाः, क्रोधाभिभूतानां परवञ्चनाधभियुक्तानां च प्रभूततराणामुपलम्भात् तेषां च मृषाभावकत्वात्, तेभ्योऽसङ्ख्येयगुणाः असत्यामृषाभाषकाः द्वीन्द्रियादीनामप्यसत्यामृषाभाषकत्वात्, तेभ्योऽनन्तगुणाः अभाषकाः, सिद्धानामनेकेन्द्रियाणां चानन्तत्वात् ॥

पदं – ११ – सभाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे
एकादशपदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता ।

पदं – १२ – "शरीरं"

वृ. तदेवं व्याख्यातमेकादशं पदं, इदानीं द्वादशममारभ्यते –अस्य चायमभिसम्बधः– इहानन्तरपदे जीवानां सत्यादिभाषाविभागोपदर्शनं कृतं, भाषा च शरीरायत्ता, 'शरीरप्रभवा भाषे'त्यत्रैव प्रतिपादितत्वात्, अन्यत्राप्युक्तं–'गिण्हइ य काइएणंनिस्सइ तह वाइएण जोएण'मिति, तत्र शरीरप्रविभागप्रदर्शनार्थमिदमारभ्यते, तत्र चेदमादि सूत्रम्–

मू. (४००) *कति णं भंते ! सरीरा पन्नत्ता ?, गो० ! पंच सरीरा पं०, तं०–ओरालिए वेउव्विए आहारए तेयए कम्मए, नेरइयाणं भंते ! कति सरीरया पन्नत्ता ?, गो० ! तओ सरीरया पं०, तं०–वेउव्विए तेयए कम्मए, एवं असुरकुमाराणवि जाव थणियकुमाराणं ।*

पुढविकाइयाणं भंते ! कति सरीरया पं० ?, गो० ! तओ सरीरया पं०, तं०–ओरालिए तेयए कम्मए, एवं वाउकाइयवज्जं जाव चउरिंदियाणं, वाउकाइयाणं भंते ! कति सरीरया पं० गो० ! चत्तारि सरीरया, पं०, तं०–ओरालिए वेउव्विते तेयए कम्मए, एवं पंचिंदियतिरक्खजोणियाणवि,

मणुस्साणं भंते ! कति सरीरया पं० ?, गो० ! पंच सरीरया पं० तं०–ओरिलिए वेउव्विते आहारए तेयए कम्मए, वाणमंतरजोइसियवेमानियाणं, जहा नारगाणं ।

वृ. 'कइ णं भंते ! सरीरा पन्नत्ता' इत्यादि, उत्पत्तिसमयादारभ्य प्रतिक्षणं शीर्यन्ते इति शरीराणि, तानि भदन्त! कति–कियत्सङ्ख्याकानि, णमिति वाक्यालङ्कारे, प्रज्ञप्तानि, भगवानाह– पञ्च शरीराणि प्रज्ञप्तानि, तान्येव नामत आह–'ओरालिए'इत्यादि, अमीषां शब्दार्थमात्रमग्रे वक्ष्यामस्तथाऽपि स्थानाशून्यार्थं किञ्चिदुच्यते–उदारं–प्रधानं, प्राधान्यं चास्य तीर्थकरगणधरशरीरापेक्षया, ततोऽन्यस्यानुत्तरसुरशरीरस्याप्यनन्तगुणहीनत्वात्, अथवा ओरालं नाम विस्तरवत्, विस्तरवत्ता चास्यवस्थितस्वभावस्य सातिरेकयोजनसहस्रमानत्वातच्, वैक्रियं चैतावदवस्थितप्रमाणं न लभ्यते,उत्कर्षतोऽप्यवस्थितप्रमाणस्य पञ्चधनुःशतप्रमाणत्वात्, तच्च तावत्प्रमाणं सप्तम्यां नान्यत्र, यत्तूत्तरवैक्रियं योजनलक्षप्रमाणं न तदवसअथितमाभववर्त्तित्वाभावात्, ततो न तदपेक्षा, आह च चूर्णिकृत्–

"ओरालं नाम वित्थरालं विसालंति जं भणियं होइ, कहं ?, साइरेगजोयण-

सहस्समवट्ठियप्पमाणमोरालियं अन्नमेद्दहमेत्तं नत्थित्ति, विउव्वियं होज्जा तं तु अणवट्ठियप्पमाणं, अवट्ठियं पुण पंच धनुसया अहेसत्तमाए, इमं पुण अवट्ठियप्पमाणं साइरेगं जोयणसहस्सं वनस्पतीना''मिति, अथवा उरलं–विरलप्रदेशं न तु वनं स्वल्पप्रदेशोपचितत्वात् बृहत्त्वाच्च भेण्डवत्, यदिवा ओरालं–समयपरिभाषया मांसास्थिस्नाय्वाद्यवबद्धं, स्वत्र स्वार्थिक इकप्रत्ययः, इहोदारमेव औदारिकं, पृषोदरादित्वादिष्टरूपनिष्पत्तिः, प्राकृतत्वात् ओरालियमिति, उक्तं च–

॥ १ ॥ ''तत्थोदारमुरालं उरलं ओरालमेव विन्नेयं ।
ओरालियंति पढमं पडुच्च तित्थेसरसरीरं ॥
॥ २ ॥ मन्नइ य तव्वोरालं वित्थरवंतं वणस्सइं पप्प ।
पगईए नत्थि अण्णं एगट्ठमित्तं विसालंति ॥
॥ ३ ॥ उरलंपेव मएओवचियंति महल्लं जहा भिण्डं ।
मंसट्ठिण्हारुबद्धं ओरालं समयपरिभासा ॥'' १ ।

तथा विविधा विशिष्टा वा क्रिया विक्रिय तस्यां भवं वैक्रियं, उक्तं च–

॥ १ ॥ ''विविहा विसिट्ठगा वा किरिया तीए उ जं भवं तमिह ।
वेउव्वियं तयं पुण नारग्दवाण पगईए ॥''

अथवा वैकुर्विकमिति शब्दसंस्कारः, तत्र विकुर्व इति सिद्धान्तप्रसिद्धोऽयं धातुः, विकुर्व्वा विकुर्व्वाः विविधा क्रिया इत्यर्थः, तेन निर्वृत्तं वैकुर्विकं २, तथा चतुर्दशपूर्वविदा कार्योत्पत्तौ योगबलेनाहृते इत्याहारकं ३, तेजसो विकारस्तैजसं ४, कर्मणो जातं कर्मजमिति ५।

नन्वौदारिकादीनां शरीराणामित्थमुपन्यासे किञ्चिन्निमित्तं प्रयोजनमुत यथाकथञ्चिदेष प्रवृत्त इति ?, उच्यते, अस्तीति ब्रूमः, किं तदिति चेत्, उच्यते, परम्परप्रदेशसंभ्यं परम्परं वर्गणासु प्रदेशबाहुल्यं (च), तथा हि–औदारिकात् वैक्रियस्य प्रदेशसौक्ष्म्यं वैक्रियादप्याहारकस्य आहारकादपि तैजसस्य तैजसादपि कार्मणस्य, तथा औदारिकात् वैक्रियस्य वर्गणासु प्रदेशबाहुल्यं वैक्रियादाहारकस्याहान्दापि तैजसस्य तैजसादपि कार्मणस्येति, एतान्येव शरीराणि नैरयिकादिषु सम्भवतश्चिन्तयति–

'नेरइयाणं भंते ! केवइया सरीरा पन्नत्ता' इत्यादि, पाठसिद्धं, शरीराणि च जीवानां द्विविधानि, तद्यथा–बद्धानि मुक्तानि च तत्र यानि चिन्ताकाले जीवैः परिगृहीतानि वर्त्तन्ते तानि बद्धानि, यानि च पूर्वभवेषु परित्यक्तानि तानि मुक्तानि, तेषां बद्धानां मुक्तानां च परिमाणमिदानीं द्रव्यक्षेत्रकालैः प्ररूपणीयं, तत्र द्रव्यैरभव्यादिभिः क्षेत्रेण श्रेणिप्रत्यादिना कालेनावलिकादिना,

तत्रौदारिकशरीरमधिकृत्याह–

मू. (४०१) *केवइया णं भंते ! ओरालियसरीरया पं० ?, गो० ! दुविहा पं०, तं०–बद्धेल्लया य मुक्केल्लया य, तत्थ णं जे ते बद्धेल्लगा ते णं असंखेज्जा असंखेज्जाहिं उस्सप्पिणिओसप्पिणीहिं अवहीरंति कालतो, खेत्ततो असंखेज्जा लोगा, तत्थ णं जे ते मुक्केल्लया ते णं अनंता अनंताहिं उस्सप्पिणिओसप्पिणीहिं अवहीरंति कालतो खेत्तओ अनंता लोगा अभवसिद्धिएहिंतो अनंतगुणा सिद्धा (ण) नंतभागो । केवतिया णं भंते ! वेउव्वियसरीरया पं० गो० ! दुविहा पं०, तं०–बद्धेल्लया य मुक्केल्लगा य, तत्थ णं जे ते बद्धेल्लगा ते णं असंखेज्जा असंखेज्जाहिं उस्सप्पिणिओसप्पिणीहिं*

अवहीरंति कालतो खेत्ततो असंखेज्जातो सेढीओ पयरस्स असंखेज्जतिभागो, तत्थ णं जे ते मुक्केल्लगा ते णं अनंत अनंताहिं उस्सप्पिणिओसप्पिणीहिं अवहीरंति कालतो जगा ओरालियस्स मुक्केल्लया तहेव वेउव्वियस्सवि भाणियव्वा।

केवतिया णं भंते! आहारगसरीरया पन्नत्ता?, गो० ! दुविहा, पं० तं०–बद्धेल्लया य मुक्केल्लया य, तत्थ णं जे ते बद्धेल्लगा ते णं सिय अत्थि सिय नत्थि, जइ अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं सहस्सपुहुत्तं, तत्थ णं जे ते मुक्केल्लया ते णं अणनता जहा ओरालियस्स मुक्किल्लया तहेव भाणितव्वा।

केवइया णं भंते! तेयगसरीरया पन्नत्ता?, गो० ! दुविहा प० तं०–बद्धेल्लगा य मुक्केल्लगा य, तत्थ णं जे ते बद्धेल्लगा ते णं अनंता अनंताहिं उस्सप्पिणिओसप्पिणीहिं अवहीरंति कालतो खेत्तओ अनंता लोगा दव्वओ सिद्धेहिंतो अणंतगुणा सव्वजीवानंतभागूणा, तत्थ णं जे ते मुक्केल्लगा ते णं अनंता अनंताहिं उस्सप्पिणि ओसप्पिणीहिं अवहीरंति कालतो खेत्ततो अनंता लोगा दव्वओ सव्वजीवेहिंतो अनंतगुणा जीववग्गस्सानंतभागे।

एवं कम्मगसरीराणिवि भाणितव्वाणि॥

वृ. 'केवइया णं भंते! ओरालियसरीरया पन्नत्ता' इत्यादि, इह प्राकृतलक्षणवशादिल्लप्रत्ययः कप्रत्ययश्च स्वार्थे ततो 'बद्धिल्लया' इति बद्धानीत्यर्थः, 'मुक्किल्लया' इति मुक्तानीत्यर्थः, तत्र बद्धान्यसङ्ख्येयानि, असङ्ख्येयत्वमेव प्रथमतः कालतो निरूपयति–'असंखेज्जाहिं' इत्यादि, प्रतिसमयमेकैकशरीरापहारेण असङ्ख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरनवयशोऽपहियन्ते, किमुक्तं भवति असङ्ख्येयासु उत्सर्पिण्यवसर्पिणीषु यावन्तः समयास्तावत्प्रमाणानि बद्धान्यौदारिकशरीराणि वर्त्तन्ते, इदं कालतः परिमाणं, क्षेत्रत आह–'खेत्तओ असंखेज्जा लोगा' इति, क्षेत्रतः परिसङ्ख्यायनमसङ्ख्येया-लोकाः, एतदुक्तं भवति–सर्वाण्यपि बद्धान्यौदारिकशरीराणि आत्मीयात्मीयावगाहनाभिराकाशप्रदेशेषु परस्परम पिण्डीभावेन क्रमेण स्थाप्यन्ते तदानीं तैरेवमास्तीर्यमाणैरसङ्ख्येया लोका अवाप्यन्ते, इह एकैकस्मिन्नप्याकाशप्रदेशे एकैकौदारिकशरीरस्थापनया असङ्ख्येया लोका व्याप्यन्ते परं पूर्वाचार्या आत्मीयावगाहनास्थापनया प्ररूपणां कुर्वन्ति ततोऽपसिद्धान्तदोषो मा प्रापदित्यस्माभिरपि तथैव प्ररूपणा क्रियते, आह च चूर्णिकारोऽपि–

"जइवि इक्केक्के पएसे सरीरमेगं ठविज्जइ तोऽवि असंखेज्जा लोगा भवंति किंतु अयसिद्दंतदोसपरिहरणत्थमप्पप्पणियाहिं ओगाहणाहिं ठविज्जंति" इति, आह–नन्वनन्ता जीवास्ततः कथमसङ्ख्येयान्यौदारिकशरीराणि ?, उच्यते, इह द्विविधा जीवाः–प्रत्येकशरीरिणोऽनन्तकायिकाश्च, तत्र ये ते प्रत्येकशरीरिणस्तेषां प्रतिजीवमेकैकौदारिकशरीरमन्यथा प्रत्येकशरीरत्वायोगात्, ये त्वनन्तकायिकास्तेषामनन्तानामनन्तानामेकैकमौदारिकशरीरमतः सर्वसङ्ख्ययापि असङ्ख्येयान्यौदारिकशरीराणि, मुक्तान्यौदारिकशरीराणि अनन्तानि, तद्यानन्तत्वं कालक्षेत्रद्रव्यैर्निरूपयति–'अनंताहिं' इत्यादि, कालतः परिमाणं प्रतिसमयमेकैकशरीरापहारेऽनन्ताभिरुत्सर्पिण्यवसर्पिणीभिः सर्वात्मनाऽपहियन्ते, किमुक्तं भवति ?–

अनन्तासु उत्सर्पिण्यवसर्पिणीषुयावन्तः समयास्तावत्प्रमाणानीति, क्षेत्रतः परिमाणमनन्ता

लोकाः, अनन्तेषु लोकप्रमाणेष्वाकाशखण्डेषु यावन्त आकाशप्रदेशास्तावत्प्रमाणानीत्यर्थः, द्रव्यतः परिमाणमभवसिद्धिकेभ्यः–अभव्येभ्योऽनन्तगुणानि, यद्येवं तर्हि सिद्धराशिप्रमाणानि भविष्यन्ति तत आह–सिद्धानामनन्तभागः–अनन्तभागमात्राणि, ननु द्वयोरपि राश्योरभवसिद्धिकसिद्धिरूपयोर्मध्ये पठ्यन्ते प्रतिपत्तिसम्यग्दृष्टयः तत्किं तद्राशिप्रमाणानि भवेयुः ?, उच्यते, यदि तत्प्रमाणानि स्युस्तर्हि तथैव निर्देशः क्रियेत, सुखप्रतिपत्तिकृतप्रतिज्ञा हि भगवन्त आर्यश्यामाः, ततस्तथा निर्देशाभावादवसीयते–न तद्राशिप्रमाणानि, ननु तर्हि तेषां प्रतिपतितसम्यग्दृष्टीनामधस्ताद् भवेयुरुपरि वा ?, उच्यते, कदाचिदधस्तात्कदाचिदुपरि कदाचित्तुल्यान्यपि अनियतप्रमाणत्वात्, नत्तु सर्वकालं तत्प्रमाणानीति, आह च चूर्णिकृत–

"तो किं परिवडियसम्मद्दिट्ठिरासिप्पमाणाइं होज्जा ते ?, तेसिं दोण्हवि रासीणं, मज्झे पढिज्जंतित्तिकाउं ?, भन्नइ, जइ तप्पमाणाइं होंताइं तो तेसिं चेव निद्देसो होंतो तम्हा न तप्पमाणाइं, तो किं तेसिं हिट्ठा होज्जा उवरिं होज्जा ?, भन्नइ, कयाइं हेट्ठा कयाइ उवरिं होंति कयाइ तुल्लाइं न निच्चकालं तप्पमाणाइं' इति, अपरः प्राह –कथं मुक्तानि यथोक्तानन्तसङ्ख्यापरिमाणान्युपपद्यन्ते यतो यदि तावदौदारिकादिशरीराणि यावदविकलानि तावद् गृह्यन्ते ततस्तेषामनन्तकालमवस्थानाभावादनन्तत्वं न घटते, यदि ह्यनन्तमपि कालमवस्थानं भवेत् ततोऽनन्तेन कालेन तत्तच्छरीरगणनादनन्तानि भवेयुः, यावताऽनन्तं कालमवस्थानं नास्ति, पुद्गलानामुत्कर्षतोऽप्यसङ्ख्येयकालावस्थानाभिधानात्, अथ च ये पुद्गदला जीवैरौदारिकत्वेन गृहीत्वा मुक्ता अतीताद्धायां तेषां ग्रहणं तर्हि सर्वेऽपि पुद्गलाः सर्वैरपि जीवैः प्रत्येकमौदारिकत्वेन गृहीत्वा मुक्ता इति सर्वपुद्गलग्रहणमापन्नं, तथा च सति यदुक्तम्–

अभवसिद्धिकेभ्योऽनन्तगुणानि सिद्धानामनन्तभागमात्राणीति तद् विरुध्यते, सर्वजीवेभ्योऽनन्तानन्तगुणकारेणानन्तगुणत्वस्य प्रसक्तत्वादिति चेत्, उच्यते, इह मुक्तानामौदारिकशरीराणां नाविकलानामेव केवलानां ग्रहणं नाप्यौदारिकत्वेन गृहीत्वा मुक्ताः पुद्गलाः, तेषामुक्तदोषप्रसङ्गात्, किन्तु यच्छरीरमौदारिकं जीवेन गृहीकत्वा मुक्तं तत् विशरारुभावं विध्राणमनन्तभेदभिन्नं भवति ते चानन्ता भेदा भवन्तो यावत्ते पुद्गला औदारिकपरिणामं न जहति तावत्प्रत्येकमौदारिकशरीरव्यपदेशं लभन्ते, ये पुनरौदारिकपरिणामं त्यक्तवन्तस्ते न गण्यन्ते, तत एवमेकस्यापि शरीरस्यानन्तानि शरीराणि जातानि, एवं सर्वशरीरेष्वपि भावनीयं, तथा च सत्येकैकस्य शरीरस्यानन्तभेदभिन्नत्वादेकस्मिन्नपि समये प्रभूतान्यनन्तानि शरीराण्यवाप्यन्ते, तेषां चासङ्ख्येयकालमवस्थानं, तेन चासङ्ख्येयेन कालेनान्यानि जीवैर्विप्रमुक्तान्यसङ्ख्येयान्यवाप्यन्ते, तान्यपि च प्रत्येकमनन्तभेदभिन्नानि, तेषु च मध्ये तावता कालेन यान्यौदारिकशरीरपरिणामं विजहति तानि परित्यज्यन्ते शेषाणि गण्यन्ते, तत एवं मुक्तानि यथोक्तप्रमाणानन्तसङ्ख्याकान्यौदारिकशरीराण्युपपद्यन्ते इति, न चैतत्स्वमनीषिकाविजृम्भितं, यत आह चूर्णिकृत्–

"नवि अविगलाणमेव केवलाणंपि गहणं एयं न य ओरालियगहणमुक्काणं सव्वपुग्गलाणं, किन्तु जं सरीरमोरालिकं जीवेण मुक्कं तं चेव अणंतभेयभिन्नं [च] होइ जाव ते पुग्गला तं जीवनिव्वत्तियं ओरालियसरीरकायप्पओगं न मुंचंति न ताव अन्नपरिणामेणं परिणमंति ताइं पत्तेयं सरीराइं

भन्नंति, एवमेकेकस्स ओरालियसरीरस्स अमंतमेयभिन्नत्तणओ अनंताइं चेव ओरालियसरीराइं भवंति'' इत्यादि, आह–कथमेकैकशरीरद्रव्यदेशः शरीरत्वेन व्यवहियते ?, उच्यते, लवणदृष्टान्तेन, तथाहि–खार्यपि लवणमुच्यते द्रोणोऽपि लवणमाढकोऽपि लवणं यावदेकापि शर्करा लवणमेवमिहापि सकलमप्यौदारिकशरीरमुच्यते तदर्द्धमपि तदेकदेशोऽपि यावदनन्तभागोऽपि शरीरमिति, कोऽत्राभिप्राय इति चेत् ?,

उच्यते, इह यथा लवणपरिणामपरिणतः स्तोको बहुर्वा पुद्गलसङ्घातो लवणमुच्यते तथौदारिकशरीरयोग्यपुद्गलसङ्घातोऽपि औदारिकत्वेन परिणतः स्तोको वा बहुर्वा औदारिकशरीरव्यपदेशं लभते, अथवा भवति समुदायैकदेशेऽपि समुदायशब्दोपचारो, यथा–अङ्गुल्यग्रे स्पृष्टे मया देवदत्ता इत्यादौ, तत उपचारान्न कश्चिद्दोषः, ननु यद्येवं कथं तान्यनन्तलोकाकाशप्रदेशप्रमाणान्यौदारिकशरीराण्येकस्मिन् लोकेऽवगाढानि ?, उच्यते, प्रदीपप्रकाशवत्, तथाहियथैकस्यापि प्रदीपस्यार्चींषि सकलभवनावभासीनि भवन्ति, अन्येषामनेकेषां प्रदीपानामर्चींषि तत्रैवानुप्रविशन्ति, परस्परमविरोधात्, तथौदारिकाण्यपि, एवं शेषशरीरेष्वपि मुक्तेष्वायोज्यं, ननु द्रव्यक्षेत्रे विहाय किमिति प्रथमतः कालेन प्ररूपणा कृता ?, उच्यते, कालाननतरावस्थायितया पुद्गलेषु शरीरोपचारो नान्यथा ततः कालो गरीयान् इति प्रथमस्तेन प्ररूपणा।

उक्तान्यौदारिकाणि, सम्प्रति वैक्रियसूत्रमाह–'केवइयाणं भंते!' इत्यादि, बद्धान्यसङ्ख्येयानि, तत्र कालतः परिमाणं प्रतिसमयमेकैकापहारे असङ्ख्येनासङ्ख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपहियन्ते, किमुक्तं भवन्ति ? – असङ्ख्येयासूत्सर्पिण्यवसर्पिणयसर्पिणीषु यावन्तः समायास्तावत्प्रमाणानीति, क्षेत्रतोऽसङ्ख्येयाः श्रेण्यस्तासां श्रेणीनां परिमाणं प्रतरस्यासङ्ख्येयो भागः किमुक्तं भवति ? –प्रतरस्यासङ्ख्येयतमे भागे यावत्यः श्रेण्यस्तासु च श्रेणिषुयावन्त आकाशप्रदेशास्तावत्प्रमाणानि बद्धानि वैक्रियशरीराणीति, अथ श्रेणिरिति किंपमिधीयते ? उच्यते,

घनीकृतस्य लोकस्य सर्वतः सप्तरज्जुप्रमाणस्यायामतः सव्वरज्जुप्रमाणा मुक्तावलिरिवैकाकाशप्रदेशपङ्क्तिः, कथं पुनर्लोको घनीक्रियते ?, कथं वा सप्तरज्जुप्रमाणो भवति इति चेत् ?, उच्यते, इह लोक ऊर्ध्वाधश्चतुर्दशरज्जुप्रमाणोऽधस्ताद्विस्तरतो देशोनसप्तरज्जुप्रभाणः एकरज्जुमध्यभागे ब्रह्मलोकप्रदेशे बहुमध्यदेशभागे पञ्चरज्जुरुपरि एका रज्जुर्लोकान्ते, रज्जोश्चपरिमाणं स्वयम्भूरमणसमुद्रस्य पूर्ववेदिकान्तादारभ्यापरवेदिकान्तं यावत्, एवंप्रमाणस्य लोकस्य वैशाखस्थानस्थकटिस्थकरयुग्मपुरुषाकारस्य बुध्या त्रसनाड्या दक्षिणभागवत्यधोलोकखण्डमधो देशोनत्रिरज्जुविस्तारमतिरिक्तसप्तचरज्जूच्छ्रयं परिगृह्य त्रसनाड्या उत्तरपार्श्वे ऊर्ध्वाधोभागाविपर्यासेन सङ्घात्यते–ऊर्ध्वभागोऽधः क्रियते अधोभागस्तूर्द्धमिति सङ्घात्यते इति, तत ऊर्ध्वलोके त्रसनाड्या दक्षिणभागवर्त्तिनी ये द्वे खण्डे कूर्पराकारसंस्थिते प्रत्येकं देशोनार्द्धचतुष्टरज्जूच्छ्रये ते बुध्या समादाय वैपरीत्येनोत्तरपार्श्वे सङ्घात्येते, एवं च किं जातम् ?,

अधस्तनं लोकार्धं देशोनचतूरज्जुविस्तारं सातिरेकसप्तरज्जूच्छ्रयं उपरितनमर्द्धं त्रिरज्जुविस्तारं देशोनसप्तरज्जूच्छ्रयं, तेन उपरितनमर्द्धं बुध्या गृहीत्वाऽधस्तनस्यार्द्धस्योत्तरपार्श्वे सङ्घात्यते, तथा च सति सातिरेकसप्तरज्जूच्छ्रयो देशोनसप्तरज्जुविस्तारो घनो जातः, अतः सप्तरज्जूनामुपरि यदधिकं

तत्पारंगृह्य ऊर्ध्वमधो आयतमुत्तरपार्श्वे सङ्क्षाल्यते, ततो विस्तरतोऽपि परिपूर्णाः सप्त रज्जवो भवन्ति, एवमेष लोको घनीक्रियते, घनीकृतश्च सप्तरज्जुप्रमाणो भवति, यत्र च क्वचन घनत्वेन सप्तरज्जुप्रमाणता न पूर्यते तत्र बुध्द्या परिपूरणीयं, एतच्च पट्टिकादौ लिखित्वा दर्शयितव्यं, सिद्धान्ते च यत्र क्वचनापिश्रेणेः प्रतरस्य वा ग्रहणं तत्र सर्वत्राप्येवं धनीकृतस्य लोकस्य सप्तरज्जुप्रमाणस्या- वसातव्यं, मुक्तान्यौदारिकवद् भावनीयानि।

आहारकविषयं सूत्रं 'केवइया णं भंते! आहारगसरीरगा इत्यादि, 'बद्धानि सिय अत्थि सिय नत्थि' इति अस्तीति निपातो बहुवचनगर्भः कदाचित्सन्ति कदाचित् न सन्तीत्यर्थः, यस्मादन्तरमाहारकशरीरस्य जघन्यत एकः समयः उत्कर्षतः षण्मासाः, उक्तं च–

॥ १ ॥ "आहारगाइं लोए छम्मासे जा न होंतिवि कयाइ।
उक्कोसेणं नियमा एक्कं समयं जहन्नेणं ॥" इति,

यदापि भवन्ति तदाऽपि जघन्यतः एकं द्वे वा उत्कर्षतः सहस्रपृथकत्वं, मुक्तान्यौदारिकवत्

तैजसविषयं सूत्रमाह– 'केवइया णं भंते! तेयगसरीरया' इत्यादि, तत्र बद्धान्यनन्तानि, अनन्तत्वं कालक्षेत्रद्रव्यैर्निरूपयति–'अनंताहिं' इत्यादि, कालतः परिमाणमन्तोत्सर्प्पिण्य-वसर्प्पिणीसमयप्रमाणानि क्षेत्रतोऽनन्तलोकप्रमाणाकाशखण्डप्रदेशपरिमाणानि, द्रव्यतः परिमाणं सिद्धेभ्योऽनन्तगुणानि, तैजसं हि शरीरं सर्वसंसारिजीवानां प्रत्येकं, संसारिणश्च जीवाः सिद्धेभ्योऽ-नन्तगुणाः ततस्तैजसशरीराण्यपि सिद्धेभ्योऽनन्तगुणानि भवन्ति, 'सव्वजीवअनंतभागूणा' इति सर्वजीवानां योऽनन्ततमो भागस्तेनोनानि, इयमत्र भावना–सिद्धानां तैजसशरीरं न विद्यते, सर्वशरीरातीतत्वात् तेषां, सिद्धार्थं सर्वजीवानामनन्तभागे, ततस्तेनोनानि सर्वजीवानामनन्त-भागोनानि भवन्ति, मुक्तानि अनन्तानि, तजेवानन्तत्वं कालक्षेत्रद्रव्यैः प्ररूपयति–'अनंताहिं' इत्यादि, । कालक्षेत्रसूत्रे प्राग्वत्, द्रव्यतः परिमाणं सर्वजीवेभ्योऽनन्तगुणानि, कथमिति चेत्?, उच्यते, इह एकैकस्य संसारिजीवस्य एकैकं तैजसशरीरं, तानि च जीवैर्विप्रमुक्तानि सन्ति प्रागुक्तयुक्तेरनन्तभेदभिन्नानि भवन्ति, तेषां चासङ्ख्येयं कालं यावदवस्थानं, तावता च कालेन जीवैर्विप्रमुक्तान्यन्यानि तैजसशरीराणि प्रतिजीवमसङ्ख्येयानि अवाप्यन्ते, तेषामपि प्रत्येकं प्रागुक्तयुक्त्या अनन्तभेदभिन्नतेति भवन्ति सर्वजीवेभ्योऽनन्तगुणानि, तत्किं जीववर्गप्रमाणानि भवेयुरत आह–

'जीववग्गस्स अनंतभागे' इति, जीववर्गस्यानन्तभागप्रमाणानि, जीववर्गप्रमाणानि कस्मान्न भवन्तीति चेत्, उच्यते, यदि एकैकस्य जीवस्य सर्वजीवराशिप्रमाणानि किञ्चित्समधिकानि वा भवेयुर्येन सिद्धानन्तभागपूरणं भवति ततो जीववर्गप्रमाणानि भवन्ति, वर्गो हि तेनैव राशिना तस्य राशेर्गुणने भवति, यथा चतुष्कस्य चतुष्केन गुणने षोडशात्मको वर्ग इति, न चैकैकस्य जीवस्य सर्वजीवप्रमाणानि किञ्चित्समधिकानि वा तैजसशरीराणि किन्त्वतिस्तोकानि, तान्यपि असङ्ख्येयकालावसअधायीनीति, तावता कालेन यान्यप्यन्यानि भवन्ति तान्यपिस्तोकानि, कालस्य स्तोकत्वात्, ततो जीववर्गप्रमाणानि न भवन्ति, किन्तु जीववर्गस्यानन्तभागमात्राणि, अनन्तभागप्रमाणतायां च पूर्वाचार्यप्रदर्शितमिदं निदर्शनं–

सर्वजीवास्तत्त्ववृत्त्या अनन्ता अपि असत्कल्पनया दश सहस्राणि, तेषां च दशसहस्राणां वर्गो दश कोट्यः स तैजशरीरराशि च मुक्तान्यसत्कल्पनया दशलक्षप्रमाणानि, ततः सर्वजीवेभ्यः किल शतगुणानीति सर्वजीवेभ्योऽनन्तगुणान्युक्तानि, जीववर्गस्य च शततमे भागे वर्त्तन्ते, ततो जीववर्गस्यानन्तभागमात्राणि ।

एवं कार्मणशरीराण्यपि बद्धानि मुक्तानि च भावनीयानि, तैजसैः सह समानसङ्ख्यत्वात् उक्तान्यौधिकानि पञ्चानि शरीराणि, सम्प्रति नैरयिकादिविशेषणविशेषितानि चिन्त्यन्ते–

मू. (४०२) *नेरइयाणं भंते ! केवतिया ओरालियसरीरा पं० ?, गो० ! दुविहा पं०, तं०–बद्धेल्लगा य मुक्केल्लगा य, तत्थ णं जे ते बद्धेल्लगा ते णं नत्थि, तत्थ णं जे ते मुक्केल्लगा ते णं अनंता जहा ओरालियमुक्केल्लगा तहा भाणियव्वा ।*

नेरइयाणं भंते ! केवइया वेउव्वियसरीरा पं० ?, गो० दु०, तं०–बद्धेल्लगा य मुक्केल्लगा य, तत्थ णं जे ते बद्धेल्लगा ते णं असंखेज्जा, असंखेज्जाहिं उस्सप्पिणिओसप्पिणिहिं अवहीरंति कालतो, खेत्ततो असंखिज्जाओ सेढीओ पयरस्स असंखेज्जइभागो, तासि णं सेढीणं विक्खंभसूई अंगुलपढमवग्गमूलं बितियवग्गमूलपडुप्पण्णं अहवणं अंगुलबितियवग्गमूलघणप्पमाणमेत्ताओ सेढीतो, तत्थ णं जे ते मुक्केल्लगा ते णं जहा ओरालियस्स मुक्केल्लगा तहा भाणियव्वा ।

नेरइयाणं भंते ! केवइआ आहारगसरीरा पं० ?, गो० ! दु०, तं०–बद्धे० मुक्के०, एवं जहा ओरालिए बद्धेल्लगा मुक्केल्लया य भणिया तहेव आहारगावि भाणियव्वा, तेयाकम्मगाइं जहा एएसिं चेव वेउव्वियाइं ।

वृ. 'नेरइयाणं भंते !' इत्यादि, नैरयिकाणां बद्धान्यौदारिकशरीराणि न सन्ति, भवप्रत्ययतस्तेषामौदारिकशरीरासम्भवात्, मुक्तान्यौधिकमुक्तौदारिकशरीरवत्, वैक्रियाणि बद्धानि यावन्तो नैरयिकास्तावत्प्रमाणानि, तानि चासङ्ख्येयानि, तदेवासङ्ख्येयत्वं कालक्षेत्राभ्यां प्ररूपयति–'असंखेज्जाहिं' इत्यादि, कालतः परिमाणं प्रतिसमयमेकैकशरीरापहारे सामस्त्येनासङ्ख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपह्रियन्ते, किमुक्तं भवति ?–

असङ्ख्येयासूत्सर्पिण्यवसर्पिणीषु यावन्तः समयास्तावत्प्रमाणानि, क्षेत्रतोऽसङ्ख्येयाः श्रेणयः, असङ्ख्येयासु श्रेणिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणानीति भावः, अथ प्रतरेऽपि सकले असङ्ख्येयाः श्रेणयो भवन्ति प्रतरस्यार्द्धभागे त्रिभागादौ च ततः कियत्सङ्ख्याकास्ताः श्रेणय इत्याशङ्कायां विशेषनिर्द्धारणार्थमाह–प्रतरस्यासङ्ख्येयभागः, किमुक्तं भवति ? –

प्रतरस्यासङ्ख्येयतमे भागे यावत्यः श्रेणयस्तावत्यः परिगृह्यन्ते, इदमन्यद्विशेषतरपिमाणं–'तासि णं सेढीणं विक्खंभसूई' इत्यादि, तासां श्रेणीना विष्कम्भतो–विस्तारमधिकृत्य सूचिः–एकप्रादेशिकी श्रेणिरङ्गुलप्रथमवर्गमूलं द्वितीयवर्गमूलगुणितं, इयमत्र भावना–इह प्रज्ञापकेन घनीकृतः सप्तरज्जुप्रमाणो लोकः पट्टिकादौ स्थापनीयः, श्रेणिश्च रेखाकारेण दर्शनीया, दर्शयित्वा चैवं प्रमाणं वक्तव्यं–अङ्गुलप्रमाणमात्रस्य प्रदेशस्य क्षेत्रस्य यावान् प्रदेशराशिस्तस्यासङ्ख्येयानि वर्गमूलानि भवन्ति, तद्यथा– प्रथमं वर्गमूलं तस्यापि यद्वर्गमूलं तद् द्वितीयं वर्गमूलं तस्यापि यद् वर्गमूलं तत् तृतीयं वर्गमूलं एवमसङ्ख्येयानि वर्गमूलानि भवन्ति, तत्र प्रथमं यद्वर्गमूलं तद् द्वितीयेन

वर्गमूलेन गुण्यते, गुणिते च सति यावन्तः प्रदेशा भवन्ति तावत्प्रदेशात्मिका सूचिर्बुद्धया क्रियते, कृत्वा च विष्कम्भतो दक्षिणोत्तरायततया स्थापनीया, तया च स्थाप्यमानया यावत्यः श्रेणयः स्पृश्यन्ते तावत्यः परिगृह्यन्ते, तत्रेदं निदर्शनम्–

अङ्गुलमात्रक्षेत्रप्रदेशराशिस्तत्त्वतोऽसङ्ख्यातोऽप्यसत्कल्पनया षट्पञ्चाशदधिके द्वे शते कल्प्येते, तयोः प्रथमं वर्गमूलं षोडश द्वितीयं चत्वारस्तृतीयं द्वौ, तत्र द्वितीयेन वर्गमूलेन चतुष्कलक्षणेन प्रथमं वर्गमूलं षोडशलक्षणं गुण्यते जाताः चतुःषष्टिः, एतावत्यः श्रेणयः परिगृह्यन्ते, अमुमेवार्थं प्रकारान्तरेण कथयति–

'अहवण'मित्यादि अथवेति प्रकारान्तरे णमिति वाक्यालङ्कारे अङ्गुलमात्रक्षेत्रप्रदेशराशेर्द्वितीयस्य वर्गमूलस्यासत्कल्पनया चतुष्कलक्षणस्य यो घनस्तावत्प्रमाणाः, इह यस्य राशेर्यो वर्गः स तेन राशिना गुण्यते ततो घनो भवति, यथा द्विकस्याष्टौ, तथाहि–द्विकस्य वर्गश्चत्वारस्ते द्विकेन गुण्यन्ते जाता अष्टाविति, एवमिहापि चतुष्कस्य वर्गः षोडश ते चतुष्केन गुण्यन्ते ततश्चतुष्कस्य घनो भवति, तत्रापि सैव चतुःषष्टिरिति, प्रकारद्वयेऽप्यर्थभेदः, इहायं गणितधर्मो यद्बहु स्तोकेन गुण्यते, ततः सूत्रकृता प्रकारद्वयमेवोपदर्शितं,

अन्यथा तृतीयोऽपि प्रकारोऽस्ति 'अंगुलबिइयवग्गमूलं पढमवग्गमूलपडुप्पण्ण'मिति अन्ये त्वभिदधति–अङ्गुलमात्रक्षेत्रप्रदेशराशेः स्वप्रथमवर्गमूलेन गुणने यावान् प्रदेशराशिर्भवति तावत्प्रमाणया सूच्या यावत्यः स्पृष्टाः श्रेण्यस्तावतीषु श्रेणिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणानि नैरयिकाणां बद्धानि वैक्रियशरीराणीति, मुक्तान्यौदारिकवत्।

आहारकाणि बद्धानि न सन्ति, तेषां तल्लब्ध्यसम्भवात्। मुक्तानि पूर्ववत्, तैजसकार्मणानि बद्धानि वैक्रियवत्, मुक्तानि पूर्ववत्।

सू. (४०३) असुरकुमाराणं भंते! केवइया ओरालियसरीरा पं० ?, गो० ! जहा नेरइयाणं ओरालियसरीरा भणिता तहेव एतेसिं भाणितव्वा, असुरकुमाराणं भंते! केवइया वेउव्वियसरीरा पं० ?, गो० ! दुविहा पं०, तं०–बद्धेल्लगा य मुक्केल्लगा य, तत्थ णं जे ते बद्धेल्लगा ते णं असंखेज्जा असंखेज्जाहिं उस्सप्पिणीओसप्पिणीहिं अवहीरंति कालतो खेत्ततो असंखेज्जाओ सेढीतो पयरस्स असंखेज्जतिभागो तासि णं सेढीणं विक्खंभसूई अंगुलपढमवग्गमूलस्स संखेज्जतिभागो,

तत्थ णं जे ते मुक्केल्लगा ते णं जहा ओरालियस्स मुक्केल्लगा तहा भाणियव्वा, आहारसरीरगा जहा एतेसिं चेव ओरालिया तहेव दुविहा भाणियव्वा, तेयाकम्मगसरीरा दुविहावि जहा एतेसिं चेव विउव्विया, एवं जाव थणियकुमारा।

वृ. असुरकुमाराणामौदारिकशरीराणि नैरयिकवत्, वैक्रियाणि बद्धान्यसङ्ख्येयानि, तदेवासङ्ख्येयत्वं कालक्षेत्राभ्यां प्ररूपयति, तत्र कालसूत्रं प्राग्वत्, क्षेत्रतोऽसङ्ख्येयाः श्रेणयः, असङ्ख्येयासु श्रेणिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणानीत्यर्थः, ताश्च श्रेणयः प्रतरस्यासङ्ख्येयो भागः, प्रतरासङ्ख्येयभागप्रमिता इत्यर्थः, तत्र नारकचिन्तायामपि प्रतरासङ्ख्येयभागप्रमिता उक्ताः, ततो विशेषतरं परिमाणमाह–'तासि ण'मित्यादि, तासां श्रेणिनां परिमाणाय या विष्कम्भसूचिः सा अङ्गुलमात्रक्षेत्रप्रदेशराशेः सम्बन्धिनः प्रथमवर्गमूलस्य सङ्ख्येयो भागः, किमुक्तं भवति

अङ्गुलमात्रक्षेत्रप्रदेशराशेरसत्कल्पनया षट्पञ्चादशदधिकशतद्वयप्रमाणस्य यत्प्रथमवर्गमूलं षोडशलक्षणं तस्य सङ्ख्येयतमेभागे यावन्त आकाशप्रदेशा असत्कल्पनया पञ्चषड् वा तावत्प्रदेशात्मिका श्रेणिः परिमाणाय विष्कम्भसूचिरवसातव्या, एवं च नैरयिकापेक्षयाऽमीषां विष्कम्भसूचिरसङ्ख्येयगुणहीना, तथाहि-

नैरयिकाणां श्रेणिपरिमाणाय विष्कम्भसूचिरङ्गुलप्रथमवर्गमूलं द्वितीयवर्गमूलप्रत्युत्पन्नं यावद् भवति तावत्प्रदेशात्मिका द्वितीयं च वर्गमूलं तत्त्वतोऽसङ्ख्यातप्रदेशात्मकं ततोऽसङ्ख्येयगुणप्रथमवर्गमूलप्रदेशात्मिका नैरयिकाणां च सूचिरमीषा त्वङ्गुलप्रथमवर्गमूलसङ्ख्येयभागप्रदेशात्मिकेति, युक्तं चैतत्, यस्मान्महादण्डके सर्वेऽपि भवनपतयो रत्नप्रभानैरयिकेभ्योऽप्यसङ्ख्ययगुणहीना उक्तास्ततः सर्वनैरयिकापेक्षया सुतरामसङ्ख्येयगुणहीना भवन्ति, मुक्तान्यौधिकमुक्तवत्, आहारकाणि नैरयिकवत्, तैजसकार्मणानि बद्धानि बद्धवैक्रियवत्, मुक्तान्यौधिकमुक्तवत्, यथा चासुरकुमाराणामुक्तं तथा शेषाणामपि भवनपतीनां वाच्यं, यावत्स्तनितकुमाराणां।

मू. (४०४) पुढविकाइयाणं भंते ! केवइया ओरालियसरीरगा पं० ?, गो० ! दुविहा, पं०, तं०-बद्धेल्लगा य मुक्केल्लगा य, तत्थ णं जे ते बद्धेल्लगा ते णं असंखेज्जा असंखेज्जाहिं उस्सप्पिणिओसप्पिणीहिं अवहीरंति कालतो, खेत्ततो असंखेज्जा लोगा, तत्थ णं जे ते मुक्केल्लगा ते णं अनंता अनंताहिं उस्सप्पिणिओस्सप्पिणीहिं अवहीरंति कालतो, खेत्ततो अनंता लोगा, अभवसिद्धिएहिंतो अनंतगुणा सिद्धाणं अनंतभागो, ।

पुढविकाइयाणं भंते! केवतिया वेउव्वियसरीरगा पन्नत्ता ?, गो० ! दु० पं०, तं०-बद्धे० मुक्के०, तत्थ णं जे ते बद्धेल्लगा ते णं नत्थि, तत्थ णं जे ते मुक्केल्लगा ते णं जहा एएसिं चेव ओरालिया तहेव भाणियव्वा, एवं आहारगसरीरावि, तेयाकम्मगा जहा एएसिं चेव ओरालिया, एवं आउकाइयतेउकाइयावि, वाउकाइयाणं भंते ! केवतिया ओरालियसरीरा पं० ?, गो० ! दु० पं०, तं०-बद्धे० मुक्के०, दुविहावि जहा पुढविकाइयाणं ओरालिया, वेउव्वियाणं पुच्छा, गो-! दु० तं०-बद्धेल्लगा य मुक्केल्लगा य, तत्थ णं जे ते बद्धेल्लगा ते णं असंखेज्जा समए समए अवहीरमाणा २ पलितोवमस्स असंखेज्जइभागमेत्तेणं कालेणं अवहीरंति नो चेव णं अवहिया सिया, मुक्केल्लगा जहा पुढविकाइयाणं, आहारयतेयाकम्मा जहा पुढवीकाइयाणं वणप्फइकाइयाणं जहा पुढविकाइयाणं नवरं तेयाकम्मगा जहा ओहिया तेयाकम्मगा ।

बेइंदियाणं भंते ! केवइया ओरालिया सरीरगा पं० ?, गो० ! दु० तं०-बद्धे० मुक्के०, तत्थ णं जे ते बद्धेल्लगा ते णं असंखेज्जा असंखेज्जाहिं उस्सप्पिणिओसप्पिणीहिं अवहीरंति कालतो खेत्ततो असंखेज्जाओ सेढीओ पयरस्स असंखेज्जइभागो, तासिणं सेढिणं विक्खंभसूई असंखेज्जाओ जोयणकोडाकोडिओ असंखेज्जाइं सेढिवग्गमूलाइं ।

वृ. पृथिव्यप्तेजःसूत्रेषु बद्धान्यौदारिकशरीराणि असङ्ख्येयानि, तत्रापि कालतः परिमाणचिन्तायां प्रतिसमयमेकशरीरापहारे सामस्त्येनासङ्ख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपहियन्ते, क्षेत्रतः परिमाणचिन्तायामसङ्ख्येयालोकाः-आत्मीयावगाहनाभिरसङ्ख्येया लोका व्याप्यन्ते, मुक्तान्यौधिकमुक्तवत्, तैजसकार्मणानि बद्धानि बद्धौदारिकवत् मुक्तान्यौधिकमुक्तवत्,

वातकायस्याप्यौदारिकशरीराणि पृथिव्यादिवत्, वैक्रियाणि बद्धान्यसङ्ख्येयानि, तानि च प्रतिसमयमेकैकशरीरापहारे पल्योपमासङ्ख्येयभागेन निःशेषतोऽपहियन्ते, किमुक्तं भवति ?—पल्योपमासङ्ख्येयभागे यावन्तः समयास्तावत्पर्माणानीति न पुनरभ्यधिकानि स्युः, तथाहि—

वायुकायिकाश्चतुर्विधाः तद्यथा—सूक्ष्मा बादराश्च, एकैके द्विधा—पर्याप्ता अपर्याप्ताश्च, तत्र बादरपर्याप्तव्यतिरिक्ताः शेषास्त्रयोऽपि प्रत्येकमसङ्ख्येयलोकाकाशप्रदेशप्रमाणाः, ये तु बादरपर्याप्तास्ते प्रतरासङ्ख्येयभागप्रमाणाः, तत्र त्रयाणां राशीनां वैक्रियलब्धिरेव नास्ति, बादरपर्याप्तानामपि सङ्ख्येयभागमात्राणां लब्धिः न शेषाणां, आह च चूर्णिकृत्—"तिण्हं ताव रासीणं वेउव्वियलद्धी चेव नत्थि, बायरपज्जत्ताणंपि संखेज्जइभागमेत्ताणं लद्धी अत्थि" त्ति, ततः पल्योपमासङ्ख्येयभागसमयप्रमाणा एव पृच्छासमये वायवो वैक्रियवर्त्तिनोऽवाप्यन्ते नाधिका इति, इह केचिदाचक्षते—सर्वे वायवो वैक्रियवर्त्तिन एव, अवैक्रियाणां चेष्टाया एवासम्भवात्, तदसमीचीनं, वस्तुगतेरपरिज्ञानात्, वायवो हि स्वभावाच्चलास्ततोऽवैक्रिया अपि ते वान्ति इति प्रतिपत्तव्यं, वाताद्वायुरिति व्युत्पत्तेः, आह च चूर्णिकृत्—"जेण सव्वेसु चेव लोगागासेसु चला वायवो वायंति तम्हा अवेउव्वियावि वाया वायंतीति घित्तव्व" मिति, मुक्तानि वैक्रियाण्यौधिकमुक्तवत्, तैजसकार्मणानि बद्धानि बद्धौदारिकवत् मुक्तान्यौधिकमुक्तवत्, वनस्पतिकायिकचिन्तायामौदारिकाणि पृथिव्यादिवत्, तैजसकार्मणान्यौधिकतैजसकार्मणवत् ।

द्वीन्द्रियसूत्रे बद्धान्यौदारिकशरीराणि असङ्ख्येयानि, ततः कालतः परिमाणचिन्तायामसङ्ख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपहियन्ते—असङ्ख्यातासूत्सर्पिण्यवसर्पिणीषु यावन्तः समयास्तावत्प्रमाणानीति भावः, क्षेत्रतोऽसङ्ख्येयाः श्रेण्योऽसङ्ख्यातासु श्रेणिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणानीत्यर्थः, तासां श्रेणीनां परिमाणविशेषनिर्द्धारणार्थमाह—प्रतरासङ्ख्येयभागः प्रतरस्यासङ्ख्येयभागप्रतिता असङ्ख्येया श्रेणयः परिगृह्यन्ते इति भावः । प्रतरासङ्ख्येयभागो नैरयिकभवनपतीनामपि प्रतिपादितस्ततो विशेषतरपरिमाणनिरूपणार्थं सूचीमानमाह—'तासि णं सेढीण'मित्यादि, तासां श्रेणीनां परिमाणावधारणाय या विष्कम्भसूची सा असङ्ख्येया योजनकोटीकोट्यः असङ्ख्येयोजनकोटीकोटिप्रमाणा इत्यर्थः, अथवेदमन्यद्विशेषतः परिमाणं—

'असंखेज्जाइं सेढिवग्गमूलाइं' इति, एकस्याः परिपूर्णायाः श्रेणेर्यः प्रदेशराशिस्तस्य प्रथमं वर्गमूलं द्वितीयं तृतीयं च वर्गमूलं यावदसङ्ख्येयतमं वर्गमूलं एतानि सर्वाण्यप्येकत्र सङ्कल्प्यन्ते, तेषु च सङ्कल्पितेषु यावान् प्रदेशराशिर्भवति तावत्प्रदेशात्मिका विष्कम्भसूचिरवसेया, अत्र निदर्शनं—

श्रेणी किल प्रदेशा असङ्ख्याता अप्यसत्कल्पनया पञ्चषष्टिः सहस्राणि पञ्च शतानि षट्त्रिंशदधिकानि तेषां प्रथमं वर्गमूलं द्वे शते षट्पञ्चाशदधिके द्वितीयं षोडश तृतीयं चत्वारः चतुर्थं द्वौ एतेषां च सङ्कलने जाते द्वे शते अष्टसप्त्यधिके एतावता किलासत्कल्पनया प्रदेशानां सूचिरिति, अथैते द्वीन्द्रियाः किंप्रमाणाभिरवगाहनाभिरास्तीर्यमाणाः कियता कालेन सकलं प्रतरमापूरयन्ति ?, उच्यते, अङ्गुलासङ्ख्येयभागप्रमाणाभिरवगाहनाभिः प्रत्यावलिकाऽसङ्ख्येयभागमेकैकावगाहनारचेनासङ्ख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरापूर्यन्ते, इयमत्र भावना—एकैकस्मिन्नावलिकायाः असङ्ख्येयतमे भागे एकैका अङ्गुलासङ्ख्येयप्रमाणा अवगाहना रच्यते, ततोऽसङ्ख्येयाभिरुत्सर्पिण्य-

वसर्पिणीभिः सकलमपि प्रतरं द्वीन्द्रियशरीरैरापूर्यते,

एतदेवापहारद्वारेण सूत्रकृदाह–

मू. (४०४-वर्तते) *बेइंदियाणं ओरालियसरीरेहिं बद्धेल्लगेहिं पयरो अवहीरति, असंखेज्जाहिं उस्सप्पिणीओसप्पिणीहिं कालतो, खेत्ततो अंगुलपयरस्स आवलियाते य असंखेज्जतिभागपलिभागेणं, तत्थ णं जे ते मुक्केल्लगा ते जहा ओहिया ओरालियमुक्केल्लगा, वेउव्विया आहारगा य बद्धिल्लगा नत्थि, मुक्किल्लगा जहा ओहिया ओरालियमुक्केल्लगा, तेयाकम्मगा जहा एतेसिं चेव ओहिया ओरालिया, एवं जाव चउरिंदिया। पंचिंदियतिरिक्खजोणियाणं एवं चेव, नवरं वेउव्वियसरीरएसु इमो विसेसो पंचिंदियतिरिक्खजोणियाणं भंते! केवइया वेउव्वियसरीरया पं०, गो० ! दु० पं०–बद्धे० मुक्के०, तत्थ णं जे ते बद्धेल्लया ते णं असंखिज्जा, जहा असुरकुमाराणं, नवरं तासि णं सेढीणं विक्खंभसूई अंगुलपढमवग्गमूलस्स असंखेज्जइभागो, मुक्केल्लगा तहेव।*

मणुस्साणं भंते! केवइया ओरालियसरीरगा पं० ?, गो० ! दु०, तं०–बद्धेल्लगा य मुक्के०, तत्थ णं जे ते बद्धेल्लगा ते णं सिय संखिज्जा सिय असंखिज्जा जहन्नपदे संखेज्जा संखेज्जाओ कोडाकोडीओ तिजमलयपस्स उवरिं चउजमलपयस्स हिट्ठा, अहव णं छट्ठो वग्गो अहव णं छन्नउईछेयणगदाइरासी, उक्कोसपए असंखिज्जा, असंखिज्जाहिं उस्सप्पिणिओसप्पिणीहिं अवहीरंति कालतो खेत्तओ रूवपक्खित्तेहिं मणुस्सेहिं सेढी अवहीरइ, तीसे सेढीए आकासखेत्तेहिं अवहारो मग्गिज्जइ असंखेज्जा असंखेज्जाहिं उस्सप्पिणिओसप्पिणीहिं कालतो खेत्ततो अंगुलपढमवग्गमूलं तइयवग्गमूलपडुप्पन्नं, तत्थ णं जे ते मुक्केल्लगा ते जहा ओरालिया ओहिया मुक्केल्लगा,

वेउव्वियाणं भंते! पुच्छा, गो० ! दु०, तं०– बद्धे० मुक्के०, तत्थ णं जे ते बद्धेल्लगा ते णं संखिज्जा समए २ अवहीरमाणे २ संखेज्जेणं कालेणं अवहीरंति, नो चेव णं अवहीरिया सिया, तत्थ णं जे ते मुक्केल्लगा ते णं जहा ओरालिया ओहिया, आहारगसरीरा जहा ओहिया, तेयाकम्मगा जहा एतेसिं चेव ओरालिया।

वाणमंतराणं जहगा नेरइयाणं ओरालिया आहारगा य, वेउव्वियसरीरगा जहा नेरइयाणं, नवरं तासि णं सेढीणं विक्खंभसूई संखेज्जओअणसयवग्गपलिभागो पयरस्स, मुक्किल्लया जहा ओरालिया, आहारगसरीरा जहा असुरकुमाराणं तेयाकम्मया जगा एतेसिं णं चेव वेउव्विता। तासिणं सेढीणं विक्खंभसूई बिछप्पन्नंगुलसयवग्गपलिभागो पयरस्स, वेमाणियाणं एवं चेव, नवरं तासिणं सेढीणं विक्खंभसूई अंगुलबितीयवग्गमूलं तइयवग्गमूलपडुप्पन्नं अहवण्णं अंगुलतइयवग्गमूलधणप्पमाणमेत्ताओ सेढीओ, सेसं तं चेव॥

वृ. 'बेइंदियाण' मित्यादि, द्वीन्द्रियाणा सम्बन्धिभिरौदारिकशरीरैर्बद्धैः प्रतरसङ्ख्येयाभिरुत्सर्पिण्यवसार्पिणीभिरपह्रियते, अत्र प्रतरमिति क्षेत्रतः परिमाणंउत्सर्पिण्यवसर्पिणीभिरिति कालतः, किंप्रमाणेन पुनः क्षेत्रेण कालेन वा अपहरणमत आह–'अंगुलपयरस्स आवलियाए य असंखेज्जइभागपलिभागेणं'ति, अङ्गुलमात्रस्य प्रतरस्य–एकप्रादेशिकश्रेणिरूपस्य असङ्ख्येयभागप्रतिभागप्रमाणेन खण्डेन, इदं क्षेत्रविषयं परिमाणं, कालपरिमाणमावलिकाया असङ्ख्येय-

भागप्रतिभागेनासंख्येयतमेन प्रतिभागेन, किमुक्तं भवति ?–एकेन द्वीन्द्रियेणाङ्गुलासंख्येयभागप्रमाणं खण्डमावलिकाया असङ्ख्येयतमेन भागेनापह्रियते, द्वितीयेनापि तावत्प्रमाणं खण्डं तावता कालेन, एवमपह्रियमाणं प्रतरं द्वीन्द्रियैः सर्वैरसङ्ख्येयाभिरुत्सर्पिणीभिः सकलमपह्रियते इति, मुक्तान्यौधिकमुक्तवत्, तैजसकार्मणानि बद्धानि बद्धौदारिकवत्, वैक्रियाणि पुनर्बद्धानि तेषां न सन्ति, मुक्तान्यौधिकमुक्तवत्, एवं त्रिचतुरिन्द्रियाणामपि ।

तिर्यक्पञ्चेन्द्रियाणां बद्धानि मुक्तानि चौदारिकाणि द्वीन्द्रियवत्, वैक्रियाणि बद्धानि असङ्ख्येयानि, तत्र कालतः परिमाणचिन्तायामसङ्ख्येयाभिरुत्सर्पिणीभिरपह्रियन्ते, क्षेत्रतोऽसङ्ख्येयासु श्रेणिषु यावन्तः आकाशप्रदेशास्तावत्प्रमाणानि, तासां च श्रेणीनां परिमाणं प्रतरस्यासङ्ख्येयो भागः, तथा चाह–'जहा असुरकुमाराण'मिति, यथा असुरकुमाराणां तथा वक्तव्यं, नवरं विष्कम्भसूचिपरिमाणचिन्तायां तत्राङ्गुलप्रमाणवर्गमूलस्य सङ्ख्येयो भाग उक्त इह त्वसङ्ख्येयो भागो वक्तव्यः, किमुक्तं भवति ?–अङ्गुलमात्रक्षेत्रप्रदेशराशेः यत्प्रथमं वर्गमूलं तस्यासङ्ख्येयतमे भागे यावन्त आकाशप्रदेशास्तावत्प्रदेशात्मिका सूचिः परिगृह्यते, तावत्या च सूच्या याः श्रेणयः स्पृष्टास्तासु श्रेणिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणानि तिर्यक्पञ्चेन्द्रियाणां बद्धानि वैक्रियशरीराणि, उक्तं च–

॥ १ ॥ "अङ्गुलमूलासंखेयभागप्पमियाउ होंति सेढीओ ।
उत्तरविव्वियाणं तिरियाणं सन्निपञ्चाणं ॥"

मुक्तान्यौधिकमुक्तवत्, तैजसकार्मणानि बद्धानि बद्धौदारिकवत्, मुक्तान्यौधिकमुक्तवत्, मनुष्याणां बद्धान्यौदारिकशरीराणि स्यात्–कदाचित् सङ्ख्येयानि कदाचिदसङ्ख्येयानि, कोऽत्राभिप्रायः इति चेत् ?, उच्यते, इह द्वये मनुष्या–गर्भव्युत्क्रान्तिकाः सम्मूर्च्छिमाश्च, तत्र गर्भव्युत्क्रान्तिकाः सदावस्थायिनो, न स कश्चित्कालोऽस्ति यो गर्भव्युत्क्रान्तिकमनुष्यरहितो भवति, सम्मूर्च्छिमाश्च कदाचिद्विद्यन्ते कदाचित्सर्वथा तेषामभावो भवति, तेषामुत्कर्षतोऽन्तर्मुहूर्तायुष्कत्वात्, उत्पत्त्यन्तरस्य चोत्कर्षतश्चतुर्विंशतिमुहूर्तप्रमाणत्वात्, ततो यदा सर्वथा सम्मूर्च्छिममनुष्या न विद्यन्ते किन्तु केवला गर्भव्युत्क्रान्तिका एव तिष्ठन्ति तदा स्यात् सङ्ख्येयाः, सङ्ख्येयानामेव गर्भव्युत्क्रान्तिकानां भावात्, महाशरीरत्वे प्रत्येकशरीरत्वे च सति परिमितक्षेत्रवर्तित्वात्, यदा तु सम्मूर्च्छिमास्तदा असङ्ख्येयाः, सम्मूर्च्छिमानामुत्कर्षतः श्रेण्यसङ्ख्येयभागवर्तिनभःप्रदेशराशिप्रमाणत्वात्,

तथा चाह–'जहन्नपदे संखेज्जा' इत्यादि, जघन्यपदं नाम यत्र सर्वस्तोकाः मनुष्याः प्राप्यन्ते, आह–किमत्र सम्मूर्च्छिमाणां ग्रहणमुत गर्भव्युत्क्रान्तिकानां ?, उच्यते, गर्भव्युत्क्रान्तिकानां, तेषामेव सदाऽवस्थायितया सम्मूर्च्छिमविरहे सर्वस्तोकतया प्राप्यमाणत्वात्, उत्कृष्टपदे तूभयेषामपि ग्रहणं, यदाह मूलटीकाकारः–"सेतराणां ग्रहणमुत्कृष्टपदे, जघन्यपदे गर्भव्युत्क्रान्तिकानामेव केवलानां ग्रहण" मिति, अस्मिन् जघन्यपदे सङ्ख्येया मनुष्याः, तत्र सङ्ख्येयकं सङ्ख्येयभेदभिन्नमिति न ज्ञायते कियन्तस्ते इति विशेषसङ्ख्यां निर्धारयति–सङ्ख्येयाः कोटीकोट्यः, अथवा इदमन्यत् विशेषतरं परिमाणं–'तिजमलपयस्स उवरिं चउजमलपयस्सहेट्ठा' इति, इह मनुष्यसङ्ख्याप्रतिपादिकान्येकोनत्रिंशदङ्कस्थानानि वक्ष्यमाणानि, तत्र समयपरिभाषया अष्टानां अष्टानमङ्क-

स्थानानां यमलपदमिति संज्ञा, चतुर्विंशत्या चाङ्कस्थानैः त्रीणि यमलपदानि लब्धानि, उपरि पञ्चाङ्कस्थानानि तिष्ठन्ति, अथ च यमलपदमष्टभिरङ्कस्थानैस्ततश्चतुर्थं यमलपदं न प्राप्यते तत उक्तं त्रयाणां यमलपदानामुपरि–पञ्चभिरङ्कस्थानैर्वर्द्धमानत्वात् चतुर्थस्य च यमलपदस्याधस्तात्–त्रिभिरङ्कस्थानैर्हीनत्वात्, अथवा द्वौ द्वौ वर्गौ समुदितौ एकं यमलं चत्वारो वर्गाः समुदिता द्वे यमले षड् वर्गाः समुदितास्त्राणि यमलपदानि अष्टौ वर्गाः समुदिताश्चत्वारि यमलपदानि, तत्र यस्मात् षण्णां वर्गाणामुपरि वर्त्तन्ते सप्तमस्य च वर्गस्याधस्तात् तत उक्तं–त्रिमलपदस्योपरि चतुर्थमलपदस्याधस्तादिति, त्रियमलपदस्येति–त्रितयानां यमलपदानां समाहारस्त्रियमलपदं तस्य, तथा चतुर्णां यमलपदानां समाहारश्चतुर्थमलपदं तस्य, सम्प्रति स्पष्टतरं सङ्ख्यानमुपदर्शयति–

'अहवं णं छट्ठवग्गो पंचमवग्गपडुप्पण्णो' इति अथवेति पक्षान्तरे णमिति वाक्यालङ्कारे षष्ठो वर्गः पञ्चमवर्गेण प्रत्युत्पन्नो–गुणितः सन् यावान् भवति तावत्प्रमाणा जघन्यपदे मनुष्याः, तत्र एकस्य वर्ग एक एव स च वृद्धिं न गत इति वर्गो न गण्यते, द्वयोर्वर्गश्चत्वारः एष प्रथमो वर्गः चतुर्णां वर्गः षोडश एष द्वितीयो वर्गः षोडशानां वर्गो द्वे शते षट्पञ्चाशदधिके एष तृतीयो वर्गः द्वयोः शतयोः षट्पञ्चाशदधिकयोर्वर्गः पञ्चषष्टिः सहस्राणि पञ्च शतानि षट्त्रिंशदधिकानि, एष चतुर्थो वर्गः एतस्य वर्गश्चत्वारि कोटिशतानि एकोनत्रिंशत्कोट्यः एकोनपञ्चाशल्लक्षाः सप्तषष्टिः सहस्राणि द्वे शते षन्नवत्यधिके एष पञ्चमो वर्गः उक्तं च–

॥ १ ॥ ''चत्तारि य कोडिसया अउणत्तीसं च होंति कोडीओ।
अउणावन्नं लक्खा सत्तट्ठी चेव य सहस्सा ॥
॥ २ ॥ दो य सया छन्नउया पंचमवग्गो समासओ होइ।
एयस्स कतो वग्गो छट्ठो जो होइ तं वोच्छं ॥''

एतस्य पञ्चमस्य वर्गस्य यो वर्गः स षष्ठो वर्गः, तस्य परिमाणमेकं कोटीकोटीशतसहस्रं चतुरशीतिः कोटीकोटीसहस्राणि चत्वारि सप्तषष्ट्यधिकानि कोटीकोटीशतानि चतुश्चत्वारिंशत्कोटिलक्षाणि सप्तकोटीसहस्राणि त्रीणि सप्तत्यधिकानि कोटिशतानि पञ्चनवतिर्लक्षाः एकपञ्चाशत्सहस्राणि षट् शतानि षोडशोत्तराणि, एष षष्ठो वर्गः, उक्तं च–

॥ १ ॥ ''लक्खं कोडोकोडी चउरासीइ भवे सहस्साइं।
चत्तारि य सत्तट्ठा होंति सया कोडीकोडीणं ॥
॥ २ ॥ चउयालं लक्खाइं कोडीणं सत्त चेव य सहस्सा।
तिन्नि सया सत्तयरी कोडीणं हुंति नायव्वा ॥
॥३ ॥ पंचानउई लक्खा एकावन्नं भवे सहस्साइं।
छसोलसुत्तरसया एसो छट्ठो हवइ वग्गो ॥'' इति,

एष षष्ठो वर्गः पञ्चमवर्गेण गुण्यते, गुणिते च सति यावान् राशिर्भवति तावत्प्रमाणा जघन्यपदे मनुष्याः, ते च एतावन्तो भवन्ति, ७९२२८१६२५१४२६४३३७५९३५४३९५०३३६ एतान्येकोनत्रिंशदङ्कस्थानानि, एतानि च कोटीकोट्यादिद्वारेण कथमपि अभिधातुं न शक्यन्ते ततः पर्यन्तवर्त्तिनोऽङ्कस्थानादारभ्य अङ्कस्थानसङ्ख्यमात्रं पूर्वपुरुषप्रणीतेन गाथाद्वयेनाभिधीयते–

॥१॥ "छत्तिन्नि तिन्नि सुण्णं पंचेव य नव य तिण्णि चत्तारि ।
पंचेव तिन्नि नव पंच सत्त तिण्णेव त्ति चउ छट्ठो ॥
॥२॥ दो चउ इक्को पंच दो छक्कगेक्कग (गं च अ)ट्ठेव ।
दो दो नव सत्तेव य ठाणाइं उवरि हुंताइं ॥"

—अथवाऽयमङ्कस्थानप्रथमाक्षरसङ्ग्रहः —

॥१॥ "छत्तितिसु पण नव ति च प ति ण प स ति ति चउ छंदो ।
च ए प दो छ ए अ बे दे ण स पढमक्खरसन्तियट्ठाणा ॥"

एतेषामेव एकोनत्रिंशदङ्कस्थानानां पूर्वपुरुषैः पूर्वाङ्गैः परिसङ्ख्यानं कृतं तदुपदर्शयति, तत्र चतुरशीतिर्लक्षाणि पूर्वाङ्गं चतुरशीतिर्लक्षैश्चतुरशीतिर्लक्षैर्गुणितं ततः पूर्वं भवति, तस्य परिमाणं—सप्ततिः कोटिलक्षणाणि षट्पञ्चाशत्कोटिसहस्राणि ७०५६०००००००००, एतेन भागो ह्रियते तत इदमागतं—एकादशपूर्वकोटीकोट्यो द्वाविंशतिः पूर्वकोटीलक्षाणि चतुरशीतिः पूर्वकोटीसहस्राणि अष्टादशोत्तराणि पूर्वकोटीशतानि एकाशीतिः पूर्वलक्षाणि पञ्चनवतिः पूर्वसहस्राणि त्रीणि षट्पञ्चाशदधिकानि पूर्वशतानि, अत ऊर्ध्वं पूर्वैर्भागो न लभ्यते ततः पूर्वाङ्गैर्भागहरणं, तत्रेदमागतं—एकविंशतिः पूर्वाङ्गलक्षाणि सप्ततिः पूर्वाङ्गसहस्राणि षट् एकोनषष्ट्यधिकानि पूर्वाङ्गशतानि, तत ऊर्द्धं च इदमन्यत् उद्धरितमवतिष्ठतेऽशीतिर्लक्षाणिपञ्चाशत् सहस्राणि त्रीणि शतानि षट्त्रिंशदधिकानि मनुष्याणामिति १,१२,२८,४१,१८,८१,९५,३५६ । २१७०६५९ । तथा च पूर्वाचार्यप्रणीता अत्र गाथा—

॥१॥ "मणुयाण जहन्नपदे एक्कारस पुव्वकोडिकोडीउ ।
बावीस कोडिलक्खा कोडिसहस्साइं चुलसीई ॥
॥२॥ अट्ठेव य कोडिसया पुव्वाण दसुत्तरा तओ होंति ।
एकासीई लक्खा पंचानउई सहस्साइं ॥
॥३॥ छप्पन्ना तिन्नि सया, पुव्वाणं पुव्ववण्णिया अन्ने ।
एत्तो पुव्वंगाइं इमाइं अहियाइं अन्नाइं ॥
॥४॥ लक्खाइं एगवीसं पुव्वंगाण सयरी सहस्सा य
छच्चेवेगूणट्ठा पुव्वंगाणं सया होंति ॥
॥५॥ तेसीइ सयसहस्सा पन्नासं खलु भवे सहस्साइं ।
तिन्नि सया छत्तीसा, एवइया अविगला मणुया ॥" इति,

इमामेव सङ्ख्यां विशेषोपलम्भनिमित्तं प्रकारान्तरेणा—'अहवणं छन्नउईछेयणगदायी रासी' इति, 'अहवणे'ति प्राग्वत्, षन्नवतिच्छेदनकानि यो राशिर्ददाति स षन्नवतिछेदनकदायी राशिः, किमुक्तभवति ? —योराशिरर्द्धनार्द्धेन छिद्यमानः षन्नवतिं वारान् छेदं सहते पर्यन्ते च सकलमेकं रूपं पर्यवसितं भवति स षन्नवतिछेदनकदायी राशिरिति, कः पुनरेवंविध इति चेत् ?, उच्यते, एष एव षष्ठो वर्गः पञ्चमवर्गगुणितः, कोऽत्र प्रत्यय इति चेत् ?, उच्यते, इह प्रथम-वर्गश्छिद्यमानो द्वे छेदनके ददाति, तद्यथा—प्रथमच्छेदनकं द्वौ द्वितीयमेकमिति, द्वितीयो वर्गश्चत्वारि छेदनकानि,

तत्र प्रथममष्टौ द्वितीयं चत्वारस्तृतीयं द्वौ चतुर्थमेक इति, एवं तृतीयवर्गोऽष्टौ छेदनकानि प्रयच्छति, चतुर्थः षोडश पञ्चमो द्वात्रिंशतं षष्ठश्चतुःषष्टिं, स चैवं पञ्चमवर्गेण गुणितः षन्नवतिः, कथमेतदवसेयमिति चेत् ?,

उच्यते, इह यो यो वर्गो येन येन वर्गेणं गुण्यते तत्र तत्र तयोर्द्वयोरपि छेदनकानि प्राप्यन्ते, यथा प्रथमवर्गेण गुणिते द्वितीयवर्गे षट्, तथाहि–द्वितीयो वर्गः षोडशलक्षणः प्रथमवर्गेण चतुष्करूपेण गुण्यते जाता चतुःषष्टिः, तस्याः प्रथमं छेदनकं द्वात्रिंशत् द्वितीयं षोडश तृतीयमष्टौ चतुर्थं चत्वारः पञ्चमं द्वौ षष्ठं एक इति, एवमन्यत्रापि भावनीयं, तत्र पञ्चमवर्गे द्वात्रिंशच्छेदनकानि षष्ठे चतुःषष्टिः ततः पञ्चमवर्गेण षष्ठे वर्गे गुणिते षन्नवतिछेदनकानि प्राप्यन्ते, अथवा एकं रूपं स्थापयित्वा ततः षन्नवतिवारान् द्विगुणद्विगुणीकृतो, जातं सत्रिनवत्यधिकशतद्वयरूपराशिर्भवति ततोऽपनीतं एष षन्नवतिच्छेदनकदायी राशिरिति, तदेवं जघन्यपदमभिहितम्,

इदानीमुत्कृष्टपदमाह–'उक्कोसपए असंखेज्जा' इत्यादि, उत्कृष्टपदे ये मनुष्या भवन्ति ते असङ्ख्येयाः, तत्रापि कालतः परिमाणचिन्तायां प्रतिसमयमेकैकमनुष्यापहारे सामस्त्येनासङ्ख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपह्रियन्ते, क्षेत्रतो रूपे प्रक्षिप्ते मनुष्यैरेका श्रेणिः परिपूर्णाऽपह्रियते, किमुक्तं भवति ?–उत्कृष्टपदे ये मनुष्यास्तेषु मध्ये एकस्मिन्नसत्कल्पनया रूपे प्रक्षिप्ते सकलाऽपि श्रेणिरेकाऽपह्रिते, तस्याश्च श्रेणेः क्षेत्रकालाभ्यामपहारमार्गणा कालतस्तावदसङ्ख्येयाभिरुत्सर्पिण्यवसर्पिणीभिः क्षेत्रतोऽङ्गुलप्रथमवर्गमूलं तृतीयवर्गमूलप्रत्युत्पन्नं, किमुक्तं भवति ?–अङ्गुलमात्रक्षेत्रप्रदेशराशिरसत्कल्पनया षट्पञ्चटाशदधिकशतद्वयप्रमाणस्तस्य यत्प्रथमं वर्गमूलमसत्कल्पनया षोडशलक्षणं ततस्तृतीयेन वर्गमूलेनासत्कल्पनया द्विकलक्षणेन गुण्यते, गुणिते च सति यावान् प्रदेशराशिर्भवति असत्कल्पनया द्वात्रिंशत् एतावत्प्रमाणैः खण्डैरपह्रियमाणा यावत् श्रेणिर्निष्ठामियर्त्ति तावत् मनुष्या अपि निष्ठामुपयान्ति, आह–कथमेकस्याः श्रेणेर्यथोक्तप्रमाणैः खण्डैरपह्रियमाणायाः असङ्ख्येया उत्सर्पिण्यवसर्पिण्यो लगन्ति ? उच्यते, क्षेत्रस्यातिसूक्ष्मत्वात्, उक्तं च सूत्रेऽपि –

॥ १ ॥ "सुहुमो य होइ कालो तत्तो सुहुमयरयं हवइ खेत्तं ।
अंगुलसेढीमेत्ते उस्सप्पिणीओ असंखेज्जा ॥" इति,

मुक्तान्यौधिकमुक्तवत्, वैक्रियाणि बद्धानि सङ्ख्येयानि, गर्भव्युत्क्रान्तिकानामेव केषांचित् वैक्रियलब्धिसंभवात्, मुक्तान्यौधिकमुक्तवत्, आहारकाण्यौधिकाहारकवत्, तैजसकार्मणानि बद्धानि बद्धौदारिकवत्, मुक्तान्यौधिकमुक्तवत्, व्यन्तराणामौदारिकाणि यथा नैरयिकाणां, वैक्रियाणि बद्धान्यसङ्ख्येयानि, तत्र कालतः परिमाणचिन्तायां प्रतिसमयमेकैकापहारे असङ्ख्येयाभिरुत्सर्पिण्यवसर्पिण्यवसर्पिणीभिरपह्रियन्ते, क्षेत्रतोऽसङ्ख्येयाः श्रेणयः, असङ्ख्यातासु श्रेणिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणानीति भावः, ताश्च श्रेणयः कियत्य इति चेत् ?, उच्यते, प्रतरस्यासङ्ख्येयो भागः, प्रतरासङ्ख्येयभागप्रमिता इत्यर्थः, तथा चाह–

'वेउव्वियसरीरा जहा नेरइयाण'मिति वैक्रियशरीराणि व्यन्तराणां यथा नैरयिकाणां, केवलं सूच्यां विशेषः, तथा चाह–'नवर'मित्यादि, नवरं तासां श्रेणीनां विष्कम्भसूचिर्वक्तव्येति

शेषः, सा च सुप्रसिद्धत्वान्नोक्ता, कथं सुप्रसिद्धेति चेत्? उच्यते, इह महादण्डके पञ्चेन्द्रियतिर्यग्नपुंसकेभ्योऽसङ्ख्येयगुणहीना व्यन्तराः पठ्यन्ते, तत एषां विष्कम्भसूचिरपि तिर्यक्पञ्चेन्द्रियविष्कम्भसूचेरसङ्ख्येयगुणहीना वक्तव्या इति, आह च मूलटीकाकारोऽपि, –

"जम्हा महादंडए पंचिंदियतिरियनपुंसएहिंतो असंखेज्जगुणहीणा वाणमंतरा पढिज्जंति, तम्हा विक्खंभसूईवि तेहिंतो असंखेज्जगुणहीणा चेव भाणियव्वा' इति, सम्प्रति प्रतिभाग उच्यते– प्रतिभागो नाम खण्डं, 'संखेज्जजोयणसयवग्गपलिभागो पयरस्स' इति सङ्ख्येयोजनशतवर्गप्रमाणः प्रतिभागः प्रतरस्य पूरणे अपहरणे वा इति वाक्यशेषः, इयमत्र भावना–असङ्ख्येययोजनशतवर्गप्रमाणे श्रेणिखण्डे यदि एकैको व्यन्तरः स्थाप्यते ततस्ते सकलमपि प्रतरमापूयन्ति, यदिवा यद्येकैकव्यन्तरापहारे एकैकं सङ्ख्येययोजनशतवर्गप्रमाणं श्रेणिखण्डमपहृिते तत एकत्र व्यन्तरा निष्ठां यान्ति परतः सकलं प्रतरमिति, मुक्तान्यौधिकमुक्तवत्, आहारकाणि नैरयिकवत्, तैजसकार्मणानि बद्धानि बद्धवैक्रियवत्, मुक्तान्यौधिकमुक्तवत्।

ज्योतिष्काणामौदारिकाणि नैरयिकवत्, वैक्रियाणि बद्धान्यसङ्ख्येयानि, तत्र कालतो मार्गणायां प्रतिसमयमेकैकापहारे सामस्त्येनातिक्रान्तैः [illegible] क्षेत्रतोऽसङ्ख्येयाः श्रेणयः, ताश्च श्रेणयः प्रतरासङ्ख्येयभागप्रमिताः, तथा चाह–'जोइसियाणं एवं चेव' इति, नवरमित्यादिना विशेषं दर्शयति, नवरं तासां श्रेणीनां विष्कम्भसूचिर्वक्तव्येति शेषः, इयमपि सुप्रसिद्धात्वान्नोक्ता, कथमियं सुप्रसिद्धेति चेत्?, उच्यते, यस्मान्महादण्डके व्यन्तरेभ्यो ज्योतिष्काः सङ्ख्येयगुणा उक्तास्तत एतेषां विष्कम्भसूचिरपि तेषां विष्कम्भसूचेः सङ्ख्येययगुणा द्रष्टव्या, तथा चाह मूलटीकाकारः–'जम्हा वाणमंतरेहिंतो जोइसिया संखिज्जगुणा पढिज्जंति, तम्हा विक्खंभसूईवि तेसिं तेहिंतो संखेज्जगुणा चेव भवति', इति नवरं प्रतिभागे स्पष्टतरो विशेषस्तमेवाह–'बिछप्पन्नं गुलसयवग्गपलिभागो पयरस्स' इति षट्पञ्चादशाधिकशतद्वयाङ्गुलवर्गप्रमाणः प्रतिभागः प्रतरस्य पूरणेऽपहरणे च,

अत्रापीयं भावना–षट्पञ्चादशाधिकशतद्वयाङ्गुलवर्गप्रमाणे श्रेणिखण्डे यद्येकैको ज्योतिष्कोऽवस्थाप्यते ततस्ते सकलमपि प्रतरमापरयन्ति, यदिवा यद्येकैकज्योतिष्कापहारेण एकैकं षट्पञ्चाशदधिकशतद्वयाङ्गुलवर्गदप्रमाणं श्रेणिखण्डमपहृिते तत एकत्र ज्योतिष्काः परिसमाप्तिमुपयान्ति अपरत्र सकलं प्रतरमिति, एवं च ज्योतिष्काणां व्यन्तरेभ्यः सङ्ख्येयगुणहीनः प्रतिभागः सङ्ख्येयगुणाभ्यधिका सूचिः, पञ्चसङ्ग्रहे पुनः षट्पञ्चाशदधिकशतद्वयप्रमाण एव प्रतिभाग उक्तो नतु षट्पञ्चाशदधिकशतद्वयवर्गदप्रमाणः, तथा च तद्ग्रन्थः– "छप्पन्नदोसयंगुलसूइपएसेहं माइयं पयरं। जोइसिएहिं हीरइ" इति, मुक्तान्यौधिकमुक्तवत्, आहारकाणि नैरयिकवत्, तैजसकार्मणानि बद्धानि वैक्रियवत्, मुक्तान्यौधिकमुक्तवत्।

वैमानिकानामौदारिकाणि नैरयिकवत्, वैक्रियमाणि बद्धानि असङ्ख्येयानि, तत्र कालतो मार्गणा ज्योतिष्कवत्, क्षेत्रतो मार्गणाऽसङ्ख्येयाः श्रेणयः, किमुक्तं भवति? –असङ्ख्येयासु श्रेणिषु यावन्त आकाशप्रदेशास्तावत्प्रमाणानीति, तासां च श्रेणीनां परिमाणां प्रतरस्यासङ्ख्येयो भागः, प्रतरासङ्ख्येयाभागप्रमिता ग्राह्या इत्यर्थः, तत्र प्रतरासङ्ख्येयाभागो नैरयिकादिमार्गणायामपि गृहीतं

इति विशेषतरं परिमाणं प्रतिपादयति–'तासि ण'मित्यादि, तासां श्रेणीनां विष्कम्भसूचिरङ्गुलद्वितीयवर्गमूलं तृतीयवर्गमूलप्रत्युत्पन्नं, एतदुक्तं भवति–

अङ्गुलमात्रक्षेत्रप्रदेशराशेरसत्कल्पनया षट्पञ्चाशदधिकशतद्वयप्रमाणस्य यत् द्वितीयं वर्गमूलं, असत्कल्पनया चतुष्कलक्षणं, तत्तृतीयेन वर्गमूलेन, असत्कल्पनया द्विकरूपेण गुण्यते, गुणिते च सति यावान् प्रदेशराशिर्भवति, असत्कल्पनया अष्टौ, तावत्प्रदेशात्मिकया विष्कम्भसूच्या परिमिताः श्रेणयः परिग्राह्याः, तत्रापि ता एव अष्टौ श्रेणय इति प्रकारद्वयेऽप्यर्थाभेदः, आहारकाणि नैरयिकवत्, तैजसकार्मणानि बद्धानि बद्धवैक्रियवत्, मुक्तान्यौधिकमुक्तवत् ॥

पदं – १२ – समाप्तम्

मुनि दीपरत्न सागरेण संशोधिता सम्पादिता प्रज्ञापनाऽपाङ्गसूत्रे द्वादशपदस्य मलयगिरि आचार्येण विरचिता टीका परिसमाप्ता ।

पदं – १३ – "परिणाम"

वृ. तदेवं व्याख्यातं द्वादशं पदं, सम्प्रति त्रयोदशमारभ्यते, अस्य चायमभिसम्बन्धः– इहानन्तरपदे औदारिकादिशरीरविभाग उक्तः, तानि पुनः शरीराणि तथा परिणामे भवन्ति नान्यथा ततः परिणामस्वरूपप्रतिपादनार्थमिदमारभ्यते, तत्र चेदमादिसूत्रं–

मू. (४०५) कतिविधे णं भंते ! परिणामे पन्नत्ते ?, गो० ! दुविहे परिणामे पं०, तं० जीवपरिणामे य अजीवपरिणामे य ।

वृ. 'कइविहेणं भंते! परिणामे पं० ?' इत्यादि, कतिविधः–कतिप्रकारो, णमिति वाक्यालङ्कारे, भदन्त ! परिणामः प्रज्ञप्तः, परिणमनं परिणामः, 'कर्तरी'ति भावे घञ्प्रत्ययः, परिणमनं च नयभेदेन विचित्रं, नयाश्च नैगमादयोऽनेके, तेषां च समस्तानामपि सङ्ग्राहकौ प्रवचने द्वौ नयौ, तद्यथा–द्रव्यास्तिकनयः पर्यायास्तिकनयश्च, तथा चाहुः श्रीमल्लवादिनः–

॥ १ ॥ "तित्थयरवयणसंगहविसेसपत्थारमूलवागरणा ।
दव्वट्ठिओ य पज्जवनओ य सेसा विगप्पा सिं ॥"

तत्र द्रव्यास्तिकनयमतेन परिणमनं नाम यत्कथञ्चित् सदेवोत्तरपर्यायरूपं धर्मान्तरमधिगच्छति, न च पूर्वपर्यायस्यापि सर्वथाऽवस्थानं नाप्येकान्तेन विनाशः, तथा चोक्तम्–

॥ १ ॥ "परिणामो ह्यर्थान्तरगमनं न च सर्वथा व्यवस्थानम् ।
न च सर्वथा विनाशः परिणामस्तद्विदामिष्टः ॥"

पर्यायास्तिकनयमतेन पुनः परिणमनं पूर्वसत्पर्यायापेक्षया विनाश उत्तरेण चासता पर्यायेण प्रादुर्भावः, तथा चामुमेव नयमधिकृत्यान्यत्रोक्तं–

॥ १ ॥ "सत्पर्यायेण विनाशः प्रादुर्भावोऽसद्भावपर्ययतः ।
द्रव्याणां परिणामः प्रोक्तः खलु पर्ययनस्य ॥"

भगवानाह–गौतम ! द्विविधः परिणामः प्रज्ञप्तः, तद्यथा–जीवपरिणामश्चाजीवपरिणामश्च, तत्र जीवस्य परिणामो जीवपरिणामः, स प्रायोगिकः, अजीवस्य परिणामोऽजीवपरिणामः, स

वैश्रसिकः, चशब्दौ स्वगतानेकभेदसूचकौ, तांश्च भेदान् अग्रे सूत्रकृदेव वक्ष्यति, तथा चाह–

मू. (४०६) *जीवपरिणामे णं भंते! कतिविधे पं० ? गो० ! दसविधे पं० तं०–गतिपरिणामे १ इंदियपरिणामे २ कसायपरिणामे ३ लेसापरिणामे ४ जोगपरिणामे ६ उवओगपरि० ६ नाणपरि० ७ दंसणपरि० ८ चरित्तपरि० ९ वेदपरिणामे १०*

वृ. 'जीवपरिणामे णं भंते !' इत्यादि, दशविधो जीवपरिणामः, तद्यथा–गतिपरिणाम इत्यादि, तत्र गम्यते नैरयिकादिगतिकर्मोदयवशादवाप्यते इति गतिः–नैरयिकत्वादिपर्यायपरिणतिः गतिरेव परकिणामो गतिपरिणामः १, तथा इन्दनादिन्द्रः–आत्मा ज्ञानलक्षणपरमैश्वर्ययोगात् तस्येदं, 'इन्द्रिय'मिति निपातनादिन्द्रशब्दादियप्रत्ययः, इन्द्रियाण्येव परिणाम इन्द्रियपरिणामः २, तथा कर्षन्ति–हिंसन्ति परस्परं प्राणिनोऽस्मिन्निति कषः–संसारस्तमयन्ते–अन्तर्भूताण्यर्थत्वात् गमयन्ति प्रापयन्ति ये ते कषायाः 'कर्मणोऽणि'त्यण् प्रत्ययः, कषाया एव परिणामः कषायपरिणामः ३, –लेश्यादिशब्दार्थो वक्ष्यमाणः लेश्यां एव परिणामो लेश्यापरिणामः ४ योग एव परिणामो योगपरिणामः ५ उपयोग एव परिणाम उपयोगपरिणामः ६ एवं ज्ञानपरिणाम ७ दर्शनपरिणाम ८ चारित्रपरिणाम ९ वेदपरिणामेष्वपि भावनीयं।

सम्प्रत्यमीषां पदानामित्थं क्रमेणोपन्यासे कारणमभिधीयते–तत्र सर्वे भावास्तत्तद्भावाश्रिता गतिपरिणामं विना न प्रादुष्यन्ति ततः प्रथमं गतिपरिणामः १ गतिपरिणामे च सत्यवश्यमिन्द्रियपरिणाम इति तदनन्तरमिन्द्रियपरिणाम उक्तः २ इन्द्रियपरिणामे च सति इष्टानिष्टविषयसम्बन्धाद्रागद्वेषपरिणतिरुपजायते इति तदनन्तरं कषायपरिणामः ३ कषायपरिणामश्चावश्यं लेश्यापरिणामाविनाभावी, तथाहि– लेश्यापरिणामः सयोगिकेवलिनमपि यावद्भवति, यतो लेश्यानां स्थितिनिरूपणावसरे लेश्याध्ययने शुक्ललेश्याया जघन्या उत्कृष्टा च स्थितिः प्रतिपादिता–

॥ १ ॥ "मुहुत्तद्धं तु जहन्ना उक्कोसा होइ पुव्वकोडी उ।
नवहिं वरिसेहिं ऊणा नायव्वा सुक्कलेसाए ॥" इति,

सा च नववर्षोनपूर्वकोटिप्रमाणा उत्कृष्टा स्थितिः शुक्ललेश्यायाःसयोगिकेवलिन्युपपद्यते, नान्यत्र, कषायपरिणामस्तु सूक्ष्मसम्परायं यावद्भवति, ततः कषायपरिणामो लेश्यापरिणामाऽविनाभूतोलेश्यापरिणामश्च कषायपरिणामं विनापि भवति, ततः कषायपरिणामानन्तरं लेश्यापरिणाम उक्तः, नतु लेश्यापरिणामान्तरं कषायपरिणामः ४, तथा लेश्यापरिणामो योगपरिणामात्मको 'योगपरिणामो लेश्या' इति वचनात्, उपपादयिष्यते चायमर्थो लेश्यापदे सविस्तरमतो लेश्यापरिणामानन्तरं योगपरिणाम उक्तः ५।

संसारिणां च योगपरिणतानामुपयोगपरिणतिस्ततो योगपरिणामानन्तरमुपयोगपरिणामः ६ सति चोपयोगपरिणामे ज्ञानपरिणाम इति तदनन्तरं ज्ञानपरिणाम उक्तः ७ ज्ञानपरिणामश्च द्विधा–सम्यग्ज्ञानपरिणामो मिथ्याज्ञानपरिणामश्च, तौ च न सम्यक्त्वमिथ्यात्वव्यतिरेकेण भवत इति तदनन्तरं दर्शनपरिणाम उक्तः ८ सम्यग्दर्शनपरिणामे च जीवानां जिनवचनाकर्णनतो नवनवसंवेगाविर्भावतश्चारित्रावरणकर्मक्षयोपशमतः चारित्रपरिणाम उपजायते ततो दर्शनपरिणामानन्तरं चारित्रपरिणाम उक्तः ९ चारित्रपरिणामवशाते वेदपरिणामं प्रलयमुपनयन्ति

महासत्त्वास्तत श्चारित्रपरिणामानन्तरं वेदपरिणाम उक्तः १०।

तदेवमुक्ता जीवस्य गत्यादयः परिणामविशेषाः, सम्प्रत्येतामेव गत्यादिक्रमं भेदान् दर्शयति–

मू. (४०७) *गतिपरिणामे णं भंते ! कतिविधे, पं० ?, गो० ! चउव्विहे पन्नत्ते, तं०–नरयगतिपरिणामे तिरियगतिप० मणुयगतिपरिणामे देवगतिप १।*

इंदियपरिणामे णं भंते ! कतिविधे पं० ?, गो० ! पंचविधे पं०, तं०–सोतिंदियपरि० चक्खिंदियप० घाणिंदियप० जिब्भिंदियपरिणामे फासिंदियपरिणामे २।

कसायपरिणामे णं भंते ! कतिविधे पं० ?, गो० ! चउव्विधे पं०, तं०–कोहकसायप० माणकसायप० मायाकसायप० लोभकसायपरिणामे ३।

लेस्सापरिणामे णं भंते ! कतिविधे पं० ?, गो० ! छव्विहे पं०, तं०–कण्हलेसाप० नीललेसाप० काउलेसाप० तेउलेसाप० पम्हलेसाप० सुक्कलेसाप० ४।

जोगपरिणामे णं भंते ! कइविहे पं० ?, गो० ! तिविधे पं०, तं०–मनजोगप० वइजोगप० कायजोगप० ५। उवओगपरिणामे णं भंते ! कइविहे पं० ?, गो० ! दुविहे पं०, तं०–सागारोवओगप० अनागारोवओगपरिणामे ६।

नाणपरिणामे णं भंते ! कइविहे पं० ?, गो० ! पंचविहे पं०, तं०–आभिनिबोहियणाणप० सुयनाणप० ओहिनाणप० मनपज्जवनाणप० केवलनाणप०, अन्नाणपरिणामे णं भंते ! कइविहे पं० ?, गोए ! तिविहे पं०, तं०–मइअन्नाप० सुयअन्नाणप० विभंगनाणप० ७।

दंसणपरिणामे णं भंते ! कइविहे पं० ?, गो० ! तिविधे पं०, तं०–सम्मद्दंसणपरि० मिच्छादंसणप० सम्ममिच्छादंसणप० ८। चारित्तपरिणामे णं भंते ! कतिविधे पं० ? गो० ! पंचविहे पं०, तं०–सामाइयचारित्तप० छेदोवट्ठावणियचारित्तप० परिहारविसुद्धियचारित्तप० सुहुमसंपरायचरित्तप० अहक्खायचरित्तप० ९।

वेदपरिणामे णं भंते ! कइविहे पं० ?, गो० ! तिविहे पं०, तं०–इत्थिवेदपरिणामे, पुरिसवेदपरिणामे, नपुंसगवेदपरिणामे १०।

नेरइया गतिपरिणामेण निरयगतीया इंदियपरिणामेणं पंचिंदिया कसायपरिणामेणं कोहकसाईवि जाव लोभकसायीवि, लेसापरिणामेणं कण्हलेसावि नीललेसावि काउलेसावि, जोगपरिणामेणं मनजोगीवि वयजोगीवि कायजोगीवि, उवओगपरिणामेणं सागारोवउत्तावि अनागारोवउत्तावि, नाणपरिणामेणंण आभिनिबोहियनाणीवि सुयनाणीवि ओहिनाणीवि, अन्नाणपरिणामेणं मइअन्नाणीवि सुयअन्नाणीवि विभंगनाणीवि, दंसणपरिणामेणं सम्मादिट्ठीवि मिच्छादिट्ठीवि सम्मामिच्छादिट्ठीवि, चरित्तपरिणामेणं नो चरित्ती नो चरित्ताचरित्ती अचरित्ती, वेदपरिणामेणं नो इत्थीवेदगा नो पुरिसवेदगा नपुंसगवेदगा।

असुरकुमारावि एवं चेव, नवरं वेदगतिया कण्हलेसावि जाव तेउलेसावि, वेदपरिणामेणं इत्थिवेदगावि पुरिसवेदगावि नो नपुंसगवेदगा, सेसं तं चेव, एवं जाव थणियकुमारा। पुढविकाइया गतिपरिणामेणं तिरियगतिया इंदियपरिणामेणं एगिंदिया, सेसं जहा नेरइयाणं, नवरं लेसापरिणामेणं तेउलेसावि, जोगपरिणामेणं कायजोगी नाणपरिणामे नत्थि अन्नाणपरिणामेणं मतिअन्नाणी

सुयअन्नाणी दंसणपरिणामेणं मिच्छद्दिट्ठी, सेसं तं चेव,

आउवणप्फइकाइयावि, तेऊवाऊ एवं चेव, नवरं लेसापरिणामेणं जहा नेरइया, बेइंदिया गतिपरिणामेणं तिरियगतिया इंदियपरिणामेणं बेइंदिया, सेसं जहा नेरइयाणं, नवरं जोगपरिणामेणं वयजोगी कायजोगी, नाणपरिणामेणं आभिनिबोहियनाणीवि सुअनाणीवि अन्नाणपरिणामेणं मइअन्नाणीवि सुअअन्नाणीवि नो विभंगनाणी दंसणपरिणामेणं सम्मद्दिट्ठीवि मिच्छद्दिट्ठीवि नो सम्मामिच्छादिट्ठी। वि,। सेसं तं चेव, एवं जाव चउरिंदिया, नवरं इंदियपरिवुड्ढी कायव्वा।

पंचिंदियतिरिक्खजोणिया गतिपरिणामेणं तिरियगतिया, सेसं जहा नेरइयाणं, नवरं लेसापरिणामेणं जाव सुक्कलेसावि, चरित्तपरिणामेणं नो चरित्ती अचरित्तीवि चरित्ताचरित्तीवि, वेदपरिणामेणं इत्थिवेदगावि पुरिसवेदगावि नपुंसगवेदगावि।

मणुस्सा गतिपरिणामेणं मणुयगतिया इंदियपरिणामेणं पंचिंदिया अनिंदियावि कसायपरिणामेणं कोहकसाईवि जाव अकसाईवि, लेसापरिणामेणं कण्हलेसावि जाव अलेसावि, जोगपरिणामेणं मणजोगीवि जाव अजोगीवि, उवओगपरिणामेणं जहा नेरइया, नाणपरिणामेणं आभिनिबोहियनाणीवि जाव केवलनाणीवि, अन्नाणपरिणामेणंतिन्निवि अन्नाणा, दंसणपरिणामेणं तिन्निवि दंसणा, चरित्तपरिणामेणं चरित्तीवि अचरित्तीवि चरित्ताचरित्तीवि, वेदपरिणामेणं इत्थीवेयगावि पुरिसवेदगावि नपुंसगवेयगावि अवेयगावि।

वाणमंतरा गतिपरिणामेणं देवगतिया, जहा असुरकुमारा एवंजोइसियावि नवरं तेउलेसा, वेमाणियावि एवं चेव, नवरं लेसापरिणामेणं तेउलेसावि पम्हलेसावि सुक्कलेसावि, से तं जीवपरिणामे

वृ. 'गइपरिणामे णं भंते ! कइविहे पन्नत्ते' इत्यादि, पाठसिद्धं सम्प्रति नैरयिकादयो यैः परिणामविशेषैर्विशिष्यास्तान् तथा प्रतिपादयति–'नेरइया' इत्यादि, सुगमं, नवरं नैरयिकाणां कृष्णनीलकापोतरूपास्तिस्र एव लेश्या न शेषाः, ता पि तिस्रः पृथिवीक्रमेणैवं–आद्ययोर्द्वयोः पृथिव्योः कापोतलेश्या तृतीयस्यां कातोपलेश्या नीललश्या च चतुर्थ्यां नीललेश्या पञ्चम्यां नीललेश्या कृष्णलेश्या च षष्ठीसप्तम्योः कृष्णलेश्यैव, तत उक्तम्–'कण्हलेसावि नीललेसावि काउलेसावि'

तथा तिर्यक्पञ्चेन्द्रियमनुष्यव्यतिरेकेणान्यत्र चारित्रपरिणामः सर्वथा न भवति भवस्वाभाव्यात्, ततः कृतश्चारित्रपरिणामनिषेधः, वेदपरिणामचिन्तायां च नैरयिका नपुंसका एव न स्त्रियो नापि पुरुषाः, "नारकसम्मूर्छिनो नपुंसकानी" तिवचनात्, एवमसुरकुमाराणामपि, नवरं गतिमधिकृत्य देवगतिकास्तेषां च महर्द्धिकानां तेजोलेश्या अपि भवति, तत उक्तम्–'तेउलेस्सावि' इति, वेदपरिणामचिन्तायां स्त्रियः पुरुषा वा न नपुंसकाः, देवानां नपुंसकत्वस्यासम्भवात्,

तथा पृथिवीकायिकसूत्रे, नवरं 'लेसापरिणामेण'मित्यादि, इह पृथिव्यप्वनस्पतीनां तेजोलेश्यापि सम्भवति येन सौधर्मेशानपर्यन्तानां देवानामेतेषूत्पादसम्भवात् (वः), तत उक्तम्–'तेउलेसावि' इति, एतेषां च पृथिव्यादीनां पञ्चानामपि सासादनसम्यक्त्वमपि न भवति, आगमे निषेधात्, ततो ज्ञाननिषेधः सम्यक्त्वनिषेधश्च कृतः, सम्यग्मिथ्यात्वपरिणामस्तु संज्ञिपञ्चेन्द्रियाणामनेव भवति, न शेषाणामतस्तन्निषेधः, द्वीन्द्रियादीनां पुनः केषाञ्चित् करणापर्याप्तावस्थानां

सासादनसम्यक्त्वमवाप्यते ततस्ते ज्ञानपरिणता अपि सम्यग्दृष्टयोऽप्युक्ताः, तिर्यक्पञ्चेन्द्रियाणां च षडपि लेश्याः सम्भवन्ति, ततः सूत्रे उक्तम्–'जाव सुक्कलेसावि' इति, तथा देशतश्चारित्रपरिणामोऽपि तेषामुल्लसति तत उक्तम्–'चरित्ताचरित्तीवि' इति, तथा ज्योतिष्काणां तेजोलेश्यैव केवला न शेषा लेश्याः, ततोऽभिहितम्–'लेसापरिणामेणं तेउलेस्स' ।

मू. (४०८) *अजीवपरिणामे णं भंते ! कतिविधे पं० ?, गो० ! दसविधे पं०, तं०–बंधणपरिणामे १ गतिपरिणामे २ संठाणपरिणामे ३ भेदपरिणामे ४ वण्णपरिणामे ५ गंधपरिणामे ६ रसपरि० ७ फासपरिणामे ८ अगुरुलहुयपरिणामे ९ सद्दपरिणामे १०*

मू. (४०९) *बंधणपरिणामे णं भंते ! कतिविधे पं० ?, गो० ! दुविहे पं०, तं०–निद्धबंधणपरिणामे लुक्खबंधणपरिणामे य० ।*

वृ. 'बंधणपरिणामे णं भंते !' इत्यादि, स्निग्धबन्धनपरिणामश्च रुक्षबन्धनपरिणामश्च, तत्र स्निग्धस्य सतो बन्धनपरिणामः स्निग्धबन्धपरिणामः, तथा रूक्षस्य सतो बन्धनपरिणामः रूक्षबन्धनपरिणाम :, चशब्दौ स्वगतानेकभेदसूचकौ, अथ कथं स्निग्धस्य सतो बन्धनपरिणामो भवति कथं वा रूक्षस्य सत इति बन्धनपरिणामस्य लक्षणमाह–

मू. (४१०) *'समनिद्धयाए बंधो न होति समलुक्खयाएवि न होति ।*
वेनयणिद्धलुक्खत्तणेण बंधो उ खंधाणं ॥

वृ. 'समनिद्धयाए' इत्यादि, परस्परं समस्निग्धतायां–समगुणस्निग्धतायां तथा परस्परं समरूक्षतायां समगुणरूक्षतायां बन्धो न भवति, किन्तु यदि परस्परं स्निग्धत्वस्य रूक्षत्वस्य च विषममात्रा भवति तदा बन्धः स्कन्धानामुपजायते, इयमत्र भावना–समगुणस्निग्धस्य परमाण्वादेः समगुणस्निग्धेन परमाण्वादिना सह सम्बन्धो न भवति, तथा समगुणरूक्षस्यापि परमाण्वादेः समगुणरूक्षेण परमाण्वादीना सह सम्बन्धो न भवति, किन्तु यदि स्निग्धः स्निग्धेन रूक्षः रूक्षेण सह विषमगुणो भवति तदा विषममात्रत्वात् भवति तेषां परस्परं सम्बन्धः ।

मू. (४११) *निद्धस्स निद्धेणं दुयाहिएणं, लुक्खस्स लुक्खेणं दुयाहिणएणं ।*
निद्धस्स लुक्खेण उवेइ बंधो, जहन्नवज्जो विसमो समो वा ॥?

वृ. विषममात्रया बन्धो भवतीत्युक्तं ततो विषममात्रानिरूपणार्थमाह–'निद्धसस निद्धेण दुयाहिएणे' त्यादि, यदि स्निग्धस्य परमाण्वादेः स्निग्धगुणेनैव सह परमाण्वादिना बन्धो भवितुमर्हति तदा नियमात् द्व्यादिकाधिकगुणेनैव परमाण्वादिनेति भावः, रूक्षगुणस्यापि परमाण्वादेः रूक्षगुणेन परमाण्वादना सह यदि बन्धो भवति तदा तस्यापि तेन द्व्याद्यधिकादिगुणेनैव नान्यथा, यदा पुनः स्निग्धरूक्षयोर्बन्धस्तदा कथमिति चेत् ?, अत आह–'निद्धस्स लुक्खेणे' त्यादि, स्निग्धस्य रूक्षेण सह बन्ध उपैति–उपपद्यते जघन्यवर्जो विषमः समो वा, किमुक्तं भवति ?–एकगुणस्निग्धं एकगुणरूक्षं च मुक्त्वा शेषस्य द्विगुणस्निग्धादिद्विगुणरूक्षादिना सर्वेण बन्धो भवतीति ।

मू. (४१२) *गतिपरिणामे णं भंते ! कतिविधे पं० ? गो० ! दुविहे पं०, तं०–फुसमाणगतिपरिणामे य अफुसमाणगतिपरिणामे य, अहवा दीहगइपरिणामे य हस्सगइपरिणामे य २,*
संठाणपरिणामे णं भंते ! कतिविधे पं० ?, गो० ! पंचविधे पन्नत्ते, तं०–परिमंडल-

संठाणपरि० जाव आयतसंठाणपरिणामे ३, भेदपरिणामे णं भंते ! कतिविधे पं० ?, गो० ! पंचविधे पं०, तं०–खंडभेदपरि० जाव उक्कारिकाभेदपरि० ४,

वण्णपरिणामे णं भंते ! कतिविधे पं० ?, गो० ! पंचविधे पं०, तं०–कालवण्णप० जाव सुक्किलवण्णपरि० ५, गंधपरिणामे णं भंते ! कतिविधे पं० ?, गो० ! दुविहे पं०, तं०–सुब्भिगंधपरि० दुब्भिगंधपरिणामे य ६,

रसपरिणामे णं भंते ! कतिविधे पं० ?, गो० ! पंचविहे पं०, तं०–तित्तरसपरिणामे जाव महुररसपरिणामे ७, फासपरिणामे णं भंते ! कतिविधे पं० ?, गो० ! अट्ठविधे पं०, तं०–कक्खडफासपरिणामे य जाव लुक्खफासपरिणामे य ८, ।

अगुरुलहुयपरिणामे णं भंते कतिविहे पं०, ?, गो० ! एगागारे पं० ?, सद्दपरिणामे णं भंते ! कतिविहे पं० ?, गो० ! दुविहे पं० तंजहा–सुब्भिसद्दपरिणामे य दुब्भिसद्दपरिणामे य १०
सेत्तं अजीवपरिणामे य

वृ. उक्तो बन्धनपरिणामोऽधुना गतिपरिणाममाह–'गइपरिणामे णं भंते' इत्यादि, द्विविधो गतिपरिणामः, तद्यथा–स्पृशद्गतिपरिणामोऽस्पृशद्गतिपरिणामश्च, तत्र वस्तत्वनन्तरं स्पृशतो यो गतिपरिणामः स स्पृशद्गतिपरिणामो, यथा–'ठिक्करिकाया जलस्योपरि प्रयत्नेन तिर्यक्प्रक्षिप्तायाः, सा हि तथा प्रक्षिप्ता सती अपान्तराले जलं स्पृशन्ती २ गच्छति, बालजनप्रसिद्धमेतत्, तथाऽस्पृशतो गतिपरिणामोऽस्पृशद्गतिपरिणामः, यद्वस्तु न केनापि सहापान्तराले संस्पर्शनमनुभवति तस्यास्पृशद्गतिपरिणाम इति भावः, अन्ये तु व्याचक्षते–स्पृशद्गतिपरिणामो नाम येन प्रयत्नविशेषात् क्षेत्रप्रदेशान् स्पृशन् गच्छति, अस्पृशद्गतिपरिणामो येन क्षेत्रप्रदेशानस्पृशन्नेव गच्छति, तत्र बुध्यामहे, नभसः सर्वव्यापितया तत्प्रदेशसंस्पर्शव्यतिरेकेण गतेरसम्भवात्, बहुश्रुतेभ्यो वा परिभावनीयं, अत्रैव प्रकारान्तमाह–

'अहवा दीहगतिपरिणामे य रहस्सगइपरिणामे य' इति, अथवेति प्रकारान्तरे अन्यथा वा गतिपरिणामो द्विविधः, तद्यथा–दीर्घगतिपरिणामो ह्रस्वगतिपरिणामश्च, तत्र विप्रकृष्टदेशान्तरप्राप्तिपरिणामो दीर्घगतिपरिणामस्तद्विपरीतोह्रस्वगतिपरिणामः २, परिमण्डलादिसंस्थान-विशेषाः खण्डभेदादयश्च प्रागेव व्याख्याता इति न भूयो व्याख्यायन्ते, ३, अगुरुलघुपरिणामो भाषादिपुद्गलानां 'कम्मगमणभासाइं एयाइं अगुरुलहुयाइं' इति वचनात्, तथा अमूर्तद्रव्याणावाऽऽकाशादीनां, अगुरुलघुपरिणामग्रहणमुपहणमुपलक्षणं तेन गुरुलघुपरिणामोऽपि द्रष्टव्यः, स चौदारिकादिद्रव्याणां तैजसद्रव्यपर्यन्तानामवसेयः, "ओरालियवेउव्विय आहारगतेय गुरुलहू दव्वा" इति वचनात्, 'सुब्भिसद्दे' इति शुभशब्दः 'दुब्भिसद्दे' इति अशुभशब्दः ॥

पदं – १३ – समाप्तम्

पदं – १४ – "कषायं"

तदेवं व्याख्यातं त्रयोदशं पदमिदानीं चतुर्दशमारभ्यते–तस्य चायमभिसम्बन्धः, इहानन्तरपदे गत्यादिलक्षणो जीवपरिणाम उक्तः सामान्येन, सामान्यं च विशेषनिष्ठम्, अतः स

एव विशेषतः कश्चित् कत्रश्चित् प्रतपाद्यते, तत्रैकेन्द्रियाणामपि क्रोधादिकषायभावात् 'सकषायत्वाज्जीवः कर्मणो योग्यान् पुद्गलान् आदत्ते' इति वचनात् प्रधानबन्धहेतुत्वाच्चादावेव विशेषतः कषायपरिणाम- प्रतिपादनार्थमिदमाह भदन्त इत्यादि, तत्र वेदमादिसूत्रम्–

मू. (४१३) कति णं भंते! कसाया पन्नत्ता, गो० ! चत्तारि कसाया पं०, तं०–कोहकसाए मानकसाए मायाकसाए लोभकसाए, नेरइयाणं भंते! कतिकसाया पं० ?, गो० ! चत्तारि कसाया पं० ?, तं०–कोहकसाए जाव लोभकसाए, एवं जाव वेमाणियाणं।

वृ. 'कइ णं भंते ! कसाया' इत्यादि, कति–कियत्सङ्ख्याकाः [कषायाः] णमिति पूर्ववत्, भदन्त ! –परमकल्याणयोगिन् कषायाः प्रज्ञप्ताः, ? 'कृष विलेखने' कृषन्ति–विलिखन्ति कर्मरूपं क्षेत्रं सुखदुःखशस्योत्पादनायेति कषायाः, औणादिक आयप्रत्ययो निपातनाच्च क कारस्य अकारः, यदिवा कलुषयन्ति–शुद्धस्वभावं सन्तं कर्ममलिनं कुर्वन्ति जीवमिति कषायाः पूर्ववत् आयप्रत्ययः निपातनाच्च कलुषशब्दस्य णिजन्तस्य कषायादेशः उक्तं च–

॥ १ ॥ "सुहदुक्खबहुस्सइयं कम्मक्खेत्तं कसंति ते जम्हा।
कलुसंति जं च जीवं तेणं कसायत्ति वुच्चंति ॥"

–निर्वचनसूत्रं श्रुण्णार्थं, नैरयिकादिदण्डकसूत्रमपि सुगमं,–

मू. (४१४) कतिपतिट्ठिए णं भंते ! कोहे पं० ?, गो० ! चउपतिट्ठिए कोहे पं०, तं०–आयपतिट्ठिए परपतिट्ठिए तदुभयपतिट्ठिए अप्पइट्ठिते, एवं नेरइयाणं जाव वेमाणियाणं दंडतो, एवं माणेणं दंडतो मायाए दंडओ लोभेणं दंडओ।

कति(हिं) णं भंते! ठाणेहिं कोहुप्पत्ती भवति ?, गो० ! चउहिं ठाणेहिंकोहुप्पत्ती भवति, तं०–खेत्तं पडुच्च वत्थु पडुच्च सरीरं पडुच्च उवहिं पडुच्च, एवं नेरइयाणं जाव वेमाणियाणं। एवं माणेणवि मायाएवि लोभेणवि, एवं एतेवि चत्तारि दंडगा।

वृ. 'कइपइट्ठिए णं भंते !' इत्यादि, कतिषु–कियत्प्रकारेषु स्थानेषु प्रतिष्ठितो भदन्त ! क्रोधः ?, भगवानाह–चतुष्प्रतिष्ठितः, तद्यथा–आत्मप्रतिषअटित इत्यादि, आत्मन्येव प्रतिष्ठितः आत्मप्रतिष्ठितः, किमुक्तं भवति ? –स्वयमाचरितस्य ऐहिकं प्रत्ययायमवबुध्य कश्चिदात्मन एवोपरि क्रुध्यति तदा आत्मप्रतिष्ठितः क्रोध इति, यदा पर उदीरयति आक्रोशादिना कोपं तदा किल तद्विषयःक्रोध उपजायते इति स परप्रतिष्ठित इति, नैगमनयदर्शनमेतत्, नैगमनयो हि तद्विषय-*मात्रेणापि तत्प्रतिष्ठितं मन्यते यथा जीवे सम्यग्दर्शनमजीवे सम्यग्दर्शनमित्यादयोऽष्टौ भङ्गाः* सम्यग्दर्शनस्याधिकरणचिन्तायामावश्यके,

तदुभयप्रतिष्ठितः –आत्मपररूपोभयप्रतिष्ठितः, यदा कश्चित् तथाविधापराधवशादा-त्मपरविषयं क्रोधमाधत्ते इति, अप्रतिष्ठितो नाम यदैष स्वयं दुश्चरणमाक्रोशादिकं च कारणं विना निरालम्बन एव केवलक्रोधवेदनीयादुपजायते, स हि नात्मप्रतिष्ठितः स्वयं दुश्चरणाभावतः-स्वात्मविषयत्वाभावात्, नापि परप्रतिष्ठितः परस्यापि निरपराधतया अपराधसम्भावनाया अभावतः क्रोधालम्बनत्वायोगात्,

(तथा नोभयप्रतिष्ठितोऽपि) दृश्यते च कस्यापि कदाचिदेवमेव केवलक्रोधवेदनी-

योदयादुपजायमानः क्रोधः, तथा च स पश्चात् ब्रूते—अहो मे निष्कारणःकोपो नैव (कोऽपि) विरूपं भाषते न च किञ्चिद्विनाशयति, अत एवोक्तं पूर्वमहर्षिभिः—

॥ १ ॥ "सापेक्षाणि निरपेक्षाणि च कर्माणि फलविपाकेषु ।
सोपक्रमं निरुपक्रमं च दृष्टं यथाऽऽयुष्कम् ॥" इति,

एवं मानमायालोभा अपि आत्मपरोभयप्रतिष्ठिता अप्रतिष्ठिताश्च भावनीयाः ।

तदेवमधिकरणभेदेन भेद उक्तः, सम्प्रति कारणभेदतो भेदमाह—'कति (हिं) णं भंते ! ठाणेहिं कोहुप्पत्ती हवइ' इत्यादि, तिष्ठन्त्येभिरिति स्थानानि—कारणानि कतिभिः—कियत्सङ्ख्याकैः स्थानैः—कारणैः क्रोधोत्पत्तिर्भवति ?, भगवानाह—चतुर्भिः स्थानैः, तान्येव स्थानान्याह—'खेत्तं पडुच्च' इत्यादि, तत्र नैरयिकाणां नैरयिकक्षेत्रं प्रतीत्य तिरश्चां तिर्यक्क्षेत्रं प्रतीत्य मनुष्याणां मनुष्यक्षेत्रं देवानां देवक्षेत्रं 'वत्थुं पडुच्चे'ति वस्तु सचेतनमचेतनं वा शरीरं प्रतीत्य—दुःसंस्थितं विरूपं वा 'उपधिं प्रतीत्ये'ति यत् यस्योपकरणं तस्य तत् चीरकादिनाऽपह्रियमाणमन्यथा वा प्रतीत्य, एवं नैरयिकादिदण्डकसूत्रमपि,

सू. (४१५) कतिविधे णं भंते! कोधे पन्नत्ते ?, गो० ! चउव्विहे कोहे पं०, तं०—अनंताणुबंधि कोहे अपच्चक्खाणे कोहे पच्चक्खाणावरणे कोहे संजलणे कोहे, एवं नेरइयाणं जाव वेमाणियाणं । एवं माणेणं मायाए लोभेणं, एएवि चत्तारि दंडगा

वृ. सम्प्रति सम्यग्दर्शनादिगुणविघातित्वेन भेदमाह—सम्यक्त्वगुणविघातकृदनन्तानुबन्धी देशविरतिगुणविघाती अप्रत्याख्यानः सर्वविरतिगुणविघाती प्रत्याख्यानावरणः यथाख्यातचारित्रविघातकः संज्वलनः, एतांश्चतुरोऽपि नैरयिकादिदण्डकक्रमेणं चिन्तयति, एवं मानमायालोभा अपि प्रत्येकं चतुर्विधाः सामान्यतो दण्डकक्रमेण च भावनीयाः ।

सम्प्रत्येतेषामेव क्रोधादीनां निर्वृतिभेदतोऽवस्थाभेदतश्च भेदमाह—

सू. (४१६) कतिविधे णं भंते ! कोधे पं० ?, गो० ! चउव्विहे कोहे पं०, तंजहा—आभोगनिव्वत्तिए अनाभोगनिव्वत्तिए उवसंते अनुवसंते, एवं नेरइयाणं जाव वेमाणियाणं । एवं माणेणवि, मायाएवि, लोभेणवि, चत्तारि दंडगा ।

वृ. 'कइविहेणं भंते !' इत्यादि, यदा परस्यापराधं सम्यगवबुध्या कोपकारणं च व्यवहारतः पुष्टवलम्ब्य नान्यथाऽस्य शिक्षोपजायते इत्याभोग्य कोपं विधत्ते तदा स कोप आभोगनिर्वर्तितः, यदा त्वेवमेव तथाविधमुगूर्त्तवशाद्गुणदोषविचारणाशून्यः परवशीभूयं कोपं कुरुते तदा स कोपोऽनाभोगनिर्वर्तितः २ उपशान्तः—अनुदयावस्थः ३ अनुपशान्तः—उदयावस्थः ४, एवमेतद्विषयं दण्डकसूत्रमपि भावनीयं, एवं मानमायालोभाः प्रत्येकं चतुष्प्रकाराः सामान्यतो दण्डकक्रमेण च वेदितव्याः ।

सू. (४१७) जीवा णं भंते ! कतिहिं ठाणेहिं अट्ठ कम्मपगडीओ चिणिंसु ?, गो० ! चउहिं ठाणेहिं अट्ठ कम्मपगडिओ चिणिंसु तं०—कोहेणं माणेणं मायाए लोभेणं, एवं नेरइयाणं जाव वेमाणियाणं, जीवा णं भंते ! कतिहिं ठाणेहिं अट्ठ कम्मपगडीओ चिणंति ?, गो० ! चउहिं ठाणेहिं, तं०—कोहेणं माणेणं मायाए लोभेणं, एवं नेरइया जाव वेमाणिया ।

जीवा णं भंते ! कतिहिं ठाणेहिं अट्ठ कम्मपगडीओ चिणिस्संति ?, गो० ! चउहिं ठाणेहिं अट्ठ कम्मपगडीओ चिणिस्संति, तं०–कोहेणं माणेणं मायाए लोभेणं, एवं नेरइया जाव वेमाणिया

जीवा णं भंते ! कतिहिं ठाणेहिं अट्ठ कम्मपगडिओ उवचिणिंसु ?, गो० ! चउहिं ठाणेहिं अट्ठ कम्मपगडीओ उवचिणिंसु, तं०–कोहेणं माणेणं मायाए लोभेणं, एवं नेरइया जाव वेमाणिया, जीवा णं भंते ! पुच्छा, गो० ! चउहिं ठाणेहिं उवचिणंति जाव लोभेणं, एवं नेरइया जाव वेमाणिया, एवं उवचिणिस्संति ।

जीवा णं भंते ! कतिहिं ठाणेहिं अट्ठ कम्मपगडीओ बंधिसु ?, गो० ! चउहिं ठाणेहिं, अट्ठ कम्मपगडिओ बंधिंसु तं०–कोहेणं माणेणं जाव लोभेणं, एवं नेरइया जाव वेमाणिया, बंधिंसु बंधंति बंधिस्संति, उदीरेंसु उदीरंति उदीरिस्संति, वेदिंसु वेदेंति वेदइस्संति, निज्जरिंसु निज्जरेंति निज्जरिस्संति, एवं एते जीवाइया वेमाणियपज्जवसाणा अट्ठारस दंडगा जाव वेमाणिया, निज्जरिंसु निज्जरेंति निज्जरिस्संति० ।

वृ. सम्प्रति फलभेदेन कालत्रयवर्तिनां भेदमभिधातुकाम आह–'जीवा णं भंते ! कइहिं ठाणेहिं अट्ठ कम्मपगडीओ चिणिंसु' इत्यादि, जीवा भदन्त! कतिभिः स्थानैरष्टौ कर्मप्रकृतीश्चितवन्तः, चयनं नाम कषायपरिणतस्य कर्मपुद्गलोपादानात्रं, भगवानाह–गौतम! चतुर्भिः स्थानैस्तद्यथा–क्रोधेन मानेन मायया लोभेन, एवं नैरयिकादिदण्डकेऽपि वक्तव्यं, एष दण्डकोऽतीतकालविषयः, एवं वर्तमानकालभविष्यत्कालविषयावपि वाच्यौ, एवमुपचयबन्धोदीरणावेदननिर्जराविषया; प्रत्येकं त्रयस्त्रयो दण्डका वाच्या इति सर्वसङ्ख्यया अष्टादश दण्डकाः, तत्र उपचयो नाम स्वस्वाबाधाकालस्योपरि ज्ञानावरणीयादिकर्मपुद्गलानां वेदनार्थं निषेकः, स चैवं–

प्रथमस्थितौ सर्वप्रभूतं, द्वितीयस्यां स्थितौ विशेषहीनं, ततोऽपि तृतीयस्यां विशेषहीनं, एवं विशेषहीनं २ तावद्वाच्यं यावत्तत्तत्कालबध्यमानायाः स्थितेश्चरमा स्थितिरेतच्च सविस्तरं कर्मप्रकृतिटीकायां पञ्चसंग्रहटीकायां चाभिहितमिति ततोऽवधार्यं,

बन्धनं नाम–ज्ञानावरणीयादिकर्मपुद्गलानां यथोक्तप्रकारेणं स्वस्वाबाधाकालोत्तरकालं निषिक्तानां यद्भूयः कषायपरिणतिविशेषान्निकाचनं,

उदीरणं–उदीरणाकरणवशतः कर्मपुद्गलानामनुदयप्राप्तानामुदयावलिकायां प्रवेशनं, तदपि हि किञ्चित्तथाविधकषायपरिणतिवशाद्भवतीति 'चउहिं ठाणेहिं उदीरेंसु उदीरेन्ति उदीरिस्संती'त्युक्तम्, अन्यथा कषायव्यतिरेकेणापि क्षीणमोहोदये ज्ञानावरणादीनामुदीरका वर्त्तन्ते

वेदना–स्वस्वाबाधाकालक्षयादुदयप्राप्तस्य उदीरणाकरणेन वा उदयमुपनीतस्य कर्मण उपभोगः, निर्जरा–कर्मपुद्गलानामनुभूय २ अकर्मत्वापादनं, आत्मप्रदेशैः संश्लिष्टानां ज्ञानावरणीयादिकर्मपुद्गलानामनुभूय २ शातनमिति भावः, उक्तं च–''पुव्वकयकम्मसाडण निज्जरा'' इति, इयं च देशनिर्जरा द्रष्टव्या, कषायजित्वात्, न सर्वनिर्जरा, सा हि निष्कषायस्य सर्वनिरुद्धयोगस्य मोक्षप्रासादमधिरोहतो भवति, न शेषस्य, अत एव चतुर्विंशतिदण्डकसूत्रमपि अविरुद्धं, देशनिर्जरायाः सर्वकालं सर्वेषामपि भावात्, सम्प्रति यत् यत् पदमधिकृत्य प्राक् सूत्राण्युक्तानि तानि विनेयजनानुग्रहाय संग्रहणिगाथया निर्दिशति–

मू. (४१८) *आयपतिट्ठिया खेत्तं पडुच्चऽनंतानुबंधि आभोगे।*
चिण उवचिण बंध उदीर वेदतए निज्जरा चेव ॥ इति
–पन्नवणाए भगवईए कसायपयं समत्तं ॥

वृ. 'आयपतिट्ठिय' इत्यादि, प्रथमं सामान्यसूत्रं सुप्रतीतमिति न संगृहीतं, द्वितीयमात्मप्रतिष्ठितपदोपलक्षितं सूत्रं ततोऽनन्तानुबन्धिपदोपलक्षितं तदनन्तरमाभोगपदोपलक्षितं ततश्चयोपचयबन्धोदीरणवेदनानिर्जराविषयाणि क्रमेण सूत्राणि, अत्र चिणेति उपचयसूत्रोपलक्षणम्

पदं – १४ – समाप्तम्

मुनि दीपरत्न सागरेण संशोधिता सम्पादिता प्रज्ञापना उपाङ्ग सूत्रे चतुर्दश पदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता।

१५/१	चउत्थंउपाङ्गसूत्रं "प्रज्ञापना" भाः-१ समाप्तं

भागः-१० 'प्रज्ञापना'-पदानि १....१४ समाप्तानि
भागः ११ "प्रज्ञापना" पदानि १५...३६

नमो नमो निम्मल दंसणस्स
पञ्चम गणधर श्री सुधर्मास्वामिने नमः

१५ प्रज्ञापनाउपाङ्गसूत्रम्-२

(सटीकं)

चतुर्थम् उपाङ्गम्-२

(श्यामाचार्य संकलितं मूलसूत्रम् + मलयगिरिआचार्य विरचिता वृत्तिः)

पदं – १५ – "इन्द्रियं"

वृ. तदेवं व्याख्यातं चतुर्दशं. सम्प्रति पञ्चदशमारभ्यते–इहानन्तरपदे प्रधानबन्धहेतुत्वात् विशेषतः कषायपरिणाम उक्तः, तदनन्तरमिन्द्रियवतामेव लेश्यादिसद्भाव इति विशेषत इन्द्रिय-परिणामनिरूपणार्थमिदमारभ्यते, अत्र च द्वावुद्देशकौ, तत्र च प्रथमोद्देशके येऽर्थाधिकारास्त-त्संग्राहकमिदं गाथाद्वयं–

मू. (४१९) *संठाण बाहल्लं पोहत्तं कतिपदेस ओगाढे।*
अप्पाबहु पुट्ठ पविट्ठ विसय अनगार आहारे॥

वृ. 'संठाणं बाहल्लं' इत्यादि, प्रथममिन्द्रियाणां संस्थानं, संस्थानं नाम आकारविशेषः, ततो बाहल्यं वक्तव्यं, बाहल्यं नाम बहलता पिण्डत्वमिति भावः, तदनन्तरं पृथुत्वं वक्तव्यं, पृथुत्वं–विस्तारः, तदनन्तरं 'कतिपदेस'त्ति कतिप्रदेशमिन्द्रियमिति वक्तव्यं, तत ओगाढमिति–कतिप्रदेशावगाढमिन्द्रियमिति वाच्यं, तदनन्तरमवगाहनाविषयं कर्कशादिगुणविषयं चाल्पबहुत्वं, ततः 'पुट्ठ'त्ति स्पृष्टग्रहणमुपलक्षणं तेन स्पृष्टास्पृष्टविषयं सूत्रं वक्तव्यं तदनन्तरं 'पविट्ठ'त्ति प्रविष्टा-प्रविष्टविषयचिन्ताविषयं ततो विषयपरिमाणं ततोऽनगारविषयं सूत्रं तदनन्तरमाहारविषयं ततो लोकविषयं।

मू. (४२०) *अद्दाय असी य मणी दुद्ध पाणे तेल्ल फाणिय वसा य।*
कंबल थूणा थिग्गल दीवोदहि लोगऽलोगे य॥

वृ. तत 'अद्दाय'त्ति आदर्शविषयं तदनन्तरमसिविषयं ततो मणिविषयं ततो दुग्धोपलक्षितं ततः पानकविषयं ततस्तैलविषयं ततः फाणितविषयं तदनन्तरं वसाविषयं ततः कम्बलविषयं ततः स्थूणाविषयं तदनन्तरं 'थिग्गल'त्ति आकाशथिग्गलविषयं ततो द्वीपोदधिविषयं ततो लोकविषयं तदननन्तरमलोकविषयं इति।

तत्र संस्थानादिकमिन्द्रियाणां वक्तव्यमिति प्रथमत इन्द्रियविषयसूत्रमाह–

–: पदं – १५ – उद्देशकः – १ :–

मू. (४२१) *कति णं भंते ! इंदिया पं० ?, गो० ! पंच इंदिया पं०, तं०–सोतिंदिए*

चक्खिंदिए घाणिंदिए जिब्भिंदिए फासिंदिए, सोतिंदिए णं भंते ! किंसंठिए पं० ?, गो० ! कलंबुयापुप्फसंठाणसंठिते पं०, चक्खिंदिए णं भंते ! किंसंठिते पं० ?, गो० ! मसूरचंदसंठाणसंठिते पं०, घाणिंदिए णं भंते ! पुच्छा, गो० ! अइमुत्तगचंदसंठाणसंठिते, जिब्भिंदिए णं पुच्छा, गो० खुरप्पसंठाणसंठिते पं०, फासिंदिए णं पुच्छा गो० ! नानासंठाणसंठिते पं० १ ।

सोइंदिए णं भंते १ केवइयं बाहल्लेणं पं० !, गो० ! अंगुलस्स असंखेज्जइभागे बाहल्लेणं पं० २, स एवं जाव फासिंदिए सोतिंदिए णं भंते ! केवइतं पोहत्तेणं पन्नत्ते !, गो० ! अंगुलस्स असंखेज्जइभागं पोहत्तेणं पं०, एवं चक्खिंदिएवि घाणिंदिएवि, जिब्भिंदिए णं पुच्छा गो० ! अंगुलपुहुत्तेणं पं०, फासिंदिए णं पुच्छा गो० ! पसरीरप्पमाणमेत्ते पोहत्तेणं पं० ३ ।

सोतिंदिए णं भंते ! कतिपदेसिते पं० ? गो० ! अनंतपदेसिते पं०, एवं जाव फासिंदिए

वृ. 'कइ णं भंते ! इंदिया पन्नत्ता' इत्यादि, कति–कियत्सङ्ख्याकानि, णमिति वाक्यालङ्कारे, भदन्त ! इन्द्रियाणि प्राग्निरूपितशब्दार्थानि प्रज्ञप्तानि !, भगवानाह–गौतम ! पञ्चेन्द्रियाणि प्रज्ञप्तानि, तान्येव नामत आह–'सोइंदिए' इत्यादि, एतानि च पञ्चापीन्द्रियाणि द्विधा, तद्यथा–द्रव्यतो भावतश्च, तत्र द्रव्यतो निर्वृत्त्युपकरणरूपाणि भावतो लब्ध्युपयोगात्मकानि, आह च तत्त्वार्थसूत्रकृत–'निर्वृत्त्युपकरणे द्रव्येन्द्रियं, लब्ध्युपयोगौ भावेन्द्रियमिति,

तत्र निर्वृत्तिर्नाम प्रतिविशिष्टः संस्थानविशेषः, सापि द्विधा–बाह्या अभ्यन्तरा च, तत्र बाह्या पर्पटिकादिरूपा, सा च विचित्रा,, न प्रतिनियतरूपतयोपदेष्टुं शक्यते, तथाहि–मनुष्यस्य श्रोत्रे नेत्रयोरुभयपार्श्वतो भाविनी, भ्रुवौ चोपरितनश्रवणबन्धापेक्षया समे, वाजिनो नेत्रयोरुपरि तीक्ष्णे चाग्रभागे इत्यादि, जातिभोदान्नानाविधा, अभ्यन्तरा तु निर्वृतिः सर्वेषामपि जन्तूनां समाना, तामेव चाधिकृत्य वक्ष्यमाणानि संस्थानादिविषयाणि सूत्राणि, केवलं स्पर्शेन्द्रियस्य निर्वृतेर्बाह्याभ्यन्तरभेदो न प्रतिपत्तव्यः, पूर्वसूरिभिर्निषेधाद्, अत एव च बाह्यसंस्थानविषयमेव तत्सूत्रं वक्ष्यति–

'फासिंदिए णं भंते ! किंसंठाणसंठिए पन्नत्ते' इति, उपकरणं खड्गस्थानीयाया बाह्यनिर्वृतेर्या खड्गधारासमाना स्वच्छतरपुद्गलसमूहात्मिका, अभ्यन्तरा निर्वृतिस्तस्याः शक्तिविशेषः, इदं चोपकरणरूपं द्रव्येन्द्रियमान्तरनिर्वृतेः कथञ्चिदर्थान्तरं, शक्तिशक्तिमतोः कथञ्चिद्भेदात्, कथञ्चिद्भेदश्च सत्यामपि तस्यामान्तरनिर्वृतौ द्रव्यादिनोपकरणस्य विघातसम्भवात्, तथाहिसत्यामपि कदम्बपुष्पाद्याकृतिरूपायामान्तरनिर्वृतावतिकठोरतरघनगर्जितादिना शक्त्यपघाते सति न परिच्छेत्तुमीशते जन्तवः शब्दादिकमिति, भावेन्द्रियमपि द्विधालब्धिः उपयोगश्च, तत्र लब्धिः–श्रोत्रेन्द्रियादिविषयः सर्वात्मप्रदेशानां तदावरणक्षयोपशमः, उपयोगः–स्वस्वविषये लब्ध्यनुसारेणात्मनो व्यापारःप्रणिधानमाह ।

साम्प्रतमाभ्यन्तरांनिर्वतिमधिकृत्य संस्थानादि विचिन्तयिषुः प्रथमतः संस्थानं चिन्तयति–'सोइंदिए णं भंते ! किंसंठिए पन्नत्ते' इत्यादि पाठसिद्धं, अधुना बाहल्यं चिन्तयति–'सोइंदिए णं भंते ! केवइयं बाहल्लेणं पन्नत्ते' इत्यादि, इदमपि पाठसिद्धम्, उक्तश्चायमर्थोऽन्यत्रापि–''बाहल्लतो य सव्वाइं अंगुलअसंखभाग'' मिति । अत्राह–यद्यङ्गुलस्यासङ्ख्येयभागो बाहल्यं स्पर्शनेन्द्रियस्य ततः कथं खड्गक्षुरिकाद्यभिघाते अन्तः शरीरस्य वेदनानुभवः ?, तदेतदसमीचीनं, सम्यग्वस्तुतत्त्वा

परिज्ञानात्, त्वगिन्द्रियस्य विषयः शीतादयः स्पर्शा यथा चक्षुषो रूपं गन्धो घ्राणस्य, न च खड्गक्षुरिकाद्यभिधते अन्तः शरीरस्य शीतादिस्पर्शवेदनमस्ति, किन्तु केवलं दुःखवेदनं, तच्च दुःखरूपवेदनमात्मा सकलेनापि शरीरेणानुभवति न केवलेन त्वगिन्द्रियेणं ज्वरादिवेदनवत् ततो नकश्चिद्दोषः, अथ शीतलपानकादिपाने अन्तः शीतस्पर्शवेदनाप्यनुभूयते ततः कथं सा घटामटटयते इति ?, उच्यते, इह त्वगिन्द्रियं सर्वत्रापि प्रदेशपर्यन्तवर्त्ति विद्यते, तथा पूर्वसूरिभिर्व्याख्यानात्, तथा चाह मूलटीकाकारः–"सर्वप्रदेशपर्यन्तवर्तित्वात् त्वचोऽभ्यन्तरेऽपि शुषिरस्योपरित्वगिन्द्रियस्य भावादुपपद्यतेऽन्तः शीतस्पर्शवेदनानुभवः" ।

अधुना पृथकत्वविषयं सूत्रमाह–'सोइंदिए णं भंते ! केवइयं पोहत्तेणं पन्नत्ते" इत्यादि, इह पृथुत्वं स्पर्शनेन्द्रियव्यतिरेकेण शेषाणां चतुर्णामिन्द्रियाणामात्माङ्गुलेन प्रतिपत्तव्यं, स्पर्शनेन्द्रियस्य उच्छ्रयाङ्गुलेन, ननु देहाश्रितानीन्द्रियाणि देहश्चोच्छ्रयाङ्गुलेन प्रमीयते 'उस्सेहमाणतो मिणसु देह'मिति वचनात् तत इन्द्रियाण्यप्युच्छ्रयाङ्गुलेन मातुं युज्यन्ते नात्माङ्गुलेनेति, तदयुक्तम्, जिह्वादीनामुच्छ्रयाङ्गुलेन पृथुत्वप्रमित्यभ्युपगमे त्रिगव्यूतादीनां मनुष्यादीनां रसाग्रहणदेशोऽतिदूरवर्ती प्राप्तः, तथाहि–त्रिगव्यूतानां मनुष्याणां षड्गव्यूतानां च हस्त्यादीनां स्वस्वशरीरानुसारितया अतिविशालानि मुखानि जिह्वाश्च, ततो यद्युच्छ्रयाङ्गुलेन तेषा सुरप्राकारतयोक्तस्याभ्यन्तरनिर्वृत्त्यात्मकस्य जिह्वेन्द्रियस्याङ्गुलपृथकत्वलक्षणो विस्तारः परिगृह्यते तदाऽल्पतया न तत्सर्वां जिह्वां व्याप्नुयात्, सर्वव्यापित्वाभावे च योऽसौ बाहल्येन सर्वात्मना जिह्वाया रसवेदनलक्षणः प्रतिप्राणि प्रसिद्धो व्यवहारःस व्यवच्छेदमाप्नुयाद्, एवं घ्राणादिविषयेऽपि यथायोगं गन्धादिव्यवहारोच्छेदो भावनीयः, तस्मादात्माङ्गुलेन जिह्वादीनां पृथुत्वमवसेयं नोच्छ्रयाङ्गुलेनेति, आह च भाष्यकृत्–

॥ १ ॥ "इंदियमाणेवि तयं भयणिज्जं जं तिगाउयाईणं ।
जिब्भिंदियाइमाणं संववहारे विरुज्झेज्जा ॥"

अस्या अक्षरगमनिका–'तत्' उच्छ्रयाङ्गुलमिन्द्रियमानेऽपि आस्तामिन्द्रियविषयपरिमाणचिन्तायामित्यपिशब्दार्थः, 'भजनीयं' विकल्पनीयं, क्वापि न गृह्यते इत्यर्थः, किमुक्तं भवति स्पर्सनेन्द्रियपृथुत्वपरिमाणचिन्तायांग्राह्यमन्येन्द्रियपृथुत्वंपरिमाणचिन्तायां न ग्राह्यं, तेषामात्माङ्गुलेन परिमाणकरणात् इति;कथमेतदवसेयं इति चेत् ? अतआह–'यत्' यस्मात् सर्वेषामपि इन्द्रियाणां उच्छ्रयाङ्गुलेन परिमाणकणे त्रिगव्यूतादीनामादिशब्दात् द्विगव्यूतादिपरिग्रहो जिह्वेन्द्रियादिमानं सूत्रोक्तं संव्यवहारे विरुध्येत, यथा च विरुध्यते तथाऽनन्तरमेव भावितमिति

सम्प्रति कतिप्रदेशावगाहनाद्वारं प्रतिपादयति–

सू. (४२२) सोइंदिए णं भंते ! कतिपदेसोगाढे पं० ?, गो० ! असंखेज्जपएसोगाढे पं०, एवं जाव फासिंदिए ।

एएसि णं भंते ! सोतिंदियचक्खिंदियघाणिंदियजिब्भिंदियफासिंदियाणं ओगाहणट्ठयाए पएसट्ठयाए ओगाहणपएसट्ठयाए कतरे२हिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ?, गो० ! सव्वत्थोवे चक्खिंदिते ओगाहणट्ठयाते सोतिंदिए ओगाहणट्ठयाते संखेज्जगुणे घाणिंदिए ओगाहणट्ठयाते संखेज्जगुणे जिब्भिंदिए ओगाहणट्ठयाए असंखेज्जगुणे फासिंदिए ओगाहणट्ठयाए संखेज्जगुणे पदेसट्ठयाते सव्वत्थोवे चक्खिंदिए पदेसट्ठयाए सोतिंदिए पएसट्ठयाए संखेज्जगुणे घाणिंदिए

पएसट्ठयाए संखिज्जगुणे जिब्भिंदिए पएसट्ठयाए असंखेज्जगुणे फासिंदिए पएसट्ठयाए संखेज्जगुणे ओगाहणपदेसट्ठयाए सव्वत्थोवे चक्खिंदिए ओगाहणट्ठयाए सोतिंदिए ओगाहणट्ठयाए असंखेज्जगुणे घाणिंदिए ओगाहणट्ठयाए संखिज्जगुणे जिब्भिंदिए ओगाहणट्ठयाए असंखेज्जगुणे फासिंदिए ओगाहणट्ठयाए संखिज्जगुणे फासिंदियस्स ओगाहणट्ठयाहिंतो चक्खिंदिए पएसट्ठयाए अनंतगुणे सोतिंदिए पएसट्ठयाए संखेज्जगुणे घाणिंदिए पएसट्ठयाए संखिज्जगुणे जिब्भिंदिए पएसट्ठयाए असंखेज्जगुणे फासिंदिए पएसट्ठयाए संखेज्जगुणे,

सोतिंदियस्स णं भंते! केवइया कक्खडगुरुयगुणा पं० ?, गो० ! अनंता कक्खडगुरुयगुणा पं०, एवं जाव फासिंदियस्स, सोतिंदियस्स णं भंते ! केवइया मउयलहुयगुणा पं० ?, गो० !, अनंता मउयलहुयगुणा पं०, एवं जाव फासिंदियस्स। एतेसि णं भंते! सोइंदियचक्खिंदियघाणिंदिया-जिब्भिंदियफासिंदियाणं कक्खडगुरुयगुणाणं मउयलहुयगुणाण य कयरे२हिंतो अप्पा वा ४ ?,

गो० सव्वत्थोवा चक्खिंदियस्स कक्खडगरुयगुणा सोतिंदियस्स कक्खडगरुयगुणा अनंतगुणा घाणिंदियस्स कक्खडगरुयगुणा अणंतगुणा जिब्भिंदियस्स कक्खडगरुयगुणा अनंतगुणा फासिंदि- यस्स कक्खडगरुयगुणा अनंतगुणा, मउयलहुयगुणाणं सव्वत्थोवा फासिंदियस्स मउयलहुयगुणा जिब्भिंदियस्स मउयलहुयगुणा अनंतगुणा घाणिंदियस्स मउयलहुयगुणा अनंतगुणा सोतिंदियस्स मउयलहुयगुणा अनंतगुणा चक्खिंदियस्स मउयलहुयगुणा अनंतगुणा, कक्खडगरुयगुणाणं मउयलहुयगुणाण य सव्वत्थोवा चक्खिंदियस्स कक्खडगुरुयगुणा सोतिंदियस्स कक्खडगरुयगुणा अनंतगुणा घाणिंदियस्स कक्खडगरुयगुणा अणंतगुणा जिब्भिंदियस्स कक्खडगुरुयगुणा अनंतगुणा फासिंदियस्स कक्खडगरुयगुणा अनंतगुणा फासिंदियस्स कक्खडगुरुयगुणेहिंतो तस्स चेव मउयलहुयगुणा अनंतगुणा जिब्भिंदियस्स मउयलहुयगुणा अनंतगुणा घाणिंदियस्स मउयलहुयगुणा अनंतगुणा सोतिंदियस्स मउयलहुयगुणा अनंतगुणा चक्खिंदियस्स मउयलहुयगुणा अनंतगुणा

वृ. 'सोइंदिए णं भंते !' इत्यादि निगदसिद्धं, अल्पबहुत्वद्वारमाह–'एएसि णं भंते !' इत्यादि, सर्वस्तोकं चक्षुरिन्द्रियमवगाहनार्थतया, किमुक्तं भवति ?–सर्वस्तोकप्रदेशावगाढंचक्षुरिन्द्रियं, ततः श्रोत्रेन्द्रियमवगाहनार्थतया संख्येयगुणमतिप्रभूतेषु प्रदेशेषु तस्यावगाहनाभावात्, ततोऽपि घ्राणेन्द्रियमवगाहनारअथतया सङ्ख्येयगुणामतिप्रभूतेषु प्रदेशेषु तस्यावगाहनोपपत्तेः, ततोऽपि जिह्वेन्द्रियमवगाहनार्थतया असङ्ख्येयगुणां, तस्याङ्गुलपृथकत्वपरिमाणविस्तारात्मकत्वात्, यस्तु ध्यते पुस्तकेषु पाठः सङ्ख्येयगुणं इति सोऽपपाठो, युक्तत्यनुपपन्नत्वात्, तथाहि–

चक्षुरादीनि त्रीण्यपीन्द्रियाणि प्रत्येकमङ्गुलासङ्ख्येयभागविस्तारात्मकानि, जिह्वेन्द्रियं अङ्गुलपृथकत्वविस्तारमतोऽसङ्ख्येयगुणमेव तदुपपद्यते न तु सङ्ख्येयगुणमिति, ततः स्पर्शनेन्द्रियं सङ्ख्येयगुणं, तथाहि–अङ्गुलपृथकत्वप्रमाणविस्तारं जिह्वेन्द्रियं, पृथकत्वं द्विप्रभृत्यानवभ्यः स्पर्शनेन्द्रियं तु शरीरप्रमाणमिति सुमहदपि तदुपपद्यते सङ्ख्येयगुणमिति, यस्तु बहुषु पुस्तकेषु ध्यते पाठोऽसङ्ख्येयगुणमिति सोऽपपाठो, युक्तिविकलत्वात्, तथाहि–

आत्माङ्गुलपृथकत्वपरिमाणं जिह्वेन्द्रियं शरीरपरिमाणं तु स्पर्शनेन्द्रियं शरीरं तूत्कर्षतोऽपि

लक्षयोजनप्रमाणं ततः कथमसङ्ख्येयगुणमुपपद्यते इति ?, जनेनैव च क्रमेण प्रदेशार्थतयाऽपि सूत्रं भावनीयं, उक्तप्रकारेणैव चोभयसूत्रमपि, यानि कर्कशगुरुगुणादिसूत्राणि तानि पाठसिद्धानि, नवरमल्पबहुत्वसूत्रे चक्षुःश्रोत्रघ्राणजिह्वास्पर्शनेन्द्रियाणां यथोत्तरं कर्कशगुरुगुणा अमीषामेव पश्चानुपूर्व्या यथापूर्वं मृदुलघुगुणा अनन्तगुणास्तथैवो (वयथो)त्तरं कर्कशतया यथापूर्वं घातिकोमलतयोपलभ्यमानत्वात्, युगपदुभयाल्पबहुत्वसूत्रे फासिंदियकक्खडगुरुयगुणेहिंतो तस्स चेव मउयलहुयगुणा अनंतगुणा इति, शरीरे हि कतिपया एव प्रदेशा उपरिवर्त्तिनः शीतातपादिसम्पर्कतः कर्कशा वर्त्तन्ते अन्ये तु बहवस्तदन्तर्गता अपि मृदव इति घटन्ते स्पर्शनेन्द्रियस्य कर्कशगुरुगुणेभ्यो मृदुलघुगुणा अनन्तगुणा इति ।

अमून्येव संस्थानादीन्यल्पबहुत्वपर्यन्तानि द्वाराणि नैरयिकेषु चिन्तयति–

मू. (४२३) नेरइयाणं भंते ! कइ इंदिया पं० ?, गो० ! पंच, तं०–सोतिंदिए जाव फासिंदिए, नेरइयाणं भंते ! सोतिंदिए किंसंठिए पं० ?, गो० ! कलंबुयासंठाणसंठिते पं० ?, एवं जहा ओहियाणं वत्तव्वया भणिता तहेव नेरइयाणंपि जाव अप्पाबहुयाणि दोन्नि, नवरं नेरइयाणं भंते ! फासिंदिए किंसंठिए पं० ?, गो० ! दुविधे पं०, तं०– भवधारणिज्जे य उत्तरवेउव्विते य, तत्थ णं जे से भवधारणिज्जे से णं हुंडसंठाणसंठिते पं०, तत्थ णं जे से उत्तरवेउव्विते सेवि तहेव, सेसं तं चेव ॥

असुरकुमाराणं भंते ! कइ इंदिया पं० ?, गो० ! पंच, जहा ओहियाणि जाव अप्पाबहुगाणि दोन्निवि, नवरं फासिंदिए दुविधे पन्नत्ते, तं०–भवधारणिज्जे य उत्तरवेउव्विते य, तत्थ णं जे से भवधारणिज्जे से णं समचउरंससंठाणसंठिते पं०, तत्थ णं जे से उत्तरवेउव्विते से णं नानासंठाणसंठिते, सेसं तं चेव एवं जाव थणियकुमाराणं ॥

पुढविकाइयाणं भंते ! कति इंदिया पं० ?, गो० ! एगे फासिंदिए पं०, पुढविकाइयाणं भंते ! फासिंदिते किंसंठाणसंठिते पं० ?, गो० ! मसूरचंदसंठाणसंठिते पण्णत्ते, पुढविकाइयाणं भंते ! फासिंदिते केवइयं बाहल्लेणं पं० ?, गो० ! अंगुलस्स असंखेज्जइभागं बाहल्लेणं पं०, पुढविकाइयाणं भंते ! फासिंदिए केवतितं पोहत्तेणं पं० ?, गो० ! सरीरप्पमाणमेत्ते पोहत्तेणं, पुढविकाइयाणं भंते ! फासिंदिए कतिपदेसिते पं० ?, गो० ! अनंतपदेसिते पं०, पुढविकाइयाणं भंते ! फासिंदिते कतिपदेसोगाढे पं० ?, गो० ! असंखेज्जपएसोगाढे पं० ।

एतेसि णं भंते ! पुढविकाइयाणं फासिंदियस्स ओगाहणट्ठयाए पएसट्ठयाए ओगाहणपएसट्ठाए कयरे२हिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवे पुढविकाइयाणं फासिंदिए ओगाहणट्ठयाते ते चेव पदेसट्ठयाते अनंतगुणे, पुढविकाइयाणं भंते ! फासिंदियस्स केवइया कक्खडगरुयगुणा पं० ?, गो० ! अनंता, एवं मउयलहुयगुणावि, एतेसि णं भंते ! पुढविकाइयाणं फासिंदियस्स कक्खडगरुयगुणाणं मउयलहुयगुणाण य कयरे२हिंतो अ० ४ ?, गो० ! सव्वत्थोवा पुढविकाइयाणं फासिंदियस्स कक्खडगरुयगुणा तस्स चेव मउयलहुयगुणा अनंतगुणा ।

एवं आउकाइयाणवि जाव वणप्फइकाइयाणं, नवरं संठाणे इमो विसेसो दट्ठव्वो– आउकाइयाणं थिबुगबिंदुसंठाणसंठिते पं०, तेउकाइयाणं सूइकलावसंठाणसंठिते पं०, वाउकाइयाणं पडागासंठाणसंठिते पं०, वणप्फइकाइयाणं नानासेठामसंठिते पं० ।

बेइंदियाणं भंते! कति इंदिया पं० ?, गो० ! दो इंदिया पं०, तं०–जिब्भिंदिए फासिंदिए, दोण्हंपि इंदियाणं संठाणं बाहल्लं पोहत्तं पदेसं ओगाहणा य जहा ओहियाणं भणिता तहा भाणियव्वा, नवरं फासिंदिए हुंडसंठाणसंठिते पन्नत्तेत्ति इमो विसेसो,

एतेसि णं भंते! बेइंदियाणं जिब्भिंदियफासिंदियाणं ओगाहणट्ठयाते पदेसट्ठयाते ओगाहण-पदेसट्ठयाते कयरे२हिंतो अ० ४ ?, गो० ! सव्वत्थोव बेइंदियाणं जिब्भिंदिए ओगाहणट्ठयाते फासिंदिए ओगाहणट्ठयाते संखेज्जगुणे पदेसट्ठयाते सव्वत्थोवे बेइंदियाणं जिब्भिंदिते पएसट्ठयाए फासिंदिए संखेज्जगुणे ओगाहणपएसट्ठयाते सव्वत्थोवे बेइंदियास्स जिब्भिंदिए ओगाहणट्ठयाते फासिंदिए ओगाहणट्ठयाते संखेज्जगुणे फासिंदियस्स ओगाहणट्ठयातेहिंतो जिब्भिंदिए पएसट्ठयाते अनंतगुणा फासिंदिए पएसट्ठयाए संखेज्जगुणा, बेइंदियाणं भंते ! जिब्भिंदियस्स केवइया कक्खडगरुयगुणा पं० ? गो० ! अनंता, एवं फासिंदियस्सवि, एवं मउयलहुयगुणावि,

एतेसि णं भंते! बेइंदियाणं जिब्भिंदियफासिंदियाणं कक्खडगरुयगुणाणं मउयलहुयगुणाण कक्खडगुरुयगुणमउयलहुयगुणाण य कतरे२हिंतो अ० ४ ?, गो० ! सव्वत्थोवा बेइंदियाणं जिब्भिंदियस्स कक्खडगरुयगुणा फासिंदियस्स कक्खडगरुयगुणा अनंतगुणा, फासिंदियस्स कक्खडगरुयगुणेहिंतो तस्स चेव मउयलहुय० अनंतगुणा जिब्भिंदियस्स मउयलहुयगुणा अनंतगुणा, एवं जाव चउरिंदियत्ति, नवरं इंदियपरिवुड्ढी कातव्वा, तेइंदियाणं घाणिंदिए थोवे चउरिंदियाणं [illegible]

पंचिंदियतिरिक्खजोणियाणं मणूसाण य जहा नेरइयाणं, नवरं फासिंदिए छव्विहसंठाण-संठिते पं०, तं०–समचउरंसे निग्गोह परिमंडले सादी खुज्जे वामणे हुंडे ॥

वाणमंतरजोइसियवेमाणियाणं जहा असुरकुमाराणं

वृ. 'नेरइयाणं भंते !' इत्यादि सुगमं, नवरं 'नेरइयाणं भंते ! फासिंदिए किंसंठिए पन्नत्ते' इत्यादि, द्विविधं हि नैरयिकाणां शरीरं–भवधारणीयमुत्तरवैक्रियं च, तत्र भवधारणीयं तेषां भवस्वभावत एव निर्मूलविलुप्तपक्षोत्पाटितसकलग्रीवादिरोमपक्षिशरीरवत् अतिबीभत्ससंस्थानोपेतं, यदप्युत्तरवैक्रियं तदपि हुंडसंस्थानमेव, तथाहि–

यद्यपि ते वयमतिसुन्दरं शरीरं विकुर्विष्याम इत्यभिसन्धिना शरीरमारभन्ते तथापि तेषमत्यन्ताशुभतथाविधनामकर्मोदयादतीवाशुभतरमेवोपजायते इति। असुरकुमारसूत्रे भवधारणीयं समचतुरस्रसंस्थानं तथाभवस्वाभाव्यात्, उत्तरवैक्रियं तु नानासंस्थितं, स्वेच्छया तस्य निष्पत्तिभावात्। पृथिव्यादिविषयाणि तु सूत्राणि सुप्रतीतान्येव। समप्रति स्पृष्टद्वारमाह–

मू. (४२४) *पुट्ठाइं भंते ! सद्दाइं सुणेति अपुट्ठाइं सद्दाइं सुणेति ?, गो० ! पुट्ठाइं सद्दाइं सुणेति नो अपुट्ठाइं सद्दाइं सुणेति, पुट्ठाइं भंते ! रूवाइं पासति अपुट्ठाइं पासति ?, गो० ! नो पुट्ठाइं रूवाइं पासति, अपुट्ठाइं रूवाइं पासति,*

पुट्ठाइं भंते ! गंधाइं अग्घाइ अपुट्ठाइं गंधाइं अग्घाइ ?, गो० ! पुट्ठाइं गंधाइं अग्घाइ नो अपुट्ठाइं अग्घाइ, एवं रसाणवि फासाणवि, नवरं रसाइं अस्सादेति फासाइं पडिसंवेदेतीति अभिलावो कायव्वो ! पविट्ठाइं भंते ! सद्दाइं सुणेति अपविट्ठाइं सद्दाइं सुणेति ?, गो० ! पविट्ठाइं सद्दाइं सुणेति नो अपविट्ठाइं सद्दाइं सुणेति, एवं जहा पुट्ठाणि तहा पविट्ठाणिवि।

वृ. 'पुट्ठाइं भंते ! सद्दाइं सुणेति' इत्यादि, प्राकृतत्वात् सूत्रे शब्दस्य नपुंसकत्वं, अन्यथा पुंस्त्वं प्रतिपत्तव्यं, स्पृष्टान् भदन्त ! श्रोत्रेन्द्रियमिति कर्तृपदं सामर्थ्याल्लभ्यते शब्दान् शृणोति, तत्र स्पृश्यन्ते इति स्पृष्टास्तान् तनौ रेणुमिवालिङ्गितमात्रानित्यर्थः, 'पुट्ठं रेणुं व तणुंमि' इति वचनात्, शब्द्यन्ते-प्रतिपाद्यन्ते अर्था एभिरिति शब्दाः तान् शृणोति-गृह्णति उपलभते इतियावत्, किमुक्तं भवति ?-

स्पृष्टमात्राण्येव शब्दद्रव्याणि श्रोत्रेन्द्रियमुपलभते न तु घ्राणेन्द्रियादिवत् बद्धस्पृष्टानीति, कस्मादिति चेत्, उच्यते, इह शब्दद्रव्याणि घ्राणेन्द्रियादिविषयभूतेभ्यो द्रव्येभ्यः सूक्ष्माणि तथा बहूनि तथा तत्क्षेत्रभाविशब्दयोग्यद्रव्यवासकानि च, ततः सूक्ष्मत्वादतिप्रभूतत्वात्तदन्यद्रव्यवासकत्वाच्चात्मप्रदेशैः स्पृष्टमात्राण्यपि निर्वृतीन्द्रियमध्ये प्रविश्य झटित्युपकरणेन्द्रियमभिव्यञ्जयन्ति, श्रोत्रेन्द्रियं च घ्राणेन्द्रियाद्यपेक्षया स्वविषयपरिच्छेदे पटुतरं, ततः स्पृष्टमात्राण्यपि तानि श्रोत्रेन्द्रियमुपलभते, नास्पृष्टान्-सर्वथाऽऽत्मप्रदेशैः सम्बन्धमप्राप्तान्, श्रोत्रेन्द्रियस्य प्राप्तविषयपरिच्छेदस्वभावत्वात्, यथा च श्रोत्रेन्द्रियस्य प्राप्तकारिता तथा नन्द्यध्ययनीकादौ चर्चितमिति ततोऽवधार्यं,

'पुट्ठाइं भंते ! रूवाइं' इत्यादि सुगमं, निर्वचनमाह-गौतम ! न स्पृष्टानि रूपाणि पश्यति चक्षुः किन्त्वस्पृष्टानि, चक्षुषोऽप्राप्ताकारित्वात्, तद्धाप्राप्तकारित्वं तत्त्वार्थटीकादौ सविस्तरेण प्रसाधिततमिति ततोऽवधारणीयं, गन्धादिविषयाणि सूत्राणि सुप्रसिद्धानि, नवरं स्पृष्टान् गन्धान् आजिघ्रति इत्यादि यद्यप्युक्तं तथापि बद्धस्पृष्टानिति द्रष्टव्यम्, यत उक्तमावश्यकनिर्युक्तौ-

॥ १ ॥ "पुट्ठं सुणेइ सद्दं रूवं पुण पासई अपुट्ठं तु ।
गंधं रसं च फासं च बद्धपुट्ठं वियागरे ॥" इति,

तत्र स्पृष्टानिति पूर्ववत् बद्धानिति आत्मप्रदेशैरात्मीकृतान् 'बद्धमप्पीकयं पएसेहिं' इति वचनात्, विशेषणसमासश्च, बद्धाश्च ते स्पृष्टाश्च बद्धस्पृष्टास्तान्, इह स्पृष्टाः स्पर्शमात्रेणापि भवन्ति यथा शब्दस्ततः स्पर्शमात्रव्यवच्छेदेन स्पर्शविशेषप्रतिपत्तिरव्याहता स्यादिति बद्धग्रहणं, बद्धरूपा ये स्पृष्टास्तान् परिच्छिनत्ति, नान्यानि, कस्मादेवमिति चेत् ?, उच्यते,

गन्धादिद्रव्याणां बादरत्वात् अल्पत्वादभावुकत्वाच्च घ्राणादीन्द्रियाणामपि च श्रोत्रेन्द्रियापेक्षया मन्दशक्तिकत्वादिति । सम्प्रति प्रविष्टाप्रविष्टविषयचिन्तां कुर्वन्नाह-'पविट्ठाइं भंते ! सद्दाइं' इत्यादि पाठसिद्धं, नवरं स्पर्शस्तनौ रेणुरिवापि भवति प्रवेशो मुखे कवलस्येवेति शब्दार्थस्य भिन्नत्वात् भिन्नविषयता स्पृष्टप्रविष्टसूत्राणामिति । सम्प्रति विषयपरिमाणनिरूपणार्थमाह-

मू. (४२५) सोतिंदियस्स णं भंते ! केवतिए विसए पन्नत्ते ?, गो० ! जहन्नेणं अंगुलस्स असंखेज्जतिभागो उक्कोसेणं बारसहिं जोअणेहिं तो अच्छिण्णे पोग्गले पुट्ठे पविट्ठातिं सद्दातिं सुणेति,

चक्खिंदियस्स णं भंते ! केवतिए विसए पं० ?, गो० ! जहन्नेणं अंगुलस्स संखेज्जतिभागो उक्कोसेणं सातिरेगाओ जोयणसतसहस्साओ अच्छिन्ने पोग्गले अपुट्ठे अपविट्ठातिं रूवाइं पासइ,

घाणिंदियस्स पुच्छा, गो० ! जहण्णेणं अंगुलसंखेज्जतिभागो उक्कोसेणं नवहिं जोयणेहिंतो अच्छिन्ने पोग्गले पुट्ठे पविट्ठातिं गंधातिं अग्घाइ, एवं जिब्भिंदियस्सवि फासिंदियस्सवि ।

वृ. 'सोइंदियस्स णं भंते ! केवइए विसए पं०' इत्यादि, इह श्रोत्रादीनि प्राप्तविषयपरिच्छेदकत्वात् अङ्गुलासङ्ख्येयभागादप्यागतं शब्दादिद्रव्यं परिच्छिन्दन्ति, नयनं चाप्राप्तकारीति तत्

जघन्यतोऽङ्गुलसङ्ख्येयभागादव्यवहितं परिच्छिनत्ति, किमुक्तं भवति ?-जघन्यतोऽङ्गुलसङ्ख्येयभागमात्रे व्यवस्थितं पश्यति न तु ततोऽप्यर्वाक्तरमिति, प्रतिप्राणि प्रसिद्धश्चायमर्थः, तथा च नातिसन्निकृष्टमञ्जनरजोमलादिकं चक्षुः पश्यतीति, उक्तं च-

"अवरमसंखेज्जंगुलभागातो नयणवज्जाणं ॥ संखेज्जंगुलभागो नयणस्स" इति, उत्कर्षतस्तु श्रोत्रेन्द्रियं द्वादशभ्यो योजनेभ्यः आगतान् अच्छिन्नान्-अव्यवहितान् नान्यैः शब्दान्तरैर्वातादिकैर्वा प्रतिहतशक्तिकानित्यर्थः पुद्गलान्, अनेन पौद्गलिकः शब्दो नाम्बरगुण इति प्रतिपादितं, यथा च शब्दस्य पौद्गलिकता तथा तत्वार्थटीकायां प्रपञ्चितमिति न भूयः प्रपञ्चयते, स्पृष्टान्-स्पृष्टमात्रान् शब्दान् प्रविष्टान्-निर्वृतीन्द्रियमध्यप्रविष्टान् शृणोति न परतोऽप्यागतान्, कस्मादिति चेत् ?, उच्यते, परत आगतानां तेषां मन्दरपरिणामत्वभावात्,,

तथाहि-परत आगताः खलु ते शब्दपुद्गलास्तथास्वाभाव्यान्मन्दपरिणामास्तथोपजायन्ते येन स्वविषयं श्रोत्रज्ञानं नोत्पादयितुमीश्वराः, श्रोत्रेन्द्रियस्यापि च तथाविधं अद्भुततरं बलं न विद्यते येन परतोऽपि आगतान् शब्दान् शृणुयादिति, चक्षुरिन्द्रियमुत्कर्षतः सातिरेकात् योजनशतसहस्रादारभ्याच्छिन्नान कटकुट्यादिभिरव्यवहितान् पुद्गलान् अस्पृष्टान् दूरस्थितान् अत एवाप्रविष्टान् 'रूवाइं'ति रूपात्मकान् पश्यति, परतोऽव्यवहितस्यापि परिच्छेदे चक्षुषः शक्यत्वभावात्, तत्त्वङ्गुलमिह त्रिधा, तद्यथा- आत्माङ्गुलमुच्छ्रयाङ्गुलं प्रमाणाङ्गुलं च, तत्र

॥१॥ "जे णं जया मणूसा तेसिं जं होइ माणरूवं तु ।
तं भणियमिहायंगुलमणियमाणं पुण इमं तु ॥"
-इत्येवंरूपमात्माङ्गुलं-

॥१॥ "परमाणू तसरेणु रहरेणु अग्गयं च वालस्स ।
लिक्खा जूया य जवा, अट्ठगुणविवड्ढिया कमसो ॥"
-इत्यादिरूपमुच्छ्रयाङ्गुलं

॥१॥ तृतीयं- 'उस्सेहंगुलमेगं हवइ पमाणंगुलं सहस्सगुणं ।
तं चेवल दुगुणियं खलु वीरस्सायंगुलं भणियं ॥'

इत्येवं प्रमाणाङ्गुलं, तत्रात्माङ्गुलेन मीयते तत्काले वापीकूपादिकं वस्तु उच्छ्रयाङ्गुलेन नरतिर्यग्देवनैरयिकशरीराणि प्रमाणाङ्गुलेन पृथिवीविमानानि, उक्तं च-

॥१॥ "आयंगुलेण वत्थुं उस्सेहपमाणतो मिणसु देहं ।
नगपुढविविमाणाइं मिणसु पमाणंगुलेणं तु ॥"

तत्रेदमिन्द्रियविषयपरिमाणं किमात्माङ्गुलेनाहोश्चित् उच्छ्रयाङ्गुलेन उत प्रमाणाङ्गुलेन ?, उच्यते, आत्माङ्गुलेन, तथा चाह चक्षुरिन्द्रियविषयपरिमाणचिन्तायां भाष्यकृत्-

॥१॥ "अप्पत्तकारि नयणं मनो य नयनस्स विसयपरिमाणं ।
आयंगुलेण लक्खं अइरित्तं जोअणाणं तु ॥"

ननु देहप्रमाणमुच्छ्रयाङ्गुलेन तु क्रियते देहाश्रितानि चेन्द्रियाणि ततस्तेषां विषयपरिमाणमपि उच्छ्रयाङ्गुलेन कर्तुमुचितं, कथमुच्यते आत्माङ्गुलेनेति ?, नैष दोषः, यद्यपि हि नाम देहाश्रितानीन्द्रियाणि तथापि तेषां विषयपरिमाणमात्माङ्गुलेनैव देहादन्यत्वाद्विषयपरिमाणस्य, तथा

चामुमेवार्थमाक्षेपपुरस्सरं भाष्यकृदप्यायह–

॥ १ ॥ "नणु भणियमुस्सयंगुलपमाणतो जाव देहमाणाइ ।
देहपमाणं तं चिय नउ इंदियविसयपरिमाणं ॥"

अत्र 'देहपमाणं तं चिय' इति यत्तत्र उच्छ्रयाङ्गुलमेयत्वेनोक्तं तद् देहप्रमाणमात्रमेव, नत्विन्द्रियविषयपरिमाणं, तस्यात्माङ्गुलप्रमेयत्वादिति, अथ यदि विषयपरिमाणमिन्द्रियाणामुच्छ्रयाङ्गुलेन स्यात्ततः को दोष आपद्येत ?, उच्यते, पञ्चधनुःशतादिमनुष्याणां विषयव्यवहारव्यवच्छेदः, तथाहि–यद्भरतस्यात्माङ्गुलं तत्किलप्रमाणाङ्गुलं, तच्च प्रमाणाङ्गुलमुच्छ्रयाङ्गुलसहस्रेण भवति "उस्सेहंगुलमेगं हवइ पमाणंगुलं सहस्सगुण"मिति वचनात् ततो भरतसगरादिचक्रवर्त्तिनां या अयोध्यादयो नगर्यो ये तु स्कन्धावारा आत्माङ्गुलेन द्वादशयोजनायामतया सिद्धान्ते प्रसिद्धास्ते उच्छ्रयाङ्गुलप्रमिता अनेकानि योजनसहस्राणि स्युः,

तथा च सति तत्रायुधशालादिषु ताडितभेर्यादिशब्दश्रवणं न सर्वेषामापद्येत, "बारसहिं जोयणेहिं सोयं अभिगेण्हए सद्द"मिति वचनात् अथ समग्रनगरव्यापी समस्तस्कन्धावारव्यापी च विजयदक्कादिशब्दः [illegible] प्रतिपाद्यते [illegible], ततश्च [illegible] सिद्धः पञ्चधनुःशतादिमनुष्याणां विषयव्यवहारोच्छेदो मा प्रापदित्यात्माङ्गुलेनेन्द्रियाणां विषयपरिमाणमवसातव्यं नोच्छ्रयाङ्गुलेन, तथा चाह भाष्यकृत्–

॥ १ ॥ "जं तेणं पंच धनुसयनरादिविसयववहारवोच्छेओ ।
पावइ सहस्सगुणियं जेण पमाणंगुलं तत्तो ॥"

अत्र तस्मादात्माङ्गुलेनैवेन्द्रियाणां विषयपरिमाणं नोत्सेधाङ्गुलेनेति उपसंहारवाक्यं स्वतः परिभावनीयं, यदप्युक्तं प्राक् 'देहाश्रितानीन्द्रियाणीति तेषां विषयपरिमाणमुच्छ्रयाङ्गुलेने'ति, तदप्ययुक्तं, इन्द्रियाणामपि केषाञ्चित् पृथुत्वस्य आत्माङ्गुलेन मीयमानत्वाभ्युपगमात्, भावितं चैतत्प्रागपि इन्द्रियप्रतमाणचिन्तायां 'भयणिज्ज'मित्यादिभाष्यकारवचनावष्टम्भनेनेति, तस्मात् सर्वमिन्द्रियविषयपरिमाणमात्माङ्गुलेनैवेति स्थितं, ननु भवत्वात्माङ्गुलेन विषयपरिमाणं तथाप्यधिकृतसूत्रोक्तं चक्षुरिन्द्रियविषयपरिमाणं न घटते, अधिकस्यापि तद्विषयपरिमाणस्यागमान्तरे प्रतिपादनात्, तथाहि–पुष्करवरद्वीपार्द्धे मानुषोत्तरपर्वतसमीपवर्त्तिनो मनुष्याः कर्कसङ्क्रान्तौ प्रमाणाङ्गुलनिष्पन्नैः सातिरेकैरेकविंशतियोजनलक्षैर्व्यवस्थितमादित्यमवलोकमानाः प्रतिपाद्यन्ते शास्त्रान्तरे, तथा च तद्ग्रन्थः–

॥ १ ॥ "इगवीसं खलु लक्खा चउतीसं चेव तह सहस्साइं ।
तह पंचसया भणिया सत्तत्तीसाए अतिरित्ता ॥
॥ २ ॥ इय नयनविसयमाणं पुक्खरदीवद्धवासिमणुयाणं ।
पुव्वेण य अवरेण य पिहं पिहं होइ मणुयाणं ॥" इत्यादि

ततः कथमधिकृतसूत्रमात्माङ्गुलेनापि घटते ?, प्रमाणाङ्गुलेनापीव्यभिचारभावात्, उक्तं च–

॥ १ ॥ "लक्खेहिं एक्कवीसाए साइरेगेहिं पुक्खरद्धंमि ।
उदये पेच्छंति नरा सूरं उक्कोसए दिवसे ॥
॥ २ ॥ नयनिंदियस्स तम्हा विसयपमाणं जहा सुए भणियं ।

आउस्सेहपमाणंगुलाण एक्केणवि न जुत्तं ॥"

सत्यमेतत्, केवलमिदं सूत्रं प्रकाश्यविषय द्रष्टव्यं, न तु प्रकाशकविषयं, ततः प्रकाशकेऽधिकतरमपि विषयपरिमाणं न विरुध्यते इति न कश्चिद्दोषः, कथमेवंविधोऽर्थोऽवसीयते इति चेत् ?, उच्यते पूर्वसूरिकृतव्याख्यानात्, सकलमपि हि कालिकश्रुतं पूर्वसूरिकृतव्याख्यानानुसारेणैव व्याख्यानयन्ति महाधियो, न यथाऽक्षरमात्रसन्निवेशं, पूर्वगतसूत्रार्थसङ्ग्रहपरतया कालिकश्रुतस्य क्वचित्सङ्क्षिप्तस्याप्यर्थस्य महता विस्तरेण क्वचिद्विस्तरवतोऽपि संक्षेपेणाभिधाने अर्वाक्तनैः स्वमतियथावस्थितार्थतया ज्ञातुमशक्यत्वादत एवोक्तमिदमन्यत्र-

॥१॥ "जं जह भणियं सुत्ते तहेव जइ तं वियालणा नत्थि ।
किं कालियानुओगो दिट्ठो दिट्ठिप्पहाणेहिं ? ॥"

तस्मात् पूर्वसूरिकृतव्याख्यानान्नाधिकृतग्रन्थविरोधः, आह च भाष्यकृत-

॥१॥ "सुत्ताभिप्पाओऽयं पयसणिज्जे तयं नउ पयासे ।
वक्खाणाउ विसेसो नहि संदेहादलक्खणया ॥" इति

तथा घ्राणेन्द्रियजिह्वेन्द्रियस्पर्शनेन्द्रियाणि गन्धादीनुत्कर्षतो नवयोजनेभ्य आगतान् अच्छिन्नान्-द्रव्यान्तरैरप्रतिहतशक्तिकान् परिच्छिन्दन्ति न परत आगतान्, परत आगतानां मन्दपरिणामत्वभावात्, घ्राणेन्द्रियादीनां च तथारूपाणामपि दूरागतानां गन्धादिरूपाणामपितेषां परिच्छेदं कर्तुमशक्यत्वात्, आह च भाष्यकृत-

॥१॥ "बारसहिंतो सोत्तं सेसाणं नवहि जोयणेहिंतो ।
गिण्हंति पत्तमत्थं एत्तो परतो न गिण्हंति ॥
दव्वाण मंदपरिणामियाए परतो न इंदियबलंपि" इति

-इन्द्रियविषयाधिकारे इदमपि सूत्रम्-

मू. (४२६) *अनगारस्स णं भंते ! भावियप्पणो मारणंतियसमुग्घाएणं समोहयस्स जे चरमा निज्जरापोग्गला सुहुमा णं ते पोग्गला पन्नत्ता समणाउसो ! सव्वं लोगंपि य णं ते ओगाहित्ता णं चिट्ठंति ?, हंता ! गो० ! अनगारस्स भावियप्पणो मारणं तियसमुग्घाएणं समोहयस्स जे चरमा निज्जरापोग्गला सुहुमा णं ते पोग्गला पन्नत्ता समणाउसो ! सव्वं लोगंपि य णं ओगाहित्ता णं चिट्ठंति ।*

छउमत्थे णं भंते ! मणूसे तेसिं निज्जरापोग्गलाणं किं आणत्तं वा नाणत्तं वा ओमत्तं वा तुच्छत्तं वा गरुयत्तं वा लहुयत्तं वा जाणति पासति ?, गo ! नो इणट्ठे समट्ठे, से केणट्ठेणं भंते ! एवं वुच्चइ-छउमत्थे णं मणूसे तेसिं निज्जरापोग्गलाणं णो किंचि आणत्तं वा णाणत्तं वा ओमत्तं वा तुच्छत्तं वा गरुयत्तं वा लहुयत्तं वा जाणइ पासइ ?, देवेविय णं अत्थेगतिए जेणं तेसिं निज्जरापोग्गलाणं नो किंचि आणत्तं वा ओमत्तं वा तुच्छत्तं वा गरुयत्तं वा लहुयत्तं वा जाणति पासति, से तेणट्ठेणं गो० ! एवं वुच्चति-छउमत्थे णं मणूसे तेसिं निज्जरापोग्गलाणं नो किंचि आणत्तं वा जाव जाणति पासति, एवं सुहुमा णं ते पोग्गला पन्नत्ता समणाउसो !, सव्वलोगंपि य णं ते ओगाहित्ताणं चिट्ठंति । नेरइया णं भंते ! निज्जरापोग्गले किं जाणंति पासंति आहारेंति उदाहु न याणंति न पासंति आहारेंति ?, गो० ! नेरइया निज्जरापोग्गले न जाणंति न पासंति आहारेंति, एवं जाव

पंचिंदिय-तिरिक्खजोणियाणं,

मणूसा णं भंते ! ते निज्जरापोग्गले किं जाणंति पासंति आहारेंति उदाहु न याणंति न पासंति आहारेंति ?, गो० ! अत्थेगतिया जाणंति पासंति आहारेंति, अत्थेगतिया न याणंति न पासंति आहारेंति, से केणट्ठेणं भंते ! एवं वुच्चति—अत्थेगतिया जाणंति पासंति आहारेंति अत्थेगतिया न जाणंति न पासंति आहारेंति ?, गो० ! मणूसा दुविहा पन्नत्ता तंजहा—सण्णिभूया य असण्णिभूया य, तत्थ णं जे ते असण्णिभूया ते णं न याणंति न पासंति आहारेंति, तत्थ णं जे ते सण्णिभूया ते दुविहा पं०, तं०—उवउत्ता य अनुवउत्ता य, तत्थ णं जे ते अनुवउत्ता ते णं न याणंति न पासंति आहारेंति, तत्थ णं जे ते उवउत्ता ते णं जाणंति पासंति आहारेंति, से एएणट्ठेणं गो० ! एवं वुच्चइ—अत्थेगतिया न याणंति न पासंति आहारेंति, अत्थगतिया जाणंति पासंति आहारेंति ।

वाणमंतरजोइसिया जहा नेरइया । वेमाणिया णं भंते ! ते निज्जरापोग्गले कं जाणंति पासंति आहारेंति ?, जहा मणूसा, नवरं वेमाणिया दुविहा पं०, तं०—माइमिच्छद्दिट्ठीउववन्नगा य अमायिसम्मद्दिट्ठीउववन्नगा य, तत्थ णं जे ते माइमिच्छद्दिट्ठीउववन्नगा ते णं न याणंति न पासंति न आहारेंति, तत्थ णं जे ते अमायिसम्मद्दिट्ठिउववन्नगा ते दुविहा पं०, तं०—अनंतरोववण्णगा य परंपरोववण्णगा य, तत्थ णं जे ते अनंतरोववण्णगा ते णं न याणंति न पासंति आहारेंति, तत्थ णं जे ते परंपरोववण्णगा ते दुविहा पं०, तं०—पज्जत्तगा य अपज्जत्तगा य, तत्थ णं जे ते अपज्जत्तगा ते णं न जाणंति न पासंति आहारेंति, तत्थ णं जे ते पज्जत्तगा ते दुविहा पं०, तं०—उवउत्ता य अनुवउत्ता य, तत्थ णं जे ते अनुवउत्ता ते णं न याणंति न पासंति आहारेंति, तत्थ णं जे ते उवउत्ता ते णं जाणंति पासंति आहारेंति, से एतेणट्ठेणं गो० ! एवं वुच्चति—अत्थेगतिया याणंति जाव अत्थेगतिता आहारेंति

वृ. 'अनगारस्स णं भंते !' इत्यादि, न विद्यते अगारं—गृहं द्रव्यतो भावतश्च यस्यासावनगारः—संयतस्तस्य, णमिति वाक्यालङ्कारे भदन्त ! 'भावियप्पणो' इति भावितो—वासित आत्मा ज्ञानदर्शनचारित्रैस्तपोविशेषैश्च येन स भावितात्मा तस्य मारणान्तिकसमुद्घातेन समवहतस्य ये चरमाः—शैलेशीकालान्त्यसमयभाविनो निर्जारपुद्गलाः—अपगतकर्मभावाः परमाणवः 'सुहुमा णं ते पोग्गला' इति णमिति निश्चये निपातानामनेकार्थत्वात् निश्चितमेत्त 'सूक्ष्माः' चक्षुरादीन्द्रियपथमतिक्रान्तास्ते पुद्गलाः प्रज्ञप्ता भगवद्भिः हे श्रमण! आयुष्मन्, गौतमकृतं भगवतः सम्बोधनमेतत्, तथा निश्चितमेत्त सर्वलोकेऽपि पुद्गलाः स्पृष्टा णं वाक्यालङ्कृतौ तिष्ठन्ति ?, एवं गौतमेन प्रश्ने कृते भगवानाह— 'हंता ! गोयमा !' हन्तेति प्रत्यवधारणे एवमेवैतत् गौतम ! 'अणगारस्स णं भावियप्पणो' इत्यादि तदेवं पुनरपि प्रश्नः, 'छउमत्थे णं भंते' इत्यादि । अथ कोऽस्य प्रश्नस्यावकाशः ?,

उच्यते, इह प्रागुक्तं स्पृष्टानि प्रविष्टानि च शब्दाद्रव्याणि शृणोतीत्यादि, निर्जरापुद्गला अपि सर्वलोकस्पर्शिन इति तेषामपि श्रोत्रादिषु स्पर्शनप्रवेशौ न स्तः ? इति संशयस्तत्र प्रश्नः—छद्मस्थो भदन्त ! मनुष्यः, छद्मस्थग्रहणं केवलिव्युदासार्थं, केवली हि सर्वैरप्यात्मशरीरप्रदेशैः सर्वं जानाति पश्यति च, यथोक्तम्—''सव्वतो जाणइ केवली सव्वतो पासइ केवली'' स्तुतिकारोऽप्याह—''समन्ततः सर्वगुणं निरक्ष''मिति, छद्मस्थस्त्वक्षोपाङ्गनामकर्मविशेषसंस्कृतैरेवेन्द्रियद्वारैर्जानाति

पश्यति चेति छद्मस्थग्रहणं, अत एवेह छद्मस्थो विशिष्टावधिज्ञानविकलः परिगृह्यते, तेषां निर्जरापुद्गलानां 'आणत्त'मिति अन्यत्वं, द्वयोरनगारयोः सम्बन्धिनोर्यें निर्जरापुद्गलाः तेषां परस्परं भिन्नत्वमिति भावः 'नानात्वं' परनिरपेक्षमेकस्यैव वर्णादिकृतं वैचित्र्यं 'ओमत्वं' अवमता हीनत्वमितियावत् 'तुच्छत्वं' निःसारता 'गुरुलघुत्वे'प्रतीते, भगवानाह--

नायमर्थः समर्थः, नायमर्थो युक्त्युपपन्नः, छद्मस्थमनुष्यस्तेषां निर्जरापुद्गलानामन्यत्वादिकं जानाति पश्यति, अत्रैवार्थे प्रश्नमाह--'से केणट्ठेणं भंते' इत्यादि, सुगमं, भगवानाह--'देवेवि य ण'मित्यादि, देवोऽप्यस्तेयकः कश्चित्कर्मपुद्गलविषयावधिज्ञानविकलो यस्तेषां निर्जरापुद्गलानां न किञ्चिदप्यन्यत्वादिकं जानाति पश्यति वा, किमुक्तं भवति ? --देवानां किल मनुष्येभ्यः पटुतराणि इन्द्रियाणि विद्यन्ते, तत्र देवोऽपि तावन्न जानाति न पश्यति वा किमुत मनुष्य इति ?,

'से एएण'मित्याद्युपसंहारवाक्यं सुगमं, 'सुहुमा णं ते'इत्यादि, एतावन्मानेन सूक्ष्मास्ते पुद्गलाः निर्जरापुद्गलाः प्रज्ञप्ताः हे श्रमण! हे आयुष्मन्!, गौतमस्य भगवत्कृत सम्बोधनमेतत्, सर्वलोकमपि ते एवंरूपाः अत्यन्तसूक्ष्माः पुद्गलाः अवगाह्य तिष्ठन्ति पुद्गलाः न तु बादररूपाः, अन्यथा सांव्यवहारिकप्रत्यक्षविरोधप्रसक्तेः, सर्वलोकस्पर्शिनस्ते पुद्गलास्ततोऽयमपि प्रश्नः--'नेरइया णं भंते!' इत्यादि, नैरयिकास्तावत्तान् निर्जरापुद्गलानाहारयन्तीति सिद्धं, पुद्गलानां तत्तत्सामग्रीवशतो विचित्रपरिणमनस्वभावतया आहाररूपतयाऽपि तेषां परिणमनसम्भवात्, केवलमेतद् प्रष्टव्यं-- ते नैरयिका जानन्तीत्यादि, प्राकृतत्वात् क्रियाहेतुत्वेऽपि वर्त्तमाना, ततोऽयमर्थः--जानन्तः पश्यन्त आहारयन्ति उताजानन्तोऽपश्यन्त इति ?, भगवानाह--अजानन्तोऽपश्यन्त इति, कस्मादिति चेत् ?, उच्यते, तेषामतिसूक्ष्मतया चक्षुरादिपथातीतत्वात् नैरयिकाणां च कार्मणशरीर-पुद्गलालम्बनावधिज्ञानविकलत्वात्। एवमसुरकुमारादिविशयाण्यपि सूत्राणि तावत् वाच्यानि यावत्तिर्यक्पञ्चेन्द्रियसूत्रं।

मनुष्यसूत्रे 'सन्निभूया य' इति संज्ञिनो भूताः संज्ञिभूताः संज्ञित्वं प्राप्ता इत्यर्थः, तद्व्यतिरिक्ताः असंज्ञिभूताः, संज्ञी चेह विशिष्टावधिज्ञानी परिगृह्यते यस्य ते कार्मणशरीरपुद्गला विषयभावं बिभ्रति, शेषं सुगमं। वैमानिकसूत्रे 'मायीमिच्छद्दिट्ठी' इत्या, माया--तृतीयः कषायः साऽन्येषामपि कषायाणामुपलक्षणं माया विद्यते येषां ते मायिन उत्कटरागद्वेषा इत्यर्थः ते च ते मिथ्यादृष्टयश्च मायिमिथ्यादृष्टयस्तथारूपा उपपन्नका--उपपन्ना मायिमिथ्यादृष्टयुपपन्नकास्तद्विपरीता अमायिसम्यग्दृष्टयुपपन्नकाः, इह मायिमिथ्यादृष्टयुपपन्नकग्रहणेन नवमग्रैवेयकपर्यन्ताः परिगृह्यन्ते, यद्यप्यारातीयेष्वपि कल्पेषु ग्रैवेयकेषु च सम्यग्दृष्टयो देवाः सन्ति तथापि तेषामवधिर्न कार्मणशरीरपुद्गलविषय इति तेऽपि मायिमिथ्यादृष्टयुपपन्नका इव मायिमिथ्यादृष्टयुपपन्नका इत्युपमानतो मायिमिथ्यादृष्टयुपपन्नकशब्देनोच्यन्ते, ये त्वमायिसम्यग्दृष्टयुपपन्नकास्तेऽनुत्तरसुराः।

तेऽपि द्विविधा--तद्यथा--अनन्तरोपपन्नकाः परम्परोपपन्नकाश्च, अनन्तरम्--अव्यवधानेनोपपन्नकाः अनन्तरोपपन्नकाः उपपत्तिप्रथमसमयवर्तिन इत्यर्थः, परम्परया उपपन्नकाः परम्परोपपन्नकाः, उत्पत्त्यनन्तरं द्वित्रादिसमयवर्त्तिन इत्यर्थः, तत्रानन्तरोपपन्नका न जानन्ति न पश्यन्ति, तेषां एकसामयिकोपयोगासम्भवादपर्याप्तित्वाच्च, परम्परोपपन्नका अपि द्विधा--पर्याप्तका अपर्याप्तकाश्च, तत्रापर्याप्ता न जानन्ति न पश्यन्त्यपर्याप्तत्वेन सम्यगुपयोगासम्भवात्, पर्याप्ता

अपि द्विधा–उपयुक्ताः अनुपयुक्ताश्च, तत्रानुपयुक्ता न जानन्ति न पश्यन्तसामान्यरूपतया विशेषरूपतया वा परिच्छेदस्य प्रणिधानमन्तरेण कर्तुमशक्यत्वात्, ये तूपयुक्तास्ते जानन्ति पश्यन्ति च, कथमिति चेत् ?. उच्यते--इहावश्यके अवधिज्ञानविषयचिन्तायामिदमुक्तं–

"[illegible] कम्मदव्वेहिं पोग्गलेहिं अवधिं अवधिणा पासति"--कर्मद्रव्याणि–कर्मशरीरद्रव्याणि पश्यन् क्षेत्रतो लोकस्य सङ्ख्येयान् भागान् पश्यति, अनुत्तरसुराश्च सम्पूर्णां लोकनाडीं पश्यन्ति, "सम्भिन्नलोगनालिं पासंति अणुत्तरा देवा" इति वचनात्, ततस्ते उपयुक्ता जानन्ति पश्यन्ति चावधिज्ञानेन तान्निर्जरापुद्गलानिति, आहारयन्तीति च सर्वत्रापि लोमाहारेणेति प्रतिपत्तव्यं।

इन्द्रियाधिकारादयमपि प्रश्नः–

मू. *(४२७) अद्दायं पेहमाणे मणूसे अद्दायं पेहति अत्ताणं पेहइ पलिभागं पेहति ?, गो० अद्दायं पेहति नो अप्पाणं पेहति पलिभागं पेहति, एवं एतेणं अभिलावेणं असिं मणिं दुद्धं पाणं तेल्लं फाणियं वसं।*

वृ. 'अद्दायं पेहमाणे' इत्यादि, 'अद्दाय'मिति आदर्शं 'पेहमाणे' इति प्रेक्षमाणो मनुष्यः किमादर्शं प्रेक्षते आहोश्चिदात्मानं ?, अत्रात्मशब्देन शरीरमभिगृह्यते, उत 'पलिभाग'मिति प्रतिभागं प्रतिबिम्बं ?, भगवानाह–आदर्शं तावत् प्रेक्षत एव, तस्य स्फुटरूपस्य यथावस्थिततया तेनोपलम्भात्, आत्मानं–आत्मशरीरं पुनर्न पश्यति, तस्य तत्राभावात्,

स्वशरीरंहि स्वात्मनि व्यवस्थितं नादर्शे ततः कथमात्मशरीरं च तत्र पश्येदिति ?, प्रतिभागं–स्वशरीरस्य प्रतिबिम्बं पश्यति, अथ किमात्मकं प्रतिबिम्बं ?, उच्यते, छायापुद्गलात्मकं, तथाहि - सर्वमैन्द्रियकं वस्तु स्थूलं चयापचयधर्मकं रश्मिवच्च, रश्मय इति छायापुद्गलाः, व्यवह्रियन्ते च छायापुद्गलाः प्रत्यक्षत एव सिद्धाः, सर्वस्यापि स्थूलवस्तुनः छाया, अध्यक्षतः प्रतिप्राणि प्रतीतेः, अन्यच्च यदि स्थूलवस्तु व्यवहिततया दूरस्थिततया वा नादर्शादिष्ववगाढरश्मिर्भवति ततो न तत्र तद्दृश्यते तस्मादवसीयते सन्ति छायापुद्गला इति, ते च छायापुद्गलास्तत्तत्सामग्रीवशाद्विचित्रपरिणमनस्वभावास्तथाहि–

ते छायापुद्गला दिवा वस्त्वन्यभास्वरे प्रतिगताः सन्तः स्वसंबंधिद्रव्याकारमाबिभ्राणाः श्यामरूपतया परिणमन्ते निशि तु कृष्णाभाः, एतच्च प्रसरति दिवसे सूर्यकरनिकरे निशि तु चन्द्रोद्योते प्रत्यक्षत एव सिद्धं, त एव छायापरमाणवः आदर्शादिभास्वद्द्रव्यप्रतिगताः सन्तः स्वसंबंधिद्रव्याकारमादधानाः यादृग् वर्णःस्वसम्बन्धिनि द्रव्ये कृष्णो नीलः शितः पीतो वा तदाभाः परिणमन्ते, एतदप्यादर्शनादिष्वध्यक्षतः सिद्धं, ततोऽधिकृतसूत्रेऽपि ये मनुष्यस्य छायापरमाणव आदर्शमुपसंक्रम्य स्वदेहवर्णतया स्वदेहाकारतया च परिणमन्ते तेषां तत्रोपलब्धिर्न शरीरस्य, ते च प्रतिबिम्बशब्दा वाच्या अत उक्तं–न शरीरं पश्यति किन्तु प्रतिभागमिति, नैवैतत् स्वमनीषिकाविजृम्भितं, यत उक्तमागमे–

॥ १ ॥ "सामा उ दिया छाया अभासुरगता निसिं तु कालाभा।
सा चेव भासुरगया सदेहवण्णा मुणेयव्वा ॥

॥ २ ॥ जे आदरिसस्सन्तो देहावयवा हवंति संकंता।

तेसिं तत्थुवलंभो पगासजोगा न इयरेसिं ॥"

मूलटीकाकारोऽप्याह-"यस्मात् सर्वमेव हि ऐन्द्रियकं स्थूलं द्रव्यं चयापचयधर्मिकं रश्मिवच्च भवति, यतश्चादर्शादिषु छाया स्थूलस्य दृश्यते अवगाढरश्मिनः ततः स्थूलद्रव्यस्य कस्यचिद्दर्शनं भवति, न चान्तरितं दृश्यते किञ्चित् अतिदूरस्थं वा अतः 'पलिभागं' प्रतिभागं 'पेहति' पश्यतीति एवमसिमण्यादिविषयाण्यपि षट् सूत्राणि भावनीयानि, सूत्रपाठोऽप्येवम्- "असिं देहमाणे मणूसे किं असिं देहइ अत्ताणं देहइ पलिभागं देहइ ?" इत्यादि, गोयमा ! असिं देहइ नो अत्ताणे देहइ पलिभागं देहइ" इत्यादि ॥ इह निर्जरापुद्गलाः छद्मस्थानामिन्द्रियविषये न भवन्ति तेषामतीन्द्रियत्वादित्युक्तम्- तोऽतीन्द्रियप्रस्तावादिदमप्यतीन्द्रियविषयं प्रश्नमाह-

मू. (४२८) *कंबलसाडे णं भंते ! आवेढितपरिवेढिते समाणे जावतियं उवासंतरं फुसित्ता णं चिट्ठति विरल्लिएवि समाणे तावइयं चेव उवसंतरे फुस्ता णं चिट्ठति ?, हंता गो० ! कंबलसाडए णं आवेढियपरिवेढिते समाणे जावतियं तं चेव ।*

थूणा णं भंते ! उड्ढं ऊसिया समाणी जावइयं खेत्तं ओगाहइत्ता णं चिट्ठति, तिरियंपिअ णं आयता समाणी तावइयं चेव खेत्तं ओगाहइत्ता णं चिट्ठंति तिरियंपिअ णं आयता समाणी तावइयं चेव खेत्तं ओगाहित्ता चिट्ठंति, हंता गो० ! थूणा णं उड्ढं ऊसिया तं चेव चिट्ठंति ।

आगासथिग्गले णं भंते ! किंणा फुडे कइहिं वा काएहिं फुडे-किं धम्मत्थिकाएणं फुडे धम्मत्थिकायस्स देसेणं फुडे धम्मत्थिकायस्स पदेसेहिं फुडे, एवं अधम्मत्थिकाएणं आगासत्थिकाएणं, एएणं भेदेणं जाव पुढविकाएणं फुडे जाव तसकाएणं अद्धासमएणं फुडे ?, गो० ! धम्मत्थिकाएणं फुडे नो धम्मत्थिकायस्स देसेणं फुडे धम्मत्थिकायस्स पदेसेहिं फुडे, एवं अधम्मत्थिकाएणवि, नो आगासत्थिकाएणं फुडे आगासत्थिकायस्स देसेणं फुडे आगासत्थिकायस्स पदेसेहिं जाव वणस्सइकाएणं फुडे तसकाएणं सिय फुडे अद्धासमएणं देसे फुडे देसे नो फुडे ।

जंबुद्दीवे णं भंते ! दीवे किंणा फुडे कइहिं वा काएहिं पुडे, किं धम्मत्थिकाएणं जाव आगासत्थिकाएणं फुडे ?, गो० ! नो धम्मत्थिकाएणं फुडे धम्मत्थिकायस्स देसेणं फुडे धम्मत्थिकायस्स पदेसेहिं फुडे, एवं अधम्मत्थिकायस्सवि आगासत्थिकायस्सवि, पुढविकाइएणं फुडे, जाव वणस्सइकाएणं फुडे, तसकाइएणं फुडे सिय णो फुडे, अद्धासमएणं फुडे, एवं लवणसमुद्दे धायतिसंडे दीवे कालोए समुद्दे अब्भिंतरपुक्खरद्धे, बाहिरपुक्खरद्धे एवं चेव, नवरं अद्धासमएणं नो फुडे, एवं जाव सयंभूरमणसमुद्दे, एसा परिवाडी इमाहिं गाहाहिं अनुतंगव्वा तं०-

मू. (४२९) *"जंबुद्दीवे लवणे धायति कालोय पुक्खरे वरुणो ।*
खीरघयखोयणंदिय अरुणवरे कुंडले रुयते ॥

मू. (४३०) *आभरणवत्थगंधे उप्पलतिलए य पउमनिहिरयणे ।*
वासहरदहनईओ विजया वक्खारकप्पिदा ॥

मू. (४३१) *कुरु मंदर आवासा कूडा नक्खत्तचंदसूरा य ।*
देवे नागे जक्खे भूए य सयंभुरमणे य ॥

मू. (४३२) *एवं जहा बाहिरपुक्खरद्धे भणिए तहा जाव सयंभूरमणसमुद्दे जाव अद्धासमएणं नो फुडे लोगे णं भंते ! किंणा फुडे कइहिं वा काएहिं जहा आगासथिग्गले । अलोए णं भंते !*

किंणा फुडे कतिहिं वा काएहिं पुच्छा, गो० ! नो धम्मत्थिकाएणं फुडे जाव नो आगासत्थिकाएणं फुडे आगासत्थिकायस्स देसेणं फुडे, नो पुढविकाइएणं फुडे, जाव नो अद्धासमएणं फुडे, एगे अजीवदव्वदेसे अगुरुलहुए अनंतेहिं अगुरुलहुयगुणेहिं संजुत्ते सव्वागासअनंतभागूणे ॥

वृ. 'कंबलसाडए णं भंते !' इत्यादि, कम्बलशाटकः—कम्बलरूपः शाटकः कम्बलशाटक इति व्युत्पत्तेः आवेष्टितपरिवेष्टितः—गाढतरं संवेल्लितः, एवंभूतः सन् यावदवकाशान्तरं, यावत आकाशप्रदेशानित्यर्थः, 'स्पृष्टा' अवगाह्य तिष्ठति 'विरल्लिएवी'ति विरल्लितोऽपि विरलीकृतोऽपि तावदेवावकाशान्तरं—तावत एवाकाशप्रदेशान् स्पृष्ट्वा तिष्ठति ?, भगवानाह—'हंता गोयमा !' इत्यादि, हंतेति प्रत्यवधारणं, एवमेतत् गौतम ! यत् 'कम्बलसाडए णं' इत्यादि, तदेवं एषोऽत्र सङ्क्षेपार्थः—यावत एवाकाशप्रदेशान् संवेल्लितः सन् कम्बलशाटकोऽवगाह्यावतिष्ठते तावत एवाकाशप्रदेशान् ततोऽप्यवगाह्यावतिष्ठते, केवलं घनप्रतरमात्रकृतो विशेषः, प्रदेशसङ्ख्या तूभयत्रापि तुल्या, उक्तश्चायमर्थोऽन्यत्रापि नेत्रपटमधिकृत्य—

"जह खलु महप्पमाणो नेत्तपडो कोडिओ म(न)इग्गंमि ।
तंमिवि तावइए च्चिय फुसइ पएसे (विरलिएवि)" इति ।

एवं स्थूणासूत्रमपि भावनीयं । 'आगासथिग्गले णं भंते !' इत्यादि, आकाशथिग्गलं लोकः, स हि महतो बहिराकाशस्य विततपटस्य थिग्गलमिव प्रतिभाति, भदन्त ! केन 'स्पृष्टो' व्याप्तः, एतत्सामस्त्येन पृष्टमेतदेव विशेषतः प्रश्नयति—'कतिभिः' कियत्सङ्ख्याकैः कायैः स्पृष्टः, वाशब्दः पक्षान्तारद्योतनार्थः, प्रकारान्तरं च सामान्याद्विशेषतः, तान् कायान् प्रत्येकं पृच्छति—'किं धम्मत्थिकाएणं फुडे !' इत्यादि सुगमं, भगवानाह—गौतम ! धर्मास्तिकायेन स्पृष्टः, धर्मास्तिकायस्य सर्वात्मना तत्रावगाढत्वात्, अत एव नो धर्मास्तिकायस्य देशेन स्पृष्टो, यो हि येन सर्वात्मना व्याप्तो नासौ तस्यैव देशेन व्याप्तो भवति, विरोधात्, प्रदेशैस्तु व्याप्तः, सर्वेषामपि धर्म्मास्तिकायप्रदेशानां तत्रावगाढत्वात्, एवमधर्मास्तिकायविषयेऽपि निर्वचनं वाच्यं, तथा नो आकाशास्तिकायेन सकलेन द्रव्येण स्पृष्टः, आकाशास्तिकायदेशमात्रत्वाल्लोकस्य, किन्तु देशेन व्याप्तः, प्रदेशैश्च पृथिव्यादयोऽपि सूक्ष्माः सकललोकापन्ना वर्त्तन्ते ततस्तैरपि सर्वात्मना व्याप्तः, 'तसकाएणं सिय फुडे' इति, यदा केवलीसमुद्घातं गतः सन् चतुर्थे समये वर्त्तते तदा तेन स्वप्रदेशैः सकललोकपूरणात् त्रसकायेन स्पृष्टः, केवलिनश्च सकायत्वात्, सेषकालं तु न स्पृष्टः, सर्वत्र त्रसकायाना म भावात्,

एवं जम्बूद्वीपादिविषयाण्यपि सूत्राणि भावनीयानि, नवरं बहिः पुष्करार्द्धचिन्तायां 'अद्धासमएणं न फुडे' इति, अद्धासमयो ह्यर्द्धतृतीयद्वीपसमुद्रान्तर्वर्त्ती न बहिः, एतच्च धर्म्मसङ्ग्रहणिटीकायां भावितं, ततो बहिर्द्वीपसमुद्राणामद्धासमयस्पर्शनप्रतिषेधः, 'जंबुद्दीवे लवणे' गाहा, सर्वद्वीपसमुद्राणामभ्यन्तरवर्त्ती जम्बूद्वीपस्तत्परिक्षेपी लवणसमुद्रस्तदनन्तरं धातकीखण्डाभिधानो द्वीपस्ततः कालोदः समुद्रः तदनन्तरं पुष्करवरो द्वीपः, अत ऊर्ध्वं द्वीपसदृशनामानः समुद्राः, ततः पुष्करवरसमुद्रः तदनन्तरं वरुणवरो द्वीपो वरुणवरः समुद्रः क्षीरवरो द्वीपः क्षीरोदः समुद्रः, घृतवरो द्वीपो घृतोदः समुद्रः, इक्षुवरो द्वीपो इक्षुवरः समुद्रः, नन्दीश्वरो द्वीपो नन्दीश्वरः समुद्रः, एतेऽष्टावपि च समुद्रा एकप्रत्यवताराः, एकैकरूपा इति भावः,

अत ऊर्ध्वं द्वीपाः समुद्राश्च त्रिप्रत्यवताराः, तद्यथा—अरुण इति अरुणोऽरुणवरो अरुण-

वरावभासः कुण्डलः कुण्डलवरः कुण्डलवरावभासः रुचको रुचकवरो रुचकवरावभास इत्यादि, चात्र क्रमः–नन्दीश्वरसमुद्रानन्तरं अरुणो द्वीपोऽरुणः समुद्रः, ततोऽरुणवरो द्वीपोऽरुणवरः समुद्र इत्यादि, एष चात्र क्रमः–नन्दीश्वरसमुद्रानन्तरं अरुणो द्वीपोऽरुणः समुद्रः, ततोऽरुणवरो द्वीपो।ऽरुणवरः समुद्र इत्यादि, कियन्तः खलु नामग्राहं द्वीपसमुद्राः वक्तुं शक्यन्ते ? ततस्तन्नामसङ्ग्रहमाह–'आभरणवत्थे'त्यादिगाथाद्वयं, यानि कानिचिदाभरणनामानि–हारार्द्धहाररत्नावलिक-नकावलिप्रभृतीनि यानि च वस्तरनामानि–चीनांशुकप्रभृतीनि यानि च गन्धनामानि–कोष्ठपुटादीनि यानि चोत्पलानामानि–जलरुहचन्द्रोद्योतप्रमुखानि यानि च तिलकप्रभृतीनि वृक्षनामानि यानि च पद्मनामानि–शतपत्रसहस्रपत्रप्रभृतीनि

यानि च पृथिवीनामानि–पृथिवीरत्नशर्करावालुकेत्यादीनि यानि च नवानां निधीनां चतुर्दशानां चक्रवर्त्तिरत्नानां क्षुल्लहिमवदादिकानां वर्षधरपर्वतादीनां पद्मादीनां ह्रदानां गङ्गासिन्धुप्रभृतीनां नदीनां कच्छादीनां विजयानां माल्यवदादीनां वक्षस्कारपर्वतानां सौधर्म्मादीनां कल्पानां शक्रादीनामिन्द्राणां देवकुरुउत्तरकुरुमन्दराणामावासानां–शक्रादिसम्बन्धिनां मेरुप्रत्यासन्नदीनां कूटानां क्षुल्लहिमवदादिसम्बन्धिनां नक्षत्राणां कृत्तिकादीनां चन्द्राणां सूर्याणां च नामानि तानि सर्वाण्यपि द्वीपसमुद्राणां त्रिप्रत्यवतारणि वक्तव्यानि, तद्यथा–

हारो द्वीपो हारः समुद्रः हारवरो द्वीपो हारवरः समुद्रः हारवरावभासो द्वीपो हारवरावभासः समुद्र इत्यादिना प्रकारेण त्रिप्रत्यवतारास्तावद् वक्तव्याः यावत् सूर्यो द्वीपः सूर्यस्समुद्रः सूर्यवरो द्वीपः सूर्यवरस्समुद्रः सूर्यवरावभासो द्वीपः सूर्यवरावभासः समुद्रः, उक्तं च जीवाभिगमचूर्णौ–"अरुणाई दीवसमुद्दा तिपडोयारा यावत् सूर्यवरावभासः समुद्रः" ततः सूर्यवरावभासपरिक्षेपी देवो द्वीपस्ततो देवः समुद्रः, तदनन्तरं नागो द्वीपो नागः समुद्रः, ततो यक्षो द्वीपो यक्षः समुद्रः, ततो भूतो द्वीपो भूतः समुद्रः, स्वयम्भूरमणो द्वीपः स्वयम्भूरमणः समुद्रः, एते पञ्च देवादयो द्वीपाः पञ्च देवादयः समुद्राः एकरूपाः, न पुनरेषां प्रत्यवतारः, उक्तं च जीवाभिगमचूर्णौ – 'एते पञ्च द्वीपाः पञ्च समुद्रा एकप्रकारा' इति, जीवाभिगमसूत्रेऽप्युक्तम्–"देवे नागे जक्खेभूए संयंभूरमणे य एक्केक्को चेव भाणियव्वो, तिपडोयारं नत्थिति" इति। पूर्वमाकाशस्थिग्गलशब्देन लोकः पृष्टोऽधुना लोकशब्देनैव तं पिपृच्छिषुराह–

'लोए णं भंते ! किंणा फुडे'इत्यादि, पाठसिद्धं, अलोकसूत्रमपि पाठसिद्धं, नवरं 'एगे अजीवदव्वदेसे' इति अलोक एकोऽजीवद्रव्यदेशः, आकाशास्तिकायस्य देश इत्यर्थः, परिपूर्णस्त्वाकाशास्तिकायो न भवति, लोकाकाशेन हीनत्वात्, अत एवागुरुलघुकोऽमूर्त्तत्वात्, अनन्तैरगुरुलघुकगुणैः संयुक्तः, प्रतिप्रदेशं स्वपरभेदभिन्नानामनन्तानामगुरुलघुपर्यायाणां भावात्, किंप्रमाणः सोऽलोक इति चेत्, अत आह–सर्वाकाशमनन्त भागेनं–लोकाकाशमात्रखण्डहीनं सकलाकाशप्रमाणं इति भावः ॥

पदं – १५, उद्देशकः – १ – समाप्तः

–: पदं – १५, उद्देशकः – २ :–

मू. व्याख्यातः प्रथमः उद्देशकः, सम्प्रति द्वितीय आरभ्यते–तत्रेदमादावर्थाधिकारसङ्ग्राहकं गाथाद्वयं–

मू. (४३३) इंदियउवचय १ निव्वत्तणा २ य समया भवे असंखेज्जा ३ ।
लद्धी ४ उवओगद्धं ५ अप्पाबहुए विसेसहिया ॥

वृ. 'इंदियउवचय' इत्यादि, प्रथमत इन्द्रियाणामुपचयो वक्तव्यः, उपचीयते–उपचयं नीयते इन्द्रियमनेनेत्युपचयः–इन्द्रियप्रायोग्यपुद्गलसङ्ग्रहणसम्पत्, इन्द्रियपर्याप्तिरित्यर्थः, तनन्तरं निर्वर्त्तना वक्तव्या, निर्वर्त्तना नाम बाह्याभ्यन्तरूपा या निर्वृत्तिः–आकारमात्रस्य निष्पादनं, तदनन्तरं सा निर्वर्त्तना कतिसमया भवतीति प्रश्नेऽसङ्ख्येयाः समयास्तस्या भवेयुरिति निर्वचनं वाच्यं,

तत इन्द्रियाणां लब्धिः–तदावरणकर्मक्षयोपशमरूपा वक्तव्या, तत उपयोगाद्धा, तदनन्तरमल्पबहुत्वे चिन्त्यमाने पूर्वस्याः पूर्वस्याः उत्तरोत्तरा उपयोगाद्धा विशेषाधिका वक्तव्या,

मू. (४३४) ओगाहणा ६ अवाए ७ ईहा ८ तह वंजणोग्गहे ९–१० चेव ।
दव्विंदिय ११ भाविंदिय १२ तीया बद्धा पुरक्खडिया ॥

वृ. 'ओगाहणा' इति अवग्रहणं–परिच्छेदो वक्तव्यः, स च परिच्छेदोऽपायादिभेदादनेकधेति तदनन्तरमपायो वक्तव्यः, तत ईहा, तदनन्तरं व्यञ्जनावग्रहः, घशब्दस्यानुक्तार्थसमुच्चायकत्वादर्थावग्रहश्च वक्तव्यः, तदनन्तरं द्रव्येन्द्रियभावेन्द्रियसूत्रं, ततोऽतीतबद्धपुरस्कृतानि द्रव्येन्द्रियाणि तदनन्तरं भावेन्द्रियाणि च चिन्तनीयानि ।

मू. (४३५) कतिविहे णं भंते ! इंदियउवचए पं०, गो० ! पंचविहे इंदियउवचए पं० ?, तं०–सोतिंदिए उवचते चक्खिंदिए उवचते घाणिंदिए उवचते जिब्भिंदिए उवचते फासिंदिए उवचते । नेरइयाणं भंते ! कतिविहे इंदिओवचए पं० ?, गो० ! पंचविहे इंदिओवचए पं०, तं०–सोतिंदिओवचए जाव फासिंदिओवचए, एवं जाव वेमाणियाणं जस्स जइ इंदिया तस्स ततिविहो चेव इंदिओवचओ भाणियव्वो १ ।

कतिविहा णं भंते ! इंदियनिव्वत्तणा पं० ?, गो० ! पंचविहा इंदियनिव्वत्तणा, पं० तं०–सोतिंदियनिव्वत्तणा जाव फासिंदियनिव्वत्तणा, एवं नेरइयाणं जाव वेमाणियाणं, नवरं जस्स जइ इंदिया अत्थि २ । सोतिंदियणिव्वत्ताणं भंते ! कइसमइया, पं० ?, गो० ! असंखिज्जइसमया अंतोमुहुत्तिया पं०, एवं जाव फासिंदियनिव्वत्तणा, एवं नेरइयाणं जाव वेमाणियाणं ३ ।

कइविहा णं भंते ! इंदियलद्धि पं० ?, गो० ! पंचविहा इंदियलद्धी पं०, तं०–सोतिंदियलद्धी जाव फासिंदियलद्धी, एवं नेरइयाणं जाव वेमाणियाणं, नवरं जस्स जइ इंदिया अत्थि तस्स तावइया भाणियव्वा ४ । कतिविहा णं भंते ! इंदियउवओगद्धा पं० ?, गो० ! पंचविहा इंदियउवओगद्धा पं०, तं०–सोतिंदियउव ओगद्धा जाव फासिंदियउवओगद्धा, एवं नेरइयाणं जाव वेमाणियाणं, नवरं जस्स जइ इंदिया अत्थि ।

एतेसि णं भंते ! सोतिंदियचक्खिंदियघाणिंदियजिब्भिंदियफासिंदियाणं जहन्नयाए उवओगद्धाए उक्कोसियाए उवओगद्धाए जहन्नुक्कोसियाए उवओगद्धाए कयरे २ हिंतो अप्पा वा० ४ ?, गो० ! सव्वत्थोवा चक्खिंदियस्स जहण्णिया उवओगद्धा सोतिंदियस्स जहण्णिया उवओगद्धा विसेसाहिया घाणिंदियस्स जहन्निया उवओगद्धा विसे० जिब्भिंदियस्स जहन्निया उवओगद्धा विसे० फासिंदियस्स जहन्निया उवओगद्धा विसे० उक्कोसियाए उवओगद्धाए सव्वत्थोवा चक्खिंदियस्स उक्कोसिया उवओगद्धा सोतिंदियस्स उक्कोसिया उवओगद्धा विसे० घाणिंदियस्स

उक्को० उव० विसे० जिब्भिंदियस्स उक्को० उव० विसे० फासिंदियस्स उक्को० उव० विसे० जहन्नउक्कोसियाए उवओगद्धाए सव्वत्थोवा चक्खिंदियस्स जहन्निया उवओगद्धा सोतिंदियस्स जहन्निया उवओगद्धा विसेसाहिया घाणिंदियस्स जह० उव० विसे० चिब्भिंदियस्स ज० उव० वि० फासिंदियस्स जह० उव० वि० फासिंदियस्स जहन्नियाहिंतो उवओगद्धाहिंतो चक्खिंदियस्स उक्कोसिया उवओगद्धा विसे० सोतिंदियस्स उक्को० उव० वि० घाणिंदियस्स उक्को० उव० वि० जिब्भिंदियस्स उक्को० उव० विसे० फासिंदियस्स उक्कोसिया उव० विसे० ५।

कतिविहा णं भंते ! इंदियओगाहणा पं० ?, गो० ! पंचविहा इंदियओगाहणा पं०, तं०–सोतिंदियओगाहणा जाव फासिंदियओगाहणा, एवं नेरइयाणं जाव वेमाणियाणं, नवरं जस्स जइ इंदिया अत्थि ६

मू. तत्र 'यथोद्देशं निर्देश' इति न्यायात् प्रथमत इन्द्रियोपचयसूत्रमाह–'कइविहे णं भंते ! इंदियउवचए पन्नत्ते' इत्यादि सुगमं, नवरं 'जस्स जइ इंदिया' इत्यादि, यस्य नैरयिकादेर्यति–यावन्ति इंद्रियाणि सम्भवन्ति तस्य ततिविधिः–तावत्प्रकार इन्द्रियोपचयो वक्तव्यः, तत्र नैरयिकादीनां स्तनितकुमारपर्यवसानानां पञ्चविधः पृथिव्यप्तेजोवायुवनस्पतीनामेकविधो द्वीन्द्रियाणां द्विविधः त्रीन्द्रियाणां त्रिविधश्चतुरिन्द्रियाणां चतुर्विधः, तिर्यक्पञ्चेन्द्रियमनुष्यव्यन्तरज्योतिष्कवैमानिकानां पञ्चविधः, क्रमश्चैवं०स्पर्शनर- सनघ्राणचक्षुःश्रोत्राणीति, एवमिन्द्रियनिर्वर्त्तनादिसूत्राण्यपि वेदितव्यानि, प्रायः सुगमत्वात्, नवरं 'इंदियउवओगद्धा' इति यावन्तं कालमिन्द्रियैरुपयुक्त आस्ते तावत्कालं इन्द्रियोपयोगाद्धा 'कतिविहा णं भंते! ओगाहणा पन्नत्ता' इति कतिविधं–कतिप्रकारं भदन्त ! इन्द्रियैरवग्रहणं– परिच्छेदः प्रज्ञप्तः । एतत्सामान्यतः पृष्टं, सामान्यं च विशेषनिष्ठमतोऽपायादिविशेषविषयाणि सूत्राण्याह–

मू. (४३६) *कतिविधे णं भंते ! इंदियअवाए पं० ?, गो० ! पंचविधे इंदियअवाए पं०, तं०–सोतिंदियअवाए जाव फासिंदियअवाए, एवं नेरइयाणं जाव वेमाणियाणं, नवरं जस्स जइ इंदिया अत्थि । कतिविहा णं भंते ! ईहा पं० ?, गो० ! पंचविहा ईहा पं०, तं०–सोतिंदियईहा जाव फासिंदियईहा, एवं जाव वेमाणियाणं, नवरं जस्स जइ इंदिया ८ ।*

कतिविधे णं भंते ! उग्गहे पं० ?, गो० ! दुविहे उग्गहे पं०, तं०–अत्थोग्गहे य वंजणोग्गहे य । वंजणोग्गहे णं भंते ! कतिविधे पं० ?, गो० ! चउव्विधे पं०, तं०–सोतिंदियवंजणोग्गहे घाणिंदियवंजणोग्गहे जिब्भिंदियवंजणोग्गहे फासिंदियवं० । अत्थोग्गहे णं भंते ! कतिविधे पं० गो० ! छव्विहे पं०, तं०–सोतिंदियअत्थोवग्गहे चक्खिंदियअ० जिब्भिंदियअ० फासिंदियअ० नोइंदियअत्थो० नेरइयाणं भंते ! कतिविहे उग्गहे पन्नत्ते ?, गो० ! दुविहे पं०, तं०–अत्थोग्गहे य वंजणोग्गहे य, एवं असुरकुमाराणं जाव थणियकुमाराणं ।

पुढविकाइयाणं भंते ! कतिविधे उग्गहे, पं० ?, गो० ! दुविधे उग्गहे पं०– अत्थोग्गहे य वंजणोवग्गहे य । पुढविकाइयाणं भंते ! वंजणोग्गहे कतिविधे पं० ? गो० ! एगे फासिंदियवंजणोग्गहे पं० । पुढविकाइयाणं भंते ! कतिविधे अत्थोग्गहे पन्नत्ते ?, गो० ! एगे फासिंदिय अत्थोग्गहे पं०, एवं जाव वणस्सइकाइयाणं, एवं बेइंदियाणवि, नवरं बेइंदियाणं वंजणोग्गहे दुविहे पं० अत्थोग्गहे दुविहे पं०, एवं तेइंदियचउरिंदियाणवि, नवरं इंदियपरिवुड्ढि कायव्वा,

चउरिंदियाणं वंजणोग्गहे तिविधे पं० अत्थोग्गहे चउव्विधे पं०, सेसाणं जहा नेरइयाणं जाव वेमाणियाणं

वृ. 'कतिविहे णं भंते! इंदियअवाए पं०' इत्यादि, तत्रावग्रहज्ञानेनावगृहीतस्य ईहाज्ञानेन ईहितस्यार्थस्य निर्णयरूपो योऽध्यवसायः सोऽपायः, शार्ङ्ग एवायं शार्ङ्ग एव वायं इत्यादिरूपोऽवधारणात्मको निर्णयोऽवाय इति भावः। ईहा इति, 'ईह चेष्टायां' ईहनमीहा, सद्भूतार्थपर्यालोचनरूपा चेष्टा इत्यर्थः, किमुक्तं भवति? –अवग्रहादुत्तरकालमवायात् पूर्वं सद्भूतार्थविशेषोपादानाभिमुखोऽसद्भूतार्थविशेषपरित्यागाभिमुखः प्रायोऽत्र मधुरत्वादयः शार्ङ्गादिशब्दधर्म्मा दृश्यन्ते नकर्कशनिष्ठुरतादयः शार्ङ्गादिशब्दधर्म्मा इत्येवंरूपो मतिविशेष ईहा, आह च भाष्यकृत्– "भूयाभूयविसेसादाणट्ठा याभिमुहमीहा"।

दुविहे ओग्गहे पं०, तं०–वंजणोग्गहे य अत्थोग्गहे य' इति, भवग्रहो द्विविधः –अर्थावग्रहो व्यञ्जनावग्रहश्च, तत्र अवग्रहणमवग्रहः अर्थस्यावग्रहोऽर्थावग्रहः, अनिर्देश्यसामान्यरूपाद्यर्थग्रहणमिति भावः, आह च नन्द्यध्ययनचूर्णिकृत्–"सामन्नस्स रूवाइविसेसणरहियस्स अनिद्देसस्सस्सद्दग्गहणं अवग्गह" इति, तथा व्यज्यतेऽनेनार्थः प्रदीपेनेव घट इति व्यञ्जनं, तच्च उपकरणेन्द्रियस्य शब्दादिपरिणतद्रव्याणां च यः परस्परं सम्बन्धः, सम्बन्धे हि सति सोऽर्थः श्रोत्रादीन्द्रियेण व्यञ्जितुं शक्यते नान्यथा ततः सम्बन्धो व्यञ्ज नं, आह च भाष्यकृत्–

॥१॥ "वंजिज्जइ जेणत्थो घडोव्व दीवेण वंजणं तं च।
उवगरणिंदियसद्दाइपरिणयद्दव्वसंबंधो॥"

व्यञ्जनेन–सम्बन्धेनावग्रहणं–सम्बध्यमानस्य शब्दादिरूपस्यार्थस्याव्यक्तरीपः परिच्छेदो व्यञ्जनावग्रहः, अथवा व्यज्यन्ते इति व्यञ्जनानि 'कृद्बहुल'मिति वचनात् कर्मण्यनट्, व्यञ्जनानां–शब्दादिरूपतया परिणतानां द्रव्याणामुपकरणेन्द्रियसम्प्राप्तानामवग्रहः–अव्यक्तरूपः परिच्छेदो व्यञ्जनावग्रहः, आह–प्रथमं व्यञ्जनावग्रहो भवति ततोऽर्थावग्रहस्ततः कस्मादिह प्रथममर्थावग्रह उपन्यस्तः?, उच्यते, स्पष्टतयोपलभ्यमानत्वात्, तथाहि–अर्थावग्रहः स्पष्टरूपतया सर्वैरपि जन्तुभिः संवेद्यते, शीघ्रतरगमनादौ सकृत्सत्तवरमुपलभ्यते, किञ्चिद् दृष्टं न परिभावितं सम्यगिति व्यवहारदर्शनात्, अपिच अर्थावग्रहः सर्वेन्द्रियमनोभावी व्यञ्जनाग्रहस्तु नेति प्रथममर्थावग्रहः उक्तः

सम्प्रति व्यञ्जनावग्रहादूर्ध्वं - अर्थावग्रह इति क्रममाश्रित्य प्रथमं व्यञ्जनावग्रहस्वरूपं प्रतिपिपादयिषुः प्रश्नं कारयति शिष्यं–'वंजणोग्गहे णं भंते! कइविहे पं०' इत्यादि, इह व्यञ्जनमुपकरणेन्द्रियस्य शब्दादिपरिणत- द्रव्याणां च परस्परं सम्बन्ध इत्युक्तं प्राक्, ततश्चतुर्णामेव श्रोत्रादीनामिन्द्रियाणां व्यञ्जनवग्रहो न नयनमनसोः, तयोरप्राप्यकारित्वात्, सा चाप्राप्यकारिता नन्द्यध्ययनटीकायां प्रदर्शितेति नेह प्रदर्श्यते, अर्थावग्रहः षड्विधः, तद्यथा–'सोइंदियअत्थुग्गहे' इत्यादि, श्रोत्रेन्द्रियेणार्थावग्रहो व्यञ्जनावग्रहोत्तरकालमेकसामयिकमनिर्देश्यं सामान्यमात्रार्थग्रहणं श्रोत्रेन्द्रियार्थावग्रहः, एवं घ्राणजिह्वा स्पर्शनेन्द्रियार्थावग्रहेष्वपि वाच्यं, चक्षुर्मनसोस्तु व्यञ्जनावग्रहो न भवति, ततस्तयोः प्रथममेव स्वरूपद्रव्यगुणक्रियाकल्पनातीतमनिर्देश्यसामान्यमात्रस्वरूपार्थावग्रहणमर्थाव- ग्रहोऽवसेयः,

'नोइंदियअत्थावग्गहो' इति नोइन्द्रियं–मनः तच्च द्विधा–द्रव्यरूपं भावरूपं च, तत्र

मनःपर्याप्तिनामकर्मोदयतो यत् मनःप्रायोग्यवर्गणादलिकमादाय मनस्त्वेन परिणमनं तद् द्रव्यरूपं मनः, तथा चाह नन्द्यध्ययनचूर्णिकृत्– 'मनपज्जत्तिनामकम्मोदयओ जोग्गे मनोदव्वे घित्तुं मणत्तेण परिणामिया दव्वा दव्वमणो भन्नइ'' इति, तथा द्रव्यमनोऽवष्टम्भेन जीवस्य यो मनःपरिणामः स भावमनः, तथा चाह नन्द्यध्ययनचूर्णिकृदेव–''जीवो पुण मनपरिणामकिरियावंतो भावमनो, किं भणियं होइ ? –मनदव्वालंबणो जीवस्स मनवावारो भावमनो भण्णइ'' इति, तत्रेह भावमना प्रयोजनं, तद्ग्रहणे ह्यवश्यं द्रव्यमनसोऽपि ग्रहणं भवति, द्रव्यमनोऽन्तरेण भावमनसोऽसम्भवात्,

भावमनो विनापि च द्रव्यमनो भवति यथा भवस्थकेवलिनां, तत उक्तं भावमनसा प्रयोजनं, तत्र नोइंद्रियेण–भावमनसाऽर्थावग्रहो–द्रव्येन्द्रियव्यापारानिरपेक्षघटाद्यर्थस्वरूपपरिभावनाभिमुखः प्रथममेकसामयिको रूपाद्यूर्ध्वाकारादिविशेषचिन्ताविकलोऽनिर्देश्यसामान्यमात्रचिन्तात्मको बोधो नोइंद्रियार्थावग्रहः, अवग्रहग्रहणं चोपलक्षणं तेन नोइंद्रियार्थावग्रहस्य साक्षादितरयोस्तु (ईहापाययोः) उपलक्षणत उपादानं, विचित्रत्वात् सूत्रगतेरित्यदोषः ।

मू. (४३७) *कतिविहा णं भंते ! इंदिया पं० ?, गो० ! दुविहा पं०, तं०–दव्विंदिया य भाविंदिया य, कति णं भंते ! दव्विंदिया पं० ?, गो० ! अट्ठ दव्विंदिया पं०, तं०–दो सोत्ता दो नेत्ता दो घाणा जीवा फासे । नेरइयाणं भंते ! कति दव्विंदिया पं० ?, गो० ! अट्ठ एते चेव, एवं असुरकुमाराणं जाव थणियकुमाराणवि । पुढविकाइयाणं भंते ! कति दव्विंदिया, पं० ?, गो० ! एगे फासिंदिए पं०, एवं जाव वणस्सइकाइयाणं ।*

बेइंदियाणं भंते ! कति दव्विंदिया पं० ?, गो० ! दो दव्विंदिया पं०, तं०–फासिंदिए य जिब्भिंदिए य, तेइंदियाणं पुच्छा, गो० ! चत्तारि दव्विंदिया पं०, तं०–दो घाणा जीहा फासे, चउरिंदियाणं पुच्छा, गो० ! छ दव्विंदिया पं०, तं०–दो नेत्ता दो घाणा जीहा फासे, सेसाणं जहा नेरइयाणं जाव वेमा० । एगमेगस्स णं भंते ! नेरइयस्स केवइया दव्विंदिया अतीता ?, गो० ! अनंता, केवइया बद्धेल्लगा !, गो० ? अट्ठ, केवइया पुरेक्खडा ?, गो० ! अट्ठ वा सोल वा सत्तरस वा संखेज्जा वा असंखेज्जा वा अनंता वा । एगमेगस्स णं भंते ! असुरकुमारस्स केवइया दव्विंदिया अतीता ?, गो० ! अनंता, केवइया बद्धेल्लगा ?, अट्ठ, केवइया पुरेक्खडा ?, अट्ठ वा नव वा सत्तरस वा संखेज्जा वा असंखेज्जा वा अनंता वा, एवं जाव थणियकुमाराणं ताव भा० ।

एवं पुढविकाइया आउकाइया वणस्सइकाइयावि, नवरं केवइया बद्धेल्लगत्ति पुच्छाए उत्तरं एक्के फासिंदियदव्विंदिए, एवं तेउकाइयवाउकाइयस्सवि, नवरं पुरेक्खडा नव वा दस वा, एवं बेइंदियाणवि, नवरं पद्धेल्लगपुच्छाए दोन्नि, एवं तेइंदियस्सवि, नवरं बद्धेल्लगा चत्तारि, एवं चउरिंदियस्सवि नवरं बद्धेल्लगा छ, पंचिंदियतिरिक्खजोणिया मणूसा वाणमंतरा जोइसिय-सोहम्मीसाणगदेवस्स जहा असुरकुमारस्स, नवरं मणूसस्स पुरेक्खडा कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि अट्ठ वा नव वा संखेज्जा वा असंखेज्जा वा अनंता वा, सणंतुमाराहिंदबंभलंतगसुक्कसह-स्सारआणयपाणयआरण- अच्चुयगेवेज्जगदेवस्स य जहा नेरइयस्स

एगमेगस्स णं भंते ! विजयवेजयंतजयंतअपराजियदेवस्स केवइया दव्विंदिया अतीता गो० ! अनंता, केवइया बद्धेल्लगा ?, अट्ठ, केवइया पुरेक्खडा ?, अट्ठ वा सोलस वा चउवीसा वा संखेज्जा वा, सव्वट्ठसिद्धगदेवस्स अतीता अनंता बद्धेल्लगा अट्ठ पुरेक्खडा अट्ठ ।

नेरइयाणं भंते ! केवइया दव्विंदिया अतीता ?, गो० ! अनंता, केवइया बद्धेल्लगा ?, गो० ! असंखेज्जा, केवइया पुरेक्खडा ?, गो० ! अनंता, एवं जाव गेवेज्जगदेवाणं, नवरं मणूसाणं बद्धेल्लगा सिय संखेज्जा सिय असंखेज्जा, विजयवेजयंतजयंतअपराजितदेवाणं पुच्छा, गो० ! अतीता अनंता बद्धेल्लगा असंखेज्जा पुरेक्खडाअसंखेज्जा, सव्वट्ठसिद्धगदेवाणं पुच्छा, गो० ! अतीता अनंता, बद्धेल्लगा संखेज्जा, पुरेक्खडा संखेज्जा !

एगमेगस्स णं नेरइयस्स नेरइयत्ते केवइया दव्विंदिया अतीता ?, गो० ! अनंता, केवइया बद्धेल्लगा ?, गो० ! अट्ठ, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि अट्ठ वा सोलस वा चउवीसा वा संखेज्जा वा असंखेज्जा वा अनंता वा !

एगमेगस्स णं नेरइयस्स असुरकुमारत्ते केवइया दव्विंदिया अतीता ?, गो० ! अनंता, केवइया बद्धेल्लगा ?, गो० ! नत्थि, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि अट्ठ वा सोलस वा चउवीसा वा संखेज्जा वा असंखेज्जा वा अनंता वा, एवं जाव थणिय कुमारत्ते !

एगमेगस्स णं नेरइयस्स पुढविकाइयत्ते केवइया दव्विंदिया अतीता ?, गो० ! अनंता, केवइया बद्धेल्लगा ?, गो० ! नत्थि, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि एक्को वा दो वा तिन्नि वा संखेज्जा वा असंखेज्जा वा अनंता वा, एवं जाव वणस्सइकाइयत्ते

एगमेगस्स णं भंते ! नेरइयस्स बेइंदियत्ते केवइया दव्विंदिया अतीता ?, गो० ! अनंता, केवइया बद्धेल्लगा ?, गो० ! नत्थि, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि दो वा चत्तारि वासंखेज्जा वा असंखेज्जा वा अनंता वा, एवं तेइंदियत्तेवि, नवरं पुरेक्खडा चत्तारि अट्ठ वा बारस वा संखेज्जा वा असंखेज्जा वा अनंता वा, एवं चउरिंदियत्तेवि, नवरं पुरेक्खडा छ वा बारस वा अट्ठारस वा संखेज्जा वा संखेज्जा वा अनंता वा, पंचिंदियतिरिक्खजोणियत्ते जहा असुरकुमारत्ते मणूसत्तेवि एवं चेव, नवरं केवइया पुरेक्खडा ?, अट्ठ वा सोलस वा चउवीसा वा संखेज्जा वा असंखेज्जा वा अनंता वा, सव्वेसिं मणूसवज्जाणं पुरेक्खडा मणूसत्ते कस्सइ अत्थि कस्सइ नत्थि एवं न युज्जति, वाणमंतरजोइसियसोहम्मग जाव गेवेज्जगदेवत्ते अतीता अनंता बद्धेल्लगा नत्थि, पुरेक्खडा कस्सई अत्थि कस्सइ नत्थि जस्स अत्थि अट्ठ वा सोलस वा चउवीसा वा संखेज्जा वा असंखेज्जा वा अनंता वा,

एगमेगस्स णं भंते ! नेरइयस्स विजयवेजयंतजयंतअपराजितदेवत्ते केवइया दव्विंदिया अतीता ?, नत्थि, केवइया पुरेक्खडा ?, कस्सइ अत्थि कस्सइ नत्थि जस्स अत्थि अट्ठ वा सोलस वा, सव्वट्ठसिद्धगदेवत्ते अतीता नत्थि, बद्धेल्लगा नत्थि, पुरेक्खडा कस्सइ अत्थि कस्सइ नत्थि जस्स अत्थि अट्ठ वा सोलस वा, सव्वट्ठसिद्धगदेवत्ते अतीता नत्थि, बद्धेल्लगा नत्थि, पुरेक्खडा कस्सइ अत्थि कस्सइ नत्थि जस्स अत्थि अट्ठ ! एवं जहा नेरइयदंडओ नीतो तहा असुरकुमारेणवि नेतव्वो, जाव पंचिंदियतिरिक्खजोणिएणं, नवरं जस्स सट्ठाणे जइ बद्धेल्लगा तस्स तइ भाणियव्वा

एगमेगस्स णं भंते ! मणूसस्स नेरइयत्ते केवइया दव्विंदिया अतीता, गो० ! अनंता, केवइया बद्धेल्लगा ?, नत्थि, केवइया पुरेक्खडा ?, कस्सइ अत्थि कस्सइ नत्थि जस्सत्थि अट्ठ वा सोलस वा चउवीसा वा संखेज्जा वा असंखेज्जा वा अनंता वा, एवं जाव पंचिंदियतिरिक्खजोणियत्ते, नवरं एगिंदियविगलिंदिएसु जस्स जइ पुरेक्खडा तस्स तत्तिया भाणियव्वा,

एवमेगस्स णं भंते ! मणूसस्स मणूसत्ते केवइया दव्विंदिया अतीता, गो० ! अनंता, केवइया बद्धेल्लगा, गो० ! अट्ठ, केवइया पुरेक्खडा ?, कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि अट्ठ वा सोलस वा चउवीसा वा संखेज्जा वा असंखेज्जा वा अनंता वा, वाणमंतरजोइसिया जाव गेवेज्जगदेवत्ते जहा नेरइयत्ते,

एगमेगस्स णं भंते ! मणूसस्स विजयवेजयंतजयंतअपराजितदेवत्ते केवइया दव्विंदिया अतीता ? गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि अट्ठ वा सोलस वा, केवइया बद्धेल्लगा ? नत्थि, केवइया पुरेक्खडा ?, कस्सइ अत्थि कस्सइ नत्थि, जस्सऽत्थि अट्ठ वा सोलस वा,

एगमेगस्स णं भंते ! मणूसस्स वा सव्वट्ठसिद्धगदेवत्ते केवतिता दव्विंदिया अतीता ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि अट्ठ, केवइया बद्धेल्लगा ? नत्थि, केवइया पुरेक्खडा कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि अट्ठ, वाणमंतरजोतिसिए जहा नेरतिए ।

सोहम्मगदेवेवि जहा नेरइए, नवरं सोहम्मगदेवस्स विजयवेजयंतजयंतापराजियत्ते केवइया अतीता ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि अट्ठ, केवइया बद्धेल्लगा ?, नत्थि, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सति नत्थि, जस्स अत्थि अट्ठ वा सोलस वा, सव्वट्ठसिद्धगदेवत्ते जहा नेरइयस्स, एवं जाव गेवेज्जगदेवस्स, सव्वट्ठसिद्धग ताव नेतव्वं । एगमेगस्स णं भंते ! विजयवेजयंतजयंतापराजितदेवस्स नेरइयत्ते केवइया दव्विंदिया अतीता ?, गो० ! अमंता, केवइया बद्धेल्लगा ?, नत्थि, केवइया पुरेक्खडा ?, नत्थि, एवं जाव पंचिंदियतिरिक्खजोणियत्ते मणूसत्ते अतीता अनंता, बद्धेल्लगा नत्थि, पुरेक्खडा अट्ठ वा सोलस वा चउवीसा वा संखेज्जा वा, वाणमंतरे जोइसियत्ते जहा नेरइयत्ते, सोहम्मगदेवत्तेऽतीता अनंता, बद्धेल्लगा नत्थि, पुरेक्खडा कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि अट्ठ वा सोलस वा चउवीसा वा संखेज्जा वा, एवं जाव गेवेज्जगदेवत्ते, विजयवेजयंतजयंअपराजितदेवत्ते अतीता कस्सइ अत्थि नत्थि, जस्स अत्थि अट्ठ, केवतिया बद्धेल्लगा ?, अट्ठ, केवतिया पुरेक्खडा ?, कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि अट्ठ,

एगमेगस्स णं भंते ! विजयवेजयंत जयंतअपराजियदेवस्स सव्वट्ठसिद्धगदेवत्ते केवइया दव्विंदिया अतीता ?, गो० ! नत्थि, केवइया पुरेक्खडा ?, कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि अट्ठ, एगमेगस्स णं भंते ! सव्वट्ठसिद्धगदेवस्स नेरइयत्ते केवइया दव्विंदिया अतीता ?, गो० ! अनंता, केवइया बद्धेल्लगा ?, नत्थि, केवइया पुरेक्खडा ?, नत्थि, एवं मणूसवज्जं जाव गेवेज्जगदेवत्ते, नवरं मणूसत्ते अतीता अनंता, केवइया बद्धेल्लगा ?, नत्थि, केवइया पुरेक्खडा ?, अट्ठ, विजयवेजयंतजयंतअपराजितदेवत्ते अतीता कस्सति अत्थि कस्सति नत्थि, जस्स अत्थि अट्ठ, केवइया बद्धेल्लगा ?, नत्थि, केवइय पुरेक्खडा ?, नत्थि,

एगमेगस्स णं भंते ! सव्वट्ठसिद्धगदेवस्स सव्वट्ठसिद्धगदेवत्ते केवइया दव्विंदिया अतीता गो० ! नत्थि, केवइया बद्धेल्लगा ?, अट्ठ, केवइया पुरेक्खडा ?, नत्थि । नेरइयाणं भंते ! नेरइयत्ते केवतिता दव्विंदिया अतीता ?, गो० ! अनंता, केवइया बद्धेल्लगा ? असंखेज्जा, केवइया पुरेक्खडा ?, अनंता, नेरइयाणं भंते ! असुरकुमारत्ते केवइया दव्विंदिया अतीता ?, गो० ! अनंता, केवइया बद्धेल्लगा ?, नत्थि, केवइया पुरेक्खडा ?, अमंता, एवं जाव गेवेज्जगदेवत्ते,

नेरइयाणं भंते ! विजयवेजयंतजयंतअपराजितदेवत्ते केवइया दव्विंदिया अतीता ?,

नत्थि, केवइया दव्विंदिया अतीता ?, नत्थि, केवइया बद्धेल्लगा ?, नत्थि, केवइया पुरेक्खडा ?, असंखिज्जा, एवं सव्वट्ठसिद्धगदेवत्तेवि, एवं जाव पंचिंदियतिरिक्खजोणिया सव्वट्ठसिद्धगदेवत्ते भाणियव्वं, नवरं वणस्सइकाइयाणं विजयवेजयंतजयंतअपराजितदेवत्ते सव्वट्ठसिद्धगदेवत्ते य पुरेक्खडा अनंता, सव्वेसिं मणूससव्वट्ठसिद्धगवज्जाणं सट्ठाणे बद्धेल्लगा असंखेज्जा, परट्ठाणे बद्धेल्लगा नत्थि, वणस्सइकाइयाणं बद्धेल्लगा अनंता, मणूसाणं नेरइयत्ते अतीता बद्धेल्लगा नत्थि पुरेक्खडा अनंता, एवं जाव गेवेज्जगदेवत्ते, नवरं सट्ठाणे अतीता अनंता बद्धेल्लगा सिय संखेज्जा सिय असंखेज्जा पुरेक्खडा अनंता,

मणूसाणं भंते ! विजयवेजयंतजयंतअपराजितदेवत्ते केवइया दव्विंदिया अतीता ?, संखेज्जा, केवइया बद्धेल्लगा ?, नत्थि, केवइया पुरेक्खडा ?, सिय संखेज्जा सिय असंखेज्जा, एवं सव्वट्ठसिद्धगदेवत्ते अतीता नत्थि बद्धेल्लगा नत्थि पुरेक्खडा असंखेज्जा, एवं जाव गेवेज्जगदेवाणं, विजयवेजंयतजयंतअपराजितदेवाणं भंते ! नेरइयत्ते केवइया दव्विंदिया अतीता ?, गो० ! अनंता, केवइया बद्धेल्लगा ?, नत्थि, केवइया पुरेक्खडा ?, नत्थि, एवं जाव जोइसियत्तेवि, नवरं मणूसत्ते अतीता अनंता, केवइया बद्धेल्लगा ?, नत्थि, पुरेक्खडा असंखिज्जा, एवं जाव गेवेज्जगदेवत्ते सट्ठाणे नत्थि बद्धेल्लगा नत्थि पुरेक्खडा असंखेज्जा,

सव्वट्ठसिद्धगदेवाणं भंते ! नेरइयत्ते केवतिया दव्विंदिया अतीता ?, गो० ! अनंता, केवतिया बद्धेल्लगा ?, नत्थि, केवतिया पुरेक्खडा ?, नत्थि, एवं मणूसवज्जं ताव गेवेज्जगदेवत्ते, मणुसत्ते अतीता अनंता, बद्धेल्लगा नत्थि, पुरेक्खडा संखेज्जा, विजयवेजयंतजयंतअपराजितदेवत्ते केवइया दव्विंदिया अतीता ?, संखेज्जा, केवइया बद्धेल्लगा ?, नत्थि, केवइया पुरेक्खडा ?, नत्थि, सव्वट्ठसिद्धगदेवाणं भंते ! सव्वसिद्धगदेवत्ते केवइया दव्विंदिया अतीता ?, नत्थि केवइया बद्धेल्लगा ?, संखिज्जा, केवइया पुरेक्खडा ?, नत्थि, दारं १९ ।

कति णं भंते ! भाविंदिया, पं० ?, गो० ! पंच भाविंदिया, पं० तं०–सोतिंदिए जाव फासिंदिए, नेरइयाणं भंते ! कति भाविंदिया पं० ?, गो० ! पंच भाविंदिया पं०, तं०–सोतिंदिते जाव फासिंदिते, एवं जस्स जइ इंदिया तस्स तइ भाणितव्वा, जाव वेमाणियाणं, एगमेगस्स णं भंते ! नेरइयस्स केवइया भाविंदिया अतीता ?, गो० ! अनंता, केवइया बद्धेल्लगा ?, पंच, केवइया पुरेक्खडा ?, पंच वा दस वा एक्कारस वा संखेज्जा वा असंखेज्जा वा अनंता वा, एवं जाव थणियकुमारस्सवि, एवं पुढविकाइयआउकाइयवणस्सइकाइयस्सवि, बेइंदियतेइंदियचउरिंदियस्सवि, तेउकाइयवाउकाइयस्सवि एवं चेव, नवरं पुरेक्खडा छ वा सत्त वा संखज्जा वा असंखेज्जा वा अनंता वा,

पंचिंदियतिरिक्खजोणियस्स जाव ईसाणस्स जहा असुरकुमारस्स, नवरं मणूसस्स पुरेक्खडा कस्सइ अत्थि नत्थित्ति भाणियव्वं, सणंकुमार जाव गेवेज्जगस्स जहा नेरइयस्स, विजयवेजयंतजयंतअपराजितदेवस्स अतीता अनंता, बद्धेल्लगा पंच, पुरेक्खडा पंच वा दस वा पन्नरस वा संखेज्जा वा, सव्वट्ठसिद्धगदेवस्स अतीता अनंता, बद्धेल्लगा पंच, केवइया पुरेक्खडा ?, पंच ।

नेरइयाणं भंते ! केवइया भाविंदिया अतीता ?, गो० ! अनंता, केवइया बद्धेल्लगा ?, असंखेज्जा, केवइया पुरेक्खडा ?, अनंता एवं जहा दव्विंदिएसु पोहत्तेणं दंडतो भणितो तहा भाविंदिएसुवि पोहत्तेणं दंडतो भाणियव्वो, नवरं वणस्सइकाइयाणं बद्धेल्लगा अनंता, एगमेगस्स

णं भंते ! नेरइयस्स नेरइयत्ते केवतिया भाविंदिया अतीता ?, गो० ! अनंता, बद्धेल्लगा ?, पंच, पुरक्खडा कस्सवि अत्थि कस्सवि नत्थि, जस्स पंच या दस वा पन्नरस वा संखेज्जा वा असंखेज्जा वा अनंता वा, एवं असुरकुमाराणं जाव थणियकुमाराणं, नवरं बद्धेल्लगा नत्थि,

पुढविकाइयत्ते जाव बेइंदियत्ते जहा दव्विंदिया, तेइंदियत्ते तहेव नवरं पुरेक्खडा तिन्नि वा छ वा नव वा संखेज्जा वा असंखेज्जा वा अनंता वा, एवं चउरिंदियत्तेवि, नवरं पुरेक्खडा चत्तारि वा अट्ठ वा अट्ठ वा बारस वा संखेज्जा वा असंखेज्जा वा अनंता वा, एवं एए चेव गमा चत्तारि जाणेतव्वा जे चेव दव्विंदिएसु, नवरं तइयगमे जाणितव्वा जस्स जइ इंदिया ते पुरेक्खडेसु भणेतव्वा, चउत्थगमे जहेव दव्विंदिया, जाव सव्वट्ठसिद्धगदेवाणं सव्वट्ठसिद्धगदेवत्ते केवतिया भाविंदिया अतीता ?, नत्थि, बद्धेल्लगा ?, संखिज्जा, पुरेक्खडा ?, नत्थि

वृ. 'कतिविहा णं भंते ! इंदिया पं०' इति द्रव्येन्द्रियसूत्रं सुगमं, प्राग्भावितत्वात्, 'कइ णं भंते ! दव्विंदिया पं' इत्यादि, द्रव्येन्द्रियसङ्ख्याविषयं दण्डकसूत्रं च पाठसिद्धं एकैकजीवविषयातीतबद्धपुरस्कृतद्रव्येन्द्रियचिन्तायां 'पुरक्खडा अट्ठ वा सोल वा सत्तरस वा संखिज्जा वा असंखिज्जा वा अनंता वा' इति, यो नैरयिकोनन्तरभवे मनुष्यत्वमवाप्य सेत्स्यति तस्य मानुषभवसम्बन्धीन्यष्टौ, यः पुनरनिन्तरभवे तिर्यक्पञ्चेन्द्रियत्वमवाप्य तत उद्वृत्तो मनुष्येषु गत्वा सेत्स्यति तस्याष्टौ तिर्यक्पञ्चेन्द्रियभवसम्बन्धीन्यष्टौ मनुष्यभवसम्बन्धीनीति षोडश, यः पुनरनन्तरं नरकादुद्वृत्तस्तिर्यक्पञ्चेन्द्रियत्वमवाप्य तदनन्तरमेकं भवं पृथिवीकायादिको भूत्वा मनुष्येषु समागत्य सेत्स्यति तस्याष्टौ तिर्यक्पञ्चेन्द्रियभवसम्बन्धीनि एकं पृथिवीकायादिभवसम्बन्धि अष्टौ च मनुष्यभवसम्बन्धीनीति सप्तदश सङ्ख्येयकालं संसारावस्थायिनः सङ्ख्येयानि असंङ्ख्येयं कालमसङ्ख्येयानि अनन्तं कालमनन्तानि ।

असुरकुमारसूत्रे 'पुरक्खडा अट्ठ वा नव वा' इत्यादि, तत्रासुरभवादुद्वृत्त्यानन्तरभवे मनुष्य-त्वमवाप्य सेत्स्यतोऽष्टौ, असुरकुमारादयस्त्वीशानपर्यन्ताः पृथिव्यब्वनस्पतिषूत्पद्यन्ते ततोऽनन्तरभवे पृथिव्यादिषु गत्वा तदनन्तरं मनुष्यत्वमवाप्य सेत्स्यति तस्य नव, सङ्ख्येयादिभावना प्राग्वत्, पृथिव्यब्वनस्पतिसूत्रे 'पुरक्खडा अट्ठ वा नवे'ति पृथिव्यादयो ह्यनन्तरमुद्वृत्त्य मनुष्येषु उत्पद्यन्ते सिध्यन्ति च, तत्र योऽनन्तरभवे मनुष्यत्वमवाप्य सेत्स्यति तस्य मनुष्यभवसम्बन्धीन्यष्टौ, यस्त्वनन्तरमेकं पृथिव्यादिभवमावाप्य तदनन्तरं मनुष्यो भूत्वा सेत्स्यति तस्य नव, तेजोवायवोऽनन्तरमुद्वृत्ता मनुष्यत्वमेव न प्राप्नुवन्ति द्वित्रिचतुरिन्द्रियास्त्वनन्तरं मनुष्यत्वमवाप्नुवन्ति परं न सिध्यन्ति ततस्तेषां सूत्रेषु जघन्यपदे नव नवेति वक्तव्यं, शेषभावना प्रागुक्तानुसारेण कर्त्तव्या, मनुष्यसूत्रे पुरस्कृतानि द्रव्येन्द्रियाणि कस्यापि सन्ति कस्यापि न सन्तीति, तद्भव एव सिध्यतो न सन्ति शेषस्य सन्तीति भावः, यस्यापि सन्ति सोऽपि यद्यनन्तरभवे भवोऽपि मनुष्यो भूत्वा सेत्स्यति तस्याष्टौ, यः पुनः पृथिव्याद्येकभवान्तरितो मनुष्यो भूत्वा सिद्धिगामी तस्य नव, शेषभावना प्राग्वत्,

सनत्कुमारादयो देवा अनन्तरमुद्वृत्ताः न पृथिव्यादिष्वायान्ति किन्तु पञ्चेन्द्रियेषु ततस्ते नैरयिकवद्वक्तव्याः, तथा चाह- ''सणंकुमारमाहिंदबंभलोयलंतगसुक्कसहस्सारआणयपाणयआरणअच्चुयगेविज्जदेवस्स य जहा नेरइयस्स'' विजयादिदेवचतुष्टयसूत्रेषु योऽनंतरभवे

मनुष्यत्वमवाप्य सेत्स्यति तस्याष्टौ, यः पुनरेकवारं मनुष्यो भूत्वा भूयोऽपि मनुष्यत्वमवाप्य सेत्स्यति तस्य षोडश, यस्त्वपान्तराले देवत्वमनुभूय मनुष्यो भूत्वा सिद्धिगामी तस्य चतुर्विंशतिः, मनुष्यभवे अष्टौ देवभवेऽष्टौ भूयोऽपि मनुष्यभवे अष्टाविति, सङ्ख्येयानि सङ्ख्येयं कालं संसारावस्थायिनः, इह विजयादिषु चतुर्षुगताः प्रभूतमसङ्ख्येयमनन्तं वा कालं संसारे नावतिष्ठन्ते ततः संखेज्जा वा इत्येवोक्तं, 'नासंखेज्जा वा अनंता वा' इति, सर्वार्थसिद्धिस्त्वनन्तरभवे नियमतः सिध्यति ततस्तस्याजघन्योत्कृष्टं पुरस्कृता अष्टाविति।

बहुवचनचिन्तायां नैरयिकसूत्रे बद्धानि द्रव्येन्द्रियाण्यसङ्ख्येयानि, नैरयिकाणामसङ्ख्यातत्वात्, एवं शेषसूत्रेष्वप्युपयुज्य वक्तव्यं, नवरं मनुष्यसूत्रे 'सिय संखेज्जा सिय असंखेज्जा' इह सम्मूर्च्छिममनुष्याः कदाचित् सर्वथा न सन्ति, तदनन्तरस्य चतुर्विंशतिमुहूर्त्तप्रमाणस्य प्रागभिधानात्, तत्र यदा पृच्छासमये सर्वथा न सन्ति तदा सङ्ख्येयानि, गर्भजमनुष्याणां सङ्ख्येयत्वात्, यदा तु सम्मूर्च्छिमा अपि सन्ति तदा असङ्ख्येयानि, सर्वार्थसिद्धमहाविमानदेवाः सङ्ख्येयाः, बादरत्वे महाशरीरत्वे च सति परिमितक्षेत्रवर्त्तित्वात्, ततो बद्धानि पुरस्कृतानि वा तेषां द्रव्येन्द्रियाणि सङ्ख्येयानि, 'एगमेगस्स णं भंते! नेरइयस्स नेरइयत्ते' इत्यादि, 'कस्सइ अत्थि कस्सइ नत्थि' इति यो नरकादुद्वृत्तो भूयोऽपि नैरयिकत्वं नावाप्स्यति तस्य न भवन्ति, यस्त्ववाप्स्यति तस्य सन्ति, सोऽपि यद्येकवारमागामी ततोऽष्टौ द्वौ वारौ चेत् तर्हि षोडश यदि त्रीन् वारान् ततश्चतुर्विंशतिः सङ्ख्येयान् वारान् आगामिनः सङ्ख्येयानीत्यादि, मनुष्यत्वचिन्तायां 'कस्सइ अत्थि कस्सइ नत्थि' इति न वक्तव्यं, मनुष्येष्वागमनस्यावश्यंभावित्वात्, ततो जघन्यपदेऽष्टौ उत्कर्षतोऽनन्तानीति वक्तव्यं,

विजयवैजयंतजयन्तापराजितचिन्तायां अतीतानि द्रव्येन्द्रियाणि न सन्ति, कस्मादिति चेत्?, उच्यते, इह विजयादिषु चतुर्षुगतो जीवो नियमात् तत उद्वृत्तो न जातुचिदपि नैरयिकादिपञ्चेन्द्रियतिर्यक्पर्यवसानेषु तथा व्यन्तरेषु ज्योतिष्केषु च मध्ये मसागमिष्यति तथास्वाभाव्यात्, मनुष्येषु सौधर्मादिषु चागमिष्यति, तत्रापि जघन्यत एकं द्वौ (त्रीन्) वा भवानुत्कर्षतः सङ्ख्येयान् न पुनरसङ्ख्येयान् अनन्तान् वा, ततो नैरयिकस्य विजयादित्वेऽतीतानि द्रव्येन्द्रियाणि न सन्तीत्युक्तं, पुरस्कृतानि अष्टौ षोडश वा, विजयादिषु द्विरुत्पन्नस्यानन्तरभव नियमतो मोक्षगमनात्,

एवं यथा नैरयिकस्य नैरयिकत्वादिषु चतुर्विंशतौ स्थानेषु चिन्ता कृता तथा असुरकुमारादीनामपि प्रत्येकं कर्त्तव्या, पूर्वोक्तभावनाऽनुसारेण च स्वयमुपयुज्य परिभावनीया, भावेन्द्रियसूत्राण्यपि सुगमान्येव, केवलं द्रव्येन्द्रियगतभावनानुसारेण तत्र भावना भावयितव्या

पदं – १५ – उद्देशकः – २ – समाप्तम्

पदं – १५ – समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे पञ्चदशपदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता।

पदं – १६ – "प्रयोग"

वृ. तदेवं व्याख्यातं पञ्चदशमधुना षोडशमारभ्यते–तस्य चायमभिसम्बन्धः–इहानन्तरपदे

प्रधानपदहेतुत्वादिन्द्रियतामेव लेश्यादिसद्भावात्स विशेषत इन्द्रियपरिणाम उक्तसततस्तदनन्तरमिह परिणामसाम्यात् प्रयोगपरिणामः प्रतिपाद्यते, तत्र येतमादिसूत्रम्–

मू. *(४३८) कतिविहे णं भंते ! पओगे पं० ?, गो० ! पन्नरसविहे पओगे पं०, तं०–सच्चमणप्पओगे १ असच्चमणप्पओगे २ सच्चामोसमणप्पओगे ३ असच्चामोसमणप्पओगे ४ एवं वइप्पओगेवि चउहा ८ ओरालियसरीरकायप्पओगे ९ ओरालियमी ससरीकायप्पओगे १० वेउव्वियसरीरकायप्पओगे ११ वेउव्वियमीससरीरका- यप्पओगे १२ आहारकसरीरकायप्पओगे १३ आहारगमीससरीरकायप्पओगे १४ (तेया) कम्मासरीरकायप्पओगे १५।*

वृ. 'कइविहे णं भंते !' इत्यादि, कतिविधः–कतिप्रकारः, णमिति वाक्यालङ्कार, भदन्त प्रयोगः प्रज्ञप्तः ?, प्रयोग इति प्रपूर्वस्य 'युजिरायोगे' इत्यस्य धञन्तस्य प्रयोगः, परिस्पन्दक्रिया आत्मव्यापार इत्यर्थः, अथवा प्रकर्षेण युज्यते–व्यापार्यते क्रियासु सम्बन्ध्यते वा साम्परायिकेर्यापथकर्मणा सहात्मा अनेनेति प्रयोगः 'पुंनाम्नी'ति करणे घञ्प्रत्ययः, भगवानाह पञ्चदशविधः प्रज्ञप्तः, तदेव पञ्चदशविधत्वं दर्शयति–

'सच्चमणप्पओगे' इत्यादि, सन्तो–मुनयः पदार्था वा तेषु यथासङ्ख्यं मुक्तिप्रापकत्वेन यथावस्थितवस्तुस्वरूपचिन्तनेन च साधु सत्यं–अस्ति जीवः सदसद्रूपो देहमात्रव्यापीत्यादिरूपतया यथावस्थितवस्तुचिन्तपरं, सत्यं च तत् मनश्च सत्यमनः तस्य प्रयोगो--व्यापारः सत्यमनप्रयोगः, 'असच्चमणप्पओगे' इति, सत्यविपरीतमसत्यं, यथा- नास्ति जीवः एकान्तसद्रूपो वेत्यादिकुविकल्पनपरं, तच्च तन्मनश्च तस्य प्रयोगोतऽसत्यमनःप्रयोगः,

'सच्चमोसमणप्पओग' इति सत्यमृषा–सत्यासत्ये यथा धवखदिरुपलाशादिमिश्रेषु बहुष्वशोकवृक्षेषु अशोकवनमेवेदमिति विकल्पनपरं, तत्र हि कतिपयाशोकवृक्षाणां सद्भावात् सत्यता अन्येषामपि धवखदिरादीनां सद्भावादसत्यता, व्यवहारनयमतापेक्षया चैवमुच्यते, परमार्थतः पुनरिमसत्यमेव, यथाविकल्पितार्थयोगात्, तच्च तन्मनश्चेत्यादि प्राग्वत्,

तथा 'असच्चामोसमणप्पओगे' इति यन्न सत्यं नापि मृषा तदसत्यामृषा, इह विप्रतिपत्तौ सत्यां वस्तुप्रतिष्ठासया सर्वज्ञमतानुसारेण विकल्प्यते यथा अस्ति जीवः सदसद्रूपे इति तत्किल सत्यं परिभाषितमाराधकत्वात्, यत्पुनर्विप्रतिपत्तौ सत्यां यद्वस्तुप्रतिष्ठाशयाऽपि सर्वज्ञमतोत्तीर्णं विकल्प्यते यथा नास्ति जीवः एकान्तनित्यो वेत्यादि तदसत्यं विराधकत्वात्, यत्पुनर्वस्तुप्रतिष्ठासामान्तरेण स्वरूपमात्रपर्यालोचनपरं यथा–देवदत्तात्त ३ घट आनेतव्यो गौर्याचनीया इत्यादिचिन्तपनपरकं तत् असत्यामृषा, इदं हि स्वरूपमात्रपर्यालोचनपरत्वात् न यथोक्तलक्षणं सत्यं नापि मृषा, एतदपि व्यवहारनयमतापेक्षया द्रष्टव्यं, अन्यथा विप्रतारणबुद्धिपूर्वकमसत्येऽन्तर्भवति अन्यत्तु सत्ये, तच्च तन्मनश्च तस्य प्रयोगोऽसत्याऽमृषामनःप्रयोगः।

एवं 'वइप्पओगोवि चउहा' इति, यथा मनःप्रयोगश्चतुर्द्धा तथा वाक्प्रयोगोऽपि चतुर्द्धा, तद्यथा–सत्यवाक्प्रयोगो मृषावाक्प्रयोगः सत्यामृषावाक्प्रयोगः असत्यामृषावाक्प्रयोगः, एताश्च सत्यवागादयः सत्यमनःप्रभृतिवद्भावनीया इति।

ओरालियसरीरकायप्पओगे' इति औदारिकादिशब्दार्थमग्रे वक्ष्यामः, औदारिकमेव शरीरं तदेव पुद्गलस्कन्धसमुदायरूपत्वात् उपचीयमानत्वाच्च कायः औदारिकशरीरकायः तस्य प्रयोगः

औदारिकशरीरकायप्रयोगः, अयं च तिरश्चो मनुष्यस्य च पर्याप्तस्य १, 'औदारिकमिश्रकायशरीरप्रयोग' इति औदारिकं च तन्मिश्रं च औदारिकमिश्रं, केन सह मिश्रितमिति चेत् ?, उच्यते, कार्मणन, तथा चोक्तं निर्युक्तिकारेण शस्त्र (आहार) परिज्ञानध्ययने –

॥१॥ 'जोएणं कम्मएणं आहारेइ अनंतरं जीवो ।
तेण परं मीसेणं जाव सरीरस्स निप्फत्ती ॥

ननुमिश्रत्वमुभयनिष्ठं, तथाहि–यथा औदारिकं कार्मणेन मिश्रं तथा कार्मणमपि औदारिकेण मिश्रं ततः कस्मादौदारिकमिश्रमेव तदुच्यते न कार्मणमिश्रमिति ?, उच्यते, इह व्यपदेशः स प्रवर्त्तनीयो येन विवक्षितार्थप्रतिपत्तिर्निष्प्रतिपक्षा श्रोतृणामुपजायते, अन्यथा संदेहापत्तितो विवक्षितार्थाप्रतिपत्त्या न तेषामुपकारः कृतः स्यात्, कार्मणं च शरीरमासंसारमविच्छेदेनावस्थितत्वात् सकलेष्वपि शरीरेषु सम्भवति, ततः कार्मणमिश्रमित्युक्ते न ज्ञायते किं तिर्यग्मनुष्याणामपर्याप्तावस्थायां तद्विवक्षितमुत देवनारकाणामिति ?, तत उत्पत्तिमाश्रित्यौदारिकस्य प्रधानत्वात् कादाचित्कत्वाच्च निरवशेषप्रतिपक्षविवक्षितार्थप्रतिपत्त्यर्थमौदारिकेण व्यपदिश्यते–औदारिकमिश्रमिति,

तथा यदौदारिकशरीरो वैक्रियलब्धिसम्पन्नो मनुष्यस्तिर्यक्पञ्चेन्द्रियः पर्याप्तकबादरवायुकायिको वा वैक्रियं करोति तदा किलौदारिकशरीरप्रयोग एव वर्त्तमानः प्रदेशान् विक्षिप्य वैक्रियशरीरयोग्यान् पुद्गलानुपादाय वैक्रियशरीरपर्याप्तया यावन्न पर्याप्तिमुपगच्छति तावत् यद्यपि वैक्रियेण मिश्रतौदारिकस्योभयनिष्ठा तथाप्यौदारिकस्य प्रारम्भकतया प्रधानत्वात् तेन व्यपदेश औदारिकमिश्रमिति, न वैक्रियेणेति, तथा आहारकमपि शरीरं यदा कश्चिदाहारकलब्धिमान् पूर्वधरः करोति तदा यद्यप्याहारकेण मिश्रत्वमौदारिककस्योभयनिष्ठं तथाप्यौदारिकमारभकतया प्रधानमिति तेन व्यपदेशप्रवृत्तिरौदारिकमिश्रमिति, न त्वाहारकेणेति, औदारिकमिश्रं च तत् शरीरं चेत्यादि पूर्ववत् २, वैक्रियशरीरकायप्रयोगो वैक्रियशरीरपर्याप्तया पर्याप्तया ३, वैक्रियमिश्रशरीरकायप्रयोगो देवनाकारणमपर्याप्तावस्थायां, मिश्रता च तदानीं कार्मेण सह वेदितव्या, अत्राक्षेपपरिहारौ प्राग्वत्, तथा यदा मनुष्यस्तिर्यक्पञ्चेन्द्रियो वायुकायिको वा वैक्रियशरीरी भूत्वा कृतकार्यो वैक्रियं परिजिहीर्षुरौदारिके प्रवेष्टुं यतते तदा किल वैक्रियशरीरबलेनौदारिकोपादानाय प्रवर्त्तते इति वैक्रियस्य प्राधान्यात्तेन व्यपदेशो नौदारिकेणेति वैक्रियमिश्रमिति ४,

तथा आहारकशरीरकायप्रयोगः आहारकशरीरपर्याप्तया पर्याप्तस्य ५,

यत्राग्भवभाव्यन्तर्मुहूर्त्तं यच्चोत्तरभवभावि तद्द्वयमप्येकं विवक्षित्वोक्तं, देवनैरयिकाणां हि स्वस्वलेश्या प्रागुत्तरभावन्तर्मुहूर्त्तद्वयनिजायुःकालप्रमाणावस्थाना भवति, तथा।

॥ १ ॥ "जा पच्छाइ ठिई खलु उक्कोसा चेव समयमब्भहिया।
सुक्काए जहन्नेणं तेत्तीसुक्कोस[मुहुत्त] मब्भहिया॥" इति

ततोऽस्यालेश्यास्थितिपरिमाणात् प्रागुक्ताच्च तृतीयलेश्योद्देशवक्ष्यमाणसूत्रादवसीयते–देवानां नैरयिकाणां च लेश्याद्रव्यपरिणाम उपपातसमयादारभ्याभवक्षयात् भवति इति पूर्व्वोत्पन्नैश्चासुरकुमारैः प्रभूतानि तीव्रानुभागानि लेश्याद्रव्याणि अनुभूयानुभूय क्षयं नीतानि स्तोकानि मन्दानुभावान्यवतिष्ठन्ते ततस्ते पूर्व्वत्पन्ना अविशुद्धलेश्याः पश्चादुत्पन्नास्तु तद्विपर्ययाद्विशुद्धलेश्याः

'वेयणाए जहा नेरइया' इति वेदनायां यथा नैरयिका उक्तास्तथा वक्तव्याः, तत्राप्यसंज्ञीनोऽपि लभ्यमानत्वात्, तत्र यद्यपि वेदनासूत्रं पाठतो नारकाणामिवासुरकुमाराणमपि तथापि भावनायां विशेषः, स चायं–ये संज्ञीभूतास्ते सम्यग्दृष्टित्वात् महावेदनाः चारित्रविराधनाजन्यचित्तसन्तापात्, इतरे तु असंज्ञीभूता मिथ्यादृष्टित्वादल्पवेदना इति, 'अवसेसं जहा नेरइयाणं'ति अवशेषं क्रियासूत्रमायुः सूत्रं च यथा नैरयिकाणां तथा वक्तव्यं, एतच्च सुगमत्वात् स्वयं परिभावनीयं 'एव'मित्यादि, एवमसुरकुमारोक्तेन प्रमाणेन नागकुमारादयोऽपि तावद्वक्तव्याः यावत्स्तनितकुमाराः॥

मू. (४४७) पुढविकाइया आहारकम्मवन्नलेस्साहिं जहा नेरइया, पुढविकाइया सव्वे समवेयणा[पo]?, हंता गोo! सव्वे समवेदणा, से केणट्ठेणं?, गोo! पुढविकाइया सव्वे असन्नी असन्निभूयं अनिययं वेयणं वेयंति, से तेणट्ठेणं गोo! पुढविकाइया सव्वे समवेदणा।

पुढविकाइया णं भंते! सव्वे समकिरिया?, हंता गोo! पुढविकाइया सव्वे समकिरिया, से केणट्ठेणं?, गोo! पुढविकाइया सव्वे माइमिच्छादिट्ठी तेसिं नियइयाओ पंच किरियाओ कज्जंति, तंo–आरंभिया परिग्गहिया मायावत्तिया अप्पच्चक्खाणकिरिया मिच्छादंसणवत्तिया य, से तेणट्ठेणं गोo १ एवंo, जाव चउरिंदिया, पंचेंदियतिरिक्खजोणिया जहा नेरइया नवरं किरियाहिं सम्मद्दिट्ठी मिच्छद्दिट्ठी सम्मामिच्छद्दिट्ठी,

तत्थ णं जे ते सम्मद्दिट्ठी ते दुविहा पन्नता, तंजहा– असंजता य संजयासंजता य, तत्थ णं जे ते संजयासंजया तेसिं णं तिन्नि किरियाओ कज्जंति, तंo–पआरंo परिo मायाo, तत्थ णं जे असंजता तेसि णं चत्तारि किरिया कज्जंति, तंo–आरंo परिo मायाo अपच्चo, तत्थ णं जे ते मिच्छादिट्ठी जे य सम्मामिच्छदिट्ठी तेसि णं नियइयाओ पंच किरिo कज्जंति, तंo–आरंभिo परिo मायाo अपच्चo मिच्छाo, सेसं तं चेव।

वृ. 'पुढविकाइया' इत्यादि, पृथिवीकायिका आहारकर्मवर्णलेश्याभिर्यथा नैरयिका उक्तास्तथा वाच्याः, पृथिवीकायिकानामाहारादिविषयाणि चत्वारि सूत्राणि नैरयिकसूत्राणीव पृथिवीकायिकाभिलापेनाभिधातव्यानीति भावः, केवलमाहारसूत्रे भावनैवं–पृथिवीकायिकानामङ्गुलासङ्ख्येयभागमात्रशरीरत्वेऽप्यल्पशरीरत्वमहाशरीरत्वे आगमवचनादवसेये, स चायमागमः– "पुढविकाइए पुढविकाइयस्स ओगाहणट्ठयाए चउट्ठाणवडिए" इत्यादि, तत्र महाशरीरा लोमाहारतो बहुतरान् पुद्गलानाहारयन्त्युच्छ्वसन्ति च अभीक्ष्णमाहारयन्त्यभीक्ष्णं

च्चोच्छ्वसन्ति, महाशरीरत्वादेव, अल्पशरीराणामल्पाहारोच्छ्वसत्वं अल्पशरीरत्वादेव, कादाचित्कत्वं चाहारोच्छ्वासयोः पर्याप्तेतरावस्थापेक्षमिति। वेदनासूत्रमाह-

'पुढविकाइया णं भंते! सव्वे समवेयणा' इत्यादि, असन्नीति-मिथ्यादृष्टयोऽमनस्का वा 'असन्निभूयं'ति असंज्ञीभूता असंज्ञीनां वा जायते तामित्यर्थः, एतदेव व्यनक्ति 'अनियय'ंति अनिर्धारितां वेदयन्तो, वेदनामनुभवन्तोऽपि न पूर्व्वोपात्ताशुभकर्मण-परिणतिरियमित्यवगच्छन्ति, मिथ्यादृष्टित्वादमनस्कत्वाद्वा मत्तमूर्च्छितादिवदितिभावः, क्रियासूत्रे 'माइमिच्छद्दिट्ठि'त्ति मायावन्तो हि तेषु प्रायेणोत्पद्यन्ते, यदाह शिवशर्म्माचार्यः-

॥१॥ "उम्मग्गदेसओ मग्गनासओ गूढहियय माइल्लो।
सढसीलो य ससल्लो तिरियाउं बंधई जीवो॥"

ततस्ते मायिन उच्यन्ते, अथवा माया इह समस्तानन्तानुबन्धिकषायोपलक्षणं ततो मायिन इति किमुक्तं भवति?-अनन्तानुबन्धिकषायोदयवन्तः अत एव मिथ्यादृष्टयः, 'ताणं नियइयाओ' इति तेषां-पृथिवीकायिकानां नैयतिक्यो-नियताः पञ्चैव न तु त्रिप्रभृतय इत्यर्थः 'से एएणट्ठेण'मित्यादि, निगमनं 'जाव चउरिंदिया' इति इह महाशरीरत्वाल्पशरीरत्वे स्वस्वावगाहनानुसारेणावसेये, आहारश्चतुर्द्वीन्द्रियादीनां प्रक्षेपलक्षणोऽपीति,

'पंचिंदियतिरिक्खजोणिया जहा नेरइया' इति प्रतीतं, नवरमिह महाशरीरा अभीक्ष्णमाहारयन्ति अभीक्ष्णमुच्छ्वसन्तीति यदुच्यते तत्सङ्ख्यातवर्षायुषोऽपेक्ष्य तथैव दर्शात्, नासङ्ख्यातवर्षायुषः, तेषां प्रक्षेपाहारस्य षष्ठस्योपरि प्रतिपादितत्वात्, अल्पशरीराणां त्वाहारोच्छ्वासयोर्यत् कादाचित्कत्वं तदपर्याप्तावस्थायां लोमाहारोच्छ्वासयोरभवनेन पर्याप्तावस्थायां तद्भवनेन चावसेयं, कर्म्मसूत्रे यत्पूर्व्वोत्पन्नानामल्पकर्म्मत्वं इतरेषां तु महाकर्म्मत्वं तदायुष्कादितत्रवेधकर्म्मापेक्षं, वर्णलेश्यासूत्रयोरपि यत्पूर्व्वोत्पन्नानां शुभवर्णाद्युक्तं तत्तारुण्यात् पश्चादुत्पन्नानां चाशुद्धवर्णादि बाल्यादवसेयं, लोके तथादर्शनादिति, तथा 'संजयासंजया' इति देशविरताः स्थूलात् प्राणातिपातादेर्निवृत्तत्वात् इतरस्मादनिवृत्तत्वात्॥

मनुष्यविषयं सूत्रमाह-

मू. (४४८) *मणुस्सा णं भंते! सव्वे समाहारा?, गो० ! नो इणट्ठे समट्ठे, से केण० ?, गो० ! मणुस्सा दुविहा पं०, तं०-महासरीरा य अप्पसरीरा य, तत्थ णं जे ते महासरीरा ते णं बहुतराए पोग्गले आहारेंति जाव बहुतराए पोग्गले नीससंति आहच्च आहारेंति आहच्च नीससंति तत्थ णं जे ते अप्पसरीरा ते णं अप्पतराए पोग्गले आहारेंति जाव अप्पतराए पोग्गले नीससंति अभिक्खणं आहारेंति जाव अभिक्खणं नीससंति, से तेणट्ठेणं गो० ! एवं वुच्चति-मणुस्सा सव्वे नो समाहारा,*

सेसं जहा नेरइयाणं, नवरं किरियाहिं मणूसा तिविहा पन्नत्ता, तंजहा-सम्मद्दिट्ठी मिच्छादिट्ठी सम्मामिच्छद्दिट्ठी, तत्थ णं जे ते सम्मद्दिट्ठी ते तिविहा पन्नत्ता, तंजहा-संयता असंयता संयतासंयता,

तत्थ णं जे ते संयता ते दु० पं०, तं-सरागसंयता वीयरागसंयता य, तत्थ णं जे ते वीयरागसंयता ते णं अकिरिया, तत्थ णं जे ते सरागसंयता ते दु० पं०, तं०-पमत्तसंयता य अपमत्तसंयता य, तत्थ णं जे ते अपमत्तसंजया तेसिं एगा मायावत्तिया किरिया कज्जति, तत्थ णं

जे ते पमत्तसंजया तेसिं दो किरियाओ कज्जंति–आरंभिया मायावत्तिया य,

तत्थ णं जे ते संजयासंजया तेसिं तिन्नि किरियाओ कज्जंति तं–आरंभिया परिग्गहिया मायावत्तिया, तत्थ णं जे ते असंजया तेसिं चत्तारि किरियाओ कज्जंति, तंजहा–आरंभिया परिग्गहिया मायावत्तिया अपच्चक्खाणकिरिया, तत्थ णं जे ते मिच्छदिट्ठी जे सम्मामिच्छदिट्ठी तेसिं नियइयाओ पंच किरियाओ कज्जंति, तंजहा–आरंभिया परिग्गहिया मायावत्तिया अपच्चक्खाणकिरिया मिच्छादंसणवत्तिया, सेसं जहा नेरइयाणं ॥

वृ. 'मणुस्सा णं भंते ! सव्वे समाहारा' इत्यादि, सुगमं नवरं 'आहच्च आहारेंति आहच्च ऊससंति आहच्च नीससंति' इति, महाशरीरा हि मनुष्या देवकुर्वादिमिथुनकास्ते च कदाचिदेवाहारयन्ति कावलिकाहारेण "अट्ठमभत्तस्स आहारो" इति वचनात् उच्छ्वासनिःश्वासावपि तेषां शेषमनुष्यापेक्षया अतिसुखत्वात् कादाचित्की, अल्पशरीरास्त्वभीक्ष्णमल्पं चाहारयन्ति, बालानां तथादर्शनात्, संमूर्छिममनुष्याणामल्पशरीराणामनवरतमाहारसंभवाद्वा, उच्छ्वासनिःश्वासावप्यल्पशरीराणामभीक्ष्णं प्रायो दुःखबहुलत्वात्,

'सेसं जहा नेरइयाण'मिति शेषं–कर्मवर्णादिविषयं सूत्रं यथा नैरयिकाणां तथाऽवसेयं, नवरमिह पूर्वोत्पन्नानां शुद्धवर्णादित्वं तारुण्याद् भावनीयं, क्रियासूत्रे विशेषमाह–नवरं 'किरियाहिं मणुया तिविहा' इत्यादि, तत्र सरागसंयता–अक्षीणानुपशान्तकषायादीतरागसंयता–उपशान्तकषायाः क्षीणकषायाश्च 'अकिरिया' इति वीतरागत्वेनारम्भादीनां क्रियाणाममावात्

'एगा मायावत्तिया' इति अप्रमत्तसंयतानामेकैव मायाप्रत्यया क्रिया 'कज्जइ'त्ति क्रियते भवति, कदाचिदुच्चाहरक्षणप्रवृत्तानाम्, अक्षीणकषायत्वात्, 'आरंभिया मायावत्तिया' इति प्रमत्तसंयतानां हि सर्वः प्रमत्तयोग आरम्भ इति भवत्यारम्भिकी क्रिया अक्षीणकषायत्वाच्च मायाप्रत्ययेति,

'सेसं जहा नेरइयाण'मिति शेषमायुर्विषयं सूत्रं यथा नैरयिकाणां तथा वक्तव्यं, तच्च सुगमत्वात् स्वयं भावनीयं ।

मू. (४४९) *वाणमंतराणं जहा असुरकुमाराणं, एवं जोइसियवेमाणियाणवि, नवरं ते वेदनाए दु० पं० तं०–माइमिच्छदिट्ठीउववन्नगा य अमाइसम्मदिट्ठीउववन्नगा य,*

तत्थ णं जे ते माईमिच्छदिट्ठीउववन्नगा ते णं अप्पवेदनतरागा तत्थ णं जे ते अमाईसम्मदिट्ठीउववन्नगा ते णं महावेदनतरागा, से तेण० गो० ! एवं वु०, सेसं तहेव।

वृ. 'वाणमन्तराणं जहा असुरकुमाराण'मित्यादि, यथा असुरकुमारा 'सन्निभूया य असन्निभूया य, तत्थ णं जे सन्निभूया ते महावेयणा असन्निभूया अप्पवेयणा' इत्येवमधीता व्यन्तरा अपि तथैवाध्येतव्याः, यतोऽसुरादिषु व्यन्तरान्तेषु देवेष्वसंज्ञीन उत्पद्यन्ते, तथा चोक्तं व्याख्याप्रज्ञप्तौ प्रथमशते द्वितीयोद्देशके–"असन्नी णं जहन्नेणं भवणवासीसु उक्कोसेणं वाणमंतरेसु" इति

ते चासुरकुमारप्रकरणोक्तयुक्तेरल्पवेदना भवन्तीत्यवसेयं, यत्तु प्राग् व्याख्यानं कृतं संज्ञीनः सम्यग्दृष्टयोऽसंज्ञीनस्त्वितरे इति, तदेवमपि घटते इति वृद्धव्याख्यानुसरणतः कृतमित्यदोषः 'एव'मित्यादि, एवमसुरकुमारोक्तप्रकारेण ज्योतिष्कवैमानिकानामपि वक्तव्यं, नवरं ते वेदनायामेनवमध्येतव्या–

'दुविहा जोइसिया पन्नत्ता, तंजहा–मायिमिच्छदिट्ठीउववन्नगा य' इत्यादि, अथ

कस्मादेवमधीयते यावता असुरकुमारवत् 'असन्निभूया य' इति किमाधीयते ?, उच्यते, तेष्वसंज्ञीन उत्पादाभावात्, एतदपि कथमवसेयं इति चेत् ?, उच्यते, युक्तिवशात्, तथाहि-

असंख्यायुष उत्कृष्टा स्थितिः पल्योपमासङ्ख्येयभागः ज्योतिष्काणां च जघन्यापि स्थितिः पल्योपमसङ्ख्येयभागः, वैमानिकानां पल्योपमं, ततोऽवसीयते नास्ति तेष्वसंज्ञी, तदभावाद्योपदर्शितप्रकारेणैवाध्येतव्या नासुरकुमारोक्तप्रकारेणेति, तत्र मायिमिथ्यादृष्टयोऽल्पवेद- ना इतरे महावेदनाः शुवेदनामाश्रित्येति ।

अथ चतुर्विंशतिदण्डकमेव सलेश्यपदविशेषितमाहारादिपदैर्निरूपयति-

सू. (४५८) *सलेसा णं भंते ! नेरइया सव्वे समाहारा समसरीरा समुस्सासनिस्सासा सव्वेवि पुच्छा, गो० ! एवं जहा ओहियगमओ तहा सलेसागमओवि निरवसेसो भाणियव्वो जाव वेमाणिया*

कण्हलेसा णं भंते ! नेरइया सव्वे समाहारा पुच्छा, गो० जहा ओहिया, नवरं नेरइया वेयणाए माइमिच्छदिट्ठीउववन्नगा य अमाइसम्मदिट्ठीउववन्नगा य भाणियव्वा, सेसं तहेव जहा ओहियाणं, असुरकुमारा जाव वाणमंतरा, एते जहा ओहिया, नवरं मणुस्साणं किरियाहिं विसेसो जाव तत्थ णं जे ते सम्मदिट्ठी ते तिविहा पन्नत्ता, तंजहा-संजया असंजया संजयासंजया य, जहा ओहियाणं, जोइसियवेमाणिया आइल्लियासु तिसु लेसासु ण पुच्छञ्जंति, एवं जहा किण्हलेसा विचारिया तहा नीललेस्सा विचारेयव्वा, काउलेसा नेरइएहिंतो आरब्भ जाव वाणमंतरा, नवरं काउलेस्सा नेरइया वेदणाए जहा ओहिया ।

तेउलेसा णं भंते ! असुरकुमाराणं ताओ चेव पुच्छाओ, गो० ! जहेव ओहिया तहेव नवरं वेयणाए जहा जोइसिया, पुढविआउवणस्सइपंचेंदियतिरिक्खमणुस्सा जहा ओहिया तहेव भाणियव्वा, नवरं मणूसा किरियाहिं जे संजता ते पमत्ता य अपमत्ता य भाणियव्वा सरागवीयरागा नत्थि, वाणमंतरा तेउलेसाए जहा असुरकुमारा एवं जोइसियवेमाणियावि, सेसं तं चेव,

एवं पम्हलेसावि भाणियव्वा, नवरं जेसिं अत्थि, सुक्कलेसावि तहेव जेसिं अत्थि, सव्वं तहेव जहा ओहियाणं गमओ, नवरं पम्हलेस्ससुक्कलेस्साओ पंचेंदियतिरिक्खजोणियमणूसवेमाणियाणं चेव, न सेसाणंति । पन्नवणाए भगवईए लेस्साए पढमो उद्देसओ समत्तो ।

वृ. 'सलेसा णं भंते ! नेरइया' इत्यादि, यथा अनन्तरमौधिको-विशेषणरहितः प्राक् गम उक्तस्तथा सलेश्यगमोऽपि निरवशेषो वक्तव्यः यावद्वैमानिकाः-वैमानिकविषयं सूत्रं, सलेश्यपदरूपविशेषणमन्तरेणान्यस्य विशेषणस्य क्वचिदप्यभावात् ॥

अधुना लेश्याभेदकृष्णादिविशेषितान् षड् दण्डकानाहारादिपदैर्विभणिषुराह-'कण्हलेसा णं भंते ! नेरइया' इत्यादि, यथा औधिका-विशेषणरहिताः आहारशरीरोच्छ्वासकर्म्मवर्णलेश्यावेदनाक्रियोपपाताख्यैर्नवभिः पदैः प्राग्नैरयिका उक्तास्तथा कृष्णलेश्याविशेषिता अपि वक्तव्याः, नवरं वेदनापदे नैरयिका एवं वक्तव्याः-'माइमिच्छदिट्ठी उववन्नगा य अमायिसम्मदिट्ठीउववन्नगा य' इति, न चौधिकसूत्रे इव 'सन्निभूया य' इति, कस्मादिति चेद्, उच्यते, इहासंज्ञीनः प्रथमपृथिव्यामेवोत्पद्यन्ते

"असन्नी खलु पढम" मिति वचनात्, प्रथमायां च पृथिव्यां न कृष्णलेश्या यत्र च पञ्चम्यादिषु पृथिवीषु कृष्णलेश्या न तत्रासंज्ञीन इति, तत्र मायिनो मिथ्यादृष्टयश्च महावेदना भवन्ति, यतः

प्रकर्षपर्यन्तवर्त्तिनीं स्थितिमशुभां ते निर्वर्तयन्ति, प्रकृष्टायां च तस्यां महती वेदना इतरेषु विपरीतेति

असुरकुमारादयो यावत् व्यन्तरास्तावद्यथा औधिका उक्तास्तथा वक्तव्याः, नवरं मनुष्याणां क्रियाभिर्विशेषः, तमेव विशेषं दर्शयति–'तत्थ णं जे ते' इत्यादि, तत्र–तेषु सम्यग्दृष्ट्यादिषु मध्ये ये ते सम्यग्दृष्टयस्ते त्रिविधाः प्रज्ञप्ताः, तद्यथा–संयता असंयताः संयतासंयताश्च, 'जहा ओहियाण'मिति एतेषां यथौधिकानामुक्तं तथा कृष्णलेश्यापदविशेषितानामपि वक्तव्यं, तद्यथा–संयतानां द्वे क्रिये आरम्भिकी मायाप्रत्यया च, कृष्णलेश्या हि प्रमत्तसंयतानां भवति नाप्रमत्तसंयतानां, तेषां तु यथोक्तरूपे एव द्वे क्रिये, संयतासंयतानां तिस्रः–आरम्भिकी पारिग्रहिकी मायाप्रत्यया च, असंयतानां चतस्रः–आरम्भिकी पारिग्रहिकी मायाप्रत्यया अप्रत्याख्यानक्रिया चेति ।

ज्योतिष्कवैमानिकास्तु आद्यासु तिसृषु लेश्यासु न पृच्छ्यन्ते, किमुक्तं भवति ? –तद्विषयं सूत्रं न वक्तव्यं, तासां तेष्वभावात्, यथा च कृष्णलेश्याविषयं सूत्रमुक्तं तथा नीललेश्याविषयमपि वक्तव्यं, नानात्वाभावात्, एतदेवाह–'एवं जहा किण्हलेसा विचारिया तहा नीललेस्सा विचारेयव्वा' नीललेश्याविषयोऽपि सूत्रदण्डकएवमेव, केवलं कृष्णलेश्यापदस्थाने नीललेश्यापदमुच्चरितव्यमिति भावः, 'कापोतलेस्सा' इत्यादि, कापोतलेश्या हि सूत्रतो नीललेश्येव नैरयिकेभ्य आरभ्य यावद्व्यन्तरास्तावद्वक्तव्या, नवरं कापोतलेश्यायां नैरयिका वेदनासूत्रे यथौधिकास्तथा वक्तव्याः–'नेरइया दुविहा पन्नत्ता–सन्निभूया य असन्निभूया य' इत्येवं वक्तव्या इति भावः, असंज्ञीनामपि प्रथमपृथिव्यामुत्पादात् तत्र च कापोतलेश्याभावात्,

तेजोलेश्याविषयं सूत्रमाह–'तेउलेस्सा णं भंते ! असुरकुमारा' इत्यादि, इह नारकतेजोवायुविकलेन्द्रियाणां तेजोलेश्या न संभवति ततः प्रथमत वासुरकुमारविषयं सूत्रमुक्तं, अत एव तेजोवायुविकलेन्द्रियसूत्रमपि न वक्तवयं, असुरकुमारा अपि यथा प्रागोघत उक्तास्तथा वक्तव्याः, नवरं वेदनापदे यथा ज्योतिष्कास्थाथा वक्तव्याः, 'सन्निभूया य असन्निभूया य' इति न वक्तव्याः, किंतु 'माइमिच्छदिट्ठिउववन्नगा अमाइसम्मदिट्ठिउववन्नगा' इति वक्तव्या इति भावः, असंज्ञीना तेजोलेश्यावत्सूत्पादाभावात्, पृथिव्यब्वनस्पतयः तिर्यक्पञ्चेन्द्रिया मनुष्याश्च यथा प्रागोधिकास्तता वक्तव्याः, नवरं मनुष्याः क्रियाभिर्ये संयतास्ते पमरत्ताश्चप्रमत्ताश्च भणनीयाः, उभयेषामपि तेजोलेश्यायाः संभवात्, 'सरागा वीयरागा य नत्थि'त्ति सरागसंजया वीअरागसंजया य इति न वक्तव्या इत्यर्थः, वीतरागाणां तेजोलश्याया असंभवेन वीतरागपदोपन्यासस्यतेजोलेश्यायाः सरागत्वाव्यभिचारात् सरागपदोपन्यासस्य चायोगात्,

'वाणमंतरा तेउलेसाए जहा असुरकुमारा' इति, तेऽपि 'माइमिच्छदिट्ठिउववन्नगा अमाइसम्मदिट्ठिउववन्नगा य' इत्येवं वक्तव्याः न तु 'सन्निभूया य असन्निभूया य' इति, तेष्वपि तेजोलेश्यावसत्सु मध्येऽसंज्ञीनामुत्पादाभावात् 'एवं पम्हलेसावि भाणियव्वा' इति, एवं–

पदं – १७, उद्देशकः – १ – समाप्तः

–: पदं – १७ – उद्देशकः – २ :–

सू. उक्तः षड्द्वाराद्यर्थाभिधायी प्रथम उद्देशकः, अधुना द्वितीय उद्देशक उच्यते, तत्र चेदमादिसूत्रम्

मू. (४५१) *कइ णं भंते ! लेसाओ पन्नत्ताओ ?, गोयमा ! छल्लेसाओ पन्नत्ताओ, तंजहा–कण्हलेसा नीललेसा काउलेसा तेउलेसा पम्हलेसा सुक्कलेसा।*

वृ. 'कइ णं भंते ! लेसाओ' इत्यादि, कः पुनरस्य सूत्रस्य सम्बन्ध इति चेद् ?, उच्यते, उक्तं प्रथमोद्देशके 'सलेसा णं भंते ! नेरइया' इत्यादि इह तु ता एव लेश्याश्चिन्त्यन्ते 'कइ लेसा' इति, तत्र लेश्याः प्राग्निरूपतिशब्दार्थाः 'कइ'त्ति किंपरिमाणाः प्रज्ञप्ताः ?, भगवानाह–गौतम ! षड्, ता एव नामतः कथयति–'कण्हलेसा' इत्यादि, कृष्णद्रव्यात्मिका कृष्णद्रव्यजनिता वा लेश्या कृष्णलेश्या एवं नीललेश्येत्यादिपदेष्वपि भावनीयं।

मू. (४५२) *नेरइयाणं भंते! कइ लेसाओ पन्नत्ताओ ?, गो० !तिन्नि, तं–०किण्ह– नील० काउलेसा। तिरिक्खजोणियाणं भंते ! कइ लेस्साओ पन्नत्ताओ ?, गो० ! छल्लेसाओ पं०, तं०–कण्हलेस्सा जाव सुक्कलेसा।*

एगिंदियाणं भंते ! कइ लेसाओ पं० ?, गो० चत्तारि लेसाओ पं०, तं०–कण्ह– जाव तेउलेसा। पुढविकाइयाणं भंते ! कइ लेसाओ पं० गो० ! एवं चेव, आउवणस्सइकाइयाणवि एवं चेव, तेउवाउबेइंदियतेइंदियचउरिंदियाणं जहा नेरइयाणं। पंचेंदियतिरिक्खजोणियाणं पुच्छा, गो० ! छल्लेस्सा–कण्ह० जाव सुक्कलेसा, संमुच्छि- मपंचेंदियतिरिक्खजोणियाणं पुच्छा, गो० ! जह नेरइयाणं, गब्भवक्कंतियपंचेंदियतिरिक्खजोणियाणं पुच्छा, गो० ! छल्लेस, कण्ह० जाव सुक्कलेसा, तिरिक्खजोणियाणं पुच्छा, गो० ! छल्लेसा एयाओ चेव।

मणूसाणं पुच्छा, गो० ! छल्लेसा एयाओ चेव, संमुच्छिममणुस्साणं पुच्छा, गो० ! जहा नेरइयाणं, गब्भवक्कंतियमणुस्साणंपुच्छा, गो० ! छल्लेसाओ तं० कण्ह० जाव सुक्कलेसा, मणुस्सीणं पुच्छा, गो० ! एवं चेव। देवाणं पुच्छा, गो० ! छ एयाओ चेव, देवीणं पुच्छा, गो० ! चत्तारि कण्ह० जाव तेउलेस्सा, भवणवासीणं भंते ! देवाणंपुच्छा, गो० ! एवं चेव, एवं भवणवासिणीणवि, वाणमंतरदेवाणंपुच्छा, गो० ! एवं चेव, वाणमंतरणवि, जोइसियाणपुच्छा, गो० ! एगा तेउलेसा, एवं जोइसिणीणवि। वेमाणियाणंपुच्छा, गो० ! तिन्नि, तं० तेउ० पम्ह० सुक्कलेस्सा, वेमाणिणीणं पुच्छा, गो० ! एगा तेउलेस्सा।

वृ. 'नेरइयाणं भंते !' इत्यादि, सूत्रमल्पबहुत्ववक्तव्यतायाः प्राक् सकलमपि सुगमं, नवरं वैमानिकसूत्रे यद्वैमानिकानामेका तेजोलेश्योक्ता तत्रेदं कारणं–वैमानिक्यो हि देव्यः सौधर्म्मेशानयोरेव, तत्र च कवला तेजोलेश्येति, सामान्यतः सङ्ग्रहणिगाथा अत्रेमाः–

॥ १ ॥ "किण्हा नीला काऊ तेऊलेसा य भवणवंतरिया।
जोइससोहम्मीसाण तेउलेसा मुणेयव्वा॥

॥ २ ॥ कप्पे सणंकुमारे माहिंदे चेव बंभलोए य।
–एएसु पम्हलेसा तेणं परं सुक्कलेसा उ॥

॥ ३ ॥ पुढवी आउ वणस्सइ बायर पत्तेय लेस चत्तारि।
गब्भयतिरियनरेसुं छल्लेसा तिन्नि सेसाणं॥"

सम्प्रति लेश्यादीनामष्टानामल्पबहुत्वमाह–'एएसि णं भंते ! जीवाणं सलेस्साण' मित्यादि, अमीषामष्टानां मध्ये कतरे कतरेभ्योऽल्पाः कतरे कतरेभ्यो बहवः कतरे कतरैः सह तुल्याः, इह

प्राकृतत्वात् तृतीयायामपि कतरेहिंतो निर्देशोऽयं भवतीत्येवं व्याख्यायामदोषः, तथा कतरे कतरेभ्यो विशेषाधिकाः ?, एवं गौतमेन प्रश्ने कृते भगवानाह–

गौतम! सर्वस्तोकाः शुक्ललेश्याः, शुक्ला शुक्लद्रव्यजनिती वा लेश्या येषां ते शुक्ललेश्याः, एवं शेषपदेष्वपि विग्रहभावना कार्या, सर्वस्तोकाः, कतिपयेषु पञ्चेन्द्रियतिर्यक्षु मनुष्येषु च लान्तकादिदेवेषु च तस्याः सद्भावात्, तेभ्यः पद्मलेश्याः सङ्ख्येयगुणाः, सङ्ख्येयगुणेषु तिर्यक्पञ्चेन्द्रियेषु मनुष्येषु सनत्कुमारमाहेन्द्रब्रह्मलोककल्पवासिषु च देवेषु पद्मलेश्याभावात्, अथ लान्तकादिदेवेभ्यः सनत्कुमारादिकल्पत्रयवासिनो देवा असङ्ख्यातगुणाः ततः शुक्ललेश्येभ्यः पद्मलेश्याः असङ्ख्येयगुणाः प्राप्नुवन्ति कथं सङ्ख्येयगुणा उक्ताः ?, उच्यते,

इह जघन्यपदेऽप्यसङ्ख्यातानां सनत्कुमारादिकल्पत्रयवासिदेवेभ्योऽसङ्ख्येयगुणानां पञ्चेन्द्रियतिरश्चां शुक्ललेश्या ततः पद्मलेश्याचिन्तायां सनत्कुमारादिदेवप्रक्षेपेऽप्यसङ्ख्येयगुणत्वं न भवति किं तु यदेव तिर्यक्पञ्चेन्द्रियापेक्षयैव सङ्ख्येयगुणत्वं तदेवास्तीति।

मू. (४५३) एतेसि णं भंते! जीवाणं सलेस्साणं कण्हलेसाणं जाव सुक्कलेसाणं अलेस्साण य कयरे २ अप्पा वा ४ ?, गो० ! सव्वत्थोवा जीवा सुक्कलेस्सा पम्हलेस्सा संखेज्जगु० तेउलेस्सा संखेज्जगु० अलेस्सा अनंतगु० काउलेसा अनंतगु० नीललेसा विसेसाहिया कण्हलेसा विसेसाहिया लेस्सा विसेसाहिया।

वृ. सङ्ख्येयगुणाः शुक्ललेश्येभ्यः पद्मलेश्याः, तेभ्योऽपि सङ्ख्येयगुणाः तेजोलेश्या, बादरपृथिव्यप्प्रत्येकवनस्पतिकायिकेषु सङ्ख्येयगुणेषु तिर्यक्पञ्चेन्द्रियमनुष्येषु भवनपतिव्यन्तरज्योतिष्कसौधर्मेशानदेवेषु च तेजोलेश्याभावात्, भावना सङ्ख्येयगुणत्वे प्राग्वदत्रापि कर्त्तव्या, तेभ्योऽप्यनन्तगुणा अलेश्याः, सिद्धानामलेश्यानां प्राक्तनेभ्योऽनन्तगुणत्वात्, तेभ्योऽपि कापोतलेश्या अनन्तगुणाः, सिद्धेभ्योऽप्यनन्तगुणानां वनस्पतिकायिकानां कापोतलेश्यावतां सद्भावात्, तेभ्योऽपि नीललेश्या विशेषाधिकाः, तेभ्योऽपि कृष्णलेश्या विशेषाधिकाः, क्लिष्टक्लिष्टतराध्यवसायानां प्रभूततराणां सद्भावात्, कृष्णलेश्येभ्योऽपि सलेश्या विशेषाधिकाः नीललेश्यादीनामपि तत्र प्रक्षेपात् तदेवं सामान्यतोऽल्पबहुत्वं चिन्तितं,

सम्प्रति नैरयिकेषु तदल्पबहुत्वं चिन्तयन्नाह–

मू. (४५४) एएसि णं भंते! नेरइयाणं कण्हलेसाणं नीललेस्साण काउलेस्साण य कयरे २ हिंतो अप्पा वा ४ ?, गो० ! सव्वथोवा नेरइया कण्हलेसा नीललेसा असं० काउले० असं० ।

वृ. 'एएसि णं भंते! नेरइयाण'मित्यादि, नैयरिकाणां हि तिस्रो लेश्याः, तद्यथा–कृष्णलेश्या नीललेश्या कापोतलेश्या, उक्तं च-

॥१॥ "काउय दोसु तईयाए मीसिया नीलिया चउत्थीए।
पंचमियाए मिस्सा कण्हा तत्तो परमकण्हा ॥"

ततोऽत्र त्रयाणामेव पदानां परस्परमल्पबहुत्वचिन्ता, तत्र सर्वस्तोकाः कृष्णलेश्यानैरयिकाः, कतिपयपञ्चमपृथिवीगतनरकावासेषु षष्ठ्यां सप्तम्यां च पृथिव्यां नैरयिकाणां कृष्णलेश्यासद्भावात्, ततोऽसङ्ख्येयगुणा नीललेश्याः, कतिपयेषु तृतीयपृथिवीगतनरकावासेषु चतुर्थ्यां समस्तायां पृथिव्यां कतिपयेषु च पञ्चमपृथिवीगतनरकावासेषु नैरयिकाणां पूर्वोक्तेभ्योऽसङ्ख्येयगुणानां

नीललेश्याभावात्, तेभ्योऽप्यसङ्ख्येयगुणाः कापोतलेश्याः, प्रथमद्वितीयपृथिव्योस्तृतीयपृथिवी गतेषु च कतिपयेषु नरकावासेषु नारकाणमनन्तरोक्तेभ्योऽसङ्ख्येयगुणानां कापोतलेश्यासद्भावात

मू. (४५५) *एतेसि णं भंते! तिरिक्खजोणियाणं कण्हलेस्साणं जाव सुक्कलेसाण य कयरे २ ?, अप्पा वा ४ गो० ! सव्व० तिरिक्खजोणिया सुक्कलेसा एवं जहा ओहिया नवरं अलेस वज्जा, एएसिं एगिंदियाणं कण्ह० नील० काउ० तेउलेस्साण य कयरे कयरेहिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा एगिंदिया तेउलेस्सा, काउ० अणं० नीलले० विसेसा० कण्हलेसा०*

एएसि णं भंते! पुढविकाइयाणं कण्हलेसाणं जाव तेउलेस्साण य कयरे कयरेहिंतो अप्पा वा ४ ?, गो० ! जहा ओहिया एगिंदिया नवरं काउलेस्सा असंखेज्जगुणा, एवं आउकाइयाणवि,

एतेसि णं भंते! तेउकाइयाणं कण्हलेस्साणं नीललेस्साणं काउलेस्साण य कयरे कयरेहिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा तेउकाइया काउलेस्सा नीललेस्सा विसेसाहिया कण्हलेस्सा विसेसाहिया, एवं वाउकाइयाणवि,

एतेसि णं भंते ! वणस्सइकाइयाणं कण्हलेस्साणं जाव तेउलेस्साण य जहा एगिंदिय० ओहियाणं, बेइंदियाणं तेइंदियाणं चउरिंदियाणं जहा तेउकाइयाणं,

एएसि णं भंते! पंचेंदियतिरिक्खजोणियाणं कण्हलेसाणं एवं जाव सुक्कलेसाण य कयरे कयरेहिंतो अप्पा वा ४ ?, गो० ! जहा ओहियाणं तिरिक्खजोणियाणं नवरं काउलेस्सा असंखेज्जगुणा, संमुच्छिमपंचेंदियतिरिक्खजोणियाणं जहा तेउकाइयाणं, गब्भवक्कंतियपंचेंदियतिरिक्खजोणियाणं जहा ओहियाणं तिरिक्खजोणियाणं नवरं काउलेस्सा संखेज्जगुणा, एवं तिरिक्खजोणियाणवि,

एएसि णं भंते! संमुच्छिमपंचेंदियतिरिक्खजोणियाणं गब्भवक्कंतियपंचेंदियतिरिक्खजोणियाण य कण्ह० जाव सुक्कलेसाण य कयरे कयरेहिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा गब्भवक्कंतियपंचेंदियतिरि० सुक्क० पम्ह० संखेज्जगुणा तेउले० संखे० काउ० संखे० नीललेस्सा विसेसा० कण्हलेसा विसेसा० काउलेसा संमुच्छिमपंचेंदियतिरिक्खजोणिया असंखेज्ज० नीललेसा विसेसा० कण्हलेसा विसेसा०,

एएसि णं भंते ! संमुच्छिमपंचेंदियतिरिक्खजोणियाणं तिरिक्खजोणिणीण य कण्हले० जाव सुक्कलेसाण य कयरे कयरेहिंतो अप्पा वा ४ ?, गो० ! जहेव पंचमं तहा इमं छट्ठं भाणियव्वं,

एएसि णं भंते! गब्भवक्कंतियपंचेंदियतिरिक्खजोणियाणं तिरिक्खजोणिणीण य कण्हलेसाणं जाव सुक्कलेसाण य कयरे कयरेहिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा गब्भवक्कंतियपंचेंदियतिरिक्खजोणियाण सुक्कलेसा सुक्कलेसाओ तिरिक्खजोणिणीओ संखेज्जगुणाओ पम्हलेसा गब्भवक्कंतियपंचेंदियतिरिक्खजोणिया संखे० पम्हलेसाओ तिरिक्खजोणिणीओ संखेज्ज० तेउले० तिरिक्खजोणिया संखे० तेउलेसा तिरिक्खजोणिणीओ सं० काउले-० सं० नीलले० विसेसा० कण्हले० विसेसा० काउलेसाओ सं० नीललेसाओ विसेसाहियाओ कण्हलेसाओ विसेसाहियाओ,

एएसि णं भंते! संमुच्छिमपंचे० तिरिक्खजोणि० गब्भवक्कंतियपंचे० तिरिक्खजोणिणीण य कण्हलेसाणं जाव सुक्कलेस्साण य कयेर कयरेहिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा गब्भ० तिरिक्खजोणिया सुक्कलेसा सुक्कलेसाओ संखेज्जगुणाओ पम्हलेसा गब्भव० संखेज्ज- पम्हलेसाओ तिरिक्खज० संखेज्जगुणाओ तेउलेसा गब्भव० तिरिक्ख० संखेज्जगु० तेउलेसाओ तिरि०

संखेज्जगुणाओ काउलेसाओ सं० निललेसा विसे० कण्हले० विसे० काउलेसा वि० कण्हलेसाओ विसेसाहियाओ कण्हले० संपु० पंचेंदि० तिरिअ० सं० नीलले० विसे० कण्हले० विसेसाहिया

एएसि णं भंते ! पंचेंदियतिरिक्खजोणियाणं तिरिक्खजोणिणीण य कण्हलेस्साणं जाव सुक्कलेसाणं कयरे कयरेहिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा पंचेंदियतिरि० सुक्कलेस्सा सुक्कलेसाओ संखि० पम्हलेसा सं० पम्हलेसाओ संखेज्जगुणाओ तेउलेसा सं० तेउलेस्साओ संखिज्जगुणाओ काउले० संखे० नीललेसाओ विसेसाहियाओ कण्हलेसाओ विसेसा० काउले० असंखेज्जगुणा नीलले० विसे० कण्हले० विसेसाहियाओ, एएसि णं भंते ! तिरि० तिरिक्खजोणिणीण य कण्हले० जाव सुक्क० कयरे कयरेहिंतो अप्पा वा ४ ?, गो० ! जहेव नवमं अप्पाबहुगं तहा इमंपि, नवरं काउले० तिरि० अनं०, एवं एते दस अप्पाबहुगा तिरिक्खजोणियाणं ।

वृ. अधुना तिर्यक्पञ्चेन्द्रियेष्वल्पबहुत्वमाह--'एएसि णं भंते !' इत्यादि, 'एवं जहा ओहिया' इति एवम्--उपदर्शितेन प्रकारेण यथा प्रागौधिकास्तथा वक्तव्याः, नवरमलेश्यावर्जाः, तिरश्चामलेश्यानामसंभवात्, ते चैवं--सर्वस्तोकाः तिर्यगोनिकाः शुक्ललेश्याः, ते च जघन्यपदेऽप्यसङ्ख्याता द्रष्टव्याः, तेभ्य सङ्ख्येयगुणाः पद्मलेश्याः, तेभ्योऽपि सङ्ख्येयगुणास्तेजोलेश्याः, तेभ्योऽप्यसङ्ख्येयगुणाः कापोतलेश्याः, तेभ्योऽपि नीललेश्याः विशेषाधिकाः, तेभ्योऽपि कृष्णलेश्या विशेषाधिकाः, तेभ्योऽपि सलेश्या विशेषाधिकाः । साम्प्रतममेकेन्द्रियेष्वल्पबहुत्वमाह--

'एएसि णं भंते ! एगिंदियाण' मित्यादि, सर्वस्तोका एकेन्द्रियास्तेजोलेश्याः, कतिपयेषु बादरपृथिव्यब्वनस्पतिकायिकेष्वपर्याप्तावस्थायां तस्याः सद्भावात्, तेभ्यः कापोतलेश्या अनन्तगुणाः, अनन्तानां सूक्ष्मबादरनिगोदजीवानां कापोतलेश्यास-द्भावात्, तेभ्योऽपि नीललेश्या विशेषाधिकाः, तेभ्योऽपि कृष्णलेश्या विशेषाधिकाः, अत्र भावना प्रागेवोक्ता ।

सम्प्रति पृथिवीकायिकादिविषयमल्पबहुत्वं वक्तव्यं, तत्र पृथिव्यब्वनस्पतिकायानां चतस्रो लेश्याः तेजोवायूनां तिस्र इति तथैव सूत्रमाह-- 'एएसि णं भंते ! पुढविकाइयाण' मित्यादि, सुगमं, द्वित्रिचतुरिन्द्रियविषयमपि, पञ्चेन्द्रियतिर्यग्योन्द्रियतिरश्चां यथा तेजस्कायिकानामुक्तं तथा वक्तव्यं, तेजस्कायिकानामिव तेषामप्याद्यलेश्यात्रयमात्रसद्भावात्, गर्भव्युत्क्रान्तिकपञ्चेन्द्रियतिर्यग्योनिकसूत्रे तेजोलेश्याभ्यः कापोतलेश्या असङ्ख्येयगुणा वक्तव्याः, तावतामेव तेषां केवलवेदसोपलब्धत्वात्, शेषमौधिकसूत्रवद् वक्तव्यं, एवं तिर्यग्योनिकानामपि सूत्रं वक्तव्यं, तथा चाह--'एवं तिरिक्खजोणिणीणवि' ।

अधुना संमूर्च्छिमगर्भव्युत्क्रान्तिकतिर्यक्पञ्चेन्द्रियतिर्यक्स्त्रीविषयं सूत्रमाह--'एएसि णं भंते !' इत्यादि सुगमं, एतच्च प्रागवद् भावनीयं, इदं किल पञ्चेन्द्रियतिर्यग्योनिकाधिकारे षष्ठं सूत्रमनन्तरोक्तं च पञ्चममत उक्तं 'जहेव पंचमं तहा इमं छट्ठं भाणियव्वं', अधुना गर्भव्युत्क्रान्तिकतिर्यक्पञ्चेन्द्रियतिर्यक्स्त्रीविषयं सप्तमं सूत्रमाह--

'एएसि णं भंते !' इत्यादि सुगमं, नवरं सर्वास्वपि लेश्यासु स्त्रियः प्रचुराः, सर्वसङ्ख्ययापि च तिर्यक्पुरुषेभ्यस्तिर्यक्स्त्रियस्त्रिगुणाः ''तिगुणा तिरूवअहिया तिरियाणं इत्थिया मुणेयव्वा'' इति वचनात्, ततः सङ्ख्यायतगुणा उक्ताः, नपुसकास्तु गर्भव्युत्क्रान्तिकाः कतिपय इति न ते यथोक्तमल्पबहुत्वं व्याप्नुवन्ति, सम्प्रति समूर्च्छिमपञ्चेन्द्रियतिर्यग्योनिकगर्भव्युत्क्रान्तिक-

पञ्चेन्द्रियतिर्यग्योनिकतिर्यक्स्त्रीविषयमष्टमं सामान्यतः पञ्चेन्द्रियतिर्यग्योनिकतिर्यक्स्त्रीविषयं नवमं सामान्यतस्तिर्यग्योनिकतिर्यक्स्त्रीविषयं दशमं सूत्रमाह–

मू. (४५६) *एवं मणुस्साणवि अप्पाबहुगा भाणियव्वा, नवरं पच्छिमगं अप्पाबहुगं नत्थि*

वृ. 'एएसि णं भंते !' इत्यादि भावना प्रागुक्तानुसारेण कर्त्तव्या, तिर्यग्योनिकविषयसूत्रसंकलनामाह–'एवमेए दस अप्पाबहुगा तिरिक्खजोणियाण'मिति सुगमं, नवरमिहेमे पूर्वाचार्यप्रदर्शिते सङ्ग्रहणिगाथे–

॥ १ ॥ "ओहिय पणिंदि १ संमुच्छिमा २ य गब्भे ३ तिरिक्खिइत्थीओ ४ ।
संमुच्छगब्भतिरिया ५ मुच्छतिरिक्खी य ६ गब्भंमि ७ ॥
॥ २ ॥ सम्मुच्छिमगब्भ इत्थी ८ पणिंदितिरिगित्थीया ९ य ओहित्थी १० ।
दस अप्पबहुगभेया तिरियाणं होंति नायव्वा ॥"

यथा तिरश्चामल्पबहुत्वान्युक्तानि तथा मनुष्याणामपि वक्तव्यानि, नवरं पश्चिमं दशममल्पबहुत्वं नास्ति, मनुष्याणामनन्तत्वाभावात्, तदभावे काउलेसा अनंतगुणा इति पदासम्भवात्,

मू. (४५७) *एएसि णं भंते ! देवाणं कण्हलेस्स जाव सुक्कलेसाण य कयरे कयरेहिंतो ?, अप्पा वा ४ गो० ! सव्वत्थोवा देवा सुक्कले० पम्हलेस्सा असं० काउले० असं० नीललेस्सा विसेसा० कण्ह० विसेसा० तेउलेसा संखेज्जगुणा, एएसि णं भंते ! देवीणं कण्हले० जाव तेउलेसाण य कयरे कयरेहिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा देवीओ काउले० नीललेसाओ विसे० कण्हले० विसेसा० तेउले० संखे एव,*

एएसि णं भंते ! देवाणं देवीण य कण्हले० जाव सु० कयरे २ अप्पा वा ४ ?, गो० ! सव्वत्थोवा देवा सुक्कले० पम्हले० असं० काउले० असं० नीलले० विसे० कण्हले० विसे० काउले० देवीओ संखे० नीलले० विसे० कण्हले० विसे० तेउले० देवा संखे० तेउ० देवीओ संखे०, एएसि णं भंते ! भवणवासीणं देवाणं कण्हेल० जाव तेउलेस्साण य कयेर २ अप्पा वा ४, गो० ! सव्व० भवणवासी देवा तेउले० काउलेसा० असं० नीललेसा विसे० कण्हलेसा विसेसा

एतेसि णं भंते ! भवणवासिणीणं देवीणं कण्हले० जाव तेउले० कतरे कतरेहिंतो अप्पा वा ४ ?, गो० ! एवं चेव, एएसि णं भंते ! भवणवासीणं देवाणं देवीण य कण्हलेसाणं जाव तेउलेसाण य कयरे २ ? अप्पा वा ४ ?, गो० ! सव्वत्थोवा० भवणवासी देवा तेउलेसा भवणसिणीओ तेउलेसाओ संखे० काउले० भवणवासीओ असंखे० नीललेसा विसे० कण्हलेसा विसे० काउलेसाभवणवासिणीओ देवीओ संखेज्जगु० नीलले० भवणवासीओ असंखे० नीललेसा विसे० कण्हलेसा विसे० काउलेसाभवणवासिणीओ देवीओ संखेज्जगु० नीलले० विसे० कण्हलेसाओ विसेसाहियाओ, एवं वाणमंत० तिन्नेव अप्पाबहुया जहेव भवणवासिणं तहेव भा० ।

एतेसि णं भंते ! जोइसि० देवाणं देवीण य तेउलेसाणं कयरे २ ? अप्पा वा ४ ?, गो० ! सव्वत्थो० जोइसिया देवा तेउले० जोइसिणीओ देवीओ० देवीओ० तेउले० संखेज्जाओ । एएसि णं भंते ! वेमाणियाणं देवाणं तेउले० पम्हलेसाणं सुक्कलेसाण य कयरे २ ? अप्पा वा ४ ? गो० ! सव्वत्थो० वेमाणिया देवा सुक्कलेस्सा पम्हलेसा असं० तेउलेसा० असं०,

एतेसि णं भंते ! वेमाणियाणं देवाणं देवीण य तेउलेसा० पम्हसुक्कलेस्साण य कयरे २

अप्पा वा ४ ?, गो० ! सव्वत्थोवा वेमाणिया देवा सुक्कलेस्सा पम्हलेस्सा असंखेज्जगुणा तेउलेस्सा असंखेज्जगुणा तेउलेसाओ वेमाणिणीओ देवीओ संखेज्जगुणाओ,

एएसि णं भंते ! भवणवासीदेवाणं वाणमंतराणं जोइसियाणं वेमाणियाण य देवाण य कण्हलेसाणं जाव सुक्कलेसाणं कयरे २ अप्पा वा ४ ?, गो० !, सव्वत्थोवा वेमाणिया देवा सुक्कलेस्सा पम्हलेस्सा असंखेज्जगुणा तेउलेस्सा असंखेज्जगुणा तेउलेसा भवणवासीदेवा असं० काउलेस्सा असं० नीलले० विसेसा० कण्हले० विसेसा० तेउलेसा वाणमंतरा देवा असं० काउले० असं० नीलले० विसेसा कण्हले० विसेसा तेउलेसा जोइसिया देवा संखे०,

एएसि णं भंते ! भवणवासिणीणं वाणंतरीणं जोइसिणीणं वेमाणिणीण य कण्हलेसाणं जाव तेउलेस्साण य कयरे २ ?, गो० ! सव्वत्थोवाओ देवीओ वेमाणिणीओ तेउलेसाओ भवणवासिणीओतेउलेसाओ असं० काउलेसाओ असं० नीललेसाओ विसेसा० कण्हले० विसेसा० तेउलेसाओ वाणमंतरीओ देवीओ असं० काउले० असं० नीललेसाओ विसेसा० कण्हलेसाओ विसेसा० तेउलेसाओ जोइसिणीओ देवीओ संखेज्जगुणाओ ॥

एएसि णं भंते ! भवणवासीणं जाव वेमाणयाणं देवाण य देवीण य कण्हलेसाणं जाव सुक्कलेसाण य कयरे २ अप्पा वा ४ ?, गो० ! सव्वत्थोवा वेमाणिया देवा सुक्कलेसा पम्हलेसा असंखे० तेउलेसा असंखे० तेउलेसाओ वेमाणियदेवीओ संखे० तेउले० भवणवासीदेवा असं० तेउलेसाओ भवणवासीदेवीओ संखे० काउलेसा भवणवासी असं० नीलले० विसेसा० कण्हले० विसेसा० काउलेसाओ भवणवासिणिओ संखे० निलले० विसेसाहियाओ कण्हलेसाओ विसे० तेउलेसा वाणमंतरा सं० तेउलेसाओ वाणमंतरीओ संखे० काउले० वाणमंतरा असं० नीलले० विसेसा० कण्हले० विसेसा० काउले० वाणमं० संखे० नीललेसाओ विसे० कण्हलेसा विसेसा० तेउले० जोइसिया संखे० तेउले० जोइसिणीओ संखिज्जुणाओ ।

वृ. अधुना देवविषयमल्पबहुत्वमाह-'एएसि णं भंते ! देवाण'मित्यादि, सर्वस्तोका देवाः शुक्ललेश्याः, लान्तकादिदेवलोकेष्वेव तेषां सद्भावात्, तेभ्यः पद्मलेश्याः असङ्ख्येयगुणाः, सनत्कुमारमाहेन्द्रब्रह्मलोककल्पदेवेषु पद्मलेश्याभावात्, तेषां च लान्तकादिदेवेभ्योऽसङ्ख्यातगुणत्वात्, तेभ्यः कापोतलेश्याः असङ्ख्येयगुणाः, भवनपतिव्यन्तरदेवेषु सन्तकुमारादिदेवेभ्योऽसङ्ख्येयगुणेषु कापोतलेश्यासद्भावात्, तेभ्योऽपि नीललेश्या विशेषाधिकाः, प्रभूततराणां भवनपतिव्यन्तराणां तस्याः सम्भवात्, तेभ्योऽपि कृष्णलेश्या विशेषाधिकाः प्रभूततमानां तेषां कृष्णलेश्याकत्वात्, तेभ्योऽपि तेजोलेश्याः सङ्ख्येयगुणाः, कतिपयानां भवनपतिव्यन्तराणां समस्तानां ज्योतिष्कसौधर्म्मेशानदेवानां तेजोलेश्याभावात् ॥

अधुना देवीविषयं सूत्रमाह-'एएसि णं भंते ! देवीण'मित्यादि देव्यश्च सौधर्म्मेशानान्ता एव न परत इति तासां चतस्र एव लेश्यास्ततस्तद्विषयमेवाल्पबहुत्वमभिधित्सुना 'जाव तेउलेस्साण य' इत्युक्तं सर्वस्तोका देव्यः कापोतलेश्याः कतिपयानां भवनपतिव्यन्तरदेवीनां कापोतलेश्याभावात् तेभ्यो विशेषाधिका नीललेश्याः प्रभूतानां भवनपतिव्यन्तरदेवीनां तस्याः संभवात् तेभ्योऽपि कृष्णलेश्या विशेषाधिकाः प्रभूतानां तासां कृष्णलेश्याकत्वात्, ताभ्यस्तेजोलेश्याः सङ्ख्येयगुणाः, ज्योतिष्कसौधर्म्मेशानदेवीनामपि समस्तानां तेजोलेश्याकत्वात् ।

सम्प्रति देवदेवीविषयं सूत्रमाह-'एएसि ण'मित्यादि, सर्वस्तोका देवाः शुक्ललेश्याः, तेभ्योऽसङ्ख्येयगुणाः पद्मलेश्याः, तेभ्योऽप्यसङ्ख्येयगुणाः कापोतलेश्याः, तेभ्यो नीललेश्या विशेषाधिकाः, तेभ्योऽपि कृष्णलेश्या विशेषाधिकाः, एतावत्प्रागेव भावितं, तेभ्योऽपि कापोतलेश्याका देव्यः सङ्ख्येयगुणाः, ताश्च भवनपतिव्यन्तरनिकायान्तर्गता वेदितव्याः,अन्यत्र देवीनां कापोतलेश्याया असंभवात्, देव्यश्च देवेभ्यः सामान्यतःप्रतिनिकायं द्वात्रिंशद्गुणाःततः कृष्णलेश्येभ्यो देवेभ्यः कापोतलेश्या देव्यः सङ्ख्येयगुणा अपि घटन्ते, ताभ्यो नीललेश्या विशेषाधिकाः, ताभ्यः कृष्णलेश्या विशेषाधिकाः, अत्रापि प्राग्वद् भावना, ताभ्योऽपि तेजोलेश्या देवाः सङ्ख्येयगुणाः, कतिपयानां भवनपतिव्यन्तराणां समस्तानां ज्योतिष्कसौधर्म्मेशानदेवानां तेजोलेश्याकत्वात्, तेभ्योऽपि तेजोलेश्याका देव्यः सङ्ख्येयगुणाः द्वात्रिंशद्गुणत्वात् ।

सम्प्रति भवनवासिदेवविषयं सूत्रमाह-'एएसि णं भंते!' इत्यादि, सर्वस्तोकास्तेजोलेश्या महर्द्धयो हि तेजोलेश्याका भवन्ति महर्द्धयश्चाल्पे इति ते सर्वस्तोकाः, तेभ्योऽसङ्ख्येयगुणाः कापोतलेश्याः, अतिशयेन प्रभूतानां कापोतलेश्यासंभवात्, तेभ्यो नीललेश्या विशेषाधिकाः, अतिप्रभूततमानां कृष्णलेश्याभावात् । एवं भवनपतिदेवीविषयमपि सूत्रं भावनीयं ।

अधुना भवनपतिदेवदेवीविषयं सूत्रमाह-'एएसि ण'मित्यादि, सर्वस्तोका भवनवासिनो देवाः तेजोलेश्याकाः, युक्तिरत्र प्रागेवोक्त, तेभ्यस्तेजोलेश्याका भवनवासिन्यो देव्यः सङ्ख्येयगुणाः देवेभ्यो हि देव्यः सामान्यतः प्रतिनिकायं द्वात्रिंशद्गुणास्तत उपपद्यते सङ्ख्येयगुणत्वमिति, तेभ्यः कापोतलेश्या भवनवासिनो देवा असङ्ख्येयगुणाः, तेभ्यो नीललेश्या विशेषाधिकाः, तेभ्योऽपि कृष्णलेश्या विशेषाधिकाः, युक्तिरत्र प्रागुक्ताऽनुसरणीया, तेभ्यः कापोतलेश्या भवनवासिन्यो देव्यः सङ्ख्येयगुणाः, भावना प्रागुक्तभावनानुसारेण भावनीया, ताभ्यो नीललेश्या विशेषाधिकाः, ताभ्यः कृष्णलेश्या विशेषाधिकाः, एवं वानमन्तरविषयमपि सूत्रत्रयं भावनीयं, ज्योतिष्कविषयमेकमेव सूत्रं, तन्निकाये तेजोलेश्याव्यतिरेकेण लेश्यान्तरासम्भवतः पृथग् देवदेवीविषयसूत्रद्वयासम्भवात्,

वैमानिकदेवविषयं सूत्रमाह-'एएसि णं भंते! वेमाणियाण'मित्यादि, सर्वस्तोका वैमानिका देवाः शुक्ललेश्याः, लान्तकादिदेवानामेव शुक्ललेश्यासम्भवात्, तेषां चोत्कर्षतोऽपि श्रेण्यसङ्ख्येयभागगतप्रदेशराशिमानत्वात्, तेभ्यः पद्मलेश्या असङ्ख्येयगुणाः, सनत्कुमारमाहेन्द्रब्रह्मलोककल्पवासिनां सर्वेषामपि देवानां पद्मलेश्यासम्भवात्, तेषां चातिबृहत्तमश्रेण्यसङ्ख्येयभागवर्त्तिनभःप्रदेशराशिप्रमाणत्वात्, लान्तकादिदेवपरिमाणहेतुश्रेण्यसङ्ख्येयभागापेक्षया ह्यमीषां परिमाणहेतुः श्रेण्यसङ्ख्येयभागोऽसङ्ख्येयगुणः, तेभ्योऽपि तेजोलेश्या असङ्ख्येयगुणाः तेजोलेश्या हि सौधर्म्मशानदेवानां, ईशानदेवाश्चाङ्गुलमात्रक्षेत्रप्रदेशराशेः सम्बन्धिनि द्वितीयवर्गमूलेतृतीयेन वर्गमूलेन गुणिते यावत् प्रदेशराशिर्भवति तावत्प्रमाणासु श्रेणिषु यावन्तो नभःप्रदेशाः तावत्प्रमाण ईशानकल्पगतदेवदेवीसमुदायः, तद्गतकिञ्चिदूनद्वात्रिंशत्तमभागकल्पा देवाः, तेभ्योऽपि च सौधर्म्मकल्पदेवाः सङ्ख्येयगुणाः, ततो भवन्ति पद्मलेश्येभ्यस्तेजोलेश्या असङ्ख्येयगुणाः,देव्यश्च सौधर्म्मेशानकल्पयोरेव, तत्र च केवला तेजोलेश्या, ततो लेश्यान्तरासम्भवान्न तद्विषयं पृथग्सूत्रं अतः । सम्प्रति देवदेवीविषयं सूत्रमाह-'एएसि णं भंते!

वेमाणियाणं देवाणं देवीण य' इत्यादि सुगमं, नवरं 'तेउलेसाओ वेमाणिणीओ देवीओ संखेज्जगुणाओ' इति, देवेभ्यो देवीनां द्वात्रिंश- द्गुणत्वात् ॥

अधुना भवनपतिव्यन्तरज्योतिष्कवैमानिकविषयं सूत्रमाह--'एएसि णं भंते ! भवणवासीण'मित्यादि, तत्र सर्वस्तोका वैमानिका देवाः शुक्ललेश्याः पद्मलेश्या असङ्ख्येयगुणाः, तेजोलेश्या असङ्ख्येयगुणा इत्यत्र भावनाऽनन्तरमेव कृता, तेभ्योऽपि भवनवासिनो देवास्तेजोलेश्याका असङ्ख्येयगुणाः,कथमिति चेद् ?, उच्यते, अङ्गुलमात्रक्षेत्रप्रदेशराशेः सम्बन्धिनि प्रथमवर्गमूले तृतीयवर्गमूलेन गुणिते यावान् प्रदेशराशिर्भवति तावत्प्रमाणासु घनीकृतस्य लोकस्यैकप्रादेशिकीषु श्रेणिषु यावान् प्रदेशराशिस्तावत्प्रमाणो भवनपतिदेवदेवीसमुदायः, तद्गतकिंचिदूनद्वात्रिंशत्तममभागकल्पा भवनपतयो देवाः, तत इमे प्रभूताइति घटन्ते सौधर्म्मेशानदेवेभ्यस्तेजोलेश्याका असङ्ख्येयगुणाः, तेभ्यः कातोपलेश्या भवनपतय एवासङ्ख्येयगुणाः, अल्पर्द्धिकानामप्यतिप्रभूतानां कापोतलेश्यासम्भवात्,

तेभ्योऽपि भवनवासिन एव नीललेश्या विशेषाधिकाः, युक्तिरत्र प्रागेवोक्ता, तेभ्योऽपि वानमन्तरास्तेजोलेश्याका असङ्ख्येयगुणाः, कथमिति चेद्, उच्यते, इह सङ्ख्येययोजनकोटीकोटीप्रमाणानि सूचिरूपाणि खण्डानि यावन्त्येकस्मिन्प्रतरे भवन्ति तावान् व्यन्तरदेवदेवीसमुदायः, तद्गतकिंचिदूनद्वात्रिंशत्तमभागकल्पा व्यन्तरदेवाः, तत इमे भवनपतिभ्योऽतिप्रभूततमा इत्युपपद्यते, कृष्णलेश्येभ्यो भवनपतिभ्यो वानमन्तरास्तेजोलेश्याका असङ्ख्येयगुणाः, तेभ्योऽपि वानमन्तरा एव कापोतलेश्येका असङ्ख्येयगुणाः, अल्पर्द्धिकानामपि कापोतलेश्याभावात्, तेभ्योऽपि वानमन्तरा नीललेश्या विशेषाधिकाः, तेभ्योऽपि कृष्णलश्या विशेषाधिकाः, अत्रापि युक्तिः प्रागुक्ताऽनुसरणीया, तेभ्यस्तेजोलेश्या ज्योतिष्का देवाः सङ्ख्येयगुणाः, यतः षट्पञ्चाशदधिकाङ्गुलशतद्वयप्रमाणानि सूचिरूपाणि यावन्ति खण्डान्येकस्मिन् प्रतरे भवन्ति तावत्प्रमाणो ज्योतिष्कदेवदेवीसमुदायः,तद्गतकिञ्चिदूनद्वात्रिंशत्तमभागकल्पा ज्योतिष्कदेवाः, ततः कृष्णलेश्येभ्यो वानमन्तरेभ्यः सङ्ख्येयगुणा एव घटन्ते ज्योतिष्कदेवा न त्वसङ्ख्येयगुणाः, सूचिरूपखण्डप्रमाणहेतोः सङ्ख्येययोजनकोटीकोट्यपेक्षया षट्पञ्चाशदधिकाङ्गुलशतद्वयस्य सङ्ख्येयभागमात्रवर्त्तित्वात् ॥

सम्प्रति भवनवास्यादिदेवदेवीविषयं तदनन्तरं भवनवास्यादिदेवदेवीसमुदायविषयं सूत्रमाह–एतच्च सूत्रद्वयमपि प्रागुक्तभावनानुसारेण भावनीयं ।

मू. (४५८) एएसि णं भंते ! कण्हलेसाणं जाव सुक्कलेसाण य कयरे २ अप्पड्ढिया वा महड्ढिया वा ?, गो० ! कण्हलेसेहिंतो नीललेसा महड्ढिया नीललेसेहिंतो काउलेसा महड्ढिया एवं काउलेस्सेहिंतो तेउलेसा महड्ढिया तेउलेसेहिंतो पम्हलेसा महड्ढिया पम्हलेसेहिंतो सुक्कलेसा महड्ढिया, सव्वप्पड्ढिया जीवा कण्हले० सव्वमहड्ढिया सुक्कलेसा ॥

एएसि णं भंते ! नेरइयाणं कण्हलेसाणं नीललेसाणं काउलेसाण य कयरे २ अप्पड्ढिया वा महड्ढिया वा ?, गो० ! कण्हलेसेहिंतो नीलले० महड्ढिया नीललेसेहिंतो काउलेसा महड्ढिया, सव्वप्पड्ढिया नेरइया कण्हले०, सव्वमहड्ढिया नेरइया काउले० ॥

एएसि णं भंते ? तिरिक्खजोणियाणं कण्हलेसाणं जाव सुक्कलेसाण य कयरे कयरेहिंतो अप्प० मह० ?, गो० !, जहा जीवाणं ।

एएसि णं भंते ! एगिंदियतिरिक्खजोणि० कण्हले० जाव तेउलेसाण य कयरे कयरेहिंतो अप्पड्ढिया वा महड्ढिया वा ?, गो० !, कण्हलेसेहिंतो एगिंदियतिरिक्खजो– नीलले० महड्ढिया नीलले० तिरि० काउले० मह० काउले० तेउले० महड्ढिया, सव्वप्पड्ढिया एगेंदियतिरिक्खजोणिया कण्हले० सव्वमड्ढिया तेउले० एवं पुढविकाइयाणवि, एवं एएणं अभिलावेणं जहेव लेस्साओ भावियाओ तहेव नेयव्वं जाव चउरिंदिया । पंचेंदियतिरिक्खजोणि० तिरिक्खजोणिणीणं संमुच्छिमाणं गब्भवक्कंतियाण य सव्वेसिं भाणि० जाव अप्पड्ढिया वेमाणिया देवा तेउले० सव्वमह० वेमा० सुक्कलेसा । केई भणंति–चउवीसं दंडएणं इड्ढी भाणि० ॥

वृ सम्प्रति लेश्याविशिष्टानामल्पर्द्धिकत्वमहर्द्धिकतवे प्रतिपिपादयिषुरिदमाह–'एएसि णं भंते ! जीवाणं कण्हलेसाण'मित्यादि, सुगमं, नवरं लेश्याक्रमेण यथोत्तरं महर्द्धिकत्वं यथाऽर्वाक् अल्पर्द्धिकत्वं भावनीयं, एवं नैरयिकतिर्यग्योनिकमनुष्यवैमानिकविषयाण्यपि सूत्राणि येषां यावत्यो लेश्यास्तेषां तावतीः परिभाव्य भावनीयानि ॥

पदं – १७, उद्देशकः – २ – समाप्तः

–: पदं – १७, उद्देशकः – ३ :–

वृ. उक्तो द्वितीय उद्देशकः, सम्प्रति तृतीय आरभ्यते, तस्य चेदमादिसूत्रम्–

मू. *(४५९) नेरइए णं भंते ! नेरइएसु उववज्जइ अनेरइए नेरइएसु उववज्जइ ?, गो० ! नेरइए नेरइएसु उववज्जइ नो अनेरइए नेरइएसु उववज्जइ, एवं जाव वेमाणियाणं ।*

नेरइए णं भंते ! नेरइएहिंतो उववट्टइ अनेरइए नेरइएहिंतो उववट्टति ?, गो० ! अनेरइए नेरइएहिंतो उववट्टंति नो नेरइए नेरइएहिंतो उववट्टइ, एवं जाव वेमाणिए, नवरं जोइसियवेमाणिएसु चयणंति अभिलावो कायव्वो ।

से नूनं भंते ! कण्हलेसे नेरइए कण्हलेसेसु नेरइएसु उववज्जति कण्हलेसे उववट्टइ, जल्लेसे उववज्जइ तल्लेसे उववट्टइ ?, हंता गो० !, कण्हलेसे नेरइए कण्हलेसेसु नेरइएसु उववज्जति कण्हलेसे उववट्टइ, जल्लेसे उववज्जइ तल्लेसे उववट्टइ, एवं नीललेस्सावि, एवं काउलेस्सेवि ।

एवं असुरकुमाराणवि जाव थणियकुमारा, नवरं लेस्सा अब्भहिया, से नूनं भंते ! कण्हलेसे पुढविकाइए कण्हलेसेसु पुढविकाइएसु उववज्जति कण्हलेसे उववट्टइ जल्लेसे उववज्जति तल्लेसे उववट्टति ?, हंता गो !, कण्हलेसे पुढविकाइए कण्हलेसेसु पुढविकाइएसु उववज्जति, सिय कण्हलेसे उववट्टइ सिय नीललेसे उववट्टइ सिय काउलेसे उववट्टइ सिय जल्लेसे उववज्जति सिय तल्लेसे उववट्टइ, एवं नीलकाउलेस्सासुवि,

से नूनं भंते ! (तेउल्लेसे पुढवीकाइए) तेउलेस्सेसु पुढविकाइएसु उववज्जइ पुच्छा, हंता गो० ! तेउलेस्सेसु पुढविकाइएसु उववज्जइ, सिय कण्हलेसे उववट्टइ सिय नीललेसे उववट्टइ सिय काउलेसे उववट्टइ तेउलेसे उववज्जइ नो चेव णं तेउलेसे उववट्टइ, वं आउकाइया वणस्सइकाइयावि, तेऊवाआ एवं चेव, नवरं एतेसिं तेउलेस्सा नत्थि, बितियचउरिंदिया एवं चेव तिसु लेसासु, पंचेंदियतिरिक्खजोणया मणुस्सा य जहा पुढविकाइया आदिल्लिया तिसु लेसासु भणिया तहा छसुवि लेसासु भा०, नवरं छप्पि लेस्साओ चारेयव्वाओ ।

वाणमं० जहा असुरकु०, से नूनं भंते! तेउलेस्से जोइसिए तेउलेस्सेसु जोइसिएसु उवव० जहेव असुरकु०, एवं वेमाणियावि, नवरं दोण्हंपि चयंतीति अभिलावो।

से नूनं भंते! कण्हलेसे नीललेसे काउलेसे नेरइए कण्हलेसेसु नीललेसेसु काउलेसेसु नेरइएसु उवव० कण्ह० नील० काउले० उववट्टइ जल्लेसे उवव० तल्लेसे उववट्टइ?, हंता गो०!, कण्हनीलकाउलेसे उववज्जइ तल्लेसे उववट्टइ, से नूनं भंते! कण्हलेसे जाव तेउलेस्से असुरकुमारे कण्हलेसेसु जाव तेउलेसेसु असुरकुमारेसु उववज्जइ, एवं जहेव नेरइए तहा असुरकुमारावि जाव थणियकुमारावि, से नूनं भंते! कण्हलेसे जाव तेउलेसे पुढविकाइए कण्हलेसेसु जाव तेउलेसेसु पुढविकाइएसु उवव०?, एवं पुच्छा जहा असुरकुमाराणं, हंता गो०!, कण्हलेसे जाव तेउलेसे पुढविकाइए कण्हलेसेसु जाव तेउलेसेसु पुढविकाइएसु सिय कण्हलेसे उववट्टइ सिय नीललेसे सिय काउलेसे उव्वट्टइ सिय जल्लेसे उववज्जइ तल्लेसे उववट्टइ, तेउलेसे उववज्जइ नो चेव णं तेउलेसे उव्वट्टइ, एवं आउकाइया वणस्सइकाइयावि भाणियव्वा,

से नूनं भंते! कण्हलेसे नीललेसे काउलेसे तेउकाइए कण्हलेसेसु नीललेसेसु काउलेसेसु तेउकाइएसु उववज्जइ कण्हलेसे नीललेसे काउलेसे उववट्टइ जल्लेसे उववज्जइ तल्लेसे उववट्टइ हंता गो०! कण्ह० नील० काउलेसे तेउकाइए कण्ह० नील० काउलेसेसु तेउकाइएसु उववज्जइ सिय कण्हलेसे उववट्टइ सिय नीललेसे उववट्टति सिय काउलेसे उववट्टइ सिय जल्लेसे उववज्जइ तल्लेसे उववट्टइ, एवं वाउकाइयबेंदियतेइंदियचउरिंदियावि भाणियव्वा।

से नूनं भंते! कण्हलेसे जाव सुक्कलेसे पंचेंदियतिरिक्खजोणिया कण्हलेसेसु जाव सुक्कलेसेसु पंचेंदियतिरिक्खजोणिएसु उववज्जइ?, पुच्छा, हंता गोयमा!, कण्हलेसे जाव सुक्कलेसे पंचेंदियतिरिक्खजोणिए कण्हलेसेसु जाव सुक्कलेसेसु पंचेंदियतिरि० उवव० सिय कण्हलेसे उववट्टइ जाव सिय सुक्कलेसे उववट्टइ सिय जल्लेसे उववज्जइ तल्लेसे उववट्टइ।

एवं मणूसेवि। वाणमंतरा जहा असुरकुमारा जोइसियवेमाणियावि एवं चेव, नवरं जस्स जल्लेसा, दोण्हवि चयणंति भाणियव्वं।

वृ. 'नेरइए णं भंते! नेरइएसु उववज्जइ' इत्यादि, अस्य चायमभिसम्बन्धः-द्वितीयोद्देशके नारकादीनां लेश्यापरिसङ्ख्यानं अल्पबहुत्वं महर्द्धिकत्वं चोक्तं, इह तु तेषामेव नारकादिजीवानां तास्ता लेश्याः किमुपपातक्षेत्रोपपन्नानामेव भवन्ति उत विग्रहेऽपि इत्यस्यार्थस्य प्रतिपादनार्थं प्राक् नयान्तरमाश्रित्य नारकादिव्यपदेशं पृच्छति

'नेरइए णं भंते! नेरइएसु उववज्जइ अनेरइए नेरइएसु उववज्जइ' इति, इदं च प्रश्नसूत्रं सुगमं, भगवानाह-गौतम! नैरयिको नैरयिकेषूत्पद्यते नो अनैरयिकः, कथमिति चेद?, उच्यते, इह यस्मान्नारकादिभवोपग्राहकमायुरेव न शेषं, तथाहि-नारकायुषि उदयमागते नारकभवो भवति मनुष्यायुषि मानुषभव इत्यादि, ततो नारकाद्यायुर्वेदनप्रथमसमये एव नारकादिव्यपदेशं लभते, एतच्च ऋजुसूत्रनयदर्शनं, तथा च नयविधिः ऋजुसूत्रनयस्वरूपनिरूपणं कुर्वद्भिरिदमुक्तं-

॥१॥ "पलालं न दहत्यग्निर्भिद्यते न घटः क्वचित्।
नाशून्ये निष्क्रमोऽस्तीह, न च शून्यं प्रविश्यते॥

॥२॥ नारकव्यतिरिक्तश्च, नरके नोपपद्यते ।
नरकान्नारकश्चास्य, न कश्चिद्विप्रमुच्यते ॥" इत्यादि,

'एवं जाव वेमाणिए' एवं–नैरयिकोक्तप्रकारेण तावद्वक्तव्यं यावद्वैमानिको-वैमानिकविषयं सूत्रं, तच्च सुगमत्वात् स्वयं परिभावनीयं ॥

अधुना उद्वर्त्तनाविषयं नैरयिकेषु सूत्रमाह–'नेरइए णं भंते !' इत्यादि, एतदपि ऋजुसूत्रनयदर्शनेन वेदितव्यं, तथाहि–परभवायुषि उदयमागते तत उद्वर्त्तते यद्भवायुश्चोदयमागतं तेन भवेन व्यपदेशः, यथा नारकायुषि उदयमागते नारकभवेन नारक इति, ततो नैरयिकेभ्योऽनैरयिक एवोद्वर्त्तते न नैरयिक इति । एवं चतुर्विंशतिदण्डकक्रमेण तावत्सूत्रं वक्तव्यं यावद्वैमानिकविषयं, नवरंज्योतिष्कवैमानिकविषये च्यवनं इत्यभिलापः वक्तव्यः, तस्य उद्वर्त्तनस्य च्यवनमिति प्रसिद्धेः, तथा चाह–'एवं जाव वेमाणिए नवर'मित्यादि ॥

अधुना कृष्णलेश्याविषयमुत्पत्तौ सूत्रमाह–'से नूनं भंते !' इत्यादि, सेशब्दोऽथशब्दार्थः स चेह प्रश्ने नूनं–निश्चितमेतत् भदन्त ! कृष्णलेश्यो नैरयिकः कृष्णलेश्येषु नैरयिकेषु मध्ये उत्पद्यते तेभ्यश्च कृष्णवलेश्येभ्यो नैरयिकेभ्य उद्वर्त्तमानः कृष्णलेश्य एवोद्वर्त्तते, एतदेव निश्चयदार्ढ्योत्पादनार्थं प्रकारान्तरेणाह–यल्लेश्य उत्पद्यते तल्लेश्य उद्वर्त्तते न लेश्यान्तरगत इति भगवानाह–'हंता गोयमा !' इत्यादि, हन्तेत्यनुमतौ अनुमतमेतत् मम गौतम !

'कण्हलेसेसु नेरइए' इत्यादि, अथ कयं कृष्णलेश्यःसन् कृष्णलेश्यषु नैरयिकेषूत्पद्यते न लेश्यान्तरोपेतः ?, उच्यते, इह तिर्यक्पञ्चेन्द्रियो मनुष्यो वा बद्धायुष्कतया नरकेषूत्पत्ति(तितु)कामो यथाक्रमं तिर्यगायुषि मनुष्यायुषि च साकल्येनाक्षीणेऽन्तर्मुहूर्त्तशेषे यल्लेश्येषु नरकेषूत्पत्स्यते तद्गतलेश्यया परिणमति, ततस्तेनैवाप्रतिपतितेन परिणामेन नरकायुः प्रतिसंवेदयते, तत उच्यते कृष्णलेश्यः कृष्णलेश्येषु नैरयिकेषूत्पद्यते न लेश्यान्तरयुक्तः, अथ कयं कृष्णलेश्याक एवोद्वर्त्तते उच्यते, देवनैरयिकाणां हि लेश्यापरिणाम आभवक्षयाद् भवति, एतच्च प्रागेव प्रपञ्चत उपपादितं, एवं नीललेश्याविषयं कापोतलेश्याविषयं च सूत्रं वक्तव्यं, एवं असुरकुमारादीनामपि सनत्कुमारपर्यवसानानां वक्तव्यं, नवरं तेजोलेश्यासूत्रं तत्राभ्यधिकमभिधेयं, तेजोलेश्याया अपि तेषां भावात् ॥

अधुना पृथिवीकायिकेषु कृष्णलेश्याविषयं सूत्रमाह– 'से नूनं भंते !' इत्यादि, इह तिरश्चां मनुष्याणां च लेश्यापरिणाम आन्तर्मुहूर्त्तिकस्ततः कदाचित् यल्लेश्य उद्वर्त्ततते कदाचिल्लेश्यान्तरपरिणतोऽपि उद्वर्त्तते, एष पुनर्नियमो यो यल्लेश्येषूत्पद्यते स नियमतस्तल्लेश्य एवोत्पद्यते,

॥१॥ "अंतमुहुत्तम्मि गए अंतमुहुत्तम्मि सेसए आउं (चेव) ।
लेसाहिं परिणयाहिं जीवा वच्चंति परलोयं ॥"

इति वचनात्, तत उक्तं 'गोयमा ! कण्हलेसे पुढविकाइए कण्हलेसेसु पुढविकाइएसु उववज्जइ सिय कण्हलेसे उव्वट्टइ' इत्यादि, एवं नीललेश्याविषयं कापोतलेश्याविषयं च सूत्रं वक्तव्यं, तथा यदा भवनपतिव्यन्तरज्योतिष्कसौधर्म्मेशानदेवाः तेजोलेश्यावन्तः स्वभवाच्च्युत्वा पृथिवीकायिकेषूत्पद्यन्ते तदा कियत्कालमपर्याप्तावस्थायां तेषु तेदजोलेश्याऽपि लभ्यते तत ऊर्द्धवं तु न भवति, तथा भवस्वभावतया तेजोलेश्यायोग्यद्रव्यग्रहणशक्त्यसम्भवात्, ततस्तेजोलेश्यासूत्रे

उक्तं 'तेउलेसे उववज्जइ नो चेव णं तेउलेसे उववट्टइ' इति, यथा च पृथिवीकायिकानां चत्वारि सूत्राण्युक्तानि तथाऽप्कायिकवनस्पतिकायिकानामपि वक्तव्यानि, तेषामप्यपर्याप्तावस्थायां तेजोलेश्यासंभवात्, तेजोवायुद्वित्रिचतुरिन्द्रियविषयाणि प्रत्येकं त्रीणि सूत्राणि वक्तव्यानि, तेषां तेजोलेश्याया असम्भवात् ॥

पञ्चेन्द्रियतिर्यग्योनिका मनुष्याश्च यथाऽऽद्यासु तिसृषु लेश्यासु पृथिवीकायिका उक्ताः तथा षट्स्वपि लेश्यासु वक्तव्याः, षण्णामप्यन्यतमया लेश्यया तेषामुत्पत्तिसम्भवात्, उत्पत्तिगतैकैकलेश्याविषये चोद्वर्त्तनायां षण्णां विकल्पनां सम्भवात् सूत्रपाठश्चैवं–'से नूनं भंते कण्हलेसे पंचिंदियतिरिक्खजोणए कण्हलेसेसु पंचिंदियतिरिक्खजोणिएसु उववज्जइ कण्हलेसेसु उववट्टइ जल्लेसे उववज्जइ तल्लेसे उववट्टइ ?, हंता गोयमा !, कण्हलेसे पंचिंदियतिरिक्खजोणिए कण्हलेसेसु पंचिंदियतिपरिक्खजोणिएसु उववज्जइ सिय कण्हलेसे उववट्टइ सिय नीललेसे उववट्टइ सिय काउलेसे उवट्टइ सिय तेउलेसे उववट्टइ सिय पम्हलेसे उववट्टइ सिय सुक्कलेसे उववट्टइ सिय जल्लेसे उववज्जइ तल्लेसे उववट्टइ' एवं नीलकापोततेजःपद्मशुक्ललेश्याविषयाण्यपि सूत्राणि वक्तव्यानि 'वाणमंतरा जहा असुरकुमारा' इति 'जल्लेसे उववज्जदजइ तल्लेसे उववट्टइ' इति वक्तव्या इति, सर्वदेवानां लेश्यापरिणामस्याऽऽभवक्षयाद् भावात्,

एवं लेश्यापरिसङ्ख्यानं परिभाव्य ज्योतिष्कवैमानिकविषयाण्यपि सूत्राणि वक्तव्यानि, नवरं तत्र 'चयन्ती'त्यभिलपनीयं, तदेवमेकैकलेश्याविषयाणि चतुर्विंशतिदण्डकक्रमेण नैरयिकादीनां सूत्राण्युक्तानि तत्र कश्चिदाशङ्केत–प्रविरलैकैकनारकादिविषयमेतत् सूत्रकदम्बकं यदा तु बहवो मिश्रलेश्याकास्तस्यां गतावुत्पद्यन्ते तदाऽन्यथाऽपि वस्तुगतिर्भवेत, एकैकेगतधर्मापेक्षया समुदायधर्मस्य क्वचिदन्यथाऽपि दर्शनात्, ततस्तदाशङ्काऽपनोदाय येषां यावत्यो लेश्याः सम्भवन्ति तेषां युगपत्तावल्लेश्याविषयमेकैकं सूत्रमनन्तरोदितार्थमेव प्रतिपादयति– 'से नूनं भंते ! कण्हलेसे नीललेसे काउलेसे नेरइए कण्हलेसेसु नीललेसेसु काउलेसेसु नेरइएसु उववज्जइ' इत्यादि, समस्तं सुगमं ।

सम्प्रति कृष्णलेश्यादीनैरयिकसत्कावधिज्ञानदर्शनविषयक्षेत्रपरिमाणतारम्यमाह···

सू. (४६०) *कण्हलेसे णं भंते ! नेरइए कण्हलेसं नेरइयं पणिहाए ओहिणा सव्वओ समंता समभिलोएमाणे केवतियं खेत्तं जाणइ केवइयं खेत्तं पासइ ?, गो० !, नो बहुयं खेत्तं जाणइ नो बहुयं खेत्तं पासइ नो दूरं खेत्तं जाणइ नो दूरं खेत्तं पाशइ इत्तरियमेव खित्तं जाणइ इत्तरियमेव खेत्तं पासइ, से केण० भंते ! एवं वुच्चइ कण्हलेसे णं नेरइए तं चेव जाव इत्तरियमेव खेत्तं पासइ ?, गो० !, से जहा नामए केइ पुरिसे बहुसमरमणिज्जंसि भूमिभागंसि ठिच्चा सव्वओ समंता समभिलोएज्जा, तए णं से पुरिसे धरणितलगयं पुरिसं पणिहाए सव्वओ समंता समभिलोएमाणे णो बहुयं खेत्तं जाव पासइ जाव इत्तरियमेव खेत्तं पासइ, से तेणट्ठेणं गोयमा ! एवं वुच्चइ कण्हलेसे णं नेरइए जाव इत्तरियमेव खेत्तं पासइ,*

नीललेसे णं भंते ! नेरइए कण्हलेसं नेरइयं पणिहाय ओहिणा सव्वओ समंता समभिलोएमाणे २ केवतियं खेत्तं जाणइ केवतियं खेत्तं पासइ ?, गो० !, बहुतरागं खेत्तं जाणइ बहुतरागं खेत्तं पासइ दूरतरखेत्तं जाणइ दूरतरखेत्तं पासइ वितिमिरतरगं खेत्तं जाणइ वितिमिरतरगं खेत्तं पासइ

विसुद्धतरागं खेत्तं जाणइ विसुद्धतरागं खेत्तं पासइ,

से केणट्ठेणं भंते! एवं वुच्चइ–नीललेसे णं नेरइए कण्हलेसं नेरइयं पणिहाय जाव विसुद्धतरागं खेत्तं जाणइ विसुद्धतरागं खेत्तं पासइ?, से जहा नामए केइ पुरिसे बहुसमरमणिज्जाओ भूमिभागाओ पव्वयं दुरूहित्ता सव्वओ समंता समभिलोएज्जा तए णं से पुरिसे धरणितलगयं पुरिसं पणिहाय सव्वओ समंता समभिलोएमाणे २ बहुतरागं खेत्तं जाणइ जाव विसुद्धतरागं खेत्तं पासइ, से तेणट्ठेणं गोयमा! एवं वुच्चइ–नीललेस्से नेरइए कण्हलेसं जाव विसुद्धतरागं खेत्तं पासइ,

काउलेस्से णं भंते! नेरइए नीललेसं नेरइयं पणिहाय ओहिणा सव्वओ समंता समभिलोएमाणे २ केवतियं खेत्तं जाणइ पासइ?, गो० ! बहुतरागं खेत्तं जाणइ पासइ जाव विसुद्धतरागं खेत्तं पासति, से केणट्ठेणं भंते! एवं वु०–काउलेस्से णं नेरइए जाव विसुद्धतरागं खेत्तं पासइ?, गो० से जहा नामए केइ पुरिसे बहुसमरमणिज्जाओ भूमिभागाओ पव्वयं दुरुहइ २ दोवि पाए उच्चाविया (वइत्ता) सव्वओ समंता समभिलोएज्जा तए णं से पुरिसे पव्वगयं धरणितलगयं च पुरिसं पणिहाय सव्वओ समंता समभिलोएमाणे बहुतरागं खेत्तं जाणइ बहुतरागं खेत्तं पासइ जाव वितिमिरतरागं पासइ, से तेणट्ठेणं गोयमा! एवं वुच्चइ–काउलेस्से णं नेरइए नीललेस्सं नेरइयं पणिहाय तं चेव जाव वितिमिरतरागं खेत्तं पासइ॥

वृ. 'कण्हलेसे णं भंते!' इत्यादि, कृष्णलेश्यो भदन्त कश्चिनैरयिकोऽपरं कृष्णलेश्याकं प्रणिधाय–अपेक्ष्यावधिनाअवधिज्ञानेन सर्वतः · सर्वासु दिक्षु समन्ततः सर्वासु विदिक्षु समभिलोकमानो–निरीक्षणमाणः कियत्–किंपरिमाणं क्षेत्रं जानाति कियद्वा क्षेत्रमवधिदर्शनेन पश्यति भगवानाह–गौतम! न बहु क्षेत्रं जानाति नापि बहुक्षेत्रं पश्यति, किमुक्तं भवति?–अपरं कृष्णलेश्याकं नैरयिकमपेक्ष्य न विवक्षितः कृष्णलेश्याको योग्यतानुसारेणातिविशुद्धोऽपि नैरयिकोऽतिप्रभूतं क्षेत्रमविधिना जानाति पश्यति, तदेवाह–न दूरम्–अतिविप्रकृष्टं क्षेत्रं जानाति नाप्यतिविप्रकृष्टं क्षेत्रं पश्यति, किं तु इत्वरमेव–स्वल्पमेवाधिकं क्षेत्रं जानाति इत्वरमेवाधिकं क्षेत्रं पश्यति, एतच्च सूत्रं समानपृथिवीककृष्णलेश्यनैरयिकविषयमवसेयमन्यथा व्यभिचारसम्भवात्, तथाहि–

सप्तमपृथिवीगतः कृष्णलेश्याको नैरयिको जघन्यतो गव्यूतार्द्धं जानाति उत्कर्षतो गव्यूतं, षष्ठपृथिवीगतः कृष्णलेश्याको जघनयतो गव्यूतमुत्कर्षतः सार्द्धं पञ्चमपृथिवीगतः कृष्णलेश्याको जघन्यतः सार्द्धं गव्यूतमुत्कर्षतः किञ्चिदूने द्वे गव्यूते, ततो द्विगुणत्रिगुणाधिकक्षेत्रमसंभवाद् भवत्यधिकृतसूत्रस्य व्यभिचारः, यथा समानपृथिवीकमपरं कृष्णलेश्याकं नरयिकमपेक्ष्यातिविशुद्धोऽपि कृष्णलेश्याको नैरयिको मनागधिकं पश्यति नातिप्रभूतं तथा दृष्टान्तेनोपपिपदयिषुराह– 'से केणट्ठेणं भंते!' इत्यादि, इयमत्र भावना–यथा समभूभागव्यवस्थित एव कश्चित् विवक्षितः पुरुषः चक्षुर्नैर्मल्यवशात् मनागधिकं पश्यति न प्रभूततरं तथा विवक्षितोऽपि कश्चित् कृष्णलेश्याको नैरयिकः स्वभूमिकानुसारेणातिविशुद्धोऽपि समानपृथिवीकमपरं कृष्णलेश्याकं नैरयिकमपेक्ष्य यदि परमवधिना मनागधिकं पश्यति न तु प्रभूततरं, अत्र समभूभागस्थानीया समाना पृथिवी स्वभूमिकासमाना च कृष्णरूपा लेश्या चक्षुः''स्थानीयमवधिज्ञानमेतावता चैतदपि ध्वनितं–यथा समभूभागव्यवस्थितः पुरुषः सर्वतः समन्तादभिलोकमानो गर्त्तागतं पुरुषमपेक्ष्यातिप्रभूततरं पश्यति तथा पञ्चमपृथिवीगतः स्वभूमिकानुसारेणातिविशुद्धः कृष्णलश्याको विवक्षितोऽपि

नैरयिकः सप्तमपृथिवीगतं कृष्णलेश्याकमतिमन्दानुभागावधिनैरयिकमपेक्ष्यातिप्रभूतं पश्यति, मागधिकत्रिगुणक्षेत्रसम्भवात् ॥

सम्प्रति नीललेश्याकविषयं सूत्रमाह–'नीललेसे णं भंते! नेरइए कण्हलेसं नेरइयं पणिहाए' इत्यादि, अक्षरगमनिका सुगमा, नवरं 'वितिमिरतरागं खत्तं जाणइ' इति विगतं तिमिरं–तिमिरसम्पाद्यो भ्रमो यत्र तद्वितिमिरं, इदं वितिमिरमदं वितिमिरमनयोरतिशयेन वितिमिरं वितिमिरतरं '[illegible]तरप्रत्यये तरादि'ति तरप्प्रत्ययः, ततः प्राकृतलक्षणात् स्वार्थे कप्रत्ययः पूर्वस्य च दीर्घत्वं, अत एव विशुद्धतरं–निर्लमतरं अतीव स्फुटप्रतिभासमितियावत्, भावना त्वियं यथा धरणितलगतं पुरुषमपेक्ष्य पर्वतारूढः पुरुषो ऽतिदूरं क्षेत्रं पश्यति तदपि प्रायः स्फुटप्रतिभासं तथा विवक्षितोऽपि नीललेश्याको नैरयिको योग्यतानुसारेणातिविशुद्धावधिः कृष्णलेश्याकं नैरयिकमपेक्ष्यातिदूरं वितिमिरतरं स्फुटप्रतिभासं च क्षेत्रं जानातीति, अत्र पर्वतस्थानीया उपरितनी तृतीया पृथिवी अतिविशुद्धा च स्वभूमिकानुसारेण नीललेश्या धरणितलस्थानीया अधस्तनी कृष्णलश्या चक्षुःस्थानीयमवधिज्ञानमिति ॥ सम्प्रति नीललेश्याकमपेक्ष्य कापोतलेश्याविषयं सूत्रमाह– 'काउलेस्से णं भंते! नेरइए नीलसेस्सं नेरइयं पणिहाये'त्यादि, अक्षरगमनिका सुगमा, नवरं 'दोवि पाए उच्चावइत्ता' इति द्वावपि पादौ उच्चैः कृत्वा, द्वावपि पाणी उत्पाट्येत्यर्थः, भावना त्वियं-यथा पर्वतस्योपरि वृक्षमारूढः सर्वतः समन्तादवलोकमानो बहुतरं पश्यति स्पष्टतरं च तथा कापोतलेश्यो नैरयिकोऽपरं नीललेश्याकमपेक्ष्य प्रभूतं क्षेत्रमवधिना जानाति पश्यति च तदपि च स्पष्टतरमिति, इह वृक्षस्थानीया कापोतलेश्या उपरितनी च पृथिवी पर्वतस्थानीया नीललेश्या तृतीया च पृथिवी चक्षुःस्थानीयमवधिज्ञानमिति ॥

सम्प्रति का लेश्याः कतिषु ज्ञानेषु लभ्यन्ते इति निरूपयितुकाम आह–

मू. (४६१) *कण्हलेसे णं भंते ! जीवे कइसु नाणेसु होज्जा ?, गो० ! दोसु वा तिसु वा चउसु वा नाणेसु होज्जा, तिसु होमाणे आभिनिबोहियसुयनाणे होज्जा, तिसु होमाणे आभिनिबोहियसुयनाणओहिनाणेसु होज्जा, अहवा तिसु होमाणे आभिनिबोहियसुयनाणमनपज्जवनाणेसु होज्जा, चउसु होमाणे आभिनिबोहियसुयओहिमनपज्जवनाणेसु होज्जा, एवं जाव पम्हलेसे,*

सुक्कलेसेणं भंते ! जीवे कइसु नाणेसु होज्जा ?, गो० ! दोसु वा तिसु वा चउसु वा होज्जा, दोसु होमाणे आभिनिबोहियनाण एवं जहेव कण्हलेसाणं तहेव भाणियव्वं जाव चउहिं, एगंमि नाणे होज्जा, एगंमि केवलनाणे होज्जा (पन्नवणाए भगवइए लेस्सापए तइओ उद्देसओ समत्तो ॥)

वृ. 'कण्हलेसे णं भंते! जीवे कइसु नाणेसु होज्जा' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम द्वयोस्त्रिषु चतुर्षु च ज्ञानेषु भवति, तत्र द्वयोराभिनिबोधिकश्रुतज्ञानयोः त्रिषु आभिनिबोधिकश्रुतावधज्ञानेषु यदिवाऽऽभिनिबोधिकश्रुतमनःपर्यायज्ञानेषु, इहावधिरहितस्यापि मनः''पर्यवज्ञानमुपजायते, सिद्धप्राभृतादावनेकशस्तथा प्रतिपादनात्, अन्यच्च विचित्रा प्रतिज्ञानं तदावरणक्षयोपशमसामग्री, तत्र कस्यापि चारित्रिणोऽप्रमत्तस्यामर्षौषध्याद्यन्यतमकतिपयलब्धिसमन्वितस्य मनःपर्यायज्ञानावरणक्षयोपशमनिमित्ता सामग्री तथारूपाध्यवसायादिलक्षणा सम्पद्यते न त्ववधिज्ञानावरणक्षयोपशमनिमित्ता ततस्तस्य मनःपर्यवज्ञानमेव भवति,

ननु मनःपर्यवज्ञानमतिविशुद्धस्योपजायते कृष्णलेश्या च संक्लिष्टाध्यवसायरूपा ततः

कथं कृष्णलेश्याकस्य मनःपर्यायज्ञानसम्भवः ?, उच्यते, इह लेश्यानां प्रत्येकासङ्ख्येयलोकाकाशप्रदेशप्रमाणान्यध्यवसायस्थानानि, तत्र कानिचित् मन्दानुभावान्यध्यवसायस्थानानि प्रमत्तासंयतस्यापि लभ्यन्ते, अत एव कृष्णनीलकापोतलेश्या अन्यत्र प्रमत्तसंयतान्ता गीयन्ते, मनःपर्यवज्ञानं च प्रथमकतोऽप्रमत्तसंयतस्योत्पद्यते ततः प्रमत्तसंयतस्यापि लभ्यते इति सम्भवति कृष्णलेश्याकस्यापि मनःपर्यवज्ञानं, चतुर्ष्वाभिनिबोधिकश्रुतावधिमनःपर्यवज्ञानेषु,

'एवं जाव पम्हलेसे' इति एवं-कृष्णलेश्योक्तेन प्रकारेण तावद् वक्तव्यं यावत् पद्मलेश्या, किमुक्तं भवति ?-नीललेश्यः कापोतलेश्यः तेजोलेश्यः पद्मलेश्यश्च उक्तप्रकारेण द्वयोस्त्रिषु चतुर्षु वा ज्ञानेषु भणनीयः, स च एवं 'नीललेस्से णं भंते ! जीवे कइसु नाणेसु होज्जा ?, गोयमा ! दोसु वा तिसु वा चउसु वा नाणेसु होज्जा' इत्यादि, शुक्ललेश्येषु विशेष इति तं पृथक् वक्ति-'सुक्कलेसे णं भंते !' इत्यादि, इह शुक्ललेश्यायामेव केवलज्ञानं न लेश्यान्तरे ततः शेषलेश्याकेभ्योऽस्य शुक्ललेश्यस्य विशेषः ॥

पदं - १७, उद्देशकः - ३ - समाप्तः

-: पदं - १७, उद्देशकः - ४ :-

वृ. उक्तस्तृतीयोद्देशकः, सम्प्रति चतुर्थ आरभ्यते, तत्र चेयमादावधिकारगाथा-

मू. (४६२) *परिणामवन्नरसगंधसुद्धअपसत्थसंकिलिट्ठण्हे ।*
गतिपरिणामपदेसोगाढवग्गणठाणाणमप्पबहुं ॥

वृ. प्रथमं परिणामाधिकारः द्वितीयो वर्णाधिकारः तृतीयो रसाधिकारः चतुर्थो गन्धाधिकारः पञ्चमः शुद्धाशुद्धाधिकारः षष्ठः प्रशस्ताप्रशस्ताधिकाः सप्तमः संक्लिष्टासंक्लिष्टाधिकारः अष्टम उष्णशीताधिकारः नवमो गत्यधिकारः दशमः परिणामाधिकारः एकादशोऽप्रदेशः प्रदेशप्ररूपणाधिकारः द्वादशोऽवगाहाधिकारः त्रयोदशो वर्गणाधिकारः चतुर्दशः स्थानप्ररूपणाधिकारः पञ्चदशोऽल्पबहुत्वाधिकारः । तत्र प्रथमं परिणामलक्षणमभिधित्सुर्यासां परिणामो वक्तव्यः ता एव लेश्याः प्रतिपादयति-

मू. (४६३) *कइ णं भंते ! लेसाओ पन्नत्ताओ ?, गो० ! छल्लेसाओ पन्नत्ताओ, तंजहा-कण्ह० जाव सुक्कलेसा, से नूनं भंते ! कण्हलेसा नीललेसं पप्प तारूवत्ताए तावण्णत्ताए तागंधत्ताए तारसत्ताए ताफासत्ताए भुज्जो २ परिणमति, हंता गो० ! कण्हलेस्सा नीललेस्सं पप्प तारूवत्ताए जाव भुज्जो २ परिणमति,*

से केणट्ठेणं भंते ! एवं वुच्चइ-कण्हलेस्सा नीललेस्सं पप्प तारूवत्ताए जाव भुज्जो २ परिणइमति गो० ! से जहा नामए खीरे दूसिं पप्प सुद्धे वा वत्थे रागं पप्प तारूवत्ताए जाव ताफासत्ताए भुज्जो २ परिणमइ, से तेणट्ठेणं गो० ! एवं वुच्चइ-कण्हलेसा नीललेसं पप्प तारूवत्ताए जाव भुज्जो २ परिणमइ, एवं एतेणं अभिलावेणं नीललेसा काउलेसं पप्प काउले० तेउलेसं पप्प तेउले० पम्हलेसं पप्प पम्हले० सुक्कलेसं पप्प जाव भुज्जो २ परिणमइ, से नूनं भंते ! कण्हलेसा नीललेसं काउलेसं तेउलेसं पम्हलेसं सुक्कलेसं पप्प तारूत्ताए तावण्णत्ताए तागंधत्ताए तारसत्ताए ताफासत्ताए भुज्जो २ परिणमइ ?, हंता गोयमा ! कण्हलेसा नीललेसं पप्प जाव सुक्कलेसं पप्प तारूव० तागंध०

ताफा० भुज्जो २ परिणमइ,

से केणट्ठेणं भंते ! एवं वुच्चइ–कण्हलेसं० नीललेसं० जाव सुक्कलेसं पप्प तारूवत्ताए जाव भुज्जो २ परिणमइ ?, गोयमा ! से जहा नामए वेरुलियमणी सिया कण्हसुत्तए वा नीलसुत्तए वा लोहिय० हालिद्द० सुक्किल्ल० आइए समाणे तारूव० जाव भुज्जो २ परिणमइ, से तेणट्ठेणं एवं वुच्चइ–कण्हलेसा नीललेसं जाव सुक्कलेसं पप्प तारूवत्ताए भुज्जो २ परिणमति ।

से नूनं भंते ! नीललेसा किण्हलेसं जाव सुक्कलेसं पप्प तारूवत्ताए जाव भुज्जो २ परिणमइ, हंता गोयमा ! एवं चेव, काउलेसा किण्हलेसं नील० तेउ० पम्ह० सुक्कलेसं, एवं तेउलेसा किण्ह० नील० काउ० पम्ह० सुक्कलेसं, एवं पम्हलेसा किण्ह० नील० काउ० तेउ० सुक्कलेसं पप्प जाव भुज्जो २ परिणमइ ?, हंता गोयमा ! तं चेव, से नूनं भंते ! सुक्कलेसा किण्ह० नील० काउ० तेउ० पम्ह० लेसं पप्प जाव भुज्जो २ परिणमइ ?, हंता गोयमा ! तं चेव ।

वृ. 'कइ णं भंते ! लेसाओ पन्नत्ताओ' इत्यादि, इदं सूत्रं प्रागप्युक्तं परं परिणामाद्यर्थप्रतिपादनार्थं भूय उपन्यस्तं 'से नूनं भंते' इत्यादि, अथ भदन्त कृष्णलेश्या–कृष्णलेश्यायोग्यानि द्रव्याणि नीललेश्यां–नीललेश्यायोग्यानि द्रव्याणि प्राप्य–अन्योऽन्यावयवसंस्पर्शमासाद्य तद्रूपतया–नीललेश्यारूपतया, रूपशब्दोऽत्र स्वभाववाची, नीललेश्यास्वभावतयेत्यर्थः भूयो भूयः परिणमतीति योगः, तत्स्वभावश्च तद्वर्णगा (द्रुणा) दिरूपतया भवति तत आह०तद्वर्णतया तद्रसतया तद्गन्धतया तत्स्पर्शतया, सर्वत्रापि तच्छब्देन नीललेश्यायोग्यानि द्रव्याणि परामृशन्ति, भूयो भूयः –अनेकवारं तिर्यग्मनुष्याणां तत्तद्भवसङ्क्रान्तौ शेषकालं वा परिणमते, इदं हि तिर्यग्मनुष्यानधिकृत्य वेदितव्यं,

एवं गौतमेन प्रश्ने कृते भगवानाह–'हंता गो० !' इत्यादि, हन्तेत्यनुमतौ अनुमतमेतत् गौतम ! कृष्णलेश्या नीललेश्यां प्राप्येत्यादि प्रागवत्, इयमत्र भावना–यदा कृष्णलेश्यापरिणतो जन्तुस्तिर्यग्मनुष्यो वा भवान्तरसङ्क्रान्ति चिकीर्षुर्नीललेश्यायोग्यानि द्रव्याणि गृह्णाति तदा नीललेश्यायोग्यद्रव्यसम्पर्कतस्तानि कृष्णलेश्यायोग्यानि द्रव्याणि तथारूपजीवपरिणामलक्षणं सहकारिकारणमासाद्य नीललेश्याद्रव्यरूपतया परिणमन्ते, पुद्गलानां तथातथापरिणमनस्वभावत्वात्, ततः स केवलनीललेश्यायोग्यद्रव्यसाचिव्यान्नीललेश्यापरिणतः सन् कालं कृत्वा भवान्तरे समुत्पद्यते, उक्तं च–'जल्लेसाइं दव्वाइं परियाइत्ता कालं करेइ तल्लेसे उववज्जइ' इति, तथा स एव तिर्यग्मनुष्यो वा तस्मिन्नेव भवे वर्त्तमानो यदा कृष्णलेश्यापरिणतो भूत्वा नीललेश्याभावेन परिणमते तदापि कृष्णलेश्यायोग्यानि द्रव्याणि तत्कालगृहीतनीललेश्यायोग्यद्रव्यसम्पर्कतो नीललेश्यायोग्यद्रव्यरूपतया परिणमन्ते, अमुमेवार्थं दृष्टान्तेन विभावयिषुः प्रथमं प्रश्नसूत्रमाह–

से केणट्ठेणं भंते !' इत्यादि, सुगमं भगवानाह–गौतम ! 'से जहानामए खीरे' इत्यादि, ततः लोकप्रसिद्धं यथानामकं गोक्षीरम् अजाक्षीरं महिषीक्षीरमित्यादिनामकं क्षीरं 'दूसि'मिति देशीवचनाद्दूष्यमेत्त मथितं तक्रं प्राप्यान्योऽन्यावयवसंस्पर्शनाविभागं गत्वा यथा च शुद्धं–मलरहितं समले हि रागः सम्पद्यमानोऽपि न तथारूपो लगति तत उक्तं शुद्धं वस्त्रं–चेलं रज्यतेऽनेनेति रागः 'करणे धञ्'तं – मञ्जिष्ठादिकं प्राप्य तद्रूपतया– मञ्जिष्ठादिरागद्रव्यस्वभावतया, एतदेव व्याचष्टे–'तद्वर्णतये'त्यादि, सुगमं,

तथा कृष्णलेश्यायोग्यानि द्रव्याणि नीललेश्यायोग्यानि द्रव्याणि प्राप्य तद्रूपतया परिणमन्ते,

इयमत्र भावना--यथा क्षीरलक्षणकारणगता रूपादयस्तक्ररूपादिभावं प्रतिपद्यन्ते यथा वा शुद्धवस्त्रकारणगता रूपदयो मञ्जिष्ठादिरागद्रव्यारूपादिभावं प्रतिपद्यन्ते तथा कृष्णलेश्यायोग्यद्रव्यरूपकारणगता रूपादयो नीललेश्यायोग्यद्रव्यरूपादिभावं प्रतिपद्यन्ते, 'से तेणट्ठेण'मित्याद्युपसंहारवाक्यं सुगमं, एवं नीललेश्या कापोतलेश्यां प्राप्येत्यादीन्यपि चत्वारि सूत्राणि भावनीयानि, तदेवं पूर्वस्याः पूर्वस्या लेश्याया उत्तरामुत्तरां लेश्यां प्रतीत्य तद्रूपतया परिणमनमुक्तं, इदानीमेकैकस्याः लेश्याया यथायोगं क्रमेण शेषसमस्तलेश्यापरिणमनमाह--'से नूनं भंते ! कण्हलेसा नीललेस्सं काउलेस्स'मित्यादि, वाशब्दोऽत्र सर्वत्राप्यनुक्तो द्रष्टव्यः, नीललेश्यां वा कापोतलेश्यां वा यावत् शुक्ललेश्यां वा, एकस्या लेश्यायाः परस्परविरुद्धतया युगपदनेकलश्यापरिणामसंभवात्, शेषाऽक्षरगमनिका प्रागवत्, अत्रैवार्थे दृष्टान्तमभिधित्सुरिदमाह--

'स केणट्ठेणं भंते!' इत्यादि सुगमं, नवरं यथा वैडूर्यमणिरेक एव तत्तदुपाधिद्रव्यसम्पर्कतस्तद्रूपतया परिणमते तथैवल तान्यपि कृष्णलेश्यायोग्यानि द्रव्याणि तत्तन्नीलादिलेश्यायोग्यद्रव्यसम्पर्कतस्तत्तद्रूपतया परिणमन्ते इति, एतावताऽंशेन दृष्टान्तो नतु पुनर्यथा वैडूर्यमणिः स्वस्वरूपमजहान्स्तत्तदुपाधिद्रव्यसम्बन्धस्तत्तदाकारमात्रमाजितया तत्तद्रूपतया परिणमते तथैतान्यपि कृष्णलेश्यायोग्यानि स्वस्वरूपमजहानान्येव द्रव्याणि तत्तन्नीलादिलेश्यायोग्यद्रव्यसम्पर्कतस्तत्तदाकारमात्रधारितया तत्तद्रूपतया परिणमन्ते इत्यनेनांशेन, तिरश्चां मनुष्याणां च लेश्याद्रव्याणां सामस्त्येन तद्रूपतया परिणामाभ्युपगमात्, अन्यथा नैरयिकदेवसत्कलेश्याद्रव्याणामिव तिर्यग्मनुष्याणामपि लेश्याद्रव्याणां सर्वथा स्वरूपापरित्यागेन चिरकालमवस्थानसंभवात्, यत उत्कर्षशतोऽप्येषामन्तर्मुहूर्त्तलक्षणं स्थितिपरिमाणमन्यत्रोक्तं तद्विरुध्यते, पल्योपमत्रयमपि यावत् उत्कर्षतः स्थितिसंभवात्, तदेवं तदन्यलेश्यापञ्चकपरिणाममधिकृत्य कृष्णलेश्याविषयं सूत्रमुक्तं,

एवं नीलादिलेश्याविषयाण्यपि प्रत्येकं तदन्यलेश्यापञ्चकपरिणाममधिकृत्य पञ्च सूत्राणि वक्तव्यानि, तदेवं तिर्यङ्मनुष्याणां भवसङ्क्रान्तौ शेषकालं च लेश्याद्रव्यपरिणाम उक्तः, देवनैरयिकसत्कानि तु लेश्याद्रव्याणि आभवक्षयमवस्थितानि यत्तदन्यलेश्याद्रव्यसंपर्कत आकारमात्रं तदत्रैव वक्ष्यते। तत उक्तः परिणामलक्षणाधिकारः।

अधुना वर्णाधिकारमभिधित्सुराह--

मू. (४६४) *कण्हलेसा णं भंते! वन्नेणं केरिसिया पन्नत्ता?, गो० ! से जहा नामए जीमूते इ वा अंजणे इ वा खंजणे इ वा कज्जले इ वा गवले इ वा गवलए इ वा जंबूफले इ वा अहारिट्ठपुप्फेइ वा परपुट्ठेइ वा भमरेइ वा भमरावली इ वा गयकलभे इ वा किण्हकेसरे इ वा आगासथिग्गले इ वा किण्हासोए इ वा कण्हकणवीरए इ वा कण्हबंधुजीवए इ वा, भवे एतारूवे?, गो० ! णो इणट्ठे समट्ठे, कण्हलेस्सा णं इत्तो अनिट्ठयरिया चेव अकंतयरिया चेव अप्पियतरिया चेव अमणुन्नतरिया चेव अमणामतरिया चेव वन्नेणं पन्नत्ता,*

नीललेस्सा णं भंते! केरिसिया वन्नेणं पन्नत्ता?, गोयमा! से जहा नामए भिंगए इ वा भिंगपत्ते इ वा चासे इ वा चासपिच्छए इ वा सुए इ वा सुयपिच्छे इ वा सामा इ वा वणराइ इ वा उच्चंतए इ वा पारेयवगीवा इ वा मोरगीवा इ वा हलहरवसणे इ वा अयसिकुसुमे इ वा वणकुसुमे इ वा अंजणकेसिया [इ वा] कुसुमे इ वा नीलुप्पले इ वा नीलासोए इ वा नीलकणवीरए इ वा

नील-बंधुजीवे इ वा, भवेयारूवे ?, गो० ! नो इणट्ठे समट्ठे, एत्तो जाव अमणामयरिया चेव वन्नेणं प०

काउलेस्सा णं भं० ! केरिसिया वन्नेणं पन्नत्ता ?, गोयमा ! से जहानामए खदिरसारए इ वा कइरसारए इ वा धमाससारे इ वा तंबे इ वा तंबकरोडे इ वा तेवच्छिवाडियाए इ वा वाइंगणिकुसुमे इ वा कोइलच्छदकुसुमे इ वा जवासाकुसुमे इ वा, भवेयारूवे ?, गोयमा ! नो इणट्ठे समट्ठे, काउलेस्सा णं एत्तो अनिट्ठयरिया चेव जाव अमणामयरिया चेव,

तेउलेस्सा णं भंते ! केरिसिया वन्नेणं पन्नत्ता ?, गोयमा ! से जहानामए ससरुहिरए इ वा उरब्भरुहिरे इ वा वराहरुहिरे इ वा संबररुहिरे इ वा मणुस्सरुहिरे इ वा इंदगोपे इ वा बालेंदगोपे इ वा बालदिवायरे इ वा संझारागे इ वा गुंजद्धरागे इ वा जातिहिंगुलए इ वा पवालंकुरे इ वा लक्खारसे इ वा लोहियक्खमणी इ वा किमिरागकंबले इ वा गयतालुए इ वा चीणपिट्ठरासी इ वा परिजायकुसुमे इ वा जासुमणकुसुमे इ वा किंसुयपुप्फरासी इ वा रत्तुप्पले इ वा रत्तासोगे इ वा रत्तकणवीरए इ वा रत्तबंधुयजीवए इ वा, भवेयारूवे ?, गोयमा ! नो इणट्ठे समट्ठे, तेउलेसा णं एत्तो इट्ठतरिया चेव जाव मणामतरिया चेव वन्नेणं पन्नत्ता,

पम्हले० भंते ! केरिसिया वन्नेणं पन्नत्ता ?, गोयमा ! से जहनामए चंपे इ वा चंपयछल्ली इ वा चंपयभेदे इ वा हालिद्दा इ वा हालिद्दगुलिया इ वा हालिद्दभेदे इ वा हरियाले इ वा हरियालगुलिया इ वा हरियालभेदे इ वा चिउरे इ वा चिउररागे इ वा सुवन्नसिप्पी इ वा वरकणगनिहसे इ वा वरपुरिसवसणे इ वा अल्लइकुसुमे इ वा चंपयकुसुमे इ वा कण्णियारकुसुमे इ वा कुहंडयकुसुमे इ वा सुवण्णजुहिया इ वा सुहिरन्नियाकुसुमे इ वा कोरिंटमल्लदामे इ वा पीतासोगे इ वा पीतकणवीरे इ वा पीतबंधुजीवए इ वा, भवेयारूवे ?, गोयमा ! नो इणट्ठे समट्ठे, पम्हलेस्सा णं एत्तो इट्ठतरिया जाव मणामयरिया चेव वन्नेणं पन्नत्ता,

सुक्कलेस्सा णं भंते ! केरिसिया वन्नेणं पन्नत्ता ?, गोयमा ! से जहानामए अंके इ वा संखे इ वा चंदे इ वा कुंदे इ वा दगे इ वा दगरए इ वा दधी इ वा दहिघने इ वा खीरे इ वा खीरपूरए इ वा सुक्कछिवाडिया इ वा पेहुणइंमिंजिया इ वा धंतधोयरुप्पपट्टे इ वा सारदबलाहए इ वा कुमुददले इ वा पोंडरीयदले इ वा सालिपिट्ठरासीति वा कुडगपुप्फरासीति वा सिंदुवारमल्लदामे इ वा सेयासोए इ वा सेयकणवीरे इ वा सेतबंधुजीवए इ वा, भवेयारूवे ?, गो० ! नो इणट्ठे समट्ठे, सुक्कलेसा णं एत्तो इट्ठतरिया चेव मणुण्णयरिया चेव वन्नेणं पन्नत्ता,

एयाओ णं भंते ! छल्लेसाओ कइसु वन्नेसु साहिज्जंति ?, गोयमा ! पंचसु वन्नेसु साहिज्जंति, तंजहा–कण्हलेसा कालए णं वन्नेणं साहिज्जति नीललेस्सा नीलवन्नेणं साहिज्जति काउलेस्सा काललोहिएणं वन्नेणं साहिज्जति तेउलेस्सा लोहिएणं वन्नेणं साहिज्जति पम्हलेस्सा हालिदएणं वन्नेणं सलाहिज्जइ सुक्कलेस्सा सुक्किलएणं वन्नेणं साहिज्जति ।

वृ. 'कण्हलेसा णं भंते ! वण्णेणं केरिसिया पन्नत्ता' इत्यादि, कृष्णद्रव्यात्मिका लेश्या कृष्णलेश्या, कृष्णलेश्यायोग्यानि द्रव्याणि इत्यर्थः, तेषामेव वर्णादिसंभवात् न तु कृष्णद्रव्यजनिता भावरूपा कृष्णलेश्या, तस्या वर्णाद्ययोगात्,

भदन्त ! कीदृशी वर्णेन प्रज्ञप्ता ?, भगवानाह–गौतम ! स लोकप्रसिद्धो यथानामको 'जीमूत इति वा' जीमूतो बलाहकः, स चेह प्रावृट्प्रारम्भसमयभावी जलभृतो वेदितव्यः, तस्यैव

प्रायोऽतिकालिमसंभवात्, इतिशब्द उपमानभूतवस्तुनामपरिसमाप्तिद्योतकः वाशब्द उपमानान्तरापेक्षया समुच्चये, एवं सर्वत्र इतिवाशब्दौ द्रष्टव्यौ, अञ्जनं-सौवीराञ्जनं रत्नविशेषो वा स्वञ्जनं-दीपमल्लिकामलः स्नेहाभ्यक्तशकटाक्षघर्षणोद्भवमित्यपरे कज्जलं-अतीतः-वलं०माहिषं शृङ्गं तदपि च उपरितनत्वग्भागापसारणे द्रष्टव्यं, तत्रैव विशिष्टस्य कालिम्नः सम्भवात्, जम्बूफलं प्रतीतं, अरिष्टकं-फलविशेषः परपुष्टः-कोकिलः भ्रमरः-चंचरिकःभ्रमरावलिः-भ्रमरपङ्क्तिः गजकलभः-करिपोतः कृष्णकेशरः-कृष्णबकुलः आकाशथिग्गलं-शरदि मेघापान्तराल-वर्त्याकाशखण्डं, तदपि हि अतीव कृष्णं प्रतिभाति इत्युक्तं, कृष्णाशोककृष्णकणवीरकृष्ण-बन्धुजीवाः-अशोककणवीरबन्धुजीवाः वृक्षविशेषाः, अशोकादयो हि जातिभेदेन पञ्चवर्णा भवन्ति ततःशेषवर्णव्युदासार्थं कृष्णग्रहणं,

एतावत्युक्ते गौतम आह-'भवे एयारूवा ?' भगवन्! भवेत् कृष्णलेश्या वर्णेन एतद्रूपा भगवानाह-गौतम ! नायमर्थः समर्थः-नायमर्थ उपपन्नः, एतद्रूपा कृष्णलेश्येति, किंतु ?, सा कृष्णलेश्या इतो जीमूतादेःकृष्णेन वर्णे अनिष्टतरिका चैव इयमनिष्टा २ इयमनयोर्मध्येऽ-तिशयेनानिष्टा अनिष्टतरा अनिष्टतरैवानिष्टतरिका अनिप्सिततरिका एवेति भावः, इह किञ्चिद-निष्टमपि स्वरूपतः कान्तं भवति ततः कान्तताव्युदासार्थमाह-अकान्ततरिकैव, किञ्चित्केषाञ्चि-दनिष्टमपि स्वलरूपतोऽकान्तमपि अपरेषां प्रियं भवति ततः सर्वथा प्रियताव्युदासार्थमाह-अप्रियतरिकैव, अत एवामनोज्ञतरिकैव, वस्तुतः सम्यक् परिज्ञाने सति मनागप्युपादेशतया तत्र मनसः प्रवृत्त्यसंभवात्, अमनोज्ञतरमपि किञ्चिन्मध्यमं भवति ततः प्रकृष्टतरप्रकर्षविशेषप्रतिपाद-नार्थमाह-अमनआपतरिकैव, मनांसि आप्नोतिआत्मवशातां नयतीति मनआपा न मनआपा अमनआपा ततो द्वयोः प्रकर्षे तरप् एवंभूता वर्णेन प्रज्ञप्ता,

'नीललेस्सा णं भंते !' इत्यादि, अक्षरगमनिका प्राग्वत्, नवरं भृङ्गः-पक्षिविशेषः पक्ष्मलः भृङ्गपत्रं-तस्यैव पक्षिविशेषस्य पक्ष्म चासः-पक्षिविशेषः 'चासपिच्छं' चासस्य पतत्रं शुकः-कीरः 'शुकपिच्छं' शुकस्य पतत्रं श्यामा-प्रियङ्गुः वनराजी-प्रतीता उच्चन्तको-दन्तरागः आह च मूलटीकाकारः-"उच्चंतगो दन्तरागो भन्नइ" पारापतग्रीवा मयूरग्रीवा च सुप्रतीता, हलधरो-बलदेवः तस्य वसनं-वस्त्रं हलधरवसनं, तद्धि नीलं भवतीत्युपात्तं, अतसीकुसुमं वणवृक्षकुसुमं च प्रतीतं, अञ्जनकेसिका-वनस्पतिविशेषः तस्याः कुसुमं अञ्जनकेसिकाकुसुमं नीलोत्पलं-कुवलयं नीलशोकनीलकणवीरनीलबन्धुजीवा-अशोकादिवृक्षविशेषाः,

'काउलेस्सा णं भंते !' इत्यादि, अत्राप्यक्षरगमनिका प्राग्वत्, खदिरसारो धमासासारश्च लोकप्रतीतः 'तंबे इ वा तंबकरोडए इ वा तंबछेवाडिया इ वा' इति सम्प्रदायादवसेयं वृन्ताकीकुसुमं प्रतीतं कोइलच्छदकुसुमए वेति-कोकिलच्छदः-तैलकंटकः, तथा च मूलटीकाकृत्-'वन्नाहिगारे जो एत्थ कोइलच्छदो सो तिलकंटओ भन्नइ' इति, तस्य कुसुमं प्रतीतं

'तेउलेस्सा णं भंते !' इत्यादि, शशकोरभ्रवराहमनुष्यरुधिराणि शेषरुधिरेभ्यो लोहित-वर्णोत्कटानि भवन्ति तत एतेषामुपादानं, बालेन्द्रगोपकः-सद्योजातः इन्द्रगोपकः, स हि प्रवृद्धः सन् ईषत्पाण्डुरक्तो भवति ततो बालग्रहणं, इन्द्रगोपकः-प्रावृट्प्रथमसमयभावी कीटविशेषः, बालदिवाकारः-प्रथममुद्गच्छन् सूर्यः, गुञ्जा-लोकप्रतीता तस्या अर्धरागो गुञ्जार्धरागः, गुञ्जाया

हि अर्थमतिशयवन्तं गृह्णाति अर्थं वातिकृष्यमिति अर्थग्रहणं, जात्यः–प्रधानो हिङ्गुलको जात्यहिङ्गुलकः प्रवालः–शिलादलं तस्याङ्कुरः प्रवालाङ्कुरः, स हि प्रथममुद्गच्छन् अत्यन्तरक्तो भवति ततस्तदुपादानं, लाक्षारसः–प्रतीतः, लोहिताक्षमणिः–लोहिताश्रमाना रत्नविशेषः कृमिरागेण रक्तः कम्बलः कृमिरागकम्बलः, शाकपार्थिवादिदर्शनान्मध्यपमपदलोपी समासः, गजतालुचीनपिष्टराशिपारिजातकुसुमजपाकुसुमकिंशुकपुष्पराशिरक्तोत्पलरक्ता शोकरक्तकणवीररक्तबन्धुजीवा लोकप्रतीताः 'भवे एयारूवा' इति पदयोजना प्राग्वत्,

भगवानाह–'गौतम! णो इणट्ठे समट्ठे' यतस्तेजोलेश्या इतः–शशकरुधिरादिभ्यो लोहितेन वर्णेनेष्टतरिकैव, तत्र किञ्चिदकान्तमपि केषांचिदिष्टतरं भवति ततः कान्ततरताप्रतिपादनार्थमाह–कान्ततरिकैव, केषाञ्चिदिष्टतरमपि स्वरूपतः कान्ततरमप्यपरेषामप्रियं भवति ततः प्रियतरताप्रतिपत्त्यर्थमाह–प्रियतरिकैव, अत एव मनोज्ञतरिका, मनोज्ञतरमपि किञ्चिन्मध्यमं संभवेदतः प्रकृष्टतरप्रकर्षविशेषप्रतिपादनार्थमाह–मनआपतरिकैव वर्णेन प्रज्ञप्ता,

'पम्हलेस्सा णं भंते!' इत्यादि, अक्षरगमनिका प्राग्वत्, नवरं चम्पकः–सामान्यतः सुवर्णचम्पको–वृक्षविशेषः 'चम्पकछल्ली इ वा' इति सुवर्णचम्पकत्वक् 'चम्पकभेए इ वा' इति सुवर्णचम्पकस्य भेदो द्विधाभावः,भिन्नस्य हि वर्णप्रकर्षो भवति ततो भेदग्रहणं, हरिद्रा इह पिण्डहरिद्रा हरिद्रागुटिका–हरिद्रानिर्वर्त्तिता गुटिता हरिद्राभेदो–हरिद्राया द्वैधीभावः हरितालो–धातुविशेषः हरितालगुटिका–हरितालमयी गुटिता हरितालभेदो–हरितालच्छेदः चिकुरः–पीतद्रव्यविशेषः-चिकुररागः–तन्निष्पादितो वस्त्रादौ रागः 'सुवन्नसिप्पी इ वा' इति सुवर्णमयी शुक्तिका, वरं–प्रधानं यत्कनकंतस्य निकषः–कषपट्टके रेखारूपः वरकनकनिकषः वरपुरुषः–वासुदेवस्तस्य वसनं–वस्त्रं वरपुरुषवनं तद्धि पीतं भवतीत्युपात्तं अल्लकीकुसुमं लोकतोऽवसेयं चम्पककुसुमं–सुवर्णचम्पकवृक्षपुष्पं 'कण्णियारकुसुमेइ वा' इति कार्श्यानारककुसुमं कूष्मैण्डिकाकुसुमं–पुष्पा(पुंस्क)लिकापुष्पं सुवर्णयूथिकाकुसुमंप्रतीतं सुहिरण्यिका–वनस्पतिविशेषस्तस्याः कुसुमं कोरण्टकमाल्यदामपीताशोकपीतकणवीरपीतबन्धुजीवाः प्रतीता,

'सुक्कलेसा णं भंते' इत्यादि, अत्राप्यक्षरगमनिका प्राग्वत्, नवरमङ्करत्नविशेषः शङ्खचन्द्रौ प्रतीतौ कुन्दं–कुसुमंदकं–उदकं उदकरजः–उदककणाः,ते हि अतिशुभ्रा भवन्तीत्युपात्ताः, दधि–प्रतीतं दधिघनो–दधिपिण्डः क्षरं–प्रतीतं क्षीरपूरं–क्वथ्यमानं अतितापादूर्ध्वं गच्छत् क्षीरं 'सुक्कच्छिवाडियाइ वा' इति छइवाडिः–वल्लादिफलिकासा च शुष्का सति विलसातीव शुक्ला भवतीत्युपात्ता 'पेहुणमिंजिया इवे'ति पेहुणं–मयूरपिच्छं तन्मध्यवर्त्तिनी मिञ्जा पिहुणिञ्जा सा चातीव शुक्लेत्याभिहिता 'धंतधोयरुप्पपट्टे इ वा' इति ध्मातः–अग्निसम्पर्कतो निर्मलीकृतः धौतो–मीतिखरण्टितहस्तसम्मार्जनेनातिनिशितीकृतो यो रूप्यमयः पट्टः स ध्मातधौतरूप्यपट्टः, 'सारइयबलाहगे इ वा' इति शारदिकः–शरत्कालभावी बलाहकः पुण्डरीकं–सिताम्बुजं तस्य दलं–पत्रं पुण्डरीकदलं शालिपिष्टराशिकुटजपुष्पराशिसिन्दुवारमाल्यादामश्वेताशोकश्वेतकणवीरश्वेतबन्धुजीवाः प्रतीताः ॥

इह वर्णाः पञ्चभवन्ति, तद्यथा–कृष्णो नीलो लोहितो हारिद्रः शुक्लश्च, लेश्याश्च षट्, तत उपमानतो वर्णनिर्देशे कृतेऽपि संशयः का लेश्या कस्मिन्वर्णे भवति?, ततः पृच्छति–'एयाओ

णं भंते ?' इत्यादि, एता अनन्तरोदिता भदन्त ! षड् लेश्याः 'कइसु वन्नेसु 'त्ति प्राकृतत्वात् तृतीयार्थे सप्तमीयथा–"तिसु तेसु अलंकिया पुहवी 'त्रिभिस्तैरलंकृता पृथ्वी' इत्यत्र, ततोऽयमर्थः–कतिभिर्वर्णैः 'साहिज्जंति' कथ्यंते प्ररूप्यंते इतियावत्, भगवानाह–गौतम ! 'पंचसु वन्नेसु' इति पञ्चभिर्वर्षैः शिष्यंते यथा शिष्यंते तथा यद्यथा इत्यादिना दर्शयति ॥ उक्तो वर्णपरिणामः, सम्प्रति रसपरिणाममभिधित्सुराह–

मू. (४६५) कण्हलेस्सा णं भंते ! केरिसिया आसाएणं पन्नत्ता ?, गोयमा ! से जहानामए निंबे इ वा निंबसारे इ वा निंबछल्ली इ वा निंबफाणिए इ वा कडए इ वा कुडगफलए इ वा कुडगछल्ली इ वा कुडगफाणिए इ वा कडुगतुंबीइ वा कडुगतुंबिफले इ वा खारतउसी इ वा खरतउसीफले इ वा देवदालीति वा देवदालीपुप्फे इ वा मियवालुंकी इ वा मियवालुंकीफले इ वा घोसाडए इ वा घोसडिफले इ वा कण्हकंदए इ वा वज्जकंदए इ वा, स भवेयारूवे ?, गो० ! नो इणट्ठे समट्ठे, कण्हलेसा णं एत्तो अनिट्ठतम्मि चेव जाव अमणामयरिया चेव आसाएणं पन्नत्ता,

नीललेसाए पुच्छा, गोयमा ! से जहनामए भंगीति वा भंगीरए इ वा पाढा इ वा/ चविया इ वा/ चित्तामूलए इ वा पिप्पली इ वा पिप्पलीमूलए इ वा पिप्पलीचुण्णे इ वा मिरिए इ वा मिरियचुण्णए इ वा सिंगबेरे इवा सिंगबेरचुण्णे इ वा, भवेयारूवे ?, गोयमा ! नो इणट्ठे समट्ठे, नीललेस्सा णं एत्तो जाव अमणामतरिया चेव आसाएणं पन्नत्ता,

काउलेस्साए पुच्छा, गोयमा ! से जहनामए अंबाण वा अंबाडगाण वा माउलिंगाण वा बिल्लाण वा कविट्ठाण वा/ भज्जाण वा/ फणसाण वा दाडिमाण वा पारेवताण वा अक्खोडयाण वा बोराण वा तिंदुयाण वा अपक्काणं अपरिवागाणं वन्नेणं अनुववेयाणं गंधेणं अनुववेयणाणं फासेणं अनु०, भवेरूवे ?, गो० ! नो इणट्ठे समट्ठे, जाव एत्तो अमणामयरिया चेव काउलेस्सा अस्साएणं पन्नत्ता, तेउलेस्सा णं पुच्छा, गोयमा ! से जहानामए अंबाण वा पक्काणं परियावन्नेणं उववेयाणं पसत्थेणं जाव फासेण जाव एत्तो मणामयरिया चेव तेउलेस्सा आसाएणं पन्नत्ता,

पम्हलेस्साए पुच्छा, गोयमा ! से जहानामए वंदप्पाभा इ वा मनसिला इ वा वरसीधू इ वा वरवारुणी इ वा पत्तासवे इ वा पुप्फासवे इ वा फलासवे इ वा चोयासवे इ वा आसवे इ वा महूइ वा मेरएइ वा कविसाणए इ वा खजूरसारए इ वा मुद्दियासारए इ वा सुपक्कखोतरसे इ वा अट्ठपिट्ठनिट्ठिया इ वा जंबुफलकालिया इ वा वरप्पसन्ना इ वा आसला मंसला पेसला ईसिं ओट्ठवलंबिणी इसं वोच्छेदकडुई ईसिं तंबच्छिकरणी उक्कोसमदपत्तावन्नेणं उववेया जाव फासेणं आसायणिज्जा वीसायणिज्जा पीणणिज्जा विंहणिज्जा दीवणिज्जा दप्पणिज्जा मदणिज्जा सव्वेंदियगायपल्हायणिज्जा, भवेयारूवा ?, गो० ! नो इणट्ठे समट्ठे पम्हलेस्सा एत्तो इट्ठतरिया चेव जाव मणामयरिया चेव आसाएणं पन्नत्ता,

सुक्कले० भंते ! केरिसिया आस्साएणं पन्नत्ता ?, गोयमा ! से जहानामए गुले इ वा खंडे इ वा सक्करा इ वा मच्छंडिया इ वा पप्पडमोदए वा भिसकंदए इ वा पुप्फुत्तरा इ वा पउमुत्तरा इ वा आदंसिया इ वा सिद्धित्थिया इ वा आगासफालितोवमा इ वा उवमा इ वा अनोवमा इ वा, भवेतारूवे ?, गोयमा ! नो इणट्ठे समट्ठे, सुक्कलेस्सा एत्तो इट्ठतरिया चेव पियतरिया चेव मणामयरिया चेव आसाएणं पन्नत्ता ।

वृ. 'कण्हलेसा णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! स लोकप्रतीतो यथानामको निम्बो वृक्षविशेषः निम्बसारो- निम्बमध्यवर्त्यवयवविशेषः 'निम्बछल्ली' निम्बत्वक् निम्बफाणितं निम्बक्काथः कुटजोवृक्षविशेषः तस्यैव फलं कुटजफलं तस्यैव त्वक् कुटजछल्ली तस्यैव क्वाथं -कुटजफाणितं कुटुकतुम्बी प्रसिद्धा तस्या एव फलं कटुकतुम्बीफलं, खारतउसीति खारशब्दः कटुकवाची तथाऽऽगमे अनेकधा प्रसिद्धेः, ततः कटुका त्रपुषी क्षारत्रपुषी तस्या एव फलं क्षारत्रपुषीफलं देवदाली--रोहिणी तस्या एव पुष्पं देवदालीपुष्पं मृगवालुङ्की–लोकतोऽवसेया तस्या एव फलं मृगवालुङ्कीफलं घोषातकी प्रसिद्धा तस्या एव फलं घोषातकीफलं कृष्णकन्दो–वज्रकन्दश्चानन्तकायवनस्पतिविशेषौ लोकतः प्रत्येतव्यौ, एतावति उक्ते गौतमः पृच्छति–भगवन् भवेत् रसतः कृष्णलेश्या एतद्रूपा –निम्बादिरूपा ? भगवानाह–गौतम ! नायमर्थः समर्थः, यतः कृष्णलेश्या इतो–निम्बादिरसमधिकृत्यानिष्टतरिकैवेत्यादि प्राग्वत् ।

'नीललेसाए' इत्यादि, भङ्गी- वनस्पतिविशेषः तस्या एव रजो भङ्गीरजः पाठचित्रमूलके लोकप्रतीते पिप्पलीपिप्पलीमूलपिप्पलीचूर्णमरिचमरिचचूर्णशृङ्गबेरशृङ्गबरचूर्णान्यपि प्रसिद्धानि 'काउलेस्साए' इत्यादि, आम्राणां फलानामेवं सर्वत्रापि भावनीयं 'अंबाडयाण वा' इति आम्राटकाः फलविशेषाः मातुलिङ्गबिल्वकपित्थपनसदाडिमानि प्रतीतानि पारापताः--फलविशेषाः अक्षोडवृक्षफलानि अक्षोडानि बोरवृक्षफलानि बोराणि–बदराणि तिन्दुकानि च प्रतीतानि, एतेषां फलानामपक्वानां, तत्र सर्वथापि अपक्वं फलमुच्यते तत आह–अपरिपाकानां न विद्यते परिपाकः–परिपूर्णः पाको येषां तान्यपरिपाकानि तेषामीषत्पक्वानामित्यर्थः, एतदेव वर्णादिभिः कथयति वर्णेनातिविशिष्टेन गन्धेन घ्राणेन्द्रियनिर्वर्तिकरणे स्पर्शेन विशिष्टपरिपाकाविनाभाविना अनुपपेतानां–असम्प्राप्तानां यादृशो रसः, अत्र गौतमः पृच्छति--एतद्रूपा–एवंरूपरसोपेता भवेत् कापोतलेश्या ?, भगवानाह–गौतम ! नायमर्थः समर्थः, किं तु इतः --अपरिपक्वाम्रफलादेरनिष्टतरिकैवेत्यादि प्राग्वत् ।

'तेउलेस्सा णं भंते !' इत्यादि, तेषामेव आम्रफलादीनां पक्वानां तत्रेषद्यत् किमपि पक्वं लोके पक्वं व्यवहियते तत आह–पर्यायापन्नानां -परिपूर्णपाकपर्यायप्राप्तानां, एतदेवं वर्णादिभिर्निरूपयति–वर्णेन प्रशस्तेन–एकान्ततः प्रशस्येन तथा प्रशस्तेन गन्धेन प्रशस्तेन स्पर्शेनोपेतानां यादग् रसः, एतावत्युक्ते गौतम आह–रसमधिकृत्य एतद्रूपा–पक्वाम्रादिफलरूपा तेजोलेश्या भवेत् ?, भगवानाह--नायमर्थः समर्थः, किंतु परिपक्वाम्रफलादेरिष्टतरिकैवेत्यादि प्राग्वत्,

'पम्हलेसाए पुच्छा' सूत्रपाठोऽक्षरगमनिका च प्राग्वत्, नवरं 'से जहानामए' इति सा–लोकप्रसिद्धा 'यथा' येन प्रकारेण नाम यस्याः सा यथानामिका पुंस्त्वं सूत्रे प्राकृतलक्षणवशात्, प्राकृते हि लिङ्गमनियतं, यदाह पाणिनिः स्वप्राकृतलक्षणे–'लिङ्गं व्यभिचार्यपी'तिचन्द्रप्रभा इति वे'ति चन्द्रस्येव प्रभा -आकारो यस्याः सा चन्द्रप्रभा मणिशिलाकेव मणिशिलाका वरं च तत् सीधु च वरसीधु वरा चासौ वारुणी च वरवारुणी पत्रैः–धातकीपत्रैर्निष्पाद्य आसवः पत्रासवःएवं पुष्पासवः फलासवश्च परिभावनीयः चोओ–गन्धद्रव्यं तन्निष्पाद्य आसवः चोयासवः, पत्रादिविशेषेण व्यतिरिक्तं आसव आसव इति गीयते, मधुमेरककापिशायनानि मद्यविशेषाः, मूलदलखर्जूरसारनिष्पन्न आसवः खर्जूरसारःमृद्वीका–द्राक्षा तत्सारनिष्पन्नो मृद्वीकासारः सुपक्वेक्षुरसमूलद-

लनिष्पन्नः–सुपक्वेक्षुरसः अष्टभिः शास्त्रप्रसिद्धैः पिष्टैः निष्ठिता अष्टपिष्टनिष्ठिता जम्बूफलवत् कालेव कालिका जम्बूफलकालिकावरा चासौ प्रसन्ना च वरप्रसन्ना, एते सर्वेऽपि मद्यविशेषाःपूर्वकाले लोकप्रसिद्धा इदानीमपि शास्त्रान्तरतो लोकतो वा ज्ञातव्यस्वरूपं वेदितव्याः,

वरप्रसन्नाविशेषणान्याह–मांसला–उपचितरसा पेशला–मनोज्ञा मनोज्ञत्वादेव ईषत्–मनाक् ततः परस्परमास्वादतया झटित्येवाग्रतो गच्छति ओष्ठेऽवलम्बते–लगतीत्येवंशीला ईषदोष्ठावलम्बिनी तथा ईषत्–मनाक् पानव्यवच्छेदे सति तत ऊर्ध्वं कंटुका एलादिद्रव्यसम्पर्कतः उपलक्ष्यमाणतिक्तवीर्येतियावत् तथा ईषत्–मनाक् ताम्रे अक्षिणी क्रियेते अनयेति ईषत्ताम्राक्षिकरणी मद्यस्य प्रायः सर्वस्यापि तथास्वभावत्वात् 'उक्कोसमयपत्ता;' इति उत्कर्षतीति उत्कर्षः स चासौ मदश्च उत्कर्षमदः तं प्राप्ता उत्कर्षमदप्राप्ता, एतदेव वर्णादिभिः समर्थयते–वर्णेनोत्कृष्टमदाविनाभाविना प्रशस्येन गन्धेन घ्राणेन्द्रियनिर्वृतिकरणे रसेन परमसुखासिकाजनकेन स्पर्शेन मदपरिपाकाव्यभिचारिणा अत एवास्वादनीया विशेषतः स्वादनीया विस्वादनीया प्रीणयतीतिप प्रीणनीया 'कृद् बहुल'मिति वचनात् कर्त्तर्यनीयप्रत्ययः, एवं दर्प्पयतीति दर्प्पणीया मदयतीति मदनीया सर्वाणीन्द्रियाणि सर्वं च गात्रं प्रहलादयति इति सर्वेन्द्रियागात्रप्रहलादनीया, एतावत्युक्ते भगवान् गौतम आह–'भवेयारूवा !' भगवन् ! एतद्रूपा–एवंरूपरसोपेता पद्मलेश्या भवेत् !, भगवानाह–'नो इणट्ठे समट्ठे' इत्यादि प्राग्वत् ॥

'सुक्कलेस्सा णं भंते !' इत्यादि, गुडखण्डे प्रसिद्धे शर्करा–काशादिप्रभवा मत्स्यण्डी–खण्डशर्करा पर्पटमोदकादयःसम्प्रदायादवसेयाः,शेषं सुगमं ॥

तदेवमुक्तो लेश्याद्रव्याणां रसः, सम्प्रति गन्धमभिधित्सुराह–

मू. (४६६) *कइ णं भंते ! लेस्साओ दुब्भिगंधाओ पन्नत्ताओ ?, गोयमा ! तओ लेस्साओ दुब्भिगंधाओ पं० ?, तं–कण्हलेस्सा नील० काउलेस्सा ।*

कइ णं भंते ! लेस्साओ सुब्भिगंधाओ पन्नत्ताओ ?, गोयमा ! तओ लेस्साओ सुब्भिगंधाओ पं०, तं०–तेउ० पम्ह० सुक्क०, एवं तओ अविसुद्धाओ तओ विसुद्धाओ तओ अप्पसत्थाओ तओ पसत्थाओ तओ संकिलिट्ठाओ तओ असंकिलिट्ठाओ तओ सीतलुक्खाओ तओ निद्धुण्हाओ तओ दुग्गतिगामियाओ तओ दुग्गतिगामियाओ तओ सुगतिगामियाओ ।

भू. 'कइ णं भंते !' इत्यादि, सुगमं, नवरं कृष्णनीलकापोतलेश्या दुरभिगन्धाः मृतगवादिकडेवरेभ्योऽप्यनन्तगुणदुरभिगन्धोपेतत्वात् तेजःपद्मशुक्ललेश्याः सुरभिगन्धाः पिष्यमाणगन्धवाससुरभिकुसुमादिभ्योऽनन्तगुणपरमसुरभिगन्धोपेतत्वात्, उक्तं चोत्तराध्ययनेषु लेश्याध्ययने–

॥ १ ॥ "जह सुरभिकुसुमगंधो गंध वासाण पिस्समाणाण ।
एत्तो उ अनंतगुणो पसत्थगुणो लेस्साणं अप्पसत्थाणं ॥

॥ २ ॥ जह सुरभिकुसुमगंधो गंध वासाण पिस्समाणाण ।
एत्तो उ अनंतगुणो पसत्थलेसाण तिण्हंपि ॥"

उक्तो गन्धपरिणामः, अधुना शुद्धाशुद्धात्वप्रतिपादनार्थमाह–

'एवं तओ अविसुद्धाओ ततो विसुद्धाओ' इति, एवम्–उक्तेन प्रकारेण आद्यास्तिस्रो लेश्या अविशुद्धा वक्तव्याः, अप्रशस्तवर्णगन्ध रसोपेतत्वात्, उत्तरास्तिस्रो लेश्या विशुद्धाः, प्रशस्तवर्णगन्धरसोपेतत्वात्, ततश्चैवं वक्तव्याः–

'कइ णं भंते ! लेस्साओ अविसुद्धाओ पं० ?, गोयमा ! तओ लेस्साओ अप्पसत्थाओ अविसुद्धाओ पं०, तंजहा–कण्हलेस्सा नीललेस्सा काउलेस्सा,

कइ णं भंते ! लेस्साओ विसुद्धाओ पं०, ?, गोयमा ! तओ लेस्साओ विसुद्धाओ पं०, तंजहा··तेउ० पउम० सुक्कलेसा' इति, उक्ते शुद्धत्वाशुद्धत्वे, सम्प्रति प्राशस्त्याप्राशस्त्ये प्रतिपादयति–'तओ अप्पसत्थाओ तओ पसत्थाओ' आद्यास्तिस्रो लेश्या अप्रशस्ता वक्तव्याः, अप्रशस्तद्रव्यत्वेनाप्रशस्ताध्यवसायहेतुत्वात्, उत्तरास्तिस्रो लेश्याः प्रशस्ताः प्रशस्तद्रव्यतया प्रशस्ताध्यवसायकारणत्वात्, सूत्रपाठः प्राग्वदवसेयः

'कइ णं भंते ! लेस्साओ अप्पसत्थाओ पन्नत्ताओ' इत्यादि, उक्ते प्राशस्त्याप्राशस्त्ये, अधुना संक्लिष्टासंक्लिष्टत्वे प्रतिपादयति–'तओ संकिलिट्ठाओ तओ असंकिलिट्ठाओ' इति, आद्यास्तिस्रो लेश्याः संक्लिष्टाः, संक्लिष्टार्त्तरौद्रध्याननुगताध्यवसायस्थानहेतुत्वात्, उत्तरास्तिस्रो लेश्या असंक्लिष्टाः, असंक्लिष्टधर्मशुक्लध्यानानुगताध्यवसायकारणत्वातच्, अत्रापि पाठः प्राग्वत्– 'कइ णं भंते ! लेस्साओ संकिलिट्ठाओ पन्नत्ताओ' इत्यादि, अधुना शीतोष्णस्पर्शप्रतिपादनार्थमाह–'तओ सीयलुक्खाओ तओ निद्धुण्हाओ' इति, आद्यास्तिस्रो लेश्याः शीतरूक्षाः–शीतरूक्षस्वर्शोपिताः, उत्तरास्तिस्रो लेश्याः स्निग्धोष्णस्पर्शाः, इहान्येऽपि लेश्याद्रव्याणां कर्कशादयः स्पर्शाः सन्ति, यत उक्तं लेश्याध्ययने–

॥ १ ॥ ''जह करवयस्स फासो गोजिब्भाए व सागपत्ताणं ।
एत्तोवि अनंतगुणो लेस्साणं अप्पसत्थाणं ॥

॥ २ ॥ जह बूरस्स व फासो नवनीयस्स व सिरीसकुसुमाणं ।
एत्तोवि अनंतगुणो पसत्थलेस्साण तिण्हंपि ॥'' इति

तथापि शीतरूक्षौ स्वर्शौ आद्यानां तिसृणां लेश्यानां चित्तास्वास्थ्यजनने स्निग्धोष्णस्पर्शौ उत्तरासां तिसृणां लेश्यानां परमसन्तोषोत्पादने साधकतमाविति तावेव पृथक् पृथक् साक्षादुक्तावित्यदोषः, सूत्रपाठः प्राग्वत्, 'कइ णं भंते ! लेस्साओ सीयलुक्खाओ पन्नत्ताओ' इत्यादि ।

सम्प्रति गतिद्वारमभिधित्सुराह–'तओ दुग्गइगामिणीओ तओ सुगइगामिणिओ' इति, आद्यास्तिस्रो लेश्या दुर्गतिगामिन्यः–दुर्गतिं गमयन्तीत्येवंशीला दुर्गतिगामिन्यः, संक्लिष्टाध्यवसायहेतुत्वात्, उत्तरास्तिस्रो लेश्याः सुगतिं गमयन्तीत्येवंशीलाः सुगतिगामिन्यः, प्रशस्ताध्यवसायकारणत्वात्, उभयत्रापि गमेर्ण्यन्तादिन्प्रत्ययः, सूत्रपाठः प्राग्वत् 'कइ णं भंते ! लेस्साओ दुग्गइगामिणीओ पन्नत्ताओ' इत्यादि ॥ अधुना परिणामद्वारमभिधित्सुराह–

मू. (४६७) कण्हलेस्सा णं भंते ! कतिविहं परिणामं परिणमति ?, गोयमा ! तिविहं वा नवविहं वा सत्तावीसविहं वा एक्कासीतिविहं वा बेतेयालीसतविहं वा बहुयं वा बहुविहं वा परिणामं परिणमइ, एवं जाव सुक्कलेसा ।

कण्हलेसा णं भंते ! कतिपदेसिया पन्नत्ता ?, गोयमा ! अनंतपदेसिया पन्नत्ता, एवं जाव सुक्कलेसा । कण्हलेस्सा णं भंते ! कइपएसोगाढा पन्नत्ता ?, गोयमा ! असंखेज्जपएसोगाढा पन्नत्ता, एवं जाव सुक्कलेस्सा । कण्हलेस्साए णं भंते ! केवतियाओ वग्गणाओ पन्नत्ताओ ?, गोयमा ! अनंताओ वग्गणाओ, एवं जाव सुक्कलेस्साए ।।

वृ. 'कण्हलेसा ण'मित्यादि, अत्र 'कइविहं परिणामं' इत्यत्र प्राकृतत्वात् तृतीयार्थे द्वितीया द्रष्टव्या यथाऽऽचाराङ्गे ''अगणिं(च खलु)पुट्ठा'' इत्यत्र, ततोऽयमर्थः-कृष्णलेश्या णमिति वाक्यालङ्कारे भदन्त ! कतिविधेन परिणामेन परिणमति ?, भगवानाह-'गोयमा ! तिविहं वा' इत्यादि, इह त्रिविधो-जघन्यमध्यमोत्कृष्टभेदेन नवविधो यदैषामपि जघन्यादीनां स्वस्थानतारतम्यचिन्तायां प्रत्येकं जघन्यादित्रयेण गुणना, एवं पुनः पुनस्त्रिकगुणनया सप्तविंशतिविधत्वं एकाशीतिविधत्वं त्रिचत्वारिंशदधिकशतद्वयविधत्वं बहुत्वं बहुविधत्वं भावनीयं, सर्वत्र च तृतीयार्थे द्वितीया, ततस्त्रिविधेन वा परिणामेन परिणमति नवविधेन वा इत्येवं पदानां योजना कर्त्तव्या, 'एवं जाव सुक्कलेसा' इति एवं-कृष्णलेश्यागतेन प्रकारेण नीलादयोऽपि लेश्यास्तावद्वक्तव्याः यावत् शुक्ललेश्या, सूत्रपाठस्तु सुगमत्वात्स स्वयं परिभावनीयः ॥

सम्प्रति प्रदेशद्वाराभिधित्सया प्राह-'कण्हलेसा णं भंते ! कइपएसिया' इत्यादि सुगमं, नवरमनन्तप्रादेशिकेति-अनन्ताऽनन्तसङ्ख्योपेताः प्रदेशाः-तद्योग्याः परमाणवो यस्याः कृष्णलेश्यायाः-कृष्णलेश्याद्रव्यसंघातस्य साऽनन्तप्रादेशिका, अन्यथा-अनन्तप्रदेशव्यतिरेकेण स्कन्धस्य जीवग्रहणयोग्यताया एवाभावात्, एवं नीलादयोऽपि लेश्या वक्तव्याः, तथा चाह-'एवं जाव सुक्कलेसा' इति ॥

अवगाहनाद्वारमाह - 'कण्हलेस्सा णं भंते !' इत्यादि, इह प्रदेशाः-क्षेत्रप्रदेशाः प्रतिपत्तव्याः, तेष्वेवावगाहप्रसिद्धेः, ते चानन्तानामपि वर्गणानामाधारभूता असङ्ख्येया एव द्रष्टव्याः, सकलस्यापि लोकस्य प्रदेशानामसङ्ख्यायतत्वात् ॥

वर्गणाद्वारमाह-'कण्हलेस्सा णं भंते ! केवइयाओ वग्गणाओ पन्नत्ताओ' इत्यादि, इह वर्गणा-औदारिकादिशरीरप्रायोग्यपरमाणुवर्दणावत् कृष्णलेश्यायोग्यद्रव्यपरमाणुवर्गणा गृह्यन्ते, ताश्च वर्णादिभेदेन समानजातीयानामेक(व)सद्भावात् अनन्ताः प्रत्येतव्याः, एवं नीललेश्यादीनामपि वर्गणाः प्रत्येकं वक्तव्याः, तथा चाह 'एवं जाव सुक्कलेस्साए' इति ॥

अधुना स्थानाद्वाराभिधित्सया आह-

मू. (४६८) *केवतिया णं भंते ! कण्हलेस्साणं ठाणा पन्नत्ता ?, गोयमा ! असंखेज्जा कण्हलेस्साणं ठाणा पन्नत्ता, एवं जाव सुक्कलेस्सा ।*

एएसि णं भंते ! कण्हलेस्साठाणाणं जाव सुक्कलेस्साठाणाण य जहन्नगाणं दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए कतरे २ हिंतो अप्पा वा ४ ?, गोयमा ! सव्वत्थोवा जहन्नगा काउलेस्साठाणा दव्वट्ठ० जहन्नगा नीललेसाठाणा दव्वट्ठयाए असंखेज्जगुणा जहन्नगा कण्हलेसाठाणा दव्वट्ठ० असं० जहन्नतेउलेसाठाणा दव्व० असं० जहन्नगा पम्हलेसाठाणा दव्व० असं० जहन्नगा० सुक्कलेसाठाणा दव्वट्ठ० असं० पएस० सव्वत्थो० जहन्नगा काउलेसाठाणा पएस० जहन्नगा पम्हलेसाठाणा पएसट्ठ० असं० जहन्नगा सुक्कलेसाठाणा पएस० असं० दव्वट्ठपएसट्ठयाए सव्वत्थोवा जहन्नगा काउलेसाठाणा दव्वट्ठ० जहन्नगा नीललेसाठाणा दव्व० असं० एवं कण्हलेस्सा० तेउ० पम्ह० जहन्नगा सुक्कलेसाठाणा दव्व० असं० जहन्नएहिंतो सुक्कलेस्साठाणेहिंतो दव्वट्ठ० जहन्नकाउलेसठाणा पएस० असं० जहन्नया नीललेसाठाणा पएस० असं० एवं जाव सुक्कलेस्साठाणा ।

एतेसि णं कण्हलेस्साठाणाणं जाव सुक्कलेसाठाणाण य उक्कोसगाणं दव्वट्ठ० पएस० दव्वट्ठपएसट्ठ० कयरे २ हिंतो अप्पा वा ४ ?, गोयमा ! सव्वत्थोवा उक्कोसगा काउलेस्साठाणा दव्वट्ठयाए उक्कोसगा नीललेसाठाणा दव्वट्ठयाए असंखेज्जगुणा एवं जहेव जहन्नगा तहेव उक्कोसगावि, नवरं उक्कोसत्ति अभिलावो, एतेसि णं भंते ! कण्हलेस्सठाणाणं जाव सुक्कलेस्सठाणाण य जहन्नउक्कोसगाणं दव्वट्ठयाए पएसट्ठयाए दव्वट्ठपएसट्ठयाए कतरे २हिंतो अप्पा वा ४ ? गोयमा ! सव्वत्थोवा जहन्नगा काउलेस- ठाणा दव्वट्ठयाए जहन्नया नीललेसठाणा दव्व० असं० एवं कण्हतेउपम्हलेस्स० जह० सुक्कलेसठाणा दव्व० असं० जहन्नएहिंतो सुक्कलेसठाणेहिंतो दव्व० उक्कोसा काउलेसठाणा दव्वट्ठयाए असं० उक्कोसा नीललेसाठाणा दव्व० असं०

एवं कण्हतेउपम्ह उक्कोसा सुक्कलेसाठाणा दव्व० असं० पएसट्ठयाए सव्वत्थोवा जहन्नगा काउलेसठाणा पएसट्ठयाए जहन्नगा नीललेसठाणा पएसट्ठयाए असंखेज्जगुणा एवं जहेव दव्वट्ठयाए तहेव पएसट्ठयाएवि भाणियव्वं, नवरं पएसट्ठयाएत्ति अभिलावविसेसो, दव्वट्ठपएसट्ठयाए सव्वत्थोवा जहन्नगा काउलेसठाणा दव्वट्ठयाए जहन्नगदा नीललेसठाणा दव्वट्ठयाए असं०

एवं कण्हतेउपम्ह० जहन्नया सुक्कलेसठाणा दव्वट्ठयाए असं०, जहन्नएहिंतो सुक्कलेसाठाणेहिंतो दव्वट्ठयाए उक्कोसा काउलेसठाणा दव्वट्ठयाए असं० उक्कोसा नीललेससठाणा दव्व० असं० एवं कण्हतेउपम्ह० उकोसगा सुक्कलेसठाणा दव्व० असं०, उक्कोसएहिंतचो सुक्कलेसठाणे० दव्वट्ठ० जहन्नगा काउलेसठाणा पएसट्ठयाए अनंतगुणा, जहन्नगा नीललेसठाणा पएस० असं०,

एवंकण्हतेउपम्ह० जहन्नगा सुक्कलेसठाणा असं०, जहन्नएहिंतो सुक्कलेसाठाणेहिंतो पएस० उक्को० काउलेसाठाणा पएस० असं० उक्कोसया नीललेसाठाणा पएस० असं०, एवंकण्हतेउपम्ह० उक्कोसया सुक्कलेसाठाणा पएसट्ठयाए असं० (पन्नवणाए भगवईए चउत्थओ उद्देसओ समत्तो)

वृ. 'केवइया णं भंते ! कण्हलेसा ठाणा पन्नत्ता' कियन्ति भदन्त ! कृष्णलेश्यास्थानानि-प्रकर्षापकर्षकृताः स्वरूपभेदाः प्रज्ञप्ति ?, सूत्रे च पुंस्त्वं प्राकृतत्वात्, इह यदा भावरूपाः कृष्णादयो लेश्याश्चिन्त्यन्ते तदा एकैकस्या लेश्यायाः प्रकर्षापकर्षकृतस्वरूपभेदरूपाणि स्थानानि कालतोऽसङ्ख्येयोत्सर्पिण्यवसर्पिणीसमयप्रमाणानि क्षेत्रतोऽसङ्ख्येयलोकाकाशप्रदेशप्रमाणानि, उक्तं च-

॥ १ ॥ "असंखेज्जाणुस्साप्पिणीण अवसप्पिणीज जे समया ।
संखाईया लोगा लेस्साणं होंति ठाणाइं ॥"

नवरमशुभानां संक्लेशरूपाणि शुभानां च विशुद्धरूपाणि, एतेषां च भावलेश्यागतानां स्थानानां यानि कारणभूतानि कृष्णादिद्रव्यवृन्दानि तान्यपि स्थानान्युच्यन्ते तान्येव चेह ग्राह्याणि, कृष्णादिद्रव्याणामेवोहोद्देशके चिन्त्यमानत्वात्, तानि च प्रत्येकमसङ्ख्येयानि, तथाविधैकपरिणाम-निबन्धनानामनन्तानामपि द्रव्याणामेकाध्यवसायहेतुत्वेनैकत्वात्, तानि च प्रत्येकं द्विविधानि, तद्यथा-जघन्यान्युत्कृष्टानि च, जघन्यलेश्यास्थानपरिणामकारणानि जघन्यानि उत्कृष्टलेश्यास्थान-परिणामकारणान्युत्कृष्टानि, यानि तु मध्यमानि तानि जघन्यप्रत्यासन्नानि जघन्येष्वन्तर्भूतानि उत्कृष्टप्रत्यासन्नानि तूत्कृष्टेषु, एकैकानि च स्वस्थाने परिणामगुणभेदतोऽसङ्ख्येयानि, अत्र दृष्टान्तो-

यथा स्फटिकमणेरलक्तकवेशन रक्तता भवति, सा च जघन्यरक्ततागुणालक्तकवशेन

जघन्यरक्तता एकगुणा (धिका) लक्तकवर्शनैकगुणाधिकजन्या, एवमेकैकगुणवृध्या जघन्यायामेव रक्ततायामसङ्ख्येयानि स्थानानि भवन्ति, तानि च व्यवहारतः स्तोकगुणत्वात् सर्वाण्यपि जघन्यान्योवोच्यन्ते, एवमात्मनोऽपि जघन्यैकगुणाधिकद्विगुणाधिकलेश्याद्रव्योपधानवशतो लेश्यापरिणामविशेषा असङ्ख्येया भवन्ति, ते च सर्वेऽपि व्यवहारतोऽल्पगुणत्वात् जघन्यव्यपदेशं लभन्ते, तत्कारणभूतानि च द्रव्याणामपि स्थानानि जघन्यानि, एवमुत्कृष्टान्यपि स्थानान्यसङ्ख्येयानि भावनीयानि ॥ सम्प्रत्यल्पबहुत्वमाह–

'एएसि णं भंते !' इत्यादि, इह त्रीणि अल्पबहुत्वानि, तद्यथाजघन्यस्थानविषयं उत्कृष्टस्थानविषयं उभयस्थानविषयं च, एकैकमपि त्रिविधं, तद्यथा–द्रव्यार्थतया प्रदेशार्थतया उभयार्थतया च, तत्र जघन्यस्थानविषये द्रव्यार्थतायां प्रदेशार्थतायां च प्रत्येकं कापोतनीलकृष्णतेजःपद्मशुक्ललेश्यास्थानानि क्रमेण यथोत्तरमसङ्ख्येयगुणानि वक्तव्यानि, उभयार्थतायां प्रथमतो द्रव्यार्थतया कापोतनीलकृष्णतेजःपद्मशुक्ललेश्यास्थानानि क्रमेण यथोत्तरमसङ्ख्येयगुणानि वक्तव्यानि, ततः शुक्ललेश्यास्थानान्तरं प्रदेशार्थतया कापोतलेश्यास्थानानि अनन्तगुणानि वक्तव्यानि तदनन्तरं नीलकृष्णतेजः पद्मशुक्ललेश्यास्थानानि क्रमेण प्रदेशार्थतया यथोत्तरमसङ्ख्येयगुणानि, एवमुत्कृष्टान्यपि स्थानानि द्रव्यार्थतया प्रदेशार्थतया उभयार्थतया च चिन्तयितव्यानि, तथा चाह–'एवं जहेव जहन्नगा तहेव उक्कोसगावि नवरमुक्कोसत्ति अभिलावो' इति ॥

जघन्योत्कृष्टस्थानसमुदायसङ्ख्येयगुणानि वक्तव्यानि, तदनन्तरं जघन्यशुक्ललेश्यास्थानेभ्य उत्कृष्टानि कापोतनीलकृष्णतेजः पद्मशुक्ललेश्यास्थाननानि क्रमेण द्रव्यार्थतयैव यथोत्तरमसङ्ख्येयगुणानि वाच्यानि, एवं प्रदेशार्थतयापि जघन्योत्कृष्टस्थानविषयमल्पबहुत्वं भावनीयं, तथा चाह– 'एवं जहेव दव्वट्ठयाए तहेव पएसट्ठयाएवि भाणियव्वं, नवरं पएसट्ठयाएत्ति अभिलावे विसेसो' इति, द्रव्यार्थप्रदेशार्थतायां प्रथमतो द्रव्यार्थतया जघन्यानि कापोतनीलकृष्णतेजः पद्मशुक्ललेश्यास्थानानि क्रमेण यथोत्तरमसङ्ख्येयगुणानि वक्तव्यानि ततो जघन्येभ्यः शुक्ललेश्यास्थानेभ्य उक्तक्रमेणैव चोत्कृष्टानि स्थानानि द्रव्यार्थतया यथोत्तरमसङ्ख्येयगुणानि वाच्यानि तत उत्कृष्टेभ्यः शुक्ललेश्यास्थानेभ्यो जघन्यानि कापोतलेश्यास्थानानि प्रदेशार्थतया अनन्तगुणानि वक्तव्यानि ततः प्रदेशार्थतयैव जघन्यानि नीलकृष्णतेजः पद्मशुक्ललेश्यास्थानानि यथोत्तरमसङ्ख्येयगुणानि एवमुत्कृष्टस्थानान्यपि उक्तक्रमेणैव यथोत्तरमसङ्ख्येयगुणानि वक्तव्यानीति ॥

पदं – १७, उद्देशकः– ४ समाप्तम्

–: पदं – १७, उद्देशकः– ५ :–

चू. उक्तश्चतुर्थोद्देशकः सम्प्रति पञ्चम आरभ्यते, चेदमादिसूत्रम्–

मू. (४६९) कइ णं भंते ! लेस्साओ पन्नत्ताओ ?, गोयमा ! छ लेसाओ पन्नत्ताओ, तंजहा–कण्हलेसा जाव सुक्कलेसा,

से नूनं भंते ! कण्हलेस्सा नीललेसं पप्प तारूवत्ताए तावन्नत्ताए तागंधत्ताए तारसत्ताए ताफासत्ताए भुज्जो भुज्जो परिणमति, इत्तो आढत्तं जहा छउत्थओ उद्देशओ तहा भाणियव्वं जाव

वेरुलियमणिदिट्ठंतोत्ति ।। से नूनं भंते ! कण्हलेसा नीललेसं पप्प णो तारूवत्ताए जाव णो ताफासत्ताए भुज्जो भुज्जो परिणमइ ?, हंता गोयमा ! कण्हलेसा नीललेसं पप्प णो तारूवत्ताए णो तावन्नत्ताए णो तागंधत्ताए णो तारसत्ताए णो ताफासत्ताए भुज्जो २ परिणमति,

से केणट्ठे० भंते ! एवं वुच्चइ ?, गोयमा ! आगारभावमायाए वा से सिया पलिभागभावमायाए वा से सिया कण्हलेस्सा णं सा नो खलु नीललेसा तत्थ गया ओसक्कइ उस्सक्कइ वा, से तेणट्ठे० गोयमा ! एवं वुच्चइ कण्हलेसा नीललेसं पप्प णो तारूवत्ताए जाव भुज्जो २ परिणमति,

से नूनं भंते ! नीललेसा काउलेसं पप्प णो तारूवत्ताए जाव भूज्जो २ परिणमति ?, हंता गोयमा ! नीललेसा काउलेसं पप्प णो तारूवत्ताए जाव भुज्जो २ परिणमति,

से केणट्ठे० भंते ! एवं वुच्चइ–नीललेसा काउलेसं पप्प णो तारूवत्ताए० जाव भुज्जो २ परिणमति, गोयमा ! आगारभावमायाए वा सिता पलिभागभावमायाए वा सिता नीललेस्सा णं सा नो खलु सा काउलेसा तत्थगया सक्कइ उस्सक्कति वा, से एएणट्ठे० ?, गोयमा ! एवं वुच्चइ–नीललेसा काउलेसं पप्प णो तारूवत्ताए जाव भुज्जो २ परिणमति,

एवं काउलेसा तेउलेसं पप्प तेउलेसा पम्हलेसं पप्प पम्हलेसा सुक्कलेसं पप्प, से नूनं भंते ! सुक्कलेसा जाव णो परिणमति ?, गो० ! आगारभावमायाए वा जाव सुक्कलेस्सा णं सा नो खलु सा पम्हलेसा तत्थगया ओसक्कइ, से तेणट्ठेणं गोयमा ! एवं वुच्चइ जावणो परिणमइ (पन्नवणाए भगवईए लेसापदे पंचमुद्देसो सम्मत्तो ।)

मू. कइ णं भंते ! लेस्साओ पन्नत्ताओ' इत्यादि, चतुर्थोद्देशकवत् तावद्वक्तव्यं यावद्वैडूर्यमणिदृष्टान्तः, व्याख्या च प्राग्वदेव निरवशेषा कर्तव्या, प्रागुपन्यस्तस्याप्यस्य सूत्रस्य पुनरुपन्यासोऽग्रेतनसूत्रसम्बन्धार्थः,तदेव सूत्रमाह–

'से नूनं भंते !' इत्यादि, इह तिर्यङ्मनुष्यविषयं सूत्रमनन्तरमुक्तं, इदं तु देवनैरयिकविषयमवसेयं, देवनैरयिका हि पूर्वभगवतचरमान्तर्मुहूर्तादारभ्य यावत्परभवगतमाद्यमन्तर्मुहूर्तं तावदवस्थितलेश्याकाः ततोऽमीषां कृष्णादिलेश्याद्रव्याणां परस्परसम्पर्केऽपि न परिणम्यपरिणामकभावो घटते ततःसम्यगधिगमाय प्रश्नयति–

'से नूनं भंते !' इत्यादि, सेशब्दोऽथशब्दार्थः, स च प्रश्ने, अथ नूनं–निश्चितं भदन्त ! कृष्णलेश्या–कृष्णलेश्याद्रव्याणि नीललेश्यानीललेश्याद्रव्याणि प्राप्य, प्राप्तिरिह प्रत्यासन्नत्वमात्रं गृह्यते नतु परिणम्यपरिणामकभावेनान्योऽन्यसंश्लेषः,तद्रूपतया–तदेव–नीललेश्याद्रव्यगतं रूपं–स्वभावो यस्य कृष्णलेश्यास्वरूपस्य तत्तद्रूपं तद्भावस्तद्रूपता तया, एतदेव व्याचष्टे–न तद्वर्णतया न तद्गन्धतया न तद्रसतया न तत्स्पर्शतया भूयो भूयः परिणमते, भगवानाह–हन्तेत्यादि, हन्त गौतम ! कृष्णलेश्येत्यादि, तदेव ननु यदि न परिणमते तर्हि कथं सप्तमनरकपृथिव्यामपि सम्यक्-त्वलाभः, स हि तेजोलेश्यादिपरिणामे भवति सप्तमनरकपृथिव्यां च कृष्णलेश्येति, कथं चेतत्, वाक्यं घटते ? 'भावपरावत्तीए पुण सुरनेरइयाणंपि छल्लेसा' इति लेश्यान्तरद्रव्यसम्पर्कतस्तद्रूपतया परिणामासंभवेन भावपरावृत्तेरेवायोगात्, अत एव तद्विषये प्रश्ननिर्वचनसूत्रे आह–

'से केणट्ठेणं भंते !' इत्यादि, तत्र प्रश्नसूत्रं सुगमं निर्वचनसूत्रं–आकारः–तच्छायामात्रं आकारस्य भावः–सत्ता आकारभावः स एव मात्रा आकारभावमात्रा तयाऽऽकारभावमात्रया मात्राशब्द आकारभावातिरिक्तपरिणामान्तरप्रतिपत्तिव्युदासार्थः, 'से' इति सा कृष्णलेश्या

नीललेश्यारूपतया स्यात् यदिवा प्रतिभागः–प्रतिबिम्बमादर्शादाविव विशिष्टः प्रतिबिम्ब्यवस्तुगत आकारः प्रतिभाग एव प्रतिभागमात्रा तया, अत्रापि मात्राशब्दः प्रतिबिम्बातिरिक्तपरिणामान्तरव्युदासार्थः स्यात् कृष्णलेश्या नीललेश्यारूपतया, परमार्थतः पुनः कृष्णलेश्यैव नो खलु नीललेश्या सा, स्वस्वरूपापरित्यागात्, न खल्वादर्शादयो जपाकुसुमादिसन्निधानतस्तत्प्रतिबिम्बमात्रामादधाना नादर्शादय इति परिभावनीयमेतत्, केवलं सा कृष्णलेश्या तत्र–स्वस्वरूपे गता–अवस्थिता सती उत्ष्वष्कते तदाकारभावमात्रधारणतस्तत्प्रतिबिम्बमात्रधारणतो वोत्सर्पतीत्यर्थः, कृष्णलेश्यातो हि नीललेश्या विशुद्धा ततस्तदाकारभावं तत्प्रतिबिम्बमात्रं वा दधाना सती मनाक् विशुद्धा भवतीत्युत्सर्पतीति व्यपदेश्यते, उपसंहारवाक्यमाह–"से एएणट्ठेण"मित्यादि, सुगमं ।

एवं नीललेश्यायाः कापोतलेश्यामधिकृत्य कापोतलेश्यायास्तेजोलेश्यामधिकृत्य तेजोलेश्यायाः पद्मलेश्यामधिकृत्य पद्मलेश्यायाः शुक्ललेश्यामधिकृत्य सूत्राणि भावनीयानि, सम्प्रति पद्मलेश्यामधिकृत्य शुक्ललेश्याविषयं सूत्रमाह–

'से नूनं भंते ! सुक्कलेसा पम्हलेसं पप्प' इत्यादि, एतच्च प्राग्वद् भावनीयं, नवरं शुक्ललेश्यापेक्षया पद्मलेश्या हीनपरिणामा ततः शुक्ललेश्या पद्मलेश्याया आकारभावं तत्प्रतिबिम्बमात्रं वा भजन्ती मनागविशुद्धा भवति ततोऽवष्वष्कते इति व्यपदिश्यते, एवं तेजःकापोतनीलकृष्णलेश्याविषयाण्यपि सूत्राणि भावनीयानि, ततः पद्मलेश्यामधिकृत्य तेजःकापोतनीलकृष्णलेश्याविषयाणि तेजोलेश्यामधिकृत्य कापोतनीलकृष्णविषयाणि कापोतलेश्यामधिकृत्य नीलकृष्णलेश्याविषये नीललेश्यामधिकृत्य कृष्णलेश्याविषयमिति, अमूनि च सूत्राणि साक्षात् पुस्तकेषु न दृश्यन्ते केवलमर्थतः प्रतिपत्तव्यानि, तथा मूलटीकाकारेण व्याख्यानात्, तदेवं यद्यपि देवनैरयिकाणामवस्थितानि लेश्याद्रव्याणि तथापि तत्तदुपादीयमानलेश्यान्तरद्रव्यसम्पर्कतः तान्यपि तदाकारभावमात्रां भजन्ते इति भावपरावृत्तियोगतः षडपि लेश्या घटन्ते, ततः सप्तमनरकपृथिव्यामपि सम्यकत्वलाभ इति न कश्चिद्दोषः ॥

पदं – १७, उद्देशकः– ५ – समाप्तः

–: पदं – १७, उद्देशकः– ६ :–

वृ. तदेवमुक्तः पञ्चमोद्देशकः, सम्प्रति षष्ठ उच्यते, तस्य चेदमादिसूत्रम्–

मू. *(४७०) कति णं भंते ! लेसा पन्नत्ता ?, गोयमा ! छ लेसा पन्नत्ता, तंजहा–कण्ह० जाव सुक्कलेसा, मणुस्साणं भंते ! कइ लेसा पं० ?, गो० ! छ लेस्साओ पं०, तं०–कण्हलेसा जाव सुक्कलेसा मणुस्सी णं भंते ! पुच्छा, गो० ! छलेस्साओ पं०, तं०–कण्हा जाव सुक्का ॥*

कम्मभूमयमणुस्साणं भंते ! कइ लेसाओ पं० ?, गो० ! छ ले० पं०, तं०–कण्हा जाव सुक्का, एवं कम्मभूमयमणुस्सीणवि । भरहेरवयमणुस्साणं भंते ! कति लेसाओ पं० ?, गो० ! छले० पं०, तं०–कण्हा जाव सुक्का, एवं मणुस्सीणवि,

अकम्मभूमयमणुस्साणं पुच्छा, गो० ! चत्तारि लेसाओ पं०, तं०–कण्हा जाव तेउ०, एवं अकम्मभूमिगमणुस्सीणवि, एवं अंतरदीवमणुस्साणं मणुस्सीणवि,

एवं हेमवयएरन्नवयअकम्मभूमयमणुस्साणं मणुस्सीण य कइ लेसाओ पं० ?, गो० ! चत्तारि, तं०–कण्हा जाव तेउ०, हरिवासरम्मयअकम्मयभूमयमणुस्साणं मणुस्सीण य पुच्छा,

गो० ! चत्तारि, तं०–कण्हा जाव तेउ०, देवकुरुउत्तरकुरुअकम्मभूमयमणुस्सा एवं चेव, एतेसिं चेव मणुस्सीणं एवं चेव, धायइसंडपुरिमद्धेवि एवं चेव, पच्छिमद्धेवि, एवं पुक्खरदीवेवि भाणियव्वं

कण्हलेसे णं भंते ! मणुस्से कण्हलेसं गब्भं जाणेज्जा ?, हंता गो० ! जाणेज्जा, कण्हले० मणुस्से नीललेo गब्भं जाणेज्जा ?, हंता गो० ! जाणेज्जा, जाव सुक्कलेसं गब्भं जणेज्जा, नीलले० मणुस्से कण्हले० गब्भं जाणेज्जा ?, हंता गो० ! जाणेज्जा, एवं नील० मणुस्से जाव सुक्कले० गब्भं जाणेज्जा, एवं काउलेसेणं छप्पि आलावगा भाणियव्वा, तेउलेसाणवि पम्हलेसाणवि सुक्कले०, एवं छत्तीसं आलावगा भा० । कण्ह० इत्थिया कण्ह० गब्भं जाणेज्जा ?, हंता गोयमा ! जाणेज्जा, एवं एतेवि छत्तीसं आलावगा भाणि० । कण्हले० भंते ! मणुस्से कण्हलेसाए इत्थियातो कण्हले० गब्भं जाणेज्जा ? हंता गोयमा ! जाणेज्जा, एवं एते छत्तीसं आलावगा, कम्मभूमगकण्हलेसे णं भंते ! मणुस्से कण्ह० इत्थियाए कण्हले० गब्भं जणेज्जा ?, हंता गो० ! जाणेज्जा, एवं एते छत्तीस०,

अकम्मभूमयकण्ह० मणु० अ० कण्ह० इत्थियाए अकम्मभूमयकण्हलेसं गब्भं जणेज्जा हंता गोयमा ! जणेज्जा, नवरं चउसु लेसासु सोलस आलावगा, एवं अंतरदीवगाणवि । (इति पन्नवणाए भगवईए लेस्सापदं समत्तं ॥)

वृ. 'कइ णं भंते ! लेस्साओ पन्नत्ताओ' इत्यादि, सुगमं उद्देशकपरिसमाप्ति यावत्, नवरमुत्पद्यमानो जीवो जन्मान्तरे लेश्याद्रव्याण्यादायोत्पद्यते तानि च कस्यचित्कानिचिदिति । कृष्णलेश्यापरिणतेऽपि जनके जन्यस्य विचित्रलेश्यासंभवः, एवं शेषलेश्यापरिणतेऽपि भा०

पदं – १७, उद्देशकः- ४ समाप्तम्

पदं – १७ – समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे
सप्तदशपदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता ।

पदं – १८, "कायस्थिति"

वृ. तदेवमुक्तं सप्तदशं पदं, अधुनाऽष्टादशमारभ्यते, अस्य चाभिसम्बन्धः–इहानन्तरपदे लेश्यापरिणाम उक्तः, सम्प्रति परिणामसाम्यात् कायस्थितिपरिणाम उच्यते, तत्रचेदम् अधिकारगाथाद्वयं–

मू. (४७१) *जीव गइंदिय काए जोए वेए कसायलेसा य ।*
सम्मत्तनाणदंसण संजय उवओग आहारे ॥

मू. (४७२) *भासगपरित्त पज्जत्त सुहुम सन्नी भवऽत्थि चरिमे य ।*
एतेसिं तु पदाणं कायठिई होइ नायव्वा ॥

वृ. 'जीवगइंदियकाए' इत्यादि, प्रथमं जीवपदं, किमुक्तं भवति ? –प्रथमं जीवपदमधिकृत्य कायस्थितिर्वक्तव्या इति १ ततो गतिपदं २ तदनन्तरमिन्द्रियपदं ३ ततःकायपदं ४ ततो योगपदं ५ तदनन्तरं वेदपदं ६ ततः कषायपदं ७ ततो लेश्यापदं ८ तदनन्तरं सम्यक्त्वपदं ९ ततो ज्ञानपदं १० तदनन्तरं दर्शनपदं ११ ततः संयतपदं १२ तत उपयोगपदं १३ तदनन्तरमाहारकपदं १४

ततः परीत्तपदं १५ । ततो भाषकपदं १६ ततः पर्याप्तपदं १७ ततः सूक्ष्मपदं १८ संज्ञिपदं १९ ततो भवसद्धिकपदं २० तदनन्तरमस्तिकायपदं २१ ततश्चरमपदं २२ ।

एतेषां द्वाविंशतिसङ्ख्यानां पदानां कायस्थितिर्भवति ज्ञातव्या–यथा च भवति ज्ञातव्या तथा यथोद्देशं निर्देक्ष्यते, अथ कायस्थितिरिति कः शब्दार्थः ?, उच्यते, काय इह पर्यायः परिगृह्यते, काय इव काय इत्युपमानात्, स च द्विधासामान्यरूपो विशेषरूपश्च, तत्र सामान्यरूपो निर्विशेषणो जीवत्वलक्षणः विशेषरूपो नैरयिकत्वादिलक्षणः तस्य स्थितिः–अवस्थानं कायस्थितिः, किमुक्तं भवति ? –सामान्यरूपेण विशेषरूपेण वा पर्यायेणादिष्टस्य जीवस्य यदव्यवच्छेदेन भवनं सा कायस्थितिः, ततः प्रथमतः सामान्यरूपेण पर्यायेणादिष्टस्याव्यवच्छेदेन यद् भवनं तद्विचिन्तयिषुराह–

पदं – १८ – दारं – १ "जीव"

[जीवे णं भंते ! जीवेत्ति कालतो केवचिरं होइ ?, गोयमा ! सव्वद्धं ।]

वृ. ['जीवे णं भंते !' इत्यादि, इह जीवनपर्यायविशिष्टो जीव उच्यते, ततः प्रश्नयति–जीवा 'णं' इति वाक्यालङ्कारे भदन्त ! जीव इति जीवनपर्यायविशिष्टतया इत्यर्थः 'कालतः' कालमधिकृत्य 'किय- च्चिरं' कियन्तं कालं यावद्भवति ?, भगवानाह–गौतम ! 'सर्वाद्धां' सर्वकालं यावत्, कथमिति चेत् ?, उच्यते, इह जीवनमुच्यते प्राणधारणं, प्राणाश्च द्विधा–द्रव्यप्राणा भावप्राणाश्च, द्रव्यप्राणा इन्द्रियपञ्चकबलत्रिकोच्छ्वासनिःश्वासायुः कर्मानुभववलक्षणाः संसारिणामस्ति यस्यामायुःकर्म्मा-नुभवनं न विद्यते इति, मुक्तानां तु ज्ञानादिरूपप्रमाणधारणमवस्थितं, मुक्तानामपि हि ज्ञानादिरूपाः प्राणाः सन्ति, यैर्मुक्तोऽपि द्रव्यप्राणैः जीवतीति व्यपदिश्यते, ते च ज्ञानादयो मुक्तानां शाश्वतिकाः, अतः संसार्यवस्थायां मुक्तावस्थायां च सर्वत्र जीवनमस्तीति सर्वकालभावी जीवनपर्यायः ॥]

पदं – १८ – दारं – २ "गति"

मू. (४७३) नेरइए णं भंते ! नेरइएत्ति कालओ केच्चिरं होइ ?, गोयमा ! जहन्नेणं दस, वाससहस्साइं उक्को सेणं तेत्तीसं सागरोवमाइं ॥

तिरिक्खजोणिए णं भंते ! तिरिक्खजोणिएत्ति कालओ केच्चिरं होइ ?, गोयमा ! जह० अंतोमुहुत्तं उक्कोसेणं अनंतं कालं अनंताओ उस्सप्पिणिओसप्पिणीओ कालतो खेत्तओ अनंता लोगा असंखेज्जपोग्गलपरियट्टा ते णं पुग्गलपरियट्टा आवलियाए असंखिज्जइभागे ।

तिरिक्खजोणिणी णं भंते ! तिरिक्खजोणिणित्ति कालओ केवचिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तिन्नि पलिओवमाइं पुव्वकोडिपुहुत्तमब्भहियाइं ॥ एवं मणुस्सेवि मणुस्सीवि एवं चेव ॥

देवे णं भंते ! देवत्ति कालओ केवच्चिरं होइ ?, गोयमा ! जहेव नेरइए, देवी णं भंते ! देवित्ति कालतो केवच्चिरं होइ ?, गो० ! जहन्नेणं दस वाससहस्साइं उक्कोसेणं पणवन्नं पलिओवमाइं

सिद्धे णं भंते ! सिद्धेत्ति कालतो केवच्चिरं होइ ?, गोयमा ! सादिए अपज्जवसिए ।

नेरइए णं भंते ! नेरइयअपज्जत्तएत्ति कालतो केवच्चिरं होइ ?, गोयमा ! जहन्नेणवि उक्कोसेणवि

अंतोमुहुत्तं, एवं जाव देवी अपज्जत्तिया ।

नेरइयपज्जत्तए णं भंते ! नेरइयपज्जत्तएत्ति कालतो केवच्चिरं होइ ?, गोयमा ! जहन्नेणं दस वाससहस्साइं अंतोमुहुत्तूणाइं उक्कोसेणं तेत्तीसं सागरोवमाइं अंतोमुहुत्तूणाइं ।

तिरिक्खजोणियपज्जत्तए णं भंते ! तिरिक्खजोणियपज्जत्तएत्ति कालतो केवच्चिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तिन्नि पलिओवमाइं अंतोमुहुत्तूणाइं. एवं तिरिक्खजोणिणिपज्जत्तियावि, एवं मणुस्सेवि मणुस्सीवि, एवं चेव देवपज्जत्तए जहा नेरइयपज्जत्तए,

देवीपज्जत्तिया णं भंते ! देवीपज्जत्तियत्ति कालतो केवच्चिरं होइ ?, गोयमा ! जहन्नेणं दस वाससहस्साइं अंतोमुहुत्तूणाइं उक्कोसेणं पणपन्नंपलिओवमाइं अंतोमुहुत्तूणाइं ॥

वृ. सम्प्रति तस्यैव जीवस्य नैरयिकत्वादिपर्यायैरादिष्टस्य तैरेव पर्यायैरव्यवच्छेदेनावस्थानं चिन्तयन्नाह–'नेरइए णं भंते !' इत्यादि, सुगमं, नवरं नैरयिकास्तथाभवस्वाभाव्यात् स्वभवाच्च्युत्वा अनन्तरं न भूयो नैरयिकत्वेनोत्पद्यन्ते, ततो यदेव तेषां भवस्थितेः परिमाणं तदेव कायस्थितेरपि इत्युपपद्यते जघन्यत उत्कर्षतश्च यथोक्तपरिमाणा कायस्थितिः ।

'तिरिक्खजोणिए णं भंते !' इत्यादि, तत्र यदा देवो मनुष्यो नैरयिको वा तिर्यक्षूत्पद्यते तत्र चान्तुहूर्त्तं स्थित्वा भूयः स्वगतौ गत्यन्तरे वा सङ्क्रामति तदा लभ्यते जघन्यतोऽन्तर्मुहूर्त्तप्रमाणा कायस्थितिः, उत्कर्षतोऽनन्तं कालं यावत्, तस्य चानन्तस्य कालस्य प्ररूपणा द्विधा, तद्यथा–कालतः क्षेत्रतश्च, तत्र कालतोऽनन्ता उत्सर्पिण्यवसर्पिणयः, उत्सर्पिण्यवसर्पिणीपरिमाणं च नन्द्यध्ययनटीकातोऽवसेयं, तत्र सविस्तरमभिहितत्वात्, क्षेत्रतोऽनन्तालोकाः, किमुक्तं भवति ?–अनन्तेषु लोकाकाशेषु प्रतिसमयमेकैकप्रदेशापहारे क्रियमाणे यावत्योऽनन्ता उत्सर्पिण्यवसर्पिण्यो भवन्ति तावतीर्यावत् तिर्यक् तिर्यक्त्वेनावतिष्ठते,

एतदेव कालपरिमाणं पुद्गलपरावर्त्तसङ्ख्यातो निरूपयति–असङ्ख्येयाः पुद्गलपरावर्त्ताः, पुद्गलपरावर्त्तस्वरूपं च पञ्चसङ्ग्रहटीकायां विस्तरतरकेणाभिहितचमिति ततोऽवधार्यं, इह तु नाभिधीयते, ग्रन्थगौरवभयात्, असङ्ख्याता अपि पुद्गलपरावर्त्ताः कियन्त इति विशेषसङ्ख्यानिरूपणार्थमाह– 'ते णं' इत्यादि, ते पुद्गलपरावर्त्ता आवलिकाया असङ्ख्येयभागः, किमुक्तं भवति ?– आवलिकाया असङ्ख्येयतमे भागे यावन्तः समयास्तावत्प्रमाणा असङ्ख्येयाः पुद्गलपरावर्त्ता इति, एतच्चैवं कायस्थितिपरिमाणं वनस्पत्यपेक्षया द्रष्टव्यं न शेषतिर्यगपेक्षया, वनस्पतिव्यतिरेकेण शेषतिरश्चामेतावत्कालप्रमाणकायस्थितेरसंभवात्,

'तिरिक्खजोणिणी णं भंते !' इत्यादि, इहोत्तरत्र च जघन्यान्तर्मुहूर्त्तभावना प्रागुक्तान्तर्मुहूर्त्तभावनानुसारेण स्वयं भावनीया, उत्कर्षतस्त्रीणि पल्योपमानि पूर्वकोटीपृथक्त्वाभ्यधिकानि, कथं इति चेत् ?, उच्यते, इह तिर्यङ्मनुष्याणां संज्ञीपञ्चेन्द्रियाणामुत्कर्षतोऽष्टौ भवाः कायस्थितिः "नरतिरियाण सत्तट्ठ भवा" इति वचनात्, तत्रोत्कर्षस्य चिन्तयमानत्वात् अष्टावपि भवा यथासंभवमुत्कृष्टस्थितिकाः परिगृह्यन्ते, असङ्ख्येयवर्षायुष्कस्तु मृत्वा नियमतो देवलोकेषूपद्यते न तिर्यक्षु, ततः सप्त भवाः पूर्वकोट्यायुषो वेदितव्याः अष्टमस्तु पर्यन्तवर्त्ती देवकुर्वादिष्विति त्रीणि पल्योपमानि पूर्वकोटीपृथक्त्वाभ्यधिकानि भवन्ति–'एवं मणुस्सेवि मणुस्सीवि' इति,

एवं–तिर्यक्स्त्रीगतेन प्रकारेण मनुष्योऽपि मानुष्यपि च वक्तव्या, किमुक्तं भवति मनुष्यसूत्रे

मानुषीसूत्रे च जघन्यतोऽन्तर्मुहूर्ते उत्कर्षतस्त्रीणि पल्योपमानि पूर्वकोटीपृथक्त्वाभ्यधिकानि वक्तव्यानीति, सूत्रपाठस्त्वेवं–'मणुस्से णं भंते ! मणुस्सत्ति कालओ केवच्चिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तिन्नि पलिओवमाइं पुव्वकोडीपुहुत्तमब्भहियाइं, मणुस्सी णं भंते ! मणुस्सित्ति कालओ केवच्चिरं होइ' इत्यादि,

देवसूत्रे 'जहेव नेरइए' इति, यथैव नैरयिकः प्रागुक्तः तथैव देवोऽपि वक्तव्यः, देवस्यापि जघन्यतो दश वर्षसहस्राणि उत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणि वक्तव्यानीति भावः, देवा अपि हि स्वभवाच्च्युत्वा न भूयोऽनन्तरं देवत्वेनोपपद्यन्ते "नो देवे देवेसु उववज्जइ" इति वचनात्, ततो यदेव देवानामपि भवस्थितेः परिमाणं तदेव कायस्थितेरपि, देवीसूत्रे उत्कर्षतः पञ्चपञ्चाशत्पल्योपमानीति, देवीनां भवस्थितेरुत्कर्षतोऽप्येतावत्प्रमाणत्वात्, एतच्चेशानदेव्यपेक्षया द्रष्टव्यं, अन्यत्र देवीनामेतावत्याः स्थितेरसंभवात्, । सिद्धसूत्रे साद्यपर्यवसित इति, सिद्धत्वस्य क्षयासंभवात्, सिद्धत्वाद्धि च्यावयितुं ईशा रागादयो, न च ते भगवतः सिद्धस्य संभवन्ति, तन्निमित्तकर्मपरमाण्वभावात्, तदभावश्चा तेषां निर्मूलकाषंकषितत्वात् ॥

सम्प्रत्येतावतो नैरयिकत्वादीन् पर्यायान् पर्याप्तापर्याप्तविशेषणविशेषितान् निरूपयन्नाह 'नेरइए णं भंते इत्यादि, नैरयिको भदन्त ! अपर्याप्त इति–अपर्याप्तत्वपर्यायविशिष्टोऽविच्छेदेन कालतः कियन्तं कालं यावद्भवति ?, भगवानाह–गौतम ! इत्यादि, इहापर्याप्तावस्था जघन्यत उत्कर्षतश्चान्तर्मुहूर्तप्रमाणा, तत ऊर्द्धं नैरयिकाणामवश्यं पर्याप्तावस्थाभावात्, तत उक्तं 'जहन्नेणवि अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं' । 'एवं जाव देवी अपज्जत्तिया' इति, एवं–नैरयिकोक्तेन प्रकारेणापर्याप्तास्तिर्यगादयनावद्वक्तव्याः यावद्देव्यपर्याप्तिका, अपर्याप्तकदेवीसूत्रं यावदित्यर्थः, तत्र तिर्यञ्चो मनुष्याश्च यद्यप्यपर्याप्तिका एव मृत्वा भूयो भूयोऽपर्याप्तत्वेनोपपद्यन्ते तथापि तेषामपर्याप्तावस्था नैरयन्तर्येणोत्कर्षतोऽपि अन्तर्मुहूर्तप्रमाणैव लभ्यते, यद्वक्ष्यति अपज्जत्तए णं भंते ! अपज्जत्तएत्ति कालतो केवच्चिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणवि अंतोमुहुत्तं' इति, देवदेवीसूत्रे अन्तर्मुहूर्तभावना नैरयिकवत् वक्तव्या ।

'नेरइयपज्जत्तए णं भंते !' इत्यादि, नैरयिकपर्याप्त इति–पर्याप्तो नैरयिक इत्येवमविच्छेदेन कालतः कियच्चिरं भवति ?, भगवानाह–गौतम ! जघन्यतो दश वर्षसहस्राण्यन्तर्मुहूर्तोनानि, अन्तर्मुहूर्तस्याद्यस्या पर्याप्तावस्थायां गतत्वात्, अत एवोत्कर्षतोऽपि त्रयस्त्रिंशत्सागरोपमाण्यन्तर्मुहूर्तोनानि, तिर्यक्सूत्रे जघन्यतोऽन्तर्मुहूर्तभावना प्रागिव, उत्कर्षतस्त्रीणि पल्योपमान्यन्तर्मुहूर्तोनानि, एतच्चोत्कृष्टायुषो देवकुर्वादिभाविनस्तिरश्चोऽधिकृत्य वेदनीयं, अन्येषामेतावत्कालप्रमाणायाः पर्याप्तावस्थाया अविच्छेदेनाप्राप्यमाणत्वात्, अत्राप्यन्तर्मुहूर्तोनत्वमन्तर्मुहूर्तस्याद्यस्यापर्याप्तावस्थायां गतत्वात्, एवं तिर्यक्स्त्रीमनुष्यामनुषीसूत्रेष्वपि भावनीयं ।

देवदेवीसूत्रयोस्तु जघन्यतउत्कर्षतश्च कायस्थितिपरिमाणं प्रागुक्तमेव अपर्याप्तावस्थाभाविनाऽन्तर्मुहूर्तेन हीनं परिभावनीयं । गतं गतिद्वारं, इदानीमिन्द्रियद्वारमभिधित्सुराह–

–: पदं – १८ – दारं – ३ :– "इन्द्रियं"

मू. (४७४) सइंदिए णं भंते ! सइंदिएत्ति कालतो केवच्चिरं होइ ?, गोयमा ! सइंदिए दुविए पन्नत्ते, तंजहा–अणाइए वा अपज्जवसिए अणाइए सपज्जवसिए । एगिंदिए णं भंते ! एगिंदिएत्ति

कालतो केवचिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं अनंतं कालं वणस्सइकालो ॥

बेइंदिए णं भंते ! बेइंदिएत्ति कालतो केवचिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं संखेज्जं कालं । एवं तेइंदियचउरिंदिएवि । पंचिंदिए णं भंते ! पंचिंदिएत्ति कालतो केवचिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं सागरोवमसहस्सं साइरेगं ।

अनिंदिए णं पुच्छा, गोयमा ! साइए अपज्जवसिए । सइंदियपज्जत्तए णं भंते ! सइंदियपज्जत्तएत्ति कालतो केवचिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं सागरोवमसतपुहुत्तं सातिरेगं ।

एगिंदियपज्जत्तए णं भंते ! पुच्छा, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं संखेज्जाइं वाससहस्साइं । बेइंदियपज्जत्तए णं पुच्छा, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं संखेज्जवासाइं,

तेइंदियपज्जत्तए णं पुच्छा, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं संखेज्जाइं राइंदियाइं, चउरिंदियपज्जत्तए णं भंते ! पुच्छा, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं संखेज्जा मासा ।

पंचिंदियपज्जत्तए णं भंते ! पंचिंदियपज्जत्तएत्ति कालतो केवचिरं होइ ?, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं सागरोवमसयपुहुत्तं । सइंदियअपज्जत्तए णं भंते ! पुच्छा, गोयमा ! जहन्नेणवि उक्कोसेणवि अंतोमुहुत्तं, एवं जाव पंचिंदियअपज्जत्तए ।

वृ. 'सइंदिए णं भंते!' इत्यादि, सहेन्द्रियं यस्य येन वा स सेन्द्रियः, इन्द्रियं च द्विधा–लब्धीन्द्रियं द्रव्येन्द्रियं च, तत्रेह लब्धीन्द्रियमवलसेयं, तद्ग्रहणतावप्यस्ति इन्द्रियपर्याप्तस्यापि च, ततो निर्वचनसूत्रमुपपद्यते, अन्यथा तदघटमानकमेव स्यात्, निर्वचनसूत्रमेवाह–गौतम ! इत्यादि, इह यः संसारी स नियमात् सेन्द्रियः, संसारश्चानादिः इत्यनादिः सेन्द्रियः, तत्रापि यः कदाचिदपि न सेत्स्यति सोऽनाद्यपर्यवसितः, सेन्द्रियत्वपर्यायस्य कदाचिदप्यव्यवच्छेदात्, यस्तु सेत्स्यति सोऽनादिसपर्यवसितः, मुक्तवस्थायां सेन्द्रियत्वपर्यायस्याभावात् ।

एकेन्द्रियसूत्रे यदुक्तं 'उक्कोसेणं अनंतं कालं' इति तमेवानन्तकालं सविशेषं निरूपयति--'वणस्सइकालो' इति, यावान् वनस्पतिकालोऽग्रे वक्ष्यते तावन्तं कालं यावदित्यर्थः, वनस्पतिकायश्चैकेन्द्रियः, एकेन्द्रियपदे तस्यापि परिग्रहात्, स च वनस्पतिकालः एवंप्रमाणः--'अनंताओ उस्सप्पिणीओसप्पिणीओ कालओ खेत्तओ अनंता लोगा असंखेज्जा पोग्गलपरियट्टा, ते णं पोग्गलपरियट्टा आवलियाए असंखेज्जइभागो' इति द्वीन्द्रियसूत्रे 'संखेज्जं कालं'ति सङ्ख्येयानि वर्षसहस्राणीत्यर्थः, 'विगलिंदियाण य वाससहस्सा संखेज्जा' इति वचनात्, एवं त्रीन्द्रियचतुरिन्द्रियोरपि सूत्रे वक्तव्ये, तत्रापि जघन्यतोऽन्तर्मुहूर्त्तं उत्कर्षतः सङ्ख्येयकालमिति वक्तव्यमिति भावः, सङ्ख्येयश्च कालः सङ्ख्येयानि वर्षसहस्राणि प्रत्येतव्यानि । पञ्चेन्द्रियसूत्रे उत्कर्षतः सातिरेकं सागरोपमसहस्रं, तच्च नैरयिकतिर्यक्पञ्चेन्द्रियमनुष्य-देवभवभ्रमणेन द्रष्टव्यं, अधिकं तु न भवति, एतावत एव कालस्य केवलवेदसोपलब्धत्वात् । अनिन्द्रियो द्रव्यभावेन्द्रियविकलः स च सिद्ध एव सिद्धश्च साद्यपर्यवसितःतत उक्तं 'साइए अपज्जवसिए' इति ।

'सइंदियअपज्जत्तए णं' इत्यादि, इहापर्याप्ता लब्ध्यपेक्षया करणापेक्षया च द्रष्टव्याः, उभयथापि तत्पर्यायस्य जघन्त उत्कर्षतो वाऽनन्तर्मुहूर्त्तप्रमाणत्वात्, एवं तावद्वाच्यं यावत्पञ्चेन्द्रिया-

पर्याप्तकः--पञ्चेन्द्रियापर्याप्तकसूत्रं, तच्च सुगमत्वात्, स्वयं परिभावनीयं, अनिन्द्रियोऽत्र न वक्तव्यः, तस्य पर्याप्तापर्याप्तविशेषणरहितत्वात् । 'सइंदियपज्जत्तए णं भंते !' इत्यादि, इह पर्याप्तो लब्ध्यपेक्षया वेदितव्यः, सहि विग्रहगतावपि संभवति, करणैरपर्याप्तस्यापि, तत उत्कर्षतः सातिरेकं सागरोपमशतपृथक्त्वमिति यन्निर्वचनं तदुपपद्यते, अन्यथा करणपर्याप्तत्वस्योत्कर्षतोऽप्यन्तर्मुहूर्तोनत्रयस्त्रिंशत्सागरोपमप्रमाणतया लभ्यमानत्वात् यथोक्तं निर्वचनं नोपपद्यते, एवमुत्तरसूत्रेऽपि पर्याप्तत्वं लब्ध्यपेक्षया द्रष्टव्यं । एतेन्द्रियपर्याप्तसूत्रे सङ्ख्येयानि वर्षसहस्राणीति, एकेन्द्रियस्य हि पृथिवीकायस्योत्कर्षतो द्वाविंशतिर्वर्षसहस्राणि भवस्थितिः अप्कायस्य सप्त वर्षसहस्राणि वातकायस्य त्रीणि वर्षसहस्राणि वनस्पतिकायस्य दश वर्षसहस्राणि ततो निरन्तरकतिपयपर्याप्तभवसंकलनया सङ्ख्येयानि वर्षसहस्राणि घटन्ते इति ।

द्वीन्द्रियपर्याप्तसूत्रे सङ्ख्येयानि वर्षाणि, द्वीन्द्रियस्य हि उत्कर्षतो भवस्थितिपरिमाणं द्वादश संवत्सराणि, न च सर्वेष्वपि भवेषूत्कृष्टस्थितिसंभवः ततः कतिपयनिरन्तरपर्याप्तभवसंकलनयापि सङ्ख्येयानि वर्षाण्येव लभ्यन्ते न तु वर्षशतानि वर्षसहस्राणि वा ।

त्रीन्द्रियपर्याप्तसूत्रे सङ्ख्येयानि रात्रिन्दिवानि, तेषां च भवस्थितेतेरुत्कर्षतोऽप्येकोनपञ्चाशद्दिनमानतया कतिपयनिरन्तरपर्याप्तभवसंकलनायामपि सङ्ख्येयानां रात्रिन्दिवानामेव लभ्यमानत्वात् चतुरिन्द्रियपर्याप्तसूत्रे सङ्ख्येया मासाः, तेषां भवस्थितेरुत्कर्षतः षण्मासप्रमाणतया कतिपयनिरन्तरपर्याप्तभवकालसंकलनायामपि सङ्ख्येयानां मासानां प्राप्यमाणत्वात् । पञ्चेन्द्रियसूत्रं सुगमं । गतमिन्द्रियद्वारं, इदानीं कायद्वारमभिधित्सुराह–

–: पदं – १८, द्वारं – ४ :– "काय" :–

मू. ४७५ सकाइए णं भंते ! सकाइएत्ति कालतो केवचिरं होइ ?, गोयमा ! सकाइए दुविहे पन्नत्ते, तंजहा--अणाइए वा अपज्जवसिए अणाइए वा सपज्जवसिए जहन्नेणं अंतोमुहुत्तं उक्कोसेणं दो सागरोवमसहस्साइं संखेज्जवाससमब्भहियाइं, अकाइए णं भंते ! पुच्छा, गोयमा ! अकाइए सादिए अपज्जवसिए, सकाइयअपज्जत्तए णं पुच्छा, गोयमा ! जहन्नेणवि उक्कोसेणवि अंतोमुहुत्तं, एवं जाव तसकाइयअपज्जत्तए ।

सकाइयपज्जत्तए पुच्छा, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं सागरोवमसयपुहुत्तं सातिरेगं, पुढविकाइए णं पुच्छा, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं असंखेज्जं कालं असंखेज्जाओ उस्सप्पिणिओसप्पिणीओ कालतो खेत्ततो असंखेज्जा लोगा, एवं आउतेउवाउकाइयावि,

वणस्सइकाइया णं पुच्छा, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं अनंतं कालं अनंताओ उस्सप्पिणिअवसप्पिणिओ काल खेत्तओ अनंता लोगा असंखेज्जा पुग्गलपरियट्टा ते णं पुग्गलपरियट्टा आवलियाए असंखेज्जइभागो ।

पुढविकाइए पज्जत्तए पुच्छा, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं संखेज्जाइं वाससहस्साइं, एवं आउवि, तेउकाइए पज्जत्तए पुच्छा, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं संखेज्जाइं राइंदियाइं, वाउकाइयपज्जत्तए णं पुच्छा, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं संखेज्जाइं वाससहस्साइं,

वणस्सइकाइयपज्जत्तए पुच्छा, गोयमा ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं संखेज्जाइं वास-

सहस्साइं, तसकाइयपञ्जत्तए पुच्छा, गोयमा! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं सागरोवमसयपुहुत्तं सातिरेगं।

मू. सकाइए णं भंते!' इत्यादि, सह कायो यस्य येन वा स सकायः "सकाय एव सकायिकः आर्षत्वात् स्वार्थे इकप्रत्ययः, कायः–शरीरं, तच्चदारिकवैक्रियाहारकतैजसकार्मणभेदात् पञ्चधा, तत्रेह कार्मणं तैजसं वा द्रष्टव्यं, तस्यैवाऽऽसंसारभावात्, अन्यथा विग्रहगतौ वर्त्तमानस्य शरीरपर्याप्तया पर्याप्तस्य च शेषशरीरासंभवादकायिकत्वं स्यात्, तथा च सति निर्वचनसूत्रप्रतिपादितं द्वैविध्यं नोपपद्यते, अथ निर्वचनसूत्रमाह–

'काइए दुविहे पन्नत्ते' इत्यादि, तत्र यः संसारपारगामी न भविष्यति सोऽनाद्यपर्यवसितः कदाचिदपि तस्य कायस्य व्यवच्छेदासंभवात्, यस्तु मोक्षमदिगन्ता सोऽनादिसपर्यवसितः तस्य मुक्त्यवस्थासंभवे सर्वात्मना शरीरपरित्यागात्, पृथिव्यप्तेजोवायुवनस्पतिसूत्राणि सुगमानि, अन्यत्रापि तदर्थस्य प्रतीतत्वात्, तथा चोक्तं–

॥ १ ॥ "असंखोसप्पिणिओसप्पिणीओ एगिंदियाण उ चउण्हं।
ता चेव उ अणंता वणस्सइए उ बोद्धव्वा॥"

ननु यदि वनस्पतिकालप्रमाणं असङ्ख्येयाः पुद्गलपरावर्त्तास्ततो यद्गीयते सिद्धान्ते–मरुदेवाजीवो यावज्जीवभावं वनस्पतिरासीदिति, तत्कथं स्यात्?, कथं वा वनस्पतीनामनादित्वं, प्रतिनियतकालप्रमाणतया वनस्पतिभावस्यानादित्वविरोधात्, तथाहि–असङ्ख्येयाः पुद्गलपरावर्त्तास्तेषामवस्थानमानिं, तत एतावति कालेऽतिक्रान्ते नियमात् सर्वेऽपि कायपरावर्त्तं कुर्वते, यथा स्वस्थितिकालान्ते सुरादयः, उक्तं च–

॥ १ ॥ "जइ पुग्गलपरियट्टा संखाईया वणस्सईकालो।
तो अच्छंतवणस्सईणमणाइयत्तमहेतुओ॥
॥ २ ॥ न य मरुदेवाजीवो जावज्जीवं वणस्सई आसी।
जमसंखेज्जा पुग्गलपरियट्टा तत्थऽवत्थाणं॥
॥ ३ ॥ कालेणेवइएणं जम्हा कुव्वंति कायपरियट्टं।
सव्वेवि वणस्सइणो ठिइकालंते जह सुराई॥"

किं च–एवं यद्वनस्पतीनां निर्लेपनमागमे प्रतिषिद्धं तदपीदानीं प्रसक्तं, कथमिति चेद्?, उच्यते, इह प्रतिसमयमसङ्ख्येया वनस्पतिभ्योजीवा उद्वर्त्तन्ते, वनस्पतीनां च कायस्थितिपरिमाणमसङ्ख्येयाः पुद्गलपरावर्त्तास्ततो यावन्तोऽसङ्ख्येयेषु पुद्गलपरावर्ततेषु समयास्तैरभ्यस्ता एकसमयोद्वृत्ता जीवा यावन्तो भवन्ति तावत्परिमाणमागतं वनस्पतीनां, ततः प्रतिनियतपरिमाणतया सिद्धं निर्लेपनं, प्रतिनियतपरिमाणत्वादेव च गच्छता कालेन सिद्धिरपि सर्वेषां भव्यानां प्रसक्ता, तत्प्रसक्तौ च मोक्षपथव्यवच्छेदोऽपि प्रसक्तः, सर्वभव्यसिद्धिगमनानन्तरमन्यस्य सिद्धिगमनायोगात्, आह च–

॥ १ ॥ "कायट्ठिइयकालेणं तेसिमसंखज्जयावहारेणं।
निल्लेवणमावन्नं सिद्धीवि य सव्वभव्वाणं॥
॥ २ ॥ पइसमयसंखेज्जा जेणुव्वट्टंति तो तदब्भत्था।
कायट्ठिइए समया वणस्सईणं च परिमाणं॥"

न चैतदस्ति, वनस्पतीनामनादित्वस्य निर्लेपनप्रतिषेधस्य सर्वभव्यानिर्लेपनमोक्षपर्यवसानस्य च तत्र तत्र प्रदेशे सिद्धान्तेऽभिधानात्, उच्यते, इह द्विविधा जीवाः–

सांव्यवहारिका असांव्यवहारिकाश्चेति, तत्र ये निगोदावस्थात् उद्वृत्त्य पृथिवीकायिकादिभेदेषु वर्त्तन्ते ते लोकेषु दृष्टिपथमागताः सन्तःपृथिवीकायिकादिव्यवहारमनुपतन्तीति व्यवहारिका उच्यन्ते, ते च यद्यपि भूयोऽपि निगोदावस्थामुपयान्ति तथापि ते सांव्यवहारिका एव, संव्यहारे पतितत्वात्, ये पुनरनादिकालादारभ्य निगोदावस्थामुपगता एवावतिष्ठन्ते ते व्यवहारपथातीतत्वादसांव्यवहारिकाः, कथमेतदवसीयते ? द्विविधाः जीवाः सांव्यवहारिकाः असांव्यवहारिकाश्चेति, उच्यते, युक्तिवशात्, इह प्रत्युत्पन्नवनस्पतीनामपि निर्लेपनमागमे प्रतिषिद्धं, किं पुनः सकलवनस्पतीनां, तथा भव्यानामपि, य(त)च्च यद्यसांव्यवहारिकराशिनिपतिता अत्यन्तवनस्पतयो न स्युः ततः कथमुपपद्येत ?, तस्मादवसीयते अस्त्यसांव्यवहारिकराशिरपि यद्गतानां वनस्पतीनामनादिता, किं चेयमपि गाथा गुरूपदेशादागता समये प्रसिद्धा–

॥ १ ॥ "अत्थि अनंता जीवा जेहिं न पत्तो तसाइपरिणामो ।
तेवि अनंतानंता निगोयवासं अनुवसंति ॥"

–तत इतोऽप्यसांव्यवहारिकराशिः सिद्धः, उक्तं च-

॥ १ ॥ "पडुप्पन्नवणस्सईण निल्लेवणं न भव्वाणं ।
जुत्तं होइ न तं जइ अच्चंतवणस्सई नत्थि ॥
॥ २ ॥ एवमणादिवणस्सईणमत्थित्तमत्थओ सिद्धं ।

भन्नइ य इमावि गाहा गुरूवएसागया समये ॥ अत्थि अनंता जीवा०" इत्यादि,

तत्रेदं सूत्रं सांव्यवहारिकानधिकृत्यावसेयं, न चासांव्यवहारिकान्, अविषयत्वात् सूत्रस्य, न चैतत् स्वमनीषिकाविजृम्भितं, यत आहुः जिनभद्रगणिक्षमाश्रमणपूज्यापादाः–

॥ १ ॥ "तह कायट्ठिइकालादओ विसेसे पडुच्च किर जीवे ।
नाणाइवणस्सइणो ज संववहारबाहिरया ॥"

अत्रादिशब्दात् सर्वैरपि जीवैः श्रुतमनन्तशः स्पृष्टमित्यादि यदस्यामेव प्रज्ञापनायां वक्ष्यति प्रागुक्तं च तत्परिग्रहः, ततो न कश्चिद्दोषः । त्रसकायसूत्रं सुप्रतीतं ॥

एतानेव त्रसकायिकादीन् पर्याप्तापर्याप्तविशेषणविशिष्टान् चिन्तयन्नाह–'सकाइयअपज्जत्तए णं भंते !' इत्यादि, सुगमं, नवरं तेजःकायसूत्रे उत्कर्षतः सङ्ख्येयानि रात्रिन्दिवानीति, तेजःकायस्य हि भवस्थितिरुत्कर्षतोऽपि त्रीणि रात्रिन्दिवानि, ततो निरन्तरकतिपयपर्याप्तभवकालसंकलनायामपि सङ्ख्येयनानि रात्रिन्दिवान्येव लभ्यनते, न तु वर्षाणि वर्षसहस्राणि वा ।

सम्प्रति कायद्वारान्तःप्रवेशसंभवात् सूक्ष्मकायिकादीन्निरूपयितुकाम आह०–

मू. (४७६) सुहुमे णं भंते ! सुहुमेत्ति कालतो केवचिरं होति ?, गो० ! जह० अंतो० उ० असंखेज्जं कालं असंखेज्जाओ उस्सप्पिणिओसप्पिणीतो कालतो खेत्ततो असंखेज्जा लोगा, सुहुमपुढविकाइते सुहुमआउका० सुहुमतेउका० सुहुमवाउका० सुहुमवणप्फकाइते० सुहुमनिगोदेवि ज० अंतोमुहुत्तं उक्को० असंखेज्जं कालं असंखिज्जाओ उस्सप्पिणिओसप्पिणीतो कालतो खेत्ततो असंखेज्जा लोगा, सुहुमे णं भंते ! अपज्जत्तएत्ति पुच्छा, गो० ! ज० उ० अंतोमुहुत्तं,

पुढविकाइयआउकयतेउकाय- वाउकायवणप्फइकाइयाण य एवं चेव, पज्जत्तियाणवि एवं चेव जहा ओहियाणं।

बादरे णं भंते! बादरेत्ति कालतो केवचिरं होति?, गो० ! जह० अंतो० उक्को० असंखेज्जं कालं असंखेज्जाओ उस्सप्पिणिओसप्पिणीतो कालओ खेत्तओ अंगुलस्स असंखेज्जतिभागं, बादरपुढविकाइए णं भंते! पुच्छा, गो० ! जह० अंतो० उक्को० सत्तरि सागरोवमकोडाकोडीतो, एवं बादरआउक्काइएवि जाव बादरतेउकाइएवि बादरवाउक्काइएवि, बादरवणप्फइकाइते बादर० पुच्छा, गो० ! ज० अंतो० उक्को० असंखेज्जं कालं जाव खेत्तओ अंगुलस्स असंखेज्जतिभागं, पत्तेयसरीरबादरवणप्फइकाइए णं भंते! पुच्छा, गो० ! जह० अंतो० उक्को० सत्तरि सागरोवमकोडाकोडीतो।

निगोदे णं भंते! निगोएत्ति केवच्चिरं होति?, गो० ! जह० अंतो० उक्कोसेणं० असंखेज्जाओ उस्सप्पिणिओसप्पिणीओ कालतो खेत्ततो अड्ढाइज्जा पोग्गलपरियट्टा, बादरनिगोदे णं भंते! बादर० पुच्छा, गो० ! जह० अंतो० उक्सो० सत्तरि सागरोवमकोडाकोडीतो।

बादरतसकाइया णं भंते! बादरतसकाइयत्ति काल० केवचिरं होइ?, गो० ! जह० अंतो० उक्को० दो सागरोवमसहस्साइं संखेज्जवासमब्भहियाइं, एतेसिं चेव अपज्जत्तगा सव्वेवि जह० उक्को० अंतो०, बादरपज्जत्ते णं भंते! बादरपज्जत्त० पुच्छा, गो० ! जह० अंतो० उक्को० सागरोवमसतपुहुत्तं सातिरेगं, बादरपुढविकाइयपज्जत्तए णं भंते! बादर० पुच्छा, गो० ! जह० अंतो० उक्को० संखिज्जाइं वाससहस्साइं, एवं आउकाइएवि,

तेउकाइयपज्जत्तए णं भंते! तेउकाइयपज्ज० पुच्छा, गो० ! ज० अंतो० उक्को० संखिज्जाइं राइंदियाइं, वाउकाइयवणस्सइकाइयपत्तेयसरीरबादरवणप्फइकाइते पुच्छा, गो० ! ज० अंदो० उ० संखेज्जाइं वाससहस्सआइं, निगोयपज्जत्तते बादरनिगोदपज्जत्तए पुच्छा, गो० ! दोण्हवि ज० अन्तो० उक्को० अंतो०। बादरतसकाइयपज्जत्ताए णं भंते! बादरतसकाइयपज्जत्तएत्ति कालतो केवचिरंहोति?, गो० ज० अंतो० उ० सागरोवमसतपुहुत्तं सातिरेगं।

वृ. 'सुहुमेणं भंते!' इत्यादि 'सूक्ष्मः' सूक्ष्मकायिको भदन्त! सूक्ष्म इति सूक्ष्मत्वपर्यायविशिष्टः सन्नव्यवच्छेदेन कालतः कियच्चिरं भवति, भगवानाह-गौतम! 'जहन्नेण'मित्यादि, एतदपि सूत्रं सांव्यवहारिकजीवविषयमवसातव्यं, अन्यथा उत्कर्षतोऽसङ्ख्येयकालमिति यन्निर्वचनमुक्तं तन्नोपपद्यते, सूक्ष्मनिगोदजीवानामसांव्यवहारिकाराशिनिपतितकतानामनादितायाः प्रागुपपादितत्वात्, 'खेत्ततो असंखेज्जा लोगा' इति, असङ्ख्येयेषु लोकाकाशेषु प्रतिसमयमेकैकप्रदेशापहारे यावत्य उत्सर्पिण्यवसर्पिण्यो भवन्ति तावत्प्रमाणा असङ्ख्येया उत्सर्पिण्यवसर्पिण्य इत्यर्थः।

सूक्ष्मवनस्पतिकायसूत्रमपि प्रागुक्तयुक्तिवशात् सांव्यवहारिकजीवविषयं व्याख्येयं।

तथा सूक्ष्माः सामान्यतः पृथिवीकायिकादिविशेषणविशिष्टश्च पर्याप्ता अपर्याप्ताश्च निरन्तरं भवन्तो जघन्यतः उत्कर्षतो वाऽन्तर्मुहूर्तं कालं यावत् न परमपि, ततस्तद्विषयसूत्रकदम्बके सर्वत्रापि जघन्यतः उत्कर्षतो वाऽन्तर्मुहूर्तमुक्तं, बादरसामान्यसूत्रे यदुक्तम् 'असंखेज्जकालं' तस्य विशेषनिरूपणार्थमाह-असंङ्ख्येया उत्सर्पिण्यवसर्पिण्यः, इदं कालतः परिमाणमुक्तं, क्षेत्रत आह-

'अंगुलस्स असंखेज्जइभागो' इति, अङ्गुलस्यासङ्ख्येयभागः, किमुक्तं भवति?-अङ्गुल-

स्यासङ्ख्येयान्ते भागे यावन्त आकाशप्रदेशास्तेषां प्रतिसमयं एकैकप्रदेशापहारे यावन्त्योऽसङ्ख्येया उत्सर्पिण्यवसर्पिण्यो भवन्ति तावत्य इति, अथ कथं अङ्गुलासङ्ख्येयभागमात्रस्यापि प्रतिसमयमेकैकप्रदेशापहारे असङ्ख्येया उत्सर्पिण्यवसर्पिण्यो लगन्ति ?, उच्यते, क्षेत्रस्य सूक्ष्मत्वात्, उक्तं च–

"सुहुमो य होइ कालो तत्तो सुहुमयरयं हवइ खित्त" मित्यादि, एतच्च बादरवनस्पतिकायापेक्षयाऽवसातव्यं, अन्यस्य बादरस्यैतावत्का यस्थितेरसम्भवात्, शेषसूत्राणि द्वारसमाप्तिं यावत् सुगमानि । गतं कायद्वारम्, इदानीं योगद्वारमभिधित्सुराह–

–: पदं – १८, द्वारं – ५ "योगः" :–

मू. *(४७७) सजोगी णं भंते! सजोगित्ति काल० ?, गो० ! सजोगी दुविहे पं०, तं०–अणादीए वा अपज्जवसिते अणादीए वा सपज्जवसिते, मनजोगी णं भंते ! मनजोगीत्ति कालतो० ? गो० ! ज० एक्कं समयं उक्को० अंतो०, एवं वइजोगीवि, कायजोगी णं भंते ! काल० ?, गो० ! जहन्नेणं अंतो० उक्को० वणप्फइकालो, अजोगी णं भंते ! अजोगित्ति काल केवचिरं होति ?, गो० ! सादीए अपज्जवसिते ।*

वृ. 'सजोगी णं भंते !' इत्यादि, योगाः–मनोवाक्कायव्यापाराः, योगा एषां सन्तीति योगिनः मनोवाक्कायाः सहयोगिनो यस्य येन वा स सयोगी, अत्र निर्वचनं 'सजोगी दुविहे पं०' इत्यादि, अनाद्यपर्यवसितो यो न जातुचिदपि मोक्षं गन्ता स हि सर्वकालमवश्यमन्यतमेन योगेन सयोगी ततोऽनाद्यपर्यवसितो, यस्तु यास्यति मोक्षं सोऽनादिसपर्यवसितः, मुक्तिपर्यायप्रादुर्भावे योगस्य सर्वथापगमात्,

मनोयोगिसूत्रे जघन्यतः एकं समयमिति–यदा कश्चिदौदारिककाययोगेन प्रथमसमयेन मनोयेग्यान् पुद्गलानादाय द्वितीयसमये मनस्त्वेन परिणमय्य मुञ्चति तृतीयसमये चोपरमते म्रियते वा तदा एकं समयं मनोयोगी लभ्यते, उत्कर्षतोऽन्तर्मुहूर्तं, निरन्तरं मनोयोग्यपुद्गलानां ग्रहणनिसर्गौ कुर्वन् तत ऊर्द्धं सोऽवश्यं जीवस्वाभाव्यादुपरमते, उपरम्य च भूयोऽपि ग्रहणनिसर्गौ करोति, परं कालसौक्ष्म्यात् कदाचिन्न स्वसंवेदनपथमायाति, तत उत्कर्षतोऽपि मनोयोगोऽन्तर्मुहूर्तमेव, एवं 'वयजोगीवि' इति, एवं मनोयगीव वाग्योग्यपि वक्तव्यः, तद्यथा–'वइजोगी णं भंते ! वइजोगीति कालओ केवचिरं होति ?, गो० ! जह० एक्कं समयं उक्को० अंतोमुहुत्त'मिति तत्र यः प्रथमसमये काययोगेन भाषायोग्यानि द्रव्याणि गृह्णाति द्वितीयसमये तानि भाषात्वेन परिणमय्य मुञ्चति तृतीयसमये चोपरमते म्रियते वा स एकं समयं वाग्योगी लभ्यते, आह च मूलटीकाकारः–

'पढमसमये कायजोगेण गहियाणं भासादव्वाणं बिइयसमये वइजोगेण निसग्गं काऊण उवरमंतस्स मरंतस्स वा एगसमओ लब्भइ' इति, अन्तर्मुहूर्तं निरन्तरं ग्रहणनिसर्गौ कुर्वन् तदनन्तरं चोपरमते, तथाजीवस्वाभाव्यात्, काययोगी जघन्यतोऽन्तर्मुहूर्तमिति, इह द्वीन्द्रियादीनां वाग्योगोऽपि लभ्यते, संज्ञिपञ्चेन्द्रियाणां मनोयोगोऽपि ततो यदा वाग्योगो भवति मनोयोगो वा तदा न काययोगप्राधान्यमिति सादिसपर्यवसितत्वभावात् जघन्यतोऽन्तर्मुहूर्तं काययोगी लभ्यते,

उत्कर्षतो वनस्पतिकालः, स च प्रागेवोक्तः, वनस्पतिकायिकेषु हि काययोग एव केवलो

न वाग्योगो मनोयोगो वा, ततः शेषयोगासम्भवात्तेष्वाकायस्थितेः सतंत काययोग इति मतं, अयोगी च सिद्धः, स च साद्यपर्यवसित इत्ययोगी साद्यपर्यवसित उक्तः ।

गतं योगद्वारमिदानीं वेदद्वारं प्रतिपिपादयिषुराह–

–: पदं – १८, द्वारं – ६ "वेद" :–

मू. (४७८) *सवेदए णं भंते! सवेदएत्ति० ?, गो० ! सवेदए तिविधे पं०, तं०–अणादीए वा अपज्जवसिते अणादीए वा सपज्जवसिए सादीए वा सपज्जवसिए, तत्थ णं जे से सादीए सपज्जवसिए से जह० भंतो० उक्को० अणंतं कालं अणंताओ उस्सप्पिणिओसप्पिणीतो कालतो खेत्ततो अवड्ढं पोग्गलसपरियट्टं देसूणं,*

इत्थिवेदे णं भंते! इत्थिवेदेत्ति काल० ?, गो० ! एगेणं आदेसेणं जह० एक्कं समयं उक्को० दसुत्तरं पलिओवमसतं पुव्वकोडिपुहुत्तमब्भहियं १, एगेणं आदेसेणं जह० एगं समयं उक्को० अट्ठारसपलितोवमाइं पुव्वकोडिपुहुत्तमब्भहियाइं २, एगेणं आदेसेणं ज० एगं समयं उक्को० चउद्दस पलिओवमाइं पुव्वकोडिपुहुत्तमब्भहियाइं ३, एगेणं आदेसेणं ज० एगं समयं उक्को० पलिओवमसतं पुव्वकोडिपुहुत्तमब्भहियं ४, एगेणं आदेसेणं जह० एगं समयं उक्को० पलितोवमपुहुत्तं पुव्वकोडिपुहुत्तमब्भहियं ५,

पुरिसवेदे णं भंते ! २ ?, गो० ! जह० अंतो० उक्को० सागरोवमसतपुहुत्तं सातिरेगं,

नपुंसगवेए णं भंते ! नपुंसगवेदेत्ति, पुच्छा, गो० ! ज० एवं समयं उक्को० वणस्सइकालो,

अवेदए णं भंते ! अवेदएत्ति पुच्छा, गो० ! अवेदे दुविधे पं०, तं०–सादीए वा अपज्जवसिए साइए वा सपज्जवसिते, तत्थ णं जे से साइए सपज्जवसिते से जहन्नेणं एगं समयं उक्को० अंतो०

वृ. 'सवेदए णं भंते' इत्यादि, सह वेदो यस्य येन वा स सवेदकः, 'शेषाद्वे'ति कप्रत्ययः स च त्रिविधः, तद्यथा अनाद्यपर्यवसितोऽनादिसपर्यवसितः सादिसपर्यवसितश्च, तत्र यः उपशमश्रेणिं क्षपकश्रेणिं वा जातु–कदाचिदपि न प्राप्स्यति सोऽनाद्यपर्यवसितः, कदाचिदपि तस्य वेदोदयव्यवच्छेदासम्भवात्, यस्तु प्राप्स्यति उपशमश्रेणिं क्षपकश्रेणिं वा सोऽनादिसपर्यवसितः, उपशमश्रेणितप्रतिपत्तौ क्षपकश्रेणिप्रतिपत्तौ वा वेदोदव्यवच्छेदस्य भावित्वात्, यस्तूपशमश्रेणिं प्रतिपद्यते तत्र चावेदको भूत्वा भूय उपशमश्रेणीतःप्रतिपतन् सवेदको भवति स सादिसपर्यवसितः,

स च जघन्यतोऽन्तर्मुहूर्त्तं, कथमिति चेत् ?, उच्यते, इह यदा कोऽपि उपशमश्रेणिं उपपद्य त्रिविधमपि वेदमुपशमय्यावेदको भूत्वा पुनरपि श्रेणीतःप्रतिपतन् सवेदकत्वं प्राप्य झटित्युपशमश्रेणिं कार्मग्रन्थिकाभिप्रायेण क्षपकश्रेणिं वा प्रतिपद्यते प्रतिपद्य च वेदत्रयमुपशमयति क्षपयति वा अन्तर्मुहूर्त्तेन तदा जघन्येनान्तर्मुहूर्त्तं सवेदकः उत्कर्षतोऽपार्द्धपुद्गलपरावर्त्तं देशोनं, अपगतमर्द्धं यस्य सोऽपार्द्धः देशोनः–किञ्चिदूनः, उपशमश्रेणितो हि प्रतिपतित एतावन्तं कालं संसारे पर्यटति, ततो यथोक्तमुत्कर्षशतःसादिसपर्यवसितस्य सवेदकस्य कालमानमुपपद्यते ।

स्त्रीवेदविषये च पञ्चादेशास्तान् क्रमेण निरूपयति–'एगेणं आदेसेण'मित्यादि, तत्र सर्वत्रापि जघन्यतःसमयमात्रभावनेयं–काचित् युवतिरुपशमश्रण्यां वेदत्रयोपशमेनावेदकत्वमनुभूय ततः श्रेणेः प्रतिपतन्ती स्त्रीवेदोदयमेकसमयमनुभूय द्वितीयसमये कालं कृत्वा देवेषूत्पद्यते, तत्र च

तस्याः पुंस्त्वमेव न स्त्रीत्वं तत एवं जघन्यतः समयमात्र स्त्रीवेदः, उत्कर्षचिन्तायामेव प्रथमादेशभावना -कश्चिज्जन्तुर्नारीषु तिरश्चीषु वा पूर्वकोट्यायुष्कासु मध्ये पञ्चान् भवान् अनुभूय ईशाने कल्पे पञ्चपञ्चाशत्प्रमाणपल्योपमोत्कृष्टस्थितिष्वपरिगृहीतासु देवीषु मध्ये देवीत्वेनोत्पन्नस्ततः स्वायुः--क्षये च्युत्वा भूयोऽपि नारीषु तिरश्चीषु वा पूर्वकोट्यायुष्कासु मध्ये स्त्रीत्वेनोत्पन्नस्ततो भूयोऽपि द्वितीयं वारं ईशाने देवलोके पञ्चपञ्चाशत्पल्योपमप्रमाणोत्कृष्टायुष्कास्वपरिगृहीतदेवीषु मध्ये देवीत्वेनोत्पन्नस्ततः परमवश्यं वेदनान्तरमेव गच्छति, एवं दशोत्तरं पल्योपमशतं पूर्वकोटिपृथक्त्वाभ्यधिकं प्राप्यते, अत्र पर आह-

ननु यदि देवकुरूत्तरकुर्वादिषु पल्योपमत्रयस्थितिकासु स्त्रीषु मध्ये समुपपद्यते ततोऽधिकाऽपि स्त्रीवेदस्य स्थितिरवाप्यते, ततः किमित्येतावत्येवोपदिष्टा ?, तदयुक्तमभिप्रायापरिज्ञानात्, तथाहि- इह तावद्देवीभ्यश्च्युत्वा असङ्ख्येयवर्षायुष्कासु स्त्रीषु मध्ये नोत्पद्यते, देवयोनेश्च्युतानां असङ्ख्येयवर्षायुष्केषु मध्ये उत्पादप्रतिषेधात्, नाप्यसङ्ख्येयवर्षायुष्का सती योषित् उत्कृष्टासु देवीषु जायते, यत उक्तं मूलटीकाकृता-"जत्तो असंखेज्जवासाउया उक्कोसट्ठिई न पावेइ" इति, ततो यथोक्तप्रमाणैवोत्कृष्टा स्थितिः स्त्रीवेदस्यावाप्यते, द्वीतायदेशवादिनः पुनरेवमाहुः-

नारीषु तिरश्चीषु वा पूर्वकोट्यायुष्कासु मध्ये पञ्चान् भवान् अनुभूय पूर्वप्रकारेणेशानदेवलोकेषु वारद्वयमुत्कृष्टस्थितिकासु देवीषु मध्ये उत्पद्यमाना नियमतः परिगृहीतास्वेवोत्पद्यते नापरिगृहीतासु ततस्तन्मतेनोत्कृष्टमवस्थानं स्त्रीवेदस्याष्टादश पल्योपमानि पूर्वकोटिपृथक्त्वं च, तृतीयादेशवादिनां तु सौधर्मदेवलोके परिगृहीतासु सप्तपल्योपमप्रमाणोत्कृष्टायुष्कासु वारद्वयं समुत्पद्यते, ततस्तन्मतेन चतुर्दश पल्योपमानि पूर्वकोटिपृथक्त्वाभ्यधिकानि स्त्रीवेदस्य स्थितिः, चतुर्थादिशवादिनां तु मतेन सौधर्मदेवलोके पञ्चाशत्पल्योपमप्रमाणोत्कृष्टास्वपरिगृहीतदेवीष्वपि पूर्वप्रकारेण वारद्वयं देवीत्वेनोत्पद्यते, ततस्तन्मतेन पल्योपमशतं पूर्वकोटिपृथक्त्वाभ्यधिकमवाप्यते, पञ्चमादेशवादिनः पुनरिदमाहुः-

नानाभवभ्रमणद्वारेण यदि स्त्रीवेदस्योत्कृष्टमवस्थानं चिन्त्यते तर्हि पल्योपमपृथक्त्वमेव पूर्वकोटीपृथक्त्वाभ्यधकं प्राप्यते न ततोऽधिकं, कथमेतदिति चेत् ?, उच्यते, नारीषु तिरश्चीषु वा पूर्वकोट्यायुष्कासु मध्ये सप्त भवाननुभूयाष्टमभवे देवकुर्वादिषु त्रिपल्योपमस्थितिषु स्त्रीमध्ये स्त्रीत्वेन समुत्पद्यते, ततो मृत्वा सौधर्मे देवलोके जघन्यस्थितिकासु देवीषु मध्ये देवीत्वेनोपजायते, तदनन्तरं चावश्यं वेदान्तरमभिगच्छति इति, अमीषां पञ्चानामादेशानामन्यतमादेशसमीचीनतानिर्णयोऽतिशयज्ञानिभिः सर्वोत्कृष्टश्रुतलब्धिसम्पन्नैर्वा कर्तुं शक्यते, तेच भगवदार्यश्यामप्रतिपत्तौ नासीरन्, केवलं तत्कालापेक्षया ये पूर्वतमाः सूरयस्तत्कालभाविग्रन्थपौर्वापर्यपर्यालोचनया यथास्वमति स्त्रीवेदस्य स्थितिं प्ररूपितवन्तस्तेषां सर्वेषामपि प्रावचनिकसूरीणां मतानि भगवानार्यश्याम उपदिष्टवान्, तेऽपि च प्रावचनिकसूरयःस्वमतेन सूत्रं पठन्तो गौतमप्रश्नभगवन्निर्वचनरूपतया पठन्ति, ततस्तदवस्थान्येव सूत्राणि लिखता गोतमा ! इत्युक्तं, अन्यथा भगवति गौतमाय निर्देष्टरि न संशयकथनमुपपद्यते, भगवतःसकलसंशयातीतत्वात्,

पुरुषवेदसूत्रे जघन्यतोऽन्तर्मुहूर्त्तमिति, यदा कश्चिदन्यवेदेभ्यो जीवेभ्य उद्धृत्य पुरुषवेदेषूत्पद्य तत्र चान्तर्मुहूर्तं सर्वायुर्जीवित्वा गत्यन्तरे अन्यवेदेषु मध्ये समुत्पद्यते तदा पुरुषवेदस्य

जघन्यतोऽन्तर्मुहूर्त्तमवस्थानं लभ्यते, उत्कृष्टमानं कण्ठ्यं

नपुंसकवेदसूत्रे जघन्यतः एकः समयः स्त्रीवेदस्येव भावनीयः, उत्कर्षतो वनस्पतिकालः, स च प्रागेवोक्तः, एतच्च सांव्यवहारिकजीवानधिकृत्य यदा चिन्ता क्रियते यदा त्वसांव्यवहारिकजीवानधिकृत्य चिन्ता क्रियते तदा द्विविधा नपुंसकवेदाद्धा, कांश्चिदधिकृत्यानाद्यपर्यवसाना, ये न जातुचिदपि सांव्यवहारिकराशौ निपतिष्यन्ति, कांश्चिदधिकृत्य पुनरनादिसपर्यवसाना, ये असांव्यवहारिकराशेरुद्वृत्य सांव्यवहारिकराशावागमिष्यन्ति,

अथ किमसांव्यवहारिकराशेरपि विनिर्गत्य सांव्यवहारिकराशावागच्छन्ति येनैवं प्ररूपणा क्रियते ?, उच्यते, आगच्छन्ति, कथमेतदवसेयमिति चेत् ?, उच्यते, पूर्वाचार्योपदेशात्, तथा चाह दुष्षमान्धकारनिमग्नजिनप्रवचनप्रदीपो भगवान् जिनभद्रगणिक्षमाश्रमणः–

॥ १ ॥ "सिज्झंति जत्तिया किर इह संववहारजीवरासीओ।
एंति अणाइवणस्सइरासीओ तत्तिया तंमि ॥"

अवेदको द्विधा–साद्यपर्यवसितः सादिसपर्यवसितश्च, तत्र यः क्षपकश्रेणिं प्रतिपद्यावेदको भवति स साद्यपर्यवसितः, क्षपकश्रेणेः प्रतिपातासम्भवात्, यस्तूपशमश्रेणिं प्रतिपद्यावेदको जायते स सादिसपर्यवसितः, स च जघन्येनैकं समयं, कथमेकं समयमिति चेत् ?, उच्यते, यदा एकसमयमवेदको भूत्वा द्वितीयसमये पञ्चत्वमुपागच्छति तदा तस्मिन्नेव पञ्चत्वसमये देवेषूत्पन्नः पुरुषवेदोदयेन सवेदको भवति, तत एवं जघन्यत एवं समयमवेदकः, उत्कर्षतोऽन्तर्मुहूर्त्तं, परतोऽवश्यं श्रेणीतःप्रतिपाते वेदोदयसद्भावात् इति।

गतं वेदद्वारमिदानीं कषायद्वारं, तत्रेदमादिसूत्रम्–

–: पदं – १८ – द्वारं – ७ :– "कषाय" :–

मू. (४७९) सकसाई णं भंते ! सकसादित्ति काल० ?, गो० ! सकसाती तिविधे पं०, तं०–अणादीए वा अपज्जवसिते अणादीए वा सपज्जवसिते सादीए वा सपज्जवसिते जाव अवड्ढं पोग्गलपरियट्टं देसूणं,

कोहकसाई णं भंते ! पुच्छा, गो० ! जह० उक्को० अंतोमुहुत्तं, एवं जाव मानमायकसाती, लोभकसाई णं भंते ! लोभ० पुच्छा, गो० ! जह० एक्कं समयं उक्को० अंतोमु०,

अकसाई णं भंते ! अकसादित्ति काल० ?, गो० ! अकसादी दुविहे पं०, तं०–सादीए वा अपज्जवसिते सादीए वा सपज्जवसिते, तत्थ णं जे से सादीए सपज्जवसिते से जह० एगं समयं उक्को० अंतो०।

वृ. 'सकसाई णं भंते!' इत्यादि, सह कषायो येषां यैर्वाते सकषाया--जीवपरिणामविशेषास्ते विद्यन्ते यस्य स सकषायी, इदं सकलमपि सूत्रं सवेदसूत्रवदविशेषेण भावनीयं, समानभावेनोक्तत्वात्, 'कोहकसाई णं भंते !' इत्यादि, जघन्यतोऽप्यन्तर्मुहूर्त्तं इति उत्कर्षतोऽप्यन्तर्मुहूर्त्तमिति– क्रोधकषायोपयोगस्य जघन्यत उत्कर्षतो वाऽन्तर्मुहूर्त्तप्रमाणत्वात्, तथाजीवस्वाभाव्यात्, इदं च सूत्रचतुष्टयमपि विशिष्टोपयोगापेक्षमिति, लोभकषायी जघन्येनैकं समयमिति,

यदा कश्चिदुपशमक उपशमश्रेणिपर्यवसाने उपशान्तवीतरागो भूत्वा श्रेणीतः प्रतिपतन् लोभाणुप्रथमसमयसंवेदनकाल एव कालं कृत्वा देवलोकेषूत्पद्यते, तत्र चोत्पन्नः सन् क्रोधकषायी मानकषायी मायाकषायी वा भवति तदा एकं समयं लोभकषायी लभ्यते, अथैवं क्रोधादिष्वप्येकसमयता कस्मान्न लभ्यते ?, उच्यते, तथास्वाभाव्यात्, तथाहि-

श्रेणीतः प्रतिपतन् मायाणुवेदनप्रथमसमये मानाणुवेदनप्रथमसमये क्रोधाणुवेदनप्रथमसमये वा यदि कालं करोति कालं च कृत्वा देवलोकेषूत्पद्यते तथापि तथास्वाभाव्यात् येन कषायोदयेन कालं कृतवान् तमेव कषायोदयं तत्रापि गतः सन्नन्तर्मुहूर्त्तमनुवर्त्तयति, एतद्भावसीयते अधिकृतसूत्रप्रामाण्यात्, ततोऽनेकसमयता क्रोधादिष्विति। अकषायसूत्रं वेदसूत्रमिव भावनीयं।

गतं कषायद्वारमधुना लेश्याद्वारं, तत्रेदमादिसूत्रम्-

-: पदं - १८, द्वारं - ८ "लेश्या" :-

मू. *(४८०) सलेसे णं भंते ! सलेसेत्ति पुच्छा, गो० ! सलेसे दुविधे पं०, तं०- अणादीए वा अपज्जवसिते अणादीए वा सपज्जवसिते, कण्हलेसे णं भंते ! कण्हलेसेत्ति कालतो केवचिरं होइ ?, गो० ! जह० अंतो० उक्को० तेत्तीसं सागरोवमाइं अंतोमुहुत्तमब्भहियाइं,*

नीललेसे णं भंते ! नीललेसेत्ति पुच्छा, गो० ! जह० अंतो० उक्को० दस सागरोवमाइं पलितोवमासंखिज्जइभागमब्भहियाइं, काउलेसे णं पुच्छा, गो० ! जह- अंतो० उक्को० तिन्नि सागरोवमाइं पलितोवमासंखिज्जतिभागमब्भहियाइं,

तेउलेसे णं पुच्छा, गो० ! जह० अंतोमुहुत्तं उक्को० दो सागरोवमाइं पलितोवमासंखिज्जतिभागमब्भहियाइं, पम्हलेसे णं पुच्छा, गो० ! जह० अंतो० उक्को० दस सागरोवमाइं अंतोमुहुत्तमब्भहियाइं, सुक्कलेसे णं पुच्छा०, गो० ! जह० अंतो० उक्को० तेत्तीसं सागरोवमाइं अंतोमुहुत्तमब्भहियाइं, अलेसे णं पुच्छा, गो० ! सादीए अपज्जवसिते।

वृ. 'सलेसे णं भंते' इत्यादि, सह लेश्या यस्य येन वा स सलेश्यः, स द्विविधः प्रज्ञप्तः, तद्यथा--अनादिरपर्यवसितो यो न जातुचिदपि संसारव्यवच्छेदं कर्त्ता अनादिसपर्यवसितो यः संसारपारगामी,

'कण्हलेसे णं भंते !' इत्यादि, इह तिरश्चां मनुष्याणां च लेश्याद्रव्याण्यन्तर्मुहूर्त्तिकानि, ततः परमवश्यं लेश्यान्तरपरिणामं भजन्ते, देवनैरयिकाणां तु पूर्वभवचरमान्तर्मुहूर्त्तादारभ्य परभावाद्यमन्तर्मुहूर्त्तं यावत् अवस्थितानि ततःसर्वत्र जघन्यमन्तर्मुहूर्त्तं तिर्यग्मनुष्यापेक्षया द्रष्टव्यमुत्कृष्टं देवनैरयिकापेक्षया, तच्च विचित्रमिति भाव्यते, तत्र यदुक्तं-त्रयस्त्रिंशत्सागरोपमाणि अन्तर्मुहूर्त्ताभ्यधिकानीति तत्सप्तमनरकपृथिव्यपेक्षया द्रष्टव्यं, तत्रत्या हि नैरयिकाः कृष्णलेश्याकाः, तेषां च स्थितिरुत्कृष्टा त्रयस्त्रिंशत्सागरोपमाणि, यत्तु पूर्वोत्तरभवगते यथाक्रमं चरमाद्ये अन्तर्मुहूर्त्ते ते द्वे अप्येकं, अन्तर्मुहूर्त्तस्यासङ्ख्यातभेदभिन्नत्वात्, तथा चान्यत्राप्युक्तम्-

॥१॥ "मुहुत्तद्धं तु जहन्ना तित्तीसं सागरा मुहुत्तहिया।
उक्कोसा होइ ठिई नायव्वा कण्हलेसाए॥"

अत्र 'मुहुत्तहिया' इति चूर्णिकृता व्याख्यातमन्तर्मुहूर्त्ताधिकेति, नीललेश्यासूत्रे यानि दश

सागरोपमाणि पल्योपमासङ्ख्येयभागाभ्यधिकान्युक्तानि तानि पञ्चमपृथिव्यपेक्षया वेदितव्यानि, तत्र हि प्रथमप्रस्तटे नीललेश्या 'पंचमियाए मीसा' इति वचनात्, तस्मिंश्च प्रथमप्रस्तटे स्थितिरुत्कर्षत एतावती, ये तु पूर्वोत्तरभगवते अन्तर्मुहूर्ते त पल्योपमासङ्ख्येयभागे एवान्तर्गते इति न पृथग्विवक्षिते, एवमुत्तरत्रापि द्रष्टव्यं, कापोतलेश्यासूत्रे त्रीणि सागरोपमाणि पल्योपमासङ्ख्येयभागाभ्यधिकानि तृतीयनरकपृथिव्यपेक्षयाऽवसातव्यानि, तृतीयपृथिव्यामपि प्रथमप्रस्तटे कापोतलेश्याया भावात्, 'तईयाए मीसिया' इति वचनात् तत्र चोत्कृष्टस्थितेरेतावत्याः सम्भवात्,

तेजोलेश्यासूत्रे द्वे सागरोपमे पल्योपमासङ्ख्येयभागाभ्यधिके ईशानदेवलोकदेवापेक्षया वेदितव्ये, ते हि तेजोलेश्याका उत्कर्षत एतावत्स्थितिकाः, पद्मलेश्यासूत्रे दश सागरोपमाणि अन्तर्मुहूर्ताभ्यधिकानि ब्रह्मलोकापेक्षया भावनीयानि, तत्र हि देवानां स्थितिरुत्कृष्टा दश सागरोपमाणि लेश्या च पद्मलेश्या, ये च पूर्वोत्तरभगवते अन्तर्मुहूर्ते ते किलैकमन्तर्मुहूर्तमिति अन्तर्मुहूर्ताभ्यधिकानीत्युक्तं,

शुक्ललेश्यासूत्रे त्रयस्त्रिंशत्सागरोपमाणि अन्तर्मुहूर्ताभ्यधिकानि अनुत्तरसुरापेक्षया, तेषामुत्कर्षतः स्थितेः त्रयस्त्रिंशत्सागरोपमप्रमाणत्वात्, अन्तर्मुहूर्ताभ्यधिकत्वभावना च प्राग्वत्, अलेश्यः—अयोगिकेवली सिद्धश्च, ततो न तस्यामप्यवस्थायामलेश्यत्वव्या घात इति साद्यपरेयवसितः। गतं लेश्याद्वारम्, इदानीं सम्यकत्वद्वारं तत्रेदमादिसूत्रम्—

—: पदं – १८, द्वारं – ९ – "सम्यकत्व" :—

मू. (४८१) *सम्मद्दिट्ठी णं भंते! सम्मद्दि० काल०?, गो०! सम्मद्दिट्ठी दुविहे पं०, तं०—सादीए वा अपज्जवसिते सादीए वा सपज्जवसिते से जह० अंतो० उक्को० छावट्ठिं सागरोवमाइं साइरेगाइं,*

मिच्छादिट्ठी णं भंते! पुच्छा०, गो०! मिच्छादिट्ठी तिविधे पं०, तं०—अणाइए अपज्जवसिए वा अणादीए वा सपज्जवसिए सादीए वा सपज्जवसिए, तत्थ णं जे से सादीए सपज्जवसिते से जह० अंतो० उक्को० अनंतं कालं अनंताओ उइस्सप्पिणिओसप्पिणीओ कालतो खेत्ततो अवड्ढं पोग्गलपरियट्टं देसूणं, सम्मामिच्छादिट्ठी णं पुच्छा, गो० ! जह० अंतो० उक्को० अंतो० !

वृ. 'सम्मद्दिट्ठी णं भंते!' इत्यादि, सम्यग्—अविपर्यस्ता दृष्टिः—जिनप्रणीतवस्तुतत्त्वप्रतिपत्तिर्यस्य स सम्यग्दृष्टिः, स चान्तरकरणकालभाविना औपशमिकसम्यकत्वेन सासादनसम्यकत्वेन विशुद्धदर्शनमोहपुञ्जोदयसम्पविक्षायोपशमिकसम्यकत्वेन सकलदर्शनमोहनीयक्षयसमुत्थक्षायिकसम्यकत्वेन वा द्रष्टव्यो, निर्वचनं—

सम्यग्दृष्टिर्द्विविधः प्रज्ञप्तः, तद्यथा—'साद्यपर्यवसितः' एष क्षायिके सम्यकत्वे उत्पादिते सति वेदितव्यः, तस्य प्रतिपाताभावात्, 'सादिसपर्यवसितः' एष क्षायोपशमिकादिसम्यकत्वापेक्षया, तत्र योऽसौ सादिसपर्यवसितः सम्यग्दृष्टिः स जघन्येनान्तर्मुहूर्तं, परतो मिथ्यात्वगमनात्, उत्कर्षतः षट्षष्टिः सागरोपमाणि सातिरेकाणि, तत्र यदि वारद्वयं विजयादिषु चतुर्ष्वप्रतिपतितसम्यकत्व उत्कृष्टस्थितिको देव उत्पद्यते वेलात्रयं वाऽच्युतदेवलोके ततो देवभवैरेव षट्षष्टिः सागरोपमाणि परिपूर्णानि भवन्ति, ये तु मनुष्यभवाः सम्यकत्वसहितास्तेऽधिका इति तैः सातिरेकाणीति, उक्तं च—"दो वारे विजयाइसु गयस्स तिन्निऽच्चुए अहव ताइं। अहरेगं नरभवियं" इति

'मिच्छादिट्ठी णं भंते!' इत्यादि, मिथ्या—विपर्यस्ता दृष्टिः—जीवादिवस्तुतत्त्वप्रतिपत्तिर्यस्य

भक्षितहूपूरपुरुषस्य सिते पीतप्रतिपत्तिवत् स मिथ्यादृष्टिः, ननु मिथ्यादृष्टिरपि कश्चिद् भक्ष्यं भक्ष्यतया जानाति पेयं पेयतया मनुष्यं मनुष्यतया पशुं पशुतया ततः स कथं मिथ्यादृष्टिः ?, उच्यते, भगवति सर्वज्ञे तस्य प्रत्ययाभावात्, इह हि भगवदर्हत्प्रणीतं सकलमपि प्रवचनार्थमभिरोचयमानोऽपि यदि तद्गतमेकमप्यक्षरं न रोचयति तदानीप्येष मिथ्यादृष्टिरेवोच्यते, तस्य भगवति सर्वज्ञे प्रत्ययनाशतः, उक्तं च-

॥१॥ "सूत्रोक्तस्यैकस्याप्यरोचनादक्षरस्य भवति नरः ।
मिथ्यादृष्टिः सूत्रं हि नः प्रमाणं जिनाभिहितम् ॥"

किं पुनः शेषो भगवदर्हदभिहितं यथावद् जीवाजीवादिवस्तुतत्त्वप्रतिपत्तिविकलः, ननु सकलप्रवचनार्थाभिरोचनात् तद्गतकतिपयार्थानां चारोचनादेष न्यायतः सम्यग्मिथ्यादृष्टिरेव भवितुमर्हति कथं मिथ्यादृष्टिः ?, तदसत्, वस्तुतत्त्वापरिज्ञानात्, इह यदा सकलं वस्तु जिनप्रणीततया सम्यक् श्रद्धते तदानीमसौ सम्यग्दृष्टिर्यदा त्वेकस्मिन्नपि वस्तुनि पर्याये वा मतिदौर्बल्यादिना एकान्तेन सम्यक्परिज्ञानमिथ्यापरिज्ञानाभावतो न सम्यक्श्रद्धानं नाप्येकान्ततो विप्रतिपत्तिः तदा सम्यग्मिथ्यादृष्टिः, उक्तं च शतकबृहच्चूर्णौ-"जहा नालिकेरीदीववासिस्स खुहाइयस्सवि एत्थ समागयस्स पुरिसस्स ओयणाइए अनेगविहे ढोइए तस्स आहारस्स उवरिं न रुई न य निंदा, जेण तेण सो ओयणाइओ आहारो न कयाइ दिट्ठो नावि सुओ,

एवं सम्मामिच्छद्दिट्ठिस्सवि जीवाइपयत्थाणं उवरिं न य रुई नावि निंदा"त्ति, यदा पुनरेकस्मिन्नपि वस्तुनि पर्याये वा एकान्ततो विप्रतिपद्यते तदा मिथ्यादृष्टिरेवेत्यदोषः, स च त्रिविधः, तद्यथा-अनाद्यपर्यवसितोऽनादिसपर्यवसितः सादिसपर्यवसितश्च, तत्र यः कदाचनापि सम्यक्त्वं नावाप्यस्तति सोऽनाद्यपर्यवसितः, यस्त्ववाप्स्यति सोऽनादिसपर्यवसितः, यस्तु सम्यक्त्वमासाद्य भूयोऽपि मिथ्यात्वं याति स सादिसपर्यवसितः, स च जघन्येनान्तर्मुहूर्त्तं, तदनन्तरं कस्यापि भूयः सम्यक्त्वावाप्तेः, उत्कर्षतोऽनन्तं कालं, तमेवानन्तं कालं द्विधा प्ररूपयति-

कालतः क्षेत्रतश्च, तत्र कालतोऽनन्ता उत्सर्पिण्यवसर्पिणीर्यावत्, क्षेत्रतोऽपार्द्धपुद्गलपरावर्त्तं देशोनं, अत्र क्षेत्रत इति निर्देशात् क्षेत्रपुद्गलपरावर्त्तः परिग्राह्यो, नतु द्रव्यपुद्गलपरावर्त्तादयः, एवं पूर्वोत्तरत्रापि च भावनीयं, 'सम्मामिच्छादिट्ठी ण'मित्यादि, सम्यग्मिथ्या दृष्टिर्यस्यासौ सम्यग्मिथ्यादृष्टिः स जघन्यत उत्कर्षतो वा अन्तर्मुहूर्त्तं, परतोऽवश्यं तत्परिणामविध्वंसात्, तथा जीवस्वाभाव्यात् । गतं सम्यक्त्वद्वारमिदानीं ज्ञानद्वारं, तत्रेदमादिसूत्रम्-

-: पदं - १८, दारं - १० :- "ज्ञाने" :-

मू. (४८२) *नाणी णं भंते ! नाणित्ति काल०, गो० ! नाणी दुविधे पं०, तं०-सातीते वा अपज्जवसिते साइए वा सपज्जवसिते, तत्थ णं जे से सादीए सपज्जवसिते से जहन्नेणं अंतो० उक्को० छावट्ठिं सागरोवमाइं साइरेगाइं,*

आभिनिबोहियनाणी णं पुच्छा, गो० ! एवं चेव, एवं सुयनाणीवि, ओहिनाणीवि एवं चेव, नवरं जहन्नेणं एगं समयं, मनपज्जवनाणी णं भंते ! पुच्छा मनपज्जवनाणित्ति कालतो०, गो० ! जह० एगं समयं उक्को० देसूणा पुव्वकोडी, केवलनाणी णं पुच्छा, गो० ! सातिए अपज्जवसिते

अन्नाणी मतिअन्नाणी सुतअन्नाणी पुच्छा, गो० ! अन्नाणी मइअन्नाणी सुयअन्नाणी

तिविधे पं०, तं०–अणाइए वा अपज्जवसिए अणादीए वा सपज्जवसिते सादीए वा सपज्जवसिते, तत्थ णं जे से सादीए सपज्जवसिते से जह०-- अंतो० उक्को० अनंतं कालं, अनंताओ उस्सप्पिणि-ओसप्पिणीओ कालतो खेत्तओ अवड्ढपोग्गलपरियट्टं देसूणं,

विभंगनाणी णं भंते ! पुच्छा, गो० ! जहन्नेणं एगं समयं उक्कोसेणं तेत्तीसं सागरोवमाइं देसूणाते पुव्वकोडीते अब्भहिताइं !

वृ. 'नाणी णं भंते' इत्यादि, ज्ञानमस्यास्तीति 'अतोऽनेकस्वारा'दितीन्, स द्विधा साद्यपर्यवसितः सादिसपर्यवसितश्च, तत्र केवलज्ञानापेक्षया साद्यपरेयवसितः, प्रतिपाताभावात्, शेषज्ञानापेक्षया सादिसर्पयवसितः, शेषज्ञानानां प्रतिनियतकालभावित्वात्, स जघन्येनान्तर्मुहूर्त्तं, परतो मिथ्यात्वगमनेन ज्ञानपरिणामापगमात्, उत्कर्षतः षट्षष्टिसागरोपमाणि सातिरेकाणि यावत्, तानि सम्यग्दृष्टेरिव भावनीयानि, सम्यग्दृष्टेरेव ज्ञानित्वात्,

आभिनिबोधिकज्ञानिसूत्रे 'एवं चेव'त्ति यथा सामान्यतो ज्ञानी सादिसपर्यवसितो जघन्यत उत्कर्षतश्चोक्तस्तथाऽऽभिनिबोधिकज्ञान्यपि वक्तव्यः, स चैवं– 'जह० अंतो० उक्को० छावट्ठी सागरोवमाइं सातिरेगाइं' एवं श्रुतज्ञान्यपि, अवधिज्ञान्यप्येवं, नवरं स जघन्यत एकं समयं वक्तव्यः कथमेकसमयताऽवधिज्ञानस्येति चेत् ?, उच्यते,

इह तिर्यक्पञ्चेन्द्रियो मनुष्यो देवो वा विभङ्गज्ञानी सन् सम्यक्त्वं प्रतिपद्यते, तस्य च सम्यक्त्वप्रतिपत्तिसमये एव सम्यक्त्वभावतो विभङ्गज्ञानमवधिज्ञानं जातं, तच्च यदा देवस्य च्यवनेन मरणेनान्यस्यान्यथा वाऽनन्तरसमये प्रतिपततति तदा भवत्यवधिज्ञानस्यैकसमयता, उत्कर्षतःसातिरेकाणि षट्षष्टिं सागरोपमाणि यावत्, तानि चाप्रतितितावधिज्ञानस्य वारद्वयं विजयादिषु गमनेन वारत्रयमच्युतदेवलोकगमनेन वा वेदितव्यानि,

मनःपर्यवज्ञानिन एकसमयता संयतस्याप्रमत्ताद्धायां वर्त्तमानस्य मनःपर्ययज्ञानमुत्पाद्यानन्तरसमये कालं कुर्वतो भावनीया, उत्कर्षत देशोना पूर्वकोटी, तत ऊर्ध्वंसंयमाभावेन मनःपर्यव- ज्ञानस्याप्यभावात्, केवलज्ञानी साद्यसपर्यवसितः, प्रतिपाताभावात्, ।

अज्ञानी त्रिविधः, तद्यथा–अनाद्यपर्यवसितोऽनादिसपर्यवसितः सादिसपर्यवसितश्च, तत्र यस्य कदाचनापि ज्ञानलाभो न भावी सोऽनाद्यपर्यवसितो, यस्तु ज्ञानमासादयिष्यति सोऽनादिसपर्यवसितः, यः पुनर्ज्ञानमासाद्य भूयो मिथ्यात्वगमनेनाज्ञानित्वमधिगच्छति स सादिसपर्यवसितः, स च जघन्येनान्तर्मुहूर्त्तं, परतः सम्यक्त्वस्यासादनेनाज्ञानित्वपरिणामापगमसम्भवात्, उत्कर्षतोऽनन्तं कालमित्यादि प्राग्वत्, तत ऊर्ध्वंमवश्यं सम्यक्त्वावाप्तेरज्ञानित्वापगमात्,

एवं मत्यज्ञानी श्रुताज्ञानी च त्रिविधो भावनीयः, विभङ्गज्ञानी जघन्यत एकं समयं, कथमिति चेत् ?, उच्यते, कश्चित्तिर्यक्पञ्चेन्द्रियो मनुष्यो देवो वासम्यग्दृष्टित्वादवधिज्ञानी सन् मिथ्यात्वं गतस्तस्मिंश्च मिथ्यात्वप्रतिपत्तिसमये मिथ्यात्वप्रभावतोऽवधिज्ञानं विभङ्गज्ञानीभूतं, ''आदायत्र-यमज्ञानपि भवति मिथ्यात्वसंयुक्त''मिति वचनात्,

ततोऽनन्तरसमये देवस्य च्यवनेनान्यस्य मरणेनान्यथा वा तद्विभङ्गज्ञानं परिपतति, तत एवमेकसमयता विभङ्गज्ञानस्य, उत्कर्षतस्त्रयस्त्रिंशत्सागरोपमाणि देशोनपूर्वकोट्यभ्यधिकानि, तथाहि–यदि कश्चिन्मिथ्यादृष्टिस्तिर्यक्पञ्चेन्द्रियो मनुष्यो वा पूर्वकोट्यायुः कतिपयवर्षातिक्रमे

विभङ्गज्ञानी जायते, जातश्च सन्नप्रतिपतितविभङ्गज्ञान एवाविग्रहगत्या सप्तमनरकपृथिव्यां त्रयस्त्रिंशत्सागरोपमस्थितिको नैरयिको जायते तदा भवति यथोक्तमुत्कृष्टं मानं, तत ऊर्ध्वंतु सम्यक्त्वप्रतिपत्त्याऽवधिज्ञानभावतःसर्वथाऽपगमाद्वा तद्विभङ्गज्ञानमपगच्छति। गतं ज्ञानद्वारम्, इदानीं दर्शनद्वार, तत्रेदमादिसूत्रम्-

-: पदं - १८, दारं - ११ - "दर्शनं" :-

मू. (४८३) *चक्खुदंसणी णं भंते! पुच्छा, गो० ! जह० अंतो० उक्कोसेणं सागरोवमसहस्सं सातिरेगं, अचक्खुदंसणी णं भंते ! अचक्खुदंसणित्ति काल०, गो० ! अचक्खुदंसणी दुविहे पं०, तं०-अणादीए वा अपज्जवसिते अणादीए वा सपज्जवसिए,*

ओहिदंसणी णं पुच्छा, गो० ! जह० एगं समयं उक्को० दो छावट्ठीओ सागरोवमाणं साइरेगाओ, केवलदंसणी णं पुच्छा, गो० ! सातीए अपज्जवसिते ॥

वृ. चक्खुदंसणी णं भंते!' इत्यादि, इह यदा त्रीन्द्रिया दिश्चतुरिन्द्रियादिषूत्पद्य तत्र चान्तर्मुहूर्तं स्थित्वा भूयोऽपि त्रीन्द्रियादिषु मध्ये उत्पद्यते तदा चक्षुर्दर्शनी अन्तर्मुहूर्त्त लभ्यते, उत्कर्षतः सातिरेकं सागरोपमसहस्र, तच्चतुरिन्द्रियतिर्यक्पञ्चेन्द्रियनैरयिकादिभवभ्रमणेनावसातव्यम्, अचक्षुर्दर्शनी अनाद्यपर्यवसितो यो कदाचिदपि न सिद्धिभावमधिगमिष्यति, यस्त्वधिगन्ता सोऽनादिसपर्यवसितः, तथा तिर्यक्पञ्चेन्द्रियो मनुष्यो वा तथाविधाध्यवसायादवधिदर्शनमुत्पाद्यानन्तरसमये यदि कालं करोति तदाऽवधिदर्शनं प्रतिपतति, तदाऽवधिदर्शनिन एकसमयता, उत्कर्षतोऽवधिदर्शनी द्विषट्षष्टी सागरोपमाणि सातिरेकाणि, कथमिति चेत् ?, उच्यते,

इह कश्चिद्विभङ्गज्ञानी तिर्यक्पञ्चेन्द्रियो मनुष्यो वाऽप्रतिपतितविभङ्गज्ञान एवाविग्रहगत्याऽधःसप्तमनरकपृथिव्यां त्रयस्त्रिंशत्सागरोपमस्थितिर्नैरयिको जातः, तत्र चोद्वर्त्तनाप्रत्यासत्तिकाले सम्यक्त्वमुत्पाद्य ततः परिभ्रष्टसततोऽप्रतिपतितेन विभङ्गज्ञानेन पूर्वकोट्यायुष्केषु तिर्यक्पञ्चेन्द्रियेषु समुत्पन्नस्तत्र च परिपूर्णं स्वायुः प्रतिपाल्य पुनरप्रतिपतितविभङ्ग एवाधःसप्तमपृथिव्यां त्रयस्त्रिंशत्सागरोपमस्थितिको नैरयिको जातस्तत्रापि द्योद्वृत्तिप्रत्यासत्तौ सम्यक्त्वमासाद्य परित्यजति, ततो भूयोऽप्यप्रतिपतितविभङ्गएव पूर्वकोट्यायुष्केषु तिर्यक्पञ्चेन्द्रियेषु जातस्तदेवमेका षट्षष्टिः सागरोपमाणामभूत्,

सर्वत्र च तिर्यक्षूत्पद्यमानोऽविग्रहेणोत्पद्यते, विग्रहे विभङ्गस्य तिर्यक्षु मनुष्येषु च निषेधात्, यदक्ष्यति-"विभंगनाणी पंचिंदियतिरिक्खजोणिया मणूसा आहारगा नो अणाहारगा" इति, आह-किं सम्यक्त्वमेषोऽपान्तराले प्रतिपद्यते ?, उच्यते, इह विभङ्गस्य स्थितिरुत्कर्षतोऽपि त्रयस्त्रिंशत्सागरोपमाणि देशोनपूर्वकोट्यभ्यधिकानि, तथा चोक्तं प्राक्-"विभंगनाणी जह० एगं समयं उक्को० तेत्तीसं सागरोवमाइं देसूणाए पुव्वकोडीए अब्भहियाइं" इति,

तत एतावन्तं कालमविच्छेदेन विभङ्गस्याप्राप्यमाणत्वात् अपान्तराले सम्यक्त्वं प्रतिपद्यते, ततोऽप्रतिपतितविभङ्ग एव मनुष्यत्वमवाप्य संयमं पालयित्वा द्वौ वारौ विजयादिषूत्पद्यमानस्य द्वितीया षट्षष्टिः सागरोपमाणां सम्यग्दृष्टेर्भवति, एवं द्वे षट्षष्टी सागरोपमणमवधिदर्शनस्य, अथ विभङ्गावस्थायामवधिदर्शनं कर्मप्रकृत्यादिषु प्रतिषिद्धं ततः कथमिह विभङ्गे तद्भाव्यते ?, नैष दोष, सूत्रे विभङ्गेऽप्यवधिदर्शनस्य प्रतिपादितत्वात्, तथा ह्ययं सूत्राभिप्रायः-विशेषविषयं

विभङ्गज्ञानं सामान्यविषयमधिदर्शनं, यथा सम्यग्दृष्टेः विशेषविषयमवधिज्ञानं सामान्यविषयमवधिदर्शनमुच्यते केवलं विभङ्गज्ञानिनोप्यवधिदर्शनं, यथा सम्यग्दृष्टेः विशेषविषयमवधिज्ञानं सामान्यविषयमवधिदर्शनमुच्यत केवलं विभङ्गज्ञानिनोप्यनधिदर्शनमनाकारमात्रत्वेनाविशिष्टत्वात् अवधिज्ञानिनोऽवधिदर्शनतुल्यमिति तदप्यवधिदर्शनमुच्यते, न विभङ्गदर्शनमिति,

आह च मूलटीकाकारोऽप्येतद्भावनायाम्–"दंसणं च विभंगोहीणं जतो तुल्लमेव, अतो चेव दो छावट्ठीओ सादेगाओ" इति, [illegible] कार्मग्रन्थिकाः पुनराहुः–यद्यपि साकारेतरविशेषभावेन विभङ्गज्ञानमवधिदर्शनं च पृथगस्ति तथापि न सम्यग्निश्चयो विभङ्गज्ञानेन, मिथ्यात्वरूपत्वात्, नाप्यवधिदर्शनेन तस्यानाकारमात्रत्वादतः किं तेन पृथग्विवक्षितेनापीति तदभिप्रायेण न विभङ्गावस्थाया मवधिदर्शनं, न चैतत् स्वमनीषिकाविजृम्भितं, पूर्वसूरिभिरप्येवं मतविभागस्य व्यवस्थापितत्वात्, उक्तं च विशेषणवत्यं जिनभद्रगणिक्षमाश्रमणपूज्यापादैः–

॥ १ ॥ "सुत्ते विभंगस्सवि परूवियं ओहिदंसणं बहुसो ।
कीस पुणो पडिसिद्धं कम्मप्पगडीपगरणंमि ।।
॥ २ ॥ विभंगेवि दरिसणं सामण्णविसेसविसयओ सुत्ते ।
तं चऽविसिट्ठमनागारमेत्तं तोऽवहिविभंगाणं ।।
॥ ३ ॥ कम्मपगडीमयं पुन सागरेयरविसेसभावेवि ।
न विभंगनाणदंसणविसेसणमणिच्छयत्तणओ ।।" इति,

अन्ये तु व्याचक्षते–किं सप्तमनरकपृथिवीनिवासिनारककल्पनया ?, सामान्येनैव नारकतिर्यग्नरामरभवेषु पर्यटतः खल्ववधिविभङ्गी एतावन्तं कालं भवतस्तत उध्वंमपवर्ग इति । केवलदर्शनिनः सूत्रं केवलज्ञानिनः सूत्रवद्भावनीयं, ।

गतं दर्शनद्वारम्, इदानीं संयतद्वारं, तत्रेदमादिसूत्रम–

–: पदं – १८, द्वारं – १२ "संयतः" :–

मू. (४८४) संजए णं भंते ! संजतेत्ति पुच्छा, गो० ! ज० एगं समयं उक्को० देसूणं पुव्वकोडिं, असंजते णं भंते ! असंजएत्ति, पुच्छा, गो० ! असंजते तिविधे पं०, तं०–अणातीए वा अपज्जवसिते अणातीए वा सपज्जवसिते सातीए वा सपज्जवसिते, तत्थ णं जे से सातीए सपज्जवसिते से जह० अं० उक्को० अनं० अनंताओ उस्सप्पिणिओसप्पिणीओ कालओ खेत्ततो अवड्ढं पोग्गलपरियट्टं देसूणं, संजतासंजते णं पुच्छा, गो० ! जह० अंतो० उक्को० देसूणं पुव्वकोडिं, नोसंजतेनोअसंजतेनोसंजतासंजते णं पुच्छा, गो० ! सादीए अपज्जवसिते ।

वृ. 'संजए णं भंते' इत्यादि, जघन्यत एकसमयता संयतस्य चारित्रपरिणामसमय एव कस्यापि कालकरणात्, असंयतस्तु त्रिधा–अनाद्यपर्यवसितोऽनादिसपर्यवसितः सादिसपर्यवसितश्च, तत्र यः संयमं कदाचनापि न प्राप्स्यति सोऽनाद्यपर्यवसितो, यस्तु प्राप्यस्यति सोऽनादिसपर्यवसितो, यस्तु संयमं प्राप्य ततः परिभ्रष्टः स सादिसपर्यवसितः, स च जघन्येनान्तर्मुहूर्तं, ततः परं कस्यापि पुनरपि संयमप्रतिपत्तिभावात्, उत्कर्षतोऽनन्तं कालमित्यादि प्राग्वत् तत ऊर्ध्वमवश्यं संयमप्राप्तिः,

संयतासंयतो–देशविरतः, स च जघन्यतोऽप्यन्तर्मुहूर्तं देशविरतिप्रतिपत्त्युपयोगस्य, जघन्यतोऽप्यान्तर्मौहूर्तिकत्वात्, देशविरतेर्हि द्वैविध्यत्रैविध्यादिभङ्गबहुला ततस्तत्प्रतिपत्तौ जघन्येनाप्यन्तर्मुहूर्तं लगति, सर्वविरतिस्तु सर्वं सावद्यमहं न करोमीत्येवंरूपा ततस्तत्प्रतिपत्त्युपयोग एकसामयिकोऽपि भवतीति प्राक् संयतस्य एकसमयतोक्ता, यस्तु न संयतो नाप्यसंयतो नापि संयतासंयतः स सिद्ध इति साद्यपर्यवसित इति। गतं संयतद्वारम्,

–: पदं – १८, द्वारं – १३ "उपयोगः" :–

मू. *(४८५) सागरोवओगोवउत्ते णं भंते ! पुच्छा, गो० ! जह० उक्को० अंतो० । अनागारोवउत्तेवि, एवं चेव ।*

वृ. इदानीमुपयोगद्वारं, तत्रेदमादिसूत्रम्–'सागारोवओगोवउत्ते णं भंते !' इत्यादि, इह संसारिणामुपयोगः साकारोऽनाकारो वा, जघन्यतोऽप्यान्तर्मुहूर्तिकः उत्कर्षतोऽपि, ततः सूत्रद्वयेऽपि जघन्यत उत्कर्षतश्चान्तर्मुहूर्तमुक्तं, यस्तु केवलिनामुक्तः एकसामयिक उपयोगः स इह न विवक्षित इति। गतं उपयोगद्वारं, इदानीमाहारद्वारं, तत्रेदमादिसूत्रम्–

–: पदं – १८, द्वारं १४ :–

मू. *(४८६) आहारए णं भंते ! पुच्छा, गो० ! आहारए दुविधे० पं०, तं० छउमत्थआहारए य केवलिआहारए य, छउमत्थआहारए णं भंते ! छउमत्थाहारएत्ति काल० ?, गो० ! ज० खुड्डागभवग्गहणं दुसमयऊणं उक्को० असंखेज्जं कालं असंखेज्जाओ उस्सप्पिणीओसप्पिणीतो कालतो खेत्ततो अंगुलस्स असंखेज्जतिभागं, केवलिआहारए णं भंते ! केवलिआहारएत्ति कालतो० ?, गो० ! जह० अंतो० उ० देसूणं पुव्व० ।*

अनाहारए णं भंते ! अनाहारएत्ति० ?, गो० ! अनाहारए दु० पं०, तं०–छउमत्थअनाहारए य केवलिअनाहारए य, छउमत्थअनाहारए णं भंते ! पुच्छा, गो० ! जह० एगं समयं उक्को० दो समया,

केवलिअनाहारए णं भंते ! केवलि० ?, गो० ! केवलिअनाहारए दुविधे पं०, तं०–सिद्धकेवलिअनाहारए य भवत्थकेवलिअनाहारए य, सिद्धकेवलिअनाहारए णं पुच्छा, गो० ! सादीए अपज्जवसिए, भवत्थकेवलिअनाहारए णं भंते ! पुच्छा, गो० ! भवत्थकेवलिअनाहारए दुविधे पं०, तं०–सजोगिभवत्थकेवलिअनाहारए अजोगिभवत्थकेवलिअनाहारए य,

–सजोगिभवत्थकेवलिअनाहारए णं भंते ! पुच्छा, गो० ! अजहन्नमनुक्कोसेणं तिन्नि समया, अजोगिभवत्थकेवलिअणाहारए णं पुच्छा, गो० ! जह० उक्को० अंतो० ।

वृ. 'आहारगे णं भंते !' इत्यादि सुगमं, नवरं 'जहन्नेणं खुड्डागभवग्गहणं दुसमऊण'मिति इह यद्यपि चतुःसामयिकी पञ्चसामयिकी च विग्रहगतिर्भवति, आह च–

॥१॥ "उजुया य एगवंका, दुहतोवंका गती विणिद्दिट्ठा ।
जुज्जइ तिचउवंकावि नाम चउपंचसमयाओ ॥" इति

तथापि बाहुल्येन द्विसामयिकी त्रिसामयिकी वा प्रवर्त्तति न चतुः–सामयिकी पञ्चसामयिकी वा प्रवर्तते ततो न ते विवक्षिते, तत्रोत्कर्षतस्त्रिसामयिक्यां विग्रहगतौ द्वावाद्यौ समयावनाहारक

इत्याहारकत्वचिन्तायां क्षुल्लकभवग्रहणं ताभ्यां न्यूनमुक्तं, ऋजुगतिरेकवक्रगतिश्च न विवक्षिता, सर्वजघन्यस्य परिचिन्त्यमानत्वात्, उत्कर्षतोऽसङ्ख्येयकालमित्यादि सुगमं, नवरं एतावतः कालादूर्ध्वमवश्यं विग्रहगतिर्भवति, तत्र चानाहारकत्वमित्यनन्तं कालमिति नोक्तं।

केवलिसूत्रं सुगमं, छद्मस्थानाहारकसूत्रे 'उक्कोसेणं दो समया' इति त्रिसामयिकी विग्रहगतिमधिकृत्य, चतुःसामयिकी पञ्चसामयिकी च विग्रहगतिर्न विवक्षितेत्यभिहितमनन्तरं, सयोगिभवस्थकेवलिअनाहारकसूत्रे त्रयः समया अष्टसामयिकस्य केवलिसमुद्घातस्य तृतीयचतुर्थपञ्चमरूपाः, उक्तं च–

॥१॥ "दण्डं प्रथमे समये कपाटमथ चोत्तरे तथा समये।
मन्थानमथ तृतीये लोकव्यापी चतुर्थे तु॥

॥२॥ संहरति पञ्चमे त्वन्तराणि मन्थानमथ तथा षष्ठे।
सप्तमके तु कपाटं संहरति ततोऽष्टमे दण्डम्॥

॥३॥ औदारिकप्रयोक्ता प्रथमाष्टमसमयोरसाविष्टः।
मिश्रौदारिकयोक्ता सप्तमषष्ठद्वितीयेषु॥

॥४॥ कार्मणशरीरयोगी चतुर्थके पञ्चमे तृतीये च।
समयत्रयेऽपि तस्मिन् भवत्यनाहारको नियमात्॥" इति

–गतमाहारद्वारं, अधुना भाषाद्वारमाह–

–: पदं – १८, द्वारं – १५ "भाषा" :–

मू. (४८७) भासए णं पुच्छा, गो० ! जहन्नेणं एगं समयं उक्को० अंतो०, अभासए णं पुच्छा, गो० ! अभासए तिविधे पं०, तं०– अणाइए वा अपज्जवसिए अणाइए वा सपज्जवसिए साइए वा सपज्जवसिए, तत्थ णं जे से साइए वा सपज्जवसिते से जहन्नेणं अं० उ० वणप्फइकालो

वृ. 'भासए णं भंते !' इत्यादि, इह जघन्यत एकसमयता उत्कर्षत आन्तर्मुहूर्त्तिकता च वाग्योगिन इवावसातव्या, अभाषकस्त्रिविधस्तद्यथा–अनाद्यपर्यवसितः अनादिसपर्यवसितः सादिसपर्यवसितश्च, तत्र यो न जातुचिदपि भाषकत्वं प्राप्स्यति सोऽनाद्यपर्यवसितो यस्त्ववाप्स्यति सोऽनादिसपर्यवसितः, यस्तु भाषको भूत्वा भूयोऽप्यभाषको भवति स सादिसपर्यवसितः, स च जघन्योनान्तर्मुहूर्त्तं, भाषित्वा कञ्चित्कालमवस्थाय पुनर्भाषकत्वोपलब्धेः अथवा द्वीन्द्रियादिभाषक एकेन्द्रियादिष्वभाषकेषूत्पद्य तत्र चान्तर्मुहूर्त्तं जीवित्वा पुनरपि यदा द्वीन्द्रियादिरेवोत्पद्यते तदा जघन्यतोऽन्तर्मुहूर्त्तमभाषकः, उत्कर्षतो वनस्पतिकालः, स च प्रागेवोक्त इति नोपदर्श्यते।

गतं भाषकद्वारं, इदानीं परीतद्वारं,–

–: पदं – १८, द्वारं – १६ "परित्त" :–

मू. (४८८) परित्तए णं पुच्छा, गो० ! परित्ते दुविहे पं०, तं०–कायपरित्ते य संसारपरित्ते य, कायपरित्ते णं पुच्छा, गो० ! जह० अंतो० उक्को० असं० पुढविकालो असंखेज्जाओ उस्सप्पिणिओसप्पिणीतो, संसारपरित्ते णं पुच्छा, गो० ! ज० अंतो० उ० अनंतं कालं जाव अवड्ढं पोग्गलपरियट्टं देसूणं। अपरित्ते णं पुच्छा, गो० ! अपरित्ते दु० पं०, तं०–कायअपरित्ते य संसारअ०, कायअपरित्ते णं पुच्छा, गो० ! ज० अंतो० उ० वणस्सइकालो, संसारअपरित्ते णं पुच्छा, गो० !

संसारअपरित्ते दु० पं०, तं०-अणादीए वा सपज्जवसिते अणादीए वा अपज्जवसिते, नोपरित्तेनोअपरित्ते णं पुच्छा, गो० ! सादीए अपज्जवसिते,

वृ. परीतो द्विविधः-कायपरीतः संसारपरीतश्च, तत्र यःप्रत्येकशरीरी स कायपरीतो, यस्तु सम्यकत्वादिना कृतपरिमितसंसारः स संसारपरीतः, कायपरीतो जघन्यतोऽन्तर्मुहूर्तं, स च यदा कश्चिन्निगोदादुद्धृ त्य प्रत्येकशरीरिषु समुत्पद्य च तत्र चान्तर्मुहूर्तस्थित्वा भूयोऽपि निगोदेषूत्पद्यते तदा लभ्यते, उत्कर्षतोऽसङ्ख्येयं कालं, स चासङ्ख्येयः कालः पृथिवीकालो, यावान् पृथिवीकायिककायस्थितिकालस्तावान्वेदितव्य इत्यर्थः,

तमेव कालतो निरूपयति-असङ्ख्येया उत्सर्पिण्यवसर्पिण्यः, संसारपरीतो जघन्यतोऽन्तर्मुहूर्तं तत ऊर्ध्वमन्तकृत्केवलित्वं गोचरदुरतिक्रमत्वात्, उत्कर्षतोऽनन्तं कालं, तमेव निरूपयति 'अनंताओ' इत्यादि प्राग्वत्, तत ऊर्ध्वमवश्यं मुक्तिगमनात्, कायापरीतोऽनन्तकायिकः,

संसारापरीतः सम्यकत्वादिना अकृतपरिमितसंसारः, कायापरीतो जघन्येनान्तर्मुहूर्तं, स च यदा सकश्चिदप्रत्येकशरीरिभ्य उद्धृ त्य निगोदेषु समुत्पद्यते तत्र चान्तर्मुहूर्तं स्थित्वा भूयोऽपि प्रत्येकशरीरिषूत्पद्यते तदाऽवसातव्यः, उत्कर्षतो वनस्पतिकालो वाच्यः, स च प्रागेवोपदर्शितः, तत ऊर्ध्वं नियमात्तत् उद्धृ त्तेः, संसारापरीतो द्विधा-अनाद्यपर्यवसितो यो न कदाचनापि संसार-व्यवच्छेदं करिष्यति, यस्तु करिष्यति सोऽनादिसपर्यवसितः, नोपरीतोनोअपरीतश्च सिद्धः, स च साद्यपर्यवसित एव ।

-: पदं - १८, द्वारं - १७ "पर्याप्त" :-

मू. (४८९) *पज्जत्तए णं पुच्छा, गो० ! ज० अं० उ० सागरोवमसतपुहुत्तं सातिरेगं, अपज्जत्तए णं पुच्छा, गो० ! ज० उ० अंतो०, नोपज्जत्तएनोअपज्जत्तए णं पुच्छा, गो० ! सादीए अपज्जवसिते*

वृ. पर्याप्तद्वारे पर्याप्तो जघन्येनान्तर्मुहूर्तं, तत ऊर्ध्वमपर्याप्तत्वप्रसक्तेः, उत्कर्षतः सातिरेकं सागरोपमशतपृथकत्वं, एतावन्तं कालं पर्याप्तलब्ध्यवस्थानसम्भवात्, अपर्याप्तो जघन्यत उत्कर्षतश्चान्तर्मुहूर्तं, तत ऊर्ध्वमवश्यं पर्याप्तलब्ध्युत्पत्तेः, नोपर्याप्तोनोअपर्याप्तश्च सिद्धः, स च साद्यपर्यवसितः, सिद्धत्वस्याप्रच्युतेः ।

-: पदं - १८, द्वारं - १८ "सूक्ष्म" :-

मू. (४९०) *सुहुमे णं भंते ! सुहुमेत्ति पुच्छा, गो० ! ज० अंतो० उ० पुढविकालो, बादरे णं पुच्छा, गो० ! ज० अं० उ० असंखेज्जं कालं जाव खेत्तओ अंगुलस्स असंखेज्जति भागं, नोसुहुमनोबादरे णं पुच्छा, गो० ! सादीए अपज्जवसिते*

वृ. सूक्ष्मद्वारे सूक्ष्मसूत्रे उत्कर्षतः पृथिवीकाल इति, यावान् पृथिवीकायिककायस्थितिकालस्तावान् वक्तव्यः । बादरसूत्रं सुगमं, अनयोश्च भावना प्रागेव कृता, नोसूक्ष्मोनोबादरश्च सिद्धस्ततः साद्यपर्यवसितः ।

-: पदं - १८, द्वारं - १९ "संज्ञी" :-

मू. (४९१) *सण्णी णं भंते ! पुच्छा, गो० ! ज० अंतो० उ० सागरोवमसतपुहुत्तं सातिरेगं, असण्णी णं पुच्छा, गो० ! ज० अंतो० उक्को० वणस्सइकालो, नोसण्णीनोअसण्णी णं पुच्छा, गो० ! सादीए अपज्जवसिते ।*

वृ. संज्ञिद्वारे संज्ञिसूत्रे जघन्यतोऽन्तर्मुहूर्त्तमिति, यदा कश्चिदसंज्ञ्युरसंज्ञिभ्य उद्वृत्त्य संज्ञिषु समुत्पद्यते तत्र चान्तर्मुहूर्त्तं जीवित्वा भूयोऽपि असंज्ञिषूत्पद्यते तदा लभ्यते, उत्कृष्टं सुगमं। असंज्ञी जघन्यतोऽन्तर्मुहूर्त्तं, स चैवं–कश्चित् संज्ञिभ्य उद्वृत्त्यासंज्ञिषूत्पद्यते, तत्र चान्तर्मुहूर्त्तं स्थित्वा भूयोऽपि संज्ञिषु मध्ये समागच्छति, उत्कर्षतो वनस्पतिकालो, वनस्पतिकाय-स्याप्यसंज्ञिग्रहणेन ग्रहणात् नोसंज्ञिनोअसंज्ञी न सिद्धः, स च साद्यपर्यवसितः।

–: पदं – १८, द्वारं – २० "भव०" :–

मू. *(४९२) भवसिद्धिए णं पुच्छा, गो० ! अणादीए सपज्जवसिते, अभवसिद्धिए णं पुच्छा, गो० ! अणादीए अपज्जवसिते, नोभवसिद्धिएनोअभवसिद्धिए णं पुच्छा, गो० ! सादीए अपज्जवसिते।*

वृ. भवसिद्धिकद्वारे 'भवसिद्धि ण'मित्यादि, भवे सिद्धिर्यवस्यासौ भवसिद्धिको भव्य इत्यर्थः, स चानादिसपर्यवसितः, अन्यथा भव्यत्वायोगात्, अभवसिद्धकोऽभव्यः, स चानाद्य-पर्यवसितः, अन्यथाऽभव्यत्वायोगात्, नोभव्योनोअभव्यश्च सिद्धः, ततः साद्यपर्यवसितः।

–: पदं – १८, द्वारं – २१ "अस्ति" :–

मू. *(४९३) धम्मत्थिकाए णं पुच्छा, गो० ! सव्वद्धं, एवं जाव अद्धासमए।*

वृ. अस्तिकायाः पञ्चापि सर्वकालभाविनः, अद्धासमयोऽपि प्रवाहापेक्षया, तत उक्तं 'एवं जाव अद्धासमए'।

–: पदं – १८, द्वारं – २२ "चरिम" :–

मू. *(४९४) चरिमे णं पुच्छा, गो० ! अणादीए सपज्जवसिते, अचरिमे णं पुच्छा, गो० ! अचरिमे दुविधे पं०, तं० –अणादीए वा अपज्जवसिते सादीते वा अपज्जवसिते (पन्नवणाए भगवईए अट्ठारसमं कायट्ठिइनामपयं समत्तं) ॥*

वृ. चरमो भवो भविष्यति यस्य सोऽभेदाच्चरमो–भव्यस्तद्विपरीतोऽचरमः स चाभव्यस्तस्य चरमभवाभावात्, सिद्धश्च, तस्यापि चरमत्वायोगात्, तत्र चरमोऽनादिसपर्यवसितोऽन्यथा चरमत्वायोगात्, अचरमो द्विविधोऽनाद्यपर्यवसितः साद्यपर्यवसितश्च, तत्रानादिअपर्यवसितोऽ-भव्यः, साद्यपर्यवसितः सिद्धः।

पदं – १८ – समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे अष्टादशपदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता।

पदं – १९ – सम्यक्त्वम्

वृ. 'तदेवं व्याख्यातमष्टादशं पदं, साम्प्रतमेकोनविंशतितममारभ्यते, अस्य चायम-भिसंबन्धः–इहानन्तरपदे कायस्थितिरुक्ता, अत्र तु कस्यां कायस्थितौ कतिविधाः सम्यग्दृष्टया-दिभेदेन जीवा भवन्तीति चिन्त्यते, तत्रेदं सूत्रम्–

मू. *(४९५) जीवा णं भंते ! किं सम्मदिट्ठी मिच्छादिट्ठी सम्मामिच्छादिट्ठी ?, गोयमा ! जीवा सम्मदिट्ठीवि मिच्छादिट्ठीवि सम्मामिच्छादिट्ठीवि । एवं नेरइयावि । असुरकुमारादि एवं चेव जाव थणियकुमारा ।*

पुढवीकाइया णं पुच्छा, गोयमा ! पुढवीकाइया नो सम्मदिट्ठी मिच्छादिट्ठी नो सम्मामिच्छादिट्ठी, एवं जाव वणस्सइकाइया बेइंदियाणं पुच्छा, गोयमा ! बेइंदिया सम्मदिट्ठी मिच्छादिट्ठी नो सम्मामिच्छादिट्ठी, एवं जाव चउरिंदिया,

पंचिंदियतिरिक्खजोणिया मणुस्सा वाणमंतरजोइसियवेमाणिया य सम्मदिट्ठीवि मिच्छादिट्ठीवि सम्मामिच्छादिट्ठीवि, सिद्धा णं पुच्छा, गोयमा ! सिद्धा सम्मदिट्ठी, नो मिच्छादिट्ठी णो सम्मामिच्छादिट्ठी । (पन्नवणाभगवईए सम्मत्तपदं समत्तं)

वृ. 'जीवा णं भंते ! किं सम्मदिट्ठी' इत्यादि सुत्रं [illegible]दपरिसमाप्तेः, नवरं सासादनसम्यक्त्वयुक्तोऽपि सूत्राभिप्रायेण पृथिव्यादिषु नोत्पद्यते, ''उभयाभावो पुढवाइएसु'' इति वचनात्, द्वीन्द्रियादिषु सासादनसम्यक्त्वयुक्त उपपद्यते,

ततः पृथिव्यादयःसम्यग्दृष्टयः प्रतिषिद्धाः, द्वीन्द्रियादयोऽभिहिताः, सम्यग्मिथ्यादृष्टिपरिणामः पुनः संज्ञिपञ्चेन्द्रियाणां भवति, न शेषाणां, तथास्वाभाव्यात्, अत उभयेऽपि सम्यग्मिथ्यादृष्टयः प्रतिषिद्धाः ॥

पदं – १९ – समाप्तम्

पदं – २० – "अन्तक्रिया"

वृ. व्याख्यातमेकोनविंशतितमंपदं, अधुना विंशतितमं आरभ्यते, अस्य चायमभिसंबन्धः– इहानन्तरपदे सम्यक्त्वपरिणाम उक्तः, अत्र तु परिणामसाम्याद् गतिपरिणामविशेषोऽन्तक्रियाऽभिधीयते, तत्रेयमादौ अधिकारद्वारगाथा–

मू. *(४९६) नेरइय अंतकिरिया अनंतरं एगसमय उव्वट्टा ।*
तित्थगरचक्कि बलदेववासुदेवमंडलियरयणा य ॥

वृ. 'नेरइय अंतकिरिया' इत्यादि, प्रथमतो नैरयिकोपलक्षितेषु चतुर्विंशतिस्थानेषु अन्तक्रिया चिन्तनीया । ततोऽनन्तरगताः किमन्तक्रियां कुर्वन्ति परम्परागता वा ? इत्येवमन्तरं चिन्तनीयं, ततो नैरयिकादिभ्योऽनन्तरमागताः कियन्त एकसमयेनान्तक्रियां कुर्वन्तीति चिन्त्यते,

तत 'उव्वट्टा' इति उद्वृत्ताः सन्तः कस्यां योनावुत्पद्यन्ते इति वक्तव्यं, तथा यत उद्वृत्तास्तीर्थकराश्चक्रवर्तिनो बलदेवा वासुदेवा माण्डलिकाश्चक्रवर्तिनो रत्नानि च–सेनापतिप्रमुखाणि भवन्ति ततस्तानि क्रमेण वक्तव्यानि इति द्वारगाथासंक्षेपार्थः । विस्तरार्थं तु सूत्रकृदेव वक्ष्यति, तत्र प्रथमतोऽन्तक्रियामभिधित्सुराह–

–: पदं – २०, वारं – १ "नैरयिक" :–

मू. *(४९७) जीवे णं भंते ! अंतकिरियं करेज्जा ?, गोयमा ! अत्थेगइए करेज्जा, अत्थेगतिए नो करेज्जा । एवं नेरइए जाव वेमाणिए ।*

नेरइए णं भंते ! नेरइएसु अंतकिरियं करेज्जा ? गोयमा ! नो इणट्ठे समट्ठे । नेरइया णं भंते

असुरकुमारेसु अंतकिरियं करेज्जा ?, गोयमा ! नो इणट्ठे समट्ठे । एवं जाव वेमाणिएसु ।

नवरं मणूसेसु अंतकिरियं करेज्जात्ति पुच्छा, गोयमा ! अत्थेगतिए करेज्जा अत्थेगतिए नो करेज्जा । एवं असुरकुमारा जाव वेमाणिए । एवमेव चउवीसं २ दंडगा भवंति ।

वृ. 'जीवे णं भंते !' इत्यादि, जीवो 'ण' मिति वाक्यालङ्कृतौ भदन्त ! 'अन्तक्रिया' मिति अन्तः-अवसानं, तच्च प्रस्तावादिह कर्मणामवसातव्यं, अन्यत्रागमेऽन्तक्रियाशब्द (वाच्यतया त)स्य रूढत्वात्, तस्य क्रिया-करणमन्तक्रिया-कर्मान्तकरणं मोक्ष इति भावार्थः, ''कृत्स्नकर्मक्षयान्मोक्षः'' इति वचनात्, तां कुर्याद् ?, भगवानाह- गौतम ! अस्त्येकको यः कुर्यात्, अस्त्येकको यो न कुर्यात्, इयमत्र भावना-यस्तथाविध- भव्यत्वपरिपाकवशतो मनुष्यत्वादिकामविकलां सामग्रीमवाप्य तत्सामर्थ्यसमुद्भूतातिप्रबलवी- र्योल्लासवशतः क्षपकश्रेणिसमारोहणेन केवलज्ञानमासाद्याधातीन्यपि कर्माणि क्षपयेत् स कुर्यात्, अन्यस्तु न कुर्यात्, विपर्ययादिति ।

एवं नैरयिकादिचतुर्विंशतिदण्डकक्रमेण तावद् भावनीया यावद् वैमानिकाः, सूत्रपाठस्त्वेवम्-'नेरइए णं भंते ! अंतकिरियं करेज्जा ?, गोयमा ! अत्थेगइए करेज्जा अत्थेगइए नो करेज्जा' इत्यादि । इदानीं नैरयिकेषु मध्ये वर्तमानोऽन्तक्रियां करोति किं वा न करोति ? इति पिपृच्छिषुरिदमाह-

-: पदं - २०, द्वारं - २ "अंतक्रिया" :-

सू. (४९८) *नेरइया णं भंते ! किं अनंतरागया अंतकिरियं करेंति परंपरागया अंतकिरियं करेंति ?, गोयमा ! अनंतरागयावि अंतकिरियं करेंति परंपरागयावि अंतकिरियं करेंति । एवं रयणप्पभापुढविनेरइयावि जाव पंकप्पभापुढवीनेरइया, धूमप्पभापुढवीनेरइयाणं पुच्छा, गोयमा नो अनंतरागया अंतकिरियं पकरेंति, परंपरागया अंतकिरियं पकरेंति, एवं जाव अहेसत्तमापुढवीनेरइया ।*

असुरकुमारा जाव थणियकुमारा पुढवीआउवणस्सइकाइया य अनंतरागयावि अंतकिरियं पकरेंति परंपरागयावि अंतकिरियं पकरेंति, तेउवाउबेइंदियतेइंदियचउरिंदिया नो अनंतरागया अंतकिरियं पकरेंति परंपरागया अंतकिरियं पकरेंति ।

सेसा अनंतरागयावि अंतकिरियं पकरेंति परंपरागयावि अंतकिरियं पकरेंति ।

वृ. 'नेरइए णं भंते' इत्यादि, भगवानाह-गौतम ! नायमर्थः समर्थः नायमर्थो युक्त्युपपन्न इत्यर्थः । कथमिति चेत् ?, उच्यते, इह कृत्स्नकर्मक्षयः प्रकर्षप्राप्तात्सम्यग्दर्शनज्ञानचारित्रसमुदायाद् भवति, न च नैरयिकावस्थायां चारित्रपरिणामः, तथा भवस्वाभाव्यादिति । एवमसुरकुमारादिषु वैमानिकपर्यवसानेषु प्रतिषेधो वक्तव्यः । मनुष्येषु तु मध्ये समागतः सन् कश्चिदन्तक्रियां कुर्यात्, यस्य परिपूर्णा चारित्रादिसामग्री स्यात्, कश्चिन्न कुर्यात्, यस्तद्विकल इति । एवमसुरकुमारादयोऽपि वैमानिकपर्यवसानाः प्रत्येकं नैरयिकादिचतुर्विंशतिदण्डकक्रमेण वक्तव्याः, तत एवमेते चतुर्विंशतिदण्डकाश्चतुर्विंशतयो भवन्ति ॥

अथैते नैरयिकादयः स्वस्वनैरयिकादिभवेभ्योऽनन्तरं मनुष्यभवे समागताः सन्तोऽन्तक्रियां कुर्वन्ति किंवा तिर्यगादिभवव्यवधानेन परंपरागता इति निरूपयितुकाम आह-'नेरइया णं भंते इत्यादिप्रश्नसूत्रं सुगमं, भगवानाह-गौतम ! अनन्तरागता अपि अन्तक्रियां कुर्वन्ति परम्परागता अपि, तत्र रत्नशर्कराबालुकापङ्कप्रभाभ्योऽनन्तरागता अपि परम्परागता अपि, धूमप्रभापृथिव्या-

दिभ्यः पुनः परम्परागता एव, तथास्वाभाव्यात, एनमेव विशेषं प्रतिपिपादयिषुः सूत्रसप्तकमाह– 'एवं रयणप्पभापुढवीनेरइयावि' इत्यादि, सुगमं ।

असुरकुमारादयः स्तनितकुमारपर्यवसानाः पृथिव्यब्वनस्पतयश्चानन्तरागता अपि अन्तक्रियां कुर्वन्तिपरम्परागता अप्यन्तक्रियां कुर्वन्ति, उभयथाऽप्यागतानां तेषामन्तक्रियाकरणाविरोधात, तथा केवलचक्षुषोपलब्धेः । तेजोवायुद्वित्रिचतुरिन्द्रियाः परम्परागता एव, न त्वनन्तरागताः, तत्र तेजोवायूनामानन्तर्येण मनुष्यत्वस्यैवाप्राप्तेः, द्वीन्द्रियादीनां तु तथाभवस्वाभाव्यादिति शेषास्तु तिर्यक्पञ्चेन्द्रियादयो वैमानिकपर्यवसाना अनन्तरागता अपि परम्परागता अपि । अथ नैरयिकादिभवेभ्योऽनन्तर भगवताः कियन्त एकसमयेऽन्तक्रियां कुर्वन्ति इत्येवंरूपं तृतीयं द्वारमभिधित्सुराह–

–: पदं – २०, द्वारं – ३, "अनंतरागता" :–

मू. *(४९९) अनंतरागया नेरइया एगसमये केवइया अंतकिरियं पकरेंति ?, गोयमा ! जहन्नेणं एगो वा दो वा तिन्नि वा उक्कोसेणं, दस, रयणप्पभापुढवीनेरइयावि एवं चेव, जाव वालुयप्पभापुढवी०, अनंत० भंते ! पंकप्पभापुढवीनेरइया एगसमयेणं केवतिया अंतकिरियं पकरेंति ?, गोयमा ! जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं चत्तारि, अनंतरागया णं भंते ! असुरकुमारा एगसमये केवतिआ अंत० पकरेंति ?, गोयमा ! जह० एक्को वा दो वा तिन्नि वा उक्कोसेणं दस, अनंतरागया णं भंते ! असुरकुमारीओ एगस० केव० अंत० पकरेंति ?, गोयमा जह० एक्को वा दो वा तिन्नि वा उक्कोसेणं पंच, एवं जहा असुरकुमारा सदेवीया तहा जाव थणिअ०*

अनंतरागया णं भंते ! पुढवि० एगसमये केवइया अंतकिरियं पकरेंति ?, गोयमा ! जह० एक्को वा दो वा तिन्नि वा, उक्कोसेणं चत्तारि, एवं आउक्काइयावि चत्तारि, वणस्सइकाइया छच्च, पंचिंदियतिरिक्खजोणिया दस, तिरिक्खजोणिणीओ दस, मणुस्सा दस, मणुस्सीओ वीस, वाणमंतरा दस, वाणमंतरीओ पंचस जोइसिआ दस, जोइसिणीओ वीसं, वेमाणिआ अट्ठसयं, वेमाणिणीओ वीसं ।

वृ. 'अनंतरागयां णं भंते !' इत्यादिक नैरयिकभवादनन्तरं-अव्यवधानेन मनुष्यभवमागता अनन्तरागताः, नैरयिका इति प्राग्भवपर्यायेणं व्यपदेशः सुरादिप्राग्भवपर्यायप्रतिपत्तिव्युदासार्थः, एवमुत्तरत्रापि तत्तत्प्राग्भवपर्यायेण व्यपदेशे प्रयोजनं चिन्तनीयमिति । शेषं कण्ठ्यं । सम्प्रति तत उद्वृत्ताः कस्यां योनावुत्पद्यन्ते ? इति चतुर्थं द्वारमभिधित्सुराह–

–: पदं – २०, द्वारं – ४ "उद्वर्तन" :–

मू. *(५००) नेरइए णं भंते ! नेरइएहिंतो अनंतरं उव्वट्टित्ता नेरइएसुउववज्जेज्जा ?, गोयमा नो इणट्ठे समट्ठे, नेरइए णं भंते ! नेरइएहिंतो अनंतरं उव्वट्टित्ता असुरकुमारेसु उववज्जेज्जा ?, गोयमा ! नो इणट्ठे समट्ठे । एवं निरंतरं जाव चउरिंदिएसु पुच्छा, गोयमा ! नो इणट्ठे समट्ठे ।*

नेरइए णं भंते ! नेरइएहिंतो अनंतरं उव्वट्टित्ता पंचिंदियतिरिक्खजोणिएसु उववज्जेज्जा अत्थेगतिए उववज्जेज्जा अत्थेगइए नो उववज्जेज्जा, जे णं भंते ! नेरइएहिंतो अनंतरं पंचिंदियतिरिक्खजोणिएसु उवव० से णं भंते ! केवलिपन्नत्तं धम्मं लभेज्जा सवणयाए ?, गोयमा अत्थेगतिए लभेज्जा अत्थेगतिए नो लभेज्जा,

–ओसन्नं कारणं पडुच्च वण्णओ कालनीलातिं गंधओ दुब्भिगंधातिं रसओ तित्तरसकडुयाइं फासओ कक्खडगुरुयसीयलुक्खाइं तेसिं पोराणे वण्णगुणे गंधगुणे रसगुणे फासगुणे विपरिणामइत्ता परिपीलइत्ता परिसाडइत्ता परिविद्धंसइत्ता अन्ने अपुव्वे वण्णगुणे गंधगुणे रसगुणे फासगुणे उप्पाइत्ता आयसरीरखेत्तोगाढे पोग्गले सव्वप्पणयाए आहारं आहारेंति ।

नेरइया णं भंते ! सव्वओ आहारेंति सव्वओ परिणामंति सव्वओ ऊससंति सव्वओ नीससंति अभिक्खणं आहारेंति अभिक्खणं परीणामंति अभिक्खणं ऊससंति अभिक्खणं नीससंति आहच्च आहारेंति आहच्च परणीमेंति आहच्च ऊससंति आहच्च नीससंति ?, हंता ! गो० ! नेरइया सव्वतो आहारेंति एवं तं चेव जाव आहच्च नी० ।

नेरइया णं भंते ! पोग्गले आहारत्ताते गिण्हंति ते णं तेसिं पोग्गलाणं सेयालंसि कतिभागं आहारेंति कतिभागं आसाएंति ?, गो० ! असंखेज्जतिभागं आ० अनंतभागं अस्साएंति, नेरइया णं भंते ! जे पोग्गले आहारत्ताते गिण्हंति ते किं सव्वे आहारेंति नो सव्वे आहारेंति ?, गो० ! ते सव्वे अपरिसेसए आहारेंति । नेरइया णं भंते ? जे पोग्गले आहारत्ताए गिण्हंति ते णं तेसिं पोग्गलाकीसत्ताए भुज्जो २ परिणामेंति ?, गो० ! सोतिंदियत्ताते जाव फासिंदियत्ताते अनिट्ठत्ताते अकंतत्ताए अप्पिट्ठत्ताए अमणुण्णत्ताए अमणामत्ताते अनिच्छियत्ताते अभिज्झितत्ताए अहत्ताते नो ऊड्ढत्ताए दुक्खत्ताते नो सुहत्ताते एतेसिं भुज्जो २ परिणमंति ।

वृ. 'नेरइया णं भंते ?' इत्यादि, नैरयिका भदन्त ! किं सचित्ताहाराः–सचित्तमाहारयन्तीति सचित्ताहाराः, एवमचित्ताहारा मिश्राहारा इत्यपि भावनीयं, भगवानाह–'गौतमे'त्यादि, इह वैक्रियशरीरिणो वैक्रियशरीरपरिपोषयोग्यान् पुद्गलानाहारयन्ति, ते चाचित्ता एव सम्भवन्ति न जीवपरिगृहीता इत्यचित्ताहारा न सचित्ताहारा नापि मिश्राहाराः, एवमसुरकुमारादयः स्तनितकुमारापर्यवसाना भवनपतयो व्यन्तरा ज्योतिष्का वैमानिकाश्च वेदितव्याः, औदारिकशरीरिणः पुनरौदारिकशरीरपरिपोषयोग्यान् पुद्गलानाहारयन्ति, ते च पृथिवीकायिकादिपरिणामपरिणता इति सचित्ताहारा अचित्ताहारा मिश्राहाराश्च घटन्ते, तथा चाह–'ओरालियसरीरा जाव मणूसा' इत्यादि, औदारिकशरीरिणः पृथिवीकायिकेभ्य आरभ्य यावन्मनुष्याः, किमुक्तं भवति ?–पृथिव्यप्तेजोवायुवनस्पतिरूपा एकेन्द्रिया द्वित्रिचतुःपञ्चेन्द्रिया मनुष्याश्चैव एते प्रत्येकं सचित्ताहारा अप्यचित्ताहारा अपि मिश्राहारा अपि वक्तव्याः । उक्तः प्रथमाधिकारः, सम्प्रति द्वितीयादीनष्टमपर्यन्तान् सप्ताधिकारान् चतुर्विंशतिदण्डकक्रमेण युगपदभिधित्सुः प्रथमतो नैरयिकाणामभिदधाति–

'नेरइया ण'मित्यादि, नैरयिकाणमिति वाक्यालङ्कारे, भदन्त ! आहारार्थिनः, काकुवाऽभिधानतः प्रश्नार्थत्वावगतिः, भगवानाह–'हंते'त्यादि, हन्तेत्यनुमतौ अनुमतमेतत्, गौतम आहारार्थिनो नैरयिका इति, यदि आहारार्थिनस्ततो भदन्त ! नैरयिका णमिति पूर्ववत् 'केवइकालस्स'त्ति प्राकृतत्वात् तृतीयार्थे षष्ठी, कियता कालेन आहारार्थः–आहारलक्षणं प्रयोजनं आहाराभिलाष इतियावत् समुत्पद्यते ?, भगवानाह–'गौतम !' इत्यादि, नैरयिकाणां द्विविधो–द्विप्रकारः आहारः, तद्यथा–आभोगनिर्वर्त्तितोऽनाभोगनिर्वर्त्तितश्च, तत्र आभोगनमाभोगः–आलोचनमभिसन्धिरित्यर्थः आभोगेन निर्वर्त्तितः–उत्पादित आभोगनिर्वर्त्तित

केवलिप्रज्ञप्तधर्मश्रवणश्रद्धानादवश्यं तयोर्भावात्, भूयः प्रश्नयति–यो भदन्त ! आभिनिबोधिकश्रुतज्ञाने उत्पादयति स 'संचाएज्जा' शक्नुयात् 'शीलं' ब्रह्मचर्यं 'व्रतं' चित्रं द्रव्यादिविषयनियमरूपं गुणं–उत्तरगुणं भावनादिरूपं विरमणं–विरतिरतीतस्थूलप्राणातिपातादेः प्रत्याख्यानं–अनागतस्य स्थूलप्राणातिपातादेरेव, पोषं–धर्मपोषं दधाति–करोतीति पोषधं–अष्टम्यादिपर्व तस्मिन्नुपवासः पोषधोपवासः तं प्रतिपत्तुं शक्नुयात् ? । भगवानाह–'अत्थेगइए' इत्यादि,

इह तिरश्चां मनुष्याणां च भवप्रत्ययतोऽवधिर्नोपजायते किन्तु गुणतः, गुणाश्च शीलव्रतादयोऽस्यापि विद्यन्ते ततः किमस्यावधिज्ञानमुत्पद्यते किं वा न ? इति प्रश्नयति, 'जे णं भंते इत्यादि, यस्य शीलव्रतादिविषयविप्रकृष्टपरिणामभावात् अवधिज्ञानावरणकर्मणः क्षयोपशम उपजायते स उत्पादयेत्, शेषस्तु नैत्यर्थः ॥

अवधिज्ञानान्तरं च मनःपर्यवज्ञानं द्रष्टव्यं, मनःपर्यवज्ञानं चानगारस्य भवति "तं संजयस्स सव्वप्पमायरहियस्स विविहरिद्धिमतो" [तत् संयतस्य सर्वप्रमादरहितस्य विविधर्द्धिमतः] इति वचनात्, ततोऽनगारतामेव प्रश्नयति–'जे णं भंते !' इत्यादि, मुण्डो द्विधा–द्रव्यतो भावतश्च, द्रव्यतः केशाद्यपनयनेन भावतःसर्वसङ्गपरित्यागेन, तत्रेह द्रव्यमुण्डत्वासंभवाद् भावमुण्डः परिगृह्यते, मुण्डो भूत्वा अगारात्–स्वाश्रयरूपाद् विनिर्गत्य न विद्यते अगारं–गृहं द्रव्यतो भावतश्च यस्यासौ अनगारः तद्भावोऽनगारतातां प्रव्रजितुं शक्नुयात् ? भगवानाह–नायमर्थः समर्थः तिरश्चां भद्रस्वभावातः तथारूपपरिणामासंभवात्, अनागारताया अभावे मनःपर्यवज्ञानस्य चाभावः सिद्ध एव । यथा च तिर्यक्पञ्चेन्द्रियविषयं सूत्रकदम्बकमुक्तं तथा मनुष्यविषयमपि वक्तव्यं, नवरं मनुष्येषु सर्वभावसंभवात् मनःपर्यवज्ञानकेवलज्ञानसत्त्रे अधिके प्रतिपादयति–'जे णं भंते संचाएज्जा मुंडे भवित्ता' इत्यादि सुगमं, नवरं 'सिज्झेज्जा' इत्यादि, सिध्येत–समस्तार्थसिद्धैश्वर्यादिसिद्धिभाक् भवेत् बुध्येत–लोकालोकस्वरूपमशेषमवगच्छेत् मुच्यते–भवोपग्राहिकर्मभिरपि, किमुक्तं भवति सर्वदुःखानामन्तं कुर्यात् ।

वानमन्तरज्योतिष्कवैमानिकेषु प्रतिषेधो वक्तव्यः, नैरयिकस्य भवस्वाभाव्यान्नैरयिकदेवभवयोग्यायुर्बन्धासंभवात् । तदेवं नैरयिका नैरयिकादिचतुर्विंशतिदण्डकक्रमेण चिन्तिताः, साम्प्रतमसुरकुमारान्नैरयिकादिचतुर्विंशतिदण्डकक्रमेण चिन्तयति–

सू. *(५०१) असुरकुमारे णं भंते ! असुरकुमारेहिंतो अनंतरं उव्वट्टित्ता नेरइएसु उववज्जेज्जा गोयमा ! नो इणट्ठे समट्ठे । असुरकुमारे णं भंते ! असुरकुमारेहिंतो अनंतरं उव्वट्टित्ता असुरकुमारेसु उववज्जेज्जा ?, गोयमा ! नो इणट्ठे समट्ठे, एवं जाव थणियकुमारेसु ।*

असुरकुमारे णं भंते ! असुरकुमारेहिंतो अनंतरं उव्वट्टित्ता पुढवीकाइएसु उववज्जेज्जा ?, हंता गोयमा ! अत्थेगइए उववज्जेज्जा अत्थेगतिए नो उववज्जेज्जा । जे णं भंते ! उववज्जेज्जा से णं केवलियं धम्मं लभेज्जा सवणयाए ?, गोयमा ! नो इणट्ठे समट्ठे । एवं आउवणस्सइसुवि ।

असुरकुमारा णं भंते ! असुरकुमारेहिंतो अनंतरं उव्वट्टित्ता तेउवाउबेइंदियतेइंदियचउरिंदिएसु उववज्जेज्जा ?, गोयमा ! नो इणट्ठे समट्ठे, अवसेसेसु पंचसु पंचिंदियतिरिक्खजोणिइसु असुरकुमारेसु जहा नेरइओ, एवंजाव थणियकुमारा ।

सू. 'असुरकुमारा णं भंते !' इत्यादि प्राग्वत्, नवरमेते पृथिव्यब्वनस्पतिष्वप्युत्पद्यन्ते,

ईशानन्तदेवानां तेषूत्पादाविरोधात्, तेषु चोत्पन्ना न केवलिप्रज्ञप्तं धर्मं लभन्ते श्रवणतया, श्रवणेन्द्रियस्याभावात्, शेषं सर्वं नैरयिकवत्, एवं 'जाव थणियकुमारा' इति एवमसुरकुमारोक्तेन प्रकारेण तावद्वक्तव्यं यावत्स्तनितकुमाराः ।

मू. (५०२) पुढवीकाइए णं भंते ! पुढवीकाइएहिंतो अनंतरं उव्वट्टित्ता नेरइएसु उववज्जेज्जा गोयमा ! नो इणट्ठे समट्ठे, एवं असुरकुमारेसुवि, जाव थणियकुमारेसुवि । पुढवीकाइए णं भंते ! पुढवीकाइएहिंतो अनंतरं उव्वट्टितता पुढवीकाइएसु उववज्जेज्जा ?, गोयमा ! अत्थेगतिए उववज्जेज्जा अत्थेगतिए नो उववज्जेज्जा, जे णं भंते ! उववज्जेज्जा से णं केवलिपन्नत्तं धम्मं लभेज्जा सवणयाए ?, गोयमा ! नो इणट्ठे समट्ठे । एवं आउक्काइआदिसु निरंतरं भाणिव्वं जाव चउरिंदिएसुं ।

पंचिंदियतिरिक्खजोणिमणुस्सेसु जहा नेरइए । वाणमंतरजोइसियवेमाणिएसु पडिसेहो एवं जहा पुढवीकाओ भणिओ तहेव आउक्काइओवि, जाव वणस्सइकाइओवि भाणियव्वो ।।

तेउक्काइए णं भंते ! तेउकाइएहिंतो अनंतरं उव्वट्टित्ता नेरइएसु उववज्जेज्जा ?, गोयमा ! नो इणट्ठे समट्ठे, एवं असुरकुमारेसुवि, जाव थणियकुमारेसु, पुढवीकाइअआउवाउतेउवणवे-इंदियतेइंदियचउरिंदिएसु अत्थेगतिए णो उववज्जेद्जा,

जे णं भंते ! उववज्जेज्जा से णं केवलिपन्नत्तं धम्मं लभेज्जा सवणयाए ?, गोयमा ! नो इणट्ठे समट्ठे । तेउक्काइए णं भंते ! तेउकाइएहिंतो अनंतरं उव्वट्टित्ता पंचिंदियतिरिक्खजोणिएसु उववज्जेज्जा गोयमा ! अत्थेगइए उववज्जेज्जा अत्थेगइए नो उववज्जा,

से णं केवलिपन्नत्तं धम्मं लभेज्जा सवणयाए ?, गोयमा ! अत्थेगइए लभेज्जा अत्थेगइए नो लभेज्जा, जे णं भंते ! केवलिपन्नत्तं धम्मं लभेज्जा सवणयाए से णं केवलिं बोहिं बुज्झेज्जा ?, गोयमा नो इणट्ठे समट्ठे ।। मणुस्सवाणमंतरजोइसियवेमाणिएसु पुच्छा, गोयमा ! नो इणट्ठे समट्ठे । एवं जहेव तेउक्काइए निरंतरं एवं वाउकाइएवि ।

वृ. पृथिवीकायिका नैरयिकेषु देवेषु च प्रतिषिध्यन्ते, तेषां विशिष्टमनोद्रव्यासंभवतस्तीव्रसंक्लेशविशुद्धाध्यवसायाभावात्, शेषेषु तु सर्वेष्वपि स्थानेषु उत्पद्यन्ते, तद्योग्याध्यवसायस्थानसंभवात्, तत्रापि च तिर्यक्पञ्चेन्द्रियेषु मनुष्येषु च नैरयिकवद् वक्तव्यं, एवमप्कायिका वनस्पतिकायिकाश्च वक्तव्याः ।

तेजस्कायिका वायुकायिकाश्च मनुष्येष्वपि प्रतिषेधनीयाः, तेषामानन्तर्येणं मनुष्येषूत्पादासंभवात्, असंभवश्च क्लिष्टपरिणामतया मनुष्यगतिमनुष्यानुपूर्वमनुष्यायुर्बन्धासंभवात्, तिर्यक्पञ्चेन्द्रियेषूत्पन्नाः केवलिप्रज्ञप्तं धर्मं श्रवणतया लभेरन्, श्रवणेन्द्रियस्य भावात्,

पुनस्तां केवलिकीं बोधिं नाबुध्येरन्, संक्लिष्टपरिणामत्वात् ।

मू. (५०३) बेइंदिए णं भंते ! बेइंदिएहिंतो अनंतरं उव्वट्टित्ता नेरइएसु उववज्जेज्जा ?, गोयमा ! जहा पुढवीकाइआ । नवरं मणुस्सेसु जाव मनपज्जवनाणं उप्पाडेज्जा । एवं तेइंदिया चउरिंदियावि जाव मनपज्जवनाणं उप्पाडेज्जा । जे णं मनपज्जवनाणं उप्पाडेज्जा से णं केवलनाणं उप्पाडेज्जा ?, गोयमा ! नो इणट्ठे समट्ठे ।

वृ. द्वित्रिचतुरिन्द्रियाः पृथिवीकायिकवत् देवनैरयिकवर्जेषु शेषेषु सर्वेष्वपि स्थानेषूत्पद्यन्ते,

नवरं पृथिवीकायिका मनुष्येष्वागता अन्तक्रियामपि कुर्युः ते पुनरन्तक्रियां न कुर्वन्ति, तथाभवस्वभावात्, मनःपर्यज्ञानं पुनरुत्पादयेयुः ।

मू. (५०४) *पंचिंदियतिरिक्खजोणिया णं भंते ! पंचिंदियतिरिक्खजोणिएहिंतो अनंतरं उव्वट्टित्ता नेरइएसु अनंतरं उववज्जेज्जा ?, गोयमा ! अत्थेगइए उववज्जेज्जा अत्थेगइए नो उववज्जेज्जा,*

से णं केवलिपन्नत्तं धम्मं लभेज्जा सवणयाए ?, गोयमा ! अत्थेगइए लभेज्जा अत्थेगइए नो लभेज्जा, जे णं केवलिपन्नत्तं धम्मं लभेज्जा सवणयाए से णं केवलिं बोहिं बुज्झेज्जा ?, गोयमा ! अत्थेगतिए बुज्झेज्जा अत्थेगतिए नो बुज्झेज्जा,

जे णं भंते ! केवलिं बोहिं बुज्झेज्जा से णं सद्दहेज्जा पत्तिएज्जा रोएज्जा ?, हंता गोयमा ! जाव रोएज्जा, जे णं भंते ! सद्दहेज्जा० से णं आभिनिबोहियनाणसुयनाणओहिनाणाइं उप्पाडेज्जा ?, हंता गोयमा ! जाव उप्पाडेज्जा !, जे णं भंते ! आभिणिबोहियनाणसुयनाणओहिनाणाइं उप्पाडेज्जा से णं संचाएज्जा सीलं वा जाव पडिवज्जित्तए ?, गोयमा ! नो इणट्ठे समट्ठे । एवं असुरकुमारेसुवि, जाव थणियकुमारेसु । एगिंदियविगलिंदिएसु जहा पुढवीकाइआ । पंचिंदियतिरिक्खजोणिएसु मणुस्सेसु य जहा नेरइए । वाणमंतरजोइसियवेमाणिएसु जहा नेरइएस उववज्जइ पुच्छा भणिया एवं मणुस्सेवि, वाणमंतरजोइसियवेमाणिएसु जहा असुरकुमारे ।

वृ. तिर्यक्पञ्चेन्द्रिया मनुष्याश्च सर्वेष्वपि स्थानेषूपपद्यन्ते, तदुक्तव्यता च पाठसिद्धा । वानमन्तरज्योतिष्कवैमानिका असुरकुमारवद् भावनीयाः ।

गतं चतुर्थं द्वारं । इदानीं पञ्चमं तीर्थकरत्ववक्तव्यतालक्षणं द्वारमभिधित्सुराह-

-: पदं - २० - द्वारं - ५ "तीर्थकर" :-

मू. (५०५) *रयणप्पभापुढवीनेरइए णं भंते ! रयणप्पभापुढवीनेरइएहिंतो अनंतरं उव्वट्टित्ता तित्थगरत्तं लभेज्जा ?, गोयमा ! अत्थेगइए लभेज्जा अत्थेगइए नो लभेज्जा, से केणट्ठेणं भंते ! एवं वुच्चइ-अत्थेगइए लभेज्जा अत्थेगइए नो लभेज्जा ?, गो० !*

जस्स णं रयणप्पभापुढवीनेरइअस्स तित्थगरनामगोयाइं कम्माइं बद्धाइं पुट्ठाइं निधत्ताइं कडाइं पट्ठवियाइं निविट्ठाइं अभिनिविट्ठाइं अभिसमन्नागयाइं उदिन्नाइं नो उवसंताइं हवंति से णं रयणप्पभापुढवीनेरइए रयणप्पभापुढवीनेरइएहिंतो अनंतरं उव्वट्टित्ता तित्थगरत्तं लभेज्जा, जस्स णं रयणप्पभापुढवीनेरइयस्स तित्थगरनामगोयाइं नो बद्धाइं जाव नो उदिन्नाइं उवसंताइं हवंति से णं रयणप्पभापुढवीनेरइए रयणप्पभापुढवीनेरइएहिंतो अनंतरं उव्वट्टित्ता तित्थगरत्तं नो लभेज्जा, से तेणट्ठेणं गोयमा ! एवं वुच्चइ-अत्थेगतिए लभेज्जा अत्थेगतिए नो लभेज्जा । एवं सक्करप्पभाजाववालुयप्पभापुढवीनेरइएहिंतो तित्थगरत्तं लभेज्जा ।

पंकप्पभापुढवीनेरइए णं भंते ! पंकप्पभा० हिंतो अनंतरं उव्वट्टित्ता तित्थगरत्तं लभेज्जा गोयमा ! नो इणट्ठे समट्ठे, अंतकिरियं पुण करेज्जा, धूमप्पभापुढवी० पुच्छा, गोयमा ! नो इणट्ठे समट्ठे, सव्वविरइं पुण लभेज्जा, तमप्पभापुढवीपुच्छा, विरयाविरइं पुण लभेज्जा, अहेसत्तमपुढवीपुच्छा, गोयमा ! नो इणट्ठे समट्ठे, सम्मत्तं पुण लभेज्जा ।

असुरकुमारस्स पुच्छा, नो इणट्ठे समट्ठे, अंतकिरियं पुण करेज्जा । एवं निरंतरं जाव आउकाइए तेउकाइए णं भंते ! तेउक्काइएहिंतो अनंतरं उव्वट्टित्ता उववज्जेज्जा (तित्थगरत्तं ल०),

गो० ! नो० ति०, केवलिपन्नत्तं धम्मं लभेज्जा सवणयाते, एवं वाउकाइएवि, वणस्सइकाइए णं पुच्छा, गो० ! नो० ति०, अंतकिरियं पुण करेज्जा,

बेइंदियतेइंदियचउरिंदिए णं पुच्छा, गो० ! नो० ति०, मनपज्जवनाणं उप्पाडेज्जा, पंचिंदियतिरिक्खजोणियमणूसवाणमंतरजोइसिए णं पुच्छा, गो० ! नो० ति०, अंतकिरियं पुण करेज्जा, सोहम्मगदेवे णं भंते ! अनंतरं चयं चइत्ता तित्थगरत्तं लभेज्जा, गो० ! अत्थे० ल० अत्थे० नो ल०, एवं जहा रयणप्पभापुढविनेरइए एवं जाव सव्वट्ठसिद्धगदेवे ॥

वृ. 'रयणप्पभापुढवीनेरइया णं भंते !' इत्यादि सुगमं, नवरं 'बद्धानि' सूचीकलाप इव सूत्रेण प्रथमतो बद्धमात्राणि, तदनन्तरमग्निसंपर्कानन्तरं सकृत् घनकुट्टितसूचीकलापवत् स्पृष्टानि 'निधत्तानि' उद्वर्तनापवर्तनावर्जशेषकरणायोग्यत्वेन व्यवस्थापितानीति भावार्थः 'कृतानि' निकाचितानि सकलकरणायोग्यत्वेन व्यवस्थापितानीत्यर्थः 'प्रस्थापितानि' मनुष्यगतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुभगादेययशःकीर्तिनामसहोदयत्वेन व्यवस्थापितानीति भावः 'निविष्टानि' तीव्रानुभावजनकतया स्थितानि 'अभिनिविष्टानि' विशिष्टविशिष्टतराध्यवसायभावतोऽतितीव्रानुभावजनकतया व्यवस्थितानि 'अभिसमन्वागतनानि' उदयाभिमुखीभूतानि 'उदीर्णानि' विपाकोदयमागतानि 'नोपशान्तानि' न सर्वथाऽभावमापन्नानि निकाचिताद्यवस्थोद्रेकरहितानि वा न भवन्ति, शेषं समस्तमपि कण्ठ्यं, एवं शर्कराप्रभावालुकाप्रभाविषये अपि सूत्रे वक्तव्ये ।

पङ्कप्रभापृथिवीरनैरयिकस्ततोऽनन्तरमुद्वृत्तः तीर्थकरत्वं न लभते, अन्तक्रियां पुनः कुर्यात्, धूमप्रभापृथिवीनैरयिकोऽन्तक्रियामपि न करोति, सर्वविरतिं पुनर्लभते, तमः—प्रभापृथिवीनैरयिकः सर्वविरतिमपि न लभते, विरत्यविरतिं—देशविरतिं पुनर्लभते, अधःसप्तमपृथिवीनैरयिकः पुनस्तामपि देशविरतिं न लभते, यदि परं सम्यक्त्वमात्रं लभते ।

असुरादयो यावद्वनस्पतिकाया अनन्तरमुद्वृत्ताः तीर्थकरत्वं न लभन्ते, अन्तक्रियां पुनः कुर्युः । वसुदेवचरिते पुनर्नागकुमारेभ्योऽप्युद्वृत्तोऽनन्तरमैरावतक्षेत्रेऽस्यामेवावसर्पिण्यां चतुर्विंशतितमस्तीर्थकर उपदर्शितः, तदत्र तत्त्वं केवलिनो विदन्ति ।

तेजोवायवोऽनन्तरमुद्वृत्ताः अन्तक्रियायामपि न कुर्वन्ति, मनुष्येषु तेषामानन्तर्येणोत्पादाभावाद्, अपि च ते तिर्यक्षूत्पन्नाः केवलिप्रज्ञप्तं धर्मं श्रवणतया लभेरन्, न तु बोधत इत्युक्तं प्राक्, वनस्पतिकायिका अनन्तरमुद्वृत्तास्तीर्थकरत्वं न लभन्ते, अंतक्रियां पुनः कुर्युः, द्वित्रिचतुरिन्द्रिया अनन्तरमुद्वृत्तास्तामपि न कुर्वन्ति, मनःपर्यायज्ञानं पुनरुत्पादयेयुः,

तिर्यक्पञ्चेन्द्रियमनुष्यव्यन्तरज्योतिष्का अनन्तरमुद्वृत्तास्तीर्थकरत्वं न लभन्ते, अन्तक्रियां पुनः कुर्युः, सौधर्मादयःसर्वार्थसिद्धिपर्यवसाना नैरयिकवद्वक्तव्याः ।

गतं तीर्थकरद्वारं, सम्प्रति चक्रवर्तित्वादीनि द्वाराण्युच्यन्ते—

—: पदं — २०, द्वाराणि (६....९) चक्रवर्तीआदि :—

मू. (५०६) *रयणप्पभापुढविनेरइए णं भंते ! अनंतरं उव्वट्टित्ता चक्कवट्टित्तं लभेज्जा, गो० ! अत्थे० लभेज्जा अत्थे० नो लभेज्जा, से केणट्ठेणं भंते ! एवं वु० ?, गो० ! जहा रयणप्पभापुढविनेरइयस्स तित्थगरत्तं ।*

सक्करप्पभानेरइए अनंतरं उवट्टित्ता चक्कवट्टित्तं लभेज्जा ?, गो० ! नो० ति०, एवं जाव अधेसत्तमापुढविनेरइए, तिरियमणुएहिंतो पुच्छा, गो० ! णो० ति०,

भवणपतिवाणमंतरजोतिसियवेमाणिएहिंतो पुच्छा गो० ! अत्थे० ल० अत्थे० नो लभेज्जा,

एवं बलदेवत्तंपि, नवरं सक्करप्पभापुढविनेरइएवि लभेज्जा, एवं वासुदेवत्तं दोहिंतो पुढवीहिंतो वेमाणिएहिंतो य अनुत्तरोववाइयवज्जेहिंतो, सेसेसु नो ति०,

मंडलियत्तं अधेसत्तमा तेउवाऊवज्जेहिंतो, सेनावइरयणत्तं गाहावइरणत्तं वड्ढतिरयणत्तं पुरोहियरयणत्तं इत्थिरयणं(णत्तं) च एवं चेव, नवरं अनुत्तरोववाइयवज्जेहिंतो, आसरयणत्तं हत्थिरयणत्तं रयणप्पभाओ निरंतरं जाव सहस्सारो, अत्थे० लभेज्जा अत्थे० नो लभेज्जा, चक्करयणत्तं छत्तरयणत्तं चम्मरयणत्तं दंडरयणत्तं असिरयणत्तं मणिरयणत्तं कागिणिरयणत्तं एतेसिणं असुरकुमारेहिंतो आरद्दवृ निरंतरं जाव ईसाणाओ उववाओ, सेसेहिंतो नो तिणट्ठे समट्ठे ।

वृ. तत्र चक्रवर्त्तित्वं रत्नप्रभानैरयिकभवनपतिव्यन्तरज्योतिष्कवमानिकेभ्यो न शेषेभ्यो, बलदेववासुदेवत्वे शर्कराताऽपि नवरं वासुदेवत्वं वैमानिकेभ्योऽनुत्तरोपपातवर्जेभ्यः,

मण्डलिकत्वमधःसप्तमतेजोवायुवर्जेभ्यः शेषेभ्यः सर्वेभ्योऽपि स्थानेभ्यः, सेनापतिरत्नत्वं गाथापतिरत्नत्वं वार्द्धकिरत्नत्वं पुरोहितरत्नत्वं स्त्रीरत्नत्वं च धः सप्तमपृथिवीतेजोवायुअनुत्तरोपपन्नदेववर्जेभ्यः शेषेभ्यः स्थानेभ्यः, अश्वरत्नत्वहस्तिरत्नत्वे रत्नप्रभात आरभ्य निरन्तरं यावदासहस्रारात्, चक्ररत्नत्वं छत्ररत्नत्वं चर्मरत्नत्वं दण्डरत्नत्वमसिरत्नत्वं मणिरत्नत्वं काकणिरत्नत्वं चासुरकुमारादारभ्य निरन्तरं यावदीशानात्, सर्वत्र विधिवाक्ये 'अत्थेगइए लभेज्जा अत्थेगइए नो लभेज्जा' इति वक्तव्यं, प्रतिषेधे 'नो इणट्ठे समट्ठे' इति ।

तदेवमुक्तानि द्वाराणि, सम्प्रतिउपपातगतं किञ्चिदवक्तव्यमस्तीति तदभिधित्सुराह-

मू. (५०७) *अह भंते! असंजयभवियदव्वदेवाणं अविराहियसंजमाणं विराहियसंजमाणं अविराहियसंजमासंजमाणं विराहियसंजमासंजमाणं असण्णीणं तावसाणं कंदप्पियाणं चरगपरिव्वायगाणं किब्विसियाणं तिरिच्छियाणं आजीवियाणं आभिओगियाणं सलिंगीणं दंसणवावण्णगाणं देवलोगेसु उववज्जमाणाणं कस्स कहिं उववाओ पन्नत्तो ?,*

-गो० ! असंजयभवियदव्वदेवाणं जहन्नेणं भवणवासीसु उक्को० उवरिमगेवेज्जएसु, अविराहियसंजमाणं जह० सोहम्मे कप्पे उक्को० सव्वट्ठसिद्धे, विराहियसंजमाणं जह० भवणवासीसु उक्को० सोहम्मे कप्पे, अविराहियसंजमासंजमाणं जह० सोहम्मे कप्पे उक्को० अच्चुए कप्पे, विपाहितसंजमासंजमाणं ज० भवणवासीसु उक्को० जोतिसिएसु, असन्नीणं जहन्नेणं भवणवासीसु उ० वाणमंतरेसु, तावसाणं ज० भवणवासीसु उक्को० जोइसिएसु, कंदप्पियाणं ज० भवणवासीसु उ० सोहम्मे कप्पे, चरगपरिव्वायगाणं ज० भवणवसीसु उ० बंभलोए कप्पे, किब्विसियाणं जह० सोहम्मे कप्पे उ० लंतए कप्पे, तिरिच्छियाणं जह० भवणवासीसु उ० सव्वारेकप्पे, आजीवियाणं ज० भवणवासीसु उ० अच्चुए कप्पे, एवं आभिओगाणवि, सलिंगीणं दंसणावावण्णगाणं ज० भवणवासीसु उ० उवरिमगेवेज्जएसु ।

वृ. 'अह भन्ते !' इत्यादि, अथेति परप्रश्ने 'असंजयभवियदव्वदेवाण'मिति असंयताः-चरणपरिणामशून्या भव्या-देवत्वयोग्यः अत एव द्रव्यदेवाः, समासश्चैवं-असंयताश्च ते भव्यद्रव्यदेवाश्चासंयतभव्यद्रव्यदेवास्तेषां, तत्रैके प्राहुः-एते किलसंयतसम्यग्दृष्ट्यो देवेषूपपादात्, उक्तं च किलैवमागमे-

॥ १ ॥ "अणुव्वयमहव्वएहिं य बालतवोकामनिज्जराए य ।
देवाऊ निबंधइ सम्मद्दिट्ठी य जो जीवो ।।"

तदयुक्तम्, यतोऽमीषामुत्कृष्टत उपरितनग्रैवेयकेषूपपातो वक्ष्यते, सम्यग्दृष्टीनां तु देशविरता- नामपि न तत्रोपपातोऽस्ति, देशविरतश्रावकाणामच्युतादूर्द्धमगमनात्, नाप्येते निह्नवास्तेषामिहैव भेदेनाधिधानात्, तस्मान्मिथ्यादृष्टय एवाभव्या भव्या वा श्रमणगुणधारिणो निखिलसामाचार्य- नुष्ठनयुक्ता द्रव्यलिङ्गधारिणऽसंयतभव्यद्रव्यदेवाः प्रतिपत्तव्याः, तेऽपीहाखिलकेवलक्रियाप्रभावत उपरितनग्रैवेयकेषूत्पद्यन्त एवेति, असंयताश्च सत्यप्यनुष्ठाने चारित्रपरिणामशून्यत्वात्,

'अविराहियसंजमाण'मिति प्रव्रज्याकालादारभ्याभग्नचारित्रपरिणामतां संज्वलनकषायसामर्थ्यात् प्रमत्तगुणस्थानकवशाद्वा स्वल्पमायादिदोषसम्भवेनापि अनाचरितसर्वथाचरणोपघातमामित्यर्थः, तथा 'विराहियसंजमाणं'ति विराधितः-सर्वात्मना खण्डितो न पुनः प्रायश्चित्तप्रतिपत्त्या भूयः सन्धितः संयमो यैस्ते विराधितसंयमास्तेषां 'अविराहियसंजमासंजमाणं'ति प्रतिपत्तिकालादारभ्याखण्डितदेशविरतिपरिणामानां श्रावकाणां 'विराहियसंजमासंजमाण'मिति विराधित सर्वात्मना खांण्डेतां न पुनः प्रायांश्चित्तप्रांतेज्ञया पुननंर्वीकृतः संयमासंयमो यैस्ते विराधितसंय- मासंयमास्तेषां,

असंज्ञिनां-मनोलब्धिरहितानामकामनिर्जरावतं तथा 'तावसाणं'ति परिशटितपत्राद्युपभोगवतां बालतपस्विनां, तथा 'कंदप्पियाणं'ति कन्दप्पः परिहासः स एभास्ति तेन वा ये चरन्ति ते कान्दर्पिकाः, कान्दर्पिका व्यवहारतश्चरणवन्त एव कन्दर्पकौकुच्यादिकारकाः, एकं च-

॥ १ ॥ "कंदप्पे कुक्कुइए दवसीले यावि हासणकरे य ।
विम्हावितो य परं कंदप्पं भावनं कुणइ ।।
॥ २ ॥ कहकहकहप्पा हसणं कंदप्पो अनिहुया य उल्लावा ।
कंदप्पकहाकहणं कंदप्पुवएस संसा य ।।
॥ ३ ॥ भुमनयनवयणदसणच्छदो करपायकण्णमाईहिं ।
तं तं करेइ जह जह हसइ परो अत्तणा अहसं ।।
॥ ४ ॥ वायाइ कुक्कुओ पुण तं जंपइ जेण इस्सए लोओ ।
नानाविहजीवरुते कुव्वइ मुहतूरए चेव ।।
॥ ५ ॥ भासइ दुयं २ गच्छए य दरिओ(य)गोव सो सरए ।
सव्वं दव्वं कुणडकारी फुट्टइ वट्टि(भरि)ओ य दप्पेणं ।।
॥ ६ ॥ वेसवयणेहिं हासं जनयंतो अप्पणो परेसिं च ।
अह हासणोत्ति भन्नइ घयणोव्व छले नियच्छंतो ।।
॥ ७ ॥ सुरजालमाइएहिं तु विम्हयं कुणइ तव्विहजणस्स ।
तेट्ठ न विम्हइ य सयं आहट्ठकहट्ठएसुं च ।।
॥ ८ ॥ जो संजओवि एयासु अप्पसत्थासु भावणं कुणइ ।
सो तव्विहेसु गच्छइ सुरेसु भइओ चरणहीणो ।।"

तेषां कान्दर्पिकाणां, 'चरगपरिव्वाययाणं'ति चरकपरिव्राजका-धाटिभैक्षोप-

जीविनस्त्रिदण्डिनः, अथवा चरकाः-कच्छोटकादयः परिव्राजकाः-कपिलमुनिसूनवः, चरकाश्च परिव्राजकाश्च तेषां, तथा 'किव्विसियाणं'ति किल्बिषं-पापं तदस्ति येषां ते किल्बिषिकास्ते च व्यवहारतश्चरणवन्त एव ज्ञानाद्यवर्णवादिनः, उक्तं च-

॥ १ ॥ "नाणस्स केवलीणं धम्मायरियस्स सव्वसाहूणं ।
माई अवण्णवाई किव्विसियं भावनं कुणइ ॥

॥ २ ॥ काया वया य ते च्चिय ते चेव पमाय अप्पमाया य ।
मोक्खाहिगारियाणं जोइसजोणीहिं किं कज्जं ? ॥

॥ ३ ॥ एगंतरमुप्पाए अन्नोन्नावरणया दुवेण्हंपि ।
केवलदंसणनाणाणमेगकाले व एगत्तं ॥

॥ ४ ॥ जञ्चाईहि अवण्णं विहसइ वट्टइ नयावि उववाए ।
अहिओ छिद्दप्पेही पगासवाई अननुकूलो ॥

॥ ५ ॥ अविसहणातुरियगई अनानुवत्ती य अवि गुरूणंपि ।
खणमेत्तपीइरोसा गिहवच्छलगा य संजइया ॥

॥ ६ ॥ गूढइ अत्तसरीरं थाएइ य गुणे परस्स संतेवि ।
चोरोव्व सव्वसंकी गूढायारो वितहभासी ॥"

तेषां, 'तिरिच्छियाणं'ति तिरश्चां-गवादीनां देशविरतिभाजां 'आजीवियाणं'ति आजीविकाः-पाखण्डविशेषाः गोशालमतानुसारिणः अथवाऽऽजीवन्ति ये अविवेकतो लब्धिपूजाख्यात्यादिभिश्चरणादीनि इत्याजीविकाः तेषां, तथा 'आभियोगिणं'ति अभियोजनं-विद्यामन्त्रादिभिः परेषां वशीकरणादि अभियोगः, स च द्विधा, यदाह-

॥ १ ॥ "दुविहो खलु अभिओगो दव्वे भावे य होइ नायव्वो ।
दव्वंमि होंति जोगा विज्जा मंता य भावम्मि ॥"

सोऽस्ति येषां तेन वा चरन्ति ये ते अभियोगिका आभियोगिका वा, तेच व्यवहारतश्चरणवन्त एव मन्त्रादिप्रयोक्तारः, उक्तं च-

॥ १ ॥ "कोउय भूईकम्मे पसिणापसिणे निमित्तमाजीवी ।
इड्ढिरससायगरुओ अभिओगं भावणं कुणइ ॥"

कौतुकं-सौभाग्याद्यर्थं स्नपनं भूतिकर्म-ज्वरितादिभूतिदानं प्रश्नाप्रश्नः-स्वप्नविद्यादि, 'सलिंगीण'मिति रजोहरणादिसाधुलिङ्गवतां, किंविधानामित्याह-'दंसणवावण्णगाणं'ति दर्शनं सम्यक्त्वं व्यापन्नं-भ्रष्टं येषां ते तथा तेषां, निह्नवानामित्यर्थः, 'देवलोगेसु उववज्जमाणाणं'ति अनेन देवत्वादन्यत्रापि यथाऽध्यवसायमुत्पादो भवतीति प्रतिपादितं,

'विराहियसंजमाणं जहन्नेणं भवणवासीसु उक्कोसेणं सोहम्मे' इति, अत्र कश्चिदाह-विराधितसंयमानामुत्कर्षेण सौधर्मे कल्पे इति यदुक्तं तत्कथं घटते ?, द्रौपद्याः सुकुमालिकाभवे विराधितसंयमायाः अपि ईशानकल्पे उत्पादश्रवणात्, नैष दोषः, तस्या हि संयमविराधना उत्तरगुणविषया बकुशत्वमात्रकारिणी न मूलगुणविराधना, सौधर्मोत्पादश्च प्रभूततरसंयमविराधनायां भवति, यदि पुनर्विराधनामात्रमपि सौधर्मोत्पत्तिकारणं स्यात् तदा बकुशादीनामुत्तरगुणा-

दिप्रतिसेवावतां कथमच्युतादिषूत्पत्तिरूपपद्यते ?, कथञ्चिद्विराधकत्वात्तेषामिति । असंज्ञी देवेषूत्पद्यते इत्युक्तं, स चायुषा इति तदायुर्निरूपयति–

मू. (५०८) *कतिविहे णं भंते ! असन्नियाउए पन्नत्ते ?, गो० ! चउव्विधे असन्निआउए पं०, तं०–नेरइयअसन्नियाउए जाव देवअसन्नियाउए ।*

असण्णी णं भंते ! जीवे किं नेरइयाउयं पकरेति जाव देवाउयं पकरेति ?, गो० ! नेरइयाउयं पकरेति जाव देवाउयं पकरेति, नेरइयाउं पकरेमाणे जह० दस वाससहस्साइं उ० पलिओवमस्स असंखेज्जभागं पकरेति, तिरिक्खजोणियाउयं पकरेति, तिरिक्खजोणियाउयं पकरेमाणे जह० अंतो० उक्को० पलितोवमस्स असंखेज्जइभागं पकरेति, एवं मणुस्साउयंपि, देवाउयं जहा नेरइयाउयं

एयस्स णं भंते ! नेरइयअसण्णिआउयस्स जाव देवअसण्णिआउयस्स कतरे २ हिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवे देवअसण्णियाउए मणूसअसण्णिआउए असंखेज्जगुणे तिरिक्खजोणियअसण्णिआउए असंखे० नेरइयअसण्णिआउए असंखे० ।

वृ. 'कइविहे ण'मित्यादि व्यक्तं नवरं 'असण्णिआउए'त्ति असंज्ञी सन् यत्परभवयोग्यमायुर्बध्नाति तदसंज्ञ्यायुः, 'नेरइयअसन्नियउए'इति नैरयिकप्रायोग्यमसंज्ञ्यायुर्नैरयिकासंज्ञ्यायुरेवमन्यान्यपि, इहासंज्ञ्यायुरसंज्ञ्यवलस्थानुभूयमानमभ्युच्यते, न चेदमत्र प्रकृतमतस्तत्कृतलक्षणसम्बन्धविशेषनिरूपणार्थमाह–

'असण्णी' इत्यादि, व्यक्तं नवरं 'पकरेइ' इति बध्नाति, 'दस वाससहस्साइं' इति रत्नप्रभाप्रमाणमधिकृत्य 'उक्कोसेणं पलिओवमस्स असंखेज्जइभागं' इति एतत् रत्नप्रभाचतुर्थप्रतरे मध्यमस्थितिकं नारकमधिकृत्य, प्रथमप्रस्तटे हि जघन्या स्थितिर्दश वर्षसहस्राणि उत्कृष्टा नवतिः सहस्राणि, द्वितीये दश लक्षाणि जघन्या उत्कृष्टा नवतिर्लक्षाणि, एषैव तृतीये जघन्या उत्कृष्टा पूर्वकोटी, एषैव ततुर्थे जघन्या उत्कृष्टा सागरोपमस्य दशभागः, ततोऽत्र पल्योपमासङ्ख्येयागो मध्यमा स्थितिर्भवति, तिर्यक्सूत्रे पल्योपमासङ्ख्येयभागो मिथुनकतिरश्चोऽधिकृत्य,

'एवं मणुयाउयंपि' इति जघन्येनान्तर्मुहूर्तमुत्कर्षतः पल्योपमासङ्ख्येयभागमित्यर्थः, अत्रापि पल्योपमासङ्ख्येयभागो मिथुनकनरानाश्रित्य प्रतिपत्तव्यः, 'देवाउयं जह नेरइयाउय'मिति देवासंज्ञ्यायुस्तथा वक्तव्यं यथा नैरयिकासंज्ञ्यायुर्जघन्यतो दश वर्षसहस्राणि उत्कर्षतः पल्योपमासङ्ख्येयभागप्रमाणं वक्तव्यमिति भावः

'एयस्स णं भंते !' इत्यादिना यदसंज्ञ्यायुषोऽल्पबहुत्वं तदस्य ह्रस्वदीर्घत्वे प्रतीत्य ॥

पदं – २० – समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे
विंशतितमपदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता ।

पदं – २१ – "शरीर"

वृ. व्याख्यातं विंशतितमं पदं, इदानीमेकविंशतितममारभ्यते–अस्य चायमभिसम्बन्धः, इहानन्तरपदे गतिपरिणामविशेषोऽन्तक्रियारूपपरिणाम उक्तः, इहापि गतिपरिणामविशेष एव शरीरस्य संस्थानादिरकादिगतिषूत्पन्नानां प्रतिपाद्यते, अत्र चेयमधिकारगाथा–

मू. (५०९) *विहिसंठाणपमाणे पोग्गलचिणणा सरीरसंजोगो ।*
दव्वपएसऽप्पबहुं सरीरोगाहणप्पबहुं ॥

वृ. 'विहिसंठाणपमाणे' इत्यादि प्रथमं विधयो-भेदाः-शरीराणां वक्तव्याः, तदनन्तरं संस्थानानि, ततः प्रमाणानि, तदनन्तरं कतिभ्यो दिग्भ्यः शरीराणां पुद्गलोपचयो भवतीत्येवं पुद्गलचयनं वक्तव्यं, ततः, कस्मिन् शरीरे सति किं शरीरमवश्यंभावीत्येवंरूपः परस्परसंयोगो वक्तव्यः, ततो द्रव्याणि च प्रदेशाश्च द्रव्यप्रदेशाः ते च द्रव्याणि च प्रदेशाश्च द्रव्यप्रदेशाः 'समानानामेकशेषः' इत्येकशेषस्तैरल्पबहुत्वं वक्तव्यं, किमुक्तं भवति ? -द्रव्यार्थतया प्रदेशार्थतया द्रव्यार्थप्रदेशार्थतया च पञ्चानामपि शरीराणामल्पबहुत्वमभिधातव्यमिति, ततः पञ्चानामपि शरीराणामवगाहनाविषयमल्पबहुत्वं वाच्यमिति गाथासङ्क्षेपार्थः ।

मू. (५१०) *कति णं भंते ! सरीरया पन्नता ? गो० ! पंच सरीरया पं०, तं०-ओरालिए १ वेउव्विए २ आहारए ३ तेयए ४ कम्मए ५,*

ओरालियसरीरे णं भंते ! कतिविधे पं० ? गो० ! पंचविधे पं० तं०-एगिंदिय-ओरालियसरीरे जाव पंचिंदियओरालियसरीरे,

एगिंदियओरालियसरीरे णं भंते ! कतिविधे पं०, ? गो० ! पंचविहे पं० तं०-पुढविकाइएगिंदियओरालियसरीरे जाव वणप्फइकाइयएगिंदिएओरालियसरीरे पुढविकाइएगिंदियओरालियसरीरे णं भंते ! कतिविहे पं० ?, गो० ! दुविहे पं०, तं०-सुहुमपुढविकाइएगिंदियओरालियसरीरे बादरपुढविकाइएगिंदियओरालियसरीरे य, सुहुमपुढविकाइएगिंदियओरालियसरीरे णं भंते ! कतिविधे पं० ?, गो० ! दु० पं०, तं०-पज्जत्तगसुहुमपुढविकाइएगिंदियओरालियसरीरे य अपज्जत्तगसुहुमपुढविकाइएगिंदियओरालियसरीरे य, बादरपुढविकाइयावि एवं चेव, एवं जाव वणस्सइकाइएगिंदियओरालियत्ति,

बेइंदियओरालियसरीरे य, एवं तेइंदिया चउरिंदियावि ।

पंचिंदियओरालियसरीरे णं भंते ! कतिविधे पं० ?, गो० ! दुविधे, पं०, तं०-तिरिक्खजोणियपंचिंदियओरा० मणुस्सपंचिंदियओरा०,

तिरिक्खजोणियपंचिंदियओरालियसरीरे णं भंते ! कतिविधे पं० ?, गो० ! तिविधे पं०, तं०-जलयरतिरिकअखजोणियपंचिं० ओरालिय० थलयरतिरिक्खजोणियपंचिंदियओरा० खहयरति० पंचिं० ओरा०,

जलयरतिरि० पं० ओरालियसरीरे णं भंते ! कतिविधे पं० ?, गो० ! दुविधे, पं०, तं०-संमुच्छिमजल० पं० तिरि० ओरालि० गब्भवक्कंतिजलयरपंचि० तिरि० ओरालसियसरीरे य, संमुच्छिमजल० तिरि० पंचिंदियओरालियसरीरे णं भंते ! कतिविधे पं० ?, गो० ! दुविहे पं०, तं०-पज्जत्तगसंमुच्छिमपंचिं० तिरि० ओरा० अपज्जत्तगसंमुच्छिम० पं० ति० ओरालि०, एवं गब्भवक्कंतिएवि,

*थलयरपंचिं० तिरिक्ख० ओरालियसरीरे णं भंते ! कतिविधे, पं० ?, गो० ! दुविहे पं०, तं०-चउप्पयथलयर० तिरि० पंचिं० ओरा० परिसप्पथल० तिरि० पं० ओ, चउप्पयथल० तिरि० पंचि० ओरालियसरीरे णं भंते ! कतिविधे पं०, ?, गो० ! दुविहे पं०, तं०-समु० थल०

चउप्पयतिरि० पं० ओरा० गब्भवक्कंतियचउप्पयथल० ति० पं० ओरा०, संमुच्छिमचउ० ओरालियसरीरे कइविहे पं० ?, गो० ! दुविहे पं०, तं०–पज्जत्तसंमु० चउ० थल० तिरि० पंचिं० ओरा० अपज्जत्तसंमुच्छिचउ० थल० तिरि० पंचिं० ओरा०, एवं गब्भवक्कंतिएवि,

परिसप्पथलयरतिरि० पंचिं० ओरा० भंते ! कतिविधे पं० ?, गो० ! दु० पं०, तं०–उरपरिसप्पथल० पं० तिरि० ओरा० भुयपरिसप्पथलपं० तिरि० ओरालियसरीरे य, उरपरिसप्पथल० पंचिं० तिरि० ओरालियसरीरे णं भंते ! कतिविधे पं० ?, गो० ! दु० पं०, तं०–संमुच्छिमउर० थल० पंचिं० तिरि० ओरा० गब्भवक्कंतियउर० थल० तिरि० पंचिं० ओरा०, संमुच्छिमे दुविहे पं०, तं०–अपज्जत्तसंमु० उर० थल० तिरि० पंचिं० ओरालियसरीरे य पज्जत्तसंमुच्छिमउरपरिसप्प-थलयरतिरि० पंचिं० ओरालि०, एवं गब्भवक्कंतियउरपरिसप्पे चउक्कतो भेओ, एवं भुयपरिसप्पावि संमुच्छिमगब्भवक्कंतियपज्जत्ता अपज्जत्ता य,

खहयरा दुविधा, पं०, तं०–संमुच्छिमा य गब्भवक्कंतिया य, संमुच्छिमा दुविधा पं० ?, पज्जत्ता अपज्जत्ता य, गब्भवक्कंतियावि पज्जत्ता अपज्जत्ता य।

मणूसपंचिंदियओरालियसरीरे णं भंते ! कतिविधे पं० ?, गो० ! दुविहे पं०, तं०–संमुच्छिममणूसपंचिं० ओरा० य गब्भवक्कंतियमणूसपंचिं० ओरालि०, गब्भवक्कंतियम० पंचिं० ओरालियसरीरे णं भंते ! कतिविधे पं० ?, गो० ! दु० पं०, तं०–पज्जत्तगब्भवक्कंतियमणूस-पंचिंदियओरा० अपज्जत्तगगब्भ० मणूसपंचिंदियओरा०।

वृ. तत्र 'यथोद्देशं निर्देश' इति प्रथमतो विधिद्वारमभिधित्सुरादौ शरीरमूलभेदान् प्रतिपादयति,–'कइ णं भंते !' इत्यादि, कति–किंपरिमाणानि णमिति वाक्यालङ्कारे भदन्त ! शीर्यन्ते प्रतिक्षणं विशरारुभावं बिभ्रतीति शरीराणि, शरीराण्येव शरीरकाणि, तथा स्वार्थे कप्रत्ययः, भगवानाह–गो०! पञ्च शरीराणि प्रज्ञप्तानि मया अन्यैश्च शैषैस्तीर्थकृद्भिः, तान्येव नामत आह

'ओरालिए' इत्यादि, उदारं प्रधानं, प्राधान्यं चास्य तीर्थकरगणधरशरीराण्यधिकृत्य, ततोऽन्यस्यानुत्तरशरीरस्याप्यनन्तगुणहीनत्वात्, यद्वा उदारं–सातिरेकयोजनसहस्रप्रमानत्वात् शेषसरीरापेक्षया बृहत्प्रमाणं, बृहत्ता चास्य वैक्रियं प्रति भवधारणीयसहजशरीरापेक्षया द्रष्टव्या, अन्यथा उत्तरवैक्रियं योजनलक्षमानमपि लक्ष्यते, उदारमेव औदारिकं विनयादिपाठादिकण्,

तथा विविधा विशिष्टा वा क्रिया विक्रिया तस्यां भवं वैक्रियं, तथाहि–तदेकं भूत्वा अनेकं भवति अनेकं भूत्वा एकं तथा अणु भूत्वा महद्भवति महच्च भूत्वा अणु तथा खचरं भूत्वा भूमिचरं भवति भूमिचरं भूत्वा खचरं तथा दृश्यं भूत्वा अदृश्यं भवति अदृश्यं भूत्वा दृश्यमित्यादि, तच्च द्विविधं–औपपातिकं लब्धिप्रत्ययं च, तत्रौपपातिकमुपपातजन्मनिर्मितं, तच्च देवनारकाणां, लब्धिप्रत्ययं तिरश्मनुष्याणां, तथा 'आहारए' इति आहारकं चतुर्दशपूर्वविदा तीर्थकरस्फाति-दर्शनादिक- तथाविधप्रयोजनोत्पत्तौ सत्यां विशिष्टलब्धिवशादाद्रियते–निर्वर्त्यते इत्याहारकं, 'कृद्बहुल' मिति वचनात् कर्मणि वुञ् यथा पादहारक इत्यत्र, उक्तं च–

॥ १ ॥ "कज्जंमि समुप्पन्ने सुयकेवलिणा विसिट्ठलद्धीए।
जं एत्थ आहरिज्जइ भणितं आहारगं तं तु ॥"

–कार्यं चेदम्–

॥ २ ॥ "[illegible]
संसयवोच्छेयत्थं गमणं जिनवायमूलंमि ॥"

तद्ध वैक्रियशरीरापेक्षया अत्यन्तशुभं स्वच्छस्फटिकशिलेव शुभ्रपुद्गलसमूहघटनात्मकं,

तेज इति–तैजसं तेजसः–तेजःपुद्गलानां विकारस्तैजसं 'विकार' इत्यण, तत् ऊष्मलिङ्गं भुक्ताहारपरिणमनकारणं, तद्धशाद्ध विशिष्टतपःसमुत्थलब्धिविशेषस्य पुंसस्तेजोलेश्याविनिर्गमः, उक्तं च–

॥ १ ॥ "सव्वस्स उम्हसिद्धं रसाइयआहारपाकजणगं च ।
तेयगलद्धिनिमित्तं च तेयगं होइ नायव्वं ॥"

'कम्मए' इति कर्मणो जातं कम्मंज, किमुक्तं भवति ?–कर्मपरमाणव एवात्मप्रदेशैः सह ये क्षीरनीरवत् अन्योऽन्यानुगताः सन्तः शरीररूपतया परिणतास्ते कर्मजं शरीरमिति, अत एवैतदन्यत्र कार्मणमित्युक्तं, कर्मणो विकारः कार्मणमिति, तथा चोक्तम्–

॥ १ ॥ "कम्मविगारो कम्मणमइविहविचित्तकम्मनिप्फन्नं ।
सव्वेसिं सरीराणं कारणभूतं मुणेयव्वं ॥"

अत्र 'सव्वेसि'मिति सर्वेषामौदारिकादीनां शरीराणां कारणभूतं–बीजभूतं कार्मणशरीरं, न खल्वामूलसमुच्छिन्ने भवप्रपञ्चप्ररोहबीजभूते कार्मणे वपुषि शेषशरीरप्रादुर्भावः इदं च कर्मजं शरीरं जन्तोर्गत्यन्तरसङ्क्रान्तौ साधकतमं करणं, तथाहि–कर्मजेनैव वपुषा तैजससहितेन परिकरितो जन्तुर्मरणादेशमपहायोत्पत्तिदेशमभिसर्पति, ननु यदि तैजससहितकार्मणवपुःपरिकरितो गत्यन्तरं सङ्क्रामति तर्हि स गच्छन्नागच्छन् वा कस्मान्न दृष्टिपथमवतरति ?, उच्यते, कर्मपुद्गलानां चातिसूक्ष्मतया चक्षुरादीन्द्रियागोचरत्वात्, तथा च परतीर्थिकैरप्युक्तम्

॥ १ ॥ "अन्तरा भवदेहोऽपि, सूक्ष्मत्वान्नोपलभ्यते ।
निष्क्रामन् प्रविशन् वापि, नाभोवोऽनीक्षणादपि ॥" इति ।

सम्प्रति औदारिकशरीरस्य जीवजातिभेदतोऽवस्थाभेदतश्च भेदानभिधित्सुराह–'ओरालियसरीरे णं भंते !' इत्यादि, औदारिकशरीरमेकद्वित्रिचतुःपञ्चेन्द्रियभेदात् पञ्चधा, एकेन्द्रियौदारिकशरीरमपि पृथिव्यप्तेजोवायुवनस्पतिएकेन्द्रियभेदात् पञ्चविधं, पृथिवीकायिकैकेन्द्रियौदारिकशरीरमपि सूक्ष्मेतरभेदाद् द्विधा, पुनरेकैकं द्विधा पर्याप्तापर्याप्तभेदात्, एवमप्तेजोवायुवनस्पत्येकेन्द्रियौदारिकशरीराण्यपि प्रत्येकं चतुर्विधानीति सर्वसङ्ख्यया एकेन्द्रियौदारिकशरीराणि विंशतिधा, द्वित्रिचतुरिन्द्रियौदारिकशरीराणि प्रत्येकं पर्याप्तापर्याप्तभेदात् द्विभेदानि,

पञ्चेन्द्रियौदारिकशरीरं द्विविधं–तिर्यग्मनुष्यभेदात्, तिर्यक्पञ्चेन्द्रियौदारिकशरीरं त्रिधा, जलचरस्थलचरखचरभेदात्, जलचरतिर्यक्पञ्चेन्द्रियौदारिकशरीरं द्विविधं–सम्मूर्च्छिमगर्भव्युत्क्रान्तिकभेदात्, एकैकमपि पुनर्द्विभेदं– पर्याप्तापर्याप्तभेदात्, स्थलचरतिर्यक्पञ्चेन्द्रियौदारिकशरीरमपि द्विधा–चतुष्पदपरिसर्पभेदात्, चतुष्पदस्थलचरतिर्यक्पञ्चेन्द्रियौदारिकशरीरमपि द्विधा–सम्मूर्च्छिमगर्भव्युत्क्रान्तिकभेदात्, पुनरेकैकं द्विधा–पर्याप्तापर्याप्तभेदात्, परिसर्पस्थलचरतिर्यग्योनिकपञ्चेन्द्रियौदारिकशरीरमपि उरःपरिसर्पभुजपरिसर्पभेदतो द्विभेदं, पुनरेकैकं द्विधा–सम्मूर्च्छिमगर्भव्युत्क्रान्तिकभेदात्, तत्रापि पुनः प्रत्येकं द्वैविध्यं पर्याप्तापर्याप्तभेदात्,

सर्वसङ्ख्यया ऽष्टभेदं परिसर्प्यस्थलचरतिर्यक्पञ्चेन्द्रियौदारिकशरीरं, खचरतिर्यक्पञ्चेन्द्रियौदारिकशरीरं सम्मूर्च्छिमगर्भव्युत्क्रान्तिकभेदात् द्विभेदं, पुनरेकैकं द्विधा–पर्याप्तापर्याप्तभेदादिति, सर्वसङ्ख्यया तिर्यक्पञ्चेन्द्रियौदारिकशरीरं विंशतिभेदं, मनुष्यपञ्चेन्द्रियौदारिकशरीरं सम्मूर्च्छिमगर्भव्युत्क्रान्तिकभेदात् द्विभेदं, पुनरेकैकं द्विधा–पर्याप्तापर्याप्तभेदाद् ।

एवमौदारिकस्य भेदा उक्ताः, सम्प्रत्येतेषामेव यथाक्रमं संस्थानान्याह–

मू. (५११) *ओरालियसरीरे णं भंते! किंसंठिते पन्नत्ते ?, गो० ! नानासंठाणसंठिते पं०, एगिंदियओरा० किंसंठिते पं० ?, गो० ! नानासंठाणसंठिते पं०, पुढविकाइयएगिंदिओरा० किंसंठिते पं० ?, गो० ! मसूरचंदसंठाणसंठिते पं०, एवं सुहुमपुढविकाइयाणवि बादराणवि, एवं चेव पज्जत्तापज्जत्ताणवि, [एवं चेव] -*

आउक्काइएगिंदियओरा० भंते! किंसंठिते पं० ?, गो० ! थिबुकबिंदुसंठाणसंठिते पं०, एवं सुहुमबादरपज्जत्तापज्जत्ताणवि, तेउक्काइयएगिं० उरा० भंते ! किंसंठिते पं० ?, गो० ! सूईकलावसंठाणसंठिते पं०, एवं सुहुमबादरपज्जत्तापज्जत्ताणवि, वाउक्काइयाणवि पडागासंठाणसंठिते, एवं सुहुमबादरपज्जत्तापज्जत्ताणवि, वणप्फइकाइयाणं नानासंठाणसंठिते पं०, एवं सुहुमबादरपज्जत्तापज्जत्ताणवि । बेइंदियओरा० भंते ! किंसं० पं० ?, गो० ! हुंडसंठाणसंठिते पं०, एवं पज्जत्तापज्जत्ताणवि, एवं तेइंदियचउरिंदियाणवि ।

पंचिंदियतिरिक्खजोणियपंचिं० ओरा० भंते! किंसंठा० पं० ?, गो० ! छव्विहसंठाणसं० पं०, तं०–समचउरंससंठाणसं० जाव हुंडसंठाणसंठितेवि, एवं पज्जत्तापज्जत्ताणवि ३, संमुच्छिमतिरिक्खजो० पंचिं० ओरा० भंते! किं सं० पं० ?, गो० ! हुंडसंठाणसंठिते पं०, एवं पज्जत्तापज्जत्ताणवि, गब्भवक्कं० तिरिक्ख० पंचिंदिय० ओरा० भंते ! किंसंठा० पं० ?, गो० ! छव्विहसंठाणसं० पं० तं०–समचउरंसे जाव हुंडसंठा०, एवं पज्जत्तापज्जत्ताणवि ३,

एवमेते तिरिक्खजोणियाणं ओहियाणं नव आलावगा जलयरपं० तिरि० ओरा० भंते! किंसंठाणसंठिते पं० ?, गो० ! छव्विहसंठाणसं० पं० तं०–समचउरंसे जाव हुंडे, एवं पज्जत्तापज्जत्ताणवि, संमुच्छिमजलयरा हुंडसंठाणसंठिता, एतेसिं चेव पज्जत्तावि अपज्जत्तगावि एवं चेव, गब्भवक्कंतियजलयरा छव्विहसंठाणसंठिता, एवं पज्जत्तापज्जत्ताणवि, एवं थलयराणवि नव सुत्ताणि एवं चउप्पयथलयराणवि उरपरिसप्पथलयराणवि भुयपरिसप्पथलयराणवि, एवं खहयराणवि नव सुत्ताणि, नवरं सव्वत्थ संमुच्छिमा हुंड संठाणसंठिता भाणितव्वा, इयरे छसुवि ।

मणूसपंचिंदियओरालियसरीरे णं भंते! किंसंठाणसंठिते पं० ?, गो० ! छव्विहसंठाणसंठिते प०, तं०–समचउरंसे जाव हुंडे, पज्जत्तापज्जत्ताणवि एवं चेव, गब्भवक्कंतियाणवि एवं चेव, पज्जत्तापज्जत्ताणवि एवं चेव, संमुच्छिमाणं पुच्छा, गो० ! हुंडसंठाणसंठिता पन्नत्ता ।

वृ. 'ओरालियसरीरे णं भंते !' इत्यादि, नानासंस्थानसंस्थितं जीवजातिभेदतः संस्थानभेदभावात्, एकेन्द्रियौदारिकशरीरे नानासंस्थानसंस्थितता पृथिव्यादिषु प्रत्येकं संस्थानभेदात्, तत्र पृथिवीकायिकानां सूक्ष्माणां बादराणां पर्याप्तानामपर्याप्तानां चौदारिकशरीराणि मसूरचन्द्रसंस्थानसंस्थितानि, मसूरो–धान्यविशेषः तस्य चन्द्रः–चन्द्राकारमर्द्धदलं तस्येव यत्संस्थानं तेन संस्थितानि,

अप्कायिकानां सूक्ष्मादिभेदतः चतुर्भेदानामौदारिकशरीराणि स्तिबुकबिन्दुसंस्थानसंस्थितानि, स्तिबुकाकारो योबिन्दुर्नपुनरितस्ततो वातादिना विक्षिप्तः स्तिबुकबिन्दुस्तस्येव यत्संस्थानं तेन संस्थितानि, तैजसकायिकानां सूक्ष्मादिभेदतश्चतुर्भेदानामौदारिकशरीराणि सूचीकलापसंस्थानसंस्थितानि,

वायुकायिकानां सूक्ष्मादिभेदतश्चतुर्भेदानामौदारिकशरीराणि पताकासंस्थानसंस्थितानि,

वनस्पतिकायिकानां सूक्ष्माणां बादराणां पर्याप्तानामपर्याप्तानां च प्रत्येकमौदारिकशरीराणि नानासंस्थानसंस्थितानि, देशकाजलातिभेदतः तेषां संस्थानानामनेकभेदभिन्नत्वात्,

द्वित्रिचतुरिन्द्रियाणां प्रत्येकं पर्याप्तानामपर्याप्तानामौदारिकशरीराणि हुंडसंस्थानसंस्थितानि,

तिर्यक्पञ्चेन्द्रियौदारिकशरीरं सामान्यतः षड्विधसंस्थानसंस्थितं, तदेवोपदर्शयति-'समचउरंससंठाणसंठिए' इत्यादि, यावत्करणात् 'नग्गोहपरिमंडलसंठाणसंठिए साइसं० वामणसं० खुज्जसंठाणसंठिए हुंडसंठाणसंठिए' इति परिग्रहः, तत्र समाः-सामुद्रिकशास्त्रोक्तप्रमाणलक्षणाविसंवादिन्यश्चतस्रोऽस्त्रयः-चतुर्दिग्विभागोपलक्षिताः शरीरावयवा यस्य तत्समचतुरस्रं, समासान्तोऽत्रयः, समचतुरस्रं च तत्संस्थानं च समचतुरस्रसंस्थानं तेन संस्थितं समचतुरस्रसंस्थानसंस्थितं, तथा न्यग्रोधवत्परिमण्डलं यस्य तत् न्यग्रोधपरिमण्डलं, यथा न्यग्रोध उपरि सम्पूर्णप्रमाणोऽधस्तु हीनः तथा यत्संस्थानं नाभेरुपरि सम्पूर्णप्रमाणं अधस्तु न तता तत् न्यग्रोधपरिमण्डलं, तथा आदिरिहोत्सेधाख्यो नाभेरधस्तनो देहभागो गृह्यते, ततः सह आदिना-नाभेरधस्तनभागेन यथोक्तप्रमाणलक्षणेन वर्त्तते इति सादि, यद्यपि सर्वं शरीरमादिना सह वर्त्तते तथापि सादित्वविशेषणान्यथानुपपत्त्या विशिष्ट एव प्रमाणलक्षणोपपन्न आदिरिह लभ्यते, तत उक्तं यथोक्तप्रमाणलक्षणेनेति,

इदमुक्तं भवति-यत्संस्थानं नाभेरधः प्रमाणोपपन्नमुपरि च हीनं तत्सादीति, अपरे तु साचीति पठन्ति, तत्र साचीं प्रवचनवेदिनः शाल्मलीतरुमाचक्षते, ततः साचीव यत्संस्थानं तत्साचिसंस्थानं, यथा शाल्मलीतरोः स्कन्धः काण्डमतिपुष्टमुपरितना तदनुरूपा न महाविशालता तद्वदस्यापि संस्थानस्याधोभागः परिपूर्णो भवति उपरितनभागस्तु नेति, तथा यत्र शिरोग्रीवं हस्तपादादिकं च यथोक्तप्रमाणलक्षणोपेतं उरउदरादि च मडभं तत्कुब्जसंस्थानं, यत्र पुनरुरउदरादि प्रमाणलक्षणोपेतं हस्तपादादकं हीनं तद्वामनसंस्थानं, यत्र तु सर्वेऽप्यवयवाः प्रमाणलक्षणपरिभ्रष्टास्तद् हुण्डसंस्थान्, समासः सर्वत्रापि पूर्ववत्,

एवं 'पज्जत्तापज्जत्ताणवि' इति, एवं-उक्तप्रकारेण सामान्यतस्तिर्यक्पञ्चेन्द्रियाणामिव पर्याप्तानां अपर्याप्तानां च प्रत्येकं सूत्रं वक्तव्यं, तदेवमेतानि त्रीणि सूत्राणि, एवमेव च सामान्यतः सम्मूर्च्छिमतिर्यक्पञ्चेन्द्रियाणामपि त्रीणि सूत्राणि वक्तव्यानि, नवरं तेषु त्रिष्वपि सूत्रेषु हुण्डसंस्थानसंस्थितमिति वक्तव्यं, सम्मूर्च्छिमानामविशेषेण सर्वेषामपि हुण्डसंस्थानभावात्,

त्रीणि सामान्यतो गर्भजतिर्यक्पञ्चेन्द्रियाणामपि, नवरं तेषु त्रिष्वपि सूत्रेषु 'छव्विहसंठाणसंठिए पन्नत्ते' इत्यादि वक्तव्यं, गर्भजेषु समचतुरस्रादिसंस्थानानामपि सम्भवात्, तदेवमेते सामान्यतस्तिर्यक्पञ्चेन्द्रियविषया नव आलापकाः, अनेनैव क्रमेणैव जलचरतिर्यक्पञ्चेन्द्रियाणां सामान्यतः स्थलचराणां चतुष्पदस्थलचराणामुरःपरिसर्प्पस्थलचराणां भुजपरिसर्प्पस्थलचराणां खचरति-

र्यक्पञ्चेन्द्रियाणां च प्रत्येकं नव २ सूत्राणि वक्तव्यानि, सर्वसङ्ख्या तिर्यक्पञ्चेन्द्रियाणां त्रिषष्टिः सूत्राणि मनुष्याणां नव सर्वत्र सम्मूर्च्छिमेषु हुण्डसंस्थानं च वक्तव्यमितरत्र षडपि संस्थानानि

तदेवमुक्तान्यौदारिकभेदानां संस्थानानि, साम्प्रतमवगाहनामानमाह-

मू. (५१२) *ओरालियसरीरस्स णं भंते! केमहालिया सरीरोगाहणा पं० ?, गो० ! जहन्नेणं अंगुलस्स असंखेज्जतिभागं उक्को० सातिरेगं जोयणसहस्सं, एगिंदियओरालियस्सवि एवं चेव जहा ओहियस्स, पुढविकाइएगिंदियओरालियसरीरस्स णं भंते! केमहालिया सरीरोगाहणा पं० ?, गो० ज० उ० अंगुलस्स असंखेज्जतिभागं, एवं अपज्जत्तयाणवि पज्जत्तयाणवि, एवं सुहुमाणं पज्जत्तापज्जत्ताणं, बादराणं पज्जत्तापज्जत्ताणवि, एवं एसो नवओ भेदो जहा पुढविकाइयाणं तहा आउक्काइयाणवि तेउक्काइयाणंवि वाउक्काइयाणंवि,*

वणस्सइकाइयओरालियसरीरस्स णं भंते ! केमहालिया सरीरोगाहणा पं० ?, गो० ! ज० अंगुलस्स असंखेज्जतिभागं उक्को० सातिरेगं जोअणसहस्सं, अपज्जत्तगाणं जह० उक्को० अंगुलस्स असंखेज्जतिभागं, पज्जत्तगाणं जह० अंगुलस्स असं० उक्को० सातिरेगं जोयणसहस्सं, बादराणं जह० अंगुलस्स असं० उक्को० जोअणसहस्सं सातिरेगं, पज्जत्ताणवि एवं चेव, अपज्जत्ताणं जह० उक्को० अंगुलस्स असं०, सुहुमाणं पज्जत्तापज्जत्ताण य तिण्हवि जह० उक्को० अंगुलस्स असं० ।

बेइंदियओरा० भंते ! केमहालिया सरीरोगाहणा पं० ?, गो० ! जह० अंगुलस्स असं० उक्को० बारस जोअणाइं, एवं सव्वत्थवि अपज्जत्तयाणं अंगुलस्स असंखे० जहन्नेणवि उक्कोसेणवि, पज्जत्तगाणं जहेव ओरालियस्स ओहियस्स, एवं तेइंदियाणं तिन्नि गाउयाइं, चउरिंदियाणं चत्तारि गाउ० पंचिंदियतिरिक्खजोणियाणं उक्कोसेणं जोयणसहस्सं ३, एवं संमुच्छिमाणं ३, गब्भवक्कंतियाणवि ३ एवं चेव नवओ भेदो भाणियव्वो, एवं जलयराणवि जोयणसहस्सं, नवओ भेदो, थलयराणवि नव भेदा ९, उक्को० छ गाउयाइं पज्जत्तगाणवि, एवं चेव संमुच्छिमाणं पज्जत्तगाण य उक्को० गाउयपुहुत्तं ३, गब्भवक्कंतियाणं उक्को० छ गाउयाइं पज्जत्ताण य २ ओहियवउप्पयपज्जत्तगब्भवक्कंतियपज्जत्तयाणवि उक्को० छ गाउयाइं, संमुच्छिमाणं पज्जत्ताण य गाउयपुहुत्तं उक्को०,

एवं उरपरिसप्पाणवि ओहियगब्भवक्कंतियपज्जत्तगाणं जोयणसहस्सं, संमुच्छिमाणं पज्जत्ताण य जोयणपुहुत्तं, भुयपरिसप्पाणं ओहियगब्भवक्कंतियाणवि उक्को० गाउयपुहुत्तं, संमुच्छिमाणं धनुपुहुत्तं, खहयराणं ओहियगब्भवक्कंतियाणं संमुच्छिमाण य तिण्हवि उक्कोसेणं धनुपुहुत्तं,

इमाओ संगहणिगाओ-

वृ. 'ओरालियस्स णं भंते!' इत्यादि, औदारिकस्य जघन्यतोऽवगाहना अङ्गुलासङ्ख्येयभागः, सा चोत्पत्तिप्रथमसमयेपृथिवीकायिकादीनां द्रष्टव्या, उत्कर्षतः सातिरेकं योजनसहस्रं, एषा लवणसमुद्रगोतीर्थादिषु पद्मनालाद्यधिकृत्यावसातव्या, अन्यत्रैतावत औदारिकशरीरस्यासम्भवात्, एवमेकेन्द्रियसूत्रेऽपि, तथा चाह-

'एगिंदियओरालियस्स एवं चेव जहा ओहियस्स' इति पृथिव्यप्तेजोवायूनां सूक्ष्माणां बादराणां प्रत्येकं पर्याप्तानामपर्याप्तानां चौदारिकशरीरस्य जघन्यत उत्कर्षतश्चावगाहना अङ्गुलासङ्ख्येयभागः प्रत्येकं च नव सूत्राणि, तेषां औधिकसूत्रमौधिकापर्याप्तसूत्रमौधिकपर्याप्तसूत्रं तथा सूक्ष्मसूत्रं सूक्ष्मपर्याप्तसूत्रं सूक्ष्मापर्याप्तकसूत्रं एव बादरेऽपि सूत्रत्रिकमिति, एवं वनस्पतिकायिकानामपि

नव सूत्राणि, नवरमौधिकवनस्पतिसूत्रे औधिकवनस्पतिपर्याप्तकसूत्रे बादरसूत्रे बादरपर्याप्तकसूत्रे च जघन्यतोऽङ्गुलासङ्ख्येयभाग उत्कर्षतः सातिरेकं योजनसहस्रम्, तच्च पद्मनालाद्यधिकृत्य वेदितव्यं, शेषेषु तुपञ्चसूत्रेषु जघन्यत उत्कर्षतो वाऽङ्गुलासङ्ख्येयभागः,

द्वित्रिचतुरिन्द्रियाणां प्रत्येकं त्रीणि २ सूत्राणि, तद्यथा–औधिकसूत्रमपर्याप्तसूत्रं पर्याप्तसूत्रं च, तत्रौधिकसूत्रे पर्याप्तसूत्रे च द्वीन्द्रियाणामुत्कर्षतो द्वादश योजनानि,

त्रीन्द्रियाणांत्रीणि गव्यूतानि,

चतुरिन्द्रियाणां चत्वारि गव्यूतानि, अपर्याप्तसूत्रे तु सर्वत्र जघन्यत उत्कर्षतश्चाङ्गुलासङ्ख्येय भागः,

तथा सामान्यतस्तिर्यक्पञ्चेन्द्रियाणां जलचराणां सामान्यतः स्थलचराणां चतुष्पदानामुरःपरिसर्प्पाणां भुजपरिसर्प्पाणां खचरपञ्चेन्द्रियतिरश्चां च प्रत्येकं नव २ सूत्राणि, तद्यथा–त्रीणि औधिकानि त्रीणि संमूर्च्छिमविषयाणि त्रीणि गर्भव्युत्क्रान्तिकविषयाणि, तत्रापर्याप्तेषु स्थानेषु सर्वेष्वपि जघन्यत उत्कर्षतो वा अङ्गुलासङ्ख्येयभागः, शेषेषु तु स्थानेषु जघन्यतोऽङ्गुलासङ्ख्येयभाग उत्कर्षतः सामान्यतस्तिर्यक्पञ्चेन्द्रिययेषु जलचरेषु चोत्कर्षतो योजनसहस्रं, सामान्यतः स्थलचरेषु चतुष्पदस्थलचरेषु चौधिकेषु गर्भव्युत्क्रान्तिकेषु च षट् गव्यूतानि, सम्मूर्च्छिमेषु गव्यूतपृथकत्वं, उरः परिसर्प्पेष्वौधिकेषु गर्भव्युत्क्रान्तिकेषु च योजनसहस्रं सम्मूर्च्छिमेषु योजनपृथकत्वं, भुजपरिसर्प्पेष्वौधिकेषु गर्भव्युत्क्रान्तेषु च गव्यूतपृथकत्वं, सम्मूर्च्छिमेषु धनुःपृथकत्वं, खचरेष्वौधिकेषु गर्भव्युत्क्रान्तिकेषु सम्मूर्च्छिमेषु च सर्वेषु स्थानेषु धनुःपृथकत्वं ।

मू. (५१३) *जोयणसहस्स छग्गाउयाइं तत्तो य जोअणसहस्सं ।*
गाउयपुहुत्तं भुयए धनुहपुहुत्तं च पक्खीसु ॥

मू. (५१४) *जोयणसहस्स गाउयपुहुत्तं ततो य जोअणपुहुत्तं ।*
दोण्हं तु धनुपुहुत्तं समुच्छिमे होति उच्चत्तं ॥

वृ. अत्रेमे सङ्ग्रहगाथे–''जोअणसहस्स'' मित्यादि, गर्भव्युत्क्रान्तिकानां जलचराणामुत्कर्षतः शरीरावगाहनाया मानं योजनसहस्रं, चतुष्पदस्थलचराणां षड् गव्यूतानि, उरःपरिसर्प्पस्थलचराणां योजनसहस्रं, भुजपरिसर्प्पस्थलचराणां गव्यूतपृथकत्वं, पक्षिणां धनुःपृथकत्वं, तथा सम्मूर्च्छिमानां जलचराणामुत्कर्षतः शरीरावगाहनायाः प्रमाणं योजनसहस्रं, चतुष्पदस्थलचराणां गव्यूतपृथकत्वं, उरःपरिसर्प्पस्थलचराणां योजनपृथकत्वं, भुजपरिसर्प्पस्थलचराणां पक्षिणां च धनुःपृथकत्वमिति

मू. (५१५) *मणूसोरालियसरीरस्स णं भंते ! केमहालिया सरीरोगाहणा पं० ? गो० ! जह० अंगु० उक्को० तिन्नि गाउयाइं, एवं अपज्जत्ताणं जह० उक्को० अंगुलस्स असं०, संमुच्छिमाणं जह० उक्को० अंगुलस्स असं०, गब्भवक्कंतियाणं पज्जत्ताण य जह० अंगुलस्स असं० उक्को० तिन्नि गाउयाइं ।*

वृ. उक्तं तिर्यक्पञ्चेन्द्रिययौदारिकशरीरावगाहनामानमिदानीं मनुष्यपञ्चेन्द्रियौदारिकशरीरावगाहनामानमाह–'मणुस्सोरालियसरीरस्स ण' मित्यादि, कण्ठ्यं, नवरं त्रीणि गव्यूतानि देवकुर्वाद्यपेक्षया, तदेवमौदारिकशरीरस्य विषयः संस्थानानि प्रमाणानि चोक्तानि, सम्प्रति तानि क्रमेण वैक्रियस्याभिधित्सुराह–

मू. (५१६) *वेउव्वियसरीरे णं भंते ! कतिविधे पं० ?, गो० ! दुविधे पं०, तं०–एगिंदियवेउव्वियसरीरे य पंचिंदियवेउव्वियस०,*

जति एगिंदियवेउव्वियसरीरे किं वाउक्काइएगिंदियवेउव्वियसरीरे अवाउक्काइयएगिंदियवेउव्वियसरीरे ?, गो० ! वाउक्काइयएगिंदियवेउव्वियसरीरे नो अवाउक्काइयएगिंदियवेउव्वियसरीरे, जइ वाउकाइयवेउव्वियसरीरे किं सुहुमवाउक्काइयवेउव्वियसरीरे बायरवाउक्काइयवेउव्वियसरीरे ?, गो० ! नो सुहुमवाउक्काइयएगिंदियवेउव्वियसरीरे बादरवाउकाइयएगिंदियवेउव्वियस०, जइ बादरवाउक्काइयएगिंदियवेउव्वियसरीरे किं पज्जत्तबादरवाउक्काइयएगिंदियवेउव्वियसरीरे अपज्जत्तबादरवाउक्काइयएगिंदियवेउव्वियरसरीरे ?, गो० ! पज्जत्तबादरवाउक्काइयएगिंदियवेउव्वियसरीरे नो अपज्जत्तबादरवाउक्काइयएगिंदियवेउव्वियसरीरे,

जति पंचेंदियवेउव्वियसरीरे किं नेरइयपंचिंदियवेउव्वियसरीरे जाव किं देवपंचिंदियवेउव्वियसरीरे ?, गो० ! नेरइयपंचिंदियवेउव्वियसरीरेवि जाव देवपंचिंदियवेउव्वियसरीरेवि, जइ नेरइयपंचिंदियवेउव्वियसरीरे किं रयणप्पभापुढविनेरइयपंचिंदियवेउव्वि० जाव किं अधेसत्तमापुढविनेरइयपं० वेउव्वियसरीरे ?, गो० ! रयणप्पभापुढविनेरइयपंचिंदियवेउव्वियसरीरेवि जाव अधेसत्तमापुढविनेरइयपंचिं० वेउव्वियसरीरेऽवि,

–जइ रयणप्पभापुढविनेरइयविउव्वियसरीरे किं पज्जत्तगरय० नेरइयवेउ० स० अपज्जत्तगरय णप्पभापु० नेरइ० पं० वे० सरीरे ?, गो० ! पज्जत्तगरयणप्पभापु० नेर० पं० अपज्जत्तगरयणप्पभापु० नेर० पं०, एवं जाव अधेसत्तमाए दुगतो भेदो भाणितव्वो,

जइ तिरिक्खजोणियपंचिंदियवेउव्वियसरीरे किं संमुच्छिमपं० तिरि० वेउ० सं० गब्भवक्कंतियपंचिं० ति० वे० स० ?, गो० ! नो संमुच्छिमपं० ति० वे० सरीरे गब्भवक्कंतियपं० ति० वेउव्वियसरीरे, जति गब्भवक्कंतियपं० ति० वेउव्वियसरीरे, जति गब्भवक्कं० पंचि० ति० वेउव्वियसरीरे किं संखेज्जवासाउयगब्भवक्कंतियपंचि० वे० सरी० असंखिज्जवासाउयग० पं० ति० वे० सरीरे ?, गो० ! संखेज्जावासाउयगब्भ० पं० ति० वे० स० नो असं० गब्भ० पंचिं० तिरि० वेउ० सं०, जइ संखिज्ज० गब्भ० पंचिं० ति० वेउ० सरीरे किं पज्जत्तगसं० गब्भ० पं० ति० वे० सरीरे अपज्जत्तगसं० ग० पं० ति० वे० सरीरे ?, गो० ! पज्ज० सं० ग० पं० ति० वे० सरीरे नो अप० सं० गब्भ० पं० ति० वे० सरीरे,

–जइ संखेज्जवासा० किं जलयरगब्भ० पं० ति० वे० सरीरे थलयरसं० ग० पं० ति० वे० सरीरे खहयरसं० ग० पं० ति० वे० सरीरे ?, गो० ! जल० सं० ग० पं० ति० वे० सरीरेवि थल- यरसं० गं० पं० ति० वे० सरीरेवि खहयरसं० गब्भ० पं० ति० वे० सरीरेवि, जइ जल० सं० किं पज्जत्तगजल० सं० गं० पं० ति० वे० सरीरे अपज्जत्तगजल० सं० ग० पं० ति० वेउ० सरीरे य ?, गो० ! पज्ज० जल० सं० गब्भ० पं० तिरि० वे० स० नो अपज्ज० सं० जलग० पं० ति० वे० स०,

–जति थलयरपंचिं० जाव सरीरे किं चउप्पय जाव सरीरे किं परिसप्प जाव० ?, गो० ! चउप्पयजावसं० परिसप्पजाव सं०, एवं सव्वेसिं णेयव्वं जाव खहयराणं पज्जत्ताणं नो अपज्जत्ताणं, जति मणूसपंचिं० तेउ० सरीरे किं संमुच्छिममणूस० पं० वे० सरीरे गब्भ० म० पं० वेउव्वियसरीरे

गो० ! नो संमु० म० पं० वेउ० सरीरे गब्भ० म० पंचिं० वे० सरीरे,

जइ गब्भ० म० पं० वे० स० किं कम्मभूमग० गं० म० पं० वे० स० अकम्मभूमग० ग० म० पं० वे० स० अंतरदीवग० ग० म० पं० वे० सरीरे ?, गो० ! कम्मभूमगगब्भ० म० पं० वे० स० नो अकम्मभूमग० नो अंतरदीवग०, जइ कम्मभूमगगब्भ० मणूस० पंचिं० वे० सरीरे किं संखेज्जवासाउयकम्म० ग० म० वे० स० असं० कम्म० ग० म० पं० वे० स० ?, गो० ! संखे० कम्म० ग० म० पं० वे० स० नो असं० कम्म० ग० म० पं० वे० सरीरे, जति संखे० कम्म० ग० म० पं० वे० सरीरे किं पज्जत्तयसंखे० क० म० पं० वे० स० अपज्जत्तग० सं० क० ग० म० पं० वे० सरीरे ?, गो० ! पज्ज० सं० क० ग० म० पं० वे० सरीरे नो अपज्ज० सं० क० ग० म० पं० वे० सरीरे ।

–जइ देव पंचिंदियवेउव्वियसरीरे किं भवणवासिदेव० पं० वे० सरीरे जाव वेमाणियदेव० वे० स० ?, गो० ! भवणवासीदेव० पं० वे० सरीरेवि जाव वेमाणियदेव० पंचि० वेउ० सरीरेवि, जइ भवणवासिदेव० पं० वे० सरीरे किं असुरकुमारभव० देव० पं० वे० सं० जाव थणियकुमारभव० देव० पं० वे० सरीरे ?, गो० ! असुरकु० जाव थणियकुमार० वेउ० सरीरेवि,

–जइ असुरकुमारदेव० पं० वे० स० किं पज्जत्तगअसुर० भ० देव० पं० वे० सरीरे अपज्जत्तग० असुरकुमारभ० देव० पं० वे० स० ? गो० ! पज्ज० असुर० भ० देव० पं० वे० सरीरेवि अपज्ज- त्तगअसु० भ० देव० पं० वे० सरीरेवि, एवं जाव थणियकुमाराणं दुगतो भेदो, एवं वाणमंतराणं अट्ठविहाणं जोतिसियाणं पंचविहाणं,

वेमाणिया दुविहा–कप्पोवगा कप्पातीता य, कप्पोवगा बारसविहा, तेसिंपि एवं चेव दुहतो भेदो, कप्पातीता दुविहा गेवेज्जगा य अनुत्तरोववाइया य, गेवेज्जगा नवविहा अनुत्तरोववाइया पंचविहा, एतेसिं पज्जत्तापज्जत्ताभिलावेणं दुगतो भेदो भाणि० ।

वृ. 'वेउव्वियसरीरे णं भंते !' इत्यादि, वैक्रियशरीरं मूलतो द्विभेदं—एकेन्द्रियपञ्चेन्द्रियभेदात्, तत्रैकेन्द्रियस्य वातकायस्य तत्रापि बादरस्य तत्रापि पर्याप्तस्य, शेषस्य वैक्रियलब्ध्यसम्भवात्, उक्तं च–"तिण्हं ताव रासीणं वेउव्वियलद्धी चेव नत्थि, बायरपज्जत्ताणंपि संखेज्जइभागमेत्ताणं' अत्र 'तिण्हं'ति त्रयाणां पर्याप्तापर्याप्तसूक्ष्मापर्याप्तबादररूपाणां ।

पञ्चेन्द्रियचिन्तायामपि जलचरचतुष्पदोरःपरिसर्पभुजपरिसर्पखचरान् मनुष्यांश्च गर्भव्युत्क्रान्तिकान् सङ्ख्येयवर्षायुषो भुक्त्वा शेषाणां प्रतिषेधो, भवस्वभावतया तेषां वैक्रियलब्ध्यसम्भवात् । उक्ता भेदाः, संस्थानान्यविधित्सुराह–

मू. (५१७) वेउव्वियसरीरे णं भंते ! किंसंठिते प० ?, गो० ! नानासंठाणसंठिते पं०, वाउकाइयएगिंदियवेउ० सरीरे णं भंते ! किंसंठिते पं० ?, गो० ! पडागासंठाणसंठिते पं०,

नेरइयपंचिंदियवेउव्वियसरीरे णं भंते ! किंसंठाणसंठिते पं० ?, गो० ! नेरइयपंचिंदियवेउव्वियसरीरे दुविधे पं०, तं०–भवधारणिज्जे य उत्तरवेउव्विए य, तत्थ णं जे से भवधारणिज्जे से णं हुंडसंठाणसंठिते पं०, तत्थ णं जे से उत्तरवेउव्विते सेवि हुंडसंठाणसंठिते पं०,

रयणप्पभापुढविनेरइयपंचिं० वेउ० सरीरे णं भंते ! किंसंठाणसंठिते पं० ?, गो० ! रयणप्पभापुढविनेरइयाणं दुविधे सरीरे पं०, तं०–भवधारणिज्जे य उत्तरवेउव्विए य, तत्थ णं जे

से भवधारणिज्जे से णं हुं०, जे से उत्तरवेउव्विते सेवि हुंडे, एवं जाव अधेसत्तमापुढविनेरइय-वेउव्वियसरीरे।

तिरिक्खजोणियपं० वे० सरीरे णं भंते! किंसंठाणसंठिते पं० ?, गो० ! नानसंठाणसंठिते पं०, एवं जलयरथलयरखहयराणवि, थलयराणवि चउप्पयपरिसप्पाणवि परिसप्पाणवि उरपरिसप्पभुयपरिसप्पाणवि। एवं मणूसपंचिंदियवे० सरीरेवि।

असुरकुमारभवणवासी देव० पंचि० वे० सरीरे णं भंते! किंसंठिते पं० ?, गो! असुर-कुमाराणं देवाणं दुविहे सरीरे पं०, तं०–भवधारणिज्जे य उत्तरवेउव्विते य, तत्थ णं जे से भवधारणिज्जे से णं समचउरससंठाणसं० पं०, तत्थ णं जे से उत्तरवेउव्विए से णं नानासंठाणसं० पं०, एवं जाव थणियकुमारदेवपंचिंदियवेउव्वियसरीरे, एवं वाणमंतराणवि, नवरं ओहिया वाणमंतरा पुच्छिज्जंति, एवं जोतिसियाणवि ओहियाणं, एवं सोहम्मे जाव अच्चुयदेवसरीरे, गेवेज्जगकप्पा-तीतवेमाणियदेवपंचिंदियवेउव्वियसरीरे णं भंते! किंसंठिते पं० ?, गो० ! गेवेज्जगदेवाणं एगे भवधारणिज्जे सरीरे, से णं समचउरससंठाणसंठिते पं०, एवं अनुत्तरोववाइयाणवि।

वृ. 'वेउव्वियसरीरे णं भंते!' इत्यादि सुगमं, नवरं नैरयिकाणां भवधारणीयमुत्तरवैक्रियं च हुण्डसंस्थानमत्यन्तक्लिष्टकर्मोदयवशात्, तथाहि–तेषां भवधारणीयं शरीरं भवस्वभावत एव निर्मूलविलुप्तपक्षोत्पाटितसकलग्रीवादिरोमपक्षिसंस्थानवदतीव बीभत्सं हुण्डसंस्थानं, यदप्युत्तरवैक्रियं तदपि वयं शुभं करिष्याम इत्यभिसन्धिना कर्तुमारब्धमपि तथाविधात्यन्ताशुभ-नामकर्मोदयवशादतीवाशुभतरमुपजायते इति हुण्डसंस्थानं।

तिर्यक्पञ्चेन्द्रियाणां मनुष्याणां च वैक्रियं नानासंस्थानसंस्थितमिच्छावशतः प्रवृत्तेः दशविधभवनपतिव्यन्तरज्योतिष्कसौधर्माद्यच्युतपर्यवसानवैमानिकानां भवधारणीयं भवस्वभावतया तथाविधशुभनामकर्मोदयवशात् प्रत्येकं सर्वेषां समचतुरस्रसंस्थानं, उत्तरवैक्रियं त्विच्छानुरोधतः प्रवृत्तेर्नानासंस्थानसमंस्थितं, ग्रैवेयकानामनुत्तरोपपातिनां चोत्तरवैक्रियं न भवति, प्रयोजनाभावाद्, उत्तरवैक्रियं ह्यत्र गमनागमननिमित्तं परिघाणानिमित्तं वा क्रियते, न चैतेषामेतदस्ति, यत्तु भवधारणीयमेतेषां तत्समचतुरस्रसंस्थानसंस्थितमिति।

उक्तानि संस्थानानि, सम्प्रत्यवगाहनामानमाह -

मू. (५१८) *वेउव्वियसरीरस्स णं भंते! केमहालिया सरीरावगाहणा पं० ?, गो० ! जह० अंगुलस्स असं० उक्को० सातिरेगं जोयणसयसहस्सं।*

वाउक्काइयएगिंदियसरीरस्स णं भंते! केमहालिया सरीरोगाहणा पं० ?, गो० ! जह० अंगुलस्स असं० उक्कोसेणवि अंगुलस्स असं०,

नेरइयपंचिंदियवेउव्वियसरीरस्स णं भंते! केमहा० पं० ?, गो० ! दुविहा पं०, तं०–भवधारणिज्जा य उत्तरवेउव्विया य, तत्थ णंजा सा भवधारणिज्जा सा जह० अंगुलस्स असंखेज्जतिभागं उक्को० पंचधनुसयाइं, तत्थ णं जा सा उत्तरवेउव्विया सा जह० अंगुलस्स संखेज्जतिभागं उक्को० धनुसहस्सं। रयणप्पभापुढविनेरइयाणं भंते! केमहा० पं० ?, गो० ! दुविहा पं०, तं०–भवधारणिज्जा य उत्तरवेउव्विता य, तत्थ णं जा सा भवधारणिज्जा सा जह० अंगु० असं० उक्को० सत्त धनूइं

तिन्नि रयणीओ छच्च अंगुलाइं, तत्थ णं जा सा उत्तरवेउव्विता सा जह० अंगु० असं० उक्को० पन्नरस धणूतिं अड्ढाइज्जाओ रयणीओ।

सक्करप्पभाए पुच्छा, गो० ! जाव तत्थ णं जा सा भवधारणिज्जा सा जह० अंगु० असं० उक्को० पन्नरस धनूइं अड्ढाइज्जातो रयणीओ, तत्थ णं जा सा उत्तरवेउव्विता सा जह० अंगु० संखे० उक्को० एक्कतीसं धणूइं एक्का य रयणी। वालुयप्पभाए पुच्छा, भवधारणिज्जा एक्कतीसं धनूइं एक्का रयणी उत्तरवे उव्विया जावट्ठिं धनूतिं दो रयणीओ।

पंकप्पभाए भवधारणिज्जा जावट्ठिं धनूइं दो रयणीओ, उत्तरवेउव्विया पणवीसं धनुसयं। धूमप्पभाए भवधारणिज्जा पणवीसं धनुसयं, उत्तरवेउव्विया अड्ढातिज्जाइं धनुसयाइं। तमाए भवधारणिज्जा अड्ढाइज्जाइं धनूसताइं उत्तरवेउव्विया पंच धणुसताइं।

अधेसत्तमाए भवधारणिज्जा पंच धणुसयाइं उत्तरवेउव्विता धणुसहस्सं, एवं उक्कोसेणं। जहन्नेणं भवधारणिज्जा अंगुलस्स असंखेज्जतिभागं उत्तरवेउव्विता अंगुलस्स संखिज्जतिभागं।

तिरिक्खजोणियपंचिंदियवेउव्वियसरीरस्स णं भंते ! केमहालिया सरीरोगाहणा पं० ?, गो० ! जह० अंगु० सं० उक्कोसेणं जोअणसतपुहुत्तं। मणुस्सपंचिंदियवेउव्वियसरीरस्स णं भंते ! केमहा० ?, गो० ! जह० अंगुल० सं० उक्को० सातिरेगं जोअणसतसहस्सं।

असुरकुमारभवणवासिदेव० पंचि० वेउव्वियसरीरस्स णं भंते ! केमहा० ?, गो० ! असुरकुमाराणं देवाणं दुविहा सरीरोगाहणा पं०, तं०-भवधारणिज्जा य उत्तरवेउव्विया य, तत्थ णं जा सा भवधारणिज्जा सा ज० अंगु० असं० उक्को० सत्त रयणीओ, तत्थ णं जा सा उत्तरवेउव्विता सा जह० अंगु० संखे० उक्को० जोअणसतसहस्सं, एवं जाव थणियकुमाराणं, एवं ओहियाणं वाणमंतराणं, एवं जोइसियाणवि।

सोहम्मीसाणदेवाणं, एवं चेव उत्तरवेउव्विता, जाव अच्चुओ कप्पो, नवरं सणंकुमारे भवधारणिज्जा जह० अंगु० अ० उक्को० छ रयणीओ, एवं माहिंदेवि, बंभलोयलंतगेसु पंच रयणीओ महासुक्कसहस्सारेसु चत्तारि रयणीओ, आणयपाणयआरणच्चुएसु तिन्नि रयणीओ।

गेविज्जगकप्पातीतवेमाणियदेवपंचिंदियवेउ० स० केम० ?, गो० ! गेवेज्जगदेवाणं एगा भवधारणिज्जा सरीरोगाहणा पं० सा जह० अंगुल० असं० उक्को० दो रयणी, एवं अनुत्तरोववाइयदेवाणवि, नवरं एक्का रयणी

वृ. 'वेउव्वियसरीरस्स ण'मित्यादि, जघन्यतोऽङ्गुलासङ्ख्येयभागं नैरयिकादीनां भवधारणीयस्यापर्याप्तावस्थायां वातकायस्य वा, उत्कर्षतः सातिरेकं योजनशतसहस्रं देवानामुत्तरवैक्रियस्य मनुष्याणां वा, 'एगिंदियवेउव्वियसरीरस्स ण'मित्यादि, अत्र एकेन्द्रियो वातकायोऽन्यस्य वैक्रियलब्ध्यसम्भवात्, तस्य जघन्यत उत्कर्षतो वाऽवगाहनामानमङ्गुलासङ्ख्येयभागप्रमाणं, एतावत्प्रमाणविकुर्वणायामेव तस्य शक्तिसम्भवात्, सामान्यमनैरयिकसूत्रे 'भवधारणीया' भवो धार्यते यया सा भवधारणीया 'कृदभ्बहुल'मिति वचनात् करणे अनीयप्रत्ययः, उत्कर्षतः पञ्च धनुःशतानि, उत्तरवैक्रिया धनुःसहस्रं सप्तमनरकपृथिव्यपेक्षया, अन्यत्रैतावत्या भवधारणीयाया उत्तरवैक्रियाया वा शरीरावगाहनाया अप्राप्यमाणत्वात्,

अधुना प्रतिपृथिव्यवगाहनामानमाह-'रयणप्पभे'त्यादि, अङ्गुलासङ्ख्येयभागप्रमाणता

प्रथमोत्पत्तिकाले वेदितव्या, उत्कर्षतः सप्त धनूंषि त्रयो हस्ताः षट् चाङ्गुलानि पर्याप्तावस्थायां, इदं चोत्कर्षतः शरीरावगाहनामानं त्रयोदशे प्रस्तटे द्रष्टव्यं, शेषेषु त्वर्वाक्तनेषु प्रस्तटेषु स्तोकं स्तोकतरं, तद्यथैवम्–रत्नप्रभायाः प्रथमप्रस्तटे त्रयो हस्ता उत्कर्षतः शरीरप्रमाणं, द्वितीये प्रस्तटे धनुरेकमेको हस्तः सार्द्धानि चाष्टावङ्गुलानि, तृतीये प्रस्तटे धनुरेकं त्रयो हस्ताः सप्तदशाङ्गुलानि, चतुर्थे द्वे धनुषी द्वौ हस्तौ साधमेकमङ्गुलं, पञ्चमे त्रीणि धनूंषि दशाङ्गुलानि, षष्टे त्रीणि धनूंषि द्वौ हस्तौ सार्द्धान्यष्टादशाङ्गुलानि सप्तमे चत्वारि धनूंषि एको हस्तः त्रीणि चाङ्गुलानि, अष्टमे चत्वारि धनूंषि त्रयो हस्ताः सार्द्धान्येकादशाङ्गुलानि, नवमे पञ्च धनूंषि एको हस्तो विंशतिरङ्गुलानि, दशमे षट् धनूंषि सार्द्धानि चत्वारि अङ्गुलानि, एकादशे षट् धनूंषि द्वौ हस्तौ त्रयोदशाङ्गुलानि, द्वादशे सप्त धनूंषि सार्द्धान्येकविंशतिरङ्गुलानि, त्रयोदशे सप्त धनूंषि त्रयो हस्ताः षट् परिपूर्णान्यङ्गुलानि, अत्र चायं तात्पर्यार्थः–

प्रथमप्रस्तटे यच्छरीरावगाहनापरिमाणं त्रयो हस्ता इति तस्योपरि प्रस्तटक्रमेण सार्द्धानि षट्पञ्चाशदङ्गुलानि प्रक्षिप्यन्ते, ततो यथोक्तं प्रस्तटेषु शरीरावगाहनापरिमाणं भवति, उक्तं च–

॥ १ ॥ "रयणाए पढमपयरे हत्थतियं देहउस्सओ भणिओ।
छप्पङ्गुल सड्ढा पयरे २ हवइ वुड्ढी ॥"

'तत्थ णं जा सा उत्तरवेउव्विया' इत्यादि, जघन्यतोऽङ्गुलसङ्ख्येयभागं, प्रथमसमयेऽपि तस्या अङ्गुलसङ्ख्येयभागप्रमाणाया एव भावात्, न त्वसङ्ख्येयभागप्रमाणायाः, आह च सङ्ग्रहणिमूलटीकाकारो हरिभद्रसूरिः–

"उत्तरवैक्रिया तु तथाविधप्रयत्नभावादाद्यसमयेऽप्यङ्गुलसङ्ख्येयभागमात्रैव, उत्कर्षतः पञ्चदश धनूंषि अर्धतृतीया हस्ताः" इदं च उत्तरवैक्रियशरीरावगाहनापरिमाणं त्रयोदशे प्रस्तटेऽवसातव्यं, शेषेषु तु प्रस्तटेषु प्रागुक्तभवधारणीयमानापेक्षया द्विगुणं प्रत्येतव्यं १।

शर्कराप्रभायां भवधारणीया उत्कर्षतः पञ्चदश धनूंषि अर्द्धतृतीया हस्ताः, इदं चोत्कर्षतो भवधारणीयावगाहनापरिमाणमेकादशे प्रस्तटेऽवसातव्यं, शेषेषु तु प्रस्तटेष्विदं–शर्कराया:प्रथमे प्रस्तटे सप्त धनूंषि त्रयो हस्ताः षट् चाङ्गुलानि, द्वितीये प्रस्तटे अष्टौ धनूंषि द्वौ हस्तौ नव चाङ्गुलानि, तृतीये नव धनूंषि एको हस्तो द्वादश चाङ्गुलानि, चतुर्थे दश धनूंषि पञ्चदशाङ्गुलानि, पञ्चमे दश धनूंषि त्रयो हस्ता अष्टादशाङ्गुलानि, षष्ठे एकादश धनूंषि द्वौ हस्तावेकविंशतिरङ्गुलानि, सप्तमे द्वादश धनूंषि द्वौ हस्तौ, अष्टमे त्रयोदश धनूंषि एको हस्तःत्रीणि अङ्गुलानि, नवमे चतुर्दश धनूंषि षट् चाङ्गुलानि, दशमे चतुर्दश धनूंषि त्रयो हस्ता नव चाङ्गुलानि, एकादशे सूत्रोक्तमेव परिमाणं, अत्रापीदं तात्पर्यं–प्रथमे प्रस्तटे यत्परिमाणमुक्तं तस्योपरि प्रस्तटक्रमेण त्रयो हस्तास्त्रिणि चाङ्गुलानि प्रक्षेप्तव्यानि, ततो यथोक्तं प्रस्तटेषु परीमाणं भवति,

॥ १ ॥ "सो चेव य बीयाए पढमे पयरंमि होइ उस्सेहो।
हत्थतिय तिन्नि अंगुल पयरे पयरे य वुड्ढीए ॥
॥ २ ॥ एक्कारसमे पयरे पन्नरस धणूणि दोन्नि रयणीओ।
बारस य अंगुलाइं देहपमाणं तु विन्नेयं ॥"

गाथाद्वयस्यापीयमक्षरगमनिका–य एव प्रथमपृथिव्यां त्रयोदशे प्रस्तटे उत्कर्षत उत्सेधो

भणितः—सप्त धनूंषि त्रयो हस्ताः षट् चाङ्गुलानि इति, स एव द्वितीयस्यां-शर्कराप्रभायां पृथिव्यां प्रथमे प्रस्तटे उत्सेधो भवति ज्ञातव्यः, ततः प्रतरे प्रतरे वृद्धिरवसेया त्रयो हस्तास्त्रीणि चाङ्गुलानि, तथा च सत्येकादशे प्रस्तटे उत्कर्षतो भवधारणीयशरीरपरिमाणमायाति पञ्चदश धनूंषि द्वौ हस्तौ द्वादश चाङ्गुलानि इति, उत्तरवैक्रियोत्कर्षपरिमाणमाह—एकत्रिंशद्धनूंषि एके हस्तः, इदं च एकादशे प्रस्तटे वेदितव्यं, शेषेषु तु प्रस्तटेषु स्वस्वभवधारणीयापेक्षया द्विगुणमवसेयं २ ।

तथा तृतीयस्यां वालुकाप्रभायां पृथिव्यामुत्कर्षतो भवधारणीया एकत्रिंशद्धनूंषि एको हस्तः, एतच्च नवमं प्रस्तटमधिकृत्योक्तमवसेयं, शेषेषु प्रस्तटेष्वेवं—तत्र प्रथमप्रस्तटे भवधारणीया पञ्चदश धनूंषि द्वौ हस्तौ द्वादशाङ्गुलानि, द्वितीये प्रस्तटे सप्तदश धनूंषि द्वौ हस्तौ सार्द्धानि सप्ताङ्गुलानि, तृतीये एकोनविंशतिर्धनूंषि द्वौ हस्तौ त्रीण्यङ्गुलानि, चतुर्थे एकविंशतिः धनूंषि एको हस्तः सार्द्धानि द्वाविंशतिरङ्गुलानि, पञ्चमे त्रयोविंशतिर्धनूंषि एको हस्तोऽष्टादश चाङ्गुलानि, षष्ठे पञ्चविंशतिर्धनूंषि एको हस्तः सार्द्धानि त्रयोदशाङ्गुलानि, सप्तमे सप्तविंशतिर्धनूंषि एको हस्तो नव चाङ्गुलानि, अष्टमे एकोनत्रिंशद्धनूंषि एको हस्तः सार्द्धानि चत्वार्यङ्गुलानि, नवमे यथोक्तरूपं परिमाणं भवति, अत्रापि चायं भावार्थः—प्रथमे प्रस्तटे यत्परिमाणमुक्तं तस्योपरि प्रस्तटे प्रस्तटे सप्त हस्ताः सार्द्धानि च एकोनविंशतिरङ्गुलानि क्रमेण प्रक्षेप्तव्यानि, ततो यथोक्तं प्रस्तटेषु परिमाणं भवति, उक्तं च—

॥ १ ॥ "सो चेव य तइयाए पढमे पयरंमि होइ उस्सेहो ।
सत्त रयणीउ अंगुल उणवीसं सद्धवुड्ढी य ॥

॥ २ ॥ पयरे पयरे य तहा नवमे पयरंमी होइ उस्सेहो ।
धणुयाणि एगतीसं एक्का रयणी य नायव्वा ॥"

अस्यापि गाथाद्वयस्येयमक्षरगमनिका—य एव द्वितीयस्याः शर्कराप्रभाया एकादशे प्रस्तटे भवधारणीयाया उत्कर्षत उत्सेध उक्तः—पञ्चदश धनूंषि द्वौ हस्तौ द्वादश चाङ्गुलानि, स एव तृतीयस्याः वालुकाप्रभायाः पृथिव्याःप्रथमे प्रस्तटे उत्सेधो भवति, ततः प्रतरे २ वृद्धिरसवसेया सप्त हस्ताः सार्द्धानि चैकोनविंशतिरङ्गुलानि, तथा च सति नवमे प्रस्तटे यथोक्तं भवधारणीयावगाहनामानं भवति—एकत्रिंशद्धनूंषि एको हस्त इति, उत्तरवैक्रियोत्कृष्टपरिमाणमाह—द्वाषष्टिर्धनूंषि द्वौ हस्तौ, एतच्च नवमप्रस्तटापेक्षमवसेयं, शेषेषु तु प्रस्तटेषु निजनिजभवधारणीयप्रमाणापेक्षया द्विगुणद्विगुणमिति ३ ।

चतुर्थ्यां पङ्कप्रभायां पृथिव्यामुत्कर्षतो भवधारणीया द्वाषष्टिर्धनूंषि द्वौ हस्तौ, इदं च सप्तमे प्रस्तटे प्रत्येयं, शेषेषु प्रस्तटेष्वेवं—पङ्कप्रभायाःप्रथमे प्रस्तटे एकत्रिंशद्धनूंषि एको हस्तः, द्वितीये षट्त्रिंशद्धनूंषि एको हस्तो विंशतिरङ्गुलानि, तृतीये एकचत्वारिंशद्धनूंषि द्वौ हस्तौ षोडश अङ्गुलानि, चतुर्थे षट्चत्वारिंशद्धनूंषि त्रयो हस्ता द्वादशाङ्गुलानि, पञ्चमे द्विपञ्चाशद्धनूंषि अष्टावङ्गुलानि, षष्ठे सप्तपञ्चाशद्धनूंषि एको हस्तः चत्वार्यङ्गुलानि, सप्तमे यथोक्तरूपं परिमाणं, अत्रापि चैष भावार्थः—प्रथमे प्रस्तटे यत्परिमाणमुक्तं तस्योपरि प्रस्तटे प्रस्तटे क्रमेण पञ्च धनूंषि विंशतिरङ्गुलानीत्येवंरूपा वृद्धिरवगन्तव्या, ततः प्रथमे प्रस्तटे सूत्रोक्तं परिमाणं भवति, उक्तं च—

॥ १ ॥ "सो चेव चउत्थीए पढमे पयरंमि होइ उस्सेहो ।
पंच धनु वीस अंगुल पयरे पयरे य वुड्ढी य ॥

॥ २ ॥ जो सत्तमए पयरे नेरइयाणं तु होइ उस्सेहो ।
बासट्ठी धनुयाणं दोन्नि रयणी य बोद्धव्वा ॥"

अस्यापि गाथाद्वयस्याक्षरगमनिका प्राग्वत् भावनीया, उत्तरवैक्रियोत्कर्षपरिमाणं पञ्चविंशं धनुःशतं, तच्च सप्तमे प्रस्तटे, शेषेषु तु प्रस्तटेषु स्वस्वभवधारणीयापेक्षया द्विगुणमिति ४ ।

पञ्चम्यां धूमप्रभायां पृथिव्यां भवधारणीयोत्कर्षतः पञ्चविंशं धनुःशतं, तच्च पञ्चमं प्रस्तटमधिकृत्योक्तमवसेयं, शेषेषु प्रस्तटेष्विदं-प्रथमप्रस्तटे द्वाषष्टिर्धनूंषि द्वौ हस्तौ, द्वितीयेऽष्टसप्ततिर्धनूंषि एका वितस्तिः, तृतीये त्रिनवतिर्धनूंषि त्रयो हस्ताश्चतुर्थे नवोत्तरं धनुःशतं एको हस्तः एका च वितस्तिः, पञ्चमे सूत्रोक्तं परिमाणं, अत्रापि चायं तात्पर्यार्थः-यत्प्रथमे प्रस्तटे परिमाणमुक्तं तदुपरि प्रस्तटे २ क्रमेण पञ्चदश धनूंषि सार्द्धहस्तद्वयाधिकानि प्रक्षेप्तव्यानि, तथा च सति यथोक्तं पञ्चमे प्रस्तटे परिणामं भवति, उक्तं च-

॥ १ ॥ "सो चेव य पंचमीए पढमे पयरंमि होइ उस्सेहो ।
पनरस धणूणि दो हत्थ सद्ध पयरेसु वुड्ढी य ॥
तह पंचमए पयरे उस्सेहो धनुस्सयं तु पणवीसं ॥"

अस्याः सार्द्धगाथाया अक्षरगमनिका प्राग्वत् भावनीया, उत्तरवैक्रियोत्कर्षपरिमाणं अर्द्धतृतीयानि धनुःशतानि, एतानि च पञ्चमे प्रस्तटे वेदितव्यानि, शेषेषु प्रस्तटेषु स्वस्वभवधारणीयापेक्षया द्विगुणमिति । षष्ठ्यां तमःप्रभायां पृथिव्यामुत्कर्षतो भवधारणीया अर्द्धतृतीयानि धनुःशतानि, तानि च तृतीये प्रस्तटे प्रत्येतव्यानि, प्रथमे तु प्रस्तटे पञ्चविंशं धनुःशतं, द्वितीये सार्द्धसप्ताशीत्यधिकं धनुःशतंतृतीये तु सूत्रोक्तमेव परिमाणं, अत्राप्ययं तात्पर्यार्थः-प्रथमे प्रस्तटे यत्परिमाणमुक्तं तस्योपरि प्रस्तटे प्रस्तटे सार्द्धानि द्वाषष्टिर्धनूंषि प्रक्षेप्तव्यानि, तथा च सति तृतीये प्रस्तटे यथोक्तं परिमाणं भवति, उक्तं च-

॥ १ ॥ "सो चेव य छट्ठीए पढमे पयरंमि होइ उस्सेहो ।
बावट्ठि धणुयं सद्धा पयरे पयरे य वुड्ढीओ ॥
छट्ठीए तइयपयरे दोसय पन्नासया होंति ॥"

अस्याप्युत्तरार्द्धपूर्विकाया गाथाया अक्षरगमनिका प्राग्वत् कर्त्तव्या, उत्तरवैक्रियोत्कर्षपरिमाणं पञ्चधनुःशतानि, तानि च तृतीयप्रस्तटे वेदितव्यानि, आद्ययोस्तु द्वयोः प्रस्तटयोः स्वस्वभवधारणीयापेक्षया द्विगुणं द्विगुणमवबोद्धव्यं ६ ।

अथ सप्तम्यां तु पृथिव्यां भवधारणीया उत्कर्षतः पञ्च धनुःशतानि, उत्तरवैक्रिया धनुःसहस्रं, सर्वत्र भवधारणीया जघन्यतोऽङ्गुलासङ्ख्येयभागप्रमाणा उत्तरवैक्रिया सङ्ख्येयभागप्रमाणेति । तिर्यक्पञ्चेन्द्रियस्य वैक्रियशरीरावगाहना उत्कर्षतो योजनशतपृथकत्वं, तत ऊर्ध्वं करणशक्तेरभावात्, मनुष्याणां सातिरेकं योजनशतसहस्रं, विष्णुकुमारप्रभृतीनां तथाश्रवणात्, जघन्या तूभयेषामप्यङ्गुलसङ्ख्येयभागप्रमाणा, न त्वसङ्ख्येयभागमाना, तथारूपप्रयत्नासम्भवात् ।

असुरकुमारादीनां स्तनितकुमारपर्यवसानानां व्यन्तराणां ज्योतिष्काणां सौधर्मेशानदेवानां प्रत्येकं जघन्या भवधारणीया वैक्रियशरीरावगाहना अङ्गुलासङ्ख्येयभागप्रमाणा, सा चोत्पत्तिसमये द्रष्टव्या, उत्कृष्टा सप्त रत्नयः, उत्तरवैक्रिया जघन्या अङ्गुलसङ्ख्येयभागमात्रा, उत्कृष्टा योजनशतसहस्रं,

'उत्तरवेउव्विया जाव अच्चुओ कप्पो' त्ति उत्तरवैक्रिया तावद् वक्तव्या यावदच्युतः कल्पः, परत उत्तरवैक्रियासम्भवात्, एतच्च प्रागेवोक्तं, सर्वत्र जघन्यतोऽङ्गुलसङ्ख्येयभागमाना उत्कर्षतो योजनलक्षं, भवधारणीया तु विचित्रा ततस्तां पृथगाह-'नवर'मित्यादि, नवरमयं भवधारणीयां प्रति विशेषः-

सनत्कुमारे कल्पे जघन्यतोऽङ्गुलासङ्ख्येयभाग उत्कर्षतःषड् रत्नयः, 'एवं माहिंदेवि' इति एवं-उक्तेन प्रकारेण जघन्या उत्कृष्टा च भवधारणीया माहेन्द्रकल्पेऽपि वक्तव्या, एतच्च सप्तसागरोपमस्थितिकान् देवानधिकृत्योक्तमवसेयं, द्व्यादिसागरोपमस्थितिष्वेवं-येषां सनत्कुमारमाहेन्द्रकल्पयोर्द्वे सागरोपमे स्थितिस्तेषामुत्कर्षतो भवधारणीया परिपूर्णसप्तहस्तप्रमाणा, येषां त्रीणि सागरोपमाणि तेषां षड् हस्ताः चत्वारश्च हस्तस्यैकादशभागाः, येषां चत्वारि सागरोपमाणि तेषां षड् हस्तास्त्रयो हस्तस्यैकादशभागाः, येषां पञ्च सागरोपमाणि तेषां षड् हस्ताः द्वौ च हस्तस्यैकादशभागौ, येषां षट् सागरोपमाणि तेषां षड् हस्ताः एकश्च हस्तस्यैकादशभागः, येषां तु परिपूर्णानि सप्त सागरोपमाणि स्थितिस्तेषां परिपूर्णा षड् हस्ता भवधारणीया, उक्तं च-

॥१॥ "अयरतिगं ठिइ जेसिं सणंकुमारे तहेव माहिंदे।
रयणीछक्कं तेसिं भागचउक्काहियं देहो॥

॥२॥ तत्तो अयरे अयरे भागो एक्केक्कओ पडइ जाव।
सागरसत्तठिईणं रयणीछक्कं तनुपमाणं॥"

इह जघन्या भवधारणीया सर्वत्राप्यङ्गुलासङ्ख्येयभागप्रमाणा, सा च प्रतीतेति तामवधीर्योत्कृष्टां प्रतिपादयति-'बंभलोगलंतगेसु पंच रयणीओ' इति, इह यद्यपि ब्रह्मलोकस्योपरि लान्तको न समश्रेण्या तथापीह शरीरप्रमाणचिन्तायामिदं द्विकं विवक्ष्यते, द्विकपर्यन्त एव हस्तस्य त्रुटिततया लभ्यमानत्वात्, एमुत्तरत्रापि द्विकचतुष्कादिपरिग्रहे कारणं वाच्यं, तत्र ब्रह्मलोकलान्तकयोरुत्कर्षतया भवधारणीया पञ्च रत्नयः, एतच्च लान्तके चतुर्दशसागरोपमस्थितिकान् देवानधिकृत्य प्रतिपादितमवसेयं, शेषसागरोपमस्थितिष्वेवं- येषां ब्रह्मलोके सप्त सागरोपमाणि स्थितिस्तेषां षड् रत्नयः परिपूर्णा भवधरणीया, येषामष्टौ सागरोपमाणि तेषां पञ्च हस्ताः षड् हस्तस्यैकादशभागाः, येषां नव सागरोपमाणि तेषां पञ्च हस्ताः पञ्च हस्तस्यैकादशभागाः, येषां दश सागरोपमाणि तेषां पञ्च हस्ताश्चत्वारश्चैकादशभागाः हस्तस्य, ।

लान्तकेऽपि येषां दश सागरोपमाणि स्थितिस्तेषामेतावती भवधारणीया उत्कर्षतो, येषामेकादश सागरोपमाणि लान्तके स्थितिस्तेषां पञ्चहस्तास्त्रयो हस्तस्यैकादशभागाः, येषां द्वादश सागरोपमाणि तेषां पञ्च हस्ता द्वौ च हस्तैकादशभागौ, येषां त्रयोदश सागरोपमाणि तेषां पञ्च हस्ता एको हस्तस्यैकादशभागो, येषां चतुर्दश सागरोपमाणि स्थितिस्तेषां परिपूर्णा पञ्चहस्ता भवधारणीया, । 'महासुक्कसहस्सारेसु चत्तारि रयणीओ' महाशुक्रसहस्रारयोश्चतस्रोरत्नय उत्कर्षतो भवधारणीया, एतच्च सहस्रारगतान् अष्टादशसागरोपमस्थितिकान् देवानधिकृत्योक्तं वेदितव्यं, शेषसागरोपमस्थितिष्वेवंयेषां महाशुक्रे कल्पे चतुर्दश सागरोपमाणि स्थितिस्तेषामुत्कर्षतो भवधारणीया परिपूर्णाः पञ्च हस्ताः, येषां पञ्चदश सागरोपमाणि तेषां चत्वारो हस्तास्त्रयश्च हस्तस्यैका- दशभागाः, येषां षोडश सागरोपमाणि तेषां चत्वारो हस्ता द्वौ च हस्तस्यैकादशभागौ,

येषां सप्तदश सागरोपमाणि तेषां चत्वारो हस्ता एको हस्तस्यैकादशभागः,

सहस्रारेऽपि येषां सप्तदश सागरोपमाणि तेषामेतावती भवधारणीया, येषां पुनःसहस्रारे परिपूर्णान्यष्टादश सागरोपमाणि स्थितिस्तेषां परिपूर्णाश्चत्वारो हस्ताः भवधारणीया,

'आणयपाणयआरणअच्चुएसु णं भंते ! कप्पेसु रयणीओ' इति आनतप्राणतारणाच्युतेषु किल्बिषं न भवति, उत्कृष्टा भवधारणीया, एतच्चाच्युते कल्पे द्वाविंशतिसागरोपमस्थितिकान् देवानधिकृत्योक्तं द्रष्टव्यं, शेषसागरोपमस्थितिष्वेवं–येषामानतेऽपि कल्पे परिपूर्णानि किञ्चित्समधिकानि चाष्टादश सागरोपमाणि स्थितिः तेषां परिपूर्णाश्चत्वारो हस्ता उत्कृष्टा भवधारणीया, येषां पुनरेकोविंशतिः सागरोपमाणि तेषां त्रयो हस्तास्त्रयश्च हस्तस्यैकादशभागाः", प्राणतेऽपि कल्पे येषामेकोनविंशतिः सागरोपमाणि स्थितिस्तेषामेतावती भवधारणीया, येषां पुनः प्राणते कल्पे विंशतिः सागरोपमाणि स्थितिस्तेषां त्रयो हस्ता द्वौ च हस्तस्यैकादशभागौ, येषामारणेऽपि कल्पे विंशतिः सागरोपमाणि स्थितिस्तेषामेतावती भवधारणीया, येषां पुनरारणेऽपि कल्पे एकविंशतिः सागरोपमाणि स्थितिस्तेषां त्रयो हस्ता एकस्य हस्तस्यैकादशभागो भवधारणीया, अच्युतेऽपि कल्पे येषामेकविंशतिः सागरोपमाणि स्थितिस्तेषामेतावत्येव भवधारणीया, येषां पुनरच्युते कल्पे द्वाविंशतिः सागरोपमाणि स्थितिस्तेषामुत्कर्षतो भवधारणीया परिपूर्णास्त्रयो हस्ताः,

गेवेज्जकप्पातीते'त्यादि भावितं, नवरं 'उक्कोसेणं दो रयणीओ'त्ति एतन्नवमग्रैवेयके एकत्रिंशत्सागरोपमस्थितिकान् देवान् प्रति द्रष्टव्यं, शेषसागरोपमस्थितिष्वेवं–प्रथमे ग्रैवेयके येषां द्वाविंशतिः सागरोपमाणि स्थितिस्तेषां त्रयो हस्ता भवधारणीया, येषां पुनस्तत्रैव त्रयोविंशतिःसागरोपमाणि स्थितिस्तेषां द्वौ हस्तावष्टौ हस्तस्यैकादशभागाः द्वितीयेऽपि ग्रैवेयके येषां त्रयोविंशतिःसागरोपमाणि स्थितिस्तेषामेतावती भवधारणीया, येषां पुनस्तत्र चतुर्विंशतिः सागरोपमाणि स्थितिस्तेषां द्वौ हस्तौ सप्त च हस्तस्यैकादशभागा भवधारणीया, तृतीयोऽपि ग्रैवेयके येषां चतुर्विंशतिः सागरोपमाणि स्थितिस्तेषामेतावत्येव भवधारणीया, येषां पुनः पञ्चविंशतिः सागरोपमाणि तत्र स्थितिस्तेषां द्वौ हस्तौ षट् हस्तस्यैकादशभागा भवधारणीया, चतुर्थेऽपि ग्रैवेयके येषां पञ्चविंशतिः सागरोपमाणि स्थितिस्तेषामेतावती भवधारणीया, येषां पुनस्तत्र षड्विंशतिः सागरोपमाणि स्थितिस्तेषां द्वौ हस्तौ पञ्च हस्तस्यैकादशभागाः,

–पञ्चमेऽपि ग्रैवेयके येषां षड्विंशतिः सागरोपमाणि तेषामेतावती भवधारणीया, येषां तु तत्र सप्तविंशति; सागपोपमाणि तेषां द्वौ हस्तौ चत्वारो हस्तस्यैकादशभागा भवधारणीया, षष्ठेऽपि ग्रैवेयके येषां सप्तविंशतिःसागरोपमाणि तेषामेतावत्येव भवधारणीया, येषां पुनस्तत्राष्टाविंशतिःसागरोपमाणि स्थितिस्तेषां द्वौ हस्तौ त्रयो हस्तस्यैकादशभागा भवधारणीया, सप्तमेऽपि ग्रैवेयके येषामष्टाविंशतिः सागरोपमाणि (स्थितिः) तेषामेतावती, येषां पुनस्तत्र एकोनत्रिंशत्सागरोपमाणि तेषां भवधारणीया द्वौ हस्तौ द्वौ च हस्तस्यैकादशभागौ, अष्टमेऽपि ग्रैवेयके येषां स्थितिरेकोनत्रिंशत्सागपोपमाणि तेषामेतावत्प्रमाणा, येषां पुनस्तत्र त्रिंशत्सागरोपमाणि स्थितिस्तेषां द्वौ हस्तौ एकश्च हस्तस्यैकादशो भागो भवधारणीया, नवमे ग्रैवेयके येषां स्थितिस्त्रिंशत्सागरोपमाणि तेषां भवधारणीया एतावत्प्रमाणा, येषां पुनरेकत्रिंशत्सागरोपमाणि तत्र स्थितिस्तेषां परिपूर्णौ द्वौ हस्तौ भवधारणीया,

'एवं अनुत्तरे' इत्यादि, एवं ग्रैवेयकोक्तेन प्रकारेण अनुत्तरोपपातिकदेवानामपि सूत्रं वक्तव्यं, नवरमुत्कर्षतो भवधारणीया एका रत्निः-हस्तो वक्तव्यः, एतच्च त्रयस्त्रिंशत्सागरोपमस्थितिकान् प्रति ज्ञातव्यं, येषां पुनर्विजयादिषु चतुर्षु विमानष्वेकत्रिंशत्सागरोपमाणि स्थितिस्तेषां परिपूर्णौ द्वौ हस्तौ भवधारणीया, येषां पुनस्तत्रैव मध्यमा द्वात्रिंशत्सागरोपमाणि स्थितिसतेषामेको हस्त एकश्च हस्तस्यैकादशभागो भवधारणीया, येषां पुनस्तत्र सर्वार्थसिद्धमहाविमाने त्रयस्त्रिंशत्सागरोपमाणि तेषामेको हस्तो भवधारणीया, जघन्या सर्वत्राङ्गुलासङ्ख्येयभागमात्रा ॥

तदेवमुक्तानि वैक्रियशरीरस्यापि स्थितिसंस्थानावगाहनाप्रमाणानि, सम्प्रत्याहारकस्य प्रतिपिपादयिषुराह-

मू. (५१९) *आहारगसरीरे णं भंते! कतिविधे पन्नत्ते?, गो० ! एगागारे पं०, जइ एगागारे किं मणूसआहारगसरीरे अमणूसआहारगसरीरे?, गो० ! मणूसआहारगसीरे नो अमणूसआ०,*

मणूसआहा० किं संमुच्छिममणूसआहा० गब्भवक्कंतियमणूसआहा० ?, गो० ! नो संमुच्छिममणूसआहा० गब्भवक्कंतियमणूसाआहा०

-जइ गब्भव० म० आ० किं कम्मभूमगग० म० आ० अकम्मभूमगग० म० आ० अंतरदीवगग-० म० आ० ?, गो० ! कम्मभूमग० नो अकम्मभूमगग० नो अंतरदीवग०, जइ कम्मभूमगग० म० आ० किं संखेज्जवासाउय० क० ग० म० आ० असंखेज्जवासाउक० ग० म० आ० ?, गो० ! संखिज्जवा० क० गब्भ० म० आहारगसरीरे नो असं० क० म० आ०, जति संखे० क० ग० म० आहा० सरीरे किं पज्जत्तसं० वा० क० ग० म० आ० सरीरे अपज्जत्तसं० वा० क० ग- म० आ० ?, गो- ! पज्जत्तसं० वासा० क० ग० म० आ० नो अपज्जत्तं क० ग० मणू० आ०,

-जइ पज्जत्त० सं० क० ग० म० आ० किं सम्मद्दिट्ठीपज्जत्तगसं० क० ग० म० आ० मिच्छद्दट्ठीप० सं० क० ग० म० आ० सम्मामिच्छद्दिट्ठिपज्ज० सं० क० ग० म० आ०, जइ सम्मद्दिट्ठिपज्जत्तसं० वा० क० ग० म० आ० किं संजयस० म० सं० क० ग० म० आ० असंजतसम्म० प० सं० क० ग० म० आ० संजयासंजय० प० सं० क० ग० म० आ० ?, गो० संजयसम्म० पं० सं० क० ग० म० आ० नो असंजतसम्म० प० आहा० नो संजतासंतसम्म० आहा०,

-जइ संजतसम्म० पं० सं० क० ग० म० आ० किं पमत्तसंजतसम्म० म० आ० अपमत्तसंजतसम्म० सं० क० ग० म० आ० ?, गो० ! पमत्तसं० सम्मद्दिट्ठिप० सं० क० ग० म० आ० नो अपमत्तसं० स० प० सं० क० ग० म० आ०, जइ अपमत्तसं० स० प० सं० क० म० आ० किं इड्ढिपत्तप्पमत्तसं० स० क० सं० ग० म० आ० अनिड्ढिपत्तसं० प० क० सं० ग० आ० गो० ! इड्ढिपत्त० स० प० सं० क० ग० म० आ० नो अनिड्ढिय० स० प० सं० क० ग० म० आहा० ।

आहारगसरीरे णं भंते ! किंसंठिते पं० ?, गो० ! समचउरंससंठाणसंठिते पं०, आहारगसरीरस्स णं भंते! केमहालिया सरीरोगाहणा पं० ?, गो० ! जह० देसूणा रयणी उ० पडिपुन्ना रयणी ।

वृ. 'आहारकसरीरे णं भंते! कइविहे पं०' इत्यादि सुगमं, नवरं 'संजय'त्ति 'यमू उपरमे'-संयच्छन्ति स्म-सर्वसावद्ययोगेभ्यः सम्यगुपरमन्ति स्मेति संयताः, 'गत्यर्थनित्याकर्मका' इति कर्तरि क्तप्रत्ययः, सकलचारित्रिणः, असंयता-अविरतसम्यग्दृष्टयः संयतासंयता-देशविरतिमन्तः,

तथा 'पमत्त'त्ति प्रमाद्यन्ति स्म-मोहनीयादिकर्मोदयप्रभावतः सञ्जवलनकषायनिद्रा-

ग्यतमप्रमादयोगतःसंयमयोगेषु सीदन्ति एव अगताः, पूर्वगतश्रुतरहिताः, ते च प्रायो गच्छवासिनस्तेषां क्वचिदनुपयोगसम्भवात्, तद्विपरीता अप्रमत्ताः, ते च प्रायो जिनकल्पिकपरिहारविशुद्धिकयथालन्दकल्पिकप्रतिमाप्रतिपन्नास्तेषां सततोपयोगसम्भवात्,

इह जिनकल्पिकादयो लब्धिं नोपजीवन्ति, तेषां तथाकल्पत्वात्, येऽपि च गच्छवासिन आहारकशरीरं कुर्वन्ति तेऽपि तदानीं लब्ध्युपजीवनेनौत्सुक्यभावतः प्रमादवन्तो, मोचनेऽपि च प्रमादवन्त आत्मप्रदेशानामौदारिकशरीरे सर्वात्मनोपसंहरणेन व्याकुलीभावात्, आहारकशरीरे चान्तर्मुहूर्त्तावस्थानं, ततो यद्यपि तन्मध्यभागे कियत्कालं मनाक् विशुद्धिभावतः कार्मग्रन्थिकैरप्रमत्ततोपवर्ण्यते तथापि स लब्ध्युपजीवनेन प्रमत्त एवेत्यप्रमत्तस्य 'नो अपमत्तसंजए' इत्यादिना प्रतिषेधःकृतः, 'इड्ढिपत्त'त्ति ऋद्धीः--आमर्षौषध्यादि लक्षणाः प्राप्त ऋद्धिप्राप्तस्तद्विपरीतोऽनृद्धिप्राप्तः, ऋद्धीश्च प्राप्नोति प्रथमतो विशिष्टमुत्तरोत्तरमपूर्वापूर्वार्थप्रतिपादकं श्रुतमवगाहमानः श्रुतसामर्थ्यतस्तीव्रतीव्रतरशुभभावनामधिरोहन् अप्रमत्तःसन्, उक्तं च--

॥ १ ॥ "अवगाहते ध स श्रुतजलधिं प्राप्नोति यावधिज्ञानम् ।
मानसपर्यायं वा ज्ञानं कोष्ठादिबुद्धीर्वा ॥
॥ २ ॥ चारणवैक्रियसर्वौषधिताद्या वाऽपि लब्धयस्तस्य ।
प्रादुर्भवन्ति गुणतो बलानि वा मानसादीनि ॥"

अत्र 'स' इत्यप्रमत्तसंयतः, मानसपर्यायमिति--मानसाः मनसः सम्बन्धिः पर्यायाः--विषया यस्य तन्मानसपर्यायं मनःपर्यायज्ञानमित्यर्थः, कोष्ठादिबुद्धीर्वा इत्यत्रादिशब्दात् पदानुसारिबीजपरिग्रहः, तिस्रो हि बुद्धयः परमातिशयरूपाः प्रवचने प्रतिपाद्यन्ते, तद्यथा--

कोष्ठबुद्धिः १ पदानुसारिबुद्धिः २ बीजबुद्धि ३ श्च, तत्र कोष्ठक इव धान्यं या बुद्धिराचार्यमुखाद्विनिर्गतौ तदवस्थानौ च सूत्रार्थौ धारयति न किमपि तयोः कालान्तरे गलति सा कोष्ठबुद्धिः १, या पुनरेकमपि सूत्रपदमवधार्य शेषमश्रुतमपि तदवस्थमेव श्रुतमवगाहते सा पदानुसारिणी २, या पुनरेकमर्थपदं तथाविधमनुसृत्य शेषमश्रुतमपि यथावस्थितं प्रभूतमर्थमवगाहते सा बीजबुद्धिः ३,

सा च सर्वोत्तमप्रकर्षप्राप्ता भगवतां गणभृतां, ते हि उत्पादादिपदत्रयमवधार्यं सकलमपि द्वादशाङ्गात्मकं प्रवचनमभिसूत्रयन्ति, तथा चारणाश्च वैक्रियं च सर्वौषध्यश्च तद्भावश्चाचारणवैक्रियसर्वौषधिता, तत्र चरणं--गमनं तद्विद्यते येषां ते चारणाः 'ज्योत्स्नादिभ्योऽण्'ति मत्वर्थीयोऽण् प्रत्ययः, तत्र गमनमन्येषामपि मुनीनां विद्यते ततो विशेषणान्यथानुपपत्त्या चरणमिह विशिष्टं गमनमभिगृह्यते, अत एव चातिशायने मत्वर्थीयो, यथा रूपवती कन्या इत्यत्र, ततोऽयमर्थः--अतिशायिचरणसमर्थाश्चारणाः, आह च भाष्यकृत् स्वकृतमाष्टीकायां--

"अतिशयचरणाच्चारणाः, अतिशयगमनादित्यर्थः" ते च ते द्विविधा--जङ्घाचारणाः विद्याचारणाश्च, तत्र ये चारित्रतपोविशेषप्रभावतः समुद्भूतगमनविषयलब्धिविशेषास्ते जङ्घाचारणाः, ये पुनर्विद्यावशतःसमुत्पन्नगमनलब्ध्यतिशयास्ते विद्याचारणाः, जङ्घाचारणाश्च रुचकवरद्वीपं यावत् गन्तुं समर्थाःविद्याचारणा नन्दीश्वरं, तत्र जङ्घाचारणा यत्र कुत्रापि गन्तुमिच्छवस्तत्र रविकतानपि निश्रीकृत्य गच्छन्ति, विद्याचारणास्तेववमेव, जङ्घाचारणश्च रुचकवरद्वीपं गच्छन् एकेनैवोत्पातेन गच्छति, प्रतिनिवर्त्तमानस्त्वेकेनोत्पातेन नन्दीश्वरमायाति द्वितीयेन स्वस्थानं, यदि पुनर्मेरुशिखरं

जिगमिषुस्तर्हि प्रथमेनैवोत्पातेन पण्डकवनमधिरोहति प्रतिनिवर्त्तमानस्तु प्रथमोनोत्पातेन नन्दनवनमागच्छति द्वितीयेन स्वस्थानमिति,

जङ्घाचारिणो हि चारित्रातिशयप्रभावतो भवन्ति, ततो लब्ध्युपजीवने औत्सुक्यभावतः प्रमादसम्भवाच्चारित्रातिशयनिबन्धना लब्धिः परिहीयते, ततः प्रतिनिवर्त्तमानो द्वाभ्यामुत्पाताभ्यां स्वभुवमायाति, विद्याचारणः पुनरेकेनोत्पातेन नन्दनवनं यावद् गच्छति द्वितीयेन पुनरिहैव, प्रतिनिवर्त्तमानस्त्वेकेनैवोत्पातेन स्वस्थानमायातीति, तथा स एवोर्ध्वं गच्छन् प्रथमोत्पातेन नन्दनवनं गच्छति द्वितीयेनोत्पातेन पण्डकवनं, प्रतिनिवर्त्तमानस्त्वेकेनैवोत्पातेन स्वस्थानमायातीति, विद्याचारणो विद्यावशतो भवति, विद्या च परिशील्यमाना स्फुटा स्फुटतरोपजायते, अतः प्रतिनिवर्त्तमानस्य शक्यत्यतिशयसम्भवादेकेनोत्पातेन स्वस्थानगमनमिति उक्तं च

॥ १ ॥ "अइसयचरणसमत्था जंघाविज्जाहि चारणा मुणओ ।
जंघाहि जाइ पढमो नीसं काउं रविकरेवि ॥

॥ २ ॥ एगुप्पाएण गओ रुयगवरंमि उ तओ पडिनियत्तो ।
बिइएणं नंदिस्सरमिहं तओ एइ तइएणं ॥

॥ ३ ॥ पढमेणं पंडगवन बिइउप्पाएण नंदनं एइ ।
तइउप्पाएण तओ इह जंघाचारणो एइ ॥

॥ ४ ॥ पढमेण माणुसोत्तरनगं स नंदिस्सरं तु बिइएण ।
एइ तओ तइएणं कयचेइयवंदणो इहइं ॥

॥ ५ ॥ पढमेणं नंदनवने बिअप्पाएण पंडगवनंमि ।
एइ इहं तइएणं जो विज्जाचारणो होइ ॥"

तथा सर्व-विड्मूत्रादिकमौषधं यस्य स सर्वौषधः, किमुक्तं भवति ? - यस्य मूत्रं विट् श्लेष्मा शरीरमलो वा रोगोपशमसमर्थो भवति स सर्वौषधः, आदिशब्दादामर्षौषध्यादिलब्धिपरिग्रहः, एताश्च ऋद्धीरप्रमत्तः सन् प्राप्य पश्चात् प्रमत्तो भवति, तेनैवेह प्रयोजनं तत उक्तम्-'इड्ढिपत्तअपमत्तसंजये'त्यादि, आह - मनुष्यस्याहारकशरीरमित्युक्ते सामर्थ्यादमनुष्यस्य नाहारकशरीरमित्यवसीयते ततः कस्मादुच्यते-'नो अमणुस्साहारगसरीरे' इत्यादि ?, निरर्थकत्वात्, उच्यते,

इह त्रिविधा विनेयाः, तद्यथा-उद्घटितज्ञा मध्यमबुद्धयः प्रपञ्चितज्ञाश्च, तत्र ये उद्घटितज्ञा मध्यमबुद्धयो वा ते यथोक्तं सामर्थ्यमवबुध्यन्ते, ये पुनरद्याप्यव्युत्पन्नत्वात् न यथोक्तसामर्थ्यावगमकुशलास्ते प्रपञ्चितमेवावगन्तुमीशते नान्यथा, ततस्तेषामनुग्रहाय सामर्थ्यलब्धस्यापि विपक्षनिषेधस्याभिधानं, महीयांसो हि परमकरुणापरीतत्वात् अविशेषेण सर्वेषामनुग्रहाय प्रवर्त्तन्ते, ततो न कश्चिद्दोषः,

'जहन्नेणं देसूणा रयणी' इति आहारकशरीरस्य जघन्यतोऽवगाहना देशोना-किञ्चिदूना रत्निः-हस्तः तथाविधप्रयत्नभावतः प्रारम्भसमयेऽपि तस्या एतावत्या एव भावात्। तदेवमुक्तान्याहारकशरीरस्य विधिसंस्थानावगाहनामानानि, सम्प्रति तैजसस्य तान्यभिधित्सुराह-

सू. (५२०) तेयगसरीरे णं भंते ! कतिविधे पं० ?, गो० ! पंचविहे पं०, तं०-एगिंदियतेयगसरीरे जाव पंचिंदियतेयगसरीरे, एगिंदियतेयगसरीरे णं भंते ! कइविधे पं० ?, गो० !

पंचविधे पं०, तं०–पुढविराइय० जाव वणस्सइकाइयएगिंदियसरीरे, एवं जहा ओरालियसरीरस्स भेदो भणितो तहा तेयगस्सवि जाव दसविधेयं।

पंचिंदियतेयगसरीरे णं भंते! कतिविधे पं० ?, गो० ! चउव्विहे पं०, तं०–नेरइयतेयगसरीरे जाव देवतेयगसरीरे, नेरइयाणं दुगतो भेदो भाणितव्वो, जहा वेउव्वियसरीरे। पंचिंदियतिरिक्खजोणियाणं मणूसाण य जहा ओरालियसरीरे भेदो भाणितो तहा भाणियव्वो। देवाणं जहा वेउव्वियसरीरभेदो भाणितो तहा भाणियव्वो, जाव सव्वट्ठसिद्धदेवत्ति।

तेयगसरीरे णं भंते! किंसंठिए पं० ?, गो० ! नानासंठाणसंठिए पं०, एगिंदियतेयगसरीरे णं भंते! किंसंठिए पन्नत्ते ?, गो० ! नानासंठाणसंठिए पं०, पुढविकाइयएगिंदियतेयगसरीरे णं भंते! किंसंठिए पं० ?, गो० ! मसूरचंदसंठाणसंठिते पं०, एवं ओरालियसंठाणाणुसारेण भाणितव्वं जाव चउरिंदियाणवि,

नेरइयाणं भंते! तेयगसरीरे किंसंठिए पं० ?, गो० ! जह वेउव्वियसरीरे, पंचिंदियतिरिक्खजोणियाणं मणूसाणं जहा एतेसिं चेव ओरालियंति, देवाणं भंते! किंसंठिते तेयगसरीरे पं० गो० ! जहा वेउव्वियस्स जाव अनुत्तरोववाइयत्ति।

वृ. 'तेयगसरीरे णं भंते !' इत्यादि, इह तैजसशरीरं सर्वेषामवश्यं भवति ततो यथा एकद्वित्रिचतुरिन्द्रियगत औदारिकशरीरभेदो भणितस्तथा चतुरिन्द्रियान् यावत् तैजसशरीरभेदोऽपि वक्तव्यः, पञ्चेन्द्रियतैजसशरीरचिन्तायां ततुर्विध पञ्चेन्द्रियतैजसशरीरं, नैरयिकतिर्यग्मनुष्यदेवभेदात्, तत्र नैरयिकतैजसशरीरचिन्तायां यथा प्राक् वैक्रियशरीरे पर्याप्तपर्याप्तविषयतया द्विगतो भेद उक्तस्तथाऽत्रापि वक्तव्यः स चैव–

–'जइ नेरइयपंचिंदियतेयगसरीरे किं रयणप्पभापुढविनेरइयपंचिंदियतेयगसरीरे जाव किं अहेसत्तमापुढविनेरइयपंचिंदियतेयगसरीरे ?, गो० ! रयणाप्पभापुढविनेरइयपं॰ तेयगसरीरेवि जाव अहेसत्तमापुढविनेरइयपं० तेयगसरीरेवि, जइ रयणप्पभापुढविनेरइयपंचिंदियतेयगसरीरे किं पज्जत्तगरयणप्पभे'त्यादि, पञ्चेन्द्रियतिर्यग्योनिकानां मनुष्याणां च यथा प्रागौदारिकशरीरभेद उक्तस्तथा अत्रापि वक्तव्यः, स चैवम्–

'तिरिक्खजोणियपंचिंदियतेयगसरीरे णं भंते ! कइविहे पन्नत्ते ?' इत्यादि, देवानां यथा वैक्रियशरीरभेदं उक्तस्तथा भणितव्यः, स चैवम्–'जइ देवपंचिंदियतेयगसरीरे किं भवणवासिदेवपंचिं०तेयगसरीरे' इत्यादि, यावत्सर्वार्थसिद्धदेवसूत्रं।

उक्तो भेदः, सम्प्रति संस्थानप्रतिपादनार्थमाह–'तेयगसरीरे णं भंते ! किंसंठिए पं० ?' इत्यादि, सुगमं, इह जीवप्रदेशानुरोधि तैजसं शरीरं ततो यदेव तस्यां २ योनावौदारिकशरीरानुरोधेन वैक्रियशरीरानुरोधेन च जीवप्रदेशानां संस्थानं तदेव तैजसशरीरस्यापि इति प्रागुक्तमेकद्वित्रिचतुरिन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्यगतमौदारिकसंस्थानं नैरयिकदेवेषु वैक्रियसंस्थानमतिदिष्टमिति गतं संस्थानमधुना अवगाहनामानमाह–

मू. (५२१) *जीवस्स णं भंते! मारणंतियसमुग्घाएणं समोहयस्स तेयासरीरस्स केमहालिया सरीरोगाहणा पं० ?, गो० ! सरीरपमाणमेत्ता विक्खंभबाहल्लेणं जायामेणं जह० अंगुलस्स असं० उक्को० लोगंताओ लोगंते,*

एगिंदियस्स णं भंते ! मारणंतियसमुग्घाएणं समोहयस्स तेयासरीरस्स केमहालिया सरीरो० गो० ! एवं चेव, जाव पुढवि० आउ० तेउ० वाउ० वणप्फइकइयस्स, बेइंदियस्स णं भंते ! मारणंतियसमु० समो० तेयासरीरस्स केमहा० ?, गो० ! सरीरप्पमाणमेत्ता विक्खंभबाहल्लेणं आयामेणं जह० अंगुलस्स असंखे० उक्को० तिरियलोगाओ लोगंते, एवं जाव चउरिंदियस्स,

नेरइयस्स णं भंते ! मार० समु० समो० तेयासरीरस्स केमहा० ?, गो० ! सरीरप्पमाणमेत्ता विक्खंभबाहल्लेणं आयामेणं जह० सातिरेकं जोयणसहस्सं उक्को० अधे जाव अहेसत्तमा पुढवी तिरियं जाव सयंभुरमणसमुद्दे उड्ढं जाव पंडगवणे पुक्खरिणीतो, पंचिंदियतिरिक्खजोणियस्स णं भंते ! मार० समु० समो० तेयासरीरस्स य केमहा० ?, गो० ! जहा बेइंदियसरीरस्स, मणुस्सस्स णं भंते ! मार० समु० समो० तेयासरीरस्स केमहा० ?, गो० ! समयखेत्ताओ लोगंतो,

असुरकुमारस्स णं भंते ! मारणंतियसमुग्घाएणं समोहयस्स तेया० केम० ?, गो० ! सरीरप्पमाणमेत्ता विक्खंभबाहल्लेणं आयामेणं जह० अंगुलस्स असंखे उक्को० अधे जाव तच्चाए पुढवीए हिट्ठिल्ले चरमंते तिरियं जाव सयंभुरमणसमुद्दस्स बाहिरिल्ले वेइयंते उड्ढं जाव इसीपब्भारा पुढवी, एवं जाव थणियकुमारतेयगसरीरस्स, वाणमंतरजोइसियसोहम्मीसाणगा य एवं चेव,

सणंकुमारदेवस्स णं भंते ! मारणंतियसमुग्घाएणं समोहयस्स तेयासरीरस्स केमहालि ?, गो० ! सरीरप्पमाणमेत्ता विक्खंभबाहल्लेणं आयामेणं जह० अंगु० असं० उक्को० अधे जाव महापातालाणं दोच्चे तिभागे, तिरियं जाव सयंभुरमणे समुद्दे उड्ढं जाव अच्चुओ कप्पो, एवं जाव सहस्सारदेवस्स अच्चुओ कप्पो, आणयदेवस्स णं भंते ! मार० समु० समो० तेयास० केम० ?, गो० ! सरीरप्पमाणमेत्ता विक्खंभबाहल्लेणं आयामेणं जह० अंगु० असं० उक्को० जाव अधोलोइयगामा, तिरियं जाव मणूसखेत्ते उड्ढं जाव अच्चुओ कप्पो, एवं जाव आरणदेवस्स अच्चुअदेवस्स एवं चेव, नवरं उड्ढं जाव सयाइं विमाणाति,

गेविज्जगदेवस्स णं भंते ! मारणंतियसमु० समो० तेयग० केम० ?, गो० ! सरीरमानमेत्ता विक्खंभबाहल्लेणं आयामेणं जह० विज्जाहरसेढीतो उक्को० जाव अहोलोइगामा तिरियं जाव मणूसखेत्ते उड्ढं जाव सगाति विमाणाति, अनुत्तरोववाइयस्सवि एवं चेव।

कम्मगसरीरे णं भंते ! कतिविधे पं० ?, गो० ! पंचविधे पं० तं०–एगिंदियकम्मगसरीरे जाव पंचिंदिय० य, एवं जहेव तेयगसरीरस्स भेदो संठाणं ओगाहणा य भणिता तहेव निरवसेसं भाणितव्वं जाव अनुत्तरोववाइयत्ति।

वृ. 'जीवस्स णं भंते !' इत्यादि, जीवस्य नैरयिकत्वादिविशेषणाविवक्षायां सामान्यतः-संसारिणो णमिति वाक्यालङ्कारे मारणान्तिकसमुद्घातेन वक्ष्यमाणलक्षणनेन समवहतस्य सतः 'केमहालिया' इति किंमहती किंप्रमाणमहत्वा शरीरावगाहना ?, शरीरमौदारिकादिकमप्यस्ति तत आह–तैजसशरीरस्य, प्रज्ञप्ता ?, भगवानाहशरीरप्रमाणमात्रा विष्कम्भबाहल्येन, विष्कम्भश्च बाहल्यं च विष्कम्भबाहल्यं समाहारो द्वन्द्वस्तेन, विष्कम्भेन बाहल्येन चेत्यर्थः, तत्र विष्कम्भ उदरादिविस्तारः बाहल्यमुरःपृष्ठस्थूलता आयामो दैर्घ्यं, तत्रायामेन जघन्यतोऽङ्गुलस्यासङ्ख्येयभागः–अङ्गुलासङ्ख्येयभागप्रमाणा, इयं च एकेन्द्रियस्यैकेन्द्रियेष्वत्यासन्नमुत्पद्यमानस्य द्रष्टव्या, उत्कर्षतोलोकान्तात् लोकान्तः, किमुक्तं भवति ?–

अधोलोकान्तादारभ्य यावदूर्ध्वलोकान्त ऊर्ध्वलोकान्तादारभ्य यावदधोलोकान्तस्तावत्प्रमाण इति, इयं च सूक्ष्मस्य बादरस्य वा एकेन्द्रियस्य वेदितव्या, न शेषस्यासम्भवात्, एकेन्द्रिया हि सूक्ष्मा बादराश्च यथायोगं समस्तेऽपि लोके वर्त्तन्ते न शेषास्ततो यदा सूक्ष्मो बादरो वा एकेन्द्रियोऽधोलोके वर्त्तमान ऊर्ध्वलोकान्ते सूक्ष्मतया बादरतया वोत्पत्तुमिच्छति ऊर्ध्वलोकान्ते वा वर्त्तमानः सूक्ष्मो बादरो वा अधोलोकान्ते सूक्ष्मतया बादरतया वोत्पत्स्यते तदा तस्य मारणान्तिकसमुद्घातेन समवहतस्य यथोक्तप्रमाणा तैजसशरीरावगाहना भवति, एतेन पृथिव्यप्तेजोवायुवनस्पतिसूत्राण्यपि भावितानि द्रष्टव्यानि, तथाहि– सूक्ष्मपृथिवीकायिकोऽधोलोके ऊर्ध्वलोके वा वर्त्तमानो यदा सूक्ष्मपृथिवीकायिकादितया बादरवायुकायिकतया वा ऊर्ध्वलोके अधोलोके वा समुत्पत्तुमिच्छति तदा भवति तस्य मारणा न्तिकसमुद्घातेन समवहतस्योत्कर्षतो लोकान्तात्त लोकान्तं यावत् तैजसशरीरावगाहना, एवमप्कायिकादिष्वपि भाव्यं,

द्वीन्द्रियसूत्रे आयामेन जघन्यतोऽङ्गुलासङ्ख्येयभागप्रमाणा यदा अपर्याप्तो द्वीन्द्रियोऽङ्गुलासङ्ख्येयभागप्रमाणौदारिकशरीरः स्वप्रत्यासन्नप्रदेशे एकेन्द्रियादितयोत्पद्यते तदा अवसेया, अथवा यस्मिन् शरीरे स्थितःसन् मारणान्तिकसमुद्घातं करोति तस्मात् शरीरात् मारणान्तिकसमुद्घातवशात् बहिर्विनिर्गततैजशरीरस्यायामविष्कम्भविस्तारैरवगाहना चिन्त्यते न तत् शरीरसहितस्य, अन्यथा भवनपत्यादेर्यज्जघन्यतोऽङ्गुलसङ्ख्येयभागत्वं वक्ष्यते तद्विरुध्येत, भवनपत्यादिशरीराणां सप्तादिहस्तप्रमाणत्वात्, ततो महाकायोऽपि द्वीन्द्रियो यदा स्वप्रत्यासन्नदेशे एकेन्द्रियतयोत्पद्यते तदाप्यङ्गुलासङ्ख्येयभागप्रमाणा वेदितव्या, उत्कर्षतस्तिर्यग्लोकाल्लोकान्तः, किमुक्तं भवति ?–तिर्यग्लोकादधोलोकान्तो ऊर्ध्वलोकान्तो वा यावता भवति तावत्प्रमाणा इत्यर्थः, कथमेतावत्प्रमाणेति चेत्, उच्यते, इह द्वीन्द्रिया एकेन्द्रियेष्वप्युत्पद्यन्ते, एकेन्द्रियाश्च सकललोकव्यापिनः, ततो यदा तिर्यग्लोकस्थितो द्वीन्द्रिय ऊर्ध्वलोकान्ते अधोलोकान्ते वा एकेन्द्रियतया समुत्पद्यते तदा भवति तस्य मारणान्तिकसमुद्घातसमवहतस्य यथोक्तप्रमाणा तैजसशरीरावगाहना, तिर्यग्लोकग्रहणं च प्रायस्तेषां तिर्यग्लोकः स्वस्थानमिति कृतमन्यथा अधोलोकैकदेशेऽप्यधोलौकिकग्रामादौ ऊर्ध्वलोकैकदेशेऽपि पण्डकवनादौ द्वीन्द्रियः सम्भवतीति तदपेक्षयाऽतिरिक्ताऽपि तैजसशरीरावगाहना द्रष्टव्या, एवं त्रिचतुरिन्द्रियसूत्रे अपि भावनीये ।

नैरयिकसूत्रे आयामेन जघन्यतो यत्सातिरेकं योजनसहस्रमुक्तं तदेवं परिभावनीयम्–इह वलयामुखादयश्चत्वारः पातालकलशाः लक्षयोजनावगाहा योजनसहस्रबाहल्यठिक्करिकाः, तेषामधस्त्रिभागो वायुपरिपूर्ण उपरितनस्त्रिभाग उदकपरिपूर्णो मध्यत्रिभागो वायूदकयोरुत्सरणापसरणधर्मा, तत्र यदा कश्चित्सीमन्तकादिषु नरकेन्द्रकेषु वर्त्तमानो नैरयिकः पातालकलशप्रत्यासन्नवर्ती च स्वायुःक्षयागदुद्वृ त्य पातालकलशकुड्यं योजनसहस्रबाहल्यं भित्त्वा पातालकलशमध्ये द्वीतीये तृतीये वा त्रिभागे मत्स्यतयोत्पद्यते तदा भवति सातिरेकयोजनसहस्रमाना नैरयिकस्य मारणान्तिकसमुद्घातसमवहतस्य जघन्या तैजशरीरावगाहना, उत्कर्षतो यावदधः सप्तमपृथिवी तिर्यक् यावत्स्वयम्भूरमणसमुद्रपर्यन्त ऊर्ध्वं यावत्पण्डकवने पुष्करिण्यस्तावद् द्रष्टव्या, किमुक्तं भवति अधः सप्तमपृथिव्या आरभ्य तिर्यग् यावत् स्वयम्भूरमणपर्यन्त ऊर्ध्वं यावत् पण्डकवनपुष्करिण्यस्तावत्प्रमाणा, एतावती च तदा लभ्यते यदाऽधः सप्तमपृथिवीनारकःस्वयम्भूरमणसमुद्रपर्यन्ते

मत्स्यतयोत्पद्यते पण्डकवने पुष्करिणीषु चेति, तिर्यक्पञ्चेन्द्रियस्योत्कर्षतस्तिर्यग्लोकाल्लोकान्तोऽत्रापि भावना द्वीन्द्रियवत्कर्त्तव्या, तिर्यक्पञ्चेन्द्रियस्यैकेन्द्रियेषूत्पादसम्भवात्, ।

मनुष्यस्योत्कर्षतः समयक्षेत्रात्, समयप्रधानं क्षेत्रं समयक्षेत्रं मयूरव्यंसकादित्वान्मध्यपदलोपी समासः, यस्मिन् अर्द्धतृतीयद्वीपप्रमाणे सूर्यादिक्रियाव्यङ्ग्यः समयो नाम कालद्रव्यमस्ति तत्समयक्षेत्रं मानुषक्षेत्रमिति भावस्तस्मात्, यावदध ऊर्ध्वं वा लोकान्तस्तावदमाणा, मनुष्यस्याप्येकेन्द्रियेषूत्पादसम्भवात्, समयक्षेत्रग्रहणं समयक्षेत्रादन्यत्र मनुष्यजन्मनः संहरणस्य चासम्भवेनातिरिक्तायाः अवगाहनाया असम्भवात् ।

असुरकुमारादिस्तनितकुमारापर्यवसानभवनपतिव्यन्तरज्योतिष्कसौधर्मेशानदेवानां जघन्यतोऽङ्गुलासङ्ख्येयभागः, कथमिति चेत्, उच्यते, एते ह्येकेन्द्रियेषूत्पद्यन्ते ततो यदा ते स्वाभरणेष्वङ्गदादिषु कुण्डलादिषु वा ये मणयः पद्मरागादयस्तेषु गृद्धा मूर्च्छितास्तदध्यवसायिनस्तेष्वेव शरीरस्थेष्वाभरणादिषु पृथिवीकायिकत्वेनोत्पद्यन्ते तदा भवति जघन्यतोऽङ्गुलासङ्ख्येयभागप्रमाणा तैजसशरीरावगाहना, अन्ये त्वन्यथाऽत्र भावनिकां कुर्वन्ति, सा च नातिश्लिष्टेति, न लिखिता न च दूषिता, 'कुमार्गं न हि तित्यक्षुः, पुनस्तमनुधावती'ति न्यायानुसरणात्, उत्कर्षतो यावदधस्तृतीयस्याः पृथिव्या अधस्तनश्चरमान्तः तिर्यक् यावत्स्वयम्भूरमणसमुद्रस्य बाह्यो वेदिकान्त ऊर्ध्वं यावत् ईषत्प्राग्भारा पृथिवी तावत् द्रष्टव्या, कथमिति चेत्, उच्यते, यदा भवनपत्यादिको देवस्तृतीयस्याः पृथिव्या अधस्तनं चरमान्तं यावत् कुतश्चित्प्रयोजनवशाद् गतो भवति, तत्र च गतःसन् कथमपि [illegible] तिर्यक् स्वयम्भूरमणसमुद्रस्य बाह्यो वेदिकान्तो यदिवा ईषत्प्राग्भारामिधपृथिवीपर्यन्ते पृथिवीकायिकतयोत्पद्यते तदा भवत्युत्कर्षतो यथोक्ता तता तैजसशरीरावगाहना,

सनत्कुमारदेवस्यापि जघन्यतोऽङ्गुलासङ्ख्येयभागप्रमाणा तैजसशरीरावगाहना, कथमिति चेत्, उच्यते, इह सनत्कुमारादय एकेन्द्रियेषु विकलेन्द्रियेषु वा नोत्पद्यन्ते, तथा भवस्वाभाव्यात्, किन्तु तिर्यक्पञ्चेन्द्रियेषु मनुष्येषु वा, ततो यदा मन्दरादिपुष्करिण्यादिषु जलावगाहं कुर्वतां स्वभवायुःक्षयात् तत्रैव स्वप्रत्यासन्ने देशे मत्स्यतयोत्पद्यन्ते तदा अङ्गुलासङ्ख्येयभागप्रमाणा द्रष्टव्या, अथवा पूर्वसम्बन्धिनीं मनुष्यस्त्रियं मनुष्येणोपभुक्तामुपलभ्य गाढानुरागादिहागत्य परिष्वजते परिष्वज्य च तदवाच्यप्रदेशे स्वावाच्यं प्रक्षिप्य कालं कृत्वा तस्या एव गर्भे पुरुषबीजे समुत्पद्यते तदा लभ्यते, उत्कर्षतोऽधः पातालकलशानां लक्षयोजनप्रमाणावगाहानां द्वितीयत्रिभागं यावत् तिर्यग् यावत् स्वयम्भूरमणसमुद्रपर्यन्त ऊर्ध्वं यावदच्युतकल्पस्तावदवगन्तव्या, कथमिति चेत्, उच्यते, इह सनत्कुमारादिदेवानामन्यदेवनिश्रया अच्युतकल्पं यावद् गमनं भवति, न च तत्र वाप्यादिषु मत्स्यादयःसन्ति तत इह तिर्यग्मनुष्येषूपपत्तव्यं, तत्र यदा सनत्कुमारदेवोऽन्यदेवनिश्रया अच्युतकल्पं गतो भवति तत्र च गतः सन् स्वायुःक्षयात्कालं कृत्वा तिर्यक् स्वयंभूरमणपर्यन्ते यदिवाऽधः पातालकलशानां द्वितीयत्रिभागे वायूदकयोरुत्सरणापसरणभाविनि मत्स्यादितयोत्पद्यते तदा भवति तस्य तिर्यगधो वा यथोक्तक्रमेण तैजसशरीरावगाहनेति,

'एवं जाव सहस्सारदेवस्स'त्ति एवं–सनत्कुमारदेवगतेन प्रकारेण जघन्यत उत्कर्षतश्च तैजसशरीरावगाहना तावद्वाच्या यावत्सहस्रारदेवेभ्यः, भावनाऽपिसर्वत्रापि समाना, आनत-

देवस्यापि जघन्यतोऽङ्गुलासङ्ख्येयभागप्रमाणा तैजसशरीरावगाहना, नन्वानतादयो देवा मनुष्येष्वेवोत्पद्यन्ते मनुष्याश्च मनुष्यक्षेत्र एवेति कथमङ्गुलासङ्ख्येयभागप्रमाणा ?, उच्यते, इह पूर्वसम्बन्धिनीं मनुष्यस्त्रियमन्येन मनुष्येणोपभुक्तामानतदेवः कश्चनाप्यवधिज्ञानत उपलभ्यासन्नमृत्युतया विपरीतस्वभावत्वात् सत्त्वचरितवैचित्र्यात् कर्मगतेरचिन्त्यत्वात् कामवृत्तेर्मिलिनत्वाच्च, उक्तं च–

॥१॥ "सत्त्वानां चरितं चित्रं, विचित्रा कर्मणां गतिः ।
मलिनत्वं च कामानां, वृत्तेः पर्यन्तदारुणा ॥" इति,

गाढानुरागादिहागत्य नकुलोपगूहं तां परिष्वज्य तदवाच्यप्रदेशे स्ववाच्यं प्रक्षिप्यातीव मूर्च्छितः स्वायुःक्षयात् कालं कृत्वा यदा तस्या एव गर्भे मनुष्यबीजे मनुष्यत्वेनोत्पद्यते, मनुष्यबीजं च जघन्यतोऽन्तर्मुहूर्त्तमुत्कर्षतो द्वादश मुहूर्त्तान् यावदवतिष्ठति, उक्तं च–

"मणुस्सबीए णं भंते ! कालतो केवच्चिरं होइ ?, गो० ! जह० अंतो० उक्कोसेणं बारस मुहुत्ता" इति, ततो द्वादशमुहूर्त्ताभ्यन्तर उपभुक्तां परिष्वज्य मृतस्य तत्रैवोत्पत्तिर्मनुष्यत्वेन द्रष्टव्या, उत्कर्षतोऽधो यावदधोलौकिका ग्रामास्तिर्यग् यावन्मनुष्यक्षेत्रं ऊर्ध्वंयावदच्युतः कल्पस्तावदवसेया, कथमिति चेत्, उच्यते, इह यदाऽऽनतदेवः कस्याप्यन्यस्य देवस्य निश्रया अच्युतकल्पं गतो भवति, स च तत्र गतः सन् कालं कृत्वाऽधोलौकिकग्रामेषु यदिवा मनुष्यक्षेत्रपर्यन्ते मनुष्यत्वेनोत्पद्यते तदा लभ्यते, एवं प्राणतारणाच्युतकल्पदेवानामपि भावनीयं, तथा चाह–

'एवं जाव आरणदेवस्स, अच्चुयदेवस्स एवं चेव, नवरं उड्ढं जाव सयाइं विमाणाइं' इति, अच्युतदेवस्यापि जघन्यतः उत्कर्षतश्च तैजसशरीरावगाहना एवमेव–एवंप्रमाणैव, परं सूत्रपाठे 'उड्ढं जाव सयाइं विमाणाइं' इति वक्तव्यं, नतु 'उड्ढं जाव अच्चुओ कप्पो' त्ति, अच्युतदेवो हि यदा चिन्त्यते तदा कथमूर्ध्वंयावदच्युतः कल्प इति घटते ?, तस्य तत्र विद्यमानत्वात्, केवलमच्युतदेवोऽपि कदाचिदूर्ध्वं स्वविमानपर्यन्तं यावद् गच्छति तत्र च गतः सन् कालमपि करोति तत उक्तम्– 'उड्ढं जाव सयाइं विमाणाइं' इति, ग्रैवेयकानुत्तरसुरा भगवद्वन्दनादिकमपि तत्रस्था एव कुर्वन्ति तत इहागमनासम्भवात् अङ्गुलासङ्ख्येयभागप्रमाणता न लभ्यते, किन्तु यदा वैताढ्यगतासु विद्याधरश्रेणिषूत्पद्यन्ते तदा स्वस्थानादारभ्याधो यावद्विद्याधरश्रेणयस्तावत्प्रमाणा जघन्या तैजसशरीरावगाहना, अतोऽपि मध्ये जघन्यतरायाः असम्भवात्, उत्कृष्टा यावदधोलौकिका ग्रामास्ततोऽप्यध उत्पादासम्भवात्, तिर्यग्यावन्मनुष्यक्षेत्रपर्यन्तस्ततः परं तिर्यगप्युत्पादाभावात्, यद्यपि हि विद्याधरा विद्याधर्यश्च नन्दीश्वरं यावद् गच्छन्ति अर्वाक् सम्भोगमपि कुर्वन्ति तथापि मनुष्यक्षेत्रात् परतो गर्भे मनुष्येषु नोत्पद्यन्ते ततस्तिर्यग्यावत् मनुष्यक्षेत्रमित्युक्तं ।

तदेवमुक्तानि तैजसशरीरस्य विधिसंस्थानावगाहनामानानि, सम्प्रति कार्मणस्य वक्तव्यानि, कार्मणं च तैजससहाविनाभावि तैजसवच्च जीवप्रदेशानुरोधि संस्थानं ततो यथैव तैजसशरीरस्योक्तानि तथैव कार्मणस्यापि वक्तव्यानि, तथा चाह–'एवं जहेव तेयगसरीरस्स भेदो संठाणमोगाहणा य भणिता तहेव निरवसेसं भाणितव्वं जाव अणुत्तरोववाइय'त्ति ॥

उक्तानि पञ्चानामपि शरीराणां विधिसंस्थानावगाहनामानानि, सम्प्रति पुद्गलचयनमाह–

सू. (५२२) ओरालियसरीरस्स णं भंते! कतिदिसिं पोग्गला चिज्जंति ?, गो० ! निव्वाघएणं छद्दिसिं वाघाये पडुच्च सिय तिदिसिं सिय छद्दिसिं सिय पंचदिसिं, वेउव्वियसरीरस्स णं भंते !

कतिदिसिं पोग्गलाचिज्जंति ?, गो० ! नियमा छद्दिसिं, एवं आहारगसरीरस्सवि, तेयाकम्मगाणं जहा ओरालियसरीरस्स ।

ओरालियसरीरस्स णं भंते ! कतिदिसिं पोग्गला उवचिज्जंति ?, गो० ! एवं चेव जाव कम्मगसरीरस्स, एवं उवचिज्जंति, अवचिज्जंति ।

जस्स णं भंते ? ओरालियसरीरं तस्स वेउव्वियसरीरं जस्स वेउव्वियसरीरं तस्स ओरालियसरीरं ?, गो० ! जस्स ओरालियसरीरं तस्स वेउव्वियसरीरं सिय अत्थि सिय नत्थि, जस्स वेउव्वियसरीरं तस्स ओरालियसरीरं सिय अत्थि सिय नत्थि,

जस्स णं भंते ! ओरालियसरीरं तस्स आहारगसरीरं जस्स आहारगसरीरं तस्स ओरालियसरीरं गो० ! जस्स ओरालियसरीरं तस्स आहारगसरीरं सिय अत्थि सिय नत्थि, जस्स पुण आहारगसरीरं तस्स ओरालियसरीरं नियमा अत्थि,

जस्स णं भंते ! ओरालियसरीरं तस्स तेयगसरीरं जस्स तेयगसरीरं तस्स ओरालियसरीरं गो० ! जस्स ओरालियसरीरं तस्स तेयगसरीरं नियमा अत्थि जस्स पुण तेयगसरीरं तस्स ओरालियसरीरं सिय अत्थि सिय नत्थि, एवं कम्मगसरीरंपि,

जस्स णं भंते ! वेउव्वियसरीरं तस्स आहारगसरीरं जस्स आहारगसरीरं तस्स वेउव्वियसरीरं गो० ! जस्स वेउव्वियसरीरं तस्स आहारगसरीरं नत्थि, जस्सवि आहारगसरीरं तस्सवि वेउव्वियसरीरं नत्थि, तेयाकम्मातिं जहा ओरालियएण समं तहेव आहारगसरीरेणवि समं तेयाकम्मगातिं चारेयव्वाणि, । जस्स णं भंते ! तेयगसरीरं तस्स कम्मगसरीरं जस्स कम्मगसरीरं तस्स तेयगसरीरं ?, गो० ! जस्स तेयगसरीरं तस्स कम्मगसरीरं नियमा अत्थि, जस्सवि कम्मगसरीरं तस्सवि तेयगसरीरं नियमा अत्थि ।

वृ. 'ओरालियसरीरस्स णं भंते !' इत्यादि, औदारिकशरीरस्य 'ण'मिति वाक्यालङ्कारे भदन्त! 'कइदिसिं' इति पञ्चम्यर्थे द्वितीया बहुवचने चैकवचनं प्राकृतत्वात्, ततोऽयमर्थः--कतिभ्यो दिग्भ्यःसमागत्य पुद्गलाश्चीयन्ते, कर्मकर्तृप्रयोगः, स्वयं चयनमागच्छन्तीत्यर्थः-, भगवानाह--निर्व्याघातेन --व्याघातस्याभावो निर्व्याघातमव्ययीभावः 'तेन वा तृतीयाया' इति विकल्पेनान्विधानान्नान्नाभावः 'छद्दिसिं'ति षड्भ्यो दिग्भ्यः, किमुक्तं भवति ?--यत्र त्रसनाड्या मध्ये बहिर्वा व्यवस्थितस्यौदारिकशरीरिणो नैकापि दिगू अलोकेन व्याहता वर्त्तते तत्र निर्व्याघाते व्यवस्थितस्य नियमात् षड्भ्यो दिग्भ्यः पुद्गलानामागमनं,

व्याघातं --अलोकेन प्रतिस्खलनं प्रतीत्य 'सिय तिदिसिं'ति स्यात्--कदाचित्तिसृभ्यो दिग्भ्यः स्याच्चतसृभ्यः स्यात् पञ्चभ्यः, कथमिति चेत्, उच्यते, सूक्ष्मजीवस्यौदारिकशरीरिणो यत्रोर्ध्वं लोका-काशं न विद्यते नापि तिर्यक् पूर्वदिशि नापि दक्षिणदिशि तस्मिन् सर्वोर्ध्वप्रतरे आग्नेयकोणरूपे लोकान्ते व्यवस्थितस्याधः पश्चिमोत्तररूपाभ्यस्तिसृभ्यो दिग्भ्यः पुद्गलोपचयः शेषदिक्त्रयस्यालोकेन व्याप्तत्वात्, पुनः स एव सूक्ष्मजीव औदारिकशरीरी पश्चिमां दिशमनुसृत्य तिष्ठति तदा पूर्वदिगस्याधिका --जातेति चतसृभ्यो दिग्भ्यः पुद्गलानामागमनं, यदा पुनरधो द्वितीयादिप्रतरे गतः पश्चिमदिशमवलम्ब्य तिष्ठति तदा ऊर्ध्वदिगप्यधिका लभ्यते केवला दक्षिणैव दिगलोकेन व्याहतेति पञ्चभ्यो दिग्भ्यः पुद्गलानामागमनं, वैक्रियशरीरमाहारकशरीरं च त्रसनाड्या मध्य एव सम्भवति नान्यत्रेति

तयोरपि पुद्गलचयो नियमात् षड्भ्यो दिग्भ्य.,

तैजसकार्मणे सर्वसंसारिणां, ततो यथौदारिकस्य निर्व्याघातेन षड्भ्यो दिग्भ्यो व्याघातं प्रतीत्य पुनः स्यात् त्रिदिग्भ्यः स्याच्चतुर्दिग्भ्यः स्यात् पञ्चदिग्भ्यः तथा तैजसकार्मणयोरपि द्रष्टव्यः, यथा चयस्तथा उपचयोऽपचयश्च वक्तव्यः, तत्र उपचयः—प्राभूत्येन चयः अपचयो—ह्रासः शरीरेभ्यः पुद्गलानां विचटनमितियावत् । उक्तं पुद्गलचयनमिदानीं शरीरसंयोगमाह–

'जस्स णं भंते !' इत्यादि, यस्यौदारिकं तस्य वैक्रियं स्यादस्ति स्यान्नास्ति, य औदारिकशरीरी सन् वैक्रियलब्धिमान् वैक्रियमारभ्य तत्र वर्त्तते तस्यास्ति शेषस्य नास्तीति भावः, यस्य वैक्रियशरीरं तस्यौदारिकशरीरं स्यादस्ति स्यान्नास्ति, देवनारकाणां वैक्रियशरीरवतामौदारिकशरीरं नास्ति तिर्यग्मनुष्याणां तु वैक्रियशरीरवतामस्तीति भावार्थः, आहारकशरीरेणापि सह चिन्तायां यस्यौदारिकशरीरं तस्याहारकशरीरं स्यादस्ति स्यान्नास्ति, य औदारिकशरीरी चतुर्दशपूर्वधर आहारकलब्धिमान् आहारकशरीरमारभ्य वर्त्तते तस्यास्ति शेषस्य नास्तीत्यर्थः, यस्य पुनराहारकशरीरं तस्यौदारिकशरीरं नियमादस्ति, औदारिकशरीरविरहे आहारकलब्धेरप्यसम्भवात्, तैजसशरीरेण सह चिन्तायां यस्यौदारिकशरीरं तस्य नियमात्तैजसशरीरं, तैजसशरीरविरहे औदारिकशरीरासम्भवात्, यस्य पुनस्तैजसशरीरं तस्यौदारिकं स्यादस्ति स्यान्नास्ति, देवनैरयिकाणां नास्ति तिर्यग्मनुष्याणामस्तीति भावः, एवं कार्मणशरीरेणापि सह चिन्ता कर्त्तव्या, तैजसकार्मणयोः सहचारित्वात्, सम्प्रति वैक्रियशरीरस्याहारकशरीरादिभिः सह संयोगचिन्तां कुर्वन्नाह–

'जस्स णं भंते !' इत्यादि, यस्य वैक्रियशरीरं न तस्याहारकशरीरं यस्याहारकशरीरं न तस्य वैक्रियशरीरं, समकालमनयोरेकस्यासम्भवात्, तैजसकार्मणे यथौदारिकशरीरेण सह चिन्तिते तथा वैक्रियशरीरेणापि सह चिन्तयितव्ये, आहारकशरीरेणापि सह तथैव, तैजसकार्मणयोस्तु परस्परमविनाभावित्वात् यस्य तैजसं तस्य नियमात् कार्मणं यस्य कार्मणं तस्य कार्मणं तस्य नियमात् तैजसम् । गतं संयोगद्वारम्, इदानीं द्रव्यप्रदेशोभयैरल्पबहुत्वमिधित्सुराह–

सू. (५२३) *एतेसि णं भंते ! ओरालियवेउव्वियआहारगतेयगकम्मगसरीराणं दव्वट्ठयाए पदेसट्ठयाए दव्वट्ठपएसट्ठयाते कयरे२हिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा आहारगसरीरा दव्वट्ठयाते वेउव्वियसरीरा दव्वट्ठयाए असंखेज्जगुणा ओरालियसरीरा दव्वट्ठयाते असं० तेयाकम्मगसरीरा दोवि तुल्ला दव्वट्ठयाते अनंतगुणा,*

पदेसट्ठयाए सव्वत्थोवा आहारगसरीरा पदे० वेउव्वियसरीरा पदे० असं० ओरालियसरीरा पदे० असं० तेयगसरीरा पदे० अनं० कम्मगसरीरा पदे० अनं०,

दव्वट्ठपदेसट्ठयाते सव्वत्थोवा आहारगसरीरा दव्वट्ठयाते वेउव्वियसरीरा दव्वट्ठाए असं० ओरालियसरीरा दव्वट्ठयाए असं० ओरालियसरीरेहिंतो दव्वट्ठयाएहिंतो आहारगसरीरा पदेसट्ठयाए अनं० वेउव्वियसरीरा पदे० असं० ओरालियसरीरा० पदे० असंखेज्जगुणा तेयाकम्मा दोवि तुल्ला दव्वट्ठयाए अनं० तेयगसरीरा पदे० अनंतगुणा कम्मगसरीरा पदे० अनं०

वृ. 'एएसि णं भंते !' इत्यादि, सर्वस्तोकान्याहारकशरीराणि द्रव्यार्थतया, शरीरमात्रद्रव्यसङ्ख्यया इत्यर्थः, उत्कृष्टपदेऽपि तेषां सहस्रपृथक्त्वस्य प्राप्यमाणत्वात्, 'उक्कोसेण उ जुगवं पुहुत्तमेत्तं

सहस्साण'मिति वचनात् तेभ्योऽपि वैक्रियशरीराणि द्रव्यार्थतया असङ्ख्येयगुणानि,

सर्वेषां नैरयिकाणां सर्वेषां च देवानां कतिपयतिर्यक्पञ्चेन्द्रियमनुष्यबादरवायुकायिकानां च वैक्रियशरीरसम्भवात्, तेभ्योऽप्यौदारिकशरीराणि द्रव्यार्थतया असङ्ख्येयगुणानि, पृथिव्यप्तेजोवायुवनस्पतिद्वित्रिचतुरिन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्याणामौदारिकशरीरभावात्, पृथिव्यप्तेजोवायुवनस्पतिशरीराणां च प्रत्येकमसङ्ख्येयलोकाकाशप्रदेशप्रमाणत्वात्, तेभ्योऽपि तैजसकार्मणशरीराणि द्रव्यार्थतयाऽनन्तगुणानीति, सूक्ष्मबादरनिगोदजीवानामनन्तानन्तानां प्रत्येकं तैजसकार्मणशरीरभावात्, स्वस्थाने तु परस्परं तुल्यानि, परस्परविनाभावित्वादेकस्याभावेऽन्यस्याप्यभावात्, ।

प्रदेशार्थचिन्तायां सर्वस्तोकान्याहारकशरीराणि सहस्रपृथक्त्वमात्रशरीरप्रदेशानामल्पत्वात्, तेभ्योऽपि वैक्रियशरीराणि प्रदेशार्थतया असङ्ख्येयगुणानि, इह यद्यपि वैक्रियशरीरयोग्यवर्गणाभ्य आहारकशरीरवर्गणाः परमाण्वपेक्षया अनन्तगुणास्तथापि स्तोकाभिर्वर्गणाभिराहारकशरीरं निष्पद्यते हस्तमात्रत्वादतिप्रभूताभिर्वैक्रियशरीरवर्गणाभिर्वैक्रियं उत्कर्षतः सातिरेकलक्षयोजनप्रमाणत्वात् अतिस्तोकानि चाहारकशरीराणि सहस्रपृथक्त्वेन प्राप्यमाणत्वात् अतिप्रभूतानि वैक्रियशरीराणि असङ्ख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणत्वात् तत उपपद्यन्ते आहारकशरीरेभ्यः प्रदेशार्थतया वैक्रियशरीराण्टयसङ्ख्येयगुणानि, ।

तेभ्योऽप्यौदारिकशरीराणि प्रदेशार्थतया असङ्ख्येयगुणानि, असङ्ख्येयलोकाकाशप्रदेशप्रमाणतया तेषां लभ्यमानत्वेन तत्प्रदेशानामतिप्रभूतानां सम्भवात्, तेभ्योऽपि तैजसशरीराणि प्रदेशार्थतया अनन्तगुणानि, द्रव्यार्थतयाऽपि तेभ्यस्तेषामनन्तगुणत्वात्, तेभ्योऽपि कार्मणशरीराणि प्रदेशार्थतया अनन्तगुणानि, तैजसवर्गणाभ्यः कार्मणवर्गणानां परमाण्वपेक्षयाऽनन्तगुणत्वात्, द्रव्यार्थप्रदेशार्थचिन्तायां 'सव्वत्थोवा आहारगसरीरा दव्वट्ठयाए वेउव्वियसरीरा दव्वट्ठयाए असंखेज्जगुणा ओरालियसरीरा दव्व० असं०' इत्यत्र भावना प्रागुक्ताऽनुसर्तव्या, तेभ्यो द्रव्यार्थतयौदारिकशरीरेभ्य आहारकशरीराणि प्रदेशार्थतयाऽनन्तगुणानि, औदारिकशरीराणि सर्वसङ्ख्याऽप्यसङ्ख्येयलोकाकाशप्रदेशप्रमाणानि,

आहारकशरीरयोग्यवर्गणायां त्वेकैकस्यामप्यभव्येभ्योऽनन्तगुणाः परमाणव इति, तेभ्योऽपि वैक्रियशरीराणि प्रदेशार्थतया असङ्ख्येयगुणानि, तेभ्योऽप्यौदारिकशरीराणि प्रदेशार्थतया असङ्ख्येयगुणानि, अत्र भावना प्रागेव कृता, तेभ्योऽपि तैसजकार्मणानि द्रव्यार्थतया अनन्तगुणानि अतिप्रभूतानन्तसङ्ख्येयोपेतत्वात्, तेभ्योऽपि तैजसशरीराणि प्रदेशार्थतयाऽनन्तगुणानि, अनन्तपरमाण्वात्मिकाभिरननताभि(र्वर्गणाभि)रेकैकस्य तैजसशरीरस्य निष्पाद्यत्वात्, तेभ्योऽपि कार्मणशरीरराणि प्रदेशार्थतयाऽनन्तगुणानि, अत्र कारणं प्रागेवोक्तं ।

तदेवं पञ्चानामपि शरीराणां द्रव्यप्रदेशोभयैरल्पबहुत्वमुक्तम्, इदानीं जघन्योत्कृष्टोभयावगाहनाविषमल्पबहुत्वमाह--

मू. (५२४) एतेसि णं भंते ! ओरालियवेउव्वियआहारगतेयगकम्मगसरीराणं जहन्नियाए ओगाहणाए उक्कोसियाए ओगाहणाए जहन्नुक्कोसियाए ओगाहणाए कतरे२हिंतो अप्पा वा ४ गो० ! सव्वत्थोवा ओरालियसरीरस्स जहन्निया ओगाहणा,

तेयाकम्मगाणं दोण्हवि तुल्ला जहन्निया ओगाहणा विसे० वेउव्वियसरीरस्स जहन्निया ओगाहणा असं० आहारगसरीरस्स जहन्निया ओगाहणा असं०, उक्कोसियाए ओगाहणाए सव्वत्थोवा आहारगसरीरस्स उक्कोसिया ओगाहणा ओरालियसरीरस्स उक्कोसिया ओगाहणा संखे० वेउव्वियसरीरस्स उक्कोसिया ओगाहणा संखि० तेयाकम्मगाणं दोवि तुल्ला उक्कोसिया ओगाहणा असं०, जहन्नुक्कोसियाते ओगाहणाते सव्वत्थोवा ओरालियसरीरस्स जहन्निया ओगाहणा तेयाकम्माणं दोण्हवि तुल्ला जहन्नयि ओगाहणा विसे० वेउव्वियसरीरस्स जहन्निया ओगा० असं० आहारगसरीरस्स जहन्नियाहिंतो ओगाहणाहिंतो तस्स चेव उक्कोसिया ओगा० विसे० ओरालियसरीरस्स उक्कोसिया ओगा० संखे० वेउव्वियसरीरस्स णं उक्कोसिया ओगाहणा संखि० तेयाकम्मगाणं दोण्हवि तुल्ला उक्कोसिया ओगाहणा असंखिज्जगुणा ।। (पन्नवणाए भगवईए एगवीसइमं पयं समत्तं)

वृ. 'एएसि ण' मित्यादि, सर्वस्तोका औदारिकशरीरस्य जघन्यावगाहना, अङ्गुलासङ्ख्येयभागमात्रप्रमाणत्वात्, तैजसकार्मणयोर्जघन्यावगाहना द्वयोरपि परस्परं तुल्या, औदारिकजघन्यावगाहनातो विशेषाधिका, कथमिति चेत्, उच्यते, जइह मारणान्तिकसमुद्घातेन समवहतस्य पूर्वशरीरात् यद्बहिर्विनिर्गतं तैजशरीरं तस्यायामबाहल्यविस्तारैरवगाहना चिन्त्यते इत्युक्तं प्राक्, तत्र यस्मिन् प्रदेशे उत्पत्स्यन्ते सोऽपि प्रदेश औदारिकशरीरावगाहनाप्रमितोऽङ्गुलासङ्ख्येयभागप्रमाणो लभ्यते यद्यप्यागमे लभ्यतिरोक्तं तदपि व्याप्तमिहौदारिकजघन्यावगाहनातो विशेषाधिका, ततोऽपि वैक्रियशरीरस्य जघन्यावगाहना असङ्ख्येयगुणा, अङ्गुलासङ्ख्येयभागस्याङ्ख्येयभेदभिन्नत्वात्, ततोऽप्याहारकशरीरस्य जघन्यावगाहनाऽसङ्ख्येयगुणा, देशोनहस्तप्रमाणत्वात्, उत्कृष्टावगाहनाचिन्तायां सर्वस्तोका आहारकशरीरस्योत्कृष्टाऽवगाहना, हस्तमात्रत्वात्, ततोऽप्यौदारिकशरीरस्य उत्कृष्टावगाहना सङ्ख्येयगुणा, सातिरेकयोजनसहस्रप्रमाणत्वात्, ततोऽपि वैक्रियशरीरस्योत्कृष्टावगाहना सङ्ख्येयगुणा, सातिरेकयोजनलक्षमानत्वात्, तैजसकार्मणयोरुत्कृष्टावगाहना द्वयोरपि परस्परं तुल्या वैक्रियशरीरोत्कृष्टावगाहनातोऽसङ्ख्येयगुणा, चतुर्दशरज्वात्मकत्वात्, जघन्योत्कृष्टावगाहनचिन्तायां आहारकशरीरस्य 'जहन्नियाहिंतो ओगाहणाहिंतो तस्स चेव उक्कोसिया ओगाहणा विसेसाहिया' इति, देशेन समधिकत्वात्, शेषं सुगमं, अनन्तरमेव भावितत्वात् ।।

पदं – २१ -- समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे
एकविंशतितमपदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता ।

पदं – २२ – क्रिया

वृ. तदेवं व्याख्यातमेकविंशतितमं पदं, अधुना द्वाविंशतितममारभ्यते, तस्य चायमभिसम्बन्धः, इहानन्तरपदे गतिपरिणामविशेषरूपं शरीरावगाहनादि चिन्तितं, इह तु नारकादिगतिपरिणामेन परिणतानां जीवानां प्राणातिपातादिरूपाःक्रियाविशेषाश्चिन्त्यन्ते, तत्रेदमादिसूत्रम्–

सू. *(५२५) कति णं भंते ! किरियाओ पन्नत्ताओ ?, गो० ! पंच किरियाओ पन्नत्ताओ,*

तं० काइया १ अहिगरणिया २ पादोसिया ३ पारियावणिया ४ पाणाइवायकिरिया,

काइया णं भंते ! किरिया कतिविहा पं० ?, गो० ! दुविहा पं०, तं०-अनुवरयकाइया य दुप्पउत्तकाइया य, अहिगरणिया णं भंते ! किरिया कइविहा पं० ?, गो० ! दुविहा पं०, तं०-संजोयणाहिकरणिया य निव्वत्तणाधिगरणिया य,

पादोसिया णं भंते ! किरिया कतिविहा पं० ?, गो० ! तिविहा पं०, तं०-जेणं अप्पणो वा परस्स वा तदुभयस्स वा असुभं मनं संपधारेति, सेत्तं पादोसिया किरिया,

पारियावणिया णं भंते ! किरिया कतिविहा पं० ?, गो० ! तिविहा पं० तं०- जेणं अप्पणो वा परस्स वा तदुभयस्स वा अस्यसायं वेदणं उदीरेति, सेत्तं पारियावणिया किरिया,

पाणातिवायकिरिया णं भंते ! कतिविहा पं० ?, गो० ! ति० पं०, तं०-जेणं अप्पाणं वा परं वा तदुभयं वा जीवियाओ ववरोवेइ, से तं पाणाइवायकिरिया ।

वृ. 'कइ णं भंते !' किरियाओ पं०' इत्यादि, करणं क्रिया, कर्मबन्धनिबन्धनचेष्टा इत्यर्थः, सा पञ्चधा, तद्यथा-'काइया' इत्यादि, चीयते इति कायः-शरीरं, काये भवा कायेन निर्वृत्ता वा कायिकी १,

तथा अधिक्रियंते-स्थाप्यते नरकादिष्वात्माऽनेनेति अधिकरणं-अनुष्ठानविशेषो बाह्यं वा वस्तु चक्रखड्गादि तत्र भवा तेन वा निर्वृत्ता आधिकरणिकी, 'पाउसिया' इति प्रद्वेषो-मत्सरः कर्मबन्धहेतुरकुशलो जीवपरिणामविशेष इत्यर्थः तत्र भवा तेन वा निर्वृतता स एव वा प्रद्वेषिकी ३,

'पारियावणिया' इति परितापनं परितापः पीडाकरणमित्यर्थः तस्मिन् भवा तेन वा निर्वृत्ता परितापनमेव वा पारितापनिकी ४,

'पाणाइवायकिरिया' इति प्राणा-इन्द्रियादयस्तेषामतिपातो-विनाशस्तद्विषया प्राणातिपात एव वा क्रिया प्राणातिपातक्रिया, तत्र कायिकी द्विभेदा, तद्यथा-अनुपरतकायिकी दुष्प्रयुक्तकायिकी च, उपरतो-देशतः सर्वतो वा सावद्ययोगाद्विरतः नोपरतोऽनुपरतः कुतश्चिदप्यनिवृत्त इत्यर्थः तस्य कायिकी अनुपरतकायिकी क्रियेति वर्त्तते, इयं प्रतिप्राणिनि वर्त्तते, इयमविरतस्य वेदितव्या, न देशविरतस्य सर्वविरतस्य वा, तथा दुष्टं प्रयुक्तं-प्रयोगः कायादीनां यस्य स दुष्प्रयुक्तस्तस्य कायिकी दुष्प्रयुक्तकायिकी, इयं प्रमत्तसंयतस्यापि भवति, प्रमत्ते सति कायदुष्प्रयोगसम्भवात्,

आधिकरणिक्यपि द्विभेदा, तद्यथा संयोजनाधिकरणिकी निर्वर्त्तनाधिकरणिकी च, तत्र संयोजनं-पूर्वनिर्वर्त्तितानां हलगरविषकूटयन्त्राद्यङ्गानां मीलनं तदेव संसारहेतुत्वादाधिकरणिकी संयोजनाधिकरणिकी, इयं हलाद्यङ्गानि पूर्वनिर्वर्त्तितानि संयोजयितुर्भवति, तथा निर्वर्त्तनं-असिशक्तिकुन्ततोमरादीनां मूलतो निष्पादनं तदेवाधिकरणिकी निर्वर्त्तनाधिकरणिकी, पञ्चविधस्य वा शरीरस्य निष्पादनं निर्वर्त्तनाधिकरणिकी, देहस्यापि दुष्प्रयुक्तस्य संसारवृद्धिहेतुत्वात् ।

प्राद्वेषिकी त्रिभेदा, तद्यथा- 'जेण अप्पणो' इत्यादि, येन प्रकरेण जीवा आत्मनो वा-स्वस्य वा अन्यस्य वा-आत्मव्यतिरिक्तस्य उभयस्य वा-स्वपरलक्षणस्योपरि अशुभं-अकुशलं मनः-अन्तःकरणं प्रधारयति-प्रकर्षाणं धारयति करोतीत्यर्थः तेन कारणेन विषयस्य त्रैविध्यात् त्रिविधा प्राद्वेषिकी क्रिया, तथाहि-कश्चित् कस्मिन् प्रयोजने स्वयमनुष्ठिते पर्यन्ते विपाकदारुणे संवृते सति अविवेकादात्मन एवोपरि अकुशलं मनः सम्प्रधारयति, एवं कश्चित् परस्य, कश्चित् स्वप-

रयोरपीति।

पारितापनिक्यपि त्रिविधा, तद्यथा–'जेणं अप्पणो' इत्यादि, येन प्रकारेण कश्चित् कुतश्चित् हेतोरविवेकेन आत्मन एवासातां–दुःखरूपां वेदनामुत्पादयति, कश्चित्परस्य कश्चित्तदुभयस्य, ततः स्वपरतदुभयभेदात्भवति त्रिधा पारितापनिकी क्रिया, आह–एवं सति लोचाकरणतपोऽनुष्ठानकरणप्रसङ्गः, यथायोगं स्वपरोभयासातवेदनाहेतुत्वात्, तदयुक्तं, विपाकहितत्वेन चिकित्साकरणवत् लोचकरणादेरसातवेदनाहेतुत्वायोगात् अशक्यतपोऽनुष्ठानप्रतिषेधाच्च, उक्तं च–

॥ १ ॥ "सो हु तवो कायव्वो जेण मनो मंगुलं न चिंतेइ।
जेण न इंदियहाणी जेण य जोगा न हायंति ॥"

॥ २ ॥ "कायो न केवलमयं परिपालनीयो, मृष्टै रसैर्बहुविधैर्न च लालनीयः।
चित्तेन्द्रियाणि न चरन्ति यथोत्पथेषु, वश्यानि येन च तथाऽऽचरितं जिनानाम ॥" इति,

प्राणातिपातक्रियाऽपि त्रिविधा, तद्यथा–'जेण अप्पणो' इत्यादि, येन प्रकारेण कश्चिदविवेकी भैरवप्रपातादिनाऽऽत्मानं जीविताद् व्यपरोपयति कश्चित् प्रद्वेषादिना परं कश्चिदुभयमपीत्यतः प्राणातिपातक्रियाऽपि त्रिविधा, अत एव कारणाद्भगवद्भिरकालमरणमि प्रतिषिद्धं, प्राणातिपातक्रियादोषसम्भवात्। तदवेमुक्ताः क्रियाः, सम्प्रत्येताः किमविशेषेण सर्वेषां जीवानां सन्ति किं वा नेति जिज्ञासुरिदमाह–

मू. (५२६) *जीवा णं भंते ! किं सकिरिया अकिरिया ?, गो० ! जीवा सकिरियावि अकिरियावि, से केणट्ठेणं भंते ! एवं वु०–जीवा सकिरियावि अकिरियावि ?, गो० ! जीवा दुविहा पं०, तं०–संसारसमावण्णगा य असंसारसमावण्णगा य,*

तत्थ णं जे असंसारसमावण्णगा ते णं सिद्धा, सिद्धा णं अकिरिया, तत्थ णं जे ते संसारसमावण्णगा ते दुविहा पं०, तं०–सेलेसिपडिवण्णगा य असेलेसिपडिव०, तत्त णं जे ते सेलेसिप० ते णं अकिरिया, तत्थ णं जे ते असलेसिपडि० ते णं सकिरिया

से तेणट्ठेणं गो० ! एवं वु०–जीवा सकिरियावि अकिरियावि।

अत्थि णं भंते ! जीवाणं पाणाइवाएणं किरिया कज्जति ?, हंता ! गो० ! अत्थि, कम्हि णं भंते ! जीवाणं पाणातिवाएणं किराय कज्जति ?, गो० ! छसु जीवनिकाएसु, अत्थि णं भंते ! नेरइयाणं पाणाइवाएणं किरिया कज्जति ?, गो० ! एवं चेव, एवं जाव निरंतर वेमाणियाणं,

अत्थि णं भंते ! जीवाणं मुसावाएणं किरिया कज्जति ?, हंता ! अत्थि, कम्हि णं भंते ! जीवाणं मुसावाएणं किरिया कज्जति ?, गो० ! सव्वदव्वेसु, एवं निरंतरं नेरइयाणं जाव वेमाणियाणं, अत्थि णं भंते ! जीवाणं अदिन्नादाणेणं किरिया कज्जति ?, हंता अत्थि,

कम्हि णं भंते ! जीवाणं अदिन्नादाणेणं किरिया कज्जति ?, गो० ! गहणधारणिज्जेसु दव्वेसु, एवं नेरइयाणं निरंतर जाव वेमाणियाणं,

अत्थि णं भंते ! जीवाणं मेहुणेणं किरिया कज्जति ?, हंता अत्थि, कम्हि णं भंते ! जीवाणं मेहुणेणं किरिया कज्जति ?, गो० ! रूवेसु वा रूवसहगतेसु वा दव्वेसु, एवं नेर० निरं० जाव वेमाणियाणं, अत्थि णं भंते ! जीवाणं परिग्गहेणं किरिया कज्जति ?, हंता अत्थि कम्हि णं भंते ! परिग्ग- हेणं किरि० ?, गो० ! सव्वदव्वेसु, एवं नेर० जाव वेमाणियाणं,

एवं कोहेणं माणेणं मायाए लोभेणं पेज्जेणं दोसेणं कलहेणं अब्भक्खाणेणं पेसुन्नेणं परपरिवाएणं अरतिरतीते मायामोसेणं मिच्छादंसणसल्लेणं, सव्वेसु जीवा नेरइयभेदेणं भाणितव्वा, निरंतरं जाव वेमाणियाणंति, एवं अट्ठारस एते दंडगा १८।

वृ. 'जीवाणं भंते!' इत्यादि सुगमं, नवरं 'संसारसमावण्णगा' इति संसारं-चतुर्गतिभ्रमणरूपं सम्यग्-एकीभावेनापन्नाः संसारसमापन्नाः संसारसमापन्ना एव संसारसमापन्नकाः, प्राकृतत्वात् स्वार्थे कप्रत्ययः, तद्विपरीता असंसासमापन्नकाः, चशब्दौ स्वगतानेकभेदसूचकौ, तत्र ये असंसारसमापन्नकास्ते सिद्धाः, सिद्धाश्च देहमनोवृत्त्यभावतोऽक्रियाः, ये तु संसारसमापन्नकास्ते द्विविधाः-शैलेशीप्रतिपन्नका अशैलेशीप्रतिपन्नकाश्च, शैलेशी नामायोग्यवस्था तां प्रतिपन्नाः शलेशीप्रतिपन्नाः, ततः पूर्ववत् स्वार्थिकः कप्रत्यतः, शैलेशीप्रतिपन्नकाः, तद्व्यतिरिक्ताः अशैलेशीप्रतिपन्नकाः, तत्र ये शैलेशीप्रतिपन्नकास्ते सूक्ष्मबादरकायवाङ्मनोयोगनिरोधादक्रियाः, ये त्वशैलेशीप्रतिपन्नकास्ते सयोगित्वात् सक्रियाः, 'से एएणट्ठेण' मित्याद्युपसंहारवाक्यं।

तदेवं ये सक्रिया ये चाक्रियास्ते उक्ताः, अधुना यथा प्राणातिपातक्रिया न भवति तथा दर्शयति-'अत्थि णं भंते!' इत्यादि, अस्त्येतत्, णमिति वाक्यालङ्कारे, भदन्त! जीवानां प्राणातिपातेन-प्राणातिपाताध्यवसायेन क्रिया सामर्थ्यात् प्राणातिपातक्रिया क्रियते?, कर्मकर्तर्ययं प्रयोगो, भवतीत्यर्थः, अनतीतनयाभिप्रायात्मकोऽयं प्रश्नः कतमोऽत्र नयो यमध्यवसायपृष्टमिति चेत्, उच्यते, ऋजुसूत्रस्तथाहि-ऋजुसूत्रस्य हिंसापरिणतिकाल एव प्राणातिपातक्रियोच्यते, पुण्यपापकर्मोपादानानुपादानयोरध्यवसायानुरोधित्वात्, न अन्यथा परिणताविति, भगवानपि तं ऋजुसूत्रनयमधिकृत्य प्रत्युत्तरमाह-'हंता! अत्थि' हन्तेति प्रेषणप्रत्यवधारणविषादेषु, अत्र प्रत्यवधारणे, अस्त्येतत्प्रमाणातिपाताध्यवसायेन प्राणातिपातक्रिया भवति, 'परिणामियं पमाणं निच्छयमवलंबमाणाण' मित्याद्यागमवचनस्य स्थितत्वाद्, अमुमेव वनचनमधिकृत्याऽऽवश्यकेऽपीदं सूत्रं प्रावर्त्तिष्ट-'आया चेव अहिंसा आया हिंसत्ति निच्छओ एस' तदेवं यथा प्राणातिपातक्रिया भवति तथोक्तम्, सम्प्रति कस्मिन् विषये सा प्राणातिपातक्रिया भवतीत्येतन्निरूपयति-

'कम्हि णं भंते' इत्यादि, सुगमम्, नवरं मारणाध्यवसायो जीवविषयो भवति नाजीवविषयो, योऽपि रज्वादौ सर्पादिबुध्या मारणाध्यवसायः सोऽपि सर्पोऽयमिति बुध्या प्रवर्त्तमानत्वात् जीवविषये एव, न खलु रज्वादौ रज्वादितया परिच्छिन्ने कश्चित्तद्विषयं मारणाध्यवसायं विदधाति, ततः प्राणातिपातक्रिया षट्सु जीवनिकायेषूक्ताएतामेव प्राणातिपातक्रियामुक्तप्रकारेण नैयरिकादिकं चतुर्विंशतिदण्डकमधिकृत्य चिन्तयति-'अत्थि णं भंते' इत्यादि, नवरमेवंसूत्रपाठः 'अत्थि णं भंते! नेरइयाणं पाणाइवाएणं किरिया कज्जइ?, हंता अत्थि, कम्हि णं भंते! पाणाइवाएणं किरिया कज्जइ?, गोयमा! छसु जीवनिकाएसु', एवं तावद् वाच्यं यावद्वैमानिकविषयं सूत्रं। तदेवं यथा प्राणातिपातक्रिया भवति यद्विषया च तत्प्रतिपादितं, सम्प्रति एवमेव मृषावादादिविषयाण्यपि सूत्राण्याह-

'अत्थि णं भंते! मुसावाएणं' मित्यादि सुगमं, नवरं 'किरिया कज्जइ' इति यथायोगं प्राणातिपातादिक्रिया भवतीत्यर्थः, तथा सतोऽपलापोऽसतश्च प्ररूपणं मृषावादः, स च लोकालोकगतसमस्तवस्तुविषयोऽपि घटते, तत उक्तं मृषावादसूत्रम्-'सव्वदव्वेसु' इति, द्रव्यग्रहणमुपलक्षणं

तेन पर्यायेष्वपीत्यपि द्रष्टव्यं, तथा यद्वस्तु ग्रहीतं धारयितुं वा शक्यते तद्विषयमादानं भवति न शेषविषयमतोऽदत्तादानसूत्रे 'गहणधारणिज्जेसु दव्वेसु' इत्युक्तम्, मैथुनाध्यवसायोऽपि चित्रलोपकाष्ठादिकर्मगतेषु रूपेषु रूपसहगतेषु वा–स्त्र्यादिषु ततो मैथुनसूत्रे उक्तम्– 'रूवेसु वा रूवसहगएसु वा' इति, तथा परिग्रहः –स्वस्वामिभावेन मूर्च्छा, सा च प्राणिनामतिलोभात्सकल-वस्तुविषयाऽपि प्रादुर्भवति ततः परिग्रहसूत्रे उक्तम्– 'सव्वदव्वेसु' इति, अत एवान्यत्रापि प्रथमव्रतं सर्वजीवविषय मुक्तं द्वितीयचरमे सर्ववस्तुविषये तृतीयचतुर्थे तदेकदेशविषये इति, उक्तं च-

॥१॥ "पढमम्मि सव्वजीवा बीए चरिमे य सव्वदव्वाइं ।
सेसा महव्वया खलु तदेकदेसम्मि नायव्वा ॥"

क्रोधादयः सुप्रतीता, नवरं कलहो–राटिः, अभ्याख्यानं–असद्दोषारोपणं यथा –अचौरेऽपि चौरस्त्वमपारदारिकेऽपि पारदारिकस्त्वमित्यादि, इदं मृषावादेऽप्यन्तर्गतं परमुत्कृष्टोऽयं दोष इति पृथगुपात्तं, पैशून्यं–परोक्षे सतोऽसतो वा दोषस्योद्घाटनं, परपरिवादः प्रभूतजनसमक्षं परदोषविकत्थनं, अरतिरती प्रतीते, इदमेकं समुदितं पापस्थानं, 'मायामोसेण'मिति माया च मृषा च समाहारो द्वन्द्वः, द्वन्द्वैकत्वे नपुंसकत्वमिति 'क्लीबे' इति ह्रस्वत्वं तेन इह समुदायो विवक्षितो, महाकर्मबन्धहेतुश्चेति मृषावादमायाभ्यां पृथगुपात्तं,

'मिच्छादंसणसल्लेणं'ति मिथ्यादर्शनं–मिथ्यात्वं तदेव शल्यं मिथ्यादर्शनशल्यं तेन, 'अट्ठारस एए दंडगा' इति एतेऽनन्तरोदितपदोल्लेखोपदर्शिताः सर्वसङ्ख्ययाऽष्टादश दण्डका भवन्ति ।

प्राणातिपातादीनां पापस्थानानामष्टादशत्वात्तदेवमष्टादशपापस्थानान्यधिकृत्य जीवानां क्रिया विषयश्चोपदर्शितः, साम्प्रतं तान्येवाधिकृत्य जीवानामेकपृथक्त्वाभ्यां कर्मबन्धत्वमुप-दिदर्शयिषुराह–

मू. (५२७) जीवे णं भंते ! पाणातिवाएणं कति कम्मपगडीओ बंधति ?, गो० ! सत्तविहबंधए वा अट्ठविबंधए वा, एवं नेरइए जाव निरंतरं वेमाणिते, जीवा णं भंते ! पाणातिवाएणं कति कम्मपगडीओ बंधति ?, गो० ! सत्तविहबंधगावि अट्ठविहबंधगावि,

नेरइया णं भंते ! पाणातिवाएणं कइ कम्मपगडीओ बंधंति ?, गो० ! सव्वेवि ताव होज्जा सत्तविहबंधगा अहवा सत्तविहबंधगा य अट्ठविहबंधए य अहवा सत्तविहबंधगा य अट्ठविहबंधगा य, एवं असुरकुमारावि जाव थणियकुमारा

पुढविआउतेउवाउवणप्फइकाइया य, एए सव्वेवि जहा ओहिया जीवा, अवसेसा जहा नेरइया, एवं ते जीवेगिंदियवज्जा तिन्नि तिन्नि भंगा सव्वत्थ भाणियव्वंति, जाव मिच्छादंसणसल्ले, एवं एगत्तपोहत्तिया छत्तीसं दंडगा होंति ।

मू. (५२८) जीवे णं भंते ! नाणावरणिज्जं कम्मं बंधमाणे कति किरिए ?, गो० !सिय तिकिरिए सिय चउकिरियए सिय पंचकिरिए, एवं नेरइए जाव वेमाणिए, जीवा णं भंते ! नाणावरणिज्जं बंधमाणा कतिकिरिया० ?, गो० ! सिय तिकिरिया सिय चउकिरिया सिय पंचकिरियावि, एवं नेरइया निरंतरं जाव वेमाणिया, एवं दरिसणावरणीयं वेदणिज्जं मोहणिज्जं आउयं नामं गोत्तं अंतराइयं च अट्ठविहकम्मपगडीतो भाणितव्वाओ, एगत्तपोहत्तिया सोलस दंडया भवंति, जीवे णं भंते ! जीवातो कतिकिरिए ?, गो० ! सिय तिकिरिए सिय चउकिरिए

सिय पंचकिरिए सिय अकिरिए, जीवे णं भंते ! नेरइयाओ कतिकिरिए ?, गो० ! सिय तिकिरिए सिय चउकिरिए सिय अकिरिए, एवं जाव थणियकुमाराओ,

पुढविकाइयातो आउक्काइयातो तेउक्काइयातो वाउक्काइयवणप्फइकाइयबेइंदियतेइंदियचउरिंदियपंचिंदियतिरिक्खजोणियमणुस्सातो जहा जीवातो, वाणमंतरजोइसियवेमाणियातो जहा नेरइयातो,

जीवे णं भंते ! जीवेहिंतो कतिकिरिए ?, गो ! सिय तिकिरिए सिय चउकिरियए सिय पंचकिरिते सिय अकिरिए, जीवे णं भंते ! नेरइएहिंतो कतिकिरिए ?, गो० ! सिय तिकिरिए सिय चउकिरिते सिय अकिरिए, एवं जहेव पढमो दंडतो तहा एसो बितिओ भाणितव्वो जाव वेमाणियत्ति, जीवा णं भंते ! जीवातो कतिकिरिया ?, गो० ! सिय तिकिरियावि सिय चउकिरियावि सिय पंचकिरियावि सिय अकिरियावि, जीवा णं भंते ! नेरइयातो कति किरिया ?, गो० ! जहेव आविल्लदंडतो तहेव भाणितव्वो, जाव वेमाणियत्ति, जीवा णं भंते ! जीवेहिंतो कतिकिरिया ?, गो० ! तिकिरियावि चउकिरियावि पंचकिरियावि अकिरियावि, जीवा णं भंते ! नेरइएहिंतो कतिकिरिया ?, गो० ! तिकिरिया चउकिरिया अकिरिया, असुरकुमारेहिंतोवि एवं चेव जाव वेमाणितेहिंतो, ओरालियसरीरेहिंतो जहा जीवेहिंतो।

नेरइए णं भंते ! जीवातो कतिकिरिए ?, गो० ! सिय तिकिरिए सिय चउकिरिए सिय पंच०, नेरइए णं भंते ! नेरइयातो कतिकिरिए ?, गो० ! सिय तिकिरए सिय च०, एवं जाव वेमाणिएहिंतो, नवरं नेरइयस्स नेरइएहिंतो देवेहिंतो य पंचमा किरिया नत्थि, नेरइया णं भंते ! जीवातो कतिकिरिया ?, गो० ! सिय तिरकि० सिय चउकि० सिय पंचकि०, एवं जाव वेमाणियातो, नवरं नेरइयाओ देवाओ य पंचमा किरिया नत्थि, नेरइया णं भंते ! जीवेहिंतो कतिकिरिया ?, गो० ! तिकिरियावि चउकि० पंचकि०, नेरइया णं भंते ! नेरइएहिंतो कतिकिरिया ?, गो० ! तिकि० चउकि०, एवं जाव वेमाणिएहिंतो, नवरं ओरालियसरीरेहिंतो जहा जीवेहिं,

असुरकुमारे णं भंते ! जीवातो कतिकिरिए ?, गो० ! जहेव नेरइए चत्तारि दंडगा तहेव असुरकुमारेवि चत्तारि दंडगा भाणितव्वा, एवं च उवउज्जिऊणं भावेयव्वंति, जीवे मणूसे य अकिरिए वुच्चति सेसा अकिरिया न वुच्चंति, सव्वजीवा ओरालियसरीरेहिंतो पंचकिरिया नेरइय देवेहिंतो पंचकिरिया ण वुच्चंति, एवं एक्केक्कजीवपदे चत्तारि २ दंडगा भाणितव्वा,

एवं एतं दंडगसयं सव्वेवि य जीवादीया दंडगा।

वृ. 'जीवे णं भंते!' इत्यादि सुगमं, नवरं सप्तविधबन्धकत्वं आयुर्बन्धविरहकाले आयुर्बन्धकाले चाष्टविधबन्धकत्वं, पृथक्त्वचिन्तायां सामान्यतो जीवपदे सप्तविधबन्धका अपि अष्टविधबन्धका अपि सदैव बहुत्वेन लभ्यन्ते तत उभयत्रापि बहुवचनमित्येवंरूप एक एव भङ्गः, नैरयिकसूत्रे सप्तविधबन्धका अवस्थिता एव, हिंसापरिणामपरिणतानां सदैव बहुत्वेन लभ्यमानानां सप्तविधबन्धकत्वस्यावश्यंभावित्वात्, ततो यदा एकोऽप्यष्टविधबन्धको न लभ्यते तदैष भङ्गः सर्वेऽपि तावद्भवेयुः सप्तविधबन्धका इति, यदा पुनरेकोऽष्टविधबन्धकः शेषाः सर्वे सप्तविधबन्धकास्तदा द्वितीयो भङ्गः सप्तविधबन्धकाश्च अष्टविधबन्धकश्च, यदा त्वष्टविधबन्धका अपि बहवो लभ्यन्ते तदा उभयगतबहुवचनरूपस्तृतीयो भङ्गः सप्तविधबन्धकाश्च अष्टविधबन्धकाश्च,

एवं भङ्गत्रयेणासुरकुमारादयोऽपि तावद्वक्तव्याः यावत् स्तनितकुमाराः,

पृथिव्यप्तेजोवायुवनस्पतिकायिका यथा सामान्यतो जीवा उक्तास्तथा वक्तव्याः, उभयत्रापि बहुवचनेनैक एव भङ्गो वक्तव्य इति भावः, पृथिव्यादीनां हिंसापरिणामपरिणतानां प्रत्येकं सप्तविधबन्धकानामष्टविधबन्धकानां च सदैवं बहुत्वेन लभ्यमानत्वात्, शेषा द्वित्रिचतुरिन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्यव्यन्तरज्योतिष्कवैमानिका यथा नैरयिका भङ्गत्रिकेणोक्तास्तथा वक्तव्याः, यथा च प्राणातिपातेनैकत्वपृथक्त्वाभ्यां द्वौ दण्डकावुक्तावेवं सर्वपापस्थानैरपि प्रत्येकं द्वौ द्वौ दण्डकौ वक्तव्यौ, तथा चाह–"जाव मिच्छादंसणसल्लेणं'ति सर्वसङ्ग्रहया कियन्तो दण्डका भवन्तीति चेत्, अत आह–'एवं एगत्तपोहत्तिया छत्तीसं दंडगा होंति' अष्टादशानां द्वाभ्यां गुणने षट्त्रिंशद्भावात्, ।

'जीवे णं भंते' इत्यादि, अथ कोऽस्य सूत्रस्यापि सम्बन्धः ?, उच्यते, इह प्रागुक्तं जीवः प्राणातिपातेन सप्तविधमष्टविधं वा कर्म बध्नाति, स तु तमेव प्राणातिपातं ज्ञानावरणीयादि कर्म बध्नन् कतिभिः क्रियाभिः समापयतीति प्रतिपाद्यते, अपिच–कार्येण ज्ञानावरणीयाख्येन कर्मणा कारणस्य प्राणातिपाताख्यस्य निवृत्तिभेद उपदर्श्यते, तथोदाह्न बन्धविशेषोऽपीति, उक्तं च–

॥ १ ॥ "तिसृभिश्चतसृभिरथ पञ्चभिश्च हिंसा समाप्यते क्रमशः ।
बन्धोऽस्य विशिष्टः स्याद्योगप्रद्वेषसाम्यं चेत् ॥" इति,

तमेव प्राणातिपातस्य निवृत्तिभेदं दर्शयति–'सिय तिकिरिए' इत्यादि, स्यात्-कदाचित्त्रिक्रियः कदाचिच्चतुष्क्रियः कदाचित् पञ्चक्रियः, तत्र त्रिक्रियता कायिक्याधिकरणिकीप्राद्वेषिकीभिः क्रियाभिः, कायिकी नाम हस्तपादादिव्यापारणं आधिकरणिकी खड्गादिप्रगुणीकरणं प्रादेषिकी मारयाम्येनमित्यशुभमनःसम्प्रधारणमिति, चतुष्क्रियता कायिक्याधिकरणिकीप्राद्वेषिकीपारितापनिकीभिः, पारितापनिकी नाम खड्गादिघातेन पीडाकरणं, पञ्चक्रियता यदा प्राणातिपातक्रियाऽपि पञ्चमी भवति, प्राणातिपातक्रिया जीविताद् व्यपरोपणं, एवं नैरयिकादारभ्य चतुर्विंशतिदण्डकक्रमेण तावद् वक्तव्यं यावद्वैमानिकसूत्रं, सूत्रपाठस्तेवचम् -

'नेरइए णं भंते ! नाणावरणिज्जं कम्मं बंधमाणे कइकिरिए पं०' इत्यादि, तदेवमेकत्वेन दण्डक उक्तः, सम्प्रति बहुत्वेनाह–'जीवा णं भंते !' इत्यादि, प्रश्नसूत्रं सुगमं, भगवानाह–गौतम जीवास्त्रिक्रिया अपि चतुष्क्रिया अपि पञ्चक्रिया अपि, किमुक्तं भवति ? –

जीवाज्ञानावरणीयं कर्म बध्नन्तः सदैव बहव इति त्रिक्रिया अपि चतुष्क्रिया अपि पञ्चक्रिया अपि लभ्यन्ते इत्येक एव भङ्गः, यथा च सामान्यतो जीवपदेऽभङ्गकं तथा नैरयिकादिषु चतुर्विंशतौ स्वस्थानेषु प्रत्येकमभङ्गकं द्रष्टव्यं, नैरयिकादीनामपि ज्ञानावरणीयकर्म बध्नतः सदैव त्रिक्रियाणामपि चतुष्क्रियाणामपि पञ्चक्रियाणामपि बहुत्वेन लभ्यमानत्वात्, यथा च ज्ञानावरणीयं कर्माधिकृत्य एकत्वपृथक्त्वाभ्यां द्वौ दण्डकावुक्तौ तथा दर्शनावरणीयादीन्यपि कर्माण्यधिकृत्य प्रत्येकं द्वौ द्वौ दण्डकौ वक्तव्यौ, तत एवं सति सर्वसङ्ग्रहया षोडश दण्डका ।

'जीवे णं भंते ! जीवातो कतिकिरिए पं०' इति, अथ कोऽस्य सूत्रस्य सम्बन्धः ?, उच्यते, इह न केवलं वर्त्तमानभववर्त्तिनो जीवस्य ज्ञानावरणीयादिकर्मबन्धभेदप्ररूपणे कायिक्यादिक्रियाविशेषणः प्राणातिपादभेदो भवति, किन्त्वतीतभवकायसम्बन्धः कायिक्यादिक्रियाविशेष-

णोऽपि, तत एतस्यार्थस्य प्रतिपादनार्थमिदं सूत्रम्, अस्य चेयं पूर्वाचार्योपदर्शिता भावना-'इह संसारअडवीए परिब्भमंतेहिं सव्वजीवेहिं तेसु तेसु ठाणेसु सरीरोवहाइणो विप्पमुक्क तेहि य सत्थभूएहिं जया कस्सइ स्वतः परितापनादयो भवंति तया तस्सामिणो भवंतरगयस्सवि तत्रानिवृत्तत्वात् किरियासम्भव इति, व्युत्सृष्टेषु तु न भवति निवृत्तत्वात्,

एत्थ उदाहरणं-वसंतपुरे नयरे अजियसेनस्स रन्नो पडिचारगा दुवे कुलपुत्तगा, तत्थेगो समणसड्ढो इयरो मिच्छद्दिट्ठी, अन्नया रयणीए रन्नो निस्सरणं संभमतुरंताण तेसिं घोडगारूढाणं खग्गा पब्भट्ठा, सड्ढेण जनकोलाहलो मग्गिओ न लहइ, इयरेण हसियं-किमण्णं न होहि ?, सड्ढेण अहिगरणंतिकट्टु वोसिरियं, इयरे च खग्गग्गाहिणो बंदिग्गहसाहसिएहिं लद्धा, गहिओ अन्नेहिं रायवल्लहो पलयमाणो वावाइओ, तओ आरक्खिएहिं गहिऊण रायसमीवं नीया, कहिओ वुत्तंतो, कुविओ राया, पुच्छियं च णेण-कस्स तुब्भो ? तेहिं कहियं-अणाहा-कल्लं चिय, कप्पडिया एए तुम्हा खग्गा कहिं लद्धत्ति, पुच्छिएहिं कहियं पडिया इति, तओ सामरिसेण रण्णा भणियं-गवेसह तुरियं मम अणबद्धवेरिणं ईसरपुत्ताणं महापमत्ताणं केसिं इमे खग्गेत्ति ?, तओ तेहिं निउणं गवेसिऊण विण्णत्तं रण्णो -सामि ! गुणचंदबालचंदाणमिति, तओ रण्णा तेहिं पिहं पिहं सद्दावेऊण भणिया-लेह नियखग्गे, एक्केण गहियं, पुच्छिओ रण्णा-कहं ते पणट्ठेति ?, तेण कहियं जहावित्तं, कीस न गविट्ठं ?, भणइ-सामि ! तुम्ह पसाएणं एद्दहमेत्तमवि गवेसामि ?, सड्ढो नेच्छइ, रण्णा पुच्छिओ- कीस न गेण्हसि ?, तेण भणियं-सामि ! अम्हाणमेस ठिई चेव नत्थि जमेवं गेण्हिज्जइ अहिगरणत्तणओ, परं संभमेण मग्गंतेणवि न लद्धंति वोसिरियं अतो न कप्पइ मे गिण्हिउं, तओ रन्ना पमायकारी अनुसासिओ, इयरो विमुक्को, एस दिट्ठंतो इमो य से अत्थोवणओ-जहा सो पमायगब्भेण अवोसिरियदोसेण अवराहं पत्तो एवं जीवोवि जम्मंतरत्थं देहोवहाइ अवोसिरंतो अनुमयभावतो पावेइ दोसं ?, श्रूयते च जातिस्मरणादिना विज्ञाय पूर्वदेहमतिमोहात् (केचित्) सुरनदीं प्रत्यस्थिशकलानि नयन्तीति। इतानमीं सूत्रव्याख्या-

जीवो भदन्त ! जीवमधिकृत्य कतिक्रियः प्रज्ञप्तो ?, भगवानाह-गौतम ! स्यात्-कश्चित् त्रिक्रियः कायिक्याधिकरणिकीप्राद्वेषिकीभावात्, तत्र वर्त्तमानभवमधिकृत्य भावना प्राग्वत् भावनीया, अतीतभवमधिकृत्यैवं-कायिकी तत्सम्बन्धिनः कायस्य कार्येकदेशस्य वा व्याप्रियमाणत्वात्, आधिकरणिकी तत्संयोजितानां हलगरकूटयन्त्रादीनां तन्निर्वर्त्तितानां वा असिकुन्ततोमरादीनां परोपघाताय व्याप्रियमाणत्वात्, यदिवा देहोऽप्यधिकरणमित्याधिकरणिक्यपि, प्राद्वेषिकी तद्विषयाऽकुशलपरिणामप्रवृत्तेरप्रत्याख्यातत्वात्, स्याच्चतुष्क्रियः पारितापनिक्यपि कायेन कायैकदेशेनाधिकरणेन वा तत्सम्बन्धिना क्रियमाणत्वात्, स्यात्पञ्चक्रियो यदा तेन जीवितादपि व्यपरोपणमाधीयते, स्यादक्रियो यदा पूर्वजन्मभावि शरीरमधिकरणं वा त्रिविधं त्रिविधेन व्युत्सृष्टं भवति, न चापि तज्जन्मभाविना शरीरेण काञ्चिदपि क्रियां करोति, इदं चाक्रियत्वं मनुष्यापेक्षया द्रष्टव्यं, तस्यैव सर्वविरतिभावात्, सिद्धापेक्षया वा, तस्य देहमनोवत्त्यभावेनाक्रियत्वात्, अमुमेवार्थं चतुर्विंशतिदण्डकक्रमेण निरूपयति-

'जीवे णं भंते ! नेरइयाओ कइकिरिए' इत्यादि सुगमं, नवरमयं भावार्थः-देवनारकान् प्रति चतुष्क्रिय एव, तेषां जीविताद् व्यपरोपणस्यासम्भवाद् 'अनपवर्त्त्यायुषो नारकदेवा' इति

वचनात्, शेषान् सङ्ख्येयवर्षायुषः प्रति पञ्चक्रियोऽपि, तेषामवत्त्यायुष्कतया जीविताद् व्यपरोपणस्यापि सम्भवात्, तदेवमेकस्य जीवस्य एकं जीवं प्रति क्रियाश्चिन्तिताः, सम्प्रत्येकस्यैव जीवस्य बहून् जीवान् प्रति क्रियाश्चिन्तयति–

'जीवे णं भंते ! जीवेहिंतो कइकिरिए पन्नत्ते' इत्यादि, एषोऽपि दण्डकः प्राग्वद्भावनीयः, अधुना बहूनां जीवानामेकं जीवमधिकृत्य क्रियाश्चिन्तयति– 'जीवा णं भंते ! जीवतो काइयाकिरिया पं०' इत्यादि, एषोऽपि दण्डकः प्रथमदण्डकवदवसेयः, अधुना बहूनां जीवानां बहून् जीवानधिकृत्य सूत्रमाह–

'जीवा णं भंते ! जीवेहिंतो कइकिरिया पं० ?' इत्यादि, अत्र प्रश्नः पाठसिद्धो, निर्वचनमिदं–गौतम ! त्रिक्रिया अपि चतुष्क्रिया अपि पञ्चक्रिया अपि अक्रिया अपि, कस्यापि जीवस्य कमपि जीवं प्रति त्रिक्रियत्वात् कस्यापि चतुष्क्रियत्वात् कस्यापि पञ्चक्रियत्वात् कस्यापि मनुष्यस्य सर्वोत्तमचारित्रिणः सिद्धस्य वा शेषस्याक्रियत्वात् इति सर्वत्र बहुवचनरूप एक एव भङ्गः, एवं नैरयिकादिक्रमेण तावद् वक्तव्यं यावद्वैमानिकसूत्रं, नवरं नैरयिकान् देवांश्च प्रति त्रिक्रिया अपि चतुष्क्रिया अपि अक्रिया अपीति वक्तव्यं, शेषान् सङ्ख्येयवर्षायुषः प्रति पञ्चक्रिया अपीति, तदेवं सामान्यतो जीवपदमधिकृत्य दण्डकचतुष्टयमुक्तं, सम्प्रति नैरयिकपदमधिकृत्याह–

'नेरइए णं भंते ! जीवातो कतिकिरिए पं०' इत्यादि 'एवं जाव वेमाणिएहिंतो' इति, अत्र यावत्करणात् 'नैयरिको जीवान् प्रति कतिक्रिय' इति इत्यादिरूपो द्वितीयोऽपि दण्डक उक्तो द्रष्टव्यः, सर्वत्र औदारिकशरीरान् सङ्ख्येयवर्षायुषः प्रति स्यात् त्रिक्रियः स्यात् चतुष्क्रियः स्यात् पञ्चक्रिय इति वक्तव्यं, नैरयिकस्य देवान् प्रति पञ्चमी जीविताद् व्यपरोपणरूपा क्रिया नास्ति, तेषामनपवर्त्यायुष्कत्वात्, ततस्तान् प्रति स्यात् त्रिक्रियः स्याच्चतुष्क्रिय इति वक्तव्यं, नैरयिको देवान् प्रति कथं चतुष्क्रिय इति चेत्, उच्यते, इह भवनवास्यादयो देवास्तृतीयां पृथिवीयावत् गता गमिष्यन्ति च, किमर्थं गता गमिष्यन्तीति चेत् ?, उच्यते, पूर्वसाङ्गतिकस्य वेदनामुपशमयितुं पूर्ववैरिणो वेदनामुदीरयितुं (वा) तत्र गच्छन्ति, तदानीमनन्तकालादेतदपि भवति (यद्) तद्गताः सन्तो नारकैर्बध्यन्ते इति, आह च मूलटीकाकारोऽपि–

"तत्र गता नारकैर्बध्यन्ते इत्यप्यनन्तकाल एव कथञ्चित्सम्भवमात्र"मिति, अत्रापर आह–ननु नारकस्य द्वीन्द्रियादीनधिकृत्य कथं कायिक्यादिक्रियासम्भवः ?, उच्यते, इह नारकैर्यस्मात् पूर्वभवशरीरं न व्युत्सृष्टं विवेकाभावात्, तदभावश्च भवप्रत्ययात्, ततो यावत् शरीरं तेन जीवेन निर्वर्त्तितं सत् तं शरीरपरिणामं सर्वथा न परित्यजति तावद् देशतोऽपि तं परिणामं भजमानं पूर्वभावप्रज्ञापनया तस्येति व्यपदिश्यते घृतघटवत्, यथा हि घृतपूर्णो घटो घृते अपगतेऽपि घृतघट इति व्यपदिश्यते, तथा तदपि शरीरं तेन निर्वर्त्तितमिति तस्येति व्यपदेशमर्हति, ततस्यस्य शरीरस्य एकदेशेनास्थ्यादिना योऽन्तः प्राणातिपातं करोति, ततः पूर्वनिर्वर्त्तितशरीरजीवोऽपि कायिक्यादिक्रियाभिर्युज्यते, तेन तस्याव्युत्सृष्टत्वात्,

तत्रेयं पञ्चानामपि क्रियाणां भावनातत्कायस्य व्याप्रियमाणत्वात् कायिकी कायोऽधिकरणमपि भवतीत्युक्तं प्राक् तत आधिकरणिकी, प्राद्वेषिक्यादयस्त्वेवं–यदा तमेव शरीरैकदेशं अभिघातादिसमर्थमन्यः कश्चनापि प्राणातिपातोद्यतो दृष्ट्वा, तस्मिन् घात्ये द्वीन्द्रियादौ

समुत्पन्नक्रोधादिकारणोऽभिघातादिसमर्थमिदं शस्त्रमिति चिन्तयन् अतीवक्रोधादिपरिणामं भजते पीडां चोत्पादयति जीविताच्च व्यपरोपयति तदा तत्सम्बन्धिप्राद्वेषिक्यादिक्रियाकारणत्वान्नैगमनयाभिप्रायेण तस्यापि प्राद्वेषिकी पारितापनिकी प्राणातिपातक्रिया च यथायोगं,

यथा च नैरयिकपदे चत्वारो दण्डका उक्ताः तथा असुरकुमारादिष्वपि शेषेषु त्रयोविंशतौ

स्थानेषु चत्वारःचत्वारो दण्डका वक्तव्याः, नवरं जीवपदे मनुष्यपदे चाक्रिया इत्यपि वक्तव्यं, विरतिप्रतिपत्तौ व्युत्सृष्टत्वेन तन्निमित्तक्रियाया असम्भवात्, शेषां अक्रिया नोच्यन्ते, विपत्त्यभावतःस्वशरीरस्य भवान्तरगतस्याव्युत्सृष्टत्वेनावश्यं क्रियासम्भवात्, तदेवं सामान्यतो जीवपदे एकं शेषाणि तु नैरयिकादीनि स्थानानि चतुर्विंशतिरिति सर्वसङ्ख्यया पञ्चविंशतिरेकैकस्मिंश्च स्थाने चत्वारो दण्डका इति सर्वसङ्कलनया दण्डकशतं।

अथ केषां जीवानां कति क्रिया इति निरूपणार्थं प्रागुक्तमेव सूत्रं पठति-

मू. (५२९) कति णं भंते! किरियाओ पन्नत्ताओ?, गोयमा! पंच किरियाओ पन्नत्ताओ, तं०-कातिया जाव पाणातिवातकिरिया, नेरइया णं भंते! कति किरियातो प०, गो० ! पंच किरियातो प०तं० कातिया जाव पाणातिवायकि०, एवं जाव वेमाणियाणं,

जस्स णं भंते! जीवस्स कातिया किरिया कज्जइ तस्स अहिगरणिया किरिया कज्जति जस्स अहिगरणिया किरिया कज्जति तस्स कातिया कज्जति?, गो० ! जस्स णं जीवस्स कातिया किरिया कज्जति तस्स अहिगरणी किरिया नियमा क०, जस्स अहिगरणी किरिया क० तस्सवि काइया किरिया नियमा कज्जति,

जस्स णं भंते! जीवस्स काइया किं० तस्स पादोसिया कि० जस्स पादोसिया कि० तस्स काइया किं० क०?, गो० ! एवं चेव, जस्स णं भंते! जीवस्स काइया किरिया कज्जइ तस्स पारियावणिया किरिया कज्जइ जस्स पारियावणिया किरिया कज्जइ तस्स कातिया किरिया कज्जइ गो० ! जस्स णं जीवस्स काइया किं० कं० तस्स पारितावणिया सिय कज्जइ सिय नो कज्जइ, जस्स पुण पारियावणिया कि० क० तस्स काइया नियमा कज्जति, एवं पाणाइवायकिरियावि,

एवं आदिल्लाओ परोप्परं नियमा तिन्नि कज्जंति, जस्स आइल्लाओ तिन्नि कज्जंति तस्स उवरिल्लाओ दोन्नि सिय कज्जंति सिय नो कज्जंति, जस्स उवरिल्लाओ दोन्नि कज्जंति तस्स आइल्लाओ नियमा तिन्नि कज्जंति, जस्स णं भंते! जीवस्स पारियावणिया किरिया कज्जति तस्स पाणातिवायकिरिया कज्जति, जस्स पाणातिवायकिरिया कज्जति तस्स पारियावणिया किरिया कज्जति गो० ! जस्स णं जीवस्स पारियावणिया कि० तस्स पाणातिवातकिरिया सिय कज्जति सिय नो कज्जति, जस्स पुण पाणातिपातकिरियाकज्जति तस्स पारियावणिया किरिया नियमा कज्जति, जस्स णं भंते! नेरइयस्स काइया किरिया कज्जति तस्स अधिगरणिया किरिया कज्जति?, गो० ! जहेव जीवस्स तहेव नेरइयस्सवि, एवं निरंतरं जाव वेमाणियस्स।

जं समयं णं भंते! जीवस्स काइया कि० क० तं समयं अधिगरणिया कि० जं समयं अधिगरणिया कि० क० तं समयं काइया कि०, एवं जहेव आइल्लओ दंडओ तहेव भाणितव्वो, जाव वेमाणियस्स। जंदेसेणं भंते! जीवस्स काइया कि० तंदेसेणं अधिगरणिया किं० तहेव जाव वेमाणियस्स। जंपएसेणं भंते! जीवस्स काइया किं० तं पदेसं आधिगरणिया कि० एवं तहेव

जाव वेमाणियस्स, एवं एते जस्स जंसमयं जंदेसं जंपएसेणं चत्तारि दंडगा होंति ।

कति णं भंते ! आतोजितातो किरियाओ पन्नत्तातो ?, गो० ! पंच आओजियाओ किरियाओ पन्नत्ताओ, तं०—काइया जाव पाणातिवातकिरिया, एवं नेरइयाणं जाव वेमाणियाणं, जस्स णं भंते ! जीवस्स काइया आतोजिया किरिया अत्थि तस्स अधिगरणिया किरिया आतोजिता अत्थि जस्स अधिगरणिया आतोजिता किरिया अत्थि तस्स काइया आतोजिया किरिया अत्थि एवं एतेणं अभिलावेणं ते चेव चत्तारि दंडगा भाणितव्वा, जस्स जंसमयं जंदेसं जं जाव वेमाणियाणं

जीवे णं भंते ! जंसमयं काइयाए अधिगरणियाए पादोसियाते किरियाए पुट्ठे तंसमयं पारियावणियाते पुट्ठे पाणातिवातकिरियाते पुट्ठे ?, गो० ! अत्थेगतिते जीवे एगतियाओ जीवओ जंसमयं काइयाए अधिगरणियाए पाओसियाए किरियाए पुट्ठे तं समयं पारियावणियाए किरियाए पुट्ठे पाणाइवायकिरियाए पुट्ठे १ अत्थेगतिते जीवे एगतियाओ जीवाओ जंसमयं कायइयाए अधिगरणियाए पादोसियाते किरियाए पुट्ठे तं समयं पारितावणियाए किरियाए पुट्ठे पाणाइवायकिरियाए अपुट्ठे २ अत्थेगइए जीवे एगइयाओ जीवाओ जंसमयं काइयाए अधिगरणियाए पाओसियाए पुट्ठे तंसमयं पारि० किरि० अपुट्ठे पाणाइवायकि० अपुट्ठे ३

वृ. 'कइ णं भंते ! किरियाओ पन्नत्ताओ' इत्यादि प्राग्वत्, एता एव क्रियाः चतुर्विंशतिदण्डकक्रमेण चिन्तयति–'नेरइयाणं भंते !' इत्यादि पाठसिद्धं, सम्प्रत्यासामेव क्रियाणामेकजीवाश्रयेण परस्परमविनाभावित्वं चिन्तयति–'जस्स णं भंते !' इत्यादि, इह कायिकी क्रिया औदारिकादिक्रियाश्रिता प्राणातिपातनिर्वर्त्तन- समर्था प्रतिविशिष्टा परिगृह्यते न या काचन कार्मणकायाश्रिता वा, तत आद्यानां तिसृणां क्रियाणां परस्परं नियम्यनियामकभावः, कथमिति चेत्, उच्यते, कायोऽधिकरणमपि भवतीत्युक्तं प्राक्, ततः कायस्याधिकरणत्वात् कायिक्यां सत्यामवश्यमाधिकरणिकी आधिकरणिक्यामवश्यं कायिकी, सा च प्रतिविशिष्टा कायिकी क्रिया प्रद्वेषमन्तरेण न भवति ततः प्राद्वेषिक्याऽपि सह परस्परमविनाभावः, प्रद्वेषऽपि च काये स्फुटलिङ्ग एव वक्ररूक्षत्वादेस्तदविनाभाविनः प्रत्यक्षत एवोपलम्भात्, उक्तं च–

॥ १ ॥ "रूक्षयति रुष्यतो ननु वक्रं स्निह्यति च रज्यतः पुंसः ।
औदारिकोऽपि देहो भाववशात् परिणमत्येवम् ॥"

परितापनस्य प्राणातिपातस्य चाद्यक्रियात्रयसम्भवेऽप्यनियमः, कथमिति चेत्, उच्यते, यद्यसौ घात्यो मृगादिर्घातकेन धनुषा क्षिप्तेन बाणादिनविध्यते ततस्तस्य परितापनं मरणं वा भवति, नान्यथा, ततो नियमाभावः, परितापनस्य प्राणातिपातस्य च भावे पूर्वक्रियाणामवश्यं भावस्तासामभावे तयोरभावात्, ततोऽमुमेवार्थं परिभाव्य कायिकी शेषामिश्चतसृभिः क्रियाभिः सह आधिकरणिकी तिसृभिः क्रियाभिः सह प्राद्वेषिकी द्वाभ्यां सूत्रतः सम्यक् चिन्तनीया, पारितापनिकी प्राणातिपातक्रिययोस्तु सूत्रं साक्षादाह–

'जस्स णं भंते ! जीवस्स पारियावणिया किरिया कज्जति' इत्यादि, पारितापनिक्या; सद्भावे-प्राणातिपातक्रिया स्याद् भवति, यदा बाणाद्यभिघातेन जीवितात् च्याव्यते तदा भवति शेषकालं न भवतीत्यर्थः, यस्य पुनः प्राणातिपातक्रिया तस्य नियमात् पारितापनिकी, परितापनमन्तरेण प्राणव्यपरोपणासम्भवात् । सम्प्रति नैरयिकादिचतुर्विंशतिदण्डकक्रमेण परस्परमविनाभावं

चिन्तयति 'जस्स णं भंते ! नेरइयस्स काइयाकिरिया कज्जति' इत्यादि प्रतीतं, भावितत्वात् । तदेवमेको दण्डक उक्तः, सम्प्रति कालमधिकृत्योक्तप्रमारेणैव द्वितीयदण्डकमाह–

'जं समयं णं भंते! जीवस्स काइया किरिया कज्जइ तं समयं अहिगरणिया कज्जइ जं समयं अहिगरणिया कज्जइ' इत्याद्यारभ्य सर्वं पूर्वोक्तं तदवस्थं तावद्वक्तव्यं यावद्वैमानिकसूत्रं, तथा चाह–'एवं जहेव आइल्लतो दंडओ तहेव भाणियव्वो जाव वेमाणियस्स' इति, समयग्रहणेन चेह सामान्यतः कालो गृह्यते, न पुनः परमनिकृष्टो यथोक्तस्वरूपो वैवक्षिकः समयः परितापनस्य प्राणातिपातस्य वा बाणादिक्षेपजन्यतया कायिक्याः प्रथमसमये एवासम्भवात्, एष द्वितीयो दण्डकः, सम्प्रति द्वौ दण्डकौ क्षेत्रमधिकृत्याह–

'जंदेसेणं भंते ! जीवस्स' इत्यादि, अत्रापि सूत्रं पूर्वोक्तं तदवस्थं तावद्वक्तव्यं यावद्वैमानिकसूत्रं, तथा चाह–'तहेव जाव वेमाणियस्स' एष तृतीयदण्डकः,

'जंपएसेणं भंते! जीवस्स काइया किरिया कज्जइ' इत्यादिकश्चतुर्थः, अत्रापि सूत्रं प्रागुक्तक्रमेण तावद् वक्तव्यं यावद्वैमानिकसूत्रं, यथा चाह–'एवं तहेव जाव वेमाणिए'इति, दण्डकसङ्कलनामाह–'एवमेते' इत्यादि, एताश्च यथा ज्ञानावरणीयादिकर्मबन्धकारणं तथा संसारकारणमपि, ज्ञानावरणीयादिकर्मबनधस्य संसारकारणतया तद्धेतुत्वेन तासामपि संसारकारणत्वोपचारात्, तथा चाह– 'कइ णं भंते ! आजोजियाओ किरियाओ पन्नत्ताओ'इत्यादि, आयोजयन्ति जीवं संसारे इत्यायोजिकाः–कायिक्यादिकाः शेषं सर्वं सुगमं, सूत्रपाठस्तु पूर्वोक्तप्रकारेण तावद् वक्तव्यो यावत् यस्येति यं समयमिति यं देशमिति यं प्रदेशमिति परिपूर्णाश्चत्वारो दण्डकाः, 'यं समय'मित्यादौ, तु 'कालाध्वनोर्व्याप्ता' वित्यधिकरणे द्वितीया, ततो यस्मिन् समये यस्मिन् देशे यस्मिन् प्रदेशे इति व्याख्येयं,

'जीवे णं भंते! जं समयं काइयाए अहिगरणियाए' इत्यादि, अत्रापि समयग्रहणेन सामान्यतः कालो गृह्यते, प्रश्नसूत्रं सुगमं, निर्वचनसूत्रे भङ्गत्रयी–कश्चिज्जीवमधिकृत्य कश्चिज्जीवो यस्मिन् समये–काले क्रियात्रयेण स्पृष्टस्तस्मिन् समये पारितापनिक्याऽपि स्पृष्टः प्राणातिपातक्रियया चेत्येको भङ्गः, पारितापनिक्या स्पृष्टः प्राणातिपातेनास्पृष्ट इति द्वितीयः, पारितापनिक्या प्राणातपातक्रियया चास्पृष्ट इति तृतीयः, एष च तृतीयो भङ्गो बाणादेर्लक्षात्परिभ्रंशेन धात्यस्य मृगादेः परितापनाद्यसम्भवे वेदितव्यः, यस्तु यस्मिन् समये यं जीवमधिकृत्याद्यक्रियात्रयेणास्पृष्टः स तस्मिन् समये तमधिकृत्य नियमात् पारितापनिक्या प्राणातिपातक्रियया चास्पृष्टः, कायिक्याद्यभावे परितापनादेरभावात्

तदेवमुक्ताः क्रियाः, साम्प्रतं प्रकारान्तरेण क्रिया निरूपयति–

मू. (५३०) कति णं भंते ! किरियाओ पन्नत्ताओ ?, गो० ! पंच किरियाओ पं०, तं०–आरंभिया परिग्गहिया मायावत्तिया अपच्चक्खाणकिरिया मिच्छादंसणवत्तिया,

आरंभिया णं भंते ! किरिया कस्स कज्जति ?, गो० ! अन्नयरस्सवि पमत्तसंजयस्स, परिग्गहिया णं भंते ! किरिया कस्स कज्जइ ?, गो० ! अन्नयरस्सवि संजयासंजयस्स,

मायावत्तिया णं भंते ! किरिया कस्स कज्जति ?, गो० ! अन्नयरस्सावि अपमत्तसंजयस्स, अपच्चक्खाणकिरिया णं भंते ! कस्स कज्जति ?, गो० ! अन्नयरस्सवि अपच्चक्खाणिस्स,

मिच्छादंसणवत्तिया णं भंते ! किरिया कस्स कज्जति ?, गो० ! अन्नयरस्सावि

मिच्छादंसणसिस्स ।

नेरइयाणं भंते ! कति किरियातो पं० ?, गो० ! पंच किरियातो पं०, तं०–आरंभिया जाव मिच्छादंसणवत्तिया, एवं जाव वेमाणियाणं । जस्स णं भंते ! जीवस्स आरंभिया किरिया क० तस्स परिग्गहिया किं कज्जति ? जस्स परिग्गहिया कि० तस्स आरंभिया कि० ?, गो० ! जस्स णं जीवस्स आरंभिया कि० तस्स परिग्गहिया सिय कज्जति सिय नो कज्जति, जस्स पुण परिग्गहिया किरिया क० तस्स आरंभिया कि० नियमा क०, जस्स णं भंते ! जीवस्स आरंभियाकि० क० तस्स मायावत्तिया कि० क० पुच्छा, गो० ! जस्स णं जीवस्स आरंभिया कि० क० तस्स मायावत्तिया कि० नियमा क० जस्स पुण मायावत्ति० कि० क० तस्स आरंभिया कि० सिय कज्जति सिय नो क०, ।

जस्स णं भंते ! जीवस्स आरंभिया कि० तस्स अपच्चक्खाणकिरिया पुच्छा ?, गो० ! जस्स जीवस्स आरंभिया कि० तस्स अपच्चक्खाणकिरिया सिय कज्जति सिय नो० क० जस्स पुण अपच्चक्खाणकिरिया क० तस्स आरंभिया किरिया नियमा क०, एवं मिच्छादंसणवत्तियाएवि समं, एवं पारिग्गहियावि तिहिं उवरिल्लाहिं समं संचारेतव्वा, जस्स मायावत्तिया कि० तस्स उवरिल्लाओ दोवि सिय कज्जंति सिय नो कज्जंति, जस्स उवरिल्लाओ दो कज्जंति तस्स मायावत्तिया नियमा कज्जति, जस्स अपच्चक्खाणकि० क० तस्स मिच्छादंसणवत्तिया किरिया सिय कज्जति सिय नो कज्जति, जस्स पुण मिच्छादंसणवत्तिया कि० तस्स अपच्चक्खाणकिरिया नियमा कज्जति

नेरइयस्स आइल्लियातो चत्तारि परोप्परं नियमा कज्जति, जस्स एताओ चत्तारि कज्जंति तस्स मिच्छादंसणवत्तिया कि० भइज्जति, जस्स पुण मिच्छादंसणवत्तिया किरिया कज्जति तस्स एतातो चत्तारि नियमा कज्जंति, एवं जाव थणियकुमारस्स, पुढविकाइयस्स जाव चउरिंदियस्स पंचवि परोप्परं नियमा कज्जंति, ।

पंचिंदियतिरिक्खजोणियस्स आतिल्लियातो तिन्निवि परोप्परं नियमा कज्जंति, जस्स एयाओ कज्जंति तस्स उवरिल्लिया दोन्नि भइज्जंति, जस्स उवरिल्लातो दोन्नि कज्जंति तस्स एतातो तिन्निवि नियमा कज्जंति, जस्स अपच्चक्खाणकिरिया तस्स मिच्छादंसणवत्तिया सिय कज्जति सिय नो क०, जस्स पुण मिच्छादंसणवत्तिया किरिया क० तस्स अपच्चक्खाणकिरिया नियमा क०, मणूसस्स जहा जीवस्स, । वाणमंतरजोइसियवेमाणियस्स जहा नेरइयस्स, जं समयण्णं भंते ! जीवस्स आरंभिया कि० क० तं समयं पारिग्गहिया कि० क० ?, एवं एते जस्स जं समयं जं देसं जं पदेसेण य चत्तारि दंडगा नेयव्वा, जहा नेरइयाणं तहा सव्वदेवाणं नेतव्वं जाव वेमाणियाणं ।

. वृ. 'कइ णं भंते !' इत्यादि, आरम्भः--पृथिव्याद्युपमर्दः, उक्तं च—

॥ १ ॥ "संरंभो संकप्पो परितावकरो भवे समारंभो ।
आरंभो उद्दवतो सुद्धनयाणं तु सव्वेसिं ॥"

आरम्भः प्रयोजनं—कारणं यस्याः सा आरम्भिकी, 'परिग्गहिय'त्ति परिग्रहो—धर्मोपकरण-वर्जवस्तुस्वीकारः धर्म्मोपकरणमूर्च्छा च परिग्रह एव पारिग्रहिकी परिग्रहेण निर्वृत्ता वा पारिग्राहिकी, 'मायावत्तिया' इति माया—अनार्जमुपलक्षणत्वात् क्रोधादेरपि परिग्रहः माया प्रत्ययः—कारणं यस्याः सा मायाप्रत्यया 'अपच्चक्खाणकिरिया' इति अप्रत्याख्यानं--मनागपि विरतिपरिणामा-

भावस्तदेव क्रिया अप्रत्याख्यानक्रिया, 'मिच्छादंसणवत्तिया' इति मिथ्यादर्शनं प्रत्ययो-हेतुर्यस्याः सा मिथ्यादर्शनप्रत्यया,

एतासां क्रियाणां मध्ये यस्य या सम्भवति तस्य तां निरूपयति-'आरंभिया णं भंते !' इत्यादि, 'अन्नयरस्सवि पमत्तसंजयस्स' इति अत्रापिशब्दो भिन्नक्रमः प्रमत्तसंयतस्याप्यन्यतरस्य-एकतरस्य कस्यचित् प्रमादे सति कायदुष्प्रयोगभावतः पृथिव्यादेरुपमर्दसम्भवात्, अपिशब्दोऽन्येषामधस्तनगुणस्थानवर्त्तिनां नियमप्रदर्शनार्थः, प्रमत्तसंयतस्याप्यारम्भिकी क्रिया भवति किं पुनः शेषाणां देशविरतिप्रभृतीनामिति ?, एवमुत्तरत्रापि यथायोगमपिशब्दभावना कर्त्तव्या, पारिग्रहिकी संयतासंयतस्यापि देशविरतस्यापीत्यर्थः, तस्यापि परिग्रहधारणात्, मायाप्रत्यया अप्रमत्तसंयतस्यापि, कथमिति चेत्, उच्यते, प्रवचनोड्डाहप्रच्छादनार्थं वस्त्रीकरणसमुद्देशादिषु, अप्रत्याख्यानक्रिया अन्यतरस्याप्यप्रत्याख्यानिनः, अन्यतरदपि-न किञ्चिदपीत्यर्थः यो न प्रत्याख्याति तस्येति भावः, मिथ्यादर्शनक्रिया अन्यतरस्यापि सूत्रोक्तमेकमप्यक्षरमरोचयमानस्येत्यर्थः मिथ्यादृष्टेर्भवति।

एता एव क्रियाश्चतुर्विंशतिदण्डकक्रमेण निरूपयति-'नेरइयाणं भंते' इत्यादि सुगमं। सम्प्रत्यासां क्रियाणां परस्परमविनाभावं चिन्तयति-तद्यथा-यस्यारम्भिकी क्रिया तस्य पारिग्रहिकी स्याद्भवति स्यान्न भवति, प्रमत्तसंयतस्य न भवति शेषस्य भवतीत्यर्थः, तथा यस्यारम्भिकी क्रिया तस्य मायाप्रत्यया नियमाद्भवति, यस्य मायाप्रत्यया तस्यारम्भिकी क्रिया स्याद्भवति स्यान्न भवति, अप्रमत्तसंयतस्य न भवति शेषस्य भवतीत्यर्थः, तथा यस्यारम्भिकी क्रिया तस्याप्रत्याख्यानक्रिया स्याद्भवति स्यान्न भवति, प्रमत्तसंयतस्य देशविरतस्य च न भवति, शेषस्य अविरतसम्यग्दृष्ट्यादेर्भ- वतीति भावः, यस्य पुनरप्रत्याख्यानक्रिया तस्यारम्भिकी नियमात्, अप्रत्याख्यानिनोऽवश्यमारम्भ- सम्भवात्, एवं मिथ्यादर्शनप्रत्ययापि सहाविनाभावो भावनीयः,

तथाहि-यस्यारम्भिकी क्रिया तस्य मिथ्यादर्शनप्रत्यया स्याद्भवति स्यान्न भवति, मिथ्यादृष्टेर्भवति शेषस्य न भवतीत्यर्थः, यस्य तु मिथ्यादर्शनक्रिया तस्य नियमादारम्भिकी, मिथ्यादृष्टेरविरतत्वेनावश्यमारम्भसम्भवात्, तदेवमारम्भिकी क्रिया पारिग्राहिक्यादिभिश्चतसृभिरुपरितनीभिः क्रियाभिः सह परस्परमविनाभावेन चिन्तिता, एवं पारिग्राहिकी तिसृभिर्मायाप्रत्यया द्वाभ्यामप्रत्याख्यानक्रिया एकया मिथ्यादर्शनप्रत्यया चिन्तनीया, तथा चाह-'एवं पारिग्गहियावि तिहिं उवरिल्लाहिं समं संचारेयव्वा' इत्यादि सुगमं, भावनायाः सुप्रतीतत्वात्।

अमुमेवार्थं चतुर्विंशतिदण्डकक्रमेण निरूपयति-'नेरइयस्स आइल्लातो चत्तारि' इत्यादि, नैरयिकाद्युत्कर्षतोऽप्यविरतसम्यग्दृष्टिगुणस्थानकं यावन्न परतःततो नैरयिकाणामाद्याश्चतस्रः क्रियाः परस्परमविनाभाविन्यः, मिथ्यादर्शनक्रियां प्रति स्याद्वादः, तमेवाह-'जस्स एयाओ चत्तारि' इत्यादि, मिथ्यादृष्टेर्मिथ्यादर्शनक्रिया भवति शेषस्य न भवतीति भावः", यस्य पुनर्मिथ्यादर्शनक्रिया तस्याद्याश्चतस्रो नियमात्, मिथ्यादर्शने सत्यारम्भिक्यादीनामवश्यंभावात्, एवं तावद्वक्तव्यं यावत्स्तनितकुमारस्य।

पृथिव्यादीनां चतुरिन्द्रियपर्यवसानानां पञ्च क्रियाः परस्परमविनाभाविन्यो वक्तव्याः, पृथिव्यादीनां मिथ्यादर्शनक्रियाया अप्यवश्यंभावात्, तिर्यक्पञ्चेन्द्रियस्याद्यास्तिस्रः परस्परमविना-

भूता देशविरतिं यावदासामवश्यंभावात्, उत्तराभ्यां तु द्वाभ्यां स्याद्वादः, तमेव दर्शयति–'जस्स एयाओ कज्जंति' इत्यादि, देशविरतस्य न भवतः शेषस्य भवत इति भावः, यस्य पुनः उपरितन्यौ द्वे क्रिये तस्याद्यास्तिस्रो नियमाद्भवन्ति, उपरितन्यौ हि क्रिये अप्रत्याख्यानक्रिया मिथ्यादर्शनप्रत्यया च, तत्राप्रत्याख्यानक्रिया अविरतसम्यग्दृष्टिं यावत् मिथ्यादर्शनक्रिया मिथ्यादृष्टेः आद्याश्चतस्रो देशविरतिं यावत् अत उपरितन्योर्भाविऽवश्यमाद्यानां तिसृणां भावः, सम्प्रति अप्रत्याख्यानक्रियया मिथ्यादर्शनक्रिययास्तिर्यक्पञ्चेन्द्रियस्य परस्परमविनाभावं चिन्तयति–

'जस्स अपच्चक्खाणकिरिया' इत्यादि भावितं, मनुष्ये यथा जीवपदे तथा वक्तव्यं, व्यन्तरज्योतिष्कवैमानिकानां यथा नैरयिकस्य, एवमेव एको दण्डकः, 'एवमेव जं समयं णं भंते जीवस्से'त्यादिको द्वितीयः, 'जं देसेणं'मित्यादिकः तृतीयः, 'जं पएसेणं'मित्यादिकश्चतुर्थः। अथ षट् कायाःप्राणातिपातक्रियाहेतव एव भवन्ति किं वा तद्विरमणहेतवोऽपीति पृच्छति–

मू. (५३१) *अत्थि णं भंते ! जीवाणं पाणातिवायवेरमणे कज्जति ?, हंता ! अत्थि, कम्हि णं भंते ! जीवाणं पाणातिपातवेरमणे क० ?, गो० ! छसु जीवनिकाएसु, अत्थि णं भंते ! नेरइयाणं पाणातिवातवेरमणे क० ?, गो० ! नो इणट्ठे समट्ठे, एवं जाव वेमाणियाणं, नवरं मणूसाणं जहा जीवाणं, एवं मुसावाएणं जाव मायामोसेणं,*

जीवस्स य मणूसस्स य, सेसाणं नो तिणट्ठे समट्ठे, नवरं अविन्नादाणे गहणधारणिज्जेसु दव्वेसु, मेहुणे रूवेसु वा रूवसहगएसु वा दव्वेसु, सेसाणं सव्वेसु दव्वेसु,

अत्थि णं भंते ! जीवाणं मिच्छादंसणसल्लवेरमणे कज्जति ?, हंता ! अत्थि, कम्हि णं भंते जीवाणं मिच्छादंसणसल्लवेरमणे कज्जति ?, गो० ! सव्वदव्वेसु, एवं नेरइयाणं जाव वेमाणियाणं, नवरं एगिंदियविगलेंदियाणं नो तिणट्ठे समट्ठे

वृ. 'अत्थि णं भंते !' इत्यादि, सर्वत्र क्रियते कर्मकर्त्तरिप्रयोगः ततो भवतीति द्रष्टव्यः, प्राणातिपातादिविरमणविषयाश्च षट् कायादयः प्रागेव भाविता इति न भूयो भाव्यन्ते, विरतिश्च प्राणातिपातादीनां मायामृषापर्यन्तानां जीवपदे मनुष्यपदे वक्तव्या, शेषेषु स्थानेषु नायमर्थः समर्थ इति वक्तव्यं, तेषां भवप्रत्ययतःसर्वविरत्यसम्भवात्, मिथ्यादर्शनविरमणविषयचिन्तायां सर्वद्रव्येष्विति उपलक्षणमेतत् सर्वपर्यायेष्वपि, अन्यथा एकस्मिन् द्रव्ये पर्याये वा मिथ्यात्वभावे मिथ्यादर्शनविरमणासम्भवात्,

॥ १ ॥ "सूत्रोक्तस्यैकस्याप्यरोचनादक्षरस्य भवति नरः।
मिथ्यादृष्टिः सूत्रं हि नः प्रमाणं जिनाभिहितम् ॥"

इति वचनात्, मिथ्यादर्शनशल्यविरमणं च एकेन्द्रियविकलेन्द्रियवर्जेषु स्थानेषु, शेषेषु एकेन्द्रियादिषु न भवति, कस्मादिति चेत्, उच्यते, पृथिव्यादिषु 'उभयाभावो पुढवाइएसु' प्रतिपद्यमानप्रतिपन्नाभावः पृथिव्यादिषु इति वचनात्, द्वीन्द्रियादीनां तु यद्यपि करणापर्याप्तावस्थायां केषाचित् सासादनसम्यक्त्वं भवति तथापि तत् मिथ्यात्वाभिमुखानां तदतिक्रूलानामतस्तेषामपि मिथ्यादर्शनशल्यविरमणप्रतिषेधः, आह च– 'अत्थि णं भंते ! जीवाणं मिच्छादंसणसल्लवेरमणे कज्जइ' इत्यादि, अथवा प्राणातिपातवि- रतस्य कर्मबन्धो भवति किं वा नेति चेत्, उच्यते, भवत्यपि

न भवत्यपि, तथा च एतदेव प्रश्नसूत्र- पूर्वकमाह–

मू. (५३२) *पाणातिपातविरए णं भंते ! जीवे कइ कम्मपगडीतो बंधति ?, गो० ! सत्तविहबंधए वा अट्ठविहबंधए वा छव्विहबंधए वा एगविहबंधए वा अबंधए वा, एवं मणूसेवि भाणितव्वे, पाणातिपातविरया णं भंते ! जीवा कति कम्मपगडीतो बंधंति ?, गो० ! सव्वेवि ताव होज्जा सत्तविहबंधगा य एगविहबंधगा य १ अहवा सत्तविहबं० एगविहबं० अट्ठविहबंधगे य २ अहवा सत्तविहबं० एगविहबं० अट्ठविहबंधगा य ३ अहवा सत्तविहबं० एगविहबं० छव्विहबंधगे य ४, अहवा सत्तविहबं० एगवि० छव्विहबंधगा य ५ अहवा सत्तविहबं० एगविहबं० अबंधए य ६ अहवा सत्तविहबं० एगविहबं० अबंधगा य ७*

–अहवा सत्तवि० एगवि० अट्ठविधंबधगे य छव्विहबंधए य १ अहवा सत्तविहबंधगा य एगविहबं० अट्ठविहबंधए य छव्विहबंधगा य २ अहवा सत्तविहबं० एगवि० अट्ठविहबंधगा य छव्विहबंधए य ३ अहवा सत्तविहबंधगा य एगविहबंधगा य अट्ठविहबंधगा य छव्विहबंधगा य ४

–अहवा सत्तविहबंधगा य एगविहबंधगा य अट्ठविहबंधए य अबंधए य १ अहवा सत्तविहबं०.एगविहबं० अट्ठविहबंधए य अबंधगा य २ अहवा सत्तविहबं० एगवि० अट्ठविहबंधगा य अबंधए य ३ अहवा सत्तविहबंधगा य एगविहबंधगा य अट्ठविहबंधगा य अबंधगा य ४,

–अहवा सत्तविहबंधगा य एगविहबंधगा य छव्विहबंधगे य अबंधए य १ अहवा सत्तविहबं० एगविहबंधगा य छव्विहबंधए य अबंधगा य २, अहवा सत्तविहबंधगा य एगवि० छव्विह० अबंधए य ३ अहवा सत्तविहबंधगा य एगवि० छव्विह० अबंधगा य ४

–अहवा सत्तविहबंधगा य एगवि० अट्ठविहबंधगे य छव्विहबंधए य अबंधए य १ अहवा सत्तविहबंधगा य एगवि० अट्ठविहबंधए य छव्विहबंधए य अबंधगा य २ अहवा सत्तविहबंधगा य एगविह० अट्ठविहबंधए य छव्विहबंधगा य अबंधए य ३ अहवा सत्तविहबंधगा य एगविह० अट्ठविधबंधए य छव्विहबंधगा य अबंधगा य ४, अहवा सत्तवि० एगवि० अट्ठवि० छव्विहबंधगे य अबंधए य ५, अहवा सत्तविहबंधगा य एगवि० अट्ठविह० छव्विहबंधगे य अबंधगा य ६, अहवा सत्तवि० एगविह– अट्ठवि० छव्विहबंधगा य अबंधए य ७ अहवा सत्तविहबंधगा य एग० अट्ठवि० छव्विहबं० अबंधगा य ८ एवं एते अट्ठभंगा,

सव्वेवि मिलिया सत्तावीसं भंगा भवंति, एवं मणूसाणवि एते चेव सत्तावीसं भंगा भाणितव्वा,

एवं मुसावायविरयस्स जाव मायामोसविरयस्स जीवस्स य मणूसस्स य, मिच्छादंसणसल्लविरए णं भंते ! जीवे कति कम्मपगडीतो बंधति ?, गो० ! सत्तविहबंधए वा अट्ठविहबंधए छव्विहबंधए वा एगवि० अबंधए वा,

मिच्छादंसणसल्लविरए णं भंते ! नेरइए कति कम्मपगडीतो बंधति ?, गो० ! सत्तविहबंधए वा अट्ठवि० जाव पंचिंदियतिरिक्खजोणिय०, मणूसे जहा जीवे, वाणमंतरजोइसियवेमाणिते जहा नेरइते, मिच्छादंसणसल्लविरया णं भंते ! जीवा कति कम्मपगडीतो बंधंति ?, गो० ! ते चेव सत्तावीसं भंगा भाणि० मिच्छादंसणसल्लविरया णं भंते ! नेरइया कति कम्मपगडीतो बंधंति ?, गो० ! सव्वेवि ताव होज्जा सत्तविहबंधगा अहवा सत्तविहबंधगा य अट्ठविहबंधगे य अहवा सत्तविहबंधगा य अट्ठवि० एवं जाव वेमाणिया, नवरं मणूसाणं जहा जीवाणं !

वृ. 'पाणाइवायविरए णं भंते! जीवे' इत्यादि सुगमं, बहुवचने प्रश्नसूत्रं सुगमं, निर्वचनसूत्रे सर्वेऽपि तावद्भवेयुः सप्तविधबन्धकाश्च एकविधबन्धकाश्च, इह प्रमत्ताप्रमत्तापूर्वकरणानिवृत्तबादरसम्परायाः सप्तविधबन्धकाः प्रमत्ता अप्रमत्ताश्चायुर्बन्धकालेऽष्टविधबन्धकाः, आयुषोऽपि बन्धनात्, आयुर्बन्धश्च कादाचित्क इति कदाचित्सर्वथा न लभ्यतेऽपि, प्रमत्ताश्चाप्रमत्ताश्च सदैव बहुत्वेन लभ्यन्ते, अपूर्वकरणा अनिवृत्तिबादराश्च कदाचिन्न भवन्त्यपि, विरहस्यापि तेषामागमे प्रतिपादनात्, एकविधबन्धका उपशान्तमोहक्षीणमोहसयोगिकेवलिनः, तत्र उपशान्तमोहाः क्षीणमोहाश्च कदाचिल्लभ्यन्ते कदाचिन्न लभ्यन्ते, तेषामन्तरस्यापि सम्भवात्, सयोगिकेवलिनस्तु सदा प्राप्यन्तेऽन्यान्यभावेन तेषामव्यवच्छेदात्,

ततः सप्तविधबन्धका एकविधबन्धकाश्चावस्थिता इत्यष्टविधबन्धकाद्यभावे एको भङ्गः,अथवा सप्तविधबन्धका एकविधबन्धकाश्च बहव एकोऽष्टविधबन्धक इति द्वितीयः, अष्टविधबन्धकानां बहुत्वे तृतीयः, षड्विधबन्धका अपि कदाचिल्लभ्यन्तेकदाचिन्न, उत्कर्षतः षण्मासविरहभावात्, यदापि लभ्यन्ते तदापि जघन्यपदे एको द्वौ वा उत्कर्षपदेऽष्टोत्तरं शतं ततोऽष्टविधबन्धकपदाभावे षड्विधबन्धकपदेनापि द्वौ भङ्गौ,

अबन्धका अयोगिकेवलिन्स्तेऽपि कदाचिदवाप्यन्ते कदाचिन्न, तेषामप्युत्कर्षतः षण्मासविरहभावात्, यदाऽप्यवाप्यन्ते तदापि जघन्यपदे एको द्वौ वा उत्कर्षतोऽष्टाधिकं शतं, ततोऽष्टविधबन्धकपदाभावेऽबन्धकपदेनापि द्वौ भङ्गौ, तदेवमेक आद्यो भङ्ग एककसंयोगे च षडिति सप्त भङ्गाः, इदानीं द्विकसंयोगे भङ्ग दर्श्यन्ते, तत्र सप्तविधबन्धका एकविधबन्धकाश्चावस्थिताः, उभयेषामपि सदा बहुत्वेन लभ्यमानत्वात्, ततोऽष्टविधबन्धकपदे षड्विधबन्धकपदे च प्रत्येकमेकवचनमिति एको भङ्गः,

अष्टविधबन्धकपदे एकवचनं षड्विधबन्धकपदे बहुवचनं इति द्वितीयः, एतौ द्वौ भङ्गावष्टविधबन्धकपदस्यैकवचनेन लब्धौ, एतावेव द्वौ भङ्गौ बहुवचनेनेति चत्वारः, एवमेव चत्वारो भङ्गाः अष्टविधबन्धकाबन्धकपदाभ्याम्, एवमेव चत्वारः षड्विधबन्धकाबन्धकपदाभ्यामिति, सर्वसङ्कलनया द्विकसंयोगे द्वादश भङ्गाः, त्रयाणामष्टविधबन्धकषड्विधबन्धकरूपाणां पदानां संयोगे प्रत्येकमेकवचनबहुवचनाभ्यामष्टौ भङ्गाः, सर्वसङ्कलनया सप्तविंशतिर्भङ्गाः, अत्रापर आह–

ननु विरतस्य कथं बन्धो ?, न हि विरतिर्बन्धहेतुर्भवति, यदि पुनर्विरतिरपि बन्धहेतुः स्यात् ततो निर्मोक्षप्रसङ्गः, उपायाभावात्, उच्यते, न हि विरतिर्बन्धहेतुः, किन्तु विरतस्य ये कषायायोगास्ते बन्धकारणं, तथाहि–सामायिकच्छेदोपस्थानपरिहारविशुद्धिकेष्वपि संयमेषु कषायाःसंज्वलनरूपा उदयप्राप्ताः सन्ति योगाश्च, ततो विरतस्यापि देवायुष्कादीनां शुभप्रकृतीनां तत्प्रत्ययो बन्धः, यथा च प्राणातिपातविरतस्य सप्तविंशतिर्भङ्गा उक्ताः तथा मृषावादविरतस्य यावत् मायामृषाविरतस्य, मिथ्यादर्शनशल्यविरतमधिकृत्य सूत्रमाह–

'मिच्छादंसणसल्लविरहे णं भंते!' इत्यादि सुगमं, नवरं सप्तविधबन्धकत्वमष्टविधबन्धकत्वं षड्विधबन्धकत्वमेकविधबन्धकत्वमबन्धकत्वं च, मिथ्यादर्शनशल्यविरतेरविरतसम्यग्दृष्टेरारभ्यायोगिकेवलिनं यावद्भावात्, नैरयिकादिचतुर्विंशतिदण्डकचिन्तायां मनुष्यवर्जेषु शेषेषु सर्वेष्वपि स्थानेषु सप्तविधबन्धकत्वं अष्टविधबन्धकत्वं वा, न षड्विधबन्धकत्वादि, श्रेणिप्रतिपत्त्यसम्भवात्,

मनुष्यपदे च यथा जीवपदे तथा वक्तव्यं, मनुष्येषु सर्वभावसम्भवात्, बहुवचनेनैतद्विषयं सूत्रमाह-

'मिच्छादंसणसल्लविरया णं भंते! जीवा' इत्यादि, अत्रापि त एव पूर्वोक्ताः सप्तविंशतिर्भङ्गाः, नैरयिकपदे भङ्गत्रिकं, तत्र सर्वेऽपि तावद्भवेयुः सप्तविधबन्धका इत्येको भङ्गः, अयं च यदैकोऽष्टविधबन्धको न लभ्यते तदा भवति, यदा पुनरेकोऽष्टविधबन्धको लभ्यते तदाऽयं द्वितीयो भङ्गः सप्तविधबन्धकाश्चाष्टविधबन्धकश्च, यदा पुनरष्टविधबन्धका अपि बहवो लभ्यन्ते तदा तृतीयः सप्तविधबन्धकाश्चाष्टविधबन्धकाश्च, एवं भङ्गत्रिकं तावद् वाच्यं यावद्वैमानिकसूत्रं, नवरं मनुष्यपदे सप्तविंशतिर्भङ्गका यथा जीवपदे इति।

सू. *(५३३) पाणातिवायविरयस्स णं भंते! जीवस्स किं आरंभिया किरिया कज्जति जाव मिच्छादंसणवत्तिया किरिया कज्जति?, गो०! पाणातिवायविरयस्स जीवस्स आरंभिया किरिया सिय कज्जति सिय नो कज्जति,*

पाणातिवायविरयस्स णं भंते! जीवस्स परिग्गहिया किरिया कज्जति?, गो०! नो इणट्ठे समट्ठे, पाणातिवायविरयस्स णं भंते! जीवस्स मायावत्तिया किरिया कज्जति?, गो०! सिय कज्जति सिय नो कज्जति,

पाणातिपातविरयस्स णं भंते! जीवस्स अपच्चक्खाणवत्तिया किरिया कज्जति?, गो०! नो इणट्ठे समट्ठे, मिच्छादंसणवत्तियाए पुच्छा, गो०! नो इणट्ठे समट्ठे, एवं पाणातिपातविरयस्स मणूससस्सवि, एवं जाव मायामोसविरयस्स जीवस्स मणूसस्स य,

मिच्छादंसणसल्लविरयस्स णं भंते! जीवस्स किं आरंभिया किरिया क० जाव मिच्छादंसणवत्तिया कि० क०?, गो०! मिच्छादंसणसल्लविरतस्स जीवस्स आरंभिया कि० सिय क० सिय नो क०, एवं जाव अपच्चक्खाणकिरिया, मिच्छादंसणवत्तिया न क०,

मिच्छादंसणसल्लविरयस्स णं भंते! नेरइयस्स किं आरंभिया किरिया क० जाव मिच्छादंसणवत्तिया कि० क०?, गो०! आरंभिया कि० क० जाव अपच्चक्खाणकिरियावि क०, मिच्छादंसणवत्तिया किरिया नो क०, एवं जाव थणियकुमारस्स,

मिच्छादंसणसल्लविरयस्स णं भंते! पंचिंदियतिरिक्खजोणियस्स एवमेव पुच्छा, गो०! आरंभिया कि० क० जाव मायावत्तिया कि० क०, अपच्चक्खाणकि० सिय क० सिय नो क०, मिच्छादंसणवत्तिया कि० नो क०। मणूस्स जहा जीवस्स।

वाणमंतरजोइसियवेमा० जहा नेरइयस्स। एतासि णं भंते! आरंभियाणं जाव मिच्छादंसणवत्तियाण य कतरे २ हिंतो अप्पा वा ४?, गो०! सव्वत्थोवाओ मिच्छादंसणवत्तियाओ किरियाओ, अपच्चक्खाणकिरियाओ विसे०, परिग्गहियातो विसे० आरंभियातो किरियातो विसे०, मायावत्तियातो विसेसाहियातो॥

वृ. अथारम्भिक्यादीनां क्रियाणां मध्ये का क्रिया प्राणातिपातविरतस्येति चिन्तयति- 'पाणाइवायविरयस्स णं भंते!' इत्यादि, आरम्भिकी क्रिया स्याद्भवति स्यान्न भवति, प्रमत्तसंयतस्य भवति शेषस्य न भवतीति भावः, पारिग्रहिकी निषेध्या, सर्वथा परिग्रहान्निवृत्तत्वात्, अन्यथा सम्यक्प्राणातिपातविरत्यनुपपत्तेः, मायाप्रत्यया स्याद्भवति स्यान्न भवति, अप्रमत्तस्यापि हि कदाचित् प्रवचनमालिन्यरक्षणार्थं भवति, शेषकालं तु न भवति, अप्रत्याख्यानक्रिया

मिथ्यादर्शनप्रत्यया च सर्वथा निषिध्यते, तद्भावे प्राणातिपातविरत्ययोगात्, प्राणातिपातविरतेश्च द्वे पदे, तद्यथा–

'जीवो मनुष्यश्च, तत्र यथा सामान्यतो जीवमधिकृत्योक्तं तथा मनुष्यमधिकृत्य वक्तव्यं, तथा चाह–'एवं पाणाइवायविरयस्स मणूसस्सवि' इति, एवं तावद्वाच्यं यावन्मायामृषाविरतस्य जीवस्य मनुष्यस्य च, मिथ्यादर्शनशल्यविरतमधिकृत्य सूत्रं 'मिच्छादंसणसल्लविरयस्स णं भंते! जीवस्स' इत्यादि, आरम्भिकी स्याद्भवति स्यान्न भवति, प्रमत्तसंयतान्तस्य भवति शेषस्य न भवतीति भावार्थः, पारिग्रहिकी देशविरतिं यावद्भवति, परतो न भवति, मायाप्रत्ययाऽप्यनिवृत्तबादरसम्परायं यावद्भाविनी परतो न भवति, अप्रत्याख्यानक्रियाऽपि अविरतसम्यग्दृष्टिं यावन्न परतः, तत् एता अपि क्रिया अधिकृत्य 'सिय कज्जइ सिय नो कज्जइ' इति वक्तव्यं, तथा चाह–'एवं जाव अपच्चक्खाणकिरिया' इति, मिथ्यादर्शनप्रत्यया पुनर्निषेध्या, मिथ्यादर्शनविरतस्य तस्या असम्भवात्,

चतुर्विंशतिदण्डकचिन्तायां नैरयिकादीनां स्तनितकुमारपर्यन्तानां चतस्रः क्रिया वक्तव्याः, मिथ्यादर्शनप्रत्यया निषेध्या, तिर्यक्पञ्चेन्द्रियस्याद्यास्तिस्रः क्रिया नियमतो वक्तव्याः, अप्रत्याख्यानक्रिया भाज्या, देशविरतस्य न भवति शेषस्य भवतीत्यर्थः, मिथ्यादर्शनप्रत्यया निषेध्या, मनुष्यस्य यथा सामान्यतो जीवस्य, व्यन्तरादीनां यथा नैरयिकस्य।

सम्प्रत्यासामेवारम्भिक्यादीनां क्रियाणां परस्परमल्पबहुत्वमाह–'एएसि णं भंते!' इत्यादि, सर्वस्तोका मिथ्यादर्शनप्रत्यया क्रिया, मिथ्यादृष्टीनामेव भावात्, ततोऽप्रत्याख्यानक्रिया विशेषाधिका, अविरतसम्यग्दृष्टीनां मिथ्यादृष्टीनां च भावात्, ताभ्योऽपि पारिग्राहिक्यो विशेषाधिकाः, देशविरतानां पूर्वेषां च भावात्, आरम्भिक्यो विशेषाधिकाः, प्रमत्तसंयतानां पूर्वेषां च भावात्, ताभ्योऽपि मायाप्रत्यया विशेषाधिकाः अप्रमत्तसंयतानामपि भावात्॥

पदं – २२ – समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाऽपाङ्गसूत्रे द्वाविंशतितमापदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता।

पदं – २३ – कर्मप्रकृतिः

वृ. तदेवमुक्तं द्वाविंशतितमं पदं, सम्प्रति त्रयोविंशतितममारभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तरपदे नारकादिगतिपरिणामेन परिणतानां जीवानां प्राणातिपातादिक्रियाविशेषश्चिन्तितः, सम्प्रति पुनः कर्मबन्धादिपरिणामविशेषश्चिन्त्यते–तत्र चेयमधिकारद्वारगाथा–

–: पदं – २३ – उद्देशकः– १ :–

मू. (५३४) *कति पगडी १ कह बंधति २ कइहिवि ठाणेहिं बंधए जीवो ३।*
कति वेदेइ य पयडी ४ अनुभावो कइविहो कस्स ५॥

वृ. 'कइ पगडी' इत्यादि, कति प्रकृतयो भवन्तीत्यादि प्रथमोऽधिकारः, तथा कथं–केन प्रकारेण ताः प्रकृतीर्बध्नातीति द्वितीयः स कतिभिः स्थानैर्बध्नातीति तृतीयः, कति प्रकृतीर्वेदयते इति चतुर्थः, कस्य कर्मणः कतिविधोऽनुभागः पञ्चमः। तत्र प्रथमाधिकारनिरूपणार्थमाह–

मू. (५३५) *कति णं भंते! कम्मपगडीओ पन्नत्ताओ, गो०! अट्ठ कम्मपगडीओ पन्नत्ताओ,*

तं०-नाणावरणिज्जं १ दंसणावरणिज्जं २ वेदणिज्जं ३ मोहणिज्जं ४ आउयं ५ नामं ६ गोयं ७ अंतराइयं ८० ।

नेरइयाणं भंते ! कइ कम्मपगडीओ पं० ?, गो० ! एवं चेव, एवं जाव वेमाणियाणं ॥ १

वृ. 'कति णं भंते ! कम्मपयडीओ पन्नत्ताओ' इति, ननूक्तमेव क्रियापदे कति कर्मप्रकृतय इति ततः किमर्थमिह प्रकृतिमसङ्ख्यार्थः प्रश्नः ?, उच्यते, विशेषप्रतिपादनार्थः, स चायं विशेषः-पूर्वं ज्ञानावरणीयादि कर्म बध्नन् कतिभिः क्रियाभिर्युज्यते इत्युक्तं, क्रियाश्च प्राणातिपातहेतवः, प्राणातिपातश्च बाह्यं ज्ञानावरणीयादिकर्मबन्धकारणं, कर्मबन्धः कार्यं, इह तु ज्ञानावरणीयादिकर्म एवान्तरं कर्मबन्धकारणं प्रतिपाद्यमिति, भगवन्निर्वचनमाह-

'गौतम अष्टौ कर्मप्रकृतयः प्रज्ञप्ताः, एता एव नामग्राहं दर्शयति-'ज्ञानावरणीयं दर्शनावरणीयं' इत्यादि, ज्ञायते-परिच्छिद्यते वस्त्वनेनेति ज्ञानं-सामान्यविशेषात्मके वस्तुनि विशेषग्रहणात्मको बोधः, आव्रियते-आच्छाद्यते अनेनेत्यावरणीयं 'कृद्बहुल' मिति वचनात् करणेऽनीयप्रत्ययः, ज्ञानस्यावरणीयं ज्ञानावरणीयं, दृश्यतेऽनेनेति दर्शनं-सामान्यविशेषात्मके वस्तुनि सामान्यग्रहणात्मको बोधः, उक्तं च-

॥ १ ॥ "जं सामन्नग्गहणं भावाणं नेय कट्टु आगारं ।
अविसेसिऊण अत्थे दंसणमिइ वुच्चइए समए ॥"

तस्यावरणीयं दर्शनावरणीयं, तथा वेद्यते-गाह्लादादिरूपेण यदनुभूयते तद्वेदनीयं, अत्र कर्मण्यनीयः, यद्यपि च सर्वं कर्म वेद्यते तथापि पङ्गुजादिशब्दवत् वेदनीयशब्दस्य रूढिविषयत्वात् सातासातरूपमेव कर्म वेदनीयमित्युच्यते, न शेषं, तथा मोहयति-सदसद्विवेकविकलं करोति आत्मानमिति मोहनीयं, अत्र बहुलवचनात् कर्त्तर्यनीयः, तथा एति आगच्छति प्रतिबन्धकतां स्वकृतकर्मबद्धनरकादिकुगतेर्निष्क्रमितुमनसो जन्तोरित्यायुः, अथवा आ समन्तादेति-गच्छति भवाद् भवान्तरसङ्क्रान्तौ विपाकोदयमित्यायुः, उभयत्राप्यौणादिक उस्प्रत्ययः,

तथा नामयति-गत्यादिपर्यायानुभवनं प्रति प्रवणयति जीवमिति नाम, तथा गूयते-शब्द्यते उच्चावचैः शब्दैर्यत् तद् गोत्रं-उच्चनीचकुलोत्पत्तिलक्षणः पर्यायविशेषः तद्विपाकवेद्यं कर्मापि गोत्रं, कार्ये कारणोपचारात् यद्वा कर्मणोऽपादानविवक्षा गूयते-शब्द्यते उच्चावचैः शब्दैरात्मा यस्मात् कर्मणः उदयाद् गोत्रं, तथा जीवं दानादिकं चान्तरा व्यवधानापादनाय एति-गच्छत्यन्तरायं,

जीवस्य दानादि कर्तुमुद्यतस्य विघातकृद् भवतीत्यर्थः, अत्राह-नन्वित्थं ज्ञानावरणीयाद्युपन्यासे किञ्चिदस्ति प्रयोजनमुत यथाकथञ्चिदेव प्रवृत्तिरिति ?, अस्तीति ब्रूमः, किं तदिति चेत्, उच्यते, इह ज्ञानं दर्शनं च जीवस्य स्वतत्त्वभूतं, तदभावे जीवत्वस्यैवाभावात्, चेतनालक्षणो हि जीवस्ततः स कथं ज्ञानदर्शनाभावे भवेत् ?,

ज्ञानदर्शनयोरपि च मध्ये प्रधानं ज्ञानं, तद्वशादेव सकलशास्त्रादिविषयविचारसन्ततिप्रवृत्तेः, अपिच-सर्वा अपि लब्धयो जीवस्य साकारोपयोगोपयुक्तस्योपजायन्ते, न दर्शनोपयोगोपयुक्तस्य, 'सव्वाओ लद्धीओ सागरोवउत्तस्स नो अनागारोवओगोवउत्तस्से' ति वचनप्रामाण्यात्, अन्यच्च- यस्मिन् समये सकलकर्मविनिर्मुक्तस्वरूपो जीवः सम्पद्यते तस्मिन् समये ज्ञानोपयोगोपयुक्त एव न दर्शनोपयुक्तो, दर्शनोपयोगस्य द्वितीयसमये भावात्, ततो ज्ञानं प्रधानं,

तदावारकं च ज्ञानावरणीयं कर्म तत्स्तत्प्रथममुक्तं, ततस्तदनन्तरं दर्शनावरणीयं ज्ञानोपयोगाच्च्युतस्य दर्शनोपयोगेऽवस्थानात्, एते च ज्ञानदर्शनावरणीये स्वविपाकमुपदर्शयतो यथायोगमवश्यं सुखदुःखरूपवेदनीयकर्मविपाकोदयनिमित्ते भवतः

तथाहि–ज्ञानावरणमुपचयोत्कर्षमधिरूढं विपाकतोऽनुभवन् सूक्ष्म २ तरवस्तुविचारासमर्थमात्मानं जानानः खिद्यते भूरिलोकः, ज्ञानावरणकर्मक्षयोपशमपाटवोपेतश्च सूक्ष्मसूक्ष्मतराणि वस्तूनि निजप्रज्ञया भिन्दानो बहुजनातिशायिनमात्मानं पश्यन् सुखं वेदयते, तथाऽतिनिबिड-दर्शनावरणविपाकोदये जात्यन्धादिरनुभवति दुःखमद्भुतं, दर्शनावरणकर्मक्षयोपशमपटिष्ट-तापरिकरितश्च स्पष्टचक्षुराद्युपेतो यथावद् वस्तूनि पश्यन् वेदयते प्रमोदम्, तत एतदर्शप्रतिपत्त्यर्थं दर्शनावरणीयानन्तरं वेदनीयग्रहणं, वेदनीयं च सुखदुःखे जनयत्यभीष्टानभीष्टविषयसम्बन्धात्,

अभीष्टानभीष्टविषयसम्बन्धे चावश्यं संसारिणां रागद्वेषौ तौ च मोहनीयहेतुकौ तत एतदर्थ-प्रतिपत्त्यर्थं वेदनीयानन्तरं मोहनीयग्रहणं, मोहनीयमूढाश्च जन्तवो बह्वारम्भपरिग्रहाद्यासक्ता नरकाद्यायुष्कमाबध्नन्ति ततो मोहनीयानन्तरमायुष्कग्रहणं, नरकाद्यायुष्कोदये चावश्यं नरकगत्यादीनि नामान्युदयमायान्ति तत आयुष्कानन्तरं नामग्रहणं, नामकर्मोदये च नियमादुच्चनीचान्यतरगोत्रकर्मविपाकोदयेन भवितव्यमतो नामग्रहणा-नन्तरंगोत्रग्रहणं,

गोत्रोदये चोच्चैःकुलोत्पन्नस्यप्रायो दानलाभान्तरायादिक्षयोपशमो भवति, राजप्रभृतीनां प्राचुर्येण दानलाभादिदर्शनात्, नीचैःकुलोत्पन्नस्य तु दानलाभान्तरायाद्युदयोऽन्त्यजातीनां तथादर्शनातात्, तत एतदर्थप्रतिपत्त्यर्थं गोत्रानन्तरमन्तरायग्रहणं। तदेवमुक्तं प्रथमं द्वारम्,

सू. (५३६) *कहन्नं भंते ! जीवे अट्ठ कम्मपगडीतो बंधति ?, गो० ! नाणावरणिज्जस्स कम्मस्स उदएणं दरिसणावरणिज्जं कम्मं नियच्छति, दंसणावरणिज्जस्स कम्मस्स उदएणं दंसणमोहणिज्जं कम्मं नियच्छति, दंसणमोहणिज्जस्स कम्मस्स उदएणं मिच्छत्तं नियच्छति, मिच्छत्तेणं उदिएणं गो० ! एवं खलु जीवो अट्ठ कम्मपगडीतो बंधति,*

कहण्णं भंते ! नेरइए अट्ठ कम्मपगडीओ बंधति ?, गो० ! एवं चेव, एवं जाव वेमाणिते कहण्णं भंते ! जीवा अट्ठ कम्मपगडीतो बंधंति, गो० ! एवं चेव जाव वेमाणिया ॥

वृ. अधुना कथं बध्नातीति द्वितीयद्वारप्रतिपादनार्थमाह–'कहन्नं भंते !' इत्यादि, कथं–केन प्रकारेण णमिति वाक्यालङ्कारे जीवोऽष्टौ प्रकृतीर्बध्नाति ?, भगवानाह–गौतम ! ज्ञानावरणीय-मुत्कर्षप्राप्तमुदयेन अनुभवन् दर्शनावरणीयमुदयेन वेदयते, दृश्यन्ते हि खलु शून्यवादिप्रभृतयः कुवादिनः कुज्ञानवासितान्तःकरणा विपरीतं पश्यन्त इति,

दर्शनावरणीयस्य च कर्मण उदयेन दर्शनमोहनीयं कर्म निर्गच्छति, विपाकावस्थोदयेन प्रतिपद्यते इति भावः, तस्य दर्शनमोहनीयस्य कर्मण उदयेन मिथ्यात्वं निर्गच्छति, अतत्त्वं तत्त्वमध्यवस्यति तत्त्वं चातत्त्वमिति भावः, तत एवं मिथ्यात्वोदयेन जीवोऽष्टौ प्रकृतीर्बध्नाति,

खलुशब्दः प्रायोवृत्तिदर्शनार्थः, प्रायस्तावदेवमन्यथा सम्यग्दृष्टिरपि कश्चिदष्टौ प्रकृतीर्बध्नाति, केवलं कश्चित् न बध्नत्यपि यथा सूक्ष्मसम्परायादिरिति स प्रकारो नोक्तः, एष चात्र तात्पर्यार्थः–पूर्वकर्मपरिणामसामर्थ्यात् उत्तरकर्मणः सम्भवो, यथा बीजादङ्कुरपत्रनालादीनां, उक्तं च–

॥ १ ॥ "जीवपरिणामहेउं कम्मत्ता पुग्गला परिणमंति ।
पुग्गलकम्मनिमित्तं जीवोवि तहेव परिणमइ ॥" इति

उक्तमेवार्थं चतुर्विंशतिदण्डकक्रमेण निरूपयति–'कहण्णं भंते ! नेरइए' इत्यादि सुगमं, तदेवमुक्त एकत्वेन दण्डकः, सम्प्रति बहुत्वेनाह–'कहण्णं भंते ! नेरइया' इत्यादि पाठसिद्धं ।

उक्तं द्वितीयद्वारमपि, अधुना कतिभिः स्थानैर्बध्नातीति तृतीयद्वारमभिधित्सुराह–

मू. (५३७) *जीवे णं भंते ! नाणावरणिज्जं कम्मं कतिहिं ठाणेहिं बंधति ?, गो० !दोहिं ठाणेहिं, तं०–रागेण य दोसेण य, रागे दुविहे पं०, तं०–माया य लोभे य, दोसे दुविधे पं०, तं०–कोहे य माणे य, इच्चेतेहिं चउहिं ठाणेहिं विरितोवग्गहिएहिं एवं खलु जीवे नाणावरणिज्जं कम्मं बंधति, एवं नेरतिते जाव वेमाणिते, जीवा णं भंते ! नाणावरणिज्जं कम्मं कतिहिं ठाणेहिं बंधंति ?, गो० ! दोहिं ठाणेहिं एवं चेव, एवं नेरइया जाव वेमाणिया, एवं दंसणावरणिज्जं जाव अंतराइज्जं, एवं एते एगत्तपोहत्तिया सोलस दंडगा ॥ ३*

वृ. 'जीवे णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–द्वाभ्यां स्थानाभ्यां, त एव स्थाने नामग्राहमाह–तद्यथा–रागेण. द्वेषेण च, अथ कोऽयौ रागः कोवा द्वेष इति ?, उच्यते, प्रीतिलक्षणो रागोऽप्रीत्यात्मको द्वेषः, एतौ च प्रीत्यप्रीत्यात्मकौ रागद्वेषौ नात्यन्तं क्रोधादिभ्यो व्यतिरिच्येते, किन्तु तेष्वेवान्तर्भवतः, स चान्तर्भावो नयभेदाद्विचित्र इति विनयजनानुग्रहाय प्रदर्शयते,

तत्र सङ्ग्रहो मन्यते–क्रोधोऽप्रीत्यात्मकः प्रतीत एव, मानोऽपि परगुणासहनात्मकत्वादप्रीत्यात्मकः, ततोऽप्रीत्यात्मकत्वादेतौ द्वावपि द्वेषः लोभोऽभिष्वङ्गात्मकत्वात् प्रीतिरूपः सुप्रसिद्धो, मायामपि परवञ्चनात्मिकां किञ्चिदभिलषनं प्रयुङ्क्ते अभिलाषश्च प्रतिस्वभाव इति साऽपि प्रीत्यात्मिका, तत एतौ मायालोभौ प्रीत्यात्मकत्वात् रागः उक्तं च–

॥ १ ॥ "कोहं माणं चापीइजाइतो वेइ संगहो दोसं ।
मायाए लोभेण य स पीइसामण्णतो रागं ॥"

अत्र उत्तरार्द्धस्याक्षरयोजन–मायया लोभेन सह प्रीतिजातिसामान्यात् स मानप्रीतिजातिभावात् द्वावपि मायालोभौ स सङ्ग्रहो रागमाचष्टे इति । व्यवहारः पुनरूचे–माया खलु परोपघाताय प्रयुज्यते परोपघातपरिणामश्च द्वेष इति मायाया अपि द्वेषेऽन्तर्भावः, या तु न्यायोपादानेनार्थे मूर्च्छा स परोपधातरहितः शुद्धो लोभ इति रागः, एवं चेदमस्य मतेन वस्तु व्यवस्थितं–क्रोधमानमाया द्वेषो लोभो राग इति, आह च–

॥ १ ॥ "मायंपि दोसमिच्छइ ववहारो जं परोवघायाय ।
नायोवायाणे च्चिय मुच्छ मुच्छा लोभेत्ति तो रागो ॥"

ऋजुसूत्रः पुनराह–क्रोधो नियमादप्रीत्यात्मकः, ततः स परोपघातात्मकत्वत् द्वेषः ये तु मानमायालोभास्ते द्विधाऽपि सम्भवन्ति–प्रीत्यात्मका अप्रीत्यात्मकाश्च, तथाहि–मानः स्वाहङ्कारोपयोगकाले प्रीत्यात्मकः स्वगुणबहुमानभावात्, परगुणद्वेषोपयोगवेलायामप्रीत्यात्मको मात्सर्यादिभावात्, मायाऽपि परवञ्चनोपयोगप्रवृत्तौ परोपधातरूपत्वात्, अप्रीत्यात्मिका परगतद्रव्योपादानचिन्तायां त्वभिष्वङ्गात्मकत्वात् प्रीतिरूपा, लोभोऽपि क्षत्रियादीनां परिचिन्त्यमानः प्रीत्यप्रीत्यात्मकः सुप्रतीतः, तथाहि–क्षत्रिया एवं मन्यन्ते परविषयापहारोऽस्माकं न्याय्यो 'वीरभोग्या

वसुन्धरा' इति न्यायात्, ततो यदा परविषयापहाराय तेषामत्यर्थमभियोगस्तदाऽसौ अप्रीत्यात्मकः, परोपधातहेतुत्वात्, यदा तु परविषयजिघृक्षोपयोगस्तदा सोऽभिष्वङ्गात्मकत्वात प्रीत्यात्मकः, तत एवं मानमायालोभा उभयरूपा अपि संवेद्यन्ते, यदा च प्रीत्युपयोगो न तदाऽप्रीत्युपयोगः, यदा चाप्रीत्युपयोगो न तदा प्रीत्युपयोगः, एकस्मिन् समये उपयोगद्वयाभावात्, ततो मानमायालोभाःप्रीत्युपयोगकाले रागोऽप्रीत्युपयोगकाले द्वेषः, उक्तं च–

॥ १ ॥ "उज्जुसुवमयं कोहो दोसो सेसाणमयमनेगंतो ।
रागोत्ति य दोसोत्ति य परिणाम वसेण उ विसेसो ॥

॥ २ ॥ मानो रागोत्ति मओ साहंकारोवओगकालंमि ।
सो चेव होइ दोसो परगुणदोसोवयोगंमि ॥

॥ ३ ॥ मायालोभा चेवं परोवघाओवओगतो दोसो ।
मुच्छोवओगकाले रागोऽभिस्संगलंगोत्ति ॥"

शब्दादयस्त्रयः पुनरेवमाहुः–इह द्वावेव कषायौ–क्रोधो लोभश्च, ये तु मानमाये ते क्रोधलोभयोरन्तर्भवतः, तथाहि–माने मायायां च ये परोपघातहेतवोऽध्यवसायास्ते क्रोधोऽप्रीत्यात्मकत्वात् ये तु स्वगुणोत्कर्षरद्रव्यमूर्च्छात्मिकास्ते लोभोऽभिष्वङ्गरूपत्वात्, लोभोऽपि च लोकप्रसिद्धो द्विधा–परोपघातात्मको मूर्च्छात्मकश्च, तत्र परोपघातात्मको यथा क्षत्रियाणां परराष्ट्रापहारे, मूर्च्छात्मको न्यायोपात्ते निजद्रव्ये, तत्र यः परोपघातात्मकः स क्रोधो भवति, क्रोधश्च सर्वोऽपि यथोक्तस्वरूपो द्वेषोऽप्रीत्यात्मकत्वात्, केवलस्तु मूर्च्छात्मकोऽध्यवसायो लोभः स च रागः तथा चोक्तम्–

॥ १ ॥ "सद्दाइमयं माने मायाए य सगुणोवराग्गा य ।
उवओगो लोहो पिय जतो स तत्थेव उवरद्धो ॥

॥ २ ॥ सेसंसा कोहो पिय सपरोवघायमइओत्ति तो दोसो ।
तल्लक्खणो य लोभो अह मुच्छा केवलो रागो ॥" इति,

तत्र सङ्ग्रहनयमतेनाह–'रागे दुविहे पन्नत्ते' इत्यादि सुगमं, भावितत्वात्, उपसंहारमाह–'इच्चतेहिं चउहिं ठाणेहिं' इत्यादि, एवं खलु इत्येनैरयन्तरोक्तैश्चतुर्भिःस्थानैः, कथंभूतैरित्याह–वीर्योपगूहीतैर्जीववीर्योपस्थातितैरित्यर्थः, ज्ञानावरणीयं कर्म जीवो बध्नाति, अमुमेवार्थं चतुर्विंशतिदण्डकक्रमेण चिन्तयति–'एवं नेरइए जाव वेमाणिए' सुगमं, नवरमेवं सूत्रपाठः

'नेरइए णं भंते! नाणावरणिज्जं कम्मं कइहिं ठाणेहिं बंधइ' इत्यादि। तदेवमेकत्वेन चिन्ता कृता, सम्प्रति बहुत्वेन तां कुर्वन्नाह–'जीवा णं भंते!' इत्यादि सुगमं, यथा च ज्ञानावरणीयमेकत्वबहुत्वाभ्यां दण्डकद्वयेन चिन्तितं तथा दर्शनावरणीयादीन्यपि चिन्तनीयानि, सर्वसङ्ख्यया षोडश दण्डकाः। तदेवमुक्तं तृतीयं द्वारम्, सम्प्रति कति प्रकृतिर्वेदयते इति चतुर्थं द्वारमभिधित्सुराह–

मू. (५३८) *जीवे णं भंते! नाणावरणिज्जं कम्मं वेदेति?, गो० ! अत्थेगइए वेदेति अत्थेगइए नो वेएइ, नेरइए णं भंते! नाणावरणिज्जं कम्मं वेदेति?, गो० ! नियमा वेदेति, एवं जाव वेमाणिते, नवरं मणूसे जहा जीवे।*

जीवा णं भंते! नाणावरणिज्जं कम्मं वेदेंति?, गो० ! वेदेंति एवं चेव, एवं जाव वेमाणिया,

एवं जहा नाणावरणिज्जं तहा दंसणावरणिज्जं मोहणिज्जं अंतराइयं च, वेयनिज्जाउनामगोताइं एवं चेव, नवरं मणूसेवि नियमा वेदेति, एवं एते एगत्तपोहत्तिया सोलस दंडगा ॥ ४

वृ. 'जीवे णं भंते !' इत्यादि, अस्त्येककः कश्चित् यो वेदयतेऽस्त्येककः कश्चिद् यो न वेदयते अक्षीणघातिकर्मा वेदयते क्षीणघातिकर्मा तु न वेदयते इति भावः, अमुमेवार्थं चतुर्विंशतिदण्डकक्रमेण चिन्तयति- 'नेरइए णं भंते !' इत्यादि सुगमं, मनुष्यं मुक्त्वा शेषेषु सर्वेष्वपि स्थानेषु नियमाद्वेदयते इति वक्तव्यं, सर्वेषामक्षीणघातिकर्मत्वात्, मनुष्ये यथा जीवपदेऽभिहितं तथाऽभिधातव्यं, क्षीणघातिकर्मणोऽपि मनुष्यस्य लभ्यमानत्वात्, एवमेष एकत्वेन दण्डक उक्तः, एवं बहुत्वेनापि वक्तव्यः,

यथा च ज्ञानावरणीयमेकत्वपृथक्त्वाभ्यां भावितं एवं दर्शनावरणीयमोहनीयान्तरायाण्यपि भावनीयानि, वेदनीयायुर्नामगोत्राणि तु जीवपदे भजनीयानि, यतः-सिद्धा न वेदयन्ते शेषा वेदयन्ते इति, शेषास्तु नैरयिकादयो मनुष्या अपि च नियमाद्वेदयन्ते, आसंसारचरमसमयमवश्यममीषामुदयसम्भवात्, सर्वसङ्ख्यया चास्मिन्नप्यधिकारे एकत्वपृथक्त्वाभ्यां षोडश दण्डका भवन्ति।

गतं चतुर्थद्वारम्, इदानीं तु अनुभावः कस्य कर्मणः कतिविध इति पञ्चमद्वारमभिधित्सुराह-

मू. (५३९) कम्मपयडीणं भंते ! कम्मस्स जीवेणं बद्धस्स पुट्ठस्सबद्धफासपुट्ठस्स संचियस्स चियस्स उवचियस्स आवागपत्तस्स विवागपत्तस्स फलपत्तस्स उदयपत्तस्स जीवेणं कयस्स जीवेण निव्वत्तियस्स जीवेणं परिणामियस्स सयं वा उदिण्णस्स परेण वा उदीरियस्स तदुभएण वा उदीरिज्जमाणस्स गतिं पप्प ठितिं पप्प भवं पप्प पोग्गलपरिणामं पप्प कतिविधे अनुभावे पन्नत्ते ?,

गो० ! नाणावरिणिज्जस्स णं कम्मस्स जीवेणं बद्धस्स जाव पोग्गलपरिणामं पप्प दसविधे अनुभावे पं०, तं०-सोतावरणे सोयविन्नाणावरणे नेत्तावरणे नेत्तविन्नाणावरणे घाणावरणे घाणविन्नाणावरणे रसावरणे रसविन्नाणावरणे फासावरणे फासविन्नाणावरणे, जं वेदेति पोग्गलं वा पोग्गले वा पोग्गलपरिणामं वा वीससा वा पोग्गलाणं परिणामं तेसिं वा उदएणं जाणियव्वं न जाणति जाणिउकामे न याणति जाणित्तावि न याणति उच्छन्ननाणीयावि भवति नानावरणिज्जस्स कम्मस्स उदएणं एस णं गोयमा ! नाणावरणिज्जे कम्मे एस णं गोयमा ! नाणावरणिज्जस्स कम्मस्स जीवेणं बद्धस्स जाव पोग्गलपरिणामं पप्प दसविधे अनुभावे पं० ।

दरिसणावरणिज्जस्स णं भंते ! कम्मस्स जीवेणं बद्धस्स जाव पोग्गलपरिणामं पप्प कतिविधे अनुभावे पं० ?, गो० ! दरिसाणवरणिज्जस्स कम्मस्स जीवेणं बद्धस्स जाव पोग्गलपरिणामं पप्प नवविधे अणुभावे पं०, तं०-निद्दा निद्दा २ पयला पयला २ थीणद्धी चक्खुदंसणावरणे अचक्खुदंसणावरणे ओहिदंसणावरणे केवलदंसणावरणे, जं वेदेति पोग्गलं वा पोग्गले वा पोग्गलपरिणामं वा वीससा वा पोग्गलाणं परिणामं तेसिं वा उदएणं पासियव्वं वा न पासति पासिउकामेवि न पासति पासित्तावि नं पासति, उच्छन्नदंशसणी यावि भवति दरिसणावरणिज्जस्स कम्मस्स उदएणं, एस णं गो० ! दरिसणावरणिज्जे कम्मे एस णं गोयमा ! दरिसणावरणिज्जस्स कम्मस्स जीवेणं बद्धस्स जाव पोग्गलपरिणामं पप्प नवविधे अनुभावे पन्नत्ते,

सायावेयणिज्जस्स णं भंते ! कम्मस्स जीवेणं बद्धस्स जाव पोग्गलपरिणामं पप्प कतिविधे अनुभावे पं० ?, गो० ! सातावेदणिज्जस्स णं कम्मस्स जीवेणं बद्धस्स जाव अट्ठविधे अनुभावे पं० तं०--मणुण्णा सद्दा १ मणुण्णा रूवा २ मणुण्णा गंधा ३ मणुण्णा रसा ४ मणुण्णा फासा ५ मणोसुहता ६ वयसुहया ७ कायसुहता ८ जं वेदेति पोग्गलं वा पोग्गले वा पोग्गलपरिणामं वा वीससा वा पोग्गलाणं परिणामं तेसिं वा उदएणं सातावेदणिज्जं कम्मं वेदेति, एस णं गो० ! सायावेयणिज्जे कम्मे एस णं गो० ! सातावेयणिज्जस्स जाव अट्ठविधे अनुभावे पं० ! असातावेयणिज्जस्स णं भंते ! कम्मस्स जीवेणं तहेव पुच्छा, उत्तरं च, नवरं अमणुण्णा सद्दा जाव कायदुहया एस णं गो० ! असायावेयणिज्जे कम्मे एस णं गो० ! असातावेदणिज्जस्स जाव अट्ठविधे अनुभावे पं० !

मोहणिज्जस्स णं भंते ! कम्मस्स जीवेणं बद्धस्स जाव कतिविधे अनुभावे पं० ?, गो० ! मोहणिज्जस्स कम्मस्स जीवेणं बद्धस्स जाव पंचविधे अणुभावे पं०, तं०—सम्मत्तवेयणिज्जे मिच्छत्तवेयणिज्जे सम्मामिच्छत्तवेयणिज्जे कसायवेयणिज्जे नोकसायवेयणिज्जे जं वेदेति पोग्गलं वा पोग्गले वा पोग्गलपरिणामं वा वीससा वा पोग्गलाण परिणामं तेसिं वा उदएणं मोहणिज्जं कम्मं वेएइ वा एस णं गोयमा ! मोहणिज्जस्स कम्मस्स जाव पंचविधे अनुभावे पं० !

आउस्स णं भंते ! कम्मस्स जीवेणं तहेव पुच्छा, गो० ! आउयस्स णं कम्मस्स जीवेणं बद्धस्स जाव चउविहे अणुभावे पं०, तं०—नेरइयाउते तिरियाउते मनुयाउए देवाउए, जं वेदेति पोग्गलं वा पोग्गले वा पोग्गलपरिणामं वा वीससा वा पोग्गलाणं परिणामं तेसिं वा उदएणं आउयं कम्मं वेदेति वा एस णं गो० ! आउए कम्मे एस णं गो० ! आउकम्मस्स जाव चउव्विहे अनुभावे पन्नत्ते !

सुहनामस्स णं भंते ! कम्मस्स जीवेणं पुच्छा, गो० ! सुहनामस्स णं कम्मस्स जीवेणं चउद्दसविधे अनुभावे पं० तं०—इट्ठा सद्दा १ इट्ठा रूवा २ इट्ठा गंधा ३ इट्ठा रसा ४ इट्ठा फासा ५ इट्ठा गती ६ इट्ठा ठिती ७ इट्ठे लावण्णे ८ इट्ठा जसोकित्ती ९ इट्ठे उट्ठाणकम्मबलवीरियपुरिसक्कारपरक्कमे १० इट्ठस्सरया ११ कंतस्सरया १२ पियस्सरया १३ मणुण्णस्सरया १४ जं वेदेति पोग्गलं वा पोग्गले वा पोग्गलपरिणामं वा वीससा वा पोग्गलाणं परिणामं तेसिं वा उदएणं सुभनामंकम्मं वेएइ एस णं गो० ! सुहनामकम्मे एस णं गो० ! सुभनामस्स कम्मस्स जाव चउद्दसविधे अणुभावे पं०,

दुहनामस्य णं भंते ! पुच्छा, गो० ! एवं तचेव, नवरं अनिट्ठा सद्दा जाव हीणस्सरया दीणस्सरया अकंतस्सरया जं वेदेति सेसं तं चेव जाव चउद्दसविधे अनुभावे पन्नत्ते !

उच्चागोतस्स णं भंते ! कम्मस्स जीवेणं पुच्छा, गो० ! उच्चागोतस्स कम्मस्स जीवेणं बद्धस्स जाव अट्ठविहे अनुभावे पं० तं०—जातिविसिट्ठया १ कुलविसिट्ठया २ बलविसिट्ठया ३ रूवविं० ४ तवविं० ५ सुयविं० ६ लाभविं० ७ इस्सरियविं० ८ जं वेदेति पोग्गलं वा पोग्गले वा पोग्गलपरिणामं वा वीससा वा पोग्गलाणं परिणामं तेसिं वा उदएणं जाव अट्ठविधे अनुभावे पं०,

नीयागोयस्स णं भंते ! पुच्छा, गो० ! एवं नवरं जातिविहीणया जाव इस्सरियविहीणया जं वदेति पुग्गलं वा पोग्गले वा पोग्गलपरिणामं वा वीससा वा पोग्गलाणं परिणामं तेसिं वा उदएणं जाव अट्ठविधे अनुभावे पन्नत्ते,

अंतरायस्स णं भंते ! कम्मस्स जीवेणं पुच्छा, गो० ! अंतराइयस्स कम्मस्स जीवेणं बद्धस्स जाव पंचविधे अनुभावे पं०, तं०—दानंतराए लाभंतराए भोगंतराए उवभोगंतराए विरियंतराए,

जं वेदेति पोग्गलं जाव वीससा वा० तेसिं वा उदएणं अंतराइयं कम्मं वेदेति, एस णं गो० ! अंतराइए कम्मेसे, एस णं गो० ! जाव पंचविधे अनुभावे पं०

वृ. 'नाणावरणिज्जस्स णं भंते !' इत्यादि, ज्ञानावरणीयस्स णमिति वाक्यालङ्कारे भदन्त ! जीवेन बद्धस्य-,रागद्वेषपरिणामवशतः कर्मरूपतया परिणमितस्य स्पृष्टस्य-आत्मप्रदेशैः सह संश्लेषमुपगतस्य 'बद्धफासपुट्ठस्से'ति पुनरपि गाढतरं बद्धस्यातीव स्पर्शेन स्पृष्टस्य च, किमुक्तं भवति ? – आवेष्टनपरिवेशष्टनरूपतायऽतीव सोपचयं गाढतरं च बद्धस्येति, 'सञ्चितस्य' आबाधाकालातिक्रमेणोत्तरकालवेदनयोग्यतया निषिक्तस्य 'चितस्य' उत्तरोत्तरस्थितिषु प्रदेशहान्या रसवृध्याऽवस्थापितस्य 'उपचितस्य' समानजातीयप्रकृत्यन्तरदलिकसङ्क्रमेणोपचयं नीतस्य 'आपाकप्राप्तस्य' ईषत्पाकाभिमुखीभूतस्य 'विपाकप्राप्तस्य' विशिष्टपाकमुपगतस्य अत एव 'फलप्राप्तस्य' फलं दातुमभिमुखीभूतस्य ततःसामग्रीवशादुदयप्राप्तस्य, एते चापाकप्राप्तत्वादयःकर्माधर्माः यथा आम्रफलस्य, तथाहि–आम्रफलं प्रथमत ईषत्पाकाभिमुखं भवति, ततो विशिष्टं पाकमुपागतं तदनन्तरं तृप्तिप्रमोदादि फलं दातुमुचितं ततः सामग्रीवशादुपभोगप्राप्तं भवति, एवं कर्मापीति, तत् पुनर्जीवेन कथं बद्धमित्यत आह–

'जीवेण कयस्स' जीवेन कर्मबन्धनबद्धेनेति गम्यते 'कृतस्य' निष्पादितस्य जीवो ह्युपयोगस्वभावस्ततोऽसौ रागादिपरिणतो भवति, न शेषो, रागादिपरिणतश्च सन् कर्म करोति, सा च रागादिपरिणतिःकर्मबन्धबद्धस्य भवति, न तद्वियोगे, अन्यथा मुक्तानामप्यवीतरागत्वप्रसक्तेः, ततः कर्मबन्धनबद्धेन सता जीवेन कृतस्येति द्रष्टव्यं, उक्तं च–

॥ १ ॥ "जीवस्तु कर्मबन्धबद्धो वीरस्य भगवतः कर्त्ता ।
सन्तत्याऽनादिं च तदिष्टं कर्मात्मनः कर्त्तुः ॥" इति,

तथा जीवेन निर्वर्तितस्य, इह बन्धसमये जीवः प्रथमोऽविशिष्टान् कर्मवर्गणान्तःपातिनः पुद्गलान् गृह्णन् अनाभोगिकेन वीर्येण तस्मिन्नेव बन्धसमये ज्ञानावरणीयादितया व्यवस्थापत्याहारमिव रसादिसप्तधातुरूपतया यद्य ज्ञानावरणीयादितया व्यवस्थापनं तन्निर्वर्त्तनमित्युच्यते, तथा जीवेन परिणामितस्य-विशेषप्रत्ययैः प्रद्वेषनिह्नवादिभिस्तं तमुत्तरोत्तरं परिणामं प्रापितस्य, स्वयं वा विपाकप्राप्ततया परनिरपेक्षमुदीर्णस्य–उदयप्राप्तस्य परेण वा उदीरितस्य–उदयमुपनीतस्य तदुभयेन–स्वपररूपेणोभयेन उदीर्यमाणस्य–उदयमुपनीयमानस्य गतिं प्राप्य किञ्चिद्धि कर्म कञ्चिद् गतिं प्राप्य तीव्रानुभावं भवति,

यथा नरकगतिं प्राप्यसातवेदनीयं, असातोदयो हि यथा नारकाणां तीव्रो भवति न तथा तिर्यगादीनामिति, तथा स्थितिं प्राप्य सर्वोत्कृष्टामिति शेषः, सर्वोत्कृष्टां हि स्थितिमुपगतमशुभं कर्म तीव्रानुभाग्नं भवति, यथा मिथ्यात्वं भवं प्राप्य, इह किमपि कर्म कञ्चिद्भवमाश्रित्य स्वविपाकदर्शनसमर्थं यथा निद्रा मनुष्यभवं तिर्यग्भवं वा प्राप्य ततो भवं प्राप्येत्युक्तं, एतावता किल स्वत उदयस्य कारणानि दर्शितानि, कर्म हि तां तां गतिं स्थितिं भवं वा प्राप्य स्वयमुदयमागच्छतीति, सम्प्रति परत उदयमाह-पुद्गलं काष्ठलेष्टुखड्गादिलक्षणं प्राप्य, तथाहि परेण क्षिप्तं काष्ठलेष्टुखड्गादिकमासाद्य भवत्यसातवेदनीयक्रोधादीनामुदयः, तथा पुद्गलपरिणामं प्राप्य–इह किञ्चित्कर्म कमपि पुद्गलमाश्रित्य विपाकमायाति, यथाऽभ्यवहृतस्याहारस्याजीर्णत्वपरिणाममाश्रित्य

असातवेदनीयं ज्ञानावरणीयं सुरापानमिति, ततः पुद्गलपरिणामं प्राप्येत्युक्तं,

कतिविधोऽनुभावः प्रज्ञप्त इत्येष प्रश्नः, अत्र निर्वचनं–दशविधोऽनुभावः प्रज्ञप्तः कतदेव दशविधमनुभावं दर्शयति–सोयावरणे' इत्यादि, इह श्रोत्रशब्देन श्रोत्रेन्द्रियविषयः क्षयोपशमः परिगृह्यते 'सोयविन्नाणावरणे' इति श्रोत्रविज्ञानशब्देन श्रोत्रेन्द्रियोपयोगो, यत्तु निर्वृत्त्युपकरणलक्षणं द्रव्येन्द्रियं तदङ्गोपाङ्गनामकर्मनिर्वर्त्त्यं न ज्ञानावरणविषय इति न श्रोत्रशब्देन गृह्यते, एवं नेत्रावरणे इत्याद्यपि भावनीयं, तच्चैकेन्द्रियाणां रसनघ्राणचक्षुःश्रोत्रविषयाणं लब्ध्युपयोगानां प्राय आवरणं, प्रायोग्रहणं च बकुलादिद्रव्यवच्छेदार्थं, बकुलादीनां हि यथायोगं पञ्चानामपीन्द्रियाणां लब्ध्युपयोगाः फलतोऽस्पष्टा उपलक्ष्यन्ते, आगमेऽपि च प्रोच्यन्ते–

॥ १ ॥ "पंचिंदियोवि बउलो नरोव्व पंचिंदिओवओगाओ।
तहवि न भण्णइ पंचिंदिओत्ति दव्विंदियाभावा ॥"

–तथा

॥ २ ॥ "जह सुहुमं भाविंदयनाणं दव्विंदियावरोहेवि।
दव्वसुयाभावंमिवि भावसुयं पत्थिवाईणं ॥" इति

ततः प्राय इत्युक्तं, द्वीन्द्रियाणां घ्राणचक्षुःश्रोत्रेन्द्रियविषयाणां लब्ध्युपयोगानां त्रीन्द्रियाणांचक्षुःश्रोत्रविषयाणां चतुरिन्द्रियाणां श्रोत्रेन्द्रियलब्ध्युपयोगावरणं सर्वेषामपि स्पर्शनेन्द्रियलब्ध्युपोगावरणं कुष्ठादिव्याधिभिरुपहतदेहस्य द्रष्टव्यं. पञ्चेन्द्रियाणामपि जात्यन्धादीनां पञ्चाद्वा अन्धबधिरीभूतानां चक्षुरादीन्द्रियलब्ध्युपयोगावरणं भावनीयं, कथमेवामेन्द्रियाणां लब्ध्युपयोगावरणमिति चेत्, उच्यते, स्वयमुदीर्णस्य परेण वा उदीरितस्य ज्ञानावरणीयकर्मण उदयेन, तथा चाह– 'जं वेएइ' इति, यद्वेदयते परेण क्षिप्तं काष्ठलेष्टुखड्गादिलक्षणं पुद्गलं तेनाभिघातजननसमर्थेन 'पुग्गले वा' इति यावद्बहून् पुद्गलान् काष्ठादिलक्षणान् परेण क्षिप्तान् वेदयते, तैरभिघातजननसमर्थैः, 'पुद्गलपरिणामं वा' इति यं वा पुद्गलपरिणाममभ्यवहृताहारपरिणामरूपं पानीयरसादिकमति- दुःखजनकं वेदयते तेन वा ज्ञानपरिणत्युपहननात् तथा–'वीससा वा पोग्गलाणं परिणाम'मिति विस्रसया यःपुद्गलानां परिणामः शीतोष्णातपादिरूपस्तं वेदयते यदा तदा तेनेन्द्रियोपघातजननद्वारेण ज्ञानपरिणतावुपहतायां ज्ञातव्यमेवैन्द्रियकमपि सद्वस्तु न जानाति, ज्ञानपरिणतेरुपहतत्वात्, अयं सापेक्ष उदय उक्तो, निरपेक्षस्य तु विषये सूत्रमिदम्–

'तेसिं वा उदएणं'ति तेषां वा ज्ञानावरणीयकर्मपुद्गलानां विपाकप्राप्तानामुदयेन ज्ञातव्यं न जानाति 'जाणिउकामेवि न याणइ' इति ज्ञानपरिणामेन परिणंतुमिच्छन्नपि ज्ञानपरिणत्युपघातान्न जानाति, 'जाणित्तावि न याणइ' इति, प्राक् ज्ञात्वाऽपि पश्चान्न जानीते, तेषामेव ज्ञानावरणीयकर्मपुद्गलानामुदयात्, 'उच्छन्ननाणी यावि भवइ' इत्यादि, ज्ञानावरणीयस्य कर्मण उदयेन जीव उच्छन्नज्ञान्यपि भवति, उच्छन्नं च तद् ज्ञानं च उच्छन्नज्ञानं तस्यास्तीति उच्छन्नज्ञानी, सर्वधनादिपाठाभ्युपगमादिन्, यावच्छक्तिप्रच्छादितज्ञान्यपि भवतीत्यर्थः, 'एस णं गोयमा ! नाणावरणिज्जे कम्मे' इत्याद्युपसंहारवाक्यं कण्ठ्यं,

'दंसणावरणिज्जस्स णं भंते !' इत्यादि प्रश्नसूत्रं पूर्ववत्, निर्वचनमाह–गौतम ! नवविधः प्रज्ञप्तः, तदेव नवविधत्वं दर्शयति– 'निद्रा' इत्यादि, निद्राशब्दार्थमग्ने वक्ष्यामो, भावार्थस्त्वयम्–

॥ १ ॥ "सुहपडिबोहा निद्दा दुहपडिबोहा य निद्दनिद्दा य ।
पयला होइ ठियस्स उ पयलपयला य चंकमतो ।।
॥ २ ॥ थीणगिद्धी पुण अइसंकिलिट्ठकम्मणुवेयणे होइ ।
महनिद्दा दिनचिंतियवावारपसाहणी पायं ।।"

चक्षुर्दर्शन[illegible]चक्षुःसामान्यालोकनिद्रावरणं, एवं शेषेष्वपि भावनीयं, 'जं वेयइ' इत्यादि, यं वेदयते पुद्गलं मृदुशयनादिकं 'पुग्गले वा' इति यान् पुद्गलान् बहून् मृदुशयनीयादीन् वेदयते पुद्गलपरिणामं माहिषदध्याद्यभ्यवहताहारपरिणाममित्यर्थः, 'वीससा पोग्गलाण परिणाम'मिति वर्षास्वभ्रमसम्भूतनभोरूपं धाराम्बुनिपातरूपं वा यं वेदयते तेन निद्राद्युदयापेक्षया दर्शनपरिणत्युपघाते एतावता परत उक्तः सम्प्रति स्वत उदयमाह–'तेसिं वा उदएणं'ति तेषां वा दर्शनावरणीयकर्मपुद्गलानामुदयेन परिणतिविघातेन द्रष्टव्यं न पश्यति, तथा कश्चित् दर्शनपरिणामेन परिणन्तुमिच्छन्नपि जात्यन्धत्वादिना दर्शनपरिणत्युपघातान्न पश्यति, प्राग् दृष्ट्वापि पश्चान्न पश्यति, दर्शनावरणीयकर्मपुद्गलानामुदयात्, किं बहुना ?, दर्शनावरणीयस्य कर्मण उदयेन जीव उच्छन्नदर्शन्यपि यावच्छक्तिप्रच्छादितदर्शन्यपि भवति, 'एस णं गोयमा ! दरिसणावरणिज्जे कम्मे' इत्याद्युपसंहारवाक्यं।

'सायावेयणिज्जस्स णं भंते ! कम्मस्स' इत्यादि प्रश्नसूत्रं प्राग्वत्, निर्वचनमाह–गौतम ! अष्टविधोऽनुभावः प्रज्ञप्तः, अष्टविधत्वमेव दर्शयति–'मणुन्ना सद्दा' इत्यादि, मनोज्ञाः शब्दा आगन्तुका वेणुवीणादिसम्बन्धिनः, अन्ये आत्मीया इत्याहुस्तदयुक्तं, आत्मीयशब्दानां वाक्सुखेनेत्यनेनैव गृहीतत्वात्, मनोज्ञा रसा–इक्षुरसप्रभृतयः, मनोज्ञा गन्धाः–कर्पूरादिसम्बन्धिः, मनोज्ञानि रूपाणि–स्वगतस्वस्त्रीगतचित्रादिगतानि मनोज्ञाः स्पर्शा–हंसतूल्यादिगता 'मनोसुहया' इति मनसि सुखं यस्यासौ मनःसुखस्तस्य भावो मनःसुखता, सुखितं मन इत्यर्थः, वाचि सुखं यस्यासौ वाक्सुखस्तस्य भावो वाक्सुखता, सर्वेषां श्रोत्रमनःप्रल्हादकारिणी वागिति तात्पर्यार्थः, काये सुखं यस्यासौ कायसुखस्तद्भावः कायसुखता, सुखितःकाय इत्यर्थः, एते चाष्टौ पदार्थाः सातावेदनीयस्योदयेन प्राणिनामुपतिष्ठन्ते तत उक्तोऽष्टविध; सातवेदनीयस्यानुभावः

परतःसातावेदनीयस्योदयमुपदर्शयति–'जं वेएइ पुग्गल'मित्यादि, यद्वेदयते पुद्गलं स्रक्चन्दनादि यान् वेदयते पुद्गलान् बहून् स्रक्चन्दनादीन् यं वा वेदयते पुद्गलपरिणामं देशकालवयोऽवस्थानुरूपाहारपरिणामं, 'वीससा वा पुग्गलाण परिणामं' विस्रसया वा यं पुद्गलानां परिणामं कालेऽभिलषितं शीतोष्णादिवेदनाप्रतीकाररूपं, तेन मनसः समाधानसम्पादनात् सातवेदनीयं कर्मानुभवति, सातवेदनीयकर्मफलं सातं वेदयते इत्यर्थः, उक्तः परत उदयः, सम्प्रति स्वत उदयमाह–'तेसिं वा उदएणं'ति तेषां वा सातवेदनीयकर्मपुद्गलानामुदयेन मनोज्ञशब्दादिव्यतिरिकेणापि कदाचित् सुखं वेदयते, यथा नैरयिकास्तीर्थकरजन्मादिकाले 'एस णं गोयमा !' इत्याद्युपसंहारवाक्यं,

'असायावेयणिज्जस्स णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, निर्वचनं पूर्ववत्, तथा तथा चाह–'तहेव पुच्छा उत्तरं च' नवरमित्यादिना पूर्वसूत्रादस्य विशेषमुपदर्शयति, 'अमणुण्णा सद्दा' इत्यादि, अमनोज्ञाः शब्दाः–खरोष्ट्राश्वादिसम्बन्धिन आगन्तुका अमनोज्ञा रसाः–स्वस्थाप्रतिभासिनो दुःखजनकाः अमनोज्ञा गन्धा–गोमहिषादिमृतकडेवरादिगन्धा अमनोज्ञानि रूपाणि–स्वगतस्व-

स्त्रीगतादीनि अमनोज्ञाः स्पर्शाः–कर्कशादयः, 'मणोदुहिया' इति दुःखितं मन इति 'वइदुहिया' इति अभव्या वाक् इति भावार्थः, 'कायदुहिया' इति काये दुःखं यस्यासौ कायदुःशस्तद्भावः कायदुःखिता दुःखितकाय इत्यर्थः, 'जं वेएइ' इत्यादि, यं वेदयते पुद्गलं–विषशस्त्रकण्डकादि 'पुग्गले वा' इति यान् वा पुद्गलान् बहून् विषशस्त्रकण्डकादीन् वेदयते पुद्गलपरिणाम-मपथ्याहारलक्षणं, विस्रसया वा यं वेदयते पुद्गलपरिणामं अकालेऽमिलषितं शीतोष्णादिपरिणामं, तेन मनसोऽसमाधानसम्पादनात्, असातवेदनीयं कर्मानुभवति, असातवेदनीयकर्मफलमसातं वेदयते इति भावः, एतेन परत उदय उक्तः, सम्प्रति स्वत उदयमाह– 'तेसिं वा उदएणं'ति तेषां वा असातवेदनीयकर्मपुद्गलानामुदयेनासातं वेदयते, 'एस णं गोयमा !' इत्याद्युपसंहारवाक्यं ।

'मोहणिज्जस्स णं भंते !' इत्यादि प्रश्नसूत्रं प्राग्वत्, निर्वचनं पञ्चविधोऽनुभावः प्रज्ञप्तः, तदेव पञ्चविधत्वं दर्शयति–'सम्यकत्ववेदनीय'मित्यादि, सम्यकत्वरूपेण यद्वेद्यं तत्सम्यकत्ववेदनीयं, एवं शेषपदेष्वपि शब्दार्थो भावनीयः, भावार्थस्त्वयं–यदिह वेद्यमानं प्रशमादिपरिणामं करोति तत्सम्यकत्ववेदनीयं, यत्पुनरदेवादिबुद्धिहेतुस्तन्मिथ्यात्ववेदनीयं, मिश्रपरिणामहेतुः सम्यग्मिथ्यात्ववेदनीयं, क्रोधादिपरिणामकारणं कषायवेदनीयं हास्यादिपरिणामकारणं नोकषायवेदनीयं, 'जं वेएण पुग्गल'मित्यादि, यं वेदयते पुद्गगलविषयं प्रतिमादिकं पुद्गलान् वा यान् वेदयते बहून् प्रतिमादीन् यं वा पुद्गलपरिणां देशाद्यनुरूपाहारपरिणामं कर्मपुद्गलविशेषो-पादानसमर्थं भवति, आहारपरिणाम विशेषादपि कदाचित्कर्मपुद्गलविशेषोस यथा ब्राह्मयौषध्याद्याहारपरिणामात् ज्ञानावरणीयकर्मपुद्गलानां प्रतिविशिष्टः क्षयोपशमः, उक्तं च–

॥१॥ "उदयखयखओवसमोवसमावि य जं च कंमुणो भणिया ।
दव्वं खेत्तं कालं भावं च भवं च संपप्प ॥"

विस्रसया वा यं पुद्गलानां परिणामं अभ्रविकारादिकं यद्दर्शनादेव विवेक उपजायते,

॥१॥ "आयुः शरज्जलधरप्रतिमं नराणां, सम्पत्तयः कुसुमितद्रुमसारतुल्याः ।
स्वप्नोपभोगसदृशा विषयोपभोगाः, सङ्कल्पमात्ररमणीयमिदं हि सर्वम् ॥" इत्यादि,

अन्यं वा प्रशमादिपरिणामनिबन्धनं वं वेदयते तत्सामर्थ्यात् मोहनीयं सम्यकत्ववेदनी-यादिकं वेदयते, सम्यकत्वेदनीयादिकर्मफलं प्रशमादि वेदयते इति भावः, एतावता परत उदय उक्तः, सम्प्रति स्वतस्तमाह–'तेसिं वा उदएणं'ति तेषां च सम्यकत्ववेदनीयादिकर्मपुद्गलानामुदयेन प्रशमादि वेदयते, 'एस णं' इत्याद्युपसंहारवाक्यं ।

'आउस्स णं भंते ! इत्यादि, प्रश्नसूत्रं प्राग्वत्, निर्वचनं चतुर्विधोऽनुभावः प्रज्ञप्तः, तदेव चतुर्विधत्वं दर्शयति–'नेरइयाउए' इत्यादि सुगमं, 'जं वेएइ पुग्गलं वा' इत्यादि, यं वेदयते पुद्गलं शस्त्रादिकमायरपवर्त्तनसमर्थं बहून् पुद्गलान् शस्त्रादिरूपान् यान् वेदयते यं वा पुद्गलपरिणामं विषान्नादिपरिणामरूपं विस्रसया वा यं पुद्गलपरिणामं शीतादिकमेवायुरपवर्त्तनक्षमं, तेनोपयुज्य-मानमूवायुषोऽवर्त्तनात्, नारकाद्यायुःकर्म वेदयते, एतावता परत उदयोऽभिहितः, स्वत उदयस्य सूत्रमिदं–'तेसं वा उदएणं'ति तेषां वा नारकाद्यायुःपुद्गलानामुदयेन नारकाद्यायुर्वेदयते 'एस ण'मित्याद्युपसंहारवाक्यं ।

नामकर्म द्विधा–शुभनामकर्म अशुभनामकर्म च, तत्र शुभनामकर्माधिकृत्य सूत्रमाह–

'सुभनामकम्मस्स णं भंते !' इत्यादि प्रश्नसूत्रं प्राग्वत्, निर्वचनं चतुर्दशविधोऽनुभावः प्रज्ञप्तः, तदेव च चतुर्दशविधत्वं दर्शयति-'इट्ठा सद्दा' इत्यादि, एते शब्दादय आत्मीया एव परिगृह्यन्ते, नामकर्मविपाकस्य चिन्त्यमानत्वात्, तत्र वादित्राद्युत्पादिता इत्येके, तयुक्तं, तेषामन्यकर्मोदयनिष्पादत्वात्, इष्टा गतिर्मत्तावारणाद्यनुकारिणी शिबिकाद्यारोहणतश्चेत्येके, इष्टा स्थितिः सहजा सिंहासनादौ चान्ये, इष्टं लावण्यं-छायाविशेषलक्षणं कुङ्कुमाद्यनुलेपनजमित्यपरे इष्टा यशःकीर्त्तिः यशसा युक्ता कीर्त्तिः २, यशःकीर्त्योश्चायं विशेषः-'दानपुण्यकृता कीर्त्तिः, पराक्रमकृतं यशः' 'इट्ठे उट्ठाणकम्मबलवीरियपुरिसक्कारपरक्कमे' इति उत्थानं-देहचेष्टाविशेषः कर्म-आरेचनभ्रमणादिबलं-शारीरसामर्थ्यविशेषः वीर्यं-जीवप्रभवःस एव पुरुषकारः-अभिमानविशेषः स एव निष्पादितस्वविषयः पराक्रमः इष्टस्वरता-वल्लभस्वरता, तत्र इष्टाःशब्दा इति सामान्योक्ताविषयं विशेषोक्तिस्तदन्यबहुतमत्वापेक्षाऽवगन्तव्या, 'कांतस्वरते'ति कान्तः-कमनीयः सामान्यतोऽभिलषणीय इत्यर्थः, कान्तः स्वरो यस्य स तथा तद्भावःकान्तस्वरता, 'प्रियस्वरते'ति प्रियो-भूयोऽभिलषणीयःप्रियः स्वरो यस्य स तथा तद्भावः प्रियस्वरता, 'मणुण्णस्सरता' इति उपरतभावोऽपि स्वालम्बनप्रीतिजनको मनोज्ञः स स्वरो यस्य स मनोज्ञस्वरस्तद्भावो मनोज्ञस्वरता,

'जं वेएइ' इत्यादि, यं वेदयते पुद्गलं वीणावर्णकगन्धताम्बूलपट्टशिबिकासिंहासनकुङ्कुमदानराजयोगगुलिकादिलक्षणं, तथा च वीणादिसंम्बन्धाद् भवन्तीष्टाः शब्दादय इति परिभावनीयमेतत्सूक्ष्मधिया मार्गप्रहर्षमनसोऽनुसारिण्या, 'पुग्गले वा' इति यतो बहून् पुद्गलान् वेणुवीणादिकान् वेदयते यं पुद्गलपरिणामं ब्राह्मौषध्याहारपरिणामं विस्रसया वा यं पुद्गलानां परिणामं-शुभजलदादिकं तथा चोन्नतान् कज्जलसमप्रभान् मेघानवलोक्य गायन्ति मत्तयुवतयो रेसुकानिष्टस्वरानित्यादि, तत्प्रभावात्, शुभनामकर्म वेदयते, शुभनामकर्मफलमिष्टस्वरतादिकमनुभवतीति भावः, एतावता परत उक्तः,इदानीं स्वतस्तमाह-'तेसिं वा उदएणं'ति तेषां वा शुभानां कर्मपुद्गलानामुदयेन इष्टशब्दादिकं वेदयते, 'एस णं गो० !' इत्याद्युपसंहारवाक्यं,

'दुहनामस्स णं भंते!' इत्यादि प्रश्नसूत्रं प्राग्वत्, निर्वचनसूत्रं प्रागुक्तार्थवैपरीत्येन भावनीयं,

गोत्रं द्विधा-उच्चैर्गोत्रं नीचैर्गोत्रं च, तत्रोच्चैर्गोत्रविषयं सूत्रमाह-'उच्चागोयस्स णं भंते !' इत्यादित प्रश्नसूत्रं प्राग्वत्, निर्वचनमष्टविधोऽनुभावः प्रज्ञप्तः, तदेवाष्टविधत्वं दर्शयति-'जाइविसिट्ठया' इत्यादि, जात्यादयः सुप्रतीताः, शब्दार्थस्त्वेवम्-जात्या विशिष्टो जातिविशिष्टस्तद्भावो जातिविशिष्टता इत्यादि 'जं वेएइ पुग्गलं वा' इत्यादि यं वेदयते पुद्गलं बाह्यद्रव्यादिलक्षणं, तथाहि-द्रव्यसम्बन्धाद्राजादिविशिष्टपुरुषग्रहाद्वा नीचजातिकुलोत्पन्नोऽपि जात्यादिसम्पन्न इव जनस्य मान्य उपजायते, बलविशिष्टताऽपि मल्लानामिव लकुटिभ्रमणवशात् रूपविशिष्टता प्रतिविशिष्टताङ्गवस्त्रालङ्कारसम्बन्धात् तपोविशिष्टता गिरिकूट्याद्यारोहणेनातापनां कुर्वतः श्रुतविशिष्टता मनोज्ञभूदेसम्बन्धात् स्वाध्यायं कुर्वतः लाभविशिष्टता प्रतिविशिष्टरत्नादियोगात् ऐश्वर्यविशिष्टता धनकनकादिसम्बन्धादिति, 'पुग्गले वा' इति यान् बहून् पुद्गलान् वेदयते पुद्गलपरिणामं-दिव्यफलाद्याहारपरिणामरूपं विस्रसया वा यंपुद्गलानां परिणामंअकस्मादभिहितजलदागमलसंवादादिलक्षणं तत्प्रभावादुच्चैर्गोत्रं वेदयते-उच्चैर्गोत्रकर्मफलं जातिविशिष्टत्वादिकं वेदयते, एतेन परत उदय उक्तः, सम्प्रति स्वतस्तमाह-'तेसिं वा उदएणं'तेषां वा उच्चैर्गोत्रकर्मपुद्गलानां उदयेन जातिविशिष्टत्वादिकं, भवति,

'एस णं गोयम' इत्याद्युपसंहारवाक्यं, 'नीयागोयस्स णं भंते !' इत्यादिस प्रश्नसूत्रं प्राग्वत्, निर्वचनमष्टविधोऽनुभावः, तमेवाष्टविधमनुभावं दर्शयति–'जाइविहीणया' इत्यादि, सुप्रतीतं, 'जं वेएइ पुग्गल'मिति यं वेदयते पुद्गलं नीचकर्मोसेवनरूपं नीचपुरुषसम्बन्धलक्षणं वा, तथाहि–उत्तमजातिसम्पन्नोऽपि उत्तमकुलोत्पन्नोऽपि यदि नीचैःकर्मवशात् यया (अधम) जीविकारूपमासेवते चाण्डालीं वा गच्छति तदा भवति चाण्डालादिरिव जनस्य निन्द्यः, बलहीनता सुखशयनीयादिसम्बन्धतःरूपविहीनता कुत्सितवस्त्रादिसम्बान्धात् तपोविहीनता पार्श्वस्थादिसंसर्गात् श्रुतविहीनता विकथापरसाध्वाभासादिसंसर्गात् लाभविहीनता देशकालानुचितकुक्रयाण-कसम्पर्कतः ऐश्वर्यविहीनता कुग्रहकुकलत्रादिसम्पर्कत इति 'पुग्गले'इति यान् बहून् पुद्गलान् वेदयते यं वा पुद्गलपरिणामं वृन्ताकीफलाद्याहारपरिणामरूपं, वृन्ताकीफलं ह्यभ्यवहृतं कण्डूत्पुत्पा-दनेन रूपविहीनतामापादयतीत्यादि, विश्रसया वा पुद्गलानां परिणामं अभिहितजलदा-गमविसंवादलक्षणं वेदयते, तदभावात्, नीचैःकर्म वेदयते, नीचैःकर्मफलं जात्यादिविहीनतारूपं वेदयते इत्यर्थः, एतावता परत उदय उक्तः, सम्प्रति स्वत उदयमाह–'तेसिं वा उदए णं'ति तेषां वा–नीचैर्गोत्रकर्मपुद्गलानामुदयेन जात्यादिविहीनतामनुभवति, 'एस णं गोयमा !' इत्याद्युपसंहारवाक्यं,

'अंतरायस्स णं भंते !' इत्यादि प्रश्नसूत्रं प्राग्वत्, निर्वचनं पञ्चविधोऽनुभावः प्रज्ञप्तः, तदेव पञ्चविधत्वं दर्शयति–'दानंतराए' इत्यादि, दानस्यान्तरायो–विघ्नः दानान्तरायः, एवं सर्वत्र भावनीयं, तत्र दानान्तरायो दानान्तरायस्य कर्मणः फलं लाभान्तरायादयो लाभान्तरायादि-कर्मणामिति 'जं वेएइ पुग्गलं वा' इत्यादि, यं वेदयते पुद्गलं तथाविधविशिष्टरत्नादिलक्षणं, तथाहि–प्रतिविशिष्टरत्नादिसम्बन्धात् दृश्यते तद्विषये एव दानान्तरायोदयः सन्धिच्छेदनाद्युप-करणसम्बन्धाल्लाभान्तरायकर्मोदय; प्रतिविशिष्टाहारसम्बन्धावनर्घार्थसम्बन्धाद्वा लोभतो भोगान्तरायोदयः एवमुपभोगान्तरायकर्मोदयोऽपि भावनीयः, तथा लकुटादिअभिघाताद्वीर्यान्त-रायकर्मोदय इति,

'पुग्गले वा' बहून् तथाविधान् यान् पुद्गलान् वेदयते यं वा पुद्गलपरिणामं तथाविधा-हारौषध्यादिपरिणामरूपं, तथाहि–दृश्यते तथाविधाहारौषधपरिणामाद्वीर्यान्तरायकर्मोदयः मन्त्राभिषिक्तवासादिगन्धपुद्गलपरिणामात्, भोगान्तरायादयो यथा सुबन्धुसचिवस्य, विस्रसया वा यं पुद्गलानां परिणामं चित्रं शीतादिलक्षं, तथाहि–दृश्यन्ते वस्त्रादिकं दातुकामा अपि शीतादि निपतन्तमालोक्य दानान्तरायादयात् तस्यादातार इति तदभावात्, एष परत उदय उक्तः,-स्वतस्तमाह–'तेसिं वा उदएणं'ति तेषां वा–अन्तरायकर्मपुद्गलानामुदयेन अन्तरायकर्मफलं दानान्तरायादिकं वेदयते–'एस णं'मित्याद्युपसंहारवाक्यम् ।

पदं – २३, उद्देशकः– समाप्तम्

–: पदं – २३, उद्देशकः– २ :–

वृ. व्याख्यातः प्रथमोद्देशकः, इदानीं द्वितीयो व्याख्येयः, तस्य चायमभिसम्बन्धः,

इहानन्तरोद्देशके ज्ञानावरणीयादीनामनुभाव उक्तः, इह तु तेषामेव ज्ञानावपरणीयादीनामुत्तर-प्रकृतिविभाग उच्यते, तत्र विशेषपरिज्ञानार्थं भूयोऽपि मूलप्रकृतिविषयं प्रश्ननिर्वचनसूत्रमाह-

मू. (५४०) कति णं भंते ! कम्मपगडीओ पन्नत्ताओ, गो० ! अट्ठकम्मपगडीओ पं०, तं०-नाणावरणिज्जं जाव अंतराइयं, । नाणावरणिज्जे णं भंते ! कम्मे कतिविधे पं० ?, गो० ! पंचविधे पं०, तं०-आभिनिबोहियनाणावरणिज्जे जाव केवलनाणावरणिज्जे,

दंसणावरणिज्जे णं भंते ! कम्मे कतिविधे पं० ?, गो० ! दु० पं० तं०-निद्दापंचए य दंसणचउक्के य, निद्दापंचए णं भंते ! कतिविधे पं० ?, गो० ! पंचविहे पं०, तं०-निद्दा जाव थिणद्धी, दंसणचउक्कए णं पुच्छा, गो० ! चउव्विधं पं०, तं०-चक्खुदंसणावरणिज्जे जाव केवलदंसणावरणिज्जे, वेयणिज्जे णं भंते ! कम्मे कतिविधे पं० ?, गो० ! दुविहे पं०, तं०-सायवेयणिज्जे य असायावेयणिज्जे य, सातावेयणिज्जे णं भंते ! कम्मे पुच्छा, गो० ! अट्ठविधे पं०, तं०-मणुण्णा सद्दा जाव कायसुहया, असायावेदणिज्जे णं भंते ! कम्मे कतिविधे पं० ?, गो० ! अट्ठविधे पं०, तं०-अमणुण्णा सद्दा जाव कायदुहया,

मोहणिज्जे णं भंते ! कम्मे कतिविधे पं० ?, गो० ! दु० पं०, तं०-दंसणमोहणिज्जे य चरित्तमोहणिज्जे य, 'दंसणमोहणिज्जे णं भंते ! कम्मे कतिविधे पं० ?, गो० ! तिविहे पं०, तं०-सम्मत्तवेदणिज्जे मिच्छत्तवेयाणिज्जं सम्मामिच्छत्तवेयाणिज्जे,

चरित्तमोहणिज्जे णं भंते ! कम्मे कतिविधे पं० ?, दुविधे पं०, तं०-कसायवे० नोकसायवेद०, कसायवेदणिज्जे णं भंते ! कतिविधे पं० ?, गो० ! सोसलसविधे पं०, तं०-अनंताणुबंधी कोहे अनंताणुबंधी माने अ० माया अ० लोभे, अपच्चक्खाणे कोहे एवं माणे माया लोभे, पच्चक्खाणावरणे कोहे एवं माणे माया लोभे, संजलणकोहे एवं माणे माया लोभे, नोकसायवेयणिज्जे णं भंते ! कम्मे कतिविधे पं० ?, गो० ! नविहे पं०, तं०-इत्थीवेयणिज्जे पुरिसवे० नपुंसगवे० हासे रती अरती भए सोगे दुगुंछा,

आउए णं भंते ! कम्मे कतिविधे पं० ?, गो० ! चउव्विधे पं०, तं०-नेरइयाउए जाव देवाउए,

नामे णं भंते ! कम्मे कतिविधे पं० ?, गो० ! बायालीसतिविहे पन्नत्ते, तं०-गतिनामे १ जातिनामे २ सरीरनामे ३ सरीरोवंगनामे ४ सरीरबंधणनामे ५ सरीरसंघयणनामे ६ संघायणनामे ७ संठाणनामे ८ वण्णणनमे ९ गंधनामे १० रसनामे ११ फासनामे १२ अगुरुलघुनामे १३ उवघायनामे १४ पराघायनामे १५ आणुपुव्विनामे १६ उस्सासनामे १७ आयवनामे १८ उज्जोयनामे १९ विहायगतिनामे २० तसनामे २१ थावरनामे २२ सुहुमनामे २३ बादरनामे २४ पज्जत्तनामे २६ अपज्जत्तनामे २६ साहारणसरीरनामे २७ पत्तेयसरीरनामे २८ थिरनामे २९ अथिरनामे ३० सुभनामे ३१ असुभनामे ३२ सुभगनामे ३३ दुभगतनामे ३४ सूसरनामे ३५ दूसरनामे ३६ आदेज्जनामे ३७ अणादेज्जनामे ३८ जसोकित्तिनामे २९ अजसोकित्तिनामे ४० निम्माणना० ४१ तित्थगरना० ४२ ।

गतिनामे णं भंते ! कतिविहे पं० १, गो० ! चउव्विहे पं०, तं०-निरय० तिरिय० मणु० देवगतिनामे, जातिनामे णं भंते ! कम्मे पुच्छा, गो० ! पंच० पं०, तं०-एगिंदियजातिनामे जाव

पंचिंदियजातिना०, सरीरनामे णं भंते ! कम्मे कतिविधे पं० ?, गो० ! पंच० पं०, तं०–ओरालिय-सरीरनामे जाव कम्मसरीरनामे, सरीरोवंगनामे णं भंते ! कतिविधे पं० ?, गो० ! तिविधे पं०, तं० –ओरालियसरीरोवंगनामे वेउव्वियसरीरोवंग० आहारगसरीरोवं०,

सरीरबंधणनामे णं भंते ! कतिविहे पन्नत्ते ?, गो० ! पंचविधे पं० तं०–ओरालियसरीर-बंधननामे जाव कम्मसरीरबंधणनामे, सरीरसंघायनामे णं भंते ! कति० ?, गो० ! पंचविधे पं०, तं०–ओरालियसरीरसंघायनामे जाव कम्मगसरीरसंघायनामे, संघयणनामे णं भंते ! कतिविधे पं० ?, गो० ! छव्विहे पं०, तं०–वइरोसभनारायसंघयणनामे उसहनारायसं० नारायसंघ० अद्धनारायसं० कीलियासंघ० छेवट्टसंघयणनामे, संठाणनामे णं भंते ! कतिविधे पं० ?, गो० ! छव्विहे पं०, तं० समचउरंससंठाणनामे निग्गोहपरिमंडलसंठा० साइसं० वामणसं० खुज्जसं० हुंडसंठाणनामे,

वण्णनामे णं भंते ! कम्मे कतिविधे पं० ? गो० ! पंचविधे पं०, –कालवण्णनामे जाव सुक्किलवण्णनामे, गंधनामे णं भंते ! कम्मे पुच्छा, गो० ! दु० पं०, तं०–सुरभिगंधनामे दुरभिगंधनामे, रसनामे णं पुच्छा, गो० ! पंचविधे पं०, तं०–तित्तरसनामे जाव महुररसनामे, फासनामे णं पुच्छा, गो० ! अट्ठविहे पं०, तं०–कक्खडफासनामे जाव लहुयफासनामे, अगुरुलहुयनामे एगागारे पं०. उवघायनामे एगागारे पं०, पराघातनामे एगागारे पं०, आनुपुव्विनामे चउव्विहे पं०, त०–नेरइयआणुपुव्वीनामे जाव देवाणुपुव्वीनामे, उस्सासनामे एगागारे पं०,

सेसाणि सव्वाणि एगागाराइं पन्नत्ताइं जाव तित्थगरनामे,

नवरं विहायगतिनामे दुविधे पं०, तं०–पसत्थविहायगइनामे अपसत्थविहायगतिनामे य । गोए णं भंते ! कम्मे कइविहे पं० ?, गो० ! दुविहे पं०, तं०–उच्चागोए य नीयागोए य, उच्चागोए णं भंते ! कइविधे पं० ?, गो० ! अट्ठविधे पं०, तं०–जाइविसिट्ठया जाव इस्सरियविसिट्ठया, एवं नीयागोएवि, नवरं जातिविहीणता जाव इस्सरियविहीणया ।

अंतराए णं भंते ! कम्मे कतिविधे पं० ?, गो० ! पंचविधे पं०, तं०–दाणंतराइए जाव वीरियंतराइए ।

मू. 'कइ णं भंते !' इत्यादि पूर्ववत्, सम्प्रति 'यथोद्देशं तथा निर्देश' इति न्यायात् ज्ञानावरणी-योत्तरप्रकृतिविषयं सूत्रमाह–

'नाणावरणिज्जे णं भंते !' इत्यादि, इह आभिनिबोधिकादि इत्यादिशब्दार्थ उपयोगपदे वक्ष्यते, विग्रहभावना त्वियम्–आभिनिबोधिकज्ञानस्यावरणीयं आभिनिबोधिकज्ञानावरणीयं, एवं श्रुतज्ञानावरणीयमित्यादिष्वपि भावनीयं ।

दर्शनावरणीयोत्तरप्रकृतीराह–'दरिसणावरणिज्जे णं भंते !' इत्यादि, 'ड्रा कुत्सायां' नियतं द्रातिकुत्सितत्वमविस्पष्टत्वं गच्छति चैतन्यं यस्यां स्वापावस्थायां सा निद्रा, यदिवा 'ड्रै स्वप्ने' निद्राणं निद्रा, नखच्छोटिकामात्रेण यस्यां प्रबोध उपजायते सा स्वापावस्था निद्रा, तद्विपाकवेद्या कर्मप्रकृतिरपि निद्रा कारणे कार्योपचारात्, 'निद्दानिद्द' त्ति निद्रातोऽतिशायिनी निद्रानिद्रा, शाकपार्थिवादिदर्शनात् 'मयूरव्यंसकादय' इति मध्यमपदलोपी समासः, तस्यां हि चैतन्यस्यात्यन्तमस्फुटीभूतत्वात्, बहुभिर्घोलनाप्रकारैः, प्रबध्यो भवति, ततः सुखप्रबोधहेतुर्निद्रातोऽस्या अति-

शायिनीत्वं, तद्विपाकवेद्या कर्मप्रकृतिरपि निद्रानिद्रा उपचारात्, तथा उपविष्ट ऊर्ध्वस्थितो वा प्रचलयति-धूर्णयति यस्यां स्वापावस्थायां सा प्रचला, तद्विपाकवेद्या कर्मप्रकृतिरपि प्रचला, 'पयलापयला' इति प्रचलातोऽतिशायिनी प्रचलाप्रचला, पूर्ववत् मध्यमपदलोपी समासः, सा हि चङ्क्रमणादिकमपि कुर्वत उदयमधि गच्छति, ततः स्थानस्थितस्यास्य प्रभवप्रचलोपक्षया तस्या अतिशायिनीत्वं, 'थीणद्धी' इति स्त्याना-पिण्डीभूता ऋद्धिः-आत्मशक्तिरूपा यस्यां स्वापावस्थायां सा स्त्यानर्द्धिः, तद्भावे हि प्रथमसंहननस्य केशवार्द्धबलसदृशी शक्तिरूपजायते, तथा च श्रूयते प्रवचने-कस्मिंश्चित् प्रदेशे कोऽपि प्रायः क्षुल्लकः स्त्यानर्द्धिनिद्रासहितो द्विरदेन दिवा खलीकृतः, ततस्तस्मिन् द्विरदे बद्धाभिनिवेशो रजन्यां स्त्यानध्युदये प्रवर्त्तमानः समुत्थाय तद्दन्तमुशलमुत्पाट्य स्वोपाश्रयद्वारि च प्रक्षिप्य पुनः प्रसुप्तवानित्यादि,

तथा चक्षुषा दर्शनं चक्षुर्दर्शनं तस्यावरणीयं चक्षुर्दर्शनावरणीयं अचक्षुषा-चक्षुर्वर्जशेषेन्द्रिय-मनोभिर्दर्शनमचक्षुर्दर्शनं तस्यावरणीयमचक्षुर्दर्शनावरणीयं अवधिरेव दर्शनमवधिदर्शनं तस्यावरणीयमवधिदर्शनावरणीयं केवलमेव दर्शनं केवलदर्शनं तस्यावरणीयं केवलदर्शनावरणीयं, इह निद्रापञ्चकं गाम्भीर्यादर्शनलब्धेरुपघातकृद् दर्शनावरणचतुष्टयं तु मूलत एव दर्शनलब्धिमुपहन्ति, आह च गन्धहस्ती-"निद्रादयः समधिगताया दर्शनलब्धेरुपघाते वर्त्तन्ते, दर्शनावरणचतुष्टयं तदुद्गमोच्छेदित्वात् समूलघातं हन्ति दर्शनलब्धि" मिति,

वेदनीयं द्विधा-सातवेदनीयमसातवेदनीयं च, सातरूपेण यद्वेद्यते तत्सातवेदनीयं, तद्विपरीतमसातवेदनीयं, किमुक्तं भवति? -यस्योदयात् शारीरं मानसं च सुखं वेदयते तत्सातवेदनीयं, यस्योदयात्, पुनः शरीरे मनसि च दुःखमनुभवति तदसातवेदनीयं, एकैकमष्टविधं, मनोज्ञामनोज्ञ-शब्दादिविषयभेदात्, मोहनीयं द्विधादर्शनमोहनीयं चारित्रमोहनीयं च, दर्शनं-सम्यक्त्वं तन्मोहयतीति दर्शनमोहनीयं, चारित्रं-सावद्येतरयोगनिवृत्तिप्रवृत्तिगम्यं शुभात्मपरिणामरूपं तन्मोहयतीति चारित्रमोहनीयं, चशब्दौ स्वगतानेकभेदसूचकौ,

दर्शनमोहनीयं त्रिविधं, तद्यथा-सम्यक्त्ववेदनीयं मिथ्यात्ववेदनीयं मिश्रवेदनीयं, तत्र जिनप्रणीततत्त्वश्रद्धानात्मकेन सम्यक्त्वरूपेणं यद्वेद्यते तत्सम्यक्त्ववेदनीयं, यत्पुनर्जिनप्रणीत-तत्त्वाश्रद्धानात्मकेन मिथ्यात्वरूपेण वेद्यते तन्मिथ्यात्ववेदनीयं, यत्तु मिश्ररूपेण-जिनप्रणीततत्त्वेषु न श्रद्धानं नापि निन्देत्येवंलक्षणेन वेद्यते तन्मिश्रवेदनीयं, आह-सम्यक्त्ववेदनीयं कथं दर्शनमोहनीयं न हि तद्दर्शनं मोहयति, तस्य प्रशमादिपरिणामहेतुत्वात्, उच्यते, इह सम्यक्त्ववेदनीयं मिथ्यात्वप्रकृतिः, ततोऽतिचारसम्भवात्, औपशमिकक्षायिकदर्शनमोहनाद्येदं दर्शनमोहनी-यमित्युच्यते, चारित्रमोहनीयं द्विविधं-कषायवेदनीयं नोकषायवेदनीयं च, तत्र यत्क्रोधादिक-षायरूपेण वेद्यते तत्कषायवेदनीयं, यत्पुनः स्त्रीवेदादिनोकषायरूपेण वेद्यते तन्नोकषायवेदनीयं, चशब्दौ स्वगतानेकभेदसूचकौ, तत्र कषायवेदनीयं षोडशविधं, क्रोधमानमायालोभानां प्रत्येकमनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानावरणसञ्ज्वलनरूपत्वात्, तत्रानन्तं संसारमनुबध्नन्ती-त्येवंशीला अनन्तानुबन्धिनः, उक्तं च-

॥१॥ "अनन्तान्यनुबध्नन्ति, यतो जन्मानि मूतये।
ततोऽनन्तानुबन्धाख्या, क्रोधाद्येषु नियोजिता॥"

एषां संयोजना इति द्वितीयमपि नाम, तत्रायमन्वर्थः–संयुज्यन्ते–सम्बध्यन्तेऽनन्तसङ्ख्यैर्भवैर्जन्तवो यैस्ते संयोजनाः, उक्तं च–

॥ १ ॥ "संयोजयन्ति यन्नरमनन्तसङ्ख्यैर्यभवैः कषायास्ते।
संयोजनताऽनन्तानुबन्धिता वाप्यतस्तेषाम् ॥"

सर्वं प्रत्याख्यानं देशप्रत्याख्यानं च येषामुदये न लभ्यते ते भवन्त्यप्रत्याख्यानाः, सर्वनिषेधवचनोऽयं नञ्, उक्तं च–

॥ १ ॥ "स्वल्पमपि [illegible] एषां, प्रत्याख्याननिरोधतः।
अप्रत्याख्यानसंज्ञाऽतो, द्वितीयेषु निवेशिता ॥"

तथा प्रत्याख्यानं–सर्वविरतिरूपमाव्रियते यैस्ते प्रत्याख्यानावरणाः, आह च–

॥ १ ॥ "सर्वसावद्यविरतिः, प्रत्याख्यानमुदाहृतम्।
तदावरणसंज्ञाऽतस्तृतीयेषु निवेशिता ॥"

तथा परीषहोपसर्गनिपाते सति चारित्रिणमपि सम्–ईषत् ज्वलयन्तीति सञ्चवलनाःस उक्तं च–

॥ १ ॥ "संज्वलयन्ति यतिं यत्संविज्ञं सर्वपापविरतमपि।
तस्मात् सञ्चवलना इत्यप्रशमकरा निरुध्यतन्ते ॥"

–अन्यत्राप्युक्तम्–

॥ १ ॥ "शब्दादीन् विषयान् प्राप्य, सञ्चवलयन्ति यतो मुहुः।
ततः सञ्चवलनाह्वानं, चतुर्थानामिहोच्यते ॥"

–स्वरूपं च पश्चानुपूर्व्याऽमीषामिदं–

॥ १ ॥ "जलरेणुपुढविपव्वयराईसरिसो चउव्विहो कोहो।
तिणिसलयाकट्ठट्ठियसेलत्थंभोवमो माणो ॥
॥ २ ॥ मायावलेहीगोमुत्तिमिंढसिंगघणवंसमूलसमा।
लोहो हलिद्दखंजणकद्दमकिमिरागसारित्थो ॥
॥ ३ ॥ पक्खचउम्मासवच्छरजावज्जीवाणुगामि नो कमसो।
देवनरतिरियनारयगइसाहणहेयवो भणिया ॥"

'इत्थीवेए' इति वेद्यते इति वेदः स्त्रिया वेदःस्त्रीवेदः, स्त्रियाः पुमांसे प्रत्यभिलाष इत्यर्थः, तद्विपाकवेद्यं कर्मापि स्त्रीवेदः, पुरुषस्य वेदः पुरुषवेदः, पुरुषस्य स्त्रियं प्रत्यभिलाष इत्यर्थः, तद्विपाकवेद्यं कर्मापि पुरुषवेदः, नपुंसकस्य वेदो नपुंसकवेदः, नपुंसकस्य स्त्रियंपुरुषं च प्रत्यभिलाष इत्यर्थः, तद्विपाकवेद्यं कर्मापि नपुंसकदेवः,

तथा यदुदयात् सनिमित्तमनिमित्तं वा हसति स्म हासयते वा तत् हास्यमोहनीयं, यदुदयादबाह्याभ्यन्तरेषु वस्तुषु प्रमोदमाधत्ते तत् रतिमोहनीयं, यदुदयवशात् पुनर्बाह्याभ्यन्तरेषु वस्तुषु अप्रीतिं करोति तदरतिमोहनीयं, यदुदयात् प्रियविप्रयोगादौ सोरस्ताडमाक्रन्दति परिदेवते भूपीठे च लुठति दीर्घं च निःश्वसिति तत् शोकमोहनीयं, यदुदयवशात् सनिमित्तमनिमित्तं वा तथारूपवस्त्वसङ्कल्पतो बिभेति तद्भयमोहनीयं, यदुदयवशात् पुनः शुभमशुभं वा वस्तु जुगुप्सते तत्

जुगुप्सामोहनीयं, जुगुप्साजनकं मोहनीयं जुगुप्सामोहनीयं, एवं सर्वपदेष्वपि विग्रहो भावनीयः, नोकषायता चामीषां हास्यादीनां कषायसहचारित्वात्, कैः कषायैःसहचारितेति चेत्, उच्यते, आद्यैर्द्वादशभिः, तथाहि–

नाद्येषु द्वादशकषायेषु क्षीणेषु हास्यादीनामवस्थानसम्भवस्तदनन्तरमेव तेषामपि क्षपणाय प्रवृत्तिः, अथवा एते प्रादुर्भवन्तोऽवश्यं कषायादीनुद्दीपयन्ति ततः कषायसहचारिणः, एवं नोशब्दः साहचर्ये द्रष्टव्यः, कषायैः सहचारिणो नोकषाया इति, उक्तं च–

॥ १ ॥ "कषायसहवर्त्तित्वात्, कषायप्रेरणादपि।
हास्यादिनवकस्योक्ता, नोकषायकषायता ॥"

आयुःकर्मसूत्रं पाठसिद्धं, नामकर्म द्विचत्वारिंशद्विधं, तानेव द्वाचत्वारिंशतं भेदनाह–'गतिनामे' त्यादि, गम्यते–तथाविधकर्मचिवैः प्राप्यते इति गतिः–नारकत्वादिपर्यायपरिणतिः, सा चतुर्धा, तद्यथा– नरकगतिस्तिर्यग्गतिर्मनुष्यगतिर्देवगतिस्तज्जनकं नाम गतिनाम, तदपि चतुर्धा, 'नरकगतिनामे' त्यादि, तथा एकेन्द्रियादीनामेकेन्द्रियत्वादिरूपसमानपरिणामलक्षणमेकेन्द्रियादिशब्दव्यपदेशभाक् यत्सामान्यं सा जातिस्तज्जनकं नाम जातिनाम, इदमत्र तात्पर्यं–

द्रव्यरूपमिन्द्रियमङ्गोपाङ्गनामेन्द्रियपर्याप्तिनामसामर्थ्यसिद्धं, भावरूपं तु स्पर्शनादीन्द्रियावरणक्षयोपशमसामर्थ्यात्, 'क्षायोपशमिकाणीन्द्रियाणी'ति वचनात्, यत्पुनरेकेन्द्रियादिशब्दप्रवृत्तिनिबन्धनं तथारूपसमानपरिणतिलक्षणं सामान्यं तदनन्यासाध्यत्वाज्जातिनिबन्धनमिति,

तच्च जातिनाम पञ्चधा, तद्यथा–एकेन्द्रियजातिनाम यावत्पञ्चेन्द्रियजातिनाम, तथा शीर्यते इति शरीरं, तत्पञ्चधा, तद्यथा–औदारिकं वैक्रियमाहारकं तैजसं कार्मणं, एतानि प्रागेव व्याख्यातानि, तन्निबन्धनं नामापि पञ्चधा, तद्यथा–औदारिकनाम वैक्रियनाम इत्यादि, तत्र यदुदयादौदारिकशरीरप्रायोग्यान् पुद्गलानादाय औदारिकशरीररूपतया परिणमयति परिणमय्य च जीवप्रदेशैः सह परस्परानुगमरूपतया सम्बन्धयति तदौदारिकशरीरनाम, एवं शेषशरीरनामान्यपि भावनीयानि,

'सरीरोपाङ्गनामे'ति शरीरस्याङ्गान्यष्टौ शिरःप्रभृतीनि, उक्तं च–'सीसमुरोयरपिट्ठी दो बाहूऊरूया य अट्ठंगा इति, उपाङ्गानि अङ्गावयवभूतान्यङ्गुल्यादीनि शेषाणि तत्रत्यवयवभूतान्यङ्गुलिपर्वरेखादीनि अङ्गोपाङ्गानि अङ्गानि च उपाङ्गानि च अङ्गोपाङ्गानि च २

अङ्गोपाङ्गानि "स्यादवसङ्ख्येय" इत्येकशेषः, तन्निमित्तं नाम शरीरोपाङ्गनाम, तच्च त्रिधा, तद्यथा–औदारिकाङ्गोपाङ्गनाम वैक्रियाङ्गोपानाम आहारकाङ्गोपाङ्गनाम, तत्र यदुदयवशादौदारिकशरीरत्वेन परिणतानां पुद्गलानामङ्गोपाङ्गविभागपरिणतिरुपजायते तदौदारिकाङ्गोपाङ्गनाम, एवं वैक्रियाहारकाङ्गोपाङ्गनाम्नी अपि वाच्ये, तैजसकार्मणयोस्तु जीवप्रदेशसंस्थानानुरोधित्वान्नास्त्यङ्गोपाङ्गसम्भवः, तथा बध्यतेऽनेनेति बन्धनं, यदौदारिकपुद्गलनानां गृहीतानां गृह्यमाणानां च परस्परं तैजसादिपुद्गलैर्वा सह सम्बन्धजनकं तद्बन्धननाम, आह च मूलटीकाकारः–

"विद्यते तत्कर्म यन्निमित्ता द्व्यादिसंयोगापत्तिराविर्भवति, यथा काष्ठद्वयभेदैक्यस्य करणे जतु कारण" मिति, तच्च पञ्चधा, तद्यथा–औदारिकबन्धननाम वैक्रियबन्धननाम आहारकबन्धननाम तैजसबन्धननाम कार्मणबन्धननाम, तत्र यदुदयवशात् औदारिकपुद्गलानां गृहीतानां गृह्यमाणानां च परस्परं तैजसादिपुद्गलैश्च सह सम्बन्ध उपजायते तदौदारिकबन्धनं,

यदुदयाद्वैक्रियापुद्गलानां गृहीतानां गृह्यमाणानां च परस्परं तैजसकार्मणपुद्गलैश्च सह सम्बन्धः तद्वैक्रियबन्धनं, यदुदयादाहारकशरीरपुद्गलानां गृहीतानां गृह्यमाणानां च परस्परं तैजसकार्मणपुद्गलैश्च सह सम्बनधस्तदाहारकबन्धनं, यदुदयात्तैजसपुद्गलानां गृहीतानां गृह्यमाणानां च परस्परं कार्मणपुद्गलैश्च सह सम्बन्धस्ततैजसमबन्धननाम, यदुदयात् कार्मणपुद्गलानां गृहीतानां गृह्यमाणानां च परस्परं सम्बन्धस्तत्कार्मणबन्धननमा, तथा सङ्घात्यन्ते–पिण्डीक्रियन्ते औदारिकादिपुद्गला येन तत्सङ्घातं तद्य तन्नाम च सङ्घातनाम, तदपि पञ्चधा, तद्यथा–

औदारिकसङ्घातनाम वैक्रियसङ्घातनाम आहारकसङ्घातनाम तैजससङ्घातनाम कार्मणसङ्घातनाम, तत्र यदुदयवशादौदारिकशरीररचनाऽनुकारिसङ्घातरूपा जायते तदौदारिकसङ्घातनाम, एवं वैक्रियादिशरीरसङ्घातनामस्वपि भावनीयं,

'संघयण नामे' इति संहनननाम, संहननं–अस्थिरचनाविशेषः, आह च मूलटीकाकारः– "संहननमस्थिरचनाविशेषः" इति, तेन यः प्राह सूत्रे शक्तिविशेष एव संहननमिति, तद्य तद्ग्रन्थः– 'सुत्ते सत्तिविसेसो संघयणं मिति स भ्रान्तः, मूलटीकाकारेणापि सूत्रानुयायिना संहननस्यास्थिरचनाविशेषात्मकस्य प्रतिपादितत्वात्, यत्त्वेकेन्द्रियाणां सेवार्त्तसंहननमन्यत्रोक्तं तत् टीकाकारेणसमाहितं, औदारिकशरीरत्वादुपचारत इदमुक्तं द्रष्टव्यं न तु तत्त्ववृत्त्येति, यदि पुनः शक्तिविशेषः, स्यात् ततो देवानां नैरयिकाणं च संहननमुच्यते अथ च ते सूत्रे साक्षादसंहननिन उक्ता इत्यलं उत्सूत्रप्ररूपकविस्पन्दितेषु स चास्थिरचनाविशेष औदारिकशरीर एव नान्येषु तेषामस्थिरहितत्वात्, तच्च षोढा, तद्यथा–

वज्रर्षभनाराचं ऋषभनाराचं नाराचं अर्द्धनाराचं कीलिका सेवार्त्तं च, तत्र वज्रं–कीलिका ऋषभः–परिवेष्टनपट्टः नाराचं–उभयतो मर्कटबन्धः, उक्तं च–

॥ १ ॥ "रिसहो य होइ पट्टो वज्जं पुण कीलिया मुणेयव्वा।
उभओ मक्कडबंधो नारायं तं वियाणाहि ॥"

ततश्च द्वयोरस्थ्नोरुभयतो मर्कटबन्धनबद्धयोः पट्टाकृतिना तृतीयेनास्था परिवेष्टितयोरुपरि तदस्थित्रयभेदि कीलिकाख्यं वज्रनामकमस्थि यत्र भवति तद्वज्रर्षभनाराचसंहननं, यत्पुनः कीलिकारहितं संहननं तत् ऋषभनाराचं, यत्र त्वस्थ्नां मर्कटबन्ध एव केवलो भवति तत्संहननं नाराचं, यत्र त्वेकपार्श्वेन मर्कटबन्धो द्वितीयपार्श्वे च कीलिका तदर्द्धनाराचसंहनन, यत्रास्थीनि कीलिकामात्रबद्धान्येव भवन्ति तत्संहननं कीलिकाख्यं, यत्र पुनः परस्परर्यन्तमात्रसंस्पर्शलक्षणां सेवामागतानि अस्थीनि नित्यमेव स्नेहाभ्यङ्गादिरूपां परिशीलनामाकाङ्क्षन्ति तत्सेवार्त्तसंहननं,

एतन्निबन्धनं संहननमपि षोढा, तद्यथा–वज्रर्षभनाराचसंहननाम ऋषभनाराचनाम नाराचनाम अर्धनाराचनाम कीलिकानाम सेवार्त्तनाम, तत्र यदुदयात् वज्रर्षभनाराचसंहननं भवति तत् वज्रर्षभनाराचसंहननाम, एवं शेषसंहननामस्वपि भावनीयं, तथा संस्थानं–आकारविशेषस्तेष्वेव गृहीतसङ्घातितबद्धेषु औदारिकादिषु पुद्गलेषु संस्थानविशेषो यस्य कर्मण उदयाद् भवति तत्संस्थानं, एतच्च षोढा, तद्यथा–

समचतुरस्रसंस्थानाम न्यग्रोधपरिमण्डलसंस्थाननाम सादिसंस्थानाम वामनसंस्थाननाम कुब्जसंस्थाननाम हुण्डसंस्थान नाम च, तत्र यदुदयादसुमतां समचतुरस्रसंस्थानमुपजायते तत्सम-

चतुरस्रसंस्थानाम, यदुदयात्तु न्यग्रोधपरिमण्डलं संस्थानं तन्न्यग्रोधपरिमण्डलसंस्थानाम, एवं शेषाण्यपि वाच्यानि, तथा वर्ण्यते–अलङ्क्रियते शरीरमनेनेति वर्णः, स च पञ्चप्रकारः श्वेतपीतरक्तनीलकृष्णभेदात् तन्निबन्धनं नामापि पञ्चधा, तद्यथा–श्वेतवर्णनाम पीतवर्णनाम रक्तवर्णनाम नीलवर्णनाम कृष्णवर्णनाम, तत्र यदुदयाज्जन्तुशरीरेषु श्वेतवर्णाप्रादुर्भावो यथा बिशकण्ठिकानां तत् श्वेतवर्णनाम, एवं शेषवर्णनामान्यपि भावनीयानि,

तथा 'गन्ध अर्हने' गन्ध्यते–आघ्रायते इति गन्धः, स द्विधा–सुरभिगन्धो दुरभिगन्धश्च, तन्निबन्धनं गन्धनामापि द्विधा, तद्यथा–सुरभिगन्धनाम दुरभिगन्धनाम च, तत्र यदुदयाज्जन्तुशरीरेषु सुरभिगन्ध उपजायते यथा शतपत्रमालतीकुसुमादीनां तत्सुरभिगन्धनाम, यदुदयाद् दुरभिगन्धः शरीरेषूपजायते यथा लशुनादीनां तत् दुरभिगन्धनाम,

–तथा 'रस आस्वादनस्नेहनयोः' रस्यते आस्वाद्यते इति रसः, स पञ्चधा तिक्तकटुकषायाम्ललमधुरभेदात्, तन्निबन्धनं रसनामापि पञ्चधा, तद्यथा–तिक्तनाम कटुनाम कषायनाम अम्लनाम अधुरनाम, तत्र यदुदयात् जन्तुशरीरेषु तिक्तो रसो भवति यथा मरिचादीनां तत्तिक्तरसनाम, एवं शेषाण्यपि रसनामानि भावनीयानि,

तथा 'स्पृश संस्पर्शे' स्पृश्यते इति स्पर्शः, 'अकर्तरी'ति घञ्प्रत्ययः, स च कर्कशमृदुलघुगुरुस्निग्धरूक्षशीतोष्णभेदादष्टप्रकारःस, तन्निबन्धनं स्पर्शनामाप्यष्टप्रकारं, तत्र यदुदयाज्जन्तुशरीरेषु कर्कशः स्पर्शो भवति यथा पाषाणविशेषादीनां तत्कर्कशस्पर्शनाम,

एवं शेषाण्यपि स्पर्शनामानि भावनीयानि, तथा यदुदयात् प्राणिनां शरीराणि न गुरूणि नापि लघूनि किन्त्वगुरुलघुरूपाणि भवन्ति तदगुरुलघुनाम, तथा यदुदयात् स्वशरीरावयवैरेव शरीरान्तः परिवर्द्धमानैः प्रतिजिह्वागलवृन्दलम्बकदोरदन्तादिभिरुपहन्यते यद्वा स्वयंकृतोद्बन्धनभैरवप्रपातादिभिस्तदुपघातनाम, यदुदयात् पुनरोजस्वी दर्शनमात्रेण वाक्सौष्ठवेन वा महानृपसभामपि गतः सभ्यानामपि त्रासमापादयति प्रतिवादिनश्च प्रतिभाविघातं करोति तत्पराघातनाम,

तथा कूर्परलाङ्गलगोमूत्रिकाकारेण यथाक्रमं द्वित्रिचतुःसमयप्रमाणेन विग्रहेण भवान्तरोत्पत्तिस्थानं गच्छतो जीवस्यानुश्रेणिनियता गमनपरिपाटी आनुपूर्वी, तद्विपाकवेद्यं नामकर्मापि कारणे कार्योपचारात्, आनुपूर्वी नाम, तच्च चतुर्द्धा, तद्यथा–नैरयिकानुपूर्वीनाम तिर्यगानुपूर्वीनाम मनुष्यानुपूर्वीनाम देवानुपूर्वीना,

–तथा यदुदयवशादात्मन उच्छ्वासनिः–श्वासलब्धिरूपजायते तदुच्छ्वासनाम, आह–यद्येवमुच्छ्वासपर्याप्तिनाम्नः क्वोपयोगः ?, उच्यते, उच्छ्वासनाम्न उच्छ्वासनिःश्वासयोग्यपुद्गलग्रहणमोक्षविषया लब्धिरुपजायते, सा च लब्धिनोच्छ्वासपर्याप्तिमन्तरेण स्वफलं साधयति, न खलु इषुक्षेपणशक्तिमानपि धनुर्ग्रहणशक्तिमन्तरेण क्षेप्तुमलं, तत् उच्छ्वासपर्याप्तिनिष्पादनार्थमुच्छ्वासपर्याप्तिनाम्न उपयोगः, एवमन्यत्रापि यथायोगं भिन्नविषयता सूक्ष्मधिया भावनीया,

तथा यदुदयात् जन्तुशरीराणि स्वरूपेणानुष्णान्यपि उष्णप्रकाशलक्षणमतपं कुर्वन्ति तदातपनाम, तद्विपाकश्च भानुमण्डलगतेषु पृथिवीकायिकेष्वेववं न वह्नौ, प्रवचनेऽपि निषेधात्, तत्रोष्णत्वमुष्णस्पर्शनामोदयात् उत्कटलोहितवर्णनामोदयाच्च प्रकाशकत्वमिति, तथा यदुदयाज्जन्तुशरीराण्यनुष्णप्रकाशरूपमुद्योतं कुर्वन्ति यथा यतिदेवोत्तरवैक्रियचन्द्रनक्षत्रताराविमान-

रलौषधयस्तदुद्योतनाम,

तथा विहायसा गतिः—गमनं विहायोगतिः, ननु सर्वगतत्वात्, विहायसस्ततोऽन्यत्र गतिर्न सम्भवतीति किमर्थं विशेषणं ?, व्यवच्छेद्याभावादतच्, सत्यमेतत्, किन्तु यदि गतिरेवोच्यते ततो नाम्नः प्रथमप्रकृतिरपि गतिरस्तीति पौनरुक्त्याशङ्का स्यात्, अतस्तद्व्यवच्छेदार्थं विहायसा गतिः, न तु नारकादिपर्यायपरिणतिरूपेति विहायोगतिः, सा द्विविधा—प्रशस्ता अप्रशस्ता च, तत्र प्रशस्ता हंसगजवृषभादीनां अप्रशस्ता खरोष्ट्रमहिषादीनां, तद्विपाकवेद्यं विहायोगतिनामकर्म द्विधा—प्रशस्तविहायोगतिनाम अप्रशस्तविहायोगतिनाम चेति,

तथा त्रसन्ति—उष्णाद्यभितप्ताः सन्तो विवक्षितस्थानादुद्विजन्ते गच्छन्ति च छायाद्यासेवनार्थं स्थानान्तरमिति त्रसा—द्वीन्द्रियादयस्तत्पर्यायपरिणतिवेद्यं नामकर्मापि त्रसनाम, तथा यदुदयादुष्णाद्यभितापेऽपि तत्स्थानपरिहारासमर्थाः पृथिव्यप्तेजोवायुवनस्पतयः स्थावरा जायन्ते तत् स्थावरनाम,

तथा बादरनाम यदुदयाज्जीवा बादरा भवन्ति, बादरत्वं परिणामविशेषः, यद्वशात् पृथिव्यादेरेकैकस्य जन्तुशरीरस्य चक्षुर्ग्राह्यत्वाभावेऽपि बहूनां समुदाये चक्षुषा ग्रहणं भवति, तद्विपरीतं सूक्ष्मनाम, यदुदयाद्बहूनामपि समुदितानां जन्तुशरीराणां चक्षुर्गाह्यता न भवति, उक्तं च श्रावकप्रज्ञप्तिमूलटीकायां—"सूक्ष्मनाम यदुदयात् सूक्ष्मो भवति, अत्यन्तसूक्ष्मोऽतीन्द्रिय इत्यर्थः" इति,

पर्याप्तकनाम यदुदयात् स्वयोग्यपर्याप्तिनिर्वर्त्तनसमर्थो भवति तत्पर्याप्तिनाम—आहारादिपुद्गलग्रहणपरिणमनहेतुरात्मनः शक्तिविशेषः, एतच्च प्रागेवोक्तमिति, तद्विपरीतमपर्याप्तकनाम, तथा यदुदयात् जीवं जीवं प्रति भिन्नं शरीरं तत्प्रत्येकनाम, यदुदयवशात् पुनरनन्तानां जीवानामेकं शरीरं भवति तत्साधारणनाम,

तथा यदुदयवशात् शरीरावयवानां शिरोऽस्थिदन्तानां स्थिरता भवति तत्स्थिरनाम, तद्विपरीतमस्थिरनाम, यदुदयवशाज्जिह्वादीनामवयवानामस्थिरता भवति तदस्थिरनाम, तथा यदुदयान्नाभेरुपरितना अवयवाः शुभा जायन्ते तत् शुभनाम, यदुदयवशात् नाभेरधस्तना पादादयोऽवयवा अशुभा भवन्ति तदशुभनाम, तथाहि—शिरसा स्पृष्टस्तुष्यति पादेन तु रुष्यति, कामिन्या पादेनापि स्पृष्टः तोषमुपयाति ततो व्यभिचार इति चेत्, न तस्य परितोषस्य मोहनीयनिबन्धनत्वात्, वस्तुस्थितिश्चेह चिन्त्यते इत्यदोषः, तथा यदुदयवशादनुपकृदपि सर्वस्य मनःप्रियो भवति तत्सुभगनाम, तद्विपरीतं दुर्भगनाम, यदुदयादुपकारकृदपि जनस्य द्वेष्यो भवति, उक्तं च—

॥१॥ "अणुवकएवि बहूणं जो हु पिओ तस्स सुभगनामुदओ।
उवगारकारगो वि हु न रुच्चए दुब्भगस्सुदए॥

॥२॥ सुभगुदएवि हु कोई किंधी आसज्ज दुब्भगो जइवि।
जायइ तद्दोसाओ जहा अभव्वाण तित्थयरो॥"

तथा यदुदयवशात् जीवस्य स्वरः श्रोतृणां प्रीतिहेतुरुपजायते तत्सुस्वरनाम, तद्विपरीतं दुःस्वरनाम यदुदयात् स्वरः श्रोतृणामप्रीतये भवति, तथा यदुदयवशात् यद्येष्टं भाषते तत्सर्वं लोकः प्रमाणीकरोति दर्शनसमनन्तरमेव च जनोऽभ्युत्थानादि समाचरति तदादेयनाम, तद्विपरीतमनादेयं, यदुदयवशादुपपन्नमपि ब्रुवाणो नोपादेयवचनो भवति नाप्युपक्रियमाणोऽपि जनस्तस्याभ्युत्थानादि समाचरति,

तथा तपःशौर्यत्यागादिना समुपार्जितेन यशसा कीर्त्तनं-संशब्दनं यशःकीर्तितः, यद्वा यशः-सामान्येन ख्यातिः कीर्तिः-गुणोत्कीर्त्तनरूपा प्रशंसा अथवा सर्वदिग्गामिनी पराक्रमकृता वा सर्वजनोत्कीर्त्तनीयगुणता यशः एकदेशगामिनी पुण्यकृता वा कीर्तिः ते यदुदयवशाद्भवतस्तद् यशःकीर्तिनाम, यदुदयवशात् मध्यस्थस्यापि जनस्याप्रशस्यो भवति तदयशःकीर्तिनाम,

तथा यदुदयवशाज्जन्तुशरीरेषु स्वस्वजात्यनुसारेणाङ्गप्रत्यङ्गानां प्रतिनियतस्थानवर्त्तिता भवति तन्निर्माणनाम, तच्च सूत्रधारकल्पं, तदभावे हि तच्च तत्कर्मकल्पैरङ्गोपाङ्गनामादिभिर्निर्वर्त्तितानामपि शिरउरउदरादीनां स्थानवृत्तेरनियमः स्यात्, तथा यदुदयवशात् अष्टमहाप्रातिहार्यप्रमुखाश्चतुस्त्रिंशदतिशयाः प्रादुष्यन्ति तत्तीर्थकरनाम, तदेवमुक्ताः नामकर्मणो द्विचत्वारिंशद्भेदाः, सम्प्रत्येतेषामेव गत्यादीनामवान्तरभेदप्रति- पादनार्थमाह-

'गइनामेणं भंते! कम्मे कइविहे पं०' इत्यादि, समस्तमपि निगदसिद्धम्, उक्ता नामकर्मणो भेदाः, सम्प्रति गोत्रकर्मभेदानाह-

'गोएणं भंते!' इत्यादि, यदुदयवशादुत्तमजातिकुलबलतपोरूपैश्वर्यश्रुतसत्काराभ्युत्थानासनप्रदानाञ्जलिप्रग्रहादिसम्भवस्तदुच्चैर्गोत्रं, यदुदयवशात् पुनर्ज्ञानादिसम्पन्नोऽपि निन्दां लभते हीनजात्यादिसम्भवं च तत् नीचैर्गोत्रं, उक्तौ गोत्रभेदौ, सम्प्रति तयोरेव भेदानाह-'उच्चगोए णं भंते! कम्मे कइविहे पं०' इत्यादि सुगमं, सम्प्रति अन्तरायभेदानाह-

'अंतराए णं भंते! कम्मे कइविहे' इत्यादि, तत्र यदुदयवशात् सति विभवे समागते च गुणवति पात्रे दत्तमस्मै महाफलमिति जानन्नपि दातुं नोत्सहते तद्दानान्तरायं, तथा यदुदयवशाद्दानगुणेन प्रसिद्धद्यपि दातुगृहे विद्यमानमपि देयमर्थजातं याच्ञाकुशलोऽपि गुणवानपि याचको न लभते तल्लाभान्तरायं, तथा युददयवशात् सत्यपि विशिष्टाहारादिसम्भवेऽसति च प्रत्याख्यानपरिणामे वैराग्ये वा केवलकार्पण्याच्नोत्सहते भोक्तुं तद्भोगान्तरायमेवमुपभोगान्तरायमपि भावनीयं, नवरं भोगोपभोगयोरयं विशेषः-सकृद् भुज्यते इति भोगः-आहारमाल्यादि, पुनः पुनर्भुज्यते इत्युपभोगो-वस्त्रालङ्कारादि, उक्तं च-

॥ १ ॥ "सइ भुज्जइत्ति भोगो सो पुण आहारपुप्फमाईओ।
उवभोगो उ पुणो पुण उवभुज्जइ वत्थविलयाइ॥"

तथा यदुदयात् सत्यपि नीरुजि शरीरे यौवनिकायामपि वर्त्तमानोऽल्पप्राणो भवति यद्वा बलवत्यपि शरीरे साध्येऽपि प्रयोजने हीनसत्त्वतया न प्रवर्त्तते तद्वीर्यान्तरायं, उक्तो मूलोत्तरप्रकृतिविभागः, सम्प्रति उत्तरप्रकृतीनां जघन्योत्कृष्टस्थितिप्रतिपादनं चिकीर्षुः प्रथमतो ज्ञानावरणीयस्य पञ्चप्रकारस्यापि विषये प्रश्नसूत्रमाह-

मू. (५४१) नाणावरणिज्जस्स णं भंते! कम्मस्स केवतितं कालं ठिती पं० ?, गो० ! जहन्नेणं अंतोमुहुत्तं उक्कोसेणं तीसं सागरोवमकोडाकोडीतो तिन्नि य वाससहस्साइं अबाहा, अबाहूणिया कम्मठिती कम्मनिसेगो,

निद्दापंचगस्स णं भंते! कम्मस्स केवतितं कालं ठिती पं० ?, गो० ! जह० सागरोवमस्स तिन्नि सत्तभागा पलितोवमस्स असंखेज्जतिभागेणं ऊणिया, उक्कोसेणं तसं सागरोवमकोडाकोडीतो, तिन्नि य वाससहस्साइं अबाहा, अबाहूणिया कम्मट्ठिती कम्मनिसेगो,

दंसणचउक्कस्स णं भंते ! कम्मस्स केवइयं कालं ठिती प० ?, गो० ! जहन्नेणं अंतो० उ० तीसं सागरोवमकोडाकोडीतो, तिन्नि य वाससहस्साइं अबाहा०,

सायावेयणिज्जस्स ईरियावहियं बंधगं पडुच्च अजहन्नमनुक्कोसेणं दो समया संपराइयबंधगं पडुच्च ज० बारस मुहुत्ता, उ० पन्नरस सागरोवमकोडाकोडीतो, पन्नरस वाससयाइं अबाधा०, असातावेदणिज्जस्स जह० सागरोवमस्स तिन्नि सत्तभागा पलितोवमस्स असंखेज्जतिभागेणं ऊणया उ० तीसं सागरोवमकोडाकोडीतो, तिन्नि य वाससहस्साइं अबाहा,

सम्मत्तवेयणिज्जस्स पुच्छा, गो० ! ज० अंतो० उ० छावट्ठिं सागरोवमाइं सातिरेगाति, मिच्छत्तवेयणिज्जस्स जह० सागरोवमं पलितोवमस्स असंखेज्जतिभागेण ऊणगं उ० सत्तरि कोडाकोडीतो, सत्त य वाससहस्साइं अबाहा, अबाहूणिया०, सम्मामिच्छत्तवेयणिज्जस्स ज० अंतो० उ० अंतो०, कसायबारसगस्स ज० सागरोवमस्स चत्तारि सत्तभागा पलितोवमस्स असंखेज्जइभागेणं ऊणया, उक्को० चत्तालीसं सागरोवमकोडीकोडीतो, चत्तालीसं वाससताइं अबाहा जाव निसेगो,

कोहसंजलणे पुच्छा, गो० ! जह० दो मासा उक्को० चत्तालीसं सागरोवमकोडाकोडीतो चत्तालीसं वाससताइं अबाहा जाव निसेगो, माणसंजलणाते पुच्छा, गो० ! ज० मासं उ० जहा कोहस्स, मायासंजलणाते पुच्छा, गो० ! ज० अद्धं मासं उ० जहा कोहस्स, लोहसंजलणाए पुच्छा, गो० ! ज० अंतो० उ० जहा कोहस्स,

इत्थिवेयस्स पुच्छा, गो० ! जहन्नेणं सागरोवमस्स दिवड्ढं सत्तभागं पलितोवमस्स असंखेज्जइभागेण ऊणयं उक्को० पन्नरस सागरोवमकोडाकोडीतो पन्नरस वाससताइं अबाहा०, पुरिसवेदस्स णं पुच्छा, गो० ! जह० अट्ठ संवच्छराति० उक्को० दस सागरोवमकोडाकोडीतो दस वाससताइं अबाहा जाव निसेगो, नपुंसगवेदस्स णं पुच्छा, गो० ! जह० सागरोवमस्स दोन्नि सत्तभागा पलितोवमस्स असंखेज्जइभागेणं ऊणया, उक्कोसेणं वीसं सागरोवमकोडाकोडीतो वीस य वाससताइं अबाहा०, हासरतीणं पुच्छा गो० ! जह० सागरोवमास्स एक्कं सत्तभागं पलितोवमस्स असंखेज्जतिभागेणं ऊणं उक्को० दस सागरोवमकोडाकोडीओ दस वाससातइं अबाहा, अरतिभयोसागदुगुंछाणं पुच्छा, गो० ! जह० सागरोवमस्स दोन्नि सत्तभागा पलितोवमस्स असंखेज्जतिभागेणं उणया, उक्को० वीसं सागरोवमकोडाकोडीतो वीसं वाससताइं अबाहा०,

नेरइयाउयस्स णं पुच्छा, गो० ! जह० दस वाससहस्साइं अंतोमुहुत्तमब्भहियाइं उक्को० तेत्तीसं सागरोवमाइं पुव्वकोडीतिभागमब्भहियाति, तिरिक्खजोणियाउयस्स पुच्छा, गो० ! जह० अंतो० उक्को० तिन्नि पलितोवमाइं पुव्वकोडितिभागमब्भहियाइं, एवं मणूसाउयस्सवि, देवाउयस्स जहा नेरइयाउयस्स ठितित्ति, निरयगतिनामए णं पुच्छा गो० ! जह० सागरोपमसहस्सस्स दो सत्तभागा पलितोवमस्स असंखिज्जतिभागेणं ऊणया, उक्कोसेणं वीसं सागरोवमकोडाकोडीतो वीसं वाससताइं अबाहा।

तिरियगतिनाए जहा नपुंसगदेवस्स, मणुयगतिनामंते पुच्छा, ज० सागरोवमस्स दिवड्ढं सत्तभागं पलितोवमस्स असंखेज्जतिभागेणं ऊणगं उक्को० पन्नरस सागरोवमकोडाकोडीतो पन्नरसवाससताइं अबाहा। देवगतिनाए णं पुच्छा, गो० ! जह० सागरोवमसहस्सस्स एगं सत्तभागं पलितोवमस्स असंखेज्जतिभागेणं ऊणयं उक्को० जहा पुरिसवेदस्स,

एगिंदियजातिनामए णं पुच्छा, गो० ! जह० सागरोवमस्स दोन्नि सत्तभागा पलितोवमस्स असंखेज्जतिभागेणं ऊणया उक्कोसेणं वीसं सागरोवमकोडाकोडीतो वीसति वाससताइं अबाहा, बेइंदियजातिनामेणं पुच्छा, गो० ! जह० सागरोवमस्स नव पणतीसतिभागा पलितोवमस्स असंखेज्जइभागेणं ऊणया उ० अट्ठारस सागरोवमकोडाकोडीतो अट्ठारस य वाससयाइं अबाहा, तेइंदियजातिनामए णं जहन्नेणं एवं चेव, उक्को० अट्ठारसागरोवमकोडाकोडीतो अट्ठारस वाससताइं अबाहा, चउरिंदियजातिनामाए पुच्छा, गो० ! अह० सागरोवमस्स नव पणतीसतिभागा पलितोवमस्स असंखेज्जइभागेणं ऊणया उक्को० अट्ठारस सागरोवमकोडाकोडीतो अट्ठारस वाससताइं अबाहा,

पंचिंदियजातिनामाए पुच्छा, गो० ! जह० सागरोवमस्स दोन्नि सत्तभागा पलितोवमस्स असंखेज्जतिभागेणं ऊणया उक्कोसेणं वीसं सागरोवमकोडाकोडीतो वीस य वाससताइं अबाहा, ओरालियसरीरएवि एवं चेव,

वेउव्वियसरीरनामाए णं भंते ! पुच्छा, गो० ! जह० सागरोवमस्सस्स दो सत्तभागा पलितोवमस्स असंखेज्जइभागेणं ऊणया, उक्को० वीसं सागरोवमकोडाकोडीओ वीसइ वाससयाइं अबाहा, आहारगसरीरनामे जह० अंतोसागरोवमकोडाकीडोओ उक्को० अंतोसागरकोडोकेडीओ,

तेयाकम्मसरीरनामाए जहन्नेणं दोन्नि सत्तभागा पलितोवमस्स असंखेज्जतिभागेणं ऊणया उक्को० वीसं सागरोवमकोडाकोडीओ वीस य वाससताइं अबाहा, ओरालियवेउव्विय-आहारगसरीरोवंगनामाए तिन्निवि एवं चेव, सरीरबंधणामाएवि पंचण्हवि एवं चेव, सरीर-संघायनामाए पंचण्हवि जहा सरीरनामाए कम्मस्स ठिइत्ति,

वइरोसभनारायसंघयणनामाए जहा इनामाए, उसभनारायसंघयणनामाए पुच्छा, गो० सागरोवमस्स छ पणतीसतिभागा पलितोवमस्स असंखेज्जइभागेणं ऊणया, उक्को० बारस सागरोव-मकोडीकोडीओ, बारस वाससताइं अबाहा०, नारायसंघयणनामस्स जह० सागरोवमस्स सत्त पणतीसतिभागा पलितोवमस्स असंखेज्जतिभागेणं ऊणया उक्को० चोद्दस सागरोवमकोडाकोडीतो चउद्दस वाससताइं अबाहा०, अद्धनारायसंघयणनामस्स जह० सागरोवमस्स अट्ठ पणतीसतिभाहा पलितोवमस्स असंखेज्जतिभागेणं ऊणया उक्को० सोलस सागरोवमकोडाकोडीतो सोलस वाससताइं अबाहा०, खीलियासंघयणे णं पुच्छा, गो० ! ज० सागरोवमस्स नव पणतीसतिभागा पलितोवमस्स असंखेज्जतिभागेणं ऊणया, उक्कोसेणं अट्ठारस सागरोवमकोडाकोडीओ अट्ठारस वाससताइं अबाहा, छेवट्ठसंघयणनामस्स पुच्छा, गो० ! जह० सागरोवमस्स दोन्नि सत्तभागा पलितोवमस्स असं० ऊणया, उक्को० वीसं सागरोवमको० वीस य वाससताइं अबाहा,

एवं जहा संघयणनामाते छब्भणिया एवं संठाणावि छब्भाणितव्वा,

सुक्किलवण्णनामते पुच्छा, गो० ! जह० सागरोवमस्स एगं सत्तभागं पलितो० असं० ऊणगं, उक्को० दस सागरोपमकोडीकोडीतो, दस वाससताइं अबाहा, हालिद्दवण्णनामए णं पुच्छा, गो० ! ज० सागरोवमस्स पंच अट्ठावीससतिभागा पलितोवमस्स अ० भा० ऊ० उ० अद्धतेरससागरोवमकोडाकोडी, अद्धतेरस वाससयाइं अबाहा, लोहितवण्णनामए णं पुच्छा, गो० ! जह० सागरोवमस्स छ अट्ठावीसतिभागा पलितोवमस्स असं० भागेहिं ऊणया, उ० पन्नरस सागरोवमकोडाकोडीओ पन्नरस वाससयातिं अबाहा, नीलवण्णनामाए पुच्छा, गो० ! ज०

सागरोवमस्स सत्त अट्ठावीसतिभागा पलितोवमस्स असंखेज्जतिभागेणं ऊणया, उक्को० अट्ठारस सागरोवमकोडाकोडीतो अट्ठारस वाससताइं अबाहा, कालवण्णनामाए जहा छेवट्ठसंघय०, सुब्भिगंधनामाते पुच्छा, गो० ! जह सुकिल्लवण्णनामस्स, दुब्भिगंधनामाए जहा छेवट्ठसंघयणस्स, रसाणं महुरादीणं जहा वण्णाणं भणितं तहेव परिवाडीते भाणितव्वं, फासा जे अपसत्था तेसिं जहा छेवट्ठस्स, जे पसत्था तेसिं जहा सुकिल्लवण्णनामस्स,

अगुरुलहुनामाते जहा छेवट्ठस्स, एवं उवघातनामाएवि, पराघायनामाएवि एवं चेव, निरयाणुपुव्वीनामाए पुच्छा, गो० ! जह० सागरोवमसहस्सस्स दो सत्तभागा पलितोवमस्स असंखेज्जतिभागेणं ऊणया, उक्को० वीसं सागरोवमकोडाकोडीओ, वीसं वाससताइं अबाहा०,

तिरियाणुपुव्वीए पुच्छा, गो० ! जह० सागरोवमस्स दो सत्तभागा पलितोवमस्स असंखेज्जतिभागेणं ऊणया उक्कोसेणं वीसं सागरोवमकोडाकोडीओ वीसति वाससताइं अबाधा०,

मणुयाणुपुव्वीनामाए णं पुच्छा, गो० ! जह० सागरोवमस्स दिवड्ढं सत्तभगं पलितोवमस्स असंखेज्जतिभागेणं ऊणयं, उक्को० पन्नरस सागरोवमकोडाकोडीओ पन्नरस वाससताइं अबाहा०, देवाणुपुव्वीनामाते पुच्छा, गो० ! जह० सागरोवमसहस्सस्स एगं सत्तभागं पलितोवमस्स असंखेज्जतिभागेणं ऊणयं, उक्को० दस सागरोवमकोडाकोडीओ दस य वाससताइं अबाहा०,

ऊसासनामाते पुच्छा. गो० ! जहा तिरियाणुपुव्वीए, आयवनामाए वि एवं चेव, उज्जोयनामाएवि,

पसत्थविहायोगतिनामाएवि पुच्छा, गो० ! जह० एगं सागरोवमस्स सत्तभागं उ० दस सागरोवमकोडाकोडीओ, दस वाससताइं अबाहा०, अपसत्थविहायोगतिनामस्स पुच्छा, गो० ! ज० सागरोवमस्स दोन्नि सत्तभागा पलितोवमस्स असंखेज्जतिभागेणं ऊणया उ० वीसं सागरोवमकोडाकोडीओ वीस य वाससताइं अबाहा०,

तसनामाए थावरनामाए य एवं चेव, सुहुमनामाए पुच्छा, गो० ! जह० सागरोवमस्स नव पणतीसतिभागा पलितोवमस्स असंखेज्जतिभागेणं ऊणया, उक्को० अट्ठारस सागरोवमकोडाकोडीतो अट्ठारस वा वाससताइं अबाहा०, बादरनामाए जहा अप्पसत्थविहायोगतिनामस्स एवं पज्जत्तनामाएवि, अपज्जत्तनामाए जहा सुहुमनामस्स,

पत्तेयसरीरनामाएवि दो सत्तभागा, साहारणसरीरनामाए जहा सुहुमस्स, थिरनामाए एगं सत्तभागं अथिरनामाए दो सुभनामाए एगो असुभनामाए दो सुभगनामाए एगो दूभगनामाए दो सूसरनामाए एगो दूसरनामाए दो आदिज्जनामाए एगो अणाइज्जनामाए दो जसोकित्तिनामाए जह० अट्ठ मुहुत्ता उक्को० दस सागरोवमकोडाकोडीतो दस वाससताइं अबाहा०, अजसोकित्तिनामाए पुच्छा, गो० ! जहा अप्पसत्थविहायोगतिनामस्स, एवं निम्माणनामाएवि,

तित्थगरनामाए णं पुच्छा, गो० ! जह० अंतोसागरोवमकोडाकोडीओ उक्कोसेणवि अंतो० कोडाकोडीओ, एवं जत्थ एगो सत्तभागोतत्थ उक्कोसेणं दस सागरोवमकोडाकोडीओ दस, वाससताइं अबाहा०, जत्थ दो सत्तभागा तत्थ उक्को० वीसं सागरोवमकोडीकोडीओ वीस य वाससयाइं अबाहा, उच्चागोयस्स णं पुच्छा, गो० ! जहन्नेणं अट्ठ मुहुत्ता उ० दस सागरोवमकोडाकोडीओ, दस य वाससताइं अबाहा०, नीयागोत्तस्स पुच्छा, गो० ! जहा अप्पसत्थविहायोगतिनामस्स,

अंतराए णं पुच्छा, गो० ! जह० अंतो० उक्को० तीसं सागरोवमकोडीकोडीओ तिन्नि य वाससहस्साइं अबाहा, अबाहूणिया कम्मट्ठिती कम्मनिसेगो ।

वृ. 'नाणावरणिज्जस्स णं भंते ! कम्मस्स केवइयं कालं ठिती पं०' इति ज्ञानावरणीयस्य मतिश्रुतावधिमनःपर्यायकेवलावरणभेदतः पञ्चप्रकारस्य कर्णो भदन्त ! कियन्तं कालं यावत् स्थितिः प्रज्ञप्ता ?, एवमुक्ते भगवानाह—गौतम ! जघन्येनान्तर्मुहूर्तं, तच्च सर्वलघु सूक्ष्मसम्परायस्य क्षपकस्य स्वगुणस्थानकचरमसमये वर्त्तमानस्य वेदितव्यं, उत्कर्षतस्त्रिंशत्सागरोपमकोटीकोट्यः, सा च मिथ्यादृष्टेरुत्कृष्टे सङ्क्लेशे वर्त्तमानस्यावसातव्या, तदेवं नियता प्रागुक्तस्य प्रश्नोत्तरसिद्धिः, इदमपृष्टव्याकरणं त्रीणि वर्षसहस्राणि अबाधा अबाधा अबाधोना कर्मस्थितिः कर्मदलिकनिषेक इति, किमर्थमिति चेत्, उच्यते, स्थितिद्वैविध्यप्रदर्शनार्थं, तथाहि—

द्विविधा स्थितिः—कर्मरूपतावस्थानलक्षणा अनुभवयोग्या च, तत्र कर्मरूपताऽवस-अथानलक्षणां स्थितिमधिकृत्येदमुक्तं त्रिंशत्सागरोपमकोटाकोट्य इति, अनुभवयोग्या च वर्षसहस्रत्रयोना यतः, आह च—'त्रीणि वर्षसहस्राणि अबाधा' किमुक्तं भवति ?—ज्ञानावरणीयं कर्म उत्कृष्टस्थितिकं बद्धं सत् बन्धसमयादारभ्या त्रीणि वर्षसहस्राणि यावत् न किञ्चिदपि स्वोदयतो जीवस्य बाधामुत्पादयति, तावत्कालमध्ये दलिकनिषेकस्याभावात्, तत् ऊर्ध्वं हि दलिकनिषेकः, तथा चाह—अबाधोना—अबाधाकालपरिहीना अनुभवयोग्या कर्मस्थितिः, किमुक्तं भवति ?—कर्मनिषेकः, स चैवं—प्रथमस्थितौ प्रभूतो द्वितीयस्थितौ विशेषहीनः तृतीयस्थितौ विशेषहीनः एवं विशेषहीनो विशेषहीनश्च तावद् वक्तव्यो यावत्स्थितिचरमसमयः, एतावता च यदुक्तमग्रायणीयाख्ये द्वितीयपूर्वे कर्मप्रकृतिप्राभृते बन्धविधाने स्थितिबन्धाधिकारे—

"चत्वार्यनुयोगद्वाराणि, तद्यथा स्थितिबन्धस्थानप्ररूपणा अबाधाकण्डकप्ररूपणा उत्कृष्टनिषेकप्ररूपणा अल्पबहुत्वप्ररूपणा चे"ति, तत्रोत्कृष्टऽबाधकण्डकप्ररपणा उत्कृष्टनिषेकप्ररूपणा च दर्शिता भवति, अबाधाकालपरिज्ञानोपायश्चायं—यस्य यावत्यः, सागरोपमकोटीकोट्यस्तस्य तावन्ति वर्षशतान्यबाधा, यस्य पुनः सागरोपमकोटीकोट्या मध्ये स्थितिस्तस्यायुर्वर्जस्यान्तर्मुहूर्त्तमायुषस्तु जघन्यतोऽन्तर्मुहूर्त्तमबाधा उत्कर्षतः पूर्वकोटीत्रिभागः, तत एवमबाधाकालं परिभाव्याबाधाविषयाणि सूत्राणि स्वयं भावनीयानि,

निद्रापञ्चकविषयं सूत्रमाह—'निद्दापंचगस्स णं भंते !' इत्यादि, अत्र जघन्यतः स्थितिः त्रयः सागरोपमस्य सप्तभागाः पल्योपमासङ्ख्येयभागोनाः, काऽत्र भावनेति चेत्, उच्यते, पञ्चानां ज्ञानावरणप्रकृतीना चतसृणां दर्शनावरणप्रकृतीनां चक्षुर्दर्शनावरणादीनां सञ्चवलनलोभस्य पञ्चानामन्तरायप्रकृतीनां च जघन्या स्थितिरन्तर्मुहूर्त्तं,

सातवेदनीयस्य सकषायिकस्य द्वादश मुहूर्त्ता, इतरस्य तु द्वौ समयौ, प्रथमसमये बन्धो द्वितीयसमये वेदनं तृतीयसमये त्वकर्मीभवनमिति, यशःकीर्त्युच्चैर्गोत्रयोरष्टौ मुहूर्त्ताः, पुरुषवेदस्याष्टौ संवत्सराणि, सञ्चवलनक्रोधस्य द्वौ मासौ, सञ्चवलनमानस्यैको मासः, सञ्चवलनमायाया अर्द्धमासः, शेषाणां तु प्रकृतीनां या या स्वकीया उत्कृष्टा स्थितिस्तस्या उत्कृष्टयाः सप्ततिसागरोपमकोटीकोटीप्रमाणाया मिथ्यात्वस्थित्या भागे हृते यल्लभ्यते तत्पल्योपमासङ्ख्येयभागहीनंजघन्यस्थितिपरिमाणं, तत्र निद्रापञ्चकस्योत्कृष्टा स्थितिस्त्रिंशत्सागरोपमकोटीकोट्यः, तासां मिथ्यात्वस्थित्या सप्तति-

सागरोपमकोटीकोटीप्रमाणया भागे ह्रियमाणे 'शून्यं शून्येन पातये'दिति वचनात् लब्धास्त्रिंयः सागरोपमस्य सप्तभागाः, तेपल्योपमासङ्ख्येयभागहीनाः क्रियन्ते, ततो भवतियथोक्तंजघन्यस्थिति-परिमाणमिति, सायावेयणिज्जस्स ईरियावहियबंधगं पडुच्च अजहन्नमणुक्कोसेणं दो समया संपराइयबंधगं पडुच्च जहन्नेणं बारस मुहुत्ता' इति प्रागेव भावितं,

असातावेदनीयस्य जघन्यतस्त्रयः सप्तभागाः पल्योपमासङ्ख्येयभागेना निद्रापञ्चकवद् भावनीयाः, तस्याप्युत्कर्षतः स्थितेस्त्रिंशत्सागरोपमकोटीकोटीप्रमाणत्वात्,

सम्यक्त्ववेदनीयस्य यत् जघन्यतः स्थितिपरिणाममन्तर्मुहूर्त्त उत्कर्षतः षट्षष्टिःसाग-रोपमाणि सातिरेकाणि तद्भेदनमधिकृत्य वेदितव्यं न बन्धमाश्रित्य, सम्यक्त्वसम्यग्मिथ्यात्वयोर्बन्धा-भावात्, मिथ्यात्वपुद्गला एव हि जीवेन सम्यक्त्वानुगुणविशोधिबलतस्त्रिधा क्रियन्ते, तद्यथा—सर्वविशुद्धाः अर्धविशुद्धाः अविशुद्धाश्च, तत्र ये सर्वविशुद्धास्तेत सम्यक्त्ववेदनीयव्यपदेशं लभन्ते येऽर्द्धविशुद्धास्ते सम्यग्मिथ्यात्ववेदनीयव्यपदेशं अविशुद्धा मिथ्यात्ववेदनीयव्यपदेशमतो न तयोर्बन्धसम्भवः, यदा तु तेषां सम्यक्त्वसम्यग्मिथ्यात्वपुद्गलानां स्वरूपतः स्थितिश्चिन्त्यते तदाऽन्तर्मुहूर्त्तोनसप्ततिसागरोपमकोटीकोटीप्रमाणा वेदितव्या, सा च तावती यया भवति तथा कर्म्मप्रकृतिटीकायां सङ्क्रमकरणे भावितेति ततो ऽवधार्यं,

मिथ्यात्ववेदनीयस्य जघन्या स्थितिरेकं सागरोपमं पल्योपमासङ्ख्येयभागोनमुत्कर्षत-स्तस्योत्कृष्टस्थितेः सप्ततिसागरोपमकोटीकोटीप्रमाणत्वात्, सम्यग्मिथ्यात्ववेदनीयस्य जघन्यत उत्कर्षतो वा अन्तर्मुहूर्त्तं वेदनापेक्षया, पुद्गलानां त्ववस्थानमुत्कर्षतःप्रागेवोक्तं, कषायद्वादशकस्या-नन्तानुबन्धिनचतुष्टयाप्पत्याख्यानचतुष्टयप्रत्याख्यानावरणचतुष्टरूपस्य प्रत्येकं जघन्या स्थितिश्चत्वारः सागरोपमसप्तभागा पल्योपमासङ्ख्येयभागोनाः, उत्कर्षतस्तेषां स्थितश्चत्वारिंश-त्सागरोपमकोटीकोटीप्रमाणत्वात्, सञ्ज्वलनानां च जघन्या स्थितिर्मासद्वयादिप्रमाणा क्षपकस्य स्वबन्धचरमसमयेऽवसातव्या,

स्त्रीवेदस्य जघन्या स्थितिर्द्व्यर्द्धसागरोपमस्य सप्तभागाः पल्योपममासङ्ख्येयभागोनाः, कथमिति चेत्, उच्यते, त्रैराशिककरणवशात्, तथाहि—यदि दशानां सागरोपमकोटीकोटीनां एकः सागरोपमसप्तभागो लभ्यते ततः पञ्चदशभिः सागरोपमकोटीकोटीभिः किं लभ्यते?, अत्रान्त्येन राशिना पञ्चदशलक्षणेन मध्यो राशिरेकलक्षणो गुण्यते, जाताः पञ्चदशैव, 'एकस्य गुणने तदेव भवती'ति वचनात्, तेषामाद्येन राशिना दशकलक्षणेन भागहरणं लब्धा सार्द्धाः सप्तभागा इति,

'हासरइअरइभयसोगदुगुंछाणं जहन्नुक्कोसठिई भाणियव्वा' इति हास्यरतिअरतिभय-शोकजुगुप्सानां जघन्या उत्कृष्टा च स्थितिर्वक्तव्या, सा च सुप्रसिद्धत्वान्नोक्ता, कथं वक्तव्येति चेत्, उच्यते, 'हासरईणं पुच्छा गो० ! जहन्नेणं एगो सागरोवमस्स सत्तभागो पलिओवमस्स असंखेज्जइभागेण ऊणो उक्को० दस सागरोवमकोडीकोडीओ दस वाससयाइं अबाहा जाव निसेगो, अरइ भयसोगदुगुंछाणं पुच्छा, गो० ! जहन्नेणं सागरोवमस्स दोन्नि सत्तभागा पलिओवमस्स असंखेज्जइभागेण ऊणगा उक्कोसेणं वीसं सागरोवमकोडाकोडीओ वीससयाइं अबाहा जाव निसेगो' इति ज्ञेयं, तिर्यगायुषि मनुष्यायुषि च त्रीणि पल्योपमानि पूर्वकोटित्रिभागाभ्यधिकानि इति यदुक्तं तत् पूर्वकोट्यायुषस्तिर्यग्मनुष्यान् बन्धकानधिकृत्य वेदितव्यं, अन्यत्रैतावत्याःस्थितेः

पूर्वकोटित्रिभागरूपाया अबाधायाश्चालभ्यमानत्वात्,

'तिरियगइनामाए जहा नपुंसगवेयस्स' इति, जघन्यतो द्वौ सागरोपमस्य सप्तभागौ पल्योपमासङ्ख्येयभागहीनौ, उत्कर्षतो विंशतिः सागरोपमकोटीकोट्य इत्यर्थः, मनुष्यगतिनाम्नि 'जहन्नेणं सागरोवमस्स दिवड्ढसत्तभागं पलिओवमस्स असंखेज्जइभागेण ऊणगं'ति अत्र भावना स्त्रीवेदवद् भावनीया, 'दिवड्ढसत्तभाग'मित्यादौ तु नपुंसकनिर्देशः प्राकृतत्वात्, नरकगतिनाम्नो जघन्यतः सागरोपमसहस्रस्य द्वौ सप्तभागौ, किमुक्तं भवति ?–सागरोपमस्य द्वौ सप्तभागौ सहस्रेण गुणितावितिं, तदुत्कृष्टस्थितेर्विंशतिसागरोपमकोटाकोटीप्रमाणत्वात्, तद्बन्धस्य च सर्वजघन्यस्यासंज्ञिपञ्चेन्द्रियस्य भावात्,

असंज्ञिपञ्चेन्द्रियकर्मबन्धस्य च जघन्येनैकेन्द्रियजघन्यकर्मबन्धापेक्षया सहस्रगुणत्वात्, भावयिष्यते चायमर्थो वैक्रियचिन्तायां, देवगतिनाम्नो जघन्यतः सागरोपमसहस्रस्यैकः सप्तभागः,-एकः सागरोपमस्य सप्तभागः सहस्रगुणित इति भावः तस्य हि उत्कृष्टा स्थितिदर्शा सागरोपमकोटीकोट्यः, ततः प्रागुक्तकरणवशादेकः सागरोपमस्य सप्तभागो लब्धः, बन्धोऽपि चास्य जघन्यतोऽसंज्ञिपञ्चेन्द्रियस्येति सहस्रगुणितः, देवगतिनामसूत्रे 'उक्कोसेणं जहा पुरिसवेयस्स' इति 'दस सागरोवमकोडीओ दसवाससयाइं अबाहा, अबाहूणिया कम्मठिई कम्मनिसेगो' इति वक्तव्यमिति भावः,

द्वीन्द्रियजातिनामसूत्रे 'जहन्नेणं नव पणतीसइभागा पलिओवमस्स असंखेज्जइभागेण ऊणगा' इति, द्वीन्द्रियजातिनाम्नो ह्युत्कृष्ट स्थितिरष्टादश सागरोपमकोटीकोट्यः,

'अट्ठारस सुहुमविगलतिगे'त्ति वचनात्, ततोऽष्टादशानां सागरोपमकोटीकोटीनां मिथ्यात्वस्योत्कृष्टया स्थित्या सप्ततिसागरोपमकोटाकोटीप्रमाणया भागो ह्रियते, भागश्च न पूर्यते, ततः शून्यं शून्येन पात्यते, जाता उपरि अष्टादश अधस्तात् सप्ततिस्तयोर्द्वेनापवर्त्तनाल्लब्धा नव पञ्चत्रिंशद्भागास्ते पल्योपमासङ्ख्येयभागोनाः क्रियन्ते, आगतं सूत्रोक्तं परिमाणमिति, एवं त्रिचतुरिन्द्रियजातिनामसूत्रे अपि भावनीये,

वैक्रियशरीरनामसूत्रे 'जहन्नेणं सागरोवमस्स दो सत्तभागा पलिओवमस्स असंखेज्जइभागेणं ऊणगा' इति, इह वैक्रियशरीरनाम्न उत्कृष्टा विंशतिः सागरोपमकोटीकोट्यः स्थितिस्ततः प्रागुक्तकरणवशेन जघन्यस्थितिचिन्तायां तस्यां द्वौ सागरोपमस्य सप्तभागौ लभ्येते, परं वैक्रियषट्कमेकेन्द्रिया विकलेन्द्रियाश्च न बध्नन्ति, किन्त्वसंज्ञिपञ्चेन्द्रियादयः, असंज्ञिपञ्चेन्द्रियाश्च जघन्यतोऽपि बन्धं कुर्वाणा एकेन्द्रियबन्धापेक्षया सहस्रगुणं कुर्वन्ति, 'पणवीसा पन्नासा सयं सहस्सं च गुणकारो' इति वचनात्, ततो यौ द्वौ सागरोपमस्य सप्तभागौ प्रागुक्तकरणवशाल्लब्धौ तौ सहस्रेण गुण्येते ततःसूत्रोक्तं परिमाणं भवति, सागरोपमस्य द्वौ सहस्रौ सप्तभागानां सागरोपमसहस्रस्य द्वौ सप्तभागाविति श्लोकोऽर्थः, आहारशरीरनाम्नोः जघन्यतोऽप्यन्तःसागरोपमकोटीकोटी उत्कर्षतोऽप्यन्तःसागरोपमकोटीकोटी, नवरं जघन्यादुत्कृष्टं सङ्ख्येयगुणं द्रष्टव्यं, अन्ये त्वाहारकचतुष्कस्य जघन्यतोऽप्यन्तर्मुहूर्त्तमिच्छन्ति, (तथा च) तद्ग्रन्थः

॥ १ ॥ "परंवेयअट्ठवासा, अट्ठमुहुत्ता जसुच्चगोयाणं।
साए बारस आहारविग्घावरणाण किंचूणं ॥"

अत्र 'किंचूण'मिति अन्तर्मुहूर्तमित्यर्थः, तदत्र तत्त्वं केवलिनो विदन्ति, यथा शरीरपञ्चकस्य जघन्यत उत्कर्षतश्च स्थितिपरिमाणमुक्तं तेनैव क्रमेण शरीरबन्धपञ्चकस्य शरीरसंघातपञ्चकस्य च वक्तव्यं, तथा चाह–'सरीरबन्धननामाएवि पंचण्हंवि एवं चेव, सरीरसंघायणनामाए पंचण्हंवि' इति 'वइरोसभनारायसंघयणनामाए जहा रइनामाए' इति,

वज्रर्षभनाराचसंहननानाम्नो यथा प्राक् रतिनाम्नो मोहनीयस्योक्तं तथा वक्तव्यं, तद्यथा–'वइरोसभनारायसंघयणनामाए भंते ! कम्मस्स केवइयं कालं ठिती पं० ?, गो० ! जह० एक्कं सत्तभागं पलिओवमस्स असंखेज्जइभागेण ऊणं, उक्को० दस सागरोवमकोडाकोडीओ' इति, ऋषभनाराचसूत्रे 'सागरोवमस्स छप्पन्नतीसभागा पलिओवमस्स असंखिज्जइभागेण ऊणगा' इति, ऋषभनाराचसंहननस्य ह्युत्कृष्टा स्थितिर्द्वादश सागरोपमकोटीकोट्यः, तासां मिथ्यात्वस्थित्या सप्ततिसागरोपमकोटीकोटीप्रमाणया भागो ह्रियते, तत्र भागहारासम्भवात्, शून्यं शून्येन पातयित्वा छेद्यच्छेदकराश्योरद्धर्धेनापवर्त्तनाल्लब्धाः सागरोपमस्य षट् पञ्चत्रिंशद्भागाः, ते पल्योपमासङ्ख्येयभागहीनाः क्रियन्ते, एवं नाराचसंहननाम्नो जघन्यस्थितिचिन्तायां सप्त पञ्चत्रिंशद्भागाः पल्योपमासङ्ख्येयभागहीनाः, उत्कृष्टस्थितेश्चतुर्दशसागरोपमकोटीकोटीप्रमाणत्वात्, अर्द्धनाराचसंहननाम्नः अष्टौ पञ्चत्रिंशद्भागाः पल्योपमासङ्ख्येयभागोनाः, उत्कृष्टस्थितेः षोडशसागरोपमकोटीकोटीप्रमाणत्वात्, कीलिकासंहननाम्नो नव पञ्चत्रिंशद्भागाः पल्यो मासङ्ख्येयभागहीनाः, उत्कृष्टस्थितेरष्टादशसागरोपमकोटीकोटीप्रमाणत्वात्, परिभावनीयाः, सेवार्त्तसंहननसूत्रं तु सुगमं, यथा संहननषट्कस्य स्थितिपरिमाणमुक्तं तेनैव क्रमेण संस्थानषट्कस्यापि वक्तव्यं,

तथा चाह–'एवं जहा संघयणनामा छब्भणिया एवं संठाणा छब्भाणियव्वा' उक्तश्चायमर्थोऽन्यत्रापि 'संघयणे संठाणे पढमे दस उवरिसेसु दुगवुड्ढी' इति

हारिद्रवर्णनामसूत्रे 'जहन्नेणं सागरोवमस्स पंच अट्ठावीसइभागा पलिओवमस्स असंखेज्जइभागेण ऊणगा' इति, हारिद्रवर्णनाम्नो हि सार्द्धद्वादशसागरोपमकोटीकोटयः, तथा चोक्तमन्यत्रापि–

॥ १ ॥ "सुक्किल्लसुरभिमहुराण दस उ तहा सुभगउण्हफासाणं।
अट्ठाइज्जपवुड्ढी अंबिलहालिद्दपुव्वाणं ॥"

तासां मिथ्यात्वस्थित्या सप्ततिसागरोपमकोटीकोटीप्रमाणया भागो ह्रियते, तत्र शून्येन शून्यस्य पातनात्तेन उपरितनो राशिः सांश इति सामस्त्येन चतुर्भागकरणार्थं चतुर्भिर्गुण्यते जाताः पञ्चाशत्, अधस्तनोऽपि सप्ततिलक्षणच्छेदराशिश्चतुर्भिर्गुण्यते जाते द्वे शते अशीत्यधिके, ततो भूयोऽपि शून्यं शून्येन पातनाल्लब्धाः पञ्च अष्टाविंशतिभागाः" ते पलस्योपमासङ्ख्येयभागहीनाः क्रियन्ते, आगतं सूत्रोक्तं परिमाणं, अनेनैव गणितक्रमेणं लोहितवर्णनाम्नो जघन्यस्थितौ षट् अष्टाविंशतिभागाः पल्योपमासङ्ख्येयभाहीनाः, उत्कर्षतस्तस्य स्थितेः पञ्चदशसागरोपमकोटीकोटीप्रमाणत्वात्, नीलवर्णनाम्नः सप्ताष्टाविंशतिभागाः पल्योपमसाङ्ख्येयभागहीनाः, उत्कर्षतस्तस्य स्थितेः सार्द्धसप्तदशसागरोपमकोटीकोटीप्रमाणत्वात्, 'कालवण्णनामाए जहा सेवट्ठसंघयणस्से'ति

सेवार्त्तसंहननस्येव जघन्यतो द्वौ सागरोपमस्य सप्तभागौ पल्योपमासङ्ख्येयभागहीनौ उत्कर्षतो विंशतिसागरोपमकोटीकोटयः कृष्णवर्णनाम्नोऽपि वक्तव्या इति भावः,

सुरभिगन्धनाम्नः शुक्लवर्णनाम्न इव, 'सुक्किल्लसुरभिमहुराण दस उ'इति वचनात्, दुरभिगन्धनाम्नो यथा सेवार्त्तसंहननस्य तथानन्तरमेवोक्तमिति न पुनरुच्यते,

'रसाणं महुरादीणं जहा वण्णाणं भणियं तहा परिवाडीए भाणियव्व' मिति, रसानां मधुरादीनां परिपाट्या–क्रमेण तथा वक्तव्यं यथा वर्णानामुक्तं, तद्यथा–मधुररसनाम्नो जघन्या स्थितिरेकः सागरोपमस्य सप्तभागः पल्योपमासङ्ख्येयभागहीनः, उत्कर्षतो दश सागरोपमकोटीकोटीयो दश वर्षशतान्यबाधा, अबाधारहिता कर्मस्थितिः कर्मदलिकनिषेकः, अम्लरसनाम्नो जघन्यतः पञ्च सागरोपमस्याष्टाविंशतिभागाः पल्योपमासङ्ख्येयभागहीनाः, उत्कर्षतोऽर्द्धत्रयोदशसागरोपमकोटीकोटयो अर्द्धत्रयोदश शतान्यबाधा, कषायरसनाम्नो जघन्यतः षट् अष्टाविंशतिभागाः सागरोपमस्य पल्योपमासङ्ख्येयभागोनाः, उत्कर्षतः पञ्चदश सागरोपमकोटीकोटयः, पञ्चदश वर्षशतान्यबाधा, कटुकरसनाम्नो जघन्यतः सागरोपमस्य सप्ताष्टाविंशतिभागाः पल्योपमासङ्ख्येयभागहीनाः, उत्कर्षतः सार्द्धसप्तदश सागरोपमकोटीकोटयः सार्द्धसप्तदश शतान्यबाधा, तिक्तरसनाम्नो जघन्यतः-सागरोपमस्य द्वौ सप्तभागौ पल्योपमासङ्ख्येयभागहीनौ, उत्कर्षतो विंशतिः सागरोपमकोटीकोटयो विंशतिर्वर्षशतान्यबाधा अबाधाकालहीना च कर्मस्थितिः कर्मदलिकनिषेक इति,

स्पर्शा द्विविधाः, तद्यथा–प्रशस्ता अप्रशस्ताश्च, तत्र प्रशस्ता मृदुलघुस्निग्धोष्णरूपाः अप्रशस्ताः कर्कशगुरुरूक्षशीतरूपाः, प्रशस्तानां जघन्यतः स्थितिरेकः सागरोपमस्य सप्तभागः पल्योपमासङ्ख्येयभागहीनः, उत्कर्षतो दश सागरोपमकोटीकोटयो दश वर्षशतान्यबाधा अबाधाकालहीना कर्मस्थितिः कर्मदलिकनिषेकः, अप्रशस्तानां जघन्यतो द्वौ सागरोपमस्य सप्तभागौ पल्योपमासङ्ख्येयभागहीनौ उत्कर्षतो विंशतिः सागरोपमकोटीकोटयो विंशतिर्वर्षशतान्यबाधा अबाधाकालोना कर्मस्थितिः कर्मदलिकनिषेकः,

तथा चाह–'फासा जे अप्पसत्था तेसिं जहा सेवट्टस्स जे पसत्था तेसिं जहा सुक्किल्लवण्णनामस्स' इति, नरकानुपूर्वीनाम्नो जघन्यतः सागरोपमसहस्रस्य द्वौ सप्तभागौ, द्वौ सागरोपमस्य सप्तभागौ सहस्रगुणिताविति भावः, भावना नरकगतिवद् भावयितव्या, मनुष्यानुपूर्वीनामसूत्रे ''जहन्नेणं सागरोवमस्स दिवड्ढं सत्तभागं पलिओवमस्स असंखिज्जाजइभागेणं ऊणगं'ति, तदुत्कृष्टस्थितेः पञ्चदशसागरोपमकोटीकोटीप्रमाणत्वात्, उक्तं चान्यत्रापि–

॥ १ ॥ ''तीसं कोडाकोडी असायआवरणअंतरायाणं।
मिच्छे सयरी इत्थीमणुदुगसायाण पन्नरस ॥''

देवानुपूर्वीनाम्नोऽपि जघन्यतः एकः सागरोपमस्य सप्तभागः सहस्रगुणितः पल्योपमासंख्येयभागहीनः उत्कर्षतो हि तत्स्थितेः दशसागरोपमकोटीकोटीप्रमाणत्वात्, तथा चोक्तम्–

॥ १ ॥ ''पुंहासरईउच्चे सुभखगतिथिराइछक्क देवदुगे।
दस सेसाणं वीसा एवइयाऽबाह वाससया ॥''

बन्धश्चास्य जघन्यतोऽसंज्ञिपञ्चेन्द्रियेषु इति, तथा सूक्ष्मनामसूत्रे जघ्यतो नव सागरोपमस्य पञ्चत्रिंशद्भागाः पल्योपमासङ्ख्येयभागहीना द्वीन्द्रियजातिनाम्न इव भावनीया, सूक्ष्मनाम्नो

ह्युत्कर्षतः स्थितेरष्टादशसागरोपमकोटीकोटीप्रमाणत्वात्, 'अट्ठारस सुहुमविगलतिगे' इति वचनात्, एवमपर्याप्तसाधारणनाम्नोरपि भावनीयं, बादरपर्याप्तप्रत्येकनाम्नां तु जघन्यतो द्वौ सागरोपमस्य सप्तभागौ पल्योपमसङ्ख्येयभागहीनौ, उत्कर्षतो विंशतिः सागरोपमकोटीकोटयः, तथा चाह०

'बायरनामाए जहा अपसत्थविहायोगइनामाए, एवं पज्जत्तनामाएवि' इत्यादि, स्थिरशुभ-सुभगसुस्वरादेयरूपाणां पञ्चानां नाम्नां जघन्यतः स्थितिरेकः सागरोपमस्य सप्तभागः पल्योप-मासङ्ख्येयभागोनः, यशःकीर्त्तिनाम्नस्तु जघन्यतोऽष्टौ मुहूर्त्ताः, 'अट्ठ मुहुत्ता जसुच्चगोयाण'मिति वचनात्, उत्कृष्टा पुनः षण्णामपि दश सागरोपमकोटीकोटयः 'थिराइछक्कदेवदुगे दसे'ति वचनात्, अस्थिराशुभदुर्भगदुःस्वरानादेययशःकीर्त्तिनाम्नां तु जघन्यतो द्वौ सागरोपमस्य सप्तभागौ पल्योप-मासङ्ख्येयभागहीनौ, उत्कर्षतो विंशतिः सागरोपमकोटीकोटयः एवं निर्माणनाम्नोऽपि वक्तव्यं, तीर्थकरनाम्नो जघन्यतोऽप्यन्तःसागरोपमकोटीकोटी उत्कर्षतोऽप्यन्तः सागरोपमकोटीकोटी, ननु यदि जघन्यतोऽपि तीर्थकरनाम्नोऽन्तः सागरोपमकोटीकोटीप्रमाणा स्थितिः तर्हि तावत्याः स्थितेः तिर्यग्भवभ्रमणमन्तरेण पूरयितुमशक्यत्वात् कियन्तं कालं तीर्थकरनामसत्कर्मापि तिर्यग्भवेत्, अथ चासावागमे निषिद्धः, तथा चोक्तम्-

॥ १ ॥ "तिरिएसु नत्थि तित्थयरनाम संतंति देसियं समए।
कह य तिरिओ न होही अयरोवमकोडीकोडीओ ॥" इति ?,

ततः कथमेतदिति चेत्, उच्यते, इह यन्निकाचितं तीर्थकरनामकर्म तत्तिर्यग्गतौ सत्तायां निषिद्धं, यत्पुनरुद्वर्त्तनापवर्त्तनासाध्यं तद्भवेदपि तिर्यग्गतौ न विरोधमास्कन्दति, तथा चोक्तम्-

॥ १ ॥ "जमिह निकाइय तित्थं तिरियभवे तं निसेहियं संतं।
इयरंमि नत्थि दोसो उव्वट्टणवट्टणासज्झो ॥" इति,

गोत्रान्तरायसूत्राणि सुप्रतीतानि, नवरं 'अंतराइयस्स णं पुच्छा' इति, पञ्चप्रकारस्यापीति वाक्यशेषः, निर्वचनमपि पञ्चप्रकारस्यापि द्रष्टव्यं। तदेवमुक्तं जघन्यत उत्कर्षतश्च सामान्यतः सर्वासां प्रकृतीनां स्थितिपरिमाणं, साम्प्रतमेकेन्द्रियानाधिकृत्य तासां तदभिधित्सुराह-

मू. (५४२) एगिंदिया णं भंते ! जीवा नाणावरणिज्जस्स कम्मस्स किं बंधंति ?, गो० ! जह० सागरोवमस्स तिन्नि सत्तभागा पलितोवमस्स असंखेज्जइभागेणं ऊणया उक्कोसेणं ते चेव पडिपुन्ने बंधंति, एवं निद्दापंचगस्सवि, दंसणचउक्कस्सवि,

एगिंदिया णं भंते ! सातावेदणिज्जस्स कम्मस्स किं बंधंति ?, गो० ! ज० सागरोवमदिवड्ढं सत्तभागं पलिओवमस्स असंखेज्जइभागेणं ऊणयं उ० तं चेव पडिपुन्नं बंधंति, असायवेयणिज्जस्स जहा नाणावरणिज्जस्स,

एगिंदियाण णं भंते ! जीवा सम्मत्तवेयणिज्जस्स कम्मस्स किं बंधंति ?, गो० ! नत्थि किंचि बंधंति, एगिंदिया णं भंते ! जीवा मिच्छत्तवेदणिज्जस्स कम्मस्स किं बंधंति ?, गो० ! ज० सागरोवमं पलितोवमस्स असंखेज्जतिभागेणं ऊणं उ० तं चेव पडिपुण्णं बंधंति, एगिंदिया णं भंते जीवा सम्मामिच्छत्तवेयणिज्जस्स किं बंधंति ?, गो० ! नत्थि किंचि बधंति,

एगिंदिया णं भंते !, जीवा कसायबारसगस्स किं बंधंति ?, गोयमा ! जह० सागरोवमस्स चत्तारि सत्तभागे पलितोवमस्स असंखेज्जतिभागेणं ऊणते उ० ते चेव पडिपुन्ने बंधंति, एवं जाव

कोहसंजलणाएवि जाव लोभसंजलणाएवि,

इत्थिवेदस्स जहा सातावेदणिज्जस्स, एगिंदिया पुरिसवेदस्स कम्मस्स जह० सागरोवमस्स एगं सत्तभागं पलितोवमस्स असंखेज्जतिभागेणं ऊणयं उक्को० तं चेव पडिपुन्नं बंधंति, एगिंदिया नपुंसगवेदस्स कम्मस्स जह० सागरोवमस्स दो सत्तभागे पलितोवमस्स असंखेज्जतिभागेणं ऊणए उक्को० ते चेव पडिपुन्नं बंधंति, हासरतीते जहा पुरिसवेदस्स, अरतिभयसोगदुगुंछाए उक्को० ते चेव पडिपुन्ने बंधंति, हासरतीते जहा पुरिसवेदस्स अरतिभयसोगदुगुंछाए जहा नपुंसगवेयस्स,

नेरइयाऊ देवाऊ य निरयगतिनाम देवगतिनाम वेउव्वियसरीरनाम आहारगसरीरनाम नेरइयानुपुव्विनाम देवानुपुव्विनाम तित्थगरनाम एताणि पदाणि न बंधंति, तिरिक्खजोणियाउयस्स जह० अंतो० उक्कोसेणं पुव्वकोडी सत्तहिं वाससहस्सेहिं वाससहस्सतिभागेण य अहियं बंधंति, एवं मणुस्साउयस्सवि, तिरियगतिनामाए जहा नपुंसगवेदस्स, मणुयगतिनामाए जहा सातावेदणिज्जस्स,

एगिंदियनामाए पंचिंदियजातिनामाए य जहा नपुंसगवेदस्स, बेइंदियतेइंदियजातिनामाए पुच्छा, जह० सागरोवमस्स नव पणतीसतिभागे पलितोवमस्स असंखेज्जतिभागेणं ऊणए उक्को० ते चेव पडिपुण्णे बंधंति, चउरिंदियनामाएवि जह० सागरोवमस्स नव पणतीसतिभागे पलितोवमस्स असंखेज्जतिभागेणं ऊणए उ० ते चेव पडिपुण्णे बंधंति, एवं जत्थत्थि जहन्नगं दो सत्तभागा तिन्नि वा चत्तारि वा सत्तभागा अट्ठावीसतिभागा भवंति, तत्थ णं जहन्नेणं ते चेव पलितोवमस्स असंखेज्जतिभागेणं ऊणगा भाणितव्वा, उ० ते चेव पडिपुन्ने बंधंति, तत्थ णं जहन्नेणं एगो वा दिवड्ढो वा सत्तभागो तत्थ जह० तं चेव भाणितव्वं उ० तं चेव पडिपुन्नं बंधंति,

जसोकित्तिउच्चागोताणं ज० सागरोवमस्स एगं सत्तभागं पलितोवमस्स असं० ऊणं उ० तं चेव पडिपुन्नं बंधंति, अंतराइयस्स णं भंते ! पुच्छा, गो० ! जहा नाणावरणिज्जं उ० ते चेव पडिपुन्ने बंधंति ।

वृ. 'एगिंदिया णं भंते ! जीवा णं नाणावरणिज्जस्स कम्मस्स किं बंधंति ?' इत्यादि, अत्रेयं परिभाषा-यस्य यस्य कर्मणो या या उत्कृष्टा स्थितिः प्रागभिहिता तस्याः २ मिथ्यात्वस्थित्या सप्ततिसागरोकोटीकोटीप्रमाणया भागे हृते यल्लभ्यते तत्पल्योपमासङ्ख्येयभागहीनं जघन्या स्थितिः, सैव पल्योपमासङ्ख्येयभागसहिता उत्कृष्टेति, एतत्परिभाव्य सकलमप्येकेन्द्रियगतं सूत्रं स्वयं परिभावनीयं, तथापि विनेयजनानुग्रहाय किञ्चिल्लिख्यते-

ज्ञानावरणपञ्चकदर्शनावरणनवकासातवेदनीयान्तरायपञ्चकानां जघन्यत एकेन्द्रियाणां स्थितिबन्धस्त्रयः सागरोपमस्य सप्तभागाः पल्योपमासङ्ख्येयभागहीनाः, उत्कृष्टतस्त एव परिपूर्णस्त्रयः सागरोपमस्य सप्तभागाः, सातवेदनीयस्त्रीवेदमनुष्यगतिमनुष्यानुपूर्वीणां जघन्यतः सार्द्ध सागरोपमस्य सप्तभागः पल्योपमासङ्ख्येयभागहीनः, उत्कर्षतस्तु स एव सार्द्धः सप्तभागः परिपूर्णः, मिथ्यात्वस्य जघन्यत एकं सागरोपमं पल्योपमासङ्ख्येयभागहीनमुत्कर्षतः तदेव परिपूर्णं,

सम्यक्त्ववेदनीयस्य सम्यग्मिथ्यात्ववेदनीयस्य च न किञ्चिदपि बध्नन्ति, न किञ्चिदपि वेद्यमानतयाऽऽत्मप्रदेशैः सम्बन्धयन्तीति भावः, एकेन्द्रियाणां सम्यक्त्ववेदनीयस्य सम्यग्मिथ्यात्ववेदनस्य चासम्भवात्, यस्तु साक्षाद्बन्धः स सम्यक्त्वसम्यग्मिथ्यात्वयोर्न घटत एवेति प्रागेवाभिहितं,

कषायषोडशकस्य जघन्यतश्चत्वारः सागरोपमस्य सप्तभागाः पल्योपमासङ्ख्येयभागोना उत्कर्षतस्त एव परिपूर्णाः, पुरुषवेदहास्यरतिप्रशस्तविहायोगतिस्थिरादिषट्कप्रथमसंस्थानप्रथमसंहननशुक्लवर्णसुरभिगन्धमधुररसोच्चैर्गोत्राणां जघन्यत एकः सागरोपमस्य सप्तभागः पल्योपमासङ्ख्येयभागहीनः उत्कर्षतः स एव परिपूर्णः,

द्वितीयसंस्थानसंहननयोः जघन्यतः षट् पञ्चत्रिंशद्भागाः पल्योपमासङ्ख्येयभागहीना उत्कर्षतस्त एव परिपूर्णाः, तृतीयसंस्थानसंहननयोर्जघन्यतः सप्त सागरोपमस्य पञ्चत्रिंशद्भागाः पल्योपमासङ्ख्येयभागहीना उत्कर्षतस्त एव परिपूर्णाः,

लोहितवर्णकषायरसयोर्जघन्यतः षट् सागरोपमस्याष्टाविंशतिभागाः पल्योपमासङ्ख्येयभागहीना उत्कर्षतस्त एव परिपूर्णाः, हारिद्रवर्णाम्लरसयोर्जघन्यतः पञ्च सागरोपमस्याष्टाविंशतिभागाः पल्योपमासङ्ख्येयभागहीनाः उत्कर्षतस्त एव परिपूर्णाः, नीलवर्णकटुरसयोः सप्त सागरोपमस्याष्टाविंशतिभागाः पल्योपमासङ्ख्येयभागोनाः उत्कर्षतस्त एव परिपूर्णाः,

नपुंसकवेदभयजुगुप्साशोकारतितिर्यगौदारिकद्विकचरमसंस्थानचरमसंहननकृष्णवर्णतिक्तरसागुरुलघुपराघातोच्छ्वासोपघातत्रसबादरपर्याप्तप्रत्येकासअस्थिराशुभदुर्भगदुःस्वरानादेययशः कीर्त्तिस्थावरातपोद्योताशुभविहायोगतिनिर्माणैकेन्द्रियजातिपञ्चेन्द्रियजातितैजसकार्मणानां जघन्यतो द्वौ सागरोपमस्य सप्तभागौ पल्योपमासङ्ख्येयभागहीनौ उत्कर्षतस्तावेव परिपूर्णाविति,

नरकद्विकदेवद्विकवैक्रियचतुष्काहारकचतुष्कतीर्थङ्करनाम्नां त्वेकेन्द्रियाणां न बन्धः, आयुश्चिन्तायामपि एकेन्द्रिया देवायुर्नैरयिकायुर्वा न बध्नन्ति, तथा भवस्वाभाव्यात्, किन्तु तिर्यगायुर्मनुष्यायुर्वा, तदपि बध्नन्तो जघन्यतोऽन्तर्मुहूर्तं बध्नन्ति, उत्कर्षतः पूर्वकोटिप्रमाणं साधिकं, केवलमुत्कृष्टं चिन्त्यते इत्येकेन्द्रिया द्वाविंशतिवर्षसहस्रप्रमाणायुषः स्वायुषश्च त्रिभागावशेषे परभवायुर्बध्नन्तः परिगृह्यन्ते इति सप्तवर्षसहस्राणि वर्षसहस्रत्रिभागोत्तराण्यधिकानि लभ्यन्ते, ततो भवति तिर्यगायुर्मनुष्यायुश्चिन्तायां सूत्रोक्तं परिमाणमिति ।

उक्तमेकेन्द्रियबन्धकानधिकृत्य जघन्यत उत्कर्षतश्च स्थितिपरिमाणं, सम्प्रति द्वीन्द्रियानधिकृत्य तमभिधित्सुराह–

मू. (५४३) *बेइंदिया णं भंते ! जीवा नाणावरणिज्जस्स कम्मस्स किं बंधंति ?, गो० ! जह० सागरोवमपणवीसाते तिन्नि सत्तभागा पलितोवमस्स असं० ऊणया उ० ते चेव पडिपुन्ने बंधंति, एवं निद्दापंचगस्सवि, एवं जहा एगिंदियाणं भणितं तहा बेइंदियाणवि भाणितव्वं, नवरं सागरोवमपणवीसाए सह भाणितव्वा पलितोवमस्स असंखेज्जतिभागेणं ऊणा सेसा (उ०) तं चेव पडिपुन्नं बंधंति, जत्थ एगिंदिया न बंधंति तत्थ एतेवि न बंधंति,*

बेइंदिया णं भंते ! जीवा मिच्छत्तवेयणिज्जस्स किं बंधंति ?, गो० !, जह० सागरोवमयणुवीसं पलिओवमस्स असंखेज्जइभागेण ऊणयं उक्कोसेणं तं चेव पडिपुण्णं बंधंति, तिरिक्खजोणियाउयस्स जह० सागरोवमयणुवीसं पलिओवमस्स असंखेज्जइभागेण ऊणयं उक्कोसेणं तं चेव पडिपुण्णं बंधंति, तिरिक्खजोणियाउयस्स जह० अंतो० उक्को० पुव्वकोडिं चउहिं वासेहिं अहियं बंधंति, एवं मणुयाउयस्सवि, सेसं जहा एगिंदियाणं जाव अंतराइयस्स ।

तेइंदिया णं भंते ! जीवा नाणावरणिज्जस्स किं बंधंति ?, गो० ! जह० सागरोवमपन्नसाए तिन्नि सत्तभागा पलितोवमस्स असंखेज्जइभागेणं ऊणया उ० ते चेव पडिपुन्ने बंधंति, एवं जस्स जतिभागा ते तस्स सागरोवमपन्नासाए सह भाणितव्वा,

तेइंदिया णं भंते ! मिच्छत्तवेदणिज्जस्स कम्मस्स किं बंधंति ?, गो० ! ज० सागरोवमपन्नासं पलितोवमस्सासंखेज्जतिभागेणं ऊणयं उ० तं चेव पडिपुण्णं बंधंति, तिरिक्खजोणियाउयस्स जह० अंतो० उक्को० पुव्वकोडिं सोलसेहिं राइंदियतिभागेण य अहियं बंधंति, एवं मणुस्साउयस्सवि, सेसं जहा बेइंदियाणं जाव अंतराइयस्स ।

चउरिंदिया णं भंते ! जीवा नाणावरणिज्जस्स किं बंधंति ?, गो० ! जह० सागरोवमसयस्स तिण्णि सत्तभागे पलितोवमस्स असंखेज्जतिभागेणं ऊणए उक्को० ते चेव पडिपुन्ने बंधंति, एवं जस्स जति भागा तस्स सागरोवमसतेण सह भाणितव्वा, तिरिक्खजोणियाउयस्स कम्मस्स जह० अंतो० उ० पुव्वकोडिं दोहिं मासेहिं अहियं, एवं मणुस्साउयस्सवि, सेसं जहा बेइंदियाणं, नवरं मिच्छत्तवेदणिज्जस्स जह० सागरोवमसतं पलितोवमस्स असंखेज्जतिभागेणं ऊणयं उ० तं चेव पडिपुन्नं बंधति, सेसं जहा बेइंदियाणं जाव अंतराइयस्स ।

असण्णी णं भंते ! जीवा पंचिंदिया नाणावरणिज्जस्स कम्मस्स किं बंधंति ?, गो० ! जह० सागरोवमसहस्सस्स तिन्नि सत्तभागे पलितोवमस्सासंखेज्जतिभागेणं ऊणए उक्को० ते चेव पडिपुण्णे, एवं सो चेव गमो जहा बेइंदियाणं, नवरं सागरोवमसहस्सेणं समं भाणितव्वं जस्स जति भागत्ति, मिच्छत्तवेदणिज्जस्स जह० सागरोवमसहस्सं पलितोवमासंखेज्जतिभागेणं ऊणयं उ० तं चेव पडिपुण्णं, नेरइयाउयस्स जह० दस वाससहस्साइं अंतोमुहुत्तमब्भहियाइं उक्कोसेणं पलितोवमस्स असंखेज्जतिभागं पुव्वकोडितिभागब्भहियं बंधंति, एवं तिरिक्खजोणियाउयस्सवि, नवरं जह० अंतो०, मणुयाउयस्सवि देवाउयस्स जहा नेरइयाउयस्स,

असण्णी णं भंते ! जीवा पंचिंदियनिरयगतिनामाए कम्मस्स किं बंधंति ?, गो० ! जह० सागरोवमसहस्सस्स दो सत्तभागे पलितोवमस्स असंखेज्जतिभागेणं ऊणया उक्को० ते चेव पडिपुण्णे, एवं तिरियगतितेवि, मणुयगतिनामाएति एवं चेव, णवरं जह० सागरो वमसहस्सस्स दिवड्ढं सत्तभागं पलितोवमस्सासंखेज्जइभागेण ऊणं उक्को० तं चेव पडिपुण्णं बंधंति, एवं देवगतिनामाए, नवरं ते सागरोवमसहस्सस्स एगं सत्तभागं पलिओवमस्सासंखे० ऊणं उ० तं चेव पडिपुन्नं वेउव्वियसरीरनामाए पुच्छा, गो० ! ज० सागरोवमसहस्सस्स दो सत्तभागे पलितोवमस्सासंखेज्जतिभागेण ऊणे उक्को० दो पडिपुन्ने बंधंति, सम्मत्तसम्मामिच्छत्तआहारगसरीरनामातेतित्थगरनामाए न किंचि बंधंति, अवसिट्ठं जहा बेइंदियाणं, नवरं जस्स जतिया भागा तस्स सा सागरोवमसहस्सेणं सह भाणियतव्वा, सव्वेसिं आणुपुव्वीए जाव अंतराइयस्स ।

सण्णी णं भंते ! जीवा पंचिंदिया नाणावरणिज्जस्स कम्मस्स किं बंधंति ?, गो० ! ज० अंतोमु० उ० तीसं सा० कोडोकोडीओ तिन्नि वाससहस्साइं अबाहा,

सण्णी णं भंते ! पंचिंदिया निद्दापंचगस्स किं बंधंति ?, गो० ! जह० अंतो० सागरोवमकोडाकोडीओ उ० तीसं सागरोवमकोडाकोडीओ तिन्नि य वाससहस्साइं अबाहा, दंसणचउक्कस्स जहा नाणावरणिज्जस्स, सायावेदणिज्जस्स जहा ओहिया ठिती भणिता तहेव भाणितव्वा, ईरियाव-

हियबंधयं पडुच्च संपराइयबंधयं च, असायावेयणिज्जस्स जहा निद्दापंचगस्स, सम्मत्तवेदणिज्जस्स सम्मामिच्छत्तवेदणिज्जस्स जा ओहिया ठिती भणिता तं बंधंति, मिच्छावेदणिज्जस्स ज० अंतोसागरोवमकोडाकोडीओ उक्को० सत्तरिं सागरोवमकोडाकोडीओ, सत्तरि य वाससहस्साइं अबाहा, कसायबारसगस्स जह० एवं चेव उक्को० चत्तालीसं सागरोवमकोडाकोडीओ, चत्तालीस य वाससयाति अबाहा, कोहमानामायालोभसंजलणाए य दो मासा मासो अद्धमासो अंतोमुहुत्तो, एवं जहन्नगं, उक्कोसगं पुण जहा कसायबारसगस्स, चउण्हवि आउयाणं जा ओहिया ठिती भणिता तं बंधंति, आहारगसरीरस्स तित्थगरनामाए य जहन्नेणं अंतोसुगरोवमकोडाकोडीतो उ० अंतोसोगरोवमकोडाकोडीओ, पुरिसवेदणिज्जस्स ज० अट्ठ संवच्छराइं उ० दस सागरोवमकोडाकोडीओ दस य वाससताइं अबाहा,

जसोकित्तिनामाए उच्चागोत्तस्स एवं चेव, नवरं जह० अट्ठ मुहुत्ता, अंतराइयस्स जहा नाणावरणिज्जस्स, सेसएसु सव्वेसु ठाणेसु संघयणेसु संठाणेसु वण्णेसु गंधेसु य जह० अंतोसागरोवमकोडाकोडीओ उक्को० जा जस्स ओहिया ठिती भणिता तं बंधंति, नवरं इमं नाणत्तं अबाहा अबाहूणिया ण वुच्चति, एवं आणुपुव्वीते सव्वेसिं, जाव अंतरायस्स ताव भाणितव्वं

वृ.'बेइंदिया णं भंते ! जीवा' इत्यादि, अत्रेयं परिभाषा—यस्य २ कर्मणो या या स्थितिरुत्कृष्टा प्रागभिहिता तस्याः तस्याः मिथ्यात्वस्थित्या सप्ततिसागरोपमकोटीकोटीप्रमाणया भागे ह्रते यल्लभ्यते तत्पञ्चविंशत्या गुण्यते गुणितं च सत् यावद्भवति तावत्पल्योपमासङ्ख्येयभागहीनं द्वीन्द्रियाणां बन्धकानां जघन्यस्थितिपरिमाणं तदेव परिपूर्णमुत्कृष्टस्थितिपरिमाणं, तद्यथा—ज्ञानावरणपञ्चकदर्शनावरणनवकासातवेदनीयान्तरायपञ्चकानां त्रयः सागरोपमस्य सप्तभागाः पञ्चविंशत्या गुणिताः, वस्तुवृत्त्या पञ्चविंशतेः सागरोपमाणां त्रयः सप्तभागाः पल्योपमासङ्ख्येयभागहीना जघन्यस्तितिबन्धपरिमाणं, त एव परिपूर्णा उत्कृष्टमित्यादि ।

त्रीन्द्रियबन्धचिन्तायां तदेव भागलब्धं पञ्चाशता गुण्यते चतुरिन्द्रियबन्धचिन्तायां शतेन असंज्ञिपञ्चेन्द्रियचिन्तायां सहस्रेण, आह च कर्मप्रकृतिसङ्ग्रहणिकारः—"पणवीसा पन्नासा सयं सहस्सं च गुणकारो । कमसो विगलअसन्नीण"मिति तत एतदनुसारेण सूत्रं स्वयं निगमनीयं सुगमत्वात् नवरं 'सागरोवमपण्णवीसाए तिन्नि सत्तभागा पलिओवमस्स असंखेज्जइभागेणं ऊणगा' इति, अत्रेयं गणितभावना—पञ्चविंशतेः सागरोपमाणां सप्तभिर्भागे ह्रियमाणे यल्लभ्यते तत्त्रिगुणीकृत्य पल्योपमासङ्ख्येयभागहीनं क्रियते इति, एवं सर्वत्रापि यथायोगं गणितभावना कर्त्तव्या ।

संज्ञिपञ्चेन्द्रियबन्धकसूत्रे ज्ञानावरणीयादिकर्मणां जघन्यतः स्थितिबन्धोऽन्तर्मुहूर्त्तादिपरिमाणः क्षपकस्य स्वस्वबन्धचरमसमये प्रतिपत्तव्यः, निद्रापञ्चकासातवेदनीयमिथ्यात्वकषायद्वादशकादीनां तु क्षपणादर्वाक् बन्ध इति तेषां जघन्यतोऽप्यन्तः सागरोपमकोटीकोटीप्रमाणः उत्कृष्टो मिथ्यादृष्टेः सर्वसङ्क्लिष्टस्य, नवरं तिर्यग्मनुष्यदेवायुषां स्वस्वबन्धकेष्वतिविशुद्धस्येति । इह संज्ञिपञ्चेन्द्रियसूत्रे ज्ञानावरणीयादिकर्म्मणां जघन्यस्थितिबन्धोऽन्तर्मुहूर्त्तादिपरिमाण उक्तः, स कस्मिन् स्वमिनि लभ्यते इति जिज्ञासुः पृच्छति—

मू. (५४४) नाणावरणिज्जस्स णं भंते ! कम्मस्स जहन्नट्ठितीबंधए के० ?, गो० ! अन्नयरे सुहुमसंपरायते उवसामए वा खवगे वा एस णं गो० ! नाणावरणिज्जस्स कम्मस्स जहन्नठितीबंधते,

तव्वइरित्ते अजहन्ने, एवं एएणं अभिलावेणं मोहाउयवज्जाणं सेसकम्माणं भाणितव्वं,

मोहणिज्जस्स णं भंते ! कम्मस्स जहन्नठितीबंधते के० ?, गो० ! अन्नयरे बादरसंपराए उवसाए वा खवए वा एस णं गो० ! मोहणिज्जस्स कम्मस्स जहन्नठितीबंधते, तव्वतिरित्ते अजहन्ने,

आउयस्स णं भंते ! कम्मस्स जहन्नठितीबंधते के० ?, गो० ! जे णं जीवे असंखेप्पद्धापविठे सव्वनिरुद्धे से आउते, तीसे णं आउयबंधद्धाए, तीसे णं आउयबंधद्धाए चरिमकाल-समयंसि सव्वजहन्नियं ठिइ अपज्जत्तापज्जत्तियं निव्वत्तेति, एस णं गोयमा ! आउयकम्मस्स जहन्नठितीबंधते, तव्वइरित्ते अजहन्ने

वृ. 'नाणावरणिज्जस्स णं भंते! कम्मस्स जहन्नटिइबंधए के० ?' इत्यादि सुगमं, नवरमन्यतर-सूक्ष्मसंपराय इति यदुक्तमय व्याख्यानं क्षपक उपशमको वा सूक्ष्मसम्परायः, इह ज्ञानावरणस्य बन्धः क्षपकस्य उपशमकस्य च जघन्यतोऽन्तर्मुहूर्त्तप्रमाणस्ततोऽन्तर्मुहूर्त्तत्वाविशेषात् उपशमको वा क्षपको वा इत्युक्तम्, अन्य(था)त्रापि क्षपकापेक्षया उपशमकस्य बन्धो द्विगुणो वेदितव्यो, यत आह कर्मप्रकृतिसङ्ग्रहणिकारः–'खवगुवसामगपडिवयमाणो दुगुणो तहिं तहिं बंधो' इति, ततो वेदनीयस्य साम्परायिकबन्धचिन्तायां जघन्यः स्थितिबन्धः क्षपकस्य द्वादश मुहूर्त्ता उपशमकस्य चतुर्विंशतिः, नामगोत्रयोर्जघन्यतः क्षपकस्याष्टौ मुहूर्त्ता उपशमकस्य षोडश, परं उपशमकस्यापि जघन्यतो बन्धः शेषबन्धापेक्षया सर्वजघन्य इति तत्सूत्रेष्वपि 'अन्नयरे सुहुम-संपराए उवसामए वा खवगे वा' इति वक्तव्यं, तथा च वक्ष्यति–

"एएणं अभिलावेणं मोहाउवज्जाणं सेसकम्माणं भाणियव्वं'ति उपसंहारसूत्रे 'तव्वइरित्ते अजहन्ने'इति तद्व्यतिरिक्तः–क्षपकोपशमकसूक्ष्मसम्परायव्यतिरिक्तो जनोऽजघन्य-स्थितिबन्धकः, आयुर्बन्धकसूत्रे 'जे णं जीवे असंखिप्पद्धापविट्ठे'इत्यादि, इह द्विविधा जीवाः–सोपक्रमायुषो निरुपक्रमायुषश्च, तत्र देवा नैरयिका असङ्ख्येयवर्षायुषस्तिर्यग्मनुष्याः सङ्ख्येयव-र्षायुषोऽप्युत्तमपुरुषा चक्रवर्त्यादयश्चरमशरीरिणश्च निरुपक्रमायुष एव, शेषास्तु सोपक्रमा अपि निरुपक्रमा अपि, उक्तं च–

॥ १ ॥ "देवा नेरइया वा असंखवासाउया य तिरिमणुया ।
उत्तमपुरिसा य तहा चरमरीरा य निरुवक्कमा ॥
॥ २ ॥ सेसा संसारत्था भइया सोवक्कमा य इयरे वा ।
सोवक्कमनिरुवक्कमभेओ भणिओ समासेणं ॥"

तत्र देवा नैरयिका असङ्ख्येयवर्षायुषस्तिर्यग्मनुष्याश्च षण्मासावशेषायुषः परभवि-कायुर्बन्धका एव, ये पुनस्तिर्यग्मनुष्याः संख्येयवर्षायुषोऽपि निरुपक्रमायुषस्ते नियमात्त्रिभागा-वशेषायुषः परभवायुर्बध्नन्ति, ये तु सोपक्रमायुषस्ते स्यात्त्रिभागावशेषायुषस्त्रिभाग-त्रिभागावशेषायुषो यावदसङ्ख्याद्धाप्रविष्ट इति, तत आह–

'जे णं जीवे' इत्यादि, यो णमिति वाक्यलङ्कारे जीवोऽसङ्ख्याद्धाप्रविष्टः त्रिभागादिना प्रकारेण या सङ्ख्यातुं न शक्यते सा असङ्ख्येया सा चासौ अद्धा च असङ्ख्याद्धा तां प्रविष्टः आयुर्बन्धनि-वर्त्तनमात्र एव कालः तस्यान्ति न परतो जीवनकाल इति भावः, एतदेव स्पष्टतरमाह–

'सेसे सव्वमहंतीए आउयबंधद्धाए' इह सर्वमहती आयुर्बन्धाद्धा अष्टाकर्षप्रमाणा तस्याः

शेषः–एकाकर्षप्रमाणा तावन्मात्रं सर्वनिरुद्धं तस्यायुर्वर्त्तते इति भावः ततोऽसङ्क्षेप्याद्धाप्रविष्टः सइत्थंभूतः तस्या–आयुर्बन्धाद्धायाश्चरमकालसमये–चरमकालावसरे एकाकर्षप्रमाणे, इहचरमसमयकालग्रहणेन न परमनिरुद्धः समयः परिगृह्यन्ते किन्तु यथोक्तरूपः कालस्ततो हीनेन कालेनायुर्बन्धस्यासम्भवात्, यत उक्तं प्राक् व्युत्क्रान्तिपदे

"जीवा णं भंते ! ठिइनामनिहत्ताउयं कइहिं आगरिसेहिं पकरेइ ?, गो० ! जह० एक्केणं उक्कोसेणं अट्ठहिं आगरिसेहिं' इति, एकेन चाकर्षेणायुर्निर्वर्त्तयति सर्वजघन्यं, यत आह–'सव्वजहन्नियं'मिति, सर्वजघन्यां–सर्वलघ्वीं स्थितिमिति गम्यते, निर्वर्त्तयति बध्नातीति भावः, किंविशिष्टामित्याह–'पर्याप्तापर्याप्तिकां' शरीरेन्द्रियपर्याप्तिनिर्वर्त्तोच्छ्वासपर्याप्तयनिर्वर्तनसमर्थां, कथमेतत् अवसेयं यत्सर्वजघन्यामपि स्थितिं निर्वर्त्तयति जीवः शरीरेन्द्रियपर्याप्तिनिर्वर्त्तनसमर्थां न ततो हीनतरां इति चेत्, उच्यते युक्तिवशात्, तथाहि–इह सर्व एव देहिनः परभवायुर्बद्धा म्रियन्ते नान्यथा, परभवायुषश्च बन्ध औदारिके वैक्रिये आहारके वा योगे वर्त्तमानस्य न कार्मणे औदारिकादिमिश्रे वा, तथा चाह मूलटीकाकारः–

"जेणोरालियाईणं तिण्हं सरीराणं कायजोगे वट्टमाणे आउयबंधगो, न कम्मए ओरालिइमिस्से वा" इति, औदारिकादिकाययोगश्च विशिष्टे भवति शरीरेन्द्रियपर्याप्तया, न केवलं शरीरपर्याप्तया पर्याप्तस्य, तत एतत्सिद्धं–शरीरपर्याप्तया इन्द्रियपर्याप्तया च पर्याप्तस्य मरणं नान्यथेति, सर्वजघन्यापि स्थितिं निर्वर्त्तयति शरीरेन्द्रियपर्याप्तिनिर्वर्त्तनसमर्थां न ततोऽपि हीनतरामिति, 'एस णं गोयमे'त्याद्युपसंहारवाक्यम् ।

तदेवमुक्तो जघन्यस्थितिबन्धकः, सम्प्रत्युत्कृष्टस्थितिबन्धके पृच्छति–

मू. (५४५) *उक्कोसकालट्ठितीयं णं भंते ! नाणावरणिज्जं किं नेरइओ बंधति तिरिक्खजोणिओ बंधइ तिरिक्खजोणिणी बंधइ मणुस्सो बंधइ मणुस्सिणी बंधइ देवो बंधइ देवी बंधइ ?, गो० ! नेरइओवि बंधइ जाव देवीवि बंधइ, केरिसए णं भंते ! नेरइए उक्कोसकालट्ठियं नाणावरणिज्जं कम्मं बंधइ ?, गो० ! सण्णी पंचिंदिए सव्वाहिं पज्जत्तीहिं पज्जत्ते सागारे जागरे सुत्तो(तो) वउत्ते मिच्छादिट्ठी कण्हलेसे य उक्कोससंकिलिट्ठपरिणामे ईसिमज्झिमपरिणामे वा, एरिसए णं गो० ! नेरइए उक्कोसकालट्ठितियं नाणावरणिज्जं कम्मं बंधति, ।*

केरिसए णं भंते ! तिरिक्खजोणिए उक्कोसकालट्ठितीयं नाणावरणिज्जं कम्मं बंधति ?, गो० ! कम्मभूमए वा कम्मभूमगपलिभागी वा सण्णी पंचेंदिए सव्वाहिं पज्जत्तीहिं पज्जत्तए सेसं तं चेव जहा नेरइयस्स, एवं तिरिक्खजोणिणीवि मणूसेवि मणूसीवि, देवदेवी जहा नेरइए, एवं आउयवज्जाणं सत्तण्हं कम्माणं ।

उक्कोसलकालट्ठितीयं णं भंते ! आउयं कम्मं किं नेरइओ बंधति जाव देवी बं० ?, गो० ! नो नेरइओ बंधइ, तिरिक्खजोणि बंधति, नो तिरिक्खजोणिणी बंधति, मणुस्सेवि बंधति मणुस्सीवि बंधति, नो देवो बंधइ नो देवी बंधइ, केरिसए णं भंते ! तिरिक्खजोणिते उक्कोसठितीयं आउयं कम्मं बंधंति ?, गो० ! कम्मभूमए वा कम्मभूमगपलिभागी वा सण्णी पंचिंदिए सव्वाहिं पज्जत्तीहिं पज्जत्तए सागारे जागरे सुत्तोवउत्ते मिच्छद्दिट्ठी परमकण्हलेसे उक्कोससंकिलिट्ठपरिणामे, एरिसए णं गो० ! तिरिक्खजोणिते उक्कोसकालट्ठितीयं आउयं कम्मं बंधति,

केरिसए णं भंते ! मणूसे उक्कोसकालट्ठितीयं आउयं कम्मं बंधति ?, गो० ! कम्मभूमए वा कम्मभूमगपलिभागी वा जाव सुत्तो(तो) वउत्ते सम्मद्दिट्ठी वा मिच्छद्दिट्ठी वा कण्हलेसे वा सुक्कलेसे वा नाणी वा अन्नाणी वा उ० संकिलिट्ठपरिणामे वा असंकिलिट्ठपरिणामे वा तप्पाउग्ग-विसुज्झमाणपरिणामे वा एरिसए णं गो० ! मणूसे उक्कोसकालट्ठितीयं आउयं कम्मं बंधति,

केरिसया णं भंते ! मणुसी उक्कोसकालट्ठिइयं आउयं कम्मं बंधइ ?, गो० ! कम्मभूमिया वा कम्मभूमगपलिभागी वा जाव सुत्ता बउत्ता सम्मद्दिट्ठी सुक्कलेसा तप्पाउग्गविसुज्झमाणपरिणामा, एरिसिया णं गोतमा ! मणूसी उक्कोसकालट्ठिइयं आउयं कम्मं बंधिति, अंतराइयं जहा नाणावरणिज्जं

वृ. 'उक्कोसकालठिइयं णं भंते ! नाणावरणिज्जं कम्मं किं नेरइओ बंधइ' इत्यादिसु, सुगमं, नैरयिकसूत्रे 'सागार' इति साकारोपयुक्तः 'जागरे' इति जाग्रत् नारकाणामपि कियानपि निद्रानुभवोऽस्ति तत उक्तम्–'जाग्र'दिति 'सुत्तो(तो) वउत्ते' इति श्रुतोपयुक्तः साभिलापत्वा-नोपयुक्त इति भावः। तिर्यग्योनिकसूत्रे 'कम्मभूमगपलिभागी च;' कर्मभूमगाः– कर्मभूमिजातास्तेषां प्रतिभागः–सादृश्यं तदस्यास्तीति कर्मभूमगप्रतिभागी कर्मभूमगसदश इत्यर्थः, कोऽसाविति चेत्, उच्यते, या कर्मभूमिजा तिर्यक्स्त्री गर्भिणी सती केनाप्यपहत्याकर्मभूमौ मुक्ता तस्या जातः कर्मभूमगसदश इत्यर्थः, अन्ये तु व्याचक्षते–कर्म्मभूमग एव यदा केनाप्यकर्मभूमौ नीतो भवति तदा स कर्मभूमगप्रतिभागी व्यपदिश्यते इति।

उत्कृष्टस्थितिकायुर्बन्धचिन्तायां नैरयिकतिर्यग्योनिकस्त्रीदेवदेवीनां प्रतिषेधः, तासामुत्कृष्टस्थितिषु नरकादिषूत्पत्त्यभावात्, मनुष्यसूत्रे 'सम्मद्दिट्ठी वा मिच्छादिट्ठी वा' इति, इह द्वे उत्कृष्टे आयुषी, तद्यथा–सप्तमनरकपृथिव्यायुर्बध्नाति तदा मिथ्यादृष्टिः, या पुनरनुत्तरसुरायुस्तदा सम्यग्दृष्टिः, 'कण्हलेसे वा' नारकायुर्बन्धकः 'सुक्कलेसे वा' इति अनुत्तरसुरायुर्बन्धकः सम्यग्दृष्टि-प्रमत्तयतिः, उत्कृष्टसङ्क्लिष्टपरिणामो नारकायुर्बन्धकस्तात्रा योग्यविशुध्यमानपरिणामोऽ नुत्तरसुरायुर्बन्धकः,

मानुषी तु सप्तमनरकपृथिवीयोग्यमायुर्न बध्नाति अनुत्तरसुरायुस्तु बध्नातीति तत्सूत्रे सर्वं प्रशस्तं ज्ञेयं, इह अतिविशुद्ध आयुर्बन्धमेव न करोतीति तत्रायोग्यग्रहणं, शेषं कण्ठ्यम्॥

पदं – २३, उद्देशकः– २ समाप्तः

पदं – २३ – समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे त्रयोविंशतितमपदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता।

पदं – २४ कर्मबन्धः

वृ. व्याख्यातं त्रयोविंशतितमं पदं, सम्प्रति चतुर्विंशतितममारभ्यते–तस्य चायम-भिसम्बन्धः–इहानन्तरपदे कर्मबन्धादिरूपः परिणामविशेषश्चिन्तितः, स एव वक्ष्यमाणेष्वपि चतुर्षु पदेषु क्वचित् चिन्त्यते, तत्र चतुर्विंशतितमस्य पदस्येदमादि सूत्रम्–

***सू. (५४६)** कति णं भंते ! कम्मपगडीओ पन्नत्ताओ ?, गो० ! अट्ठ कम्मपगडीओ*

पन्नत्ताओ, तं०-नाणावरणिज्जं जाव अंतराइयं, एवं नेरइयाणं जाव वेमाणियाणं।

जीवे णं भंते! नाणावरणिज्जं कम्मं बंधमाणे कति कम्मपगडीतो बंधइ?, गो०! सत्तविहबंधए वा अट्ठविह० छव्विहबंधते वा, नेरइए णं भंते! नाणावरणिज्जं कम्मं बंधमाणे कति कम्मपगडीतो बंधति?, गो०! सत्तविहबंधए वा अट्ठविह०, एवं जाव वेमाणिते, नवरं मणुस्से जहा जीवे,

जीवा णं भंते! नाणावरणिज्जं कम्मं बंधमाणा कति कम्मपगडीओ बंधंति?, गो०! सव्वेवि ताव होज्जा सत्तविहबंधगा य अट्ठविहबंधगा य अहवा सत्तविहबंधगा य अट्ठविहबंधगा य छव्विहबंधगे य अहवा सत्तविहबंधगा य अट्ठविहबंधगा य छव्विहबंधगा य, नेरइया णं भंते! नाणावरणिज्जं कम्मं बंधमाणा कति कम्मपगडीतो बंधंति? गो०! सव्वेवि ताव होज्जा सत्तविहबंधगा अहवा सत्तविहबंधगा य अट्ठविहबंधगे य, अहवा सत्तविहबंधगा य अट्ठविहबंधगा य तिन्नि भंगा, एवं जाव थणियकुमारा,

पुढविकाइया णं पुच्छा, गो०! सत्तविहबंधगावि अट्ठविहबंधगावि एवं जाव वणप्फइकाइया, विगलाणं पंचिंदियतिरिक्खजोणियाणं तियभंगो सव्वेवि ताव होज्ज सत्तविहबंधगा अहवा सत्तविहबंधगा य अट्ठविहबंधगे य अहवा सत्तविहबंधगा य अट्ठविहबंधगा य,

मणूसा णं भंते! नाणावरणिज्जस्स पुच्छा, गो०! सव्वेवि ताव होज्जा सत्तविहबंधगा १ अहवा सत्तविहबंधगा य अट्ठविहबंधगे य २ अहवा सत्तविहबंधगा य अट्ठविहबंधगा य ३ अहवा सत्तविहबंधगा य छव्विहबंधए य ४ अहवा सत्तविहबंधगा य छव्विहबंधगा य ५ अहवा सत्तविहबंधगा य अट्ठविहबंधगे य छव्विहबंधगे य ६ अहवा सत्तविहबंधगा य अट्ठविहबंधगे य छव्विहबंधगा य ७ अहवा सत्तविहबंधगा य अट्ठविहबंधगा य छव्विहबंधगे य ८ अहवा सत्तविहबंधगा य अट्ठविहबंधगा य छव्विहबंधगा य ९ एवं एते नव भंगा,

सेसा वाणमंतरादिया जाव वेमाणिता जहा नेरइया सत्तविहादिबंधगा भाणिता तहा भाणितव्वा, एवं जहा नाणावरणं बंधमाणा जहिं भणिता दंसणावरणंपि बंधमाणा तहिं जीवादीया एगत्तपोहत्तेहिं भाणितव्वा, वेयणिज्जं बंधमाणे जीवे कति०?, गो०! सत्तविहबंधए वा अट्ठविहबंधए वा छव्विहबंधए वा एगविहबंधए वा, एवं मणूसेवि सेसा नारगादीया सत्तविह० अट्ठविहबंधगा जाव वेमाणिते,

जीवा णं भंते! वेदणिज्जं कम्मं पुच्छा, गो०! सव्वेवि ताव होज्जा सत्तविहबंधगा य अट्ठविहबंधगा य एगविहबंधगा य छव्विहबंधए य अहवा सत्तविहबंधगा य अट्ठविहबंधगा य एगविहबंधगा य छव्विहबंधगा य अवसेसा, नारगादीया जाव वेमाणिता जहिं नाणावरणं बंधंति तहिं भाणिएवं मणूसा णं भंते! वेदणिज्जं कम्मं बंधमाणा कति कम्मपगडीतो बंधंति? गो०! सव्वेवि ताव होज्जा सत्तविहबंधगा य एगवि० १ अहवा सत्तविहबंधगा य एगवि० अट्ठविहबंधगे य २ अहवा सत्तविहबंधगा य गविहबंधगा य अट्ठवि० ३ अहवा सत्तविहबंधगा य एगविहबंधगा य छव्विहबंधगे य ४ अहवा सत्तविहबंधगा य एगविह० छव्विह० ५ अहवा सत्तविहबंधगा य एगवि० अट्ठविहबंधते य छव्विहबंधते य ६ अहवा सत्तविहबंधगा य एगविहबंधगा य अट्ठविहबंधते य छव्विहबंधगा य ७ अहवा सत्तविहबंधगा य एगवि० गा य अट्ठविहबं० छव्विहबंधगे य ८ अहवा सत्तविहबंधगा य एगवि० अट्ठवि० छव्विहबं० ९ एवं एए नव भंगा भाणियव्वा,

मोहणिज्जं बंधमाणे जीवे कति० ?, गो० ! जीवेगिंदियवज्जो तियभंगो, जीवेगिंदिया सत्तविहबंधगावि अट्ठविहबंधगावि, जीवे णं भंते ! आउयं कम्मं बंधमाणे कति कम्म० ? गो० ! नियमा अट्ठ, एवं नेरइए जाव वेमाणिए एवं पुहुत्तेणवि,

नामगोयअंतराइयं बंधमाणे जीवे कति० ?, गो० ! जीवा नाणावरणिज्जं बंधमाणे जाहिं बंधति ताहिं भाणितव्वो, एवं नेरइएवि, जाव वेमाणिए, एवं पुहुत्तेणवि भाणियव्वं ॥ (पन्नवणाए भगवईए छउवीसतिमं पयं समत्तं)

वृ. 'कइ णं भंते ! कम्मपगडीओ पन्नत्ताओ' इत्यादि, प्रागुपन्यस्तस्यालापकस्येहोपन्यासो विशेषाभिधानार्थः, एवमुत्तरेष्वपि पदेषु भावनीयं, संप्रति किं कर्म बध्नन् कानि कर्माणि बध्नातीति बन्धसम्बन्धं चिन्तयिषुः प्रथमतो ज्ञानावरणीयेन सह सम्बन्धं चिन्तयति–'जीवे णं भंते ! नाणावरणिज्जं कम्मं बंधमाणे कइ कम्मपगडीओ बंधइ' इत्यादि सुगमं, नवरं सप्तविधबन्धक आयुर्बन्धकाभावकाले अष्टविधबन्धक आयुरपि बध्नन् षड्विधबन्धको मोहायुरबन्धाभावे, स च सूक्ष्मसम्परायः, उक्तं च–

॥ १ ॥ "सत्तविहबंधगा होंति पाणिणो आउवज्जगाणं तु ।
तह सुहुमसंपराया छव्विहबंधा विणिद्दिट्ठा ॥
मोहाउयवज्जाणं पयडीणं ते उ बंधगा भणिया ॥"

एकविधबन्धकस्तु न लभ्यते, एकविधबन्धका हि उपशान्तकषायादयः, तथा चोक्तम्–

"उवसंतखीणमोहा केवलिणो एगविहबंधा ।
ते पुणदुसमयट्ठिइयस्स बंधका न उण संपरायस्स ॥"

न चोपशान्तकषायादयो ज्ञानावरणीयं कर्मबध्नन्ति, तद्बन्धस्य सूक्ष्मसम्परायचरमसमय एव व्यवच्छेदात्, किन्तु केवलं सातवेदनीयमिति ॥

एतदेव नैरयिकादिदण्डकक्रमेण चिन्तयति–'नेरइए णं भंते !' इत्यादि, इह मनुष्यवर्जेषु शेषेषु पदेषु सर्वेष्वपि द्वावेव भङ्गकौ द्रष्टव्यौ सप्तविधबन्धको वा अष्टविधबन्धको वा इति, न तु तृतीयः षड्विधबन्धक इति, तेषु सूक्ष्मसम्परायगुणस्थानासम्भवात्, मनुष्यपदेषुत्रयोऽपि वक्तव्याः, तत्र सूक्ष्मसम्परायत्वसम्भवात्, तथा चाह–'एवं जाव वेमाणिए, नवरं मणूसे जहा जीवे' इति । उक्त एकत्वेन दण्डकः, सम्प्रति बहुत्वेनाह–

'जीवा णं भंते' इत्यादि, इह जीवाः सप्तविधबन्धकाः अष्टविधबन्धकाश्च सदैव बहुत्वेन लभ्यन्ते, षड्विधबन्धकस्तु कदाचित्सर्वथा ना भवति, षण्मासान् यावत् उत्कर्षतस्तदन्तरस्य प्रतिपादनात्, यदापि लभ्यते तदापि जघन्यपदे एको द्वौ वा उत्कर्षतोऽष्टाधिकं शतं, त्रयदैकोऽपि न लभ्यते तदा प्रथमो भङ्गः, यदा त्वेको लभ्यते तदा द्वितीयो, बहूनां लाभे तु तृतीय इति, नैरयिकाः षड्विधबन्धका न भवन्ति अष्टविधबन्धका अपि कादाचित्काः, तत्र यदैकोऽप्यष्टविधबन्धको न लभ्यते तदा सर्वेऽपि तावद् भवेयुः सप्तविधबन्धका इति प्रथमो भङ्गः, यदा त्वेकोऽष्टविधबन्धकस्तदा द्वितीयो यदा तु बहवस्तदा तृतीय इति, एतदेव भङ्गत्रिकं दशस्वपि भवनपतिषु भावनीयं,

पृथिव्यादिषु पञ्चसु सप्तविधबन्धका अपीत्येक एव भङ्गोऽष्टविध-

बन्धकानामपि सदैव तेषु बहुत्वेन लभ्यमानत्वात्, द्वित्रिचतुरिन्द्रियतिर्यक्पञ्चेन्द्रियसूत्रेषु भङ्गत्रिकं नैरयिकवत्, मनुष्यसूत्रे भङ्गनवकमष्टविधबन्धकस्य षड्विधबन्धकस्य च कदाचित् सर्वथाप्यभावात्, तत्राष्टविधषड्विधबन्धकाभावे सर्वेऽपि तावद् भवेयुः सप्तविधबन्धका इति प्रथमो भङ्गः, सप्तविधबन्धकानां सदैव बहुत्वेन प्राप्यमाणत्वात्, एकाष्टविधबन्धकभावे द्वितीयः सप्तविधबन्धकाश्चाष्टविधबन्धकश्च, बहवष्टविधबंधकभावे तृतीयः सप्तवधबन्धकाश्चष्टविधबंधकाश्च, एवमेवाष्टविधबन्धकाभावे षड्विधबन्धकपादेनाप्यकत्वबहुत्वाभ्यां द्वौ भङ्गाविति द्विकसंयोगे चत्वारो भङ्गाः, त्रिकसंयोगेऽप्यष्टविधबन्धकषड्विधबन्धकपदयोः प्रत्येकमेकवचनबहुवचनाभ्यां चत्वार इति सर्वसङ्कलया नव, व्यन्तरज्योतिष्कवैमानिका नैरयिकवत्,

यथा ज्ञानावरणीयं चिन्तितं तथा दर्शनावरणीयमपि चिन्तयितव्यं, वेदनीयचिन्तायां एकविधबन्धक एव इति उपशान्तमोहादि, शेषं प्राग्वत्, मनुष्यपदविषयचिन्तायामपि त एव प्रागुक्ता नव भङ्गाः, सप्तविधबन्धकानामेकविधबन्धकानां च सदैव बहुत्वेनावस्थिततया भङ्गान्तरासम्भवात्,

मोहचिन्तायां जीवपदे पृथिव्यादिषु पदेषु च प्रत्येकं एक एव भङ्गः—सप्तविधबन्धका अपि अष्टविधबन्धका अपीति, उभयेषामपि सदैव बहुत्वेन लभ्यमानत्वात्, षड्विधबन्धकस्तु मोहनीयबन्धको न भवति, मोहनीयबन्धो ह्यनिवृत्तिबादरसम्परायगुणस्थानकं यावत्, षड्विधबन्धकस्तु सूक्ष्मसंपराय इति, आयुर्बन्धकसत् नियमादष्टविधबन्धक इति तच्चिन्तायामेकवचने बहुवचने च सर्वत्राभङ्गकं, नामगोत्रान्तरायसूत्राणि ज्ञानावरणीयसूत्रवत् ॥

पदं – २४ · समाप्तम्

पदं – २५ – "कर्मवेदः"

वृ. सम्प्रति पञ्चविंशतितममारभ्यते, तत्र चेदमादिसूत्रम्–

मू. *(५४७) कति णं भंते ! कम्मपगडीओ पं० ?, गो० ! अट्ठ कम्मपगडीतो पन्नत्ताओ तं०– नाणावरणिज्जं जाव अंतराइयं, एव नेरइयाणं जाव वेमाणियाणं,*

जीवे णं भंते ! नाणावरणिज्जं कम्मं बंधमाणे कति कम्मपगडीतो वेदेति ?, गो० ! नियमा अट्ठ कम्मपगडीतो वेदेति, एवं नेरइए जाव वेमाणिए, एवं पुहुत्तेणवि, एवं वेदणिज्जवज्जं जाव अंतराइयं । जीवे णं भंते ! वेदणिज्जं कम्मं बंधमाणे कति कम्मपगडीतो वेदेति ?, गो० ! सत्तविहवेदए वा अट्ठविहवेदए वा छउव्विहवेदए वा, एवं मणूसेवि, सेसा नेरइयाति एगत्तेण पुहुत्तेणवि नियमा अट्ठ कम्मपगडीओ वेदंति जाव वेमाणिया,

जीवा णं भंते ! वेदणिज्जं कम्मं बंधमाणा कति कम्मपगडीतो वेदेंति ?, गो० ! सव्वेवि ताव होज्जा अट्ठविहवेदगा य चउव्विहवेदगा य ? अहवा अट्ठविहवेदगा य चउव्विह० सत्तविहवेदगे य २ अहवा अट्ठावहवेदगा य चउव्वि० सत्तवि० ३, एवं मणूसावि भाणियव्वा ॥ (पन्नवणाए भगवईए कम्मवेदनामं पणवीसतिमं पयं समत्तं)

वृ. 'कइ णं भंते कम्मपगडीओ' इत्यादि गतार्थं, सम्प्रति किं कर्म बध्नन् कति कर्मप्रकृतीर्वेदयते इति चिन्तयति 'जीवे णं भंते !' इत्यादि सुगमं, वेदनीयसूत्रे 'सत्तविहवेयए वा अट्ठविहवेयए(या) वा' इति, सप्तविधवेदक उपशान्तमोहः क्षीणमोहो वा, तयोर्मोहनीयोदयाभावात्,

अष्टविधवेदका मिथ्यादृष्ट्यादयः सूक्ष्मसम्परायान्ताः, तेषामवश्यमष्टानमपि कर्मणामुदय-भावात्, चतुर्विधवेदकः सयोगिकेवली, तस्य घातिकर्मचतुष्टयोदयाभावात्, बहुवचने सप्तविधवेदकाः कादाचित्का इति भङ्गत्रयम् ।

पदं - २५ - समाप्तम्

पदं - २६-कर्म "वेद-बन्ध"

मू. अधुना षड्विंशतितममारभ्ये, तत्र चेदमादिसूत्रम्-

मू. (५४८) *कतिणं भंते! कम्मपगडीओ पन्नत्ताओ, गो० ! अट्ठ कम्मपगडीओ पन्नत्ताओ, तं०-नाणा० जाव अंतराइयं, एवं नेरइयाणं जाव वेमाणियाणं,*

जीवे णं भंते! नाणावरणिज्जं कम्मं वेदेमाणे कति कम्मपगडीओ बंधति?, गो० ! सत्तविह-बंधए वा अट्ठविहबंधए वा छव्विहबंधए वा एगविहबंधए वा,

नेरइए णं भंते! नाणावरणिज्जं कम्मं वेदेमाणे कति जाव० बंधति?, गो० ! सत्तविहबंधए वा अट्ठवि०, एवं जाव वेमाणिते, एवं मणूसे जहा जीवे, जीवा णं भंते! नाणावरणिज्जं कम्मं वेदेमाणा कति० ! कम्मपगडीतो बंधंति!,

गो० ! सव्वेवि ताव होज्जा सत्तविहबंधगा य अट्ठविह० १ अहवा सत्तविहबंधगा य अट्ठविहबंधगा य छव्विहबंधगे य २ अहवा सत्तविहबंधगा य अट्ठविहबंधगा य छव्विहबंधगा य छव्विहबंधगा य ३ अहवा सत्तविहबंधगा य अट्ठविहबंधगा य एगविहबंधए य ४ अहवा सत्तवि-हबंधगा य अट्ठविहबंधगा य एगविहबंधगा य ५ अहवा सत्तविहबंधगा य अट्ठवि० छव्विहबंधए य एगविहबंधए य ६ अहवा सत्तविहबंधगा य अट्ठवि० छव्विहबंधए य एगविहबंधगा य ७ अहवा सत्तविहबंधगा य अट्ठवि० छव्विह० एगविहबंधए य ८, अहवा सत्तविहबंधगा य अट्ठ० छव्विह० एगविह० ९, एवं एते नव भंगा, अवसेसाणं एगिंदियमणूसवज्जाणं तियभंगो जाव वेमाणियाणं,

एगिंदियाण सत्तविहबंधगा य अट्ठविहबं०, मणूसाणं पुच्छा, गो० ! सव्वेवि ताव होज्जा सत्तविहबंधगा १ अहवा सत्तविहबंधगा य अट्ठविहबंधगे य २ अहवा सत्तविहबंधगा य अट्ठविहबंधगा य ३ अहवा सत्तविहबंधगा य छव्विहबंधए य ४, एवं छव्विहबंधएणवि समं दो भंगा, एगविहबंधएणवि समं दो भंगा, अहवा सत्तविहबंधगा य अट्ठविहबंधए य छव्विहबंधए य चउभंगो १ अहवा सत्तविहबंधगा य अट्ठविहबंधए य एगविहबंधगे य चउभंगो २, अहवा सत्तविहबंधगा य छव्विहबंधए य एगविहबंधए य चटउभंगो ३ अहवा सत्तविहबंधगा य अट्ठविहबंधए य छव्विहबंधए य एगविहबंधए य भंगा अट्ठ, एवं एते सत्तावीसं भंगा, एवं जहा नाणावरणिज्जं तहा दंसणावरणिज्जंपि अंतराइयंपि,

जीवे णं भंते! वेदणिज्जं कम्मं वेदेमाणे कति कम्मपगडीतो बंधति?, गो० ! सत्तविहबंधते वा अट्ठविहबंधते वा छव्विहबंधए वा एगविहबंधए वा अबंधे वा, एवं मणूसेवि, अवसेसा नारयादीया सत्तविहबं० अट्ठविहबं० एवं जाव वेमाणिता। जीवा णं भंते! वेदणिज्जं कम्मं वेदेमाणा कति० बंधंति?, गो० ! सव्वेवि ताव होज्जा सत्तविहबंधगा य अट्ठाविहबंधगा य एगविहबंधगा य

अहवा सत्तविहबंधगा य अट्ठवि० एगवि० छव्विहबंधगे य, अहवा सत्तविहबंधगा य अट्ठविहबंध० एगविहबंध० छव्विहबंधगा य, अबंधगेणवि समं दो भंगा भाणियव्वा, तहवा सत्तविहबंधगा य अट्ठविहबंध० एगविहबंध० छव्विहबंधगे य अबंधगे य चउभंगो, एवं एए नव भंगा, एगिंदियाणं अभंगतं, नारगादीणं तियभंगा जाव वेमाणियाणं,

नवरं मणूसाणं पुच्छा, सव्वेवि ताव होज्जा सत्तविहबंधगा एगविहबंधगा य अहवा सत्तविहबंधगा य एगविहबंधगा य छव्विहबंधते य अट्ठविहबंधथते य अबंधते य, एवं एते सत्तावीसं भंगा भाणितव्वा, एवं जहा वेदणिज्जं तहा आउयं नामं गोयं च भाणितव्वं, मोहणिज्जं वेदेमाणे जहा नाणावरणिज्जं तहा भाणियव्वं ।।

वृ. 'कति णं भंते ! इत्यादि गतार्थं, सम्प्रति किं कर्म वेदयमानः काः कर्मप्रकृतीर्बध्नातीत्युदयेन सह बन्धस्य सम्बन्धं चिचिन्तयिषुरिदमाह–

'जीवे णं भंते ! नाणावरणिज्जं कम्मं वेएमाणे कइ कम्मपगडीओ बंधइ' इत्यादि सुगमं, नवरं ज्ञानावरणीयं कर्म वेदयमान एकविधबन्धकः उपशान्तमोहः क्षीणमोहो वा न तु सयोगिकेवली, तस्य ज्ञानावरणीयोदयाभावात्, बहुवचनचिन्तायां षड्विधबन्धकाः सूक्ष्मसम्पराया एकविधबन्धका उपशान्तमोहक्षीणमोहाः कादाचित्का एकत्वादिना च भाज्या इत्युभयेषामप्यभावे सप्तविधबन्धका अपि अष्टविधबन्धका अपीत्येको भङ्गो, द्वयानामपि सदैव बहुत्वेन लभ्यमानत्वात्, ततः षड्विधबन्धकपदप्रक्षेपे एकवचनबहुवचनाभ्यां द्वौ भङ्गौ, एवमेव द्वौ भङ्गावेक विधबन्धकप्रक्षेपेऽपि, उभयोरपि युगपत् प्रक्षेपे पूर्ववद्यत्वार इति सर्वसङ्ख्यया नव,

नैरयिकादिषु तु पदेष्वकेन्द्रियमनुष्यवर्जेषु बहुवचनचिन्तायां भङ्गत्रिकं, अष्टविधबन्धकानां कादाचित्कतया एकत्वादिना भाज्यतया च लभ्यमानत्वात्, एकेन्द्रियेष्वभङ्गकं, सप्तविधबन्धका अष्टविधबन्धका अपीति, उभयेषामपि सदा बहुत्वेन प्राप्यमाणत्वात्, मनुष्येषु तु सप्तविंशतिर्भङ्गाः अष्टविधबन्धकषड्विधबन्धकएकविधबंधकानां कादाचित्कतया एकत्वादिना भाज्यमानतया लभ्यमानत्वात्, तत्रामीषामभावे सप्तविधबन्धका इत्येको भङ्गः, ततोऽष्टविधबन्धकपदप्रक्षेपे एकवचनबहुवचनाभ्यां द्वौ द्वौ, षड्विधबन्धकप्रक्षेपे द्वौ, एकविधबन्धकप्रक्षेपे सति सप्त, ततोऽष्टविधबन्धकषड्विधबन्धकपदप्रक्षेपे चत्वारः, अष्टविधबन्धकैकविधबन्धकपदप्रक्षेपे चत्वारः, षड्विधबन्धकएकविधबन्धकपदप्रक्षेपेऽपि चत्वारः, एकोनविंशतिः, ततोऽष्टविधबन्धकषड्विधबन्धकैकविधबन्धकपदानां युगपत् प्रक्षेपेऽष्टाविति सप्तविंशतिः,

वेदनीयसूत्रे एकविधबन्धकः सयोगिकेवल्यपि, तस्यापि वेदनीयोदयबन्धसम्भवात्, अबन्धकोऽयोगिकेवली, तस्य योगाभावतो वेदनीयं वेदयमानस्यापि तद्बन्धासम्भावाद्, वेदनीयसूत्रे एकवचनबहुवचनचिन्तायां जीवपदे नव भङ्गाः, तत्र सप्तविधबनअधकाष्टविधबन्धकैकविधबन्धकानां सदैव बहुत्वेन लभ्यमानत्वात् बहुवचनात्मके इतरपदद्वयाभावे एकः, ततः षड्विधबन्धकपदप्रक्षेपे एकवचनबहुवचनाभ्यां द्वौ एवमेव द्वावेकविधबन्धकपदप्रक्षेप चत्वार उभयपदप्रक्षेपे इति ।

मनुष्यपदे सप्तविंशतिः, तत्र हि सप्तविधबन्धका एकविधबनधका एकेन बहुत्वेन सदावस्थिता इतरे तु त्रयोऽप्यष्टविधबन्धकाः षड्विधबन्धकाः अबन्धकाश्च कादाचित्का एकत्वादिना च

भाज्याः, ततस्तेषामभावे सप्तविधबन्धका अप्येकविधबन्धका अपीत्येको भङ्गः, ततोऽष्टविधबन्धकपदप्रक्षेपे एकवचनबहुवचनाभ्यां द्वौ द्वौ षड्विधबन्धकपदप्रक्षेपे द्वावेकविधबन्धकपदप्रक्षेपे इति षट्, तथा त्रयाणां पदानां त्रयो द्विकसंयोगा एकैकस्मिन् द्विकसंयोगे एकवचनबहुवचनाभ्यां चत्वार इति द्विकसंयोगे द्वादश त्रिकसंयोगेऽष्टाविति सर्वसङ्ख्यया सप्तविंशतिः एवमायुर्नामगोत्रसूत्राण्यपि भावनीयानि,

मोहवेदनीयं कर्म वेदयमानो जीवः सप्तविधबन्धकोऽष्टविधबन्धकः षड्विधबन्धको वा, सूक्ष्मसम्परायावस्थायामपि मोहनीयवेदनसम्भवात्, एवं मनुष्यपदेऽपि वक्तव्यं. नरकादिषु तु पदेषु सप्तविधबन्धकोऽष्टविधबन्धको वेत्येवं वक्तव्यं, सूक्ष्मसम्परायत्वाभावतः षड्विधबन्धकत्वासम्भवात्, बहुवचनचिन्तायां जीवपदे भङ्गत्रिकं, तत्र सूक्ष्मसम्परायाः कादाचित्का इतरे च द्वये सदैव बहुत्वेन लभ्यन्ते, इति षड्विधबन्धकपदाभावे सप्तविधबन्धका अपि अष्टविधबन्धका अपीत्येको भङ्गः, ततः षड्विधबन्धकपदप्रक्षेपे एकवचनबहुवचनाभ्यां द्वावेतौ भङ्गाविति,

नैरयिकादिषु स्तनितकुमारपर्यवसानेषु सप्तविधबन्धकाः सदा बहुत्वेनावस्थिताः, अष्टविधबन्धकास्तु कादाचित्का एकत्वादिना च भाज्या इति, अष्टविधबन्धकपदाभावे सप्तविधबन्धका इत्येको भङ्गः, ततोऽष्टविधबन्धकपदप्रक्षेपे एकवचनबहुवचनाभ्यां द्वाविति, पृथिव्यादिषु तु पञ्चस्वप्यभङ्गकं सप्तविधबन्धका अपि अष्टविधबन्धका अपीति, उभयेषामपि तेषु सदा बहुत्वेन लभ्यमानत्वात्,

द्वित्रिचतुरिन्द्रियतिर्यक्पञ्चेन्द्रियेषु व्यन्तरज्योतिष्कवैमानिकेषु च नैरयिकवत् भङ्गत्रिकं, मनुष्येषुनव भङ्गाः, तत्र सप्तविधबन्धका इत्येको भङ्गस्ततोऽष्टविधबन्धकपदप्रक्षेपे एकवचनबहुवचनाभ्यां द्वौ द्वौ षड्विधबंधकपदप्रक्षेपे एकवचनबहुवचनाभ्यां चत्वारः उभयपदप्रक्षेपे इति, तथा चाह-"मोहणिज्जं वेएमाणे जहा बंधे नाणावरणिज्जं तहा भणियव्व"मिति ॥

पदं – २६ – समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे षड्विंशतितमपदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता ।

पदं – २७ – "कर्मवेद वेद"

मू. संप्रति सप्तविंशतितममारभ्यते, तत्रेदमादिसूत्रम्-

मू. (५४९) कति णं भंते! कम्मपगडीओ पं० ?, गो० ! अट्ठ, तं०-नाणा० जाव अंतराइयं, एवं नेरइयाणं जाव वेमाणियाणं,

जीवे णं भंते! नाणावरणिज्जं कम्मं वेदेमाणे कति कम्मपगडीतो वेदेति ?, गो० ! सत्तविहवेयए वा अट्ठविहवेयए वा, एवं मणूसेवि, अवसेसा एगत्तेणवि पुहुत्तेणवि नियमा अट्ठ कम्मपगडीतो वेदेंति जाव वेमाणिया, जीवा णं भंते ! नाणावरणिज्जं वेदेमाणा कति कम्मपगडीतो वेदेंति ?, गो० ! सव्वेवि ताव होज्जा अट्ठविहवेदगा, अहवा अट्ठविहवेदगा य सत्तविहवेदगे य अहवा अट्ठविहवेदगा य सत्तवि०, एवं मणूसावि,

दरिसणावरणिज्जं अंतराइयं च एवं चेव भाणितव्वं, वेदणिज्जं आउयनामगोत्तंति वेदेमाणे

कति कम्मपगडीओ वेएति ?, गो० ! जहा बंधगवेदगस्स वेयणिज्जं तहा भाणितव्वाणि,

जीवे णं भंते ! मोहणिज्जं वेदेमाणे कति कम्मपगडीतो वेदेति ?, गो० ! नियमा अट्ठ कम्मपगडीतो वेदेति, एवं नेरतिए जाव वेमाणिते, एवं पुहुत्तेणवि (पन्नवणाए भगवईए सत्तावीसइमं पयं समत्तं)

वृ. 'कइ णं भंते !' इत्यादि गतार्थं, सम्प्रति किं कर्म वेदयमानः कति कर्मप्रकृतिर्वेदयते इत्युदयस्योदयेन सह सम्बन्धं चिन्तयति–

'जीवे णं भंते ! नाणावरणिज्जं कम्मं वेदेमाणे कइ कम्मपगडीओ वेएइ' इत्यादि, तत्र सप्तविधवेदक उपशान्तमोहः क्षीणमोहो वा, तयोर्मोहनीयोदयासम्भवात्, शेषस्तु सूक्ष्मसंपरायादिरष्टविधवेदकः, एवं मनुष्यपदेऽपि वाच्यं, नैरयिकादयस्तु नियमादष्टविधवेदकाः बहुवचनचिन्तायां जीवपदे मनुष्यपदे च भङ्गत्रिकं, तत्र सर्वेऽपि तावतद् भवेयुः अष्टविधवेदका इत्येको भङ्गः, ततः सप्तविधवदकस्यैकस्य भावे द्वितीयो बहूनां भावे तृतीयः, शेषेषु तु नैरयिकादिषु पदेषु अभङ्गमष्टविधवेदका इति, सप्तविधवेदकत्वस्य तत्रासम्भवात्,

एवं दर्शनावरणीयान्तरायसूत्रेऽपि वक्तव्यं, वेदनीयसूत्रे जीवपदे मनुष्यपदे च प्रत्येकमष्टविधवेदको वा सप्तविधवेदको वा चतुर्विधवेदको वेति वक्तव्यं, शेषेषु तु नैरयिकादिषु अष्टविधवेदक इत्येकः तेषामुपशान्तमोहत्वाद्यवस्थासम्भवात्, तत्रैव वेदनीयसूत्रे बहुवचनचिन्तायां जीवपदे मनुष्यपदे च प्रत्येकं भङ्गत्रिकं, तत्राष्टविधवेदकाश्चेत्येको भङ्गः एष सर्वथा सप्तविधवेदकानाभावे, ततः सप्तविधवेदकपदप्रक्षेपे एकवचनबहुवचनाभ्यां द्वौ भङ्गाविति, शेषेषु तु नैरयिकादिषु स्थानेष्वभङ्गकं अष्टविधवेदका इति, एवमायुर्नामगोत्रसूत्राण्यपि भावनीयानि,

मोहनीयं कर्म वेदयमानो नियमादष्टविधवेदक इति, जीवादिषु पञ्चविंशतौ पदेष्वेकवचनचिन्तायां बहुवचनचिन्तायं च सर्वत्रापि अभङ्गकं–अष्टौ कर्मप्रकृतीर्वेदयते वेदयन्ते वा ॥

पदं – २७ – समाप्तम्

पदं – २८ – "आहारं"

वृ. तदेवमुक्तं वेदवेदाख्यं सप्तविंशतितमं पदं, सम्प्रत्यष्टाविंशतितममारभ्यते, तस्य चामभिसम्बन्धः–इहानन्तरपदे नारकादिगतिसमापन्नानां कर्मवेदनापरिणाम उक्तः, इह त्वाहारपरिणाम इति, तत्र चैमे सङ्ग्रहणिगाथे–

मू. (५५०) सचित्ता १ हारट्ठी २ केवति ३ किं वावि ४ सव्वतो चेव ५ ।
कतिभागं ६ सव्वे ७ खलु परिणामे ८ चेव बोद्धव्वे ॥

वृ. 'सचित्ताहारट्ठी' इत्यादि प्रथमोऽधिकारः सचित्तपदोपलक्षितः, स चैवम्–'नेरइया णं भंते! किं सचित्ताहारा अचित्ताहारा इत्यादि १, द्वितीय आहारार्थिन इति २, तृतीयः 'केवइय'त्ति कियता कालेन आहारार्थः समुत्पद्यते इत्यादिरूपः ३, चतुर्थः किमाहारमाहारयन्तीतिपदोपलक्षितः ४ पञ्चमः सर्वत इतिपदोपलक्षितः, स चैवम्–'नेरइया णं सव्वतो परिणामंति'त्यादि ५ चैवशब्दः समुच्चये, 'कइभागं'ति गृहीतानां पुद्गलानां कतिभागमाहारयन्तीत्येवमादिः षष्ठोऽधिकारः ६, 'तथा सव्वे' इति यान् पुद्गलान् आहारतया गृह्णन्ति तान् किं सर्वान्–अपरिशेषान् आहारयन्ति

उतासर्वान् इत्येवमुपलक्षितः सप्तमोऽधिकारः ७, तथाऽष्टमोऽधिकारः परिणामः-परिणामरूपो बोद्धव्यः, स चैवम्-'नेरइया णं भंते! जे पोग्गले आहारत्ताए गेण्हंति ते णं तेसिं पुग्गला कीसत्ताए भुज्जो २ परिणमंती' त्यादिरूपः ८,

मू. (५५१) *एगिंदियसरीरादी लोमाहारो तहेव मणभक्खी।*
एतेसिं तु पदाणं विभावणा होति कातव्वा॥

मू. नवमोऽधिकारः एकेन्द्रियादि शरीराणि, स चैवम्-'नेरइया णं भंते! किं एगिंदियसरीराइं आहारेंति जाव पंचिंदियसरीराइं आहारेंति?' ९, दशमोऽधिकारो लोमाहारो-लोमाहारवक्तव्यतारूपः १०, एकादशो मनोभक्षितवक्तव्यतारूपः ११,

'एएसिं तु' इत्यादि, एतेषां-सामान्यतोऽनन्तरमुद्दिष्टानां पदानां-अर्थाधिकाराणां विभावना-विस्तरतः प्रकाशना नाम भवति कर्त्तव्यता, सूत्रकारवचनमेतत्। प्रतिज्ञातमेव निर्वाहयितुकामो 'यथोद्देशं निर्देश' इति न्यायात् प्रथमाधिकारं विभावयति-

-: पदं - २८, उद्देशकः - १ :-

मू. (५५२) *नेरइया णं भंते! किं सचित्ताहारा अचित्ताहारा मीसाहारा?, गो० ! नो सचित्ताहारा अचित्ताहारा नो मीसाहारा, एवं असुरकुमारा जाव वेमाणिया, ओरालियसरीरा जाव मणूसा सचित्ताहारावि अचित्ताहारावि मीसाहारावि।*

नेरइया णं भंते! आहारट्ठी?, हंता आहारट्ठी, नेरइयाणं भंते! केवतिकालस्स आहारट्ठे समुप्पज्जति? गो० ! नेरइयाणं दुविधे आहारे प० तं०-आभोगनिव्वत्तिते य अनाभोगनिव्वत्तिते य, तत्थ णं जे से अनाभोगनि० से णं अनुसमयमविरहिते आहारट्ठे समुप्पज्जति, तत्थ णं जे से आभोगनि० से णं असंखिज्जसमतिए अंतोमुहुत्तिते आहारट्ठे समुप्पज्जति,

नेरइया णं भंते! किमाहारमाहारेंति?, गो० ! दव्वतो अनंतपदेसियातिं खेत्तओ असंखेज्जपदेसोगाढातिं कालतो अन्नयरट्ठितियातिं भावओ वण्णमंतातिं गंधमंताइं रसमंताइं फासमंताइं, जाइं भावतो वण्णमंताइं आहारेंति ताइं किं एगवण्णातिं आहारेंति जाव किं पंचवण्णाइं आहारेंति?, गो० ! ठाणमग्गणं पडुच्च एगवण्णाइंपि आहारेंति जाव पंचवण्णाइंपि आहारेंति, विहाणमग्गणं पडुच्च कालवण्णाइंपि आहारेंति जाव सुक्किलाइंपि आहारेंति, जातिं वण्णतो कालवण्णातिं आहारेंति ताइं किं एगगुणकालाइं आहारेंति जाव दसगुणकालाइं आ० संखिज्ज० असंखिज्जगुणकालाइं आ० जाव अनंतगुणकालाइं आ०?, गो० ! एगगुणकालाइंपि आ० जाव अनंतगुणकालाइंपि आ० एवं जाव सुक्किलाइं, एवं गंधतोवि रसतोवि,

-जाइं भावओ फासमंताइं ताइं नो एगफासाइं आ० नो दुफासाइं आ० नो तिफासाइं आहारेंति चउफासाइं आहारेंति, जाव अट्ठफासाइंपि आ०, विहाणमग्गणं पडुच्च कक्खडाइंपि आ० जाव लुक्खाइं, जातिं फासतो कक्खडातिं आ० ताइं किं एगगुणकक्खडाइं आ० जाव अनंतगुणकक्खडाइं आ०?, गो० ! एगगुणकक्खडाइंपि आ० जाव अनंतगुणकक्खडाइंपि आ०, एवं अट्ठवि फासा भाणितव्वा, जाव अनंतगुणलुक्खाइंपि आ०, जातिं भंते! अनंतगुणलुक्खाइं आ० ताइं किं पुट्ठाइं आ० अपुट्ठाइं आ०?, गो० ! पुट्ठाइं आ० नो अपुट्ठाइं आ०, जहा भासुद्देसए जाव नियमा छद्दिसिं आ०,

-ओसन्नं कारणं पडुच्च वण्णओ कालनीलातिं गंधओ दुब्भिगंधातिं रसओ तित्तरसकडुयाइं फासओ कक्खडगुरुयसीयलुक्खाइं तेसिं पोराणे वण्णगुणे गंधगुणे रसगुणे फासगुणे विपरिणामइत्ता परिपीलइत्ता परिसाडइत्ता परिविद्धंसइत्ता अन्ने अपुव्वे वण्णगुणे गंधगुणे रसगुणे फासगुणे उप्पाइत्ता आयसरीरखेत्तोगाढे पोग्गले सव्वप्पणयाए आहारं आहारेंति ।

नेरइया णं भंते ! सव्वओ आहारेंति सव्वओ परिणामंति सव्वओ ऊससंति सव्वओ नीससंति अभिक्खणं आहारेंति अभिक्खणं परिणामंति अभिक्खणं ऊससंति अभिक्खणं नीससंति आहच्च आहारेंति आहच्च परणीमेंति आहच्च ऊससंति आहच्च नीससंति ?, हंता ! गो० ! नेरइया सव्वतो आहारेंति एवं तं चेव जाव आहच्च नी० ।

नेरइया णं भंते ! पोग्गले आहारत्ताते गिण्हंति ते णं तेसिं पोग्गलाणं सेयालंसि कतिभागं आहारेंति कतिभागं आसाएंति ?, गो० ! असंखेज्जतिभागं आ० अनंतभागं अस्साएंति, नेरइया णं भंते ! जे पोग्गले आहारत्ताते गिण्हंति ते किं सव्वे आहारेंति नो सव्वे आहारेंति ?, गो० ! ते सव्वे अपरिसेसए आहारेंति । नेरइया णं भंते ? जे पोग्गले आहारत्ताए गिण्हंति ते णं तेसिं पोग्गलाकीसत्ताए भुज्जो २ परिणामेंति ?, गो० ! सोतिंदियत्ताते जाव फासिंदियत्ताते अनिट्ठत्ताते अकंतत्ताए अनिट्ठत्ताए अमणुण्णत्ताए अमणामत्ताते अनिच्छियत्ताते अभिज्झियत्ताते अहत्ताए नो ऊड्ढत्ताए दुक्खत्ताते नो सुहत्ताते एतेसिं भुज्जो २ परिणमंति ।

वृ. 'नेरइया णं भंते ?' इत्यादि, नैरयिका भदन्त! किं सचित्ताहाराः-सचित्तमाहारयन्तीति सचित्ताहाराः,एवमचित्ताहारा मिश्राहारा इत्यपि भावनीयं, भगवानाह-'गौतमे'त्यादि, इह वैक्रियशरीरिणो वैक्रियशरीरपरिपोषयोग्यान् पुद्गलानाहारयन्ति, ते चाचित्ता एव सम्भवन्ति न जीवपरिगृहीता इत्यचित्ताहारा न सचित्ताहारा नापि मिश्राहाराः, एवमसुरकुमारादयः स्तनितकुमारापर्यवसाना भवनपतयो व्यन्तरा ज्योतिष्का वैमानिकाश्च वेदितव्याः, औदारिकशरीरिणः पुनरौदारिकशरीरपरिपोषयोग्यान् पुद्गलानाहारयन्ति, ते च पृथिवीकायिकादिपरिणामपरिणता इति सचित्ताहारा अचित्ताहारा मिश्राहाराश्च घटन्ते, तथा चाह-'ओरालियसरीरा जाव मणूसा' इत्यादि, औदारिकशरीरिणः पृथिवीकायिकेभ्य आरभ्य यावन्मनुष्याः, किमुक्तं भवति ? -पृथिव्यप्तेजोवायुवनस्पतिरूपा एकेन्द्रिया द्वित्रिचतुःपञ्चेन्द्रिया मनुष्याश्चच एते प्रत्येकं सचित्ताहारा अप्यचित्ताहारा अपि मिश्राहारा अपि वक्तव्याः । उक्तः प्रथमाधिकारः, सम्प्रति द्वितीयादीनष्टमपर्यन्तान् सप्ताधिकारान् चतुर्विंशतिदण्डकक्रमेण युगपदभिधित्सुः प्रथमतो नैरयिकाणामभिदधाति-

'नेरइया ण'मित्यादि, नैरयिकाणमिति वाक्यालङ्कारे, भदन्त ! आहारार्थिनः, काकुवाऽभिधानतः प्रश्नार्थत्वावगतिः, भगवानाह-'हंते'त्यादि, हन्तेत्यनुमतौ अनुमतमेतत्, गौतम आहारार्थिनो नैरयिका इति, यदि आहारार्थिनस्ततो भदन्त ! नैरयिका णमिति पूर्ववत् 'केवइकालस्स'त्ति प्राकृतत्वात् तृतीयार्थे षष्ठी, कियता कालेन आहारार्थः-आहारलक्षणं प्रयोजनं आहाराभिलाष इतियावत् समुत्पद्यते ?, भगवानाह-'गौतम !' इत्यादि, नैरयिकाणां द्विविधो-द्विप्रकारः आहारः, तद्यथा-आभोगनिर्वर्त्तितोऽनाभोगनिर्वर्त्तितश्च, तत्र आभोगनमाभोगः-आलोचनमभिसन्धिरित्यर्थः आभोगेन निर्वर्त्तितः-उत्पादित आभोगनिर्वर्त्तित

आहारयामीतीच्छापूर्वं निर्मापित इतियावत्, तद्विपरीतोऽनाभोगनिर्वर्त्तितः, आहारयामीति विशिष्टेच्छामन्तरेण यो निष्पाद्यते प्रावृट्काले प्रचुरतरमूत्राद्यभिव्यङ्ग्यशीतपुद्गलाद्याहारवत् सोऽनाभोगनिर्वर्त्तित इति भावः,

'तत्थ ण'मित्यादि, तत्र-अनाभोगाभोगनिर्वर्त्तितयोर्मध्ये योऽसावनाभोगनिर्वर्त्तित आहारः 'से ण'मिति पूर्ववत् 'अनुसमयं' प्रतिसमयं समये २ इत्यर्थः, इह च दीर्घकालोपभोग्यस्याहारस्यैकवारमपि ग्रहणे तावन्तं कालमनुसमयं भवति, तत आभवपर्यन्तं सातत्यग्रहणप्रतिपादनार्थमाह-अविरहित आहारार्थः, समुत्पद्यते, अथवा सततप्रवृत्ते आहारार्थेऽपान्तराले चुक्कस्खलितन्यायेन येन कथञ्चित् विरहभावेऽपि लोके तदगणनया अनुसमयमिति व्यवहारः प्रवर्त्तते ततोऽपान्तराले विरहाभावप्रतिपादनार्थमविरहित इत्युक्तं, अनुसमयमविरहितोऽनाभोगनिर्वर्त्तित आहारार्थः समुत्पद्यमानःओजआहारादिना प्रकारेणावसेयः,

'तत्थ ण'मित्यादि, तत्र-आभोगानाभोगनिर्वर्त्तितयोर्मध्ये योऽसावाभोगनिर्वर्त्तितः आहारार्थः सोऽसङ्ख्येयसामयिकः-असंख्येयैः समयैर्निर्वर्त्तितः, सद्भासङ्ख्येयसमनिर्वर्त्तितं तज्जघन्यपदेऽप्यन्तर्मुहूर्त्तिकं भवति न हीनमत आन्तर्मुहूर्त्तिक आहारार्थः समुत्पद्यते, किमुक्तं भवति?,-अन्तर्मुहूर्तं कालं यावत् प्रवर्त्तते न परतो, नैरयिकाणां हि योऽसावाहारयामीत्यभिलाषः स परिगृहीताहारद्रव्यपरिणामेन यज्जनितमतितीव्रतरं दुःखं तद्भावादन्तर्मुहूर्त्तान्निवर्त्तते तत आन्तर्मुहूर्त्तिको नैरयिकाणामाहारार्थः,

'नेरइया ण'मित्यादि, नैरयिका णमिति पूर्ववत् किंस्वरूपमाहारमाहारयन्ति?, भगवान् द्रव्यादिभेदतस्तमाहारयन्तीति निरूपयितुकाम आह-'गोयमे'त्यादि, गौतम! द्रव्यतो-द्रव्यस्वरूपपर्यालोचनायां अनन्तप्रादेशिकानि द्रव्याणि, अन्यथा ग्रहणासम्भवात्, न हि सङ्ख्यातप्रदेशात्मका असङ्ख्यातप्रदेशात्मका वा स्कन्धा जीवस्य ग्रहणयोग्या भवन्ति, क्षेत्रतोऽसङ्ख्येयप्रदेशावगाढानि कालतोऽन्यतरस्थितिकानि, जघन्यस्थितिकानि मध्यमस्थितिकानि उत्कृष्टस्थितिकानि इति भावार्थः, स्थितिरिति चाहारयोग्यस्कन्धपरिणामत्वेनावस्थानमवसेयं, भावतो वर्ण्णवन्ति गंधवन्ति रसवन्ति स्पर्शवन्ति च, प्रतिपरमाण्वेकैकवर्णगन्धरसस्पर्शभावात्,

'जाइं भावतो वण्णमंताइं' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह-'गो० ! ठाणमग्गणं पडुच्चे'त्यादि, तिष्ठन्ति विशेषा अस्मिन्निति स्थानं-सामान्यमेकवर्णं द्विवर्णं त्रिवर्णमित्यादिरूपं तस्य मार्गणं-अन्वेषणं तत्प्रतीत्य सामान्यचिन्तामाश्रित्येति भावार्थः, एकवर्णान्यपि द्विवर्णादीन्यपि इत्यादि सुगमं, नवरं तेषामनन्तप्रादेशिकनां स्कन्धानामेकवर्णत्वं द्विवर्णत्वमित्यादि व्यवहारनयमतापेक्षया, निश्चयनयमतापेक्षया त्वनन्तप्रादेशिकस्कन्धोऽणीयानपि पञ्चवर्ण एव प्रतिपत्तव्यः, 'विहाणमग्गणं पडुच्चे' त्यादि, विविक्तम्-इतरव्यवच्छिन्नं धानं-पोषणं स्वरूपस्य यत् तद्विधानं-विशेषःकृष्णो नील इत्यादिप्रतिनियतो वर्णादिविशेष इतियावत् तस्य मार्गणं प्रतीत्य तानि कालवर्णान्यपि आहारयन्तीत्यादि सुगमं, नवरमेतदपि व्यवहारतः प्रतिपत्तव्यं, निश्चयतः पुनरवश्यं तानि पञ्चवर्णान्येव,

'जाइं वण्णओ कालवण्णाइंपी'त्यादि सुगमं, यावद् 'अनन्तगुणसुक्किल्लाइंपि आहारेंति' एवं गंधरसस्पर्शविषयाण्यपि सूत्राणि भावनीयानि, 'जाइं भंते ! अनंतगुणलुक्खाइं' इत्यादि,

यानि भदन्त! अन्तगुणरूक्षाणि, उपलक्षणमेतत् एकगुणकालादीन्यपि आहारयन्तीति, तानि च भदन्त! किं स्पृष्टानि–आत्मप्रदेशविषयाण्याहारयन्ति उतास्पृष्टानि?, भगवानाह–स्पृष्टानि नो अस्पृष्टानि 'जहा भासुद्देसए वा जाव नियमा छद्दिसिं'ति अत ऊर्ध्वं यथा भाषोद्देशके प्राक् सूत्रमभिहितं तथात्रापि द्रष्टव्यं, तत्र तावत् यावत् 'नियमा छद्दिसिं'ति पदं, तदेवम्,

'जाइं पुट्ठाइं' आहा०! ताइं भंते! किं ओगाढाइं आहा० अनेगाढाइं आहारेंति?, गो० ओगाढाइं आहारेंति नो अणोगाढाइं आहारेंति, जाइं भंते! ओगाढाइं आहारेंति ताइं किं अनंतरोगाढाइं आ० परंपरोगाढाइं आहारेंति?, गो०! अनंतरोगाढाइं आ० नो परंपरोगाढाइं आ०, जाइं भंते अनंतरोगाढाइं आ० ताइं भंते! किं अणूइं आहारेंति बादराइं आ०?, गो०! अणूइंपि आ० बादराइंपि आहा०, जाइं भंते! अणूइंपि आहारेंति बादराइंपि आ० ताइं किं उड्ढं आ० अहे आहा० तिरियं आहारेंति?, गो०! उड्ढंपि आ० अहेवि आ० तिरियंपि आहारेंति,

जाइं भंते! उड्ढंपि आ० अहेवि आहा० तिरियंपि आहारेंति ताइं किं आदिं आ० मज्झे आ० पज्जवसाणे आ०?, गो०! आदिंपि आहारेंति मज्झेवि आ० पज्जवसाणेवि आहारेंति जाइं भंते! आइंपि आहारेंति मज्झेवि आहारेंति पज्जवसाणेवि आहारेंति ताइं भंते! किं सविसए आहारेंति अविसए आ०?, गो०! सविसए आ० नो अविसए आ० जाइं भंते! सविसए आ० ताइं किं आनुपुव्वीए आहारेंति अनानुपुव्वीए आ०?, गो०! आणुपुव्वीए आ० नो अनानुपुव्वीए आ० जाइं भंते! आनुपुव्विं आ० ताइं किं तिदिसिं आहारेंति चउदिसिं आहा० पंचदिसिं आहारेंति छद्दिसिं आहारेंति?, गो०! नियमा छद्दिसिं आ०, 'अस्य व्याख्या–इहात्मप्रदेशैः संस्पर्शनमात्म-परदेशावगाढक्षेत्राद्बहिरपि सम्भवति ततः प्रश्नयति–

'जाइं भंते' इत्यादि, यानि भदन्त! स्पृष्टान्याहारयन्ति तानि किं अवगाढानि–आत्मप्रदेशैः सह एकक्षेत्रावस्थायीनि उत अनवगाढानि–आत्मप्रदेशावगाहक्षेत्राद्बहिरवस्थितानि?, भगवानाह–गौतम! अवगाढान्याहारयन्ति नानावगाढानि, यानि भदन्तावगाढान्याहारयन्ति तानि भदन्त! किमनन्तरावगाढानि, किमुक्तं भवति?–येष्वात्मप्रदेशेषु यान्यव्यवधानेनावगाढानि तैरात्मप्रदेशैस्तान्येवाहारयन्ति उत परम्परावगाढानि–एकद्वित्र्याद्यात्मप्रदेशव्यवहितानि?, भगवानाह–गौतम! अनन्तरावगाढानि आहारयन्ति नो परम्परावगाढानि, यानि भदन्तानन्तरा-वगाढान्याहारयन्ति तानि किमणूनि–स्तोकान्याहारयन्ति उत बादराणि–प्रभूतप्रदेशोपचितानि भगवानाह–गौतम! अणून्यप्याहारयन्ति बादराण्यप्याहारयन्ति, इहाणुत्वबादरत्वे तेषामेवाहार-योग्यानां स्कन्धानां प्रदेशस्तोकत्वबाहुल्यापेक्षया वेदितव्ये इति,

यानि भदन्त! अणून्यप्याहारयन्ति तानि भदन्त! किमूर्ध्वं–ऊर्ध्वप्रदेशस्थितान्याहारयन्ति अधस्तिर्यग्वा, इह ऊर्ध्वाधस्तिर्यकत्वं यावति क्षेत्रे नैरयिकोऽवगाढः तावत्येव क्षेत्रे तदपेक्षया परिभावनीयं, भगवानाह–गौतम! ऊर्ध्वमप्याहारयन्ति–ऊर्ध्वप्रदेशावगाढान्यप्याहारयन्ति एवमधोऽपि तिर्यगपि, यानि भदन्त! ऊर्ध्वमप्याहारयन्ति अधोऽप्याहारयन्ति तिर्यग्प्याहारयन्ति तानि किमादावाहारयन्ति मध्ये आहारयन्ति पर्यवसाने आहारयन्ति, अयमत्राभिप्रायः–

नैरयिका हि अनन्तप्रदेशिकानि द्रव्याण्यन्तर्मुहूर्तं कालं यावत् उपभोगोचितानि गृह्णन्ति, ततः संशयः किमुपभोगोचितस्य कालस्यान्तर्मुहूर्तप्रमाणस्यादौ–प्रथमसमये आहारयन्ति उत

मध्ये--मध्येषु समयेषु आहोश्चित्पर्यवसाने-पर्यवसानसमये ?, भगवानाह-गौतम ! आदावपि मध्येऽपि पर्यवसानेऽप्याहारयन्ति, किमुक्तं भवति ?-उपभोगोचितस्य कालस्यान्तर्मुहूर्त्तप्रमाणस्यादिमध्यावसानेषु समयेष्वाहारयन्तीति, यानि भदन्त ! आदावपि मध्येऽपि पर्यवसानेऽप्याहारयन्ति तानि भदन्त ! किं स्वविषयाणिखोचिताहारयोग्यानि आहारयन्ति उत अविषयाणिखोचिताहारायोग्यान्याहारयन्ति ?, भगवानाह-गौतम ! स्वविषयाण्याहारयन्ति नो अविषयाण्याहारयन्ति,

यानि भदन्त ! स्वविषयण्याहारयन्ति तानि भदन्त ! किमानुपूर्व्याआहारयन्ति अनानुपूर्व्या आनुपूर्वीनाम यथासन्नं यद्विपरता अनानुपूर्वी, भगवानाह-गौतम ! आनुपूर्व्या, सूत्रे द्वितीय तृतीयार्थे वेदितव्या प्राकृतत्वात्, यथा आचाराङ्गे 'अगणिं च पुढा' इत्यत्र, आहारयन्ति नो अनानुपूर्व्या, ऊर्ध्वमधस्तिर्यग्वा यथासन्नं नातिक्रम्याहारयन्तीति भावः, यानि भदन्त ! आनुपूर्व्या आहारयन्ति तानि किं 'तिदिसिं'ति तिस्रोदिशः समाहतास्त्रिदिक् तस्मिन् व्यवस्थितान्याहारयन्ति चतुर्दिशि पञ्चदिशि षड्दिशि वा, इह लोकनिष्कुटपर्यन्ते जघन्यपदे त्रिदिग्व्यवस्थितमेव प्राप्यते न द्विदिग्व्यवस्थितमेकदिग्व्यवस्थितं वा अतस्त्रिदिश आरभ्य प्रश्नःकृतः, भगवानाह-गौतम ! नियमात् षड्दिशि व्यवस्थितान्याहारयन्ति, नैरयिका हि त्रसनाड्या मध्ये व्यवस्थिताः, तत्र चावश्यं षड्दिक्संभव इति,

'ओसन्नकारणं पडुच्च' इत्यादि, ओसन्नशब्दो बाहुल्यावाची, यथा 'ओसन्नं देवा सायावेयणं वेदयन्ती'त्यत्र, ओसन्नकारणं-बाहुल्यकारणं प्रतीत्य, किं तद्बाहुल्यकारणमिति चेत्, उच्यते, अशुभानुभाव एव, तथापि प्रायो मिथ्यादृष्टयः कृष्णागदीन्याहारयन्ति न तु भविष्यत्तीर्थकरादयःतत ओसन्नेत्युक्तं, वर्णतः कालनीलानि गन्धतो दुरभिगन्धानि, रसतस्तिक्तकटुकानि स्पर्शतः कर्कशगुरुशीतरूक्षाणि इत्यादि, तेषामाहार्यमाणानां पुद्गलानां 'पुराणान्' अग्रेतनान् वर्णगुणान् गन्धगुणान् रसगुणान् स्पर्शगुणान् 'विपरिणामइत्ता परिवीलइत्ता परिसाडइत्ता परिविद्धंसइत्ता' एतानि चत्वार्यपि पदानि एकार्थिकानि विनाशार्थप्रतिपादकानि नानादेशजविनेयानुग्रहार्थमुपात्तानि, विनाश्य किमित्याह-अन्यान् अपूर्वान् वर्णगुणान् गन्धगुणान् रसगुणान् स्पर्शगणान् उत्पाद्य आत्मसरीरक्षेत्रावगाढान् पुद्गलान् 'सव्वप्पणया' सर्वात्मना सर्वैरेवात्मप्रदेशैराहारमाहाररूपान् आहारयन्ति,

'नेरइया णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, 'नेरइया णं भंते ! जे पोग्गला' इत्यादि, नैरयिका णमितिपूर्ववत्, भदन्त ! यान् पुद्गलान् आहारतया गृह्णन्ति नैरयिकाः तेषां गृहीतानां पुद्गलानां 'सेकालंसि' एष्यत्काले ग्रहणकालोत्तरकालमित्यर्थः 'कइभागं'ति कतिथं भागमाहारयन्ति-आहारतयोपभुञ्जते ?, तथा 'कतिभागं' कतिथं भागमाहार्यमाणपुद्गलानामास्वादं गृह्णन्ति, नहि सर्वे पुद्गला आहार्यमाणा आस्वादमायान्तीति पृथक् प्रश्नः, भगवानाह-गौतम असङ्ख्येयं भागमाहारयन्ति, अन्ये तु गवादिप्रथमबृहद्ग्रासग्रहण इव परिशटन्ति, आहार्यमाणानां पुद्गलानामनन्तभागमास्वादयन्ति, शेषास्त्वनासादिता एव शरीरपरिणाममापद्यन्ते इति,

'नेरइया णं भंते !' इत्यादि, नैरयिकाः णमिति पूर्ववत् यान् पुद्गलान् आहारतया गृह्णन्ति, इह ग्रहणं विशिष्टमवसेयं, ततो ये उज्झितशेषाः केवला आहारपरिणामयोग्य एवावतिष्ठन्ते तेऽत्रा-

द्वारतया गृह्यमाणाः पृथग् द्रष्टव्याः, अन्यथा निर्वचनसूत्रमपेक्ष्य पूर्वापरविरोधप्रसङ्गो, न च भगवद्वचने विरोधसम्भावनाऽस्ति, तत इदमेव व्याख्यानं सम्यक्, अत एवंविधपूर्वापरविरोधाशङ्काव्युदासार्थं पूर्वसूरिभिः कालिकसूत्रस्यानुयोगः कृतः, उक्तं च–

॥ १ ॥ "जं जह सुत्ते भणियं तहेव तं जइ वियालणा नत्थि।
किं कालियाणुजोगो दिट्ठो दिट्ठिप्पहाणेहिं ? ॥"

तान् किं सर्वान् आहारयन्ति उत नोसर्वान् सर्वैकदेशभूतान् ?, भगवानाह–तान् सर्वान्–अपरिशेषानाहारयन्ति, उज्झितशेषाणामेव केवलानामाहारपरिणामयोग्यानां गृहीतत्वात्, 'नेरइयाण'मित्यादि, नैरयिकाः णमितिपूर्ववत् यान् पुद्गलान् आहारतया गृह्णन्ति ते पुद्गलाः णमिति पूर्ववत् ते तेषां नैरयिकाणां कीदृक्त्या–किंस्वरूपतया भूयो भूयः परिणमन्ते ?, भगवानाह–गौतम श्रोत्रेन्द्रियतया यावत्करणात् चक्षुरिन्द्रियतया घ्राणेन्द्रियतया जिह्वेन्द्रियतयेति परिग्रहः, स्पर्शनेन्द्रियतया, इन्द्रियरूपतयापि परिणममाना न शुभरूपाः किन्त्वेकान्ताशुभरूपाः, यत आह–

'अनिट्ठत्ताते' इत्यादि, इष्ट–मनसा इच्छाविषयीकृताः, यथा शोभनमिदं जातं यदित्थमिम् परिणता इति, तद्विपरीता अनिष्टास्तद्भावस्तत्ता तया, इह किञ्चित् परमार्थतः शुभमपि केषाञ्चिदनिष्टं भवति यथा मक्षिकाणां चन्दनकर्पूरादि तत आह–'अकंतत्ताए' न कान्ताः–कमनीया अकान्ता अत्यन्ताशुभवर्णोपेतत्वात्, अत एवाप्रियतया न प्रिया अप्रियाः, दर्शनमात्रकालेऽपि न प्रियबुद्धिमात्मन्युत्पादयन्तीति भावः, तद्भावोऽप्रियता तया, 'असुभत्ताए' इति न शुभा अशुभा अशुभवर्णगन्धरसस्पर्शात्मकत्वात् तद्भावस्तत्ता तया, 'अमणुन्नत्ताए' इति न मनोज्ञा अमनोज्ञाः, विपाककाले दुःखजनकतया न मनःप्रह्लादहेतव इति भावः, तद्भावस्तत्ता तया, 'अमणामत्ताए' भोज्यतया मनः आप्नुवन्तीति मनआपाः, प्राकृतत्वाद्य पकारस्य मकारत्वे मणाम इति सूत्रे निर्देशः, न मनआपा अमनआपा, न जातुचिदपि भोज्यतया जन्तूना मनआपीभवन्तीति भावस्तद्भावस्तत्ता तया, अत एव 'अनिच्छियत्ताए' इति अनीप्सिततया भोज्यतया स्वादितुमीष्ट ईप्सिता न ईप्सिता अनीप्सिता- स्तद्भावस्तत्ता तया, 'अभिज्झियत्ताए' अभिध्यानमभिध्या, अभिलाष इत्यर्थः,

अभिध्या सञ्जाता एषामिति अभिध्यितास्तारकादिदर्शनादितप्रत्ययः तद्भावस्तत्ता तया, किमुक्तं भवति ? –ये गृहीता आहारतया पुद्गला न ते तृप्तिहेतवोऽभूवन्निति न पुनरभिलषणीयत्वेन परिणमन्ते, तथा 'अहत्ताए' इति अधस्तया, गुरुपरिणामतयेति भावः, नो ऊर्ध्वतया–लघुपरिणामतया, अत एव दुःखतया गुरुपरिणामपरिणतत्वात्, न सुखतया लघुपरिणामपरिणतत्वाभावात्, ते पुद्गलास्तेषां नैरयिकाणां भूयो भूयः परिणमन्ते ! एतान्येव आहारार्थिन इत्यादीनि सप्त द्वाराणि असुरकुमारादिषु भवनपतिषु चिचिन्तयिषुरिदमाह–

'जहा नेरइयाण'मित्यादि, यथा नैरयिकाणां तथा असुरकुमाराणामपि भणितव्यं, यावत् 'तेसिं भुज्जो २ परिणमन्ती'ति पर्यन्तपदं, तत्र नैरयिकसूत्रादस्य सूत्रस्य विशेषमुपदर्शयति–'तत्थ णं जे से' इत्यादि, एवं चोपदर्शितं सूत्रं न मन्दमतीनां यथास्थितं प्रतीतिमागच्छति ततस्तदनुग्रहाय सूत्रमुपदर्श्यते।

मू. (५५३) असुरकुमारा णं भंते ! आहारट्ठी !, हंता ! आहारट्ठी, एवं जहा नेरइयाणं तहा असुरकुमारेणवि भाणितव्वं, जाव तेसिं भुज्जो २ परिणमंति,

तत्थ णं जे से आभोगनिव्वत्तिते से णं जहन्नेणं चउत्थभत्तस्स उक्कोसेणं सातिरेगवाससहस्सस्स आहारट्ठे समुप्पज्जइ, ओसण्णं कारणं पडुच्च वण्णतो हालिद्दसुक्किलातिं गंधतो सुब्भिगंधातिं रसतो अंबिलमहुरातिं फासओ मउयलहुयनिद्धुण्हातिं,

तेसिं पोराणे वण्णगुणे जाव फासिंदियत्ताते जाव मणामत्ताते इच्छियत्ताते भिज्झियत्ताते उद्धत्ताते नो अहत्ताए सुहत्ताए नो दुहत्ताए एतेसिं भुज्जो २ परिणमंति, सेसं जहा नेरइयाणं, एवं जाव थणियकुमाराणं, नवरं आभोगनिव्वत्तिते उक्कोसेणं दिवसपुहुत्तस्स आहारट्ठे समुप्पज्जति

मू. 'असुरकुमारा णं भंते! आहारट्ठी ?, हंता आहारट्ठी, असुरकुमाराणं भंत! केवइकालस्स आहारट्ठे समुप्पज्जइ', अत्र सप्तम्यर्थे षष्ठी, कियति काले अतिक्रान्ते सति भूय आहारार्थः समुत्पद्यते इत्यर्थः, ? 'असुरकुमारा णं दुविहे आहारे पं० तंजहा--आभोगनिव्वत्तिए अनाभोगनिव्वत्तिए य, तत्थ णं जे से अनाभोगनिव्वत्तिए से णं अनुसमयमविरहिए आहारट्ठे समुप्पज्जइ, तत्थ णं जे से आभोगनिव्वत्तिए से णं जहन्नेणं चउत्थभत्तस्स उक्कोसेणं साइरेगस्स वाससहस्सस्स आहारट्ठे समुपज्जइ' तत्र 'चउत्थभत्तस्सेति' सप्तम्यर्थे षष्ठी, चतुर्थभक्ते आगमिकीयं संज्ञा, एकस्मिन् दिवसेऽतिक्रान्ते इत्यर्थः, भूयो जघन्येनाहारार्थः समुत्पद्यते, एतच्च दशवर्षसहस्रायुषां प्रतिपत्तव्यमुत्कर्षतः सातिरेके--अभ्यधिके वर्षसहस्रेऽतिक्रान्ते, एतच्च सागरोपमायुषामवसेयं,

'असुरकुमाराणं भंते! किमाहारमाहारयन्ति ?, गो० ! दव्वतोऽनंतप्पएसियाइं खेत्तओ असंखेज्जपएसोगाढाइं कालओ अन्नयरट्ठिइयाइं भावओ वण्णमंताइं गंधमंताइं रसमंताइं फासमंताइं जाव नियमा छद्दिसिं आहारेंति, ओसन्नं कारणं पडुच्च वण्णओ हालिद्दसुक्किलाइं, गंधओ सुरभिगंधाइं, रसओ अंबिलमहुराइं फासओ मउयलहुनिद्धुण्हाइं, तेसिं पोराणे वण्णगुणे गंधगुणे रसगुणे फासगुणे जाव इच्छियत्ताए अभिज्झियत्ताए उद्धत्ताए नो अहत्ताए सुखत्ताए नो दुहत्ताए य तेसिं भुज्जो २ परिणमंति', यथा चासुरकुमाराणां सूत्रमुक्तं तथा नागकुमारादीनामपि स्तनितकुमारपर्यवसानानां वक्तव्यं, नवरमाभोगनिर्वर्त्तिताहारार्थचिन्तायामुत्कर्षाभिधानावसरे 'उक्कोसेणं दिवसपुहुत्तस्स आहारट्ठे समुप्पज्जइ' इति वक्तव्यं, एतच्च पल्योपमासङ्ख्येयभागायुषां तदधिकायुषां चावसेयं, शेषं तथैव, तथा चाह०,--'एवं जाव थणियकुमाराण' मित्यादि।

सम्प्रति पृथिवीकायिकानामेतान् सप्ताधिकारान् चिन्तयितुकाम आह--

मू. (५५४) पुढविकाइया णं भंते! आहारट्ठी ?, हंता! आहारट्ठी, पुढविकाइया णं भंते केवतिकालस्स आहारट्ठे समुप्पज्जति ?, गो० ! अनुसमयमविरहिते आहारट्ठे समुप्पज्जइ,

पुढविकाइया णं भंते ! किमाहारमाहारेंति, एवं जहा नेरइयाणं जाव ताइं कतिदिसिं आहारेंति ?, गो० ! निव्वाघातेणं छद्दिसिं वाघायं पडुच्च सिय तिदिसिं सिय चउदिसिं सिय पंचदिसिं, नवरं ओसन्नकारणं न भण्णति, वण्णओ कालनीललोहितहालिद्दसुक्किलातिं गंधतो सुब्भिगंध-दुब्भिगंधातिं रसतो तित्तरसकडुयरसकसायरसअंबिलमहुराइं फासतो कक्खडफासमउयगुरु-लहुयसीतउण्हनिद्धलुक्खातिं तेसिं पोराणे वण्णगुणे सेसं जहा नेरइयाणं जाव आहच्च नीससंति,

पुढविकाइया णं भंते ! जे पोग्गले आहारत्ताते गिण्हंति तेसिं भंते ! पोग्गलाणं सेयालंसि कतिभागं आहारेंति कतिभागं आसाएंति ?, गो० ! असंखेज्जतिभागं आहारेंति अनंतभागं आसाएंति, पुढविकाइया णं भंते ! जे पोग्गले आहारत्ताते गिण्हंति ते किं सव्वे आहारेंति नोसव्वे आहारेंति जहेव नेरइया तहेव,

पुढविकाइया णं भंते! जे पोग्गले आहारत्ताते गिण्हंति ते णं तेसिं पुग्गला कीसत्ताए भुज्जो २ परिणमंति?, गो० ! फासिंदियवेमायत्ताते भुज्जो २ परिणमंति, एवं जाव वणप्फइकाइया

वृ. 'पुढविकाइया णं भंते!' इत्यादि सर्वं पूर्ववद् भावनीयं, नवरं 'निव्वाघाएणं छद्दिसि'मित्यादि, व्याघातो नाम अलोकाकाशएन प्रतिस्खलनं, व्याघातस्याभावो निर्व्याघातं 'शब्दे यथावदव्ययं पूर्वपदार्थे नित्यमव्ययीभाव' इत्यव्ययीभावः 'तेन वा तृतीयाया' इति विकल्पेन अम्विधानात् पक्षेऽत्रामभावः, नियमादवश्यंतया षड्दिशि व्यवस्थितानि, षड्भ्यो दिग्भ्य आगतानि द्रव्याण्याहारयन्तीति भावः, व्याघातं पुनःप्रतीत्य लोकनिष्कुटादौ स्यात्–कदाचित्त्रिदिशि–तिसृभ्यो दिग्भ्य आगतानि कदाचिच्चतुर्दिग्भ्यः कदाचित्पञ्चदिग्भ्यः, काऽत्र भावनेति चेत्, उच्यते,

इह लोकनिष्कुटे पर्यन्ताधस्त्यप्रतराग्नेयकोणावस्थितो यदा पृथिवीकायिको वर्त्तते तदा तस्याधस्तादलोकेन व्याप्तत्वात् अधोदिक्पुद्गलाभावः, आग्नेयकोणावस्थितत्तावत् पूर्वदिक्पुद्गलाभावो दक्षिणदिक्पुद्गलाभावश्च, एवमधःपूर्वदक्षिणरूपाणां तिसृणां दिशामलोकेन व्याघानात् ता अपास्य या परिशिष्टा ऊर्ध्वा अपरा उत्तरा च दिगव्याहता वर्त्तते तत आगतान् पुद्गलान् आहारयति, यदा पुनः स एव पृथिवीकायिकः पश्चिमां दिशं अमुञ्चन् वर्त्तते तदा पूर्वदिगभ्यधिका जाता द्वे च दिशौ दक्षिणाधस्त्यरूपे अलोकेन व्याहते इति स चतुर्दिगागतान् पुद्गलानाहारयति, यदा पुनरूर्ध्वं द्वितीयादिप्रतरगतपश्चिमदिशमवलम्ब्य तिष्ठति तदा अधस्त्यापि दिगभ्याधिका लभ्यते केवलदक्षिणैका पर्यन्तवर्त्तिनी अलोकेन व्याहतेति पञ्चदिगागतान् पुद्गलानाहारयतीति, शेषं सूत्रं समस्तमपि पूर्ववद् भणनीयं, यस्तु विशेषस्तमुपदर्शयति–नवरं 'उस्सन्नकारणेणं ण हवइ' इत्यादि सुगमं,

'फासिंदियवेमायत्ताए' इति विषमा मात्रा विमात्रा तस्या भावो विमात्रता तया इष्टानिष्टनानभेद- तयेति भावो, न तु नारकाणामेकान्ताशुभतया सुराणांच शुभतयेवेति, एवं 'जाव वणस्सइकाइ- याणं'ति यथा पृथिवीकायिकाना सूत्रमुक्तमेवमप्तेजोवायुवनस्पतीनामपि भणनीयं, सर्वेषामपि सकललोकव्यापितया विशेषाभावात्।

मू. (५५५) बेइंदिया णं भंते! आहारट्ठी?, हंता! आहारट्ठी, बेइंदियाणं भंते! केवतिकालस्स आहारट्ठे समुप्पज्जति?, जहा नेरइयाणं, नवरं तत्थ णं जे से आभोगनिव्वत्तिते से णं असंखिज्जसमइए अंतोमुहुत्तिए वेमायाए आहारट्ठे समुप्पज्जति, सेसं जहा पुढविकाइयाणं, जाव आहच्च नीससंति, नवरं नियमा छद्दिसिं, बेइंदियाणं भंते!० पुच्छा, गो० ! जे पोग्गले आहारत्ताते गिण्हंति ते णं तेसिं पुग्गलाणं सियालंसि कतिभागं आहारेंति कतिभागं आसाएंति, एवं जहा नेरइयाणं,

बेइंदियाणं भंते! जे पोग्गला आहारत्ताए गिण्हंति ते किं सव्वे आहारेंति नो सव्वे आहारेंति गो० ! बेइंदियाणं दुविधे आहारे पं०, तं०–लोमाहारे य पक्खेवाहारे य, जे पोग्गले लोमाहारत्ताए गिण्हंति ते सव्वे अपरिसेसे आहारेंति, जे पोग्गले पक्खेवाहारत्ताए गेण्हंति तेसिमसंखेज्जतिभागमाहारेंति अनेगाइं च णं भागसहस्साइं अफासाइज्जमाणाणं अनासाइज्जमाणाणं विद्धंसमागच्छंति,

एतेसि णं भंते! पोग्गलाणं अनासाइज्जमाणाणं अफासाइज्जमाणाण य कयरे २ हिंतो अप्पा वा ४, गो० ! सव्वत्थोवा पोग्गला अनासाइज्जमाणा अफासाइज्जमाणा अनंतगुणा, बेइंदियाणं भंते! जे पोग्गला आहारत्ताते पुच्छा, गो० ! जब्भिदिय० फासिंदियवेमायत्ताए तेसिं भुज्जो २

परिणमंति, एवं जाव चउरिंदिया, नवरं नेगाइं च णं भागसहस्साइं अनाघाइज्जमाणाइं अनासाइज्जमाणाइं अफासाइज्जमाणाइं विद्धंसमागच्छंति,

एतेसि णं भंते ! पोग्गलाणं अनाधाइज्जमाणा णं अनासाइज्जमाणाणं अफासाइजजमाणाण य कयरे२हिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा पोग्गला अनाधाइज्जमाणा अनासाइज्जमाणा अनंतगुणा अफासाइज्जमाणा अनंतगुणा,

तेइंदियाणं भंते ! जे पोग्गला पुच्छा, गो० ! ते णं पोग्गला घाणिंदिय० जिब्भिंदिय० फासिंदियवेमायत्ताए तेसिं भुज्जो २ परिणमंति, चउरिंदियाणं चक्खिंदिय० घाणिंदिय० जिब्भिंदिय० फासिंदियवेमायत्ताए तेसिं भुज्जो २ परिणमंति, सेसं जहा तेइंदियाणं, पंचिंदियतिरिक्खजोणिया जहा तेइंदियाणं, नवरं तत्थ णं जे से आभोगनिव्वत्तिते से जहन्नेणं अंतोमुहुत्तस्स उक्को० छट्ठभत्तस्स आहारट्ठ समुप्पज्जति, पंचिंदियतिरिक्खजोणियाणं भंते ! जे पोग्गला आहा० पुच्छा, गो० ! सोतिंदिय० चक्खि-दिय० घाणिंदिय० जिब्भिंदिय० फासिंदियवेमायत्ताए भुज्जो २ परिणमंति, मणूसा एवं चेव, नवरं आभोगनिव्वत्तिते जह० अंतोमुहुत्तस्स उक्को० अट्ठमभत्तस्स आहारट्ठे समुप्पज्जति, वाणमंतरा जहा नागकुमारा, एवं जोतिसियावि, नवरं आभोगनिव्वत्तिते जह० दिवसपुहुत्तस्स उ० दिवस-हुत्तस्स आहारट्ठे समुप्पज्जइ, एवं वेमाणियावि, नवरं आभोगनिव्वत्तिए ज० दिवसपुहुत्तस्स उ० तेत्तीसाए वाससहस्साणं आहारट्ठे समुप्पज्जति, सेसं जहा असुरकुमाराणं जाव एतेसिं भुज्जो २ परिणमंति,

सोहम्मे आभोगनिव्वत्तिते ज० दिवसपुहुत्तस्स उक्को० दोण्हं वाससहस्साणं आहारट्ठे सं०, ईसाणेणं पुच्छा, गो० ! ज० दिवसपुहुत्तस्स सातिरेगस्स उ० सातिरेगं दोण्हं वाससहस्साणं, सणंकुमाराणं पुच्छा, गो० ! ज० दोण्हं वाससहस्साणं उ० सत्तण्हं वाससहस्साणं, माहिंदे पुच्छा, गो० ! जहन्नेणं दोण्हं वाससहस्साणं सातिरेगाणं उक्को० सत्तण्हं वाससहस्साणं सातिरेगाणं, बंभलोए पुच्छा, गो० ! ज० सत्तण्हं वाससहस्साणं उ० दसण्हं वाससह०,

लंतए णं पुच्छा, गो० ! ज० दसण्हं वाससह० उ० चउदसण्हं वाससह०, महासुक्केणं पुच्छा गो० ! ज० चउदसण्हं वाससह० उक्को० सत्तरसण्हं वाससह०, सहस्सारे पुच्छा, गो० ! जह० सत्तरसण्हं वाससह० उ० अट्ठारसण्हं वाससह०, आणए णं पुच्छा, गो० ! ज० अट्ठारसण्हं वाससह० उ० एगूणवीसाए वाससहस्साणं, पाणए णं पुच्छा, गो० ! ज० एगूणवीसाए वास० उ० वीसाए वाससहस्साणंस आरणे णं पुच्छा, गो० ! ज० वीसाए वाससह० उक्को० एक्कवीसाए वाससह०, अच्चुए णं पुच्छा गो० ! ज० एक्कवीसाए वाससह० उक्को० बावीसाए वा०,

हिट्ठिमहिट्ठिमगेविज्जगाणं पुच्छा, गो० ! ज० बावीसाए वा० उक्को० तेवीसाए वा०, एवं सव्वत्थ सहस्साणि भाणियव्वाणि, जाव सव्वट्ठे, हिट्ठिममज्झिमगाणं पुच्छा, गो० ! ज० तेवीसाए उ० चउवीसाए, हेट्ठिमउवरिमाणं पुच्छा, गो० ! ज० चउवीसाए उ० पणवीसाए, मज्झिमहेट्ठिमाणं पुच्छा, गो० ! ज० पणवीसाए उक्को० छव्वीसाए, मज्झिममज्झिमाणं पुच्छा, गो० ! ज० छव्वीसाए उ० सत्तावीसाए, मज्झिमउवरिमाणं पुच्छा, गो० ! ज० सत्तावीसाए उ० अट्ठावीसाए, उवरिम-हेट्ठिमाणं पुच्छा, गो० ! ज० अट्ठावीसाए उ० एगूणतीसाएस उवरिमज्झिमाणं पुच्छा, गो० ! ज० एगूणतीसाए उ० तीसाए, उवरिमउवरिमाणं पुच्छा, गो० ! ज० तीसाए उ० एगतीसाए,

विजयवेयजयंतजयंतअपराजियाणं पुच्छा, गो० ! ज० एगतीसाए उक्को० तेत्तीसाए,

सव्वट्ठगसिद्धदेवाणं पुच्छा, गो० ! अजहन्नमणुक्कोसेणं तेत्तीसाए वाससहस्साणं आहारट्ठे समुप्पज्जति

वृ. 'बेइंदिया णं भंते !' इत्यादि सुगमं, नवरं 'लोमाहारे पक्खेवाहारे' इति लोमभिराहारो लोमाहारः प्रक्षिप्यतेऽर्थात् मुखे इति प्रक्षेपः स चासावाहारश्च प्रक्षेपाहारः, तत्र यः स्वल्पोघतो वर्षादिषु पुद्गलप्रवेशो मूत्रादिगम्यः स लोमाहारः, कावलिकस्तु प्रक्षेपाहारः, तत्र यान् पुद्गलान् लोमाहारतया गृह्णाति तान् सर्वान्-अपरिशेषानाहारयन्ति, तेषां तथा २ स्वभावत्वात्, यान् पुद्गलान् प्रक्षेपाहारतया गृह्णन्ति तेषामसङ्ख्येयतमं भागमाहारयन्ति, अनेकानि पुनर्भागसहस्राणि– बहवोऽसङ्ख्येया भागा इति अस्पृश्यमानानामनास्वाद्यमानानां विध्वंसमागच्छन्ति, किमुक्तं भवति बहूनि द्रव्याण्यन्तर्बहिश्च अस्पृष्टान्येवानास्वादितान्येव च विध्वंसमायान्ति, नवरं यथायोगं केचिदतिस्थौल्यतः केचिदतिसौक्ष्म्यत इति, सम्प्रत्यस्पृश्यमाननानामनास्वाद्यमानानां च परस्परमल्पबहुत्वमभिधित्सुराह–

'एएसि णं भंते ! पुग्गलाणं अनासाइज्जमाणाण'मित्यादि, इह एकैकस्मिन् स्पर्शयोग्ये भागेऽनन्ततमो भाग आस्वाद्यो भवति, ततो येऽनास्वाद्यमानः पुद्गलास्ते स्तोका एव, अस्पृश्यमानपुद्गलापेक्षया तेषामनंतभागवर्त्तित्वात्, अस्पृश्यमानास्तु पुद्गला अनन्तगुणाः, 'जिब्भिंदियफासिंदियवेमायत्ताए' इति विमात्राऽत्रापि प्राग्वद् भावनीया,

'एवं जाव चउरिंदिया' एवं–द्वीन्द्रियोक्तप्रकारेण सूत्रं तावद् वक्तव्यं यावच्चतुरिन्द्रियाः– चतुरिन्द्रियगतं सूत्रं, प्रायः समानवक्तव्यत्वात्, यस्तु विशेषः स उपदर्श्यते–'नवर'मित्यादि, यान् पुद्गलान प्रक्षेपाहारतया गृह्णन्ति तेषां पुद्गलानामे कमसङ्ख्येयतमं भागमाहारयन्ति अनेकानि पुनर्भागसहस्राणि सङ्ख्यातीता असङ्ख्येयभागा इत्यर्थः अनाघ्रायमाणानि अस्पृश्यमाणानि अनास्वाद्यमानानि विध्वंसमागच्छन्ति, तानि च यथायोगमतिस्थौल्यतोऽतिसौक्ष्म्यतश्च वेदितव्यानि,

अत्रैवाल्पबहुत्वमाह– 'एएसि णं भंते !' इत्यादि, इह एकैकस्मिन् भागे स्पर्शयोग्येऽनन्तमो भागः आस्वादयोग्यो भवति, तस्याप्यनन्तमो भाग आघ्राणयोग्यः, ततो यथोक्तमल्पबहुत्वं भवति, शेषं सर्वं सुगमं, पञ्चेन्द्रियसूत्रे–'जहन्नेणं अंतोमुहुत्तस्से'ति षष्ठयाःसप्तम्यर्थत्वादन्तर्मुहूर्ते गते सति भूय आहारार्थः समुत्पद्यते, उत्कर्षतः षष्ठभक्तेऽतिक्रान्ते, एतच्च देवकुरूत्तरकुरुतिर्यक्पञ्चेन्द्रियापेक्षया द्रष्टव्यं, मनुष्यसूत्रे 'उक्कोसेणं अट्ठमभत्तस्से'ति उत्कर्षतोऽष्टमभक्तेऽतिक्रान्ते, एतच्च तास्वेव देवकुरुत्तर- कुरुषु द्रष्टव्यं, व्यन्तरसूत्रे नागकुमारसूत्रवत्, ज्योतिष्कसूत्रमपि तथैव, यस्तु विशेषस्तमुपदर्शयति '–नवलरं जहन्नेणवि दिवसपुहुत्तस्स उक्कोसेणवि दिवसपुहुत्तस्स'त्ति, ज्योतिष्का हि जघन्यतोऽपि पल्योपमाष्टभागप्रमाणायुषस्ततस्तेषां जघन्यपदेऽप्युत्कृष्टपदेऽपि दिवसपृथक्त्वेऽतिक्रान्ते भूयआहारार्थः समुत्पद्यते, पल्योपमाष्टभागायुं च स्वरूपत एव दिवसपृथक्त्वातिक्रमे भूय आहारार्थः समुत्पद्यते,

वैमानिकसूत्रे 'नवरमाभोगनिव्वत्तिए जहन्नेणं दिवसपुहुत्तस्स' इति, एतत्पल्योपमाद्यायुषामवसेयं, 'उक्कोसेणं तेत्तीसाए वाससहस्साणं'ति एतदनुत्तरसुराणामवसेयं, इह यस्य यावन्ति सागरोपमाणि स्थितिस्तस्य तावत्सु वर्षसहस्रष्वतिक्रान्तेषु भूय आहारार्थः समुत्पद्यते, ततोऽमुं न्यायमाश्रित्य सौधर्मेशानादिदेवलोकेषु जघन्यत उत्कर्षतश्च स्थितिपरिमाणं परिभाव्य वैमानिकसूत्रं सकलमपि स्वयं विज्ञेयमिति ।

सम्प्रत्येकेन्द्रियशरीरादीनामधिकारमभिधित्सुराह–

मू. (५५६) नेरइयाणं भंते! किं एगिंदियसरीराइं आहारेंति जाव पंचिंदियसरीराइं आहारेंति गो०! पुव्वभावपन्नवणं पडुच्च एगिंदियसरीराइंपि आहारेंति जाव पंचेंदिय०, पडुप्पन्न- भावपन्नवणं पडुच्च नियमा पंतिंदियसरीरातिं आ०, एवं जाव थणियकुमारा,

पुढविकाइयाणं पुच्छा, गो० ! पुव्वभावपन्नवणं पडुच्च एवं चेव, पडुप्पण्णभावपन्नवणं पडुच्च नियमा एगिंदियसरीरातिं, बेइंदिया पुव्वभावपन्नवणं पडुच्च एवं चेव, पडुप्पन्नभावपन्नवणं प० नियमा बेइंदियाणं सरीरातिं आ०, एवं जाव चउरिंदिया ताव पुव्वभावपन्नवणं पडुच्च, एवं पडुप्पन्नभावपन्नवणं पडुच्च नियमा [illegible] तइंदियाइं सरीराइं आहारेंति सेसं जहा नेरइया, जाव वेमाणिता,

नेरइया णं भंते! किं लोमाहार पक्खेवाहारा!, गो० ! लोमाहारा नो पक्खेवाहारा, एवं एगिंदिया सव्वदेवा य भाणितव्वा, बेइंदि० जाव मणूसा लोभाहारावि पक्खेवाहारावि।

वृ. 'नेरइया णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, निर्वचनसूत्रमाह-'गोयमे' इत्यादि, पूर्वः-अतीतो भावःपूर्वभावःतस्य प्रज्ञापना-प्ररूपणा तां प्रतीत्य एकेन्द्रियशरीराण्यपि यावत्करणात् द्वित्रिचतुरिन्द्रियशरीरपरिग्रहः, पञ्चेन्द्रियशरीराण्यप्याहारयन्ति, इयमत्र भावना-यदा तेषामाहार्यमाणानां पुद्गलानामतीतो भावः परिभाव्यते तदा ते केचित् कदाचित् एकेन्द्रियशरीरतया परिणता आसीरन् कदाचित् द्वीन्द्रियशरीरतया कदाचित् त्रीन्द्रियशरीरतया कदाचिच्चतुरिन्द्रियशरीरतया कदाचित् पञ्चेन्द्रियशरीरतया, ततो यदि पूर्वभावं इदानीमध्यारोप्य विवक्ष्यते तदा नैरयिका एकेन्द्रियशरीराण्यपि यावत्पञ्चेन्द्रियशरीराण्यप्याहारयन्तीति भवति,

'पडुप्पन्नभावपन्नवणं पडुच्चे'त्यादि, प्रत्युत्पन्नो-वार्त्तमानिकः स चासौ भावश्च प्रत्युत्पन्नभावस्तस्य प्रज्ञापना तां प्रतीत्य नियमाद्-अवश्यतया पञ्चेन्द्रियशरीराण्याहरयन्ति, कथमिति चेत्, उच्यते, इह प्रत्युत्पन्नभावप्रज्ञापनां करोति नयः ऋजुसूत्रो न शेषा नैगमादयः, ऋजुसूत्रश्च क्रियमाणं कृतं अभ्यवहियमाणमभ्यावहृतं परिणम्यमाणं परिणतमभ्युपगच्छति, अभ्यवहियमाणाश्च पुद्गलास्ते उच्यन्ते ये स्वशरीरतया परिणम्यमाना वर्त्तन्ते, अभ्यवहियमाणं चाभ्यवहृतं परिणम्यमानं च परिणतमिति तन्मतेन स्वशरीरमेवाभ्यवहियते स्वशरीरं च तेषां पञ्चेन्द्रियशरीरं पञ्चेन्द्रियशरीरत्वात् तेषामत उक्तं नियमात् पञ्चेन्द्रियशरीराण्याहारयन्तीति, एवमसुरकुमारादयः स्तनितकुमारापर्यवसाना भवनपतयो वक्तव्याः,

पृथिवीकायिकसूत्रे प्रत्युत्पन्नभावप्ररूपणाचिन्तायां नियमादेकेन्द्रियशरीराण्याहारयन्तीति वक्तव्यं, तेषामेकेन्द्रियतया तच्छरीराणामेकेन्द्रियशरीरत्वात्, एवं द्वीन्द्रियसूत्रे नियमात् द्वीन्द्रियशरीराण्याहारयन्तीति वक्तव्यं, त्रीन्द्रियसूत्रे नियमात्स त्रीन्द्रियशरीराणि, चतुरिन्द्रियसूत्रे नियमात् चतुरिन्द्रियशरीराणि, तिर्यक्पञ्चेन्द्रिया मनुष्या व्यन्तरज्योतिष्कवैमानिकाश्च नैरयिकवद् वक्तव्या, तथा चाह-'पुढविकाइयाणं पुच्छा' इत्यादि। अधुना लोमाहाराधिकारं विभावयिषुरिदमाह-

'नेरइया ण'मित्यादि सुगमं, नवरं नैरयिकाणां प्रक्षेपाहारो न भवति, वैक्रियशरीराणां तथा स्वभावत्वात्, लोमाहारोऽपि पर्याप्तानामवसेयो नापर्याप्तानामिति, 'एवं एगिंदिया' इत्यादि, एवं-नैरयिकोक्तप्रकारेण एकेन्द्रियाः-पृथिव्यप्तेजोवायुवनस्पतयः सर्वे देवाश्च-असुरकुमारादयो यावद्वैमानिका भणितव्याः, तत्रैकेन्द्रियाणां प्रक्षेपाहाराभावो मुखाभावात्, असुरकुमारादीनां

वैक्रियशरीरतया तथा स्वभावात्,

द्वित्रिचतुरिन्द्रियास्तिर्यक्पञ्चेन्द्रियामनुष्याश्च लोमाहार अपि वक्तव्याः प्रक्षेपाहारा अपि, उभयरूपस्याप्याहारस्य तेषां सम्भवात्, चरममर्थादिकारमभिधित्सुराह–

मू. (५५७) नेरइया णं भंते ! किं ओयाहारा मणभक्खी ?, गो० ! ओयाहारा नो मणभक्खी, एवं सव्वे ओरालियसरीरावि, देवा सव्वेवि जाव वेमाणिया ओयाहारावि मणभक्खीवि, तत्थ णं जे ते मणभक्खी देवा तेसि णं इच्छामणे समुप्पज्जति इच्छामो णं मणभक्खणं करित्तते, तते णं तेहिं देवेहिं एवं मणसीकते समाणे खिप्पामेव जे पोग्गला इट्ठा कंता जाव मणामा ते तेसिं मणभक्खत्ताए परिणमंति, से जहा नामए सीया पोग्गला सीयं पप्प सीयं चेव अतिवतित्ताणं चिट्ठंति, उसिणा वा पोग्गला उसिणं पप्प उसिणं चेव अइवइत्ताणं चिट्ठंति, एवामेव तेहिं देवेहिं मणभक्खीकए समाणे से इच्छामणे खिप्पामेव अवेति ।

वृ. 'नेरइया णं भंते !' इत्यादि, ओज–उत्पत्तिदेशे आहारयोग्यपुद्गलसमूहः, ओज आहारो येषां ते ओजआहाराः, मनसा भक्षयन्तीत्येवंशीला मनोभक्षिणः, तत्र नैरयिका ओजआहारा भवन्ति, अपर्याप्तावस्थायामोजस एवाहारस्य सम्भवात्, मनोभक्षिणस्त्वेते न भवन्ति, मनोभक्षणलक्षणो ह्याहारः स चोच्यते ये तथाविधशरीरनामोदयात् गृहीता औदारिकशरीरपुद्गलाः सर्वात्मना [illegible] पुद्गला अभ्यवहियन्ते, यदभ्यवहरणानन्तरं तृप्तिपूर्वः परमसन्तोष उपजायते, न चैतन्नैरयिकाणामस्ति, प्रतिकूलकर्मोदयवशतः तथारूपशक्तयभावात्, 'एवं सव्वे ओरालियसरीरावि' इति, एवं–नैरयिकोक्तेन प्रकारेण औदारिकशरीरिणोऽपि सर्वे पृथिवीकायिकादयो मनुष्यपर्यवसाना वक्तव्याः, तद्यथा–'पुढविकाया णं भंते ! किं ओयाहारा मनभक्खी ?, गोयमा ! ओयाहारा नो मणभक्खी' त्यादि, 'देवा' इत्यादि देवाः यावद्वैमानिका ओजआहारा अपि मनोभक्षिणोऽपि वक्तव्याः, तद्यथा–असुरकुमारा णं भंते ? किं ओयाहारा मनोभक्खी ?, गो० ! ओयाहारावि मणभक्खीवि, जाव वेमाणियाणं पुच्छा गो० ? ओयाहारावि मणभक्खीवि' ॥

सम्प्रतिमनोभक्षित्वं देवानां यथा भवति तथोपदर्शयति–'तत्थ णं'मित्यादि, तत्र- तेषु संसारिषु जीवेषु मध्ये, णमिति वाक्यालङ्कारे ये मनोभक्षिणो देवास्तेषां णमिति वाक्यालङ्कारे मनः प्रस्तावादाहारविषयं समुत्पद्यते, केनोल्लेखेन इत्यत आह–इच्छामः–अभिलषामो णमिति वाक्यालङ्कारे, मनोभक्षिणमिति–मनसा भक्षणं मनोरमणं कर्तुमिति, तत एवं तैर्मनसि कृते–व्यवस्तापिते मनोभक्षणे सति तथाविधशुभकर्मोदयवशात् क्षिप्रमेव तत्कालमेवेति भावः, ये इष्टाः कान्ताः प्रिया मनोज्ञा मनआपा पुद्गलाः एतेषां व्याख्यानं प्राग्वत् तेषां देवानां मनोभक्षतया परिणमन्ते, कथमित्यत्रैव दृष्टान्तमाह–

'से जहानामए' सेशब्दोऽथशब्दार्थः, स चात्र वाक्योपन्यासे, यथा नामेति विवक्षिताः शीताः पुद्गलाःशीतं–शीतयोनिकं प्राणिनं प्राप्य शीतत्वमेवातिव्रज्य–अतिशयेन गत्वा तिष्ठन्ति, किमुक्तं भवति ?– विशेषतः शीतीभुय शीतयोनिकस्य प्राणिनः सुखित्वायोपकल्पन्त इति, उष्णा वा पुद्गला उष्णं–उष्णयोनिकं प्राप्य उष्णमेव–उष्णत्वमेवातिव्रज्य–अतिशयेन गत्वा तिष्ठन्ति, विशेषतः स्वरूपलाभसम्पत्त्या तस्य सुखित्वायोपतिष्ठन्त इति भावः,

'एवमेव' अनेनैव प्रकारेण तैर्देवैः प्रागुक्तरीत्या मनोभक्षणे कृते सति स तेषां देवानामिच्छामनः–आहारविषयेच्छाप्रधानं मनः क्षिप्रमेवापैति–तृप्तिभावान्निवर्त्तते इति भावः, इयमत्र

भावना—यथा शीतपुद्गलाः शीतयोनिकस्य प्राणिनः सुखित्वायोपकल्प्यन्ते उष्णपुद्गला वा उष्णयोनिकस्य तथा देवैरपि मनसाऽऽभवद्भियमाणाः पुद्गलास्तेषां तत्रये परमसन्तोषाय चोपकल्पन्ते, तत आहारविषयाभिलाषनिवृत्तिर्भवतीति, अत्र च ओजआहारादिविभागप्रतिपादिका इमाः सूत्रकृताङ्गनिर्युक्तिगाथाः—

॥ १ ॥ "सरीरेणोयाहारो तयाय फासेण लोमआहारो ।
पक्खेवाहारो पुन कावलिओ होइ नायव्वो ॥

॥ २ ॥ ओयाहारा जीवा सव्वे अपज्जत्तया मुनेयव्वा ।
पज्जत्तगा य लोमे पक्खेवे होंति भइयव्वा ॥

॥ ३ ॥ एगिंदियदेवाणं नेरइयाणं च नत्थि पक्खेवो ।
सेसाणं जीवाणं संसारत्थाण पक्खेवो ॥

॥ ४ ॥ लोमाहारा एगिंदिया उ नेरइयसुरगणा चेव ।
सेसा आहारो लोमे पक्खेवओ चेव ॥

॥ ५ ॥ ओयाहारा मनभक्खिणो य सव्वेवि सुरगणा होंति ।
सेसा हवंति जीवा लोमे पक्खेवो चेव ॥"

अथ क आहार आभोगनिर्वर्त्तितः को वाऽनाभोगनिर्वर्त्तित इति चेत्, उच्यते, देवानामाभोगनिर्वर्त्तितः ओजआहारः स चापर्याप्तावस्थायां, लोमाहारोऽप्यनाभोगनिर्वर्त्तितः, स च पर्याप्तावस्थायां आभोगनिर्वर्त्तितो मनोभक्षणलक्षणः, स चपर्याप्तावस्थायां देवानामेव न शेषाणां, सर्वेषामप्यनाभोगनिर्वर्त्तित आहारोऽपर्याप्तावस्थायां लोमाहारः पर्याप्तावस्थायां, नैरयिकवर्जानां लोमाहारो, नैरयिकाणां तु लोमाहार आभोगनिर्वर्त्तितोऽपि, द्वीन्द्रियादीनां मनुष्यपर्यवसानानां यः प्रक्षेपाहारः स आभोगनिर्वर्त्तित एवेति ॥

पदं – २८, उद्देशकः– १ समाप्तः

—: पदं – २८ – उद्देशकः– २ :—

वृ. व्याख्यात आहारपदस्य प्रथमोद्देशकः, सम्प्रति द्वितीयो व्याख्येयः, तत्र चादावियमधिकारसङ्ग्रहगाथा—

मू. (५५८) *आहार १ भविय २ सण्णी ३ लेसा ४ दिट्ठी ५ य संजत ६ कसाए ७ ।*
नाण ८ जोगु ९ वओगे १० वेदे ११ य सरीर १२ पज्जत्ती १३ ॥

वृ. 'आहारे'त्यादि, प्रथमं सामान्यत आहाराधिकारः, द्वितीयो भव्याधिकारो—भव्यविशेषिताहाराधिकारः, एवं तृतीयः संज्ञ्यधिकारः, चतुर्थो लेश्याधिकारः पञ्चमो दृष्ट्यधिकारः षष्ठःसंयताधिकारः सप्तम; कषायाधिकारः अष्टमो ज्ञानाधिकारः नवमो योगाधिकारःदशम उपयोगाधिकारः एकादशो वेदाधिकारः द्वादशःशरीराधिकारः त्रयोदशः पर्याप्तयधिकारः, इह भव्यादिग्रहणेन तत्प्रतिपक्षभूता अभव्यादयोऽपि सूचिता द्रष्टव्याः, तथैवाग्रे वक्ष्यमाणत्वाद्,

तत्र प्रथमं सामान्यत आहाराधिकारं विभावयिषुरिदमाह—

पदं – २८, उद्देशकः– २ – द्वारं – १ "आहार"

मू. (५५९) *जीवे णं भंते ! किं आहारए अनाहारए ?, गो० ! सिय आहारए सिय अना-*

हारए, एवं नेरइए जाव असुरकुमारे जाव वेमाणिए, सिद्धे णं भंते ! किं आहारए अनाहारए ?, गो० ! नो आहारए अनाहारए,

जीवा णं भंते ! किं आहारया अनाहारया ? गो० ! आहारयावि अनाहारयावि, नेरइयाणं! पुच्छा, गो० ! सव्वेवि ताव होज्जा आहारया १ अहवा आहारगा य अनाहारए य २ अहवा आहारगा य अनाहारगा य ३, एवं जाव वेमाणिया, नवरं एगिंदिया जहा जीवा,

सिद्धाणं पुच्छा, गो० ! नो आहारगा अनाहारगा

वृ. 'जीवे णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–'गौतमे'त्यादि, गौतम ! स्यात–कदाचिदाहारकः कदाचिदनाहारकाः, कथमिति चेत् ?, उच्यते, विग्रहगतौ केवलिसमुद्घाते शैलेश्यवस्थायां सिद्धत्वे चानाहारकाः, शेषास्ववस्थास्वाहारकः, उक्तं च–

॥१॥ "विग्गहगइमावन्ना केवलिणो समोहया अजोगी य ।
सिद्धा य अनाहारा सेसा आहारगा जीवा ॥"

तदेवं समामान्यतो जीवचिन्तां कृत्वेदानीं नैरयिकादिचतुर्विंशतिदण्डकक्रमेणाहारकानाहारकचिन्तां करोति–'नेरइए णं भंते ! किं आहारए' इत्यादि सुगमं, तदेवं सामान्यतो जीवपदे नैरयिकादिषु चैकवचनेन आहारकानाहारकत्वचिन्ता कृता, सम्प्रति बहुवचनेन तां चिकीर्षुराह–

'जीवा णं भंते !' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! आहारका अपि अनाहारका अपि, सदैव बहुवचनविशिष्टा उभयेऽपि लभ्यन्ते इति भावः, तथाहि–विग्रहगतिव्यतिरेकेण शेषकालं सर्वेऽपि संसारिणो जीवा आहारकाः", विग्रहगतिस्तु क्वचित् कदाचित् कस्यचित्तु भवतीति सर्वकालमपि लभ्यमाना सा प्रतिनियतानामेव लभ्यते तत आहारकेषु बहुवचनं, अनाहारका अपि सिद्धाः सदैव लभ्यन्ते, ते चाभव्येभ्योऽनन्तगुणाः, अन्यच्च–सर्वकालमेकैकस्य निगोदस्य प्रतिसमयमसङ्ख्येयभागो विग्रहगत्यापन्नो लभ्यते, ततोऽनाहारकेष्वपि बहुवचनं,

नैरयिकसूत्रे सर्वेऽपि तावद्भवेयुराहारकाः १, किमुक्तं भवति ? –कदाचित्रैरयिकाः सर्वेप्याहारका एव भवन्ति, न त्वेकोऽप्यनाहारकः, कथमिति चेत्, उच्यते, उपपातविरहात्, तथाहि–नैरयिकाणामुपपातविरहो द्वादश मुहूर्ताः, एतावति चान्तरे पूर्वोत्पन्नविग्रहगत्यापन्ना अपि आहारका जाताः, अन्यस्त्वनुत्पद्यमानत्वात्अनाहारको न सम्भवतीति, अथवा आहारका अनाहारकाश्च २

आहारकपदे बहुवचनं अनाहारकपदे एकवचनमिति भावः, कथमेष भङ्गो घटामियर्त्तीति चेत्, उच्यते, इह नरकेषु जन्तुः कदाचिदेक उत्पद्यते कदाचिदद्वौ कदाचित् त्रयश्चत्वारो यावत्सङ्ख्याता असङ्ख्याता वा, तत्र यदा एक उत्पद्यते सोऽपि च विग्रहगत्यापन्नोऽपि भवति अन्ये च पूर्वोत्पन्नतया आहारका अभवन् तदा एष भङ्गो लभ्यते, तृतीयभङ्गमाह–अहवा आहारगा य अनाहारगा य ३, अत्रोभयत्रापि बहुवचनं, एष च भङ्गो यदा बहवो विग्रहगत्योत्पद्यन्ते तदा द्रष्टव्यः, शेषभङ्गकास्तु न सम्भवन्ति, आहारकपदस्य नैरयिकाणां सर्वदैव बहुवचनविषयतया लभ्यमानत्वात्, एवमसुरकुमारादिषु स्तनितकुमारापर्यवसानेषु द्वीन्द्रियादिषु च वैमानिकपर्यन्तेषु प्रत्येकं भङ्गत्रिकं भावनीयं, उपपातविरहभावतः प्रथमभङ्गस्य एकादिसङ्गतयोत्पत्तेः शेषस्य च भङ्गद्वयस्य सर्वत्रापि लभ्यमानत्वात्, एकेन्द्रियेषु पुनःपृथिव्यप्तेजोवायुवनस्पतिरूपेषु प्रत्येकमेष एवैको भङ्गः आहारकाः अनाहारका अपि, पृथिव्यप्तेजोवायुषु प्रत्येकं प्रतिसमयमसङ्घाया[1]तानां वनस्पतिषु प्रतिसमयमनन्तानां

विग्रहगत्योत्पद्यमानानां लभ्यमानतया अनाहारकपदेऽपि सदैव तेषु बहुवचनसम्भवात्, तथा चाह–'एवं जाव वेमाणिया नवरं एगिंदिया जहा जीवा' इति,

एवं–नैरयिकोक्तभङ्गप्रकारेण शेषा अप्यसुरकुमारादयस्तावद्वक्तव्या यावद्वैमानिकाः, नवरमेकेन्द्रियाः पृथिव्यप्तेजोवायुवनस्पतिरूपाः प्रत्येकं यथा उभयत्रापि बहुवचने जीवा उक्तास्तथा वक्तव्याः, सिद्धेष्वेक एव भङ्गोऽनाहारक इति, [illegible] बहूनां च सदा भावात् इति, गतं प्रथमं द्वारं ॥

–: पदं – २८ – उद्देशकः – २ द्वारं – २ "भव" :–

मू. (५६०) *भवसिद्धिए णं भंते ! जीवे किं आहारते अनाहारते ?, गो० ! सिय आहारते सिय अनाहारए, एवं जाव वेमाणिए भवसिद्धिया णं भंते ! जीवा किं आहारगा अना० ? गो० ! जीवेगिंदियवज्जो तियभंगो, अभवसिद्धिएवि एवं चेव,*

नोभवसिद्धिएनोअभवसिद्धिए णं भंते ! जीवे किं आहारए अनाहारए ?, गो० ! नो आहारए अनाहारए, एवं सिद्धेवि, नोभवसिद्धियनोअभवसिद्धिया णं भंते ! जीवा किं आहारगा अनाहारगा ?, गो० ! नो आहारगा अनाहारगा, एवं सिद्धेवि !

वृ. द्वितीयं भव्यद्वारमिधित्सुराह–'भवसिद्धिए णं भंते !' इत्यादि, भवैः सङ्ख्यातैरसङ्ख्यातैरनन्तैर्वा सिद्धिर्यस्यासौ भवसिद्धिको भव्यः, स कदाचिदाहारकः कदाचिदनाहारकः, विग्रहगत्याद्यवस्थायां अनाहारकः शेषकालं त्वाहारकः, एवं चतुर्विंशतिदण्डकेऽपि प्रत्येकं वाच्यं, तथा चाह–'एवं जाव वेमाणिए' अत्र च सिद्धविषयं सूत्रं न वक्तव्यं, मोक्षपदप्राप्ततया तस्य भवसिद्धिकत्वायोगात्, अत्रैव बहुवचननेनाहारकानाहारकत्वचिन्तां चिकीर्षुराह–

'भवसिद्धिया णं भंते !' इत्यादि, अत्राप्याहारकद्वार इव जीवपदे एकेन्द्रियेषु च प्रत्येकमुभयत्र बहुवचनेनैक एव भङ्गो, यथा आहारका अपि अनाहारका अपि, शेषेषु नैरयिकादिषु स्थानेषु भङ्गत्रिकं, कदाचित्केवला आहारका एव न त्वेकोऽप्यनाहारकः, अथवा कदाचिदाहारका एकोऽनाहारकः, अथवा आहारका अपि अनाहारका अपि उभयत्रापि बहुवचनं, तथा चाह–'जीवेगिंदियवज्जो तियभंगो' इति, यथा च भवसिद्धिके एकस्मिन् बहुषु चाहारकानाहारकत्वचिन्ता कृता तथा अभवसिद्धिकेऽपि कर्त्तव्या, उभयत्राप्येकवचने बहुवचने च भङ्गसङ्ख्यायाः सर्वत्रापि समानत्वात्, तथा चाह-

'अभवसिद्धिए एवं चेव' अभवसिद्धिकेऽपि भवसिद्धिक इव एकवचने बहुवचने च वक्तव्यमिति, यस्तु न भवसिद्धिको नाप्यभवसिद्धिकः स सिद्धः, स हि भवसिद्धिको न भवति, भवातीतत्वात्, अभवसिद्धिकस्तु रूढ्या यः सिद्धिगमनयोग्यो न भवति स उच्यत, ततोऽभवसिद्धिकोऽपि न भवति, सिद्धिप्राप्तत्वात्, तथा च सति नोभवसिद्धिकनोअभवसिद्धिकत्वचिन्तायां द्वे एव पदे, तद्यथा–जीवपदं सिद्धिपदं च, उभयत्राप्येकवचने एक एव भङ्गोऽनाहारक इति, बहुवचनेऽप्येक एवानाहारका इति ।

–: पदं – २८, उद्देशकः – २ – द्वारं – ३ "संज्ञी" :–

मू. (५६१) *सण्णी णं भंते ! जीवे किं आहारए अनाहारए ?, गो० ! सिय आ० सिय अना०, एवं जाव वेमाणिए, नवरं एगिंदियविगलिंदिया नो पुच्छिज्जंति,*

सण्णी णं भंते ! जीवा किं आहारगा अनाहारगा ?, गो० ! जीवाइओ तियभंगो जाव वेमाणिया, असण्णी णं भंते ! जीवे किं आहारए अनाहारए ?, गो० ! सिय आ० सिय अना० एवं नेरइए जाव वाणमंतरे, जोइसियवेमाणिया न पुच्छिज्जंति,

असण्णीणं भंते ! जीवा किं आ० अना० ?, गो० ! आहारगावि अनाहारगावि एगो भंगो, असण्णी णं भंते ! नेरइया किं आहारया अना० ?, गो० ! आहारगा वा १ अनाहारगा वा २ अहवा आहारए य अनाहारए य ३ आहारए य अनाहारया य ४ अहवा आहारगा य अनाहारए य ५ अहवा आहारगा य अनाहारगा य ६ एवं एते छब्भंगा, एवं जाव थणियकुमारा, एगिंदिएसु अभंगतं, बेइंदिय जाव पंचिंदियतिरिक्खजोणिएसु तियभंगो, मणूसवाणमंतरेसु छब्भंगा,

नोसण्णीनोअसण्णी णं भंते ! जीवे किं आ० अना० ?, गो० ! सिय आहारए सिय अनाहारए य, एवं मणूसेवि, सिद्धे अनाहारते, पुहुत्तेणं नोसण्णीनोअसण्णी जीवा आहारगावि अनाहारगावि, मणूसेसु तियभंगो, सिद्धा अनाहारगा।

सू. संज्ञिद्वारे–'सन्नी णं भंते!' इत्यादि प्रश्नसूत्रं सुगमं, निर्वचनसूत्रमाह–'गोयमे'त्यादि, विग्रहगतावनाहारकः शेषकालमाहारकः, ननु संज्ञी समनस्क उच्यते, विग्रहगतौ च मनो नास्ति ततः कथं संज्ञी सन्ननाहारको लभ्यते ?, उच्यते, इह विग्रहगत्यापन्नोऽपि संज्ञायुष्कवेदनात् संज्ञी व्यवह्रियते, यथा नारकायुष्कवेदनान्नारकस्ततो न कश्चिद्दोषः,

'एव'मित्यादि, एवमुपदर्शितेन प्रकारेण तावद् वक्तव्यं यावद्वैमानिको–वैमानिकसूत्रं, नवरमेकेन्द्रिया विकलेन्द्रिया न प्रष्टव्याः, किमुक्तं भवति ?–तद्विषयं सूत्रं सर्वथा न वक्तव्यं, तेषाममनस्कतया संज्ञित्वायोगात्,

बहुवचनचिन्तायां जीवपदे नैरयिकादिपदेषु च प्रत्येकं सर्वत्र भङ्गत्रयं, तद्यथा–सर्वेऽपि तावद् भवेयुराहारकाः १ अथवा आहारकाश्च अनाहारकश्च २ अथवा आहारकाश्च अनाहारकाश्च ३, तथा चाह–'जीवातीतो तियभंगो जाव वेमाणिया' इति, तत्र सामान्यतो जीवपदे प्रथमभङ्गः सकललोकापेक्षया संज्ञित्वेनोत्पातविरहाभावातत् द्वितीयभङ्गं एकस्मिन् संज्ञिनि विग्रहगत्यापन्ने तृतीयभङ्गो बहुषु संज्ञिषु विग्रहगत्यापन्नेषु, एवं नैरयिकादिपदेष्वपि भङ्गभावना कार्या,

'असण्णी णं भंते !' इत्यादि, अत्रापि विग्रहगतावनाहारकः शेषकालमाहारकः, 'एवं जाव वाणमंतरे' इति एवं–सामान्यतो जीवपद इव चतुर्विंशतिदण्डकक्रमेण तावत् वक्तव्यं यावद्वानमन्तरो–वानमंतरविषयं सूत्रं, अथ नैरयिका भवनपतयो वानमन्तराश्च कथमसंज्ञिनो येनासंज्ञिसूत्रे तेऽपि पठ्यन्ते इति ?, उच्यते, इह नैरयिका भवनपतयोव्यन्तराश्चासंज्ञिभ्योऽपि उत्पद्यन्ते संज्ञिभ्योऽपि, असंज्ञिभ्यश्च उत्पद्यमाना असंज्ञिन इति व्यवह्रियन्ते संज्ञिभ्य उत्पद्यमानाः संज्ञिनः, ततोऽसंज्ञिसूत्रेऽपि ते उक्तप्रकारेण पठ्यन्ते, ज्योतिष्कवैमानिकास्तु संज्ञिभ्य एवोत्पद्यन्ते नासंज्ञिभ्य इति असंज्ञित्वव्यवहाराभावादिह ते न पठ्यन्ते, तथा चाह–

'जोइसियवेमाणिया न पुच्छिज्जंति' किमुक्तं भवति ?–तद्विषयं सूत्रं न वक्तव्यं, तेषामसंज्ञित्वाभावादिति, बहुवचनचिन्तायां सामान्यतो जीवपदे एक एव भङ्गः, तद्यथा–आहारका अपि अनाहारका अपि, प्रतिपसमयमेकेन्द्रियाणामनन्तानां विग्रहगत्यापन्नानामत एवानाहारकाणां सदैव लभ्यमानतया अनाहारकपदेऽपि सर्वदा बहुवचनभावात्, नैरयिकपदे षट् भङ्गाः, तत्र

प्रथमो भङ्ग आहारका इति, अयं च भङ्गो यदाऽन्योऽसंज्ञिनारकः उत्पद्यमानो विग्रहगत्यापन्नो न लभ्यते पूर्वोत्पन्नास्त्वसंज्ञिनः सर्वेऽप्याहारका जातास्तदा लभ्यते, द्वितीयोऽनाहारका इति, एष यदा पूर्वोत्पन्नोऽसंज्ञी नारक एकोऽपि न विद्यते उत्पद्यमानास्तु विग्रहत्यापन्ना बहवो लभ्यन्ते तदा विज्ञेयः, तृतीय आहारकश्च अनाहारकश्च, द्वित्वेऽपि प्राकृते बहुवचमिति बहुवचनचिन्तायामेषोऽपि भङ्गः समीचीन इत्युपन्यस्तः, तत्र यदा चिरकालोत्पन्न एकोऽसंज्ञी नारको विद्यते अधुनोत्पद्यमानोऽपि विग्रहगत्यापन्न एकस्तदाऽयं भङ्गः, चतुर्थः आहारकश्च अनाहारकाश्च एष चिरकालोत्पन्ने एकस्मिन्नसंज्ञिनि नारके विद्यमाने अधुनोत्पद्यमानेषु असंज्ञिषु विग्रहत्यापन्नेषु द्रष्टव्य, पञ्चमः--आहारकाश्च अनाहारकश्च, अयं चिरकालोत्पन्नेषु बहुषु असंज्ञिषु नारकेषु सत्सु अधुनोत्पद्यमाने विग्रहगत्यापन्ने एकस्मिन्नसंज्ञिनि विज्ञेयः, षष्ठ आहारकाश्च अनाहारकाश्च, एष बहुषु चिरकालोत्पन्नेषूत्पद्यमानेषु चासंज्ञिषु वेदितव्यः,

'एवमेते छब्भंगा' एवमुपदर्शितप्रकारेण एते षट् भंगाः, तद्यथा--आहारकपदस्य केवलस्य बहुवचनेनैकः १, अनाहारकपदस्य केवलस्य बहुवचनेन द्वितीयः २, आहारकपदस्यानाहारकपदस्य च युगपत् प्रत्येकमेकवचनेन तृतीयः ३, आहारकपदस्यैकवचनेन अनाहारकपदस्य बहुवचनेन चतुर्थः ४, आहारकपदस्य बहुवचनेन अनाहारकपदस्यैकवचनेन पञ्चमः ५, उभयत्रापि बहुवचनेन षष्ठः ६, शेषास्तु भङ्गा न सम्भवन्ति, बहुवचनचिन्तायाः प्रक्रान्तत्वात्, एते च षट् भङ्गा असुरकुमारादिष्वपि स्तनितकुमारपर्यवसानेषु वेदितव्याः, तथा चाह--'एवं जाव थणियकुमारा'

'एगिंदिएसु अभंगय'मिति एकेन्द्रियेषु पृथिव्यपतेजोवायुवनस्पतिरूपेष्वभङ्गकं--भङ्गकाभाव एक एव भङ्ग इत्यर्थः, स चायं--आहारका अपि अनाहारका अपि, तत्राहारका बहवः सुप्रसिद्धाः, अनाहारका अपि प्रतिसमयं पृथिव्यप्तेजोवायवः प्रत्येकमसङ्ख्येयाः प्रतिसमयं वनस्पतयोऽनन्ताः सर्वकालं लभ्यन्ते इति तेऽपि बहवः सिद्धाः,

'द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियतिर्यक्पञ्चेन्द्रियेषु प्रत्येकं भङ्गत्रिकं, तद्यथा--आहारका अथवा आहारकाश्च अनाहारकश्च अथवा आहारकाश्च अनाहारकाश्च, तत्र द्वीन्द्रियान् प्रति भावना-यदा द्वीन्द्रिय एकोऽपि विग्रहगत्यापन्नो न लभ्यते तदा पूर्वोत्पन्नाः सर्वेऽप्याहारका इति प्रथमो भङ्गः, यदा पुनरेको विग्रहगत्यापन्नस्तदा पूर्वे सर्वेऽप्याहारका उत्पद्यमानस्त्वेकोऽनाहारक इति, यदा तूत्पद्यमाना अपि बहवो लभ्यन्ते तदा तृतीयः, एवं त्रीन्द्रियचतुरिन्द्रियतिर्यक्पञ्चेन्द्रियेष्वपि भावना कर्त्तव्या, मनुष्यव्यन्तरेषु षट् भङ्गाः ते च नैरयिकेष्विव भावनीयाः, तथा चाह--'बेइंदिय जाव पंचिंदियतिरिक्खजोणिएसु तियभंगो, मणूसवाणमंतरेसु छब्भंगा' इति, नोसंज्ञीनोअसंज्ञी च केवली सिद्धश्च ततो नोसंज्ञिनोअसंज्ञित्वचिन्तायां त्रीणि पदानि, तद्यथा--जीवपदं मनुष्यपदं सिद्धपदं च, तत्र जीवपदे सूत्रमाह--

'नोसण्णीनोअसण्णी णं भंते! जीवे' इत्यादि, स्यात्--कदाचिदाहारकः केवलिनः समुद्घाताद्यवस्थाविरहे आहारकः (कत्वात्), स्यात्--कदाचिदनाहारकः, समुद्घातावस्थायां अयोगित्वावस्थायां सिद्धावस्थायां वा भावनीयं, 'सिद्धे अनाहारए' इति सिद्धे--सिद्धविषये सूत्रे 'अनाहारए' इति वक्तव्यं, 'पुहुत्तेणं'ति पृथक्त्वेन बहुत्वेन चिन्तायामिति प्रक्रमः, 'आहारगावि अनाहारगावि' तत्राहारका अपि बहूनां केवललिनां समुद्घातद्यवस्थारहितानां सदैव लभ्यमानत्वात्, अनाहारका अपि सिद्धानां सदैव भावात्तेषां चानाहारकत्वादिति,

'मणुस्सेसु तियभंगो' इति मनुष्यविषयं भङ्गत्रिकं, तद्यथा—आहारका एष भङ्गो यदा न कोऽपि केवली समुद्घाताद्यवस्थागतो भवति, अथवा आहारकाश्च अनाहारकश्च एष भङ्ग एकस्मिन् केवलिनि समुद्घाताद्यवस्थागते सति लभ्यते, अथवा आहारकाश्च अनाहारकाश्च एष बहुषु केवलिसमुद्घाताद्यवस्थागतेषु सत्सु वेदितव्यः । लेश्याद्वारे सामान्यतः सलेश्यसूत्रमाह—

—: पदं – २८, उद्देशकः– २ – द्वारं – ४ – "लेश्या" :–

मू. (५६२) *सलेसे णं भंते ! जीवे किं आहारए अनाहारए ?, गो० ! सिय आहारए सिय अनाहारए, एवं जाव वेमाणिते,*

सलेसा णं भंते ! जीवा किं आहारगा अनाहारगा ?, गो० ! जीवेगिंदियवज्जो तियभंगो, एवं कण्हलेसावि नीललेसावि काइउलेसावि जीवेगिंदियवज्जो तियभंगो, तेउलेसाए पुढविआउवणस्सइकाइयाणं छब्भंगा, सेसाणं जीवादिओ तियभंगो जेसिं अत्थि तेउलेसा, पम्हलेसाए सुक्कलेसाए य जीवादिओ तिभंगो,

अलेसा जीवा मणुस्सा सिद्धा य एगत्तेणवि पुहुत्तेणवि नो आहारगा अनाहारगा ।

वृ. 'सलेसे णं भंते ! जीवे' इत्यादि, इदं सामान्यतो जीवसूत्रमिव भावनीयं, अत्रापि सिद्धसूत्रं न वक्तव्यं, सिद्धानामलेश्यत्वात्, बहुवचनचिन्तायां जीवपदे एकेन्द्रियेषु च पृथिव्यादिषु प्रत्येकमेक एव भङ्गस्तद्यथा—आहारका अपि अनाहारका अपि, उभयेषामपि सदा बहुत्वेन लभ्यमानत्वात्, शेषेषु तु नैरयिकादिषु पदेषु तु प्रत्येकं भङ्गत्रिकं, तद्यथा—सर्वेऽपि तावद्भवेयुराहारकाः १, अथवा आहारकाश्च अनाहारकश्च २, अथवा आहारकाश्च अनाहारकाश्च ३, अमीषां च भावना प्राग्वत्, तथा चाह—'जीवेगिंदियवज्जो तियभंगो' इति, 'एव'मित्यादि, एवं यथा सामान्यतः सलेश्यसूत्रमुक्तं तथा कृष्णलेश्याविषयमपि नीललेश्याविषयमपि कापोतलेश्याविषयमपि सूत्रं वक्तव्यं, सर्वत्र सामान्यतो जीवपदे एकेन्द्रियेषु च प्रत्येकमभङ्गकं, शेषपक्षे भङ्गत्रिकं, तेजोलेश्याविषयमपि सूत्रमेकत्वे प्राग्वत्, बहुत्वेन पृथिव्यब्वनस्पतिषु षट् भङ्गाः, तेषु कथं तेजोलेश्यासम्भव इति चेत् ?, उच्यते, भवनपतिव्यन्तरज्योतिष्कसौधर्मेशानादेवानां तेजोलेश्यावतां तत्रोत्पादभावात्,

उक्तं तच्चास्या एव भगवत्याः प्रज्ञापनायाश्चूर्णौ० 'जेणेतेसु भवणवइवाणमंतरजोइसियसोहम्मीसाणया देवा उववज्जंति तेणं तेउलेस्सा लब्भइ'' इति, ते षट् भङ्गा इमे—सर्वे आहारकाः १ अथवा सर्वे अनाहारकाः २ अथवा आहारकश्चानाहारकश्च ३ अथवा आहारकश्च अनाहारकाश्च ४ अथवा आहारकाश्च अनाहारकश्च ५ अथवा आहारकाश्चानाहरकाश्च ६, शेषाणां जीवपदादारभ्य सर्वत्रापि भङ्गत्रिकं, तथा चाह—

'तेउलेस्साए पुढविआउवणस्सइकाइयाणं छब्भंगा, सेसाणं जीवाईओ तियभंगो' इति, आह—किं सर्वेषामविशेषेण जीवपदादारभ्य भङ्गत्रिकमुत केषांचिदत आह—'जेसिं अत्थि तेउलेसा' इति, येषामस्ति तेजोलेश्या तेषामेव भङ्गत्रिकं वक्तव्यं, न शेषाणां, एतेन किमावेदितं भवति नैरयिकविषयं तेजोवायुविषयं द्वित्रिचतुरिन्द्रियविषयं च तेजोलेश्यासूत्रं न वक्तव्यमिति, तथा पद्मलेश्या शुक्ललेश्या च येषां सम्भवति तद्विषयं तयोः सूत्रं वक्तव्यं, तत्र पद्मलेश्या शुक्ललेश्या च तिर्यक्पञ्चेन्द्रियेषु मनुष्यषु वैमानिकेषु च लभ्यते न शेषेष्विति तयोः प्रत्येकं चत्वारि पदानि,

तद्यथा–सामान्यतो जीवपदं तिर्यक्पञ्चेन्द्रियपदं मनुष्यपदं वैमानिकपदं च, सर्वत्राप्येकवचनचिन्तायां स्यादाहारकः स्यादनाहारक इति भङ्गः, बहुवचनचिन्तायां भङ्गत्रिकं, तद्यथा–सर्वेऽपि तावद् भवेयुराहारकाः १ अथवा आहारकाश्च अनाहारकश्च २ अथवा आहारकाश्चानाहारकाश्च ३, तथा चाह–'पम्हलेसाए सुक्कलेसाए जीवाइओ तियभंगो'त्ति,

अलेश्या–लेश्यातीतास्ते चायोगिकेवलिनः सिद्धाश्च, ततोऽत्र त्रीणि पदानि, तद्यथा सामान्यतो जीवपदं मनुष्याः सिद्धाश्च, सर्वत्राप्येकवचनेन बहुवचनेन चानाहारका एव वक्तव्याः, एतदेवाह–'अलेस्सा जीवा मणुस्सा सिद्धा य एगत्तेणवि पुहुत्तेणवि नो आहारगा अनाहारगा' इति, गतं लेश्याद्वारम्।

–: पदं – २८, उद्देशकः – २ द्वारं – ५ "दृष्टि" :–

मू. (५६३) *सम्मद्दिट्ठी णं भंते ! जीवा किं आहा० अना० ?, गो० ! सिय आहा० सिय अना०, बेइंदिया तेइंदिया चउरिंदिया छब्भंगा, सिद्धा अनाहारगा, अवसेसाणं तियभंगो,*

मिच्छादिट्ठीसु जीवेगिंदियवज्जो तियभंगो,

सम्मामिच्छादिट्ठी णं भंते ! किं आहा० अना० ?, गो० ! आहारते नो अना०, एवं एगिंदियविगलिंदियवज्जं जाव वेमाणिते, एवं पुहुत्तेणवि।

वृ. सम्प्रति सम्यग्दृष्टिद्वारम्–सम्यग्दृष्टिरौपशमिकसम्यक्त्वेन सास्वादनसम्यक्त्वेन क्षायोपशमिकसम्यक्त्वेन वेदकसम्यक्त्वेन क्षायिकसम्यक्त्वेन वा प्रतिपद्यते, सम्यग्मिथ्यादृष्टिस्तूपादानात्, तथैवाग्रे भङ्गचिन्तायां अपि करिष्यमाणत्वात्, तत्रौपशमिकसम्यग्दृष्टयादयः सुप्रतीताः, वेदसम्यग्दृष्टिः पुनः क्षायिकसम्यक्त्वमुत्पादयन् चरमग्रासमनुभवन्नवसेयः एकत्वे सर्वेष्वपि जीवादिपदेषु प्रत्येकमेष भङ्गः स्यादाहारकः स्यादनाहारक इति, नवरमत्र पृथिव्यादिविषयं सूत्रं न वक्तव्यं, तेषां सम्यग्दृष्टित्वायोगात्, 'उभयाभावो पुढवाइएसु' इति वचनाद्, बहुवचन विषयं सूत्रं, सामान्यतो जीवपदे आहारका अपि अनाहारका अपि इत्येष एव भङ्गः, उभयेषामपि सदा सम्यग्दृष्टीनां बहुत्वेन लभ्यमानत्वात्, नैरयिकभवनपतितिर्यक्पञ्चेन्द्रियमनुष्यव्यन्तर-ज्योतिष्कवैमानिकेषु प्रत्येकं भङ्गत्रिकं, तद्यथा–कदाचित्सर्वेऽप्याहारका एव १ कदाचिदाहारका एकश्चानाहारकः २, कदाचिदाहारकाश्च अनाहारकाश्च ३,

द्वित्रिचतुरिन्द्रियेषु पुनः षड् भङ्गाः, ते च प्राग्वद् भावनीयाः, द्वीन्द्रियादीनां च सम्यग्दृष्टित्व-मपर्याप्तावस्थासम्भविसास्वादनसम्यक्त्वापेक्षया द्रष्टव्यं, सिद्धास्त्वनाहारकाः, एतेषां क्षायिकसम्यक्त्वयुक्तत्वात्, तथा चाह–'बेइंदियतेइंदियचउरिंदिएसु छब्भंगा, सिद्धा अनाहारगा, अवसेसाणं तियभंगो' मिथ्यादृष्टिष्वपि एकवचने सर्वत्र स्यादाहारकः स्यादनाहारक इति वक्तव्यं, बहुवचने जीवपदे पृथिव्यादिपदेषु च प्रत्येकमाहारका अपि अनाहारका अपीति, उभयेऽपि सर्वदैवे तेषु बहुत्वेन लभ्यमानत्वेन, शेषेषु तु सर्वेषु स्थानेषु भङ्गत्रिकं, सिद्धसूत्रं चात्र न वक्तव्यं, सिद्धानां मिथ्यात्वापगमात्, एतदेवाह– 'मिच्छादिट्ठीसु जीवेगिंदियवज्जो तियभंगो,

सम्मामिच्छदिट्ठी णं भंते ! जीवे' इत्यादि प्रश्नसूत्रं सुगमं, भगवानाह–गौतम ! आहारको नो अनाहारकः, कस्मादिति चेत्, उच्यते, इह संसारिणामनाहारकत्वं विग्रहगतौ, न च सम्यग्मिथ्या-दृष्टित्वं विग्रहगताववाप्यते, कालकरणायोगात्, 'सम्मामिच्छो न कुणइ कालं' इति वचनात्, ततः सम्यग्मिथ्यादृष्टेर्विग्रहगत्यभावतोऽनाहारकत्वाभावः, एवं चतुर्विंशतिदण्डकक्रमेण सर्वत्रापि

वक्तव्यं, नवरमेकेन्द्रियविकलेन्द्रिया न वक्तव्याः, तेषां सम्यग्मिथ्यादृष्टित्वासम्भवात्, एवं बहुवचनेऽपि वक्तव्यं, तद्यथा- 'सम्मामिच्छदिट्ठी णं भंते ! जीवा किं आहारगा अनाहारगा ?, गो० १ आहारगा नो अनाहारगा, सम्मामिच्छदिट्ठी णं भंते ! नेरइया किं आ० अना० ?, गो० ! आहारगा नो अनाहारगा, एवमेगिंदियविगलिंदियवज्जा जाव वेमाणिया' इति । गतं दृष्टिद्वारं,

-: पदं - २८, उद्देशकः - २ द्वारं - ६ - "संयत":" :-

मू. *(५६४) संजए णं भंते ! जीवे किं आहा० अना० ?, गो० ! सिय आहारए सिय अनाहारए, एवं मणूसेवि, पुहुत्तेणं तियभंगो ।*

असंजते पुच्छा, सिय आहारए सिय अनाहारए, पुहुत्तेणं जीवेगिंदियवज्जो तियभंगो ।

संजतासंजते णं जीवे० पंचिंदियतिरिक्खजोणिते मणूसे य ३ एते एयत्तेणवि पुहुत्तेणवि आहारगा नो अना०, नोसंजतेनोअसंजतेनोसंजतासंजते जीवे सिद्धे य एते एगत्तेण पोहत्तेणवि नो आहा० अना० ।

वृ. सम्प्रति संयतद्वारं-संयतत्वं च मनुष्याणामेव, तत्र द्वे पदे, तद्यथा-जीवपदं मनुष्यपदं च, तत्र जीवपदे सूत्रमाह- 'संजए णं भंते ! जीवे' इत्यादि सुगमं, नवरमनाहारकत्वं केवलिसमुद्घातावस्थायामयोगित्वावस्थायां च वेदितव्यं, शेषकालमाहारकत्वं, 'एवं मणूसेवि' त्ति एवं मनुष्यविषये सूत्रं वक्तव्यं, तद्यथा- 'संजए णं भंते ! मणूसे किं आहारए अनाहारए ?, गो० ! सिय आहारए सिय अनाहारए' भावनाऽनन्तरमेवोक्ता, 'पुहुत्तेणं तियभंगो' त्ति पृथक्त्वेन-बहुवचनेन जीवपदे मनुष्यपदे च प्रत्येकं भङ्गत्रिकं, तद्भावं-सर्वेऽपि तावद्भवेयुराहारकाः, एष भङ्गो यदा न कोऽपि केवली समुद्घात-मयोगित्वं वा प्रतिपन्नो भवति तदा वेदितव्यः, अथवा आहारकाश्चानाहारकश्च, एष एकस्मिन् केवलिनि समवहते शैलेशीं वा गते प्राप्यते, अथवा आहारकाश्चनाहारकाश्च, एष बहुषु केवलिषु समवहतेषु शैलेशीगतेषु वा लभ्यते ।

असंयतसूत्रे एकवचने सर्वत्र स्यादाहाहारकः स्यादनाहारक इति वक्तव्यं, बहुवचने जीवपदे पृथिव्यादिषु च पदेषु प्रत्येकमाहारका अपि अनाहारका अपि इत्येष भङ्गः, शेषेषु तु नैरयिकादिषु स्थानेषु प्रत्येकं भङ्गत्रिकं, संयतासंयता-देशविरताः, ते च तिर्यक्पञ्चेन्द्रिया मनुष्या वा न शेषाः, शेषाणां स्वभावत एव देशविरतिपरिणामाभावाद्, एवं चैतेषां त्रीणि पदानि, तद्यथा- सामान्यतो जीवपदं तिर्यक्पञ्चेन्द्रियपदं मनुष्यपदं च, एतेषु त्रिष्वपि स्थानेषु एकवचने बहुवचने च आहरका भवन्ति, भवान्तरगतौ केवलिसमुद्घातावस्थासु च देशविरतिपरिणामा- भावात्, नोसंयतो नोअसंयतो नसंयतासंयतः, तच्चिन्तायां द्वे पदे, तद्यथा-जीवपदं सिद्धपदं च, उभयत्राप्येकवचने बहुवचने चानाहारकत्वमेव वक्तव्यं, न त्वाहारकत्वं, सिद्धानामनाहारकत्वात् गतं संयतद्वारं,

-: पदं - २८ - उद्देशकः - २ द्वारं - ७ - "कषायः" :-

मू. *(५६५) सकसाइ णं भंते ! जीवे किं आहारए अना० ?, गो० ! सिय आ० सिय अनाहारते, एवं जाव वेमाणिता, पुहुत्तेणं जीवेगिंदियवज्जो तियभंगो*

कोहकसाईसु जीवादीसु एवं चेव, नवरं देवेसु छब्भंगा, मानकसाईसु मायाकसाईसु य देवनेरइएसु छब्भंगा, अवसेसाणं जीवेगिंदियवज्जो तियभंगो, लोहकसाईसु नेरइएसु छब्भंगा,

अवसेसेसु जीवेगिंदियवज्जो तियभंगो,
अकसाई जहा नोसण्णीनोअसण्णी, ।

मू. *कषायद्वारं*– 'सकसाइ णं भंते! जीवे' इत्यादि, एकवचनविषयं सूत्रं सुगमं, बहुवचने *'जीवेगिंदियवज्जो तियभंगो'त्ति जीवपदे पृथिव्यादिषु च पञ्चसु पदेषु प्रत्येकं आहारका अपि* अनाहारका अपि वक्तव्यं, उभयेषामपि सकषायाणां सदैव तेषु स्थानेषु बहुत्वेन लभ्यमानत्वात्, शेषेषु तु स्थानेषु भङ्गत्रिकं,

'कोहकसाई एवं चेव'त्ति क्रोधकषाय्यपि एवमेव–सामान्यतः सकषायवदसेयः, तत्रापि जीवपदे पृथिव्यादिपदेषु चाभङ्गकं, शेषेषु तु स्थानेषु भङ्गत्रिकमिति भावः, किं सर्वेष्वपि शेषेषु स्थानेषु भङ्गत्रिकं ?, नेत्याह–'नवरं' 'देवेसु छब्भंगा' देवा हि स्वभावत एव लोभबहुला भवन्ति न क्रोधादिबहुलाः, ततः क्रोधकषायिण एकादयोऽपि लभ्यन्ते इति षड् भङ्गाः, तद्यथा–कदाचित् सर्वेऽप्याहारका एव क्रोधकषायिणः, एकस्यापि विग्रहत्यापन्नस्यालभ्यमानत्वात् ?, कदाचित्–सर्वेऽप्यनाहारकाः २, एकस्यापि क्रोधकषायिणः सत आहारकस्याप्राप्यमानत्वात्,

क्रोधोदयो हि मानाद्युदयविविक्त एवेए विवक्ष्यते न मानाद्युदयसहितोऽपि, तेन क्रोधकषायिणः सन्तः कदाचिदाहारकाश्च सर्वथाऽप्यभावः, तथा कदाचिदेक आहारक एकोऽनाहारकः ३ कदाचिदेक आहारको बहवोऽनाहारकाः ४, कदाचिद्बहव आहारका एकोऽनाहारकः ५, कदाचिद्बहव आहारकाः बहवश्चानाहारका इति ६, मानकषायसूत्रं मायाकषायसूत्रं चैकवचने प्राग्वत्, बहुवचने विशेषमाह–

'माणकसाईसु' इत्यादि, मानकषायिषु मायाकषायिषु बहुवचनेन चिन्त्यमानेषु देवेषु नैरयिकेषु च प्रत्येकं षड् भङ्गाः, नैरयिका हि भवस्वभावतः क्रोधबहुलाः देवास्तु लोभबहुलास्ततो देवानां नैरयिकाणां च मानकषायो मायाकषायश्च प्रविरल इति प्रागुक्तप्रकारेण षट् भङ्गाः, जीवपदे पृथिव्यादिपदेषु च प्रत्येकमभङ्गकमाहारकाणामनाहारकाणां च मानकषायिणां मायाकषायिणां च प्रत्येकं सदैव तेषु २ स्थानेषु बहुत्वेन लभ्यमानत्वात्, शेषेषु तु स्थानेषु भङ्गत्रिकं, लोभकषायसूत्रमप्येकवचने तथैव, बहुवचने विशेषमाह–

'लोभकसाईसु' इत्यादि, लोभकषायिषु नैरयिकेषु षट् भङ्गास्तेषां लोभकषायस्याल्पत्वात्, शेषेषु तु जीवैकेन्द्रियवर्जेषु स्थानेष्वपि भङ्गत्रिकं, देवेष्वपि भङ्गत्रिकमिति भावः तेषां लोभबहुलतया षड्भङ्गसम्भवात्, जीवेष्वेकेन्द्रियेषु च प्राग्वदेष एव भङ्गः, आहारका अप्यनाहारका अपि इति,

'अकसाई जहा नोसण्णीणोअसण्णी'ति अकषायिणो यथा नोसंज्ञिनोऽसंज्ञिनो उक्तास्था वक्तव्याः, किमुक्तं भवति ? –अकषायिणोऽपि मनुष्याः सिद्धाश्च, मनुष्या उपशान्तकषायादयोवेदितव्याः, अन्येषां सकषायित्वात्, तत एतेषामपि त्रीणि पदानि, तद्यथा–सामान्यतो जीवपदं मनुष्यपदं सिद्धपदं च, तत्र सामान्यतो जीवपदे मनुष्यपदे च प्रत्येकमेकवचने स्यादाहारकः स्यादनाहारक इति वक्तव्यं, सिद्धपदे त्वनाहारक एवेति, बहुवचने जीवपदे आहारका अपि अनाहारका अपीति, केवलिनामाहारकाणां सिद्धनामनाहारकाणां सदैव बहुत्वेन लभ्यमानत्वात्,

मनुष्यपदे भङ्गत्रिकं, सर्वेऽपि तावद् भवेयुराहारकाः १ अथवा आहारकाश्चनाहारकश्च २ अथवा आहारकाश्चनाहारकाश्च ३ भावना च प्रागेवानेकशः कृता, सिद्धपदे त्वनाहारक एव ।

गतं कषायद्वारं, सम्प्रति ज्ञानद्वारम्, तत्र–

—: पदं – २८, उद्देशकः – २ – द्वारं – ८ "ज्ञानं" :–

मू. (५६६) *नाणी जहा सम्मद्दिट्ठी, आभिनिबोहियनाणी सुयनाणी य बेइंदियतेइंदियचउरिंदिएसु छब्भंगा, अवसेसेसु जीवादिओ तियभंगो जेसिं अत्थि, ओहिनाणी पंचिंदियतिरिक्खजोणिया आहारगा नो अनाहारगा,*

अवसेसेसु जीवादिओ तियभंगो जेसिं अत्थि ओहिनाणं, मणपज्जवनाणी जीवा मणूसा य एगत्तेणवि पुहुत्तेणवि आहा० नो अनाहारगा, केवलनाणी जहा नोसण्णीनोअसण्णी,

अन्नाणी मतिअनाणी सुयअन्नाणी जीवेगिंदियवज्जो तियभंगो, विभंगनाणी पंचिंदियतिरिक्खजोणिया मणूसा य आहारगा नो अना०, अवसेसेसु जीवादियो तियभंगो।

वृ. 'नाणी जहा सम्मद्दिट्ठी' त्ति ज्ञानी यथा प्राक् सम्यग्दृष्टिरुक्तस्तथा वक्तव्यः, तद्यथा—नाणी णं भंते ! जीवे किं आहारए अनाहारए ?, गो० ! सिय आहारए सिय अनाहारए, नाणी णं भंते ! नेरइए किं आहारए अनाहारए ?, गो० ! सिय आ० सिय अनाहारए, एवं एगिंदियवज्जं जाव वेमाणिए, नाणी णं भंते ! जीवा किं आहारगा अनाहारगा ?, गो० ! आहारगावि अनाहारगावि,

नाणी णं भंते ! नेरइया किं आहारगा अनाहारगा ?, गो० ! सव्वेवि ताव होज्ज आहारगा १, अहवा आहारगा य अनाहारगे य २ अहवा आहारगा य अनाहारगा य ३, एवं जाव थणियकुमारा,

बेइंदियाणं पुच्छा, गो० ! सव्वेवि ताव होज्ज आहारगा य १ अहवा अनाहारगा य २ अहवा आहारए य अनाहारए य ३, अहवा आहारगे य अनाहारगा य ४, अहवा आहारगा य अनाहारगे य ५, अहवा आहारगा य अनाहारगा य ६, एवं तेइंदियचउरिंदियावि भाणितव्वा, अवसेसा जाव वेमाणिया जहा नेरइया, सिद्धाणं पुच्छा, गो० ! अनाहारगा य' इति,

आभिनिबोधिकज्ञानिसूत्रे श्रुतज्ञानिसूत्रे चैकवचने प्राग्वदवसेयं, बहुवचने द्वित्रिचतुरिन्द्रियेषु षड् भङ्गाः, अवशेषेषु तु जीवादिषु स्थानेषु एकेन्द्रियवर्जेषु भङ्गत्रिकं, तच्चैवम्–'आभिनिबोहियनाणी णं भंते ! जीवा किं आहारगा अनाहारगा ?, गो० ! सव्वेवि ताव होज्ज आहारगा १ अहवा आहारगा य अनाहारगे य २ अहवा आहारगा य अनाहारगा य ३ इत्यादि, तथा चाह–'आभिनिबोहियनाणी सुयनाणी य बेइंदियतेइंदियचउरिंदिएसु छब्भंगा, अवसेसेसु जीवाइओ तियभंगो, जेसिं अत्थि' इति सुगमं, नवरं 'जेसिं अत्थि' येषां जीवानामाभिनिबोधिकज्ञानश्रुतज्ञाने अतस्तेषु भङ्गत्रिकं वक्तव्यं, न शेषेषु पृथिव्यादिष्विति,

अवधिज्ञानसूत्रमेकवचने तथैव, बहुवचनचिन्तायां पञ्चेन्द्रियतिर्यग्योनिका आहारका एव न त्वनाहारकाः, कस्मादिति चेत्, उच्यते, इह पञ्चेन्द्रियतिरश्चामनाहारकत्वं विग्रहगतौ, न च तदानीं तेषां गुणप्रत्ययतोऽवधिसम्भवो, गुणानामेवासम्भवात्, नाप्यप्रतिपतितावधिर्देवो मनुष्यो वा तिर्यक्षूत्पद्यते, ततोऽवधिज्ञानिनः सतः पञ्चेन्द्रियतिरश्चोऽनाहारकत्वायोगः, शेषेषु तु स्थानष्वेकेन्द्रिय विकलेन्द्रियवर्जेषु प्रत्येकं भङ्गत्रिकं, तदेवाह–'ओहिनाणी णं पंचिंदियतिरिक्खजोणिया आहारगा अवसेसेसु जीवाइओ तियभगो जेसिं अत्थि ओहिनाण'मिति,

मनःपर्यायज्ञानमं मनुष्याणामेव, तत द्वे पदे, तद्यथा–जीवपदं मनुष्यपदं च, उभयत्रापि चैकवचने बहुवचने च मनःपर्यायज्ञानन आहारका एत्र वक्तव्या;, न त्वनाहारकाः, विग्रहगत्याद्यवस्थायां मनःपर्यायज्ञानासम्भवात्,

केवलज्ञानी यथा प्राग् नोसंज्ञीनोअसंज्ञी उक्तस्तथा वक्तव्यः, किमुक्तं भवति ?–

केवलज्ञानचिन्तायामपि त्रीणि पदानि, तद्यथा-सामान्यतो जीवपदं मनुष्यपदं सिद्धपदं च, तत्र सामान्यतो जीवपदे मनुष्यपदे चैकवचने स्यादाहारकः स्यादनाहारक इति वक्तव्यं, सिद्धपदे त्वनाहारक इति, बहुवचने सामान्यतो जीवपदे आहारका अपि अनाहारका अपि, मनुष्यपदे भङ्गत्रिकं, तच्च प्रागेवोपदर्शितं, सिद्धपदे त्वनाहारका अपि।

अज्ञानिसूत्रं मत्यज्ञानिसूत्रं श्रुताज्ञानिसूत्रं एकवचने प्रागिव, बहुवचनतचिन्तायां जीवपदे एकेन्द्रियेषु च पृथिव्यादिषु प्रत्येकमाहारका अनाहारका अपि इति वक्तव्यं, शेषेषु तु भङ्गत्रिकं, विभङ्गज्ञानिसूत्रमप्येकवचने तथैव, बहुवचनचिन्तायां पञ्चेन्द्रियतिर्यग्योनिका मनुष्याश्चाहारका एव वक्तव्याः, न त्वनाहारकाः, विभङ्गज्ञानसहितस्य विग्रहगत्या तिर्यक्पञ्चेन्द्रियेषु मनुष्येषु चोत्पत्त्यसम्भवात्, अवशेषेषु स्थानेषु एकेन्द्रियविकलेन्द्रियवर्जेषु प्रत्येकं भङ्गत्रिकं।

-: पदं - २८, उद्देशकः - २ - द्वारं ९ "योगः" :-

मू. (५६७) सजोगीसु जीवेगिंदियवज्जो तियभंगो, मणजोगी वइजोगी जहा सम्मामिच्छद्दिट्ठी, नवरं वइजोगो विगलिंदियाणंवि, कायजोगीसु जीवेगिंदियवज्जो तियभंगो, अजोगी जीवमनूससिद्धा अनाहारगा।

वृ. गतं ज्ञानद्वारं, सम्प्रति योगद्वारं-तत्र सामान्यतः सयोगिसूत्रमेकवचने तथैव, बहुवचने जीवएकेन्द्रियपदानि वर्जयित्वा शेषेषु स्थानेषु भङ्गत्रिकं, जीवपदे पृथिव्यादिपदेषु च पुनः प्रत्येकमाहारका अपि अनाहारका अपीति भङ्गः, उभयेषामपि सदैव तेषुस्थानेषु बहुत्वेन लभ्यमानत्वात् 'मणजोगी वइजोगी जहा सम्मामिच्छद्दिट्ठी य'त्ति मनोयोगिनो वाग्योगिनश्च यथा प्राक् सम्यग्मिथ्यादृष्टय उक्तास्तथा वक्तव्याः, एकवचने बहुवचने चाहारका एव वक्तव्या न त्वनाहारका इति भावः, नवरं 'वइजोगो विगलिंदियाणवि'त्ति नवरमिति-सम्यग्मिथ्यादृष्टिसूत्रादत्रायं विशेषः, सम्यग्मिथ्यादृष्टित्वं विकलेन्द्रियाणां नास्तीति तत्सूत्रं तत्र नोक्तं, वाग्योगः पुनर्विकलेन्द्रियाणामप्यस्तीति तत्सूत्रमपि वाग्योगे वक्तव्यं, तच्चैवम्-

'मणजोगी णं भंते! जीवे किं आहारए अनाहारए?, गो०! आहारए नो अनाहारएस, एवं एगिंदियविगलिंदियवज्जं जाव वेमाणिए, एवं पुहुत्तेणवि,, वइजोगी णं भंते! किं आहा० अना०?, गो०! आहारए नो अनाहारए, एवं एगिंदियवज्जं जाव वेमाणिए, एवं पुहुत्तेणवि'त्ति, काययोगिसूत्रमप्येकवचने बहुवचने च सामान्यतः सयोगिसूत्रमिव, अयोगिनो मनुष्यः सिद्धाश्च, तेनात्र त्रीणि पदानि, तद्यथा-जीवपदं मनुष्यपदं सिद्धपदं च, त्रिष्वपि स्थानेष्वेकवचने बहुवचने चानाहारकत्वमेव।

-: पदं - २८, उद्देशकः - २ - द्वारं - १० "उपयोगः" :-

मू. (५६८) साकारानागारोवउत्तेसु जीवेगिंदियवज्जो तियभंगो, सिद्धा अनाहारगा।

वृ. गतं योगद्वारं, अधुनोपयोगद्वारमाह-तत्र साकारोपयोगसूत्रे अनाकारोपयोगसूत्रे च प्रत्येकमेकवचने सर्वत्र स्यादाहारकः स्यादनाहारक इति वक्तव्यं, सिद्धपदे त्वनाहारक इति, बहुवचने जीवपदे पृथिव्यादिपदेषु चाहारका अपि अनाहारका अपि इति भङ्गः, शेषेषु भङ्गत्रिकं, सिद्धास्त्वनाहारका इति, सूत्रोल्लेस्तत्त्वयम्-सागारोवउत्ते णं भंते! जीवे किं आहारए अनाहारए गो०! सिय आहारए सिय अनाहारए' इत्यादि।

-: पदं – २८, उद्देशकः– २ – द्वारं – ११ "वेद" :-

मू. *(५६९) सवेदे जीवेगिंदियवज्जो तियभंगो, इत्थिवेदपुरिसवेदेसु जीवादिओ तियभंगो, नपुंसगवेदए य जीवेगिंदियवज्जो तियभंगो, अवेदए जहा केवलनाणी ।*

वृ. गतं उपयोगद्वारं, वेदद्वारे सामान्यतः सवेदसूत्रमेकवचने स्यादाहारकः स्यादनाहारक इति, बहुवचने जीव पदमेकेन्द्रियांश्च वर्जयित्वा शेषेषु स्थानेषु भङ्गत्रिकं, जीवपदे एकेन्द्रियेषु च पुनः प्रत्येकमभङ्गकं, आहारका अनाहारका अपीति, स्त्रीवेदसूत्रं पुरुषवेदसूत्रं च एकवचने तथैव, नवरमत्र नैरयिकैकेन्द्रियविकलेन्द्रिया न वक्तव्याः तेषां नपुंसकत्वात्, बहुवचने जीवादिषु पदेषु प्रत्येकं भङ्गत्रिकं,

नपुंसकवेदेऽपि सूत्रमेकवचने तथैव, नवरमत्र भवनपति व्यन्तरज्योतिष्कवैमानिका न वक्तव्यास्तेषामनपुंसकत्वाद्, बहुवचने जीवैकेन्द्रियवर्जेषु भङ्गत्रिकं, जीवपदे एकेन्द्रियपदेषु च पृथिव्यादिषु पुनरभङ्गकं प्रागुक्तस्वरूपमिति, अवेदो यथा केवली तथा एकवचने बहुवचने च वक्तव्यः, जीवपदे मनुष्यपदे च एकवचने स्यादाहारकः स्यादनाहारक इति, बहुवचने जीवपदे आहारका अपि अनाहारका अपि, मनुष्येषु भङ्गत्रिकं, सिद्धत्वेऽनाहारका इति वक्तव्यमिति भावः ।

-: पदं – २८, उद्देशकः– २ – द्वारं १२ "शरीरं" :-

मू. *(५७०) ससरीरी जीवेगिंदियवज्जो तियभंगो, ओरालियसरीरी जीवमणूसेसु तियभंगो, अवसेसा आहारगा नो अनाहारगा जेसिं अत्थि ओरालियसरीरं, वेउव्वियसरीरी आहारगसरीरी य आहारगा नो अना० जेसिं अत्थिस तेयकम्मसरीरी जीवेगिंदियवज्जो तियभंगो, असरीरी जीवा सिद्धा य नो आहारगा अना० ।*

वृ. गतं वेदद्वारं, शरीरद्वारे सामान्यतः शरीरसूत्रे सर्वत्रैकवचने स्यादाहारकः स्यादनाहारक इति, बहुवचने जीवएकेन्द्रियवर्जेषु शेषेषु स्थानेषु प्रत्येकं भङ्गत्रिकं, जीवपदे पृथिव्यादिपदेषु च प्रत्येकमभङ्गकं प्रागुक्तमिति,

औदारिकशरीरसूत्रमेकवचने तथैव, नवरमत्र नैरयिकभवनपतिव्यन्तरज्योतिष्कवैमानिका न वक्तव्यास्तेषामौदारिकशरीरामावात्, बहुवचने जीवपदे मनुष्यपदेषु च प्रत्येकं भङ्गत्रिकं, तद्यथा–सर्वेऽपि तावद्भवेयुराहारकाः एष भङ्गो यदा न कोऽपि केवली समुद्घातगतोऽयोगी वा, अथवा आहारकाश्चानाहारकश्च, एष एकस्मिन् केवलिनि समुद्घातगते अयोगिनि वा सति प्राप्यते, अथवा आहारकाश्चानाहारकाश्च, एषं भङ्गो बहुषु केवलिसमुद्घातगतेषु अयोगिषु वा सत्सु वेदयितव्यः, शेषास्त्वेकेन्द्रियद्वीन्द्रियत्रीन्द्रिय चतुरिन्द्रियतिर्यक्पञ्चेन्द्रिया आहारका एव वक्तव्याः, न त्वनाहारकाः, विग्रहगत्युत्तीर्णानामेवौदारिकशरीरसम्भवात्,

वैक्रियआहारकशरीरिणश्च सर्वेऽप्येकवचने बहुवचने चाहारका एव न त्वनाहारकाः, नवरं येषां वैक्रियमाहारकं वा सम्भवति त एव वक्तव्या नान्ये, तत्र वैक्रियं नैरयिकभवनपतिवायुकायिकतिर्यक्पञ्चेन्द्रियमनुष्यव्यन्तरज्योतिष्कवैमानिकेषु आहारकं मनुष्येष्वेव, सूत्रोल्लेखश्चायं–'वेउव्वियसरीरी णं भंते ! जीवे किं आहारए अनाहारए ?, गोयमा ! आ० नो अना०, वेउव्वियसरीरे णं भंते ! नेरइए किं आहारए अनाहारए ?, गो० ! आ० नो अना०' इत्यादि, तैजसकार्मणशरीरिसूत्रे चैकवचने सर्वत्र स्यादाहारकः स्यादनाहारक इति, बहुवचने

जीवैकेन्द्रियवर्जेषु शेषेषु स्थानेषु भङ्गत्रिकं, जीवपदे एकेन्द्रियेषु च पुनरभङ्गकं,

अशरीरिणः-सिद्धास्तेन तत्र द्वे एव पदे, तद्यथा-जीवाः सिद्धाश्च, तत्र एकवचने बहुवचने चोभयत्राप्यनाहारका एव।

-: पदं - २८, उद्देशकः - २ - द्वारं - १३ "पर्याप्तिः" :-

मू. (५७१) *आहारपज्जत्तीए पज्जत्ते सरीरपज्जत्तीए पज्जत्ते इंदियपज्जत्तीए पज्जत्ते आणापाणपज्जत्तीए पज्जत्तए भासामनपज्जत्तीए पज्जत्ते एतासु पंचसुवि पज्जत्तीसु जीवेसु मणूसेसु य तियभंगो, अवसेसा आहारगा नो अनाहारगा, भासामनपज्जत्ती पंचिंदियाणं अवसेसाणं नत्थि,*

आहारपज्जत्तीअपज्जत्तए नो आहारए अना०, एगत्तेणवि पुहुत्तेणवि, सरीरपज्जत्तीअपज्जत्तए सिय आहारए सिय अनाहारए, उवरिल्लियासु चउसु अपज्जत्तीसु नेरइयदेवमणूसेसु छब्भंगा, अवसेसाणं जीवेगिंदियवज्जो तियभंगो, भासामनपज्जत्तएसु जीवेसु पंचिंदियतिरिक्खजोणिएसु य तियभंगो, नेरइयदेवमणुएसु छब्भंगा,

सव्वपदेसु एगत्तपोहत्तेणं जीवादिया दंडगा पुच्छाए भणितव्वा जस्स जं अत्थि तस्स तं पुच्छिज्जति जस्स जं णत्थि तस्स तं न पुच्छिज्जति जाव भासामनपज्जत्तीअपज्जत्तएसु नेरइयदेवमणुएसु छब्भंगा, सेसेसु तियभंगो

वृ. गतं शरीरद्वारं, सम्प्रति पर्याप्तिद्वारम्-तत्रागमे पर्याप्तयः पञ्च, भाषामनःपर्याप्त्योरेकत्वेन विवक्षणात्, तथा चाहारकपर्याप्तया पर्याप्ते शरीरपर्याप्तया पर्याप्ते इन्द्रियपर्याप्तया पर्याप्ते प्राणापानपर्याप्तया पर्याप्ते भाषामःपर्याप्तया पर्याप्ते चिन्त्यमाने, अत्रैव सर्वसङ्कलनामाह-

एतासु पञ्चस्वपि पर्याप्तिषु समर्थितासु चिन्त्यमानास्विति शेषः प्रत्येकमेकवचने जीवपदे मनुष्यपदे च स्यादाहारकः स्यादनाहारक इति, शेषेषु तु स्थानेषु आहारक इति, बहुवचने 'जीवेसु मणुस्सेसु य तियभंगो'त्ति जीवपदे मनुष्यपदे च भङ्गत्रिकं वक्तव्यं, तद्यौदारिकशरीरिसूत्रमिव भावनीयं, अवशेषाः सर्वेऽप्याहारका वक्तव्याः, नवरं भाषामनः पर्याप्तिः पञ्चेन्द्रियाणामेवेति तत्सूत्रे एकेन्द्रियविकलेन्द्रिया न वक्तव्याः, किन्तु शेषाः, एतदेवाए-

'भासामनपज्जत्ती पंचिंदियाणं अवसेसाणं नत्थि' इति, आहारपर्याप्तयपर्याप्तकसूत्रे एकवचने सर्वत्राप्यनाहारको वक्तव्यो, नो आहारकः, आहारपर्याप्तयाऽपर्याप्तो विग्रहगतावेव लभ्यते, उपपातक्षेत्रं प्राप्तस्य प्रथमसमय एवाहारपर्याप्ताय पर्याप्तत्वभावाद् अन्यथा तस्मिन् समये आहारकत्वानुपपत्तेः, बहुवचने त्वनाहारका इति, शरीरपर्याप्तयपर्याप्तसूत्रे एकवचने सर्वत्र स्यादाहारकः-स्यादनाहारक इति, तत्र विग्रहगतावनाहारक उपपातक्षेत्रप्राप्तस्तु शरीरपर्याप्तिपरिसमाप्तिं यावदाहारक इति, एवमिन्द्रियपर्याप्तयपर्याप्तसूत्रे प्राणापानपर्याप्तयपर्याप्तसूत्रे भाषामनःपर्याप्तयपर्याप्तसूत्रे च प्रत्येकं एकवचने स्यादाहारकः स्यादनाहारक इति वक्तव्यं, बहुवचने

'उवरिल्लियासु' इत्यादि, उपरितनीषु शरीरापर्याप्तिप्रभृतिषु चतसृष्वपर्याप्तिषु चिन्त्यमानासु प्रत्येकं नैरयिकदेवमनुष्येषु षड् भङ्गा वक्तव्याः, तद्यथा-कदाचित्सर्वेऽप्यनाहारका एव १ कदाचित्सर्वेऽप्याहारका एव २ कदाचिदेक आहारक एकोऽनाहारकः ३ कदाचिदेक आहारको बहवोऽनाहारकाः ४ कदाचिद्बहव आहारकाः एकश्चानाहारकः ५ कदाचिद्बहव आहारका बहवश्चानाहारकाः ६, अवशेषाणां नैरयिकदेवमनुष्यव्यतिरिक्तानां जीवैकेन्द्रियवर्जानां भङ्गत्रिकं वक्तव्यं, तद्यथा- सर्वेऽपि तावद्बवेयुः आहारकाः १ अथवा आहारकाश्च अनाहारकश्च २

अथवा आहार- काश्चनाहारकाश्च ३, जीवपदे एकेन्द्रियपदेषु च पुनः शरीरपर्याप्तयपर्याप्तसूत्रे इन्द्रियपर्याप्तयपर्याप्त-सूत्रे प्राणापानपर्याप्तयपर्याप्तसूत्रे च प्रत्येकमभङ्गकं आहारका अपि अनाहारका अपि, उभयेषामपि च सदा बहुत्वेन लभ्यमानत्वात्, भाषामनःपर्याप्तयपर्याप्तकास्त्वेकेन्द्रिय-विकलेन्द्रिया न भवन्ति, किन्तु पञ्चेन्द्रिया एव, शेषां हि भाषामनः पर्याप्तिसम्भवोऽस्ति त एव तत्पर्याप्तयपर्याप्तकाः प्रोच्यन्ते, न शेषा इति, ततस्तत्सूत्रे बहुवचने जीवपदे पञ्चेन्द्रियतिर्यग्योनिकपदे च भङ्गत्रिकं,

पञ्चेन्द्रियतिर्यञ्चो हि सम्मूर्च्छिमाः सदैव बहवो लभ्यन्ते, ततो यावदद्याप्यन्यो विग्रहगत्यापन्नः पञ्चेन्द्रियतिर्यग् न लभ्यये तावदेष भङ्गः—सर्वेऽपि तावद् भवेयुराहारका इति १, एकस्मिन् तस्मिन् विग्रहगत्यापन्ने लभ्यमाने द्वीतीय भङ्गः—आहारकाश्चानाहारकश्चेति २, यदा तु विग्रहत्यापन्ना अपि बहवो लभ्यन्ते तदा तृतीयो भङ्गः—आहारकाश्चनाहारकाश्चेति ३, जीवपदेऽपि भङ्गत्रिकं एतदपेक्षया प्रत्येयं, नैरयिकदेवमनुष्येषु प्रत्येकं षड् भङ्गाः, ते च प्रागेवोक्ताः, इह भव्यपदादारभ्य प्राय एकत्वेन बहुत्वेन च वैविक्तयेन सूत्राणि जीवादिदण्डकक्रमेण नोकातानि ततो मा भून्मन्दमतीनां सम्मोह इति तद्विषयमतिदेशमाह—

'सव्वपएसु एगत्ते'त्यादि, एते जीवादयो दण्डका; सर्वपदेषु—सर्वेष्वु पदेषु एकत्वेन बहुत्वेन च पृच्छयाउपलक्षणमेतच्चिर्वचनेन भणितव्याः किं सर्वत्राप्यनविशेषेण कर्त्तव्याः ?, नेत्याह—'जस्से'त्यादि, यस्य यदस्ति तस्य तत्पृच्छयते—तद्विषयं सूत्रं भण्यते, यस्य पुनः यन्नास्ति न तस्य तत्प्रष्टव्यं—न तद्विषयं तस्य सूत्रं वक्तव्यमिति भावः कियद्दूरं यावदेवं कर्त्तव्यमिति शङ्कायां चरमदण्डकवक्तव्यतामुपदिशति—'जाव भासामनपज्जत्तीए अपज्जत्तएसु' इत्यादि, भावितार्थं, इहाधिकृतार्थभावनार्थमिमाः पूर्वाचार्यप्रतिपादिता गाथाः—

॥ १ ॥ "सिद्धेगिंदियसहिया जहिं तु जीवा अभंगयं तत्थ
सिद्धेगिंदियवज्जेहिं होइ जीवेहिं तियभंगो ॥

॥ २ ॥ असण्णीसु य नेरइय देवमणुएसु होंति छब्भंगा ।
पुढविदगतरुगणेसु य छब्भंगा तेउलेसाए ॥

॥ ३ ॥ कोहे माणे माया छब्भगा सुरगणेसु सव्वेसुं ।
माणे माया लोभे नेरइएहिंपि छब्भंगा ॥

॥ ४ ॥ आभिनिबोहियनाणे सुयनाणे खलु तहेव सम्मत्ते ।
छब्भंगा खलु नियमा वियतियचउरिंदिएसु भवे ॥

॥ ५ ॥ उवरिल्लापज्जत्तीसु चउसु नेरइयदेवमणुएसुं ।
छब्भंगा खलु नियमा वज्जे पढमा उ अपज्जत्ती ॥

॥ ६ ॥ सण्णी विसुद्धलेसा संजय हिट्ठिल्ल तिसु य नाणेसु ।
थीपुरिसाण य वेदेवि छब्भंग अवेय तियभंगो ॥

॥ ७ ॥ सम्मामिच्छामणवइमणनाणे बालपंडियविउव्वी ।
आहारसरीरंमि य नियमा आहारया होंति ॥

॥ ८ ॥ ओहिंमि विभंगंमि य नियमा आहारया उ नायव्वा ।
पंचिंदिया तिरिच्छा मणुया पुन होंति विब्भंगे ॥

॥ ९ ॥ ओरालसरीरंमि य पज्जत्तीणं च पंच सु तहेव ।
तियभंगो जियमणुएसु होंति आहारगा सेसा ॥
॥ १० ॥ नोभवअभविय लेसा अजोगिणो तहय होंति असरीरी ।
पढमाए अपज्जत्तीए ते उ नियमा अनाहारा ॥
॥ ११ ॥ सन्नासन्नविउत्ता अवेय अकसाइणो य केवलिणो ।
तियभंग एक्कवयणे सिद्धाऽनाहारया होंति ॥"

एताश्च सर्वा अपि गाथा उक्तार्थप्रतिपादकत्वाद् भावितार्था इति न भूयो भाव्यन्ते ग्रन्थगौरवभयात्, नवरं, 'एक्कवयणे सिद्धानाहारया होंति' इति 'एकवयणे' इत्यत्र तृतीयार्थे सप्तमी एकवचनेन एकार्थेनेति भावः, सर्वत्र सिद्धा अनाहारका भवन्तीति विज्ञेयम् ॥

पदं – २८, उद्देशकः – २ समाप्तः

पदं – २८, समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे अष्टाविंशतितमपदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता ।

पदं – २९ – उपयोगः

मू. तदेवमुक्तमष्टाविंशतितममाहाराख्यं पदे, साम्प्रतमेकोनत्रिंशत्तममारभ्यते–अस्य चायमभिसम्बन्धः–इहानन्तरपदे गतिपरिणामविशेष आहारपरिणाम उक्तः, इह तु ज्ञानपरिणामविशेषः उपयोगः प्रतिपाद्यते, तत्र चेदमादिसूत्रम्–

मू. (५७२) *कइविहे णं भंते ! उवओगे पं० ?, गो० ! दुविहे उवओगे पं०, तं०–सागारोवओगे य अनागारोवओगे य,*

सागारोवओगे णं भंते ! कतिविधे पं० ?, गो० ! अट्ठविहे पं०, तं०–आभिनिबोहियनाणसागारोवओगे सुयनाणसागारोवओगे ओहिनाणसा० मनपज्जवनाणसा० केवलनाणसा० मतिअन्नाणसा० सुयअन्नाणसा० विभंगनाणसा० ।

अनागारोवओगे णं भंते ! कतिविहे पं० ?, गो० ! चउव्विहे, पं०, तं०–चक्खुदंसणअनागारोवओगे अचक्खुदंसणअना० ओहिदंसणनागा० केवलदंसणअनागारोवओगे य । एवं जीवाणं,

नेरइयाणं भंते ! कतिविधे उवओगे पं० ?, गो० ! दुविधे उवओगे पं०, तं०–सागारोवओगे य अनागारोवओगे य, नेरइयाणं भंते ! सागारोवओगे कइविहे पं० ?, गो० ! छव्विहे पं०, तं०–मतिनाणसागारोवओगे सुयनाणसा० ओहिनाणसा० मतिअन्नाणसा० सुयअन्नाण० विभंगनाणसा०, नेरइया णं भंते ! अनागारोवगे कइविहे पं० तं० ?, गो० ! तिविहे पं०–चक्खुदंसण० अचक्खुदंसण० ओहिदंसणअना०, एवं जाव थणियकुमाराणं ।

पुढविकाइयाणं पुच्छा, गो० ! दु० उवओगे पं०, तं०–सागारो० अनागारोव०, पुढवि० सागारोवओगे कतिविधे पं० ?, गो० ! दु० पं०, तं०– मतिअन्नाण० सुयअ०, पुढविका० अनगारोवओगे कतिविधे पं० ?, गो० ! एगे अचक्खुदंसणअनागारोवओगे पं०, एवं जाव वणप्फइकाइयाणं ।

बेइंदियाणं पुच्छा, गो० ! दुविधे उवओगे पं०, तं०—सागारोवओगे अनागारोवओगे य, बेइंदियाणं भंते ! सागारोवओगे कतिविधे पं० ?, गो० ! चउव्विहे पं०, तं०—आभिनि० सुय० मतिअन्नाण० सुतअन्नाणसा०, बेइंदियाणं अना० कइ० पं० ?, गो० ! एगे अचक्खुदंसण० अनागारोवओगे, एवं तेइंदियाणंवि, चउरिंदियाणवि एवं चेव, नवरं अनागारोवओगे दुविधे पं० तं०—चक्खुदंसणअना० अचक्खुदंसणअना० । पंचिंदियतिरिक्खजोणियाणं जहा नेरइयाणं मणुस्साणं जहा ओहिए उवओगे भणितं तहेव भाणितव्वं । वाणंतरजोतिसियवेमाणियाणं भंते जहा नेरइयाणं ।

जीवा णं भंते ! किं सागारोवउत्ता अनागारोवउत्ता ?, गो० ! सागारोवउत्तावि अना०, से केणट्ठेणं भंते ! एवं वुच्चइ जीवा सागारोवउत्तावि अना० ?, गो० ! जे णं जीवा आभिनिबोहियनाण० सुय० ओहि० मन० केवल० मइअनाणसुयअन्नाणविभंगनाणोवउत्ता ते णं जीवा सागारोवउत्ता, जे णं जीवा चक्खुदंसणअचक्खुदंसणओहिदंसणकेवलदंसणोवउत्ता ते णं जीवा अनागारोवउत्ता, से तेणट्ठेणं गो० ! एवं वुच्चइ जीवा सागारोवउत्तावि अनागारो०,

नेरइया णं भंते ! किं सागारोवउत्ता अना० ?, गो० ! नेरइया सागारोवउत्तावि अनागा०, से केणट्ठेणं भंते ! एवं वुच्चति ?, गो० ! जे णं नेरइया आभिनिबोहियनाण सुय० ओहि० मतिअन्नाणसुय० विभंगनाणोवउत्तातें णं नेरइया सागा०, जे णं नेरइया चक्खुदंसणअचक्खुदंसणओहि० ते णं नेरइया अनागारोवउत्ता, से तेणट्ठेणं गो० ! एवं वु० जाव सागारोवउत्तावि अनागारोवउत्तावि, एवं जाव थणियकुमारा ।

पुढविकाइयाणं पुच्छा, गो० ! तहेव जाव जे णं पुढवि० ! मतिअन्नाणसुयअन्नाणोवउत्ता ते णं पुढवि० सागरोव०, जे णं पुढवि० अचक्खुदंसणोवउत्ता ते णं पुढ० अनागारोवउत्ता, से तेणट्ठेणं गो० ! एवं वु० जाव वणप्फइकाइया ।

बेइंदियाणं भंते ! अट्ठसहिया तहेव पुच्छा, गो० ! जाव जे णं बेइंदिया आभिनिबोहिय० सुयनाणमतिअन्नाणसुयअन्नाणोवउत्ता ते णं बेइंदिया सागारोवउत्ता, जे णं बेइंदिया अचक्खुदंसणोवउत्ता ते णं अनागा०, से तेणट्ठेणं, गो० ! एवं वु० एवं जाव चउरिंदिया, नवरं चक्खुदंसणं अब्भहियं चउरिंदियाणंति, पंचिंदियतिरिक्खजोणिया जहा नेरइया, मणूसा जहा जीवा, वाणंतरजोतिसियवेमाणिया जहा नेरइया (पन्नवणाए भगवईए एगूणतीसइमं उवओगपयं समत्तं)

वृ. 'कइविहे णं भंते ! उवओगे पं०' कतिविधः—कतिप्रकारः, सूत्रे एकारो मागधभाषालक्षणवशात्, णमिति वाक्यालङ्कृतौ, भदन्त !—परमकल्याणयोगिन् ! 'उपयोगः' उपयोजनमुपयोगः भावे घञ्, यद्वा उपयुज्यते—वस्तुपरिच्छेदं प्रति व्यापार्यते जीवोऽनेनेत्युपयोगः— 'पुंनाम्नि घ' इति करणे घप्रत्ययो बोधरूपो जीवस्य तत्त्वभूतो व्यापारः प्रज्ञप्तः—प्रतिपादितः ?, भगवानाह—'गोयमे' त्यादि, आकारः—प्रतिनियतोऽर्थग्रहणपरिणामः,

'आगारो अविसेसो' इति वचनात्, सह आकारेण वर्त्तत इति साकारः स चासावुपयोगश्च साकारोपयोगः, किमुक्तं भवति ? —सचेतने अचेतने वा वस्तुनि उपयुञ्जान आत्मा यदा सपर्यायमेव वस्तु परिच्छिनत्ति तदा स उपयोगः साकार उच्यते इति, स च कालतः छद्मस्थानमन्तर्मुहूर्त्तं कालं केवलिनामेकसामयिकः, तथा न विद्यते यथोक्तरूप आकारो यत्र सोऽनाकारः स चासावुपयोगश्च अनाकारोपयोगः, वस्तुनः सामान्यरूपतया परिच्छेदः सोऽनाकारोपयोगः स्कन्धावारोपयोग-

वदित्यर्तः, असावपि : छद्मस्थानामान्तर्मुहूर्त्तिकः परमानाकारोपयोगकालत् साकारोपयोगकालः सङ्ख्येयगुणः प्रतिपत्तव्यः, पर्यापरिच्छेदकतया चिरकाललगनात्, छद्मस्थानां तथास्वाभाव्यात्, केवलिनां त्वनाकारोऽप्युपयोग एकसामयिकः, चशब्दौ स्वगतानेकभेदसूचकौ, तत्र साकारोपयोगभेदानभिधित्सुरिदमाह--

'सागारोवओगे णं भंते!' इति, अर्थाभिमुखो नियतः--प्रतिनियतस्वरूपो बोधो--बोधविशेषो अभिनिबोधः अभिनिबोध एव आभिनिबोधिकं, अभिनिबोधशब्दस्य विनयादिपाठाभ्युपगमात् 'विनयादिभ्य' इत्यनेन स्वार्थे इकण् प्रत्ययः, 'अतिवर्त्तन्ते स्वार्थे प्रत्ययकाः प्रकृतिलिङ्गवचनानी' तिवचनादत्र नपुंसकता, यथा विनय एव वैनयिकमित्यत्र, अथवा अभिनिबुध्यतेऽस्मादस्मिन्वेति अभिनिबोधः--तदावरणकर्मक्षयोपशमस्तेन निर्वृत्तमाभिनिबोधिकं तच्च तज्ज्ञानं च आभिनिबोधिकज्ञानं, स च इन्द्रियमनोनिमित्तो योग्यदेशावस्थितवस्तुविषयः स्फुटप्रतिभासो बोधविशेष इत्यर्थः,स चासौ साकारोपयोगश्च आभिनिबोधिकज्ञानसाकारोपयोगः, एवं सर्वत्रापि समासः कर्त्तव्यः,

तथा श्रवणं श्रुतं--वाच्यवाचकभावपुरस्सरीकारेण शब्दसंस्पृष्टार्थग्रहणहेतुरुपलब्धिविशेषः, एवमाकारं वस्तु घटशब्दवाच्यं जलधारणाद्यर्थक्रियासमर्थमित्यादिरूपतया प्रधानीकृतः समानपरिणामः शब्दार्थपर्यालोचनानुसारी इन्द्रियमनोनिमित्तोऽवगमविशेष इत्यर्थः, श्रुतं च तत् ज्ञानं च श्रुतज्ञानं, ततो भूय; साकारोपयोगशब्देन विशेषणसमासः, तथाऽवशब्दोऽधःशब्दार्थः, अव--अधो विस्तृतं वस्तु धीयते--परिच्छिद्यतेऽनेनेत्यवधिः, यद्वा अवधिः--मर्यादा रूपिष्वेव द्रव्येषु परिच्छेदकतया प्रवृत्तिरूपा तदुपलक्षितं ज्ञानमप्यवधिः, अवधिश्चासौ ज्ञानं चावधिज्ञानं,

तथा परिः--सर्वतो भावे अवनं अवः, 'तुदादिभ्योऽन्का' वित्यधिकारे 'अकितौ चे' त्यकारप्रत्ययः, अवनं गमनमिति पर्यायाः, परिअवः पर्यवः, मनसि मनसो वा पर्यवः मनःपर्यवः, सर्वतस्परिच्छेद इत्यर्थः, पाठान्तरं पर्यय इति, तत्र पर्ययणं पर्ययः बावेऽल्प्रत्ययः, मनसि मनसो वा पर्ययः मनःपर्ययः, सर्वतस्तत्परिच्छेद इत्यर्थः, स चासौ ज्ञानं च मनःपर्यवज्ञानं मनःपर्ययज्ञानं वा, अथवा मनःपर्यायेति पाठान्तरं, तत्र मनांसि पर्येति--सर्वात्मना परिच्छिनत्ति मनःपर्यायं, 'कर्णोषऽण्' मनःपर्यायं च तत् ज्ञानं च मनःपर्यायज्ञान, यदिवा मनसः पर्यायाः मनःपर्यायाः, पर्याया धर्मा बाह्यवस्त्वालोचनप्रकारा इत्यनर्थान्तरं, तेषु तेषां वा सम्बन्धि ज्ञानं मनःपर्यायज्ञानं, इदं चार्द्धतृतीयद्वीपसमुद्रान्तर्वर्त्तिसंज्ञिमनोगतद्रव्यालम्बनं,

तथा केवलं--एकं मत्यादिज्ञाननिरपेक्षत्वात्, 'नट्ठंमि उ छाउमत्थिए नाणे' इति वचनात् शुद्धं वा केवलं तदावरणमलकलङ्कविगमात् सकलं वा केवलं प्रथमत एवाशेषतदावरणविगतमः सम्पूर्णोत्पत्तेः असाधारणं वा केवलमनन्यसदृशत्वात् अनन्तं वा केवलं ज्ञेयानन्तात्वात्, केवलं च तत् ज्ञानं च केवलज्ञानं, तथा मतिश्रुतावधय एव यदा मिथ्यात्वकलुषिता भवन्ति तदा यथाक्रमं मत्यज्ञानश्रुताज्ञानविभङ्गज्ञानव्यपदेशांल्लभन्ते, उक्तं च--"आद्यत्रयमज्ञानमपि भवति मिथ्यात्वसंयुक्त"मिति, 'विभङ्ग' इतिविपरतो भङ्गः--परिच्छित्तिप्रकारो यस्य तत् विभङ्गं, तच्च तत् ज्ञानं च विभङ्गज्ञानं, सर्वत्रापि च साकारोपयोगशब्देन विशेषणसमासः ।

अनाकारोपयोगभेदानभिधित्सुराह--'अनागारोवओगे णं भंते!' इत्यादि, तत्र चक्षुषा--चक्षुरिन्द्रियेण दर्शनं रूपसामान्यग्रहणलक्षणं चक्षुर्दर्शनं तच्च तत् अनाकारोपयोगः चक्षुर्दर्शनाना-

कारोपयोगः, अचक्षुषा-चक्षुर्वर्जशेषेन्द्रियमनोभिर्दर्शनं-स्वस्वविषये सामान्यग्रहणमचक्षुर्दर्शनं, ततोऽनाकारोपयोगशब्देन विशेषणसमासः, एवमुत्तरत्रापि, अवधिरेव दर्शनं-सामान्यग्रहणमवधिदर्शनं, केवलमेव सकलजगद्भाविसमस्तवस्तुसामान्यपरिच्छेदरूपं दर्शनं केवलदर्शनं, अथ मनःपर्यायदर्शनमपि कस्मान्न भवति येन पञ्चमोऽनाकारोपयोगो न भवतिति चेत् ?, उच्यते, मनःपर्यायविषयं हि ज्ञानं मनसः पर्यायनेव विविक्तान् गृह्णदुपजायते, पर्यायाश्च विशेषाः, विशेषालम्बनं [illegible] ज्ञानमेव न दर्शनमिति [illegible] पञ्चमानाकारोपयोगासम्भव इति । 'एवं जीवाण'मित्यादि, एवं निर्विशेषणोपयोगवत् जीवानामप्युपयोगो द्विविधः प्रज्ञप्तो भणितव्यः, तत्रापि साकारोपयोगोऽष्टविधोऽनाकारोपयोगश्चतुर्विधः, एतदुक्तं भवति-यथा प्राक् जीवपदरहितमुपयोगसूत्रं सामान्यत उक्तं तथा जीवपदसहितमपि भणितव्यं, तद्यथा-'जीवाणं भंते ! कतिविधे उवओगे पं० ?, गो० ! दुविधे उवओगे पं०, तं०-सागारोवओगे य अनागारोवओगे य, जीवाणं भंते ! सागारोवओगे कतिविधे पं० ?, गो० ! अट्ठविधे पं० तं०' इत्यादि, तदेवं सामान्यतो जीवानामुपयोगश्चिन्तितः,

सम्प्रति चतुर्विंशतिदण्डकक्रमेण नैरयिकादीनां चिन्तयन्नाह-'नेरइयाणं भंते !' इत्यादि, नैरयिका हि द्विविधा भवन्ति-सम्यग्दृष्टयो मिथ्यादृष्टयश्च, अवधिरपि तेषां भवप्रत्ययोऽवश्यमुपजायते, 'भवप्रत्ययो नारकदेवाना'मिति वचनात्, तत्र सम्यग्दृष्टीनां मतिज्ञानश्रुतज्ञानावधिज्ञानानि मिथ्यादृष्टीनां मत्यज्ञानश्रुताज्ञानविभङ्गज्ञानानीति सामान्यतो नैरयिकाणां षड्विधः साकारोपयोगः, अनाकारोपयोगस्त्रिविधस्तद्यथा-चक्षुर्दर्शनं अचक्षुर्दर्शनमवधिदर्शनं च, एष च त्रिविधोऽप्यनाकारोपयोगः सम्यग्दृशां मिथ्यादृशां चाविशेषेण प्रतिपत्तव्यः, उभयेषामप्यवधिदर्शनस्य सूत्रे प्रतिपादितत्वात्, एवमसुरकुमारादीनां स्तनितकुमारपर्यवसानानां भवनपतीनामप्यवसेयं, पृथिवीकायिकानां साकारोपयोगो द्विविधस्तद्यथा-मत्यज्ञानं श्रुताज्ञानं च, अनाकारोपयोग एकोऽचक्षुर्दर्शनरूपः, शेषोपयोगानां तेषामसम्भवात्, सम्यग्दर्शनादिलब्धिविकलत्वात्, एवमप्तेजोवायुवनस्पतीनामपि वेदितव्य,

द्वीन्द्रियाणां साकारोपयोगश्चतुर्विधः, तद्यथा-मतिज्ञानं श्रुतज्ञानं मत्यज्ञानं श्रुताज्ञानं, तत्रापर्याप्तावस्थायां केषांचित् सासादनभावमासादयतां मतिज्ञानश्रुतज्ञाने शेषाणां तु मत्यज्ञानश्रुताज्ञाने, अनाकारोपयोगस्त्वेकोऽचक्षुर्दर्शनरूपः, शेषोपयोगाणाणं तेषामसम्भवात्, एवं त्रीन्द्रियाणामपि, चतुरिन्द्रियाणामप्येव, नवरमनाकारोपयोगो द्विविधः चक्षुर्दर्शनमचक्षुर्दर्शनं च, पञ्चेन्द्रियतिरश्चां साकारोपयोगः षड्विधस्तद्यथा-मतिज्ञानं श्रुतज्ञानमवधिज्ञानं मत्यज्ञानं श्रुताज्ञानं विभङ्गज्ञानं, अनाकारोपयोगस्त्रिविधस्तद्यथा-चक्षुदर्शनअचक्षुदर्शनं अवधिदर्शनं च, अवधिद्विकस्यापि केषुचित्तेषु सम्भवात्,

मनुष्याणां यथासम्भवमष्टावपि साकारोपयोगाश्चत्वारोऽप्यनाकारो पयोगाः, मनुष्येषु सर्वज्ञानदर्शनलब्धिसम्भवात्, व्यन्तरज्योतिष्कवैमानिका यथा नैरयिकाः, तदेवं सामान्यतश्चतुर्विंशतिदण्डकक्रमेण च जीवानां उपयोगश्चिन्तितः, सम्प्रति मन्दमतिस्पष्टावबोधाय जीवा एव ततस्तदुपयोगोपयुक्ताः, सामान्यतश्चतुर्विंशतिदण्डकक्रमेणचिन्त्यन्ते-'जीवाणंभंते!' इत्यादिसुगमम्

पदं - २९ - समाप्तम्

पदं - ३० - पश्यत्ता

मू. तदेवमुक्तमेकोनत्रिंशत्तमं पदं, सम्प्रति त्रिंशत्तममारभ्यते, अस्य चायमभिसम्बन्धः- इहानन्तरपदे ज्ञानपरिणामविशेष उपयोगोऽभिहितः, इहापि ज्ञानपरिणामविशेषे उपयोगे पश्यत्ता चिन्त्यते इति, तत्र चेदमादिसूत्रम्-

मू. (५७३) *कतिविहा णं भंते ! पासणया पन्नत्ता ?, गो० ! दुविहा पासणया पं० तं०-सागारपासणया अनागारपासणया,*

सागारपासणया णं भंते ! कइविहा पं० ?, गो० ! छव्विहा पन्नत्ता, तं०-सुयनाणपा० ओहिनाणपा० मणपज्जवनाणपा० केवलनाणपा० सुयअन्नाणसागारपा० विभंगनाणसागारपासणया, अनागारपासणया णं भंते ! कइविधा० ?, गो० ! तिविहा पं०, तं० चक्खुदंसणअनागारपा० ओहिदंसणअना० केवलदंसणअना०, एवं जीवाणंपि,

नेरइयाणं भंते ! कतिविधा पासणया पन्नत्ता ?, गो० ! दुविहा पं०, तं०-सागारपासणया० अनागा०, नेरइयाणं भंते ! सागारपा० कइविहा पं० ?, गो० ! चउव्विहा पं०, तं०-सुयणाणपा०ओहिनाणपा० सुअअन्नाणपा० विभंगनाण०, नेरइयाणं भंते ! अनागारपा० कतिविहा पं० ?, गो० ! दुविहा, तं०-चक्खुदंसण० ओहिदं०, एवं जाव थणियकुमारा !

पुढविकाइयाणं भंते ! कतिविहा पासणया पं० गो ?, गो० ! एगा सागारपा०, पुढविकाइयाणं भंते ! सागारपासणया कतिविहा पं० ?, गो० ! एगा सुयअन्नाणसागारपा० पं०, एवं जाव वणप्फइकाइयाणं !

बेइंदियाणं भंते ! कतिविहा पासणया पं० ?, गो० ! एगा सागारपासणा पं०, बेइंदियाणं भंते ! सागारपा० कइविहा पं० ?, गो० ! दु० पं० तं०-सुयनाणसागारपा० सुयअन्नाणसागारपा०, एवं तेइंदियाणवि, चउरिंदियाणं पुच्छा, गो० ! दु० पं०, तं०-सागारपा० अनागारपा०, सागारपासणया जहा बेइंदियाणं, चउरिंदियाणं भंते ! अनागारपा० कइविहा पं० ?, गो० ! एगा चक्खुदंसण० अनागारपा० पं०, मणूसाणं जहा जीवाणं, सेसा जहा नेरइया जाव वेमाणियाणं

जीवा णं भंते ! किं सागारपस्सी अनागारपस्सी ?, गो० ! जीवा सागारपस्स अनागारपस्सी गो० ! जीवा सागारपस्सीवि अनागारपस्सीवि, से केणट्ठेणं भंते ! एवं वु० जीवा सागार० अनागार० ?, गो० ! जे णं जीवा सुतनाणी ओहिनाणी मनपज्जव० केवल० सुअअन्नाणी विभंगनाणी ते णं जीवा सागारपस्सी, जे णं जीवा चक्खुदंसणी ओहिदंसणी केवलदंसणी ते णं जीवा अनागारपस्सी, से एतेणट्ठेणं गोयमा ! एवं वु०-जीवा सागारपस्सीवि अनगा०, नेरइया णं भंते ! किं सागारपस्सी अनागा०, गो० ! एवं चेव, नवरं सागारपासणयाए मणपज्जवनाणी केवलनाणी न वुच्चति, अनागारपासणयाए केवलदंसणं नत्थि, एवं जाव थणियकुमारा !

पुढविकाइयाणं पुच्छा, गो० ! पुढविकाइया सागारपस्सी नो अनागारपस्सी, से केणट्ठेणं भंते ! एवं वु०-गो० ! पुढविकाइयाणं एगा सुयअन्नाणसागारपासणया पं०, से तेण० गो० !, एवं जाव वणस्सतिकाइयाणं, बेइंदियाणं पुच्छा, गो० ! सागारपस्सी नो अना०, से केणट्ठेणं भंते एवं वुच्चति ?, गो० ! बेइंदियाणं दुविहा सागारपासणया पं०, तं०-सुयनाणसागारपा-सुअअन्नाणसागारपा०, से एएणट्ठेणं गो० ! एवं वु०, एवं तेइंदियाणवि,

चउरिंदियाणं पुच्छा, गो० ! चउरिंदिया सागारपस्सी, जे णं चउरिंदिया चक्खुदंसणी ते

णं चउरिंदिया अनागारपस्सी, से एएणट्ठेणं गो० ! एवं वु०, मणूसा जहा जीवास अवसेसा जहा नेरइया जाव वेमाणिया ।

वृ. 'कतिविधा णं भंते' इत्यादि, कतिविधा—कतिप्रकारा, णमिति वाक्यालङ्कारे, पदन्त 'पासणय'त्ति 'दशिर्प्रेक्षणे' पश्यतीति 'सति वानिता'विति अतृड्प्रत्ययः कर्त्तर्यनदादेशः, 'पाघ्राध्मास्थाम्नादाणुदृश्यर्त्तिशौतिकृवृधिवुशदसदः पिबजिघ्रधमतिष्ठमनयच्छपश्यच्छ-शृकृधिशीयसीद'मिति दशेः पश्यादेशः पश्यतो भावः पश्यत्ता, 'भावे तत्वला'विति तल्प्रत्ययः, 'आदाप्'सैव पासणयेत्युच्यते, एष च पासणयाशब्दो रूढिवशात् साकारनाकारबोधप्रतिपादकः उपयोगशब्दवत् तथा चोपयोगविषये प्रश्नोत्तरसूत्रे इमे--

'कइविहे णं भंते ! उवओगे पन्नत्ते ?, गोयमा ! दुविहे पन्नत्ते, तं०—'सागारोवओगे य अनागारोवओगे य' पश्यत्ताविषयेऽपि प्रश्नोत्तरसूत्रे इमे—'कइविहा णं भंते ! पासनाय पन्नत्ता गो० ! दुविहा पं०, तं०—सागारपासणया अनागारपासणया' इति, अत्र तुल्ये साकारनाकारपदत्वे कोऽनयोः प्रतिविशेषो येन पृथगुच्यते ?, उच्यते साकारानाकारऊभेदगतावान्तरभेदसङ्ख्यारूपः, तथाहि—पञ्च ज्ञानानि त्रीण्याजज्ञानानीत्यष्टविधः साकार उपयोगः, साकारपश्यत्ता तु षड्विधा, मतिज्ञानमत्यज्ञानयोः पश्यत्तयोः अनभ्युपगमात्, कस्मादिति चेत्, उच्यते, इह पश्यत्ता नाम पश्यतो भाव उच्यते, पश्यतो भावश्च 'दशिर् प्रेक्षणे; इति वचनात्, प्रेक्षणमिह रूढिवशात् साकार-पश्यत्तायां चिन्त्यमानायां प्रदीर्घकालं अनाकारपश्यत्तायां चिन्त्यमानायां प्रकृष्टं परिस्फुटरूपमीक्षणमवसेयं, तथा च सति येन ज्ञानेन त्रैकालिकः परिच्छेदो भवति तदेव ज्ञानं प्रदीर्घकालविषयत्वात् साकारपश्यत्ताशब्दवाच्यं न शेषं, मतिज्ञानमत्यज्ञाने तु उत्पन्नाविनष्टार्थग्राहके साम्प्रतकालविषये, तथा च मतिज्ञानमधिकृत्यान्यत्रोक्तम्—

॥१॥ "जनमवग्गहादिरूवंपडुप्पन्नवत्थुगाहगं लोए ।
इंदियमनोनिमित्तं च तमाभिनिबोधिगं बेंति ॥"

तत् द्वे अपि साकारपश्यत्ता शब्दवाच्ये न भवतः, श्रुतज्ञानादीनि तु त्रिकालविषयाणि, तथाहि—श्रुतज्ञानेन अतीता अपि भावा ज्ञायन्ते अनागता अपि, उक्तं च—

॥१॥ "जं पुण तिकालविसयं आगमगंथाणुसारि विन्नाणं ।
इंदियमणोनिमित्तं सुयनाणं तं जिणा बेंति ॥"

अवधिज्ञानमपि सङ्ख्यातीता उत्सर्पिण्यवसर्पिणीः अतीताः परच्छिनत्ति भाविनीश्च, मनःपर्यज्ञानमपि पल्योपमासङ्ख्येयभागमतीतं जानाति भाविनं च, केवलं सकलकालविषयं सुप्रतीतं, श्रुतज्ञानविभङ्गज्ञाने अपि त्रिकालविषये, ताभ्यामपि यथायोगमतीतानागतभावपरिच्छेदात्, ततः ज्ञानानि साकारपश्यत्ताशब्दवाच्यनि, उपयोगवस्तु यत्राकारो यथोदितस्वरूपः परिस्फुरति स बोधो वर्त्तमानकालविषयो वा यदि भवति त्रिकालिको वा तत्र सर्वत्रापि प्रवर्त्त इति साकारोपयोगोऽष्टविधः ।

तथा चक्षुर्दर्शनमचक्षुर्दर्शनमवधिदर्शनं केवलदर्शनमिति चतुर्विधोऽनाकारोपयोगः, अनाकारपश्यत्ता तु त्रिविधा, अचक्षुर्दर्शनस्यानाकारपश्यत्ताशब्दवाच्यत्वाभावात्, कस्मादिति चेत्, उच्यते, उक्तमिह पूर्वमनाकारपश्यत्तायां चिन्त्यमानायां प्रकृष्टं परिस्फुटरूपमीक्षण-

मवसेयमिति, तत्राचक्षुर्दर्शने परिस्फुटरूपमीक्षणं न विद्यते, न हि चक्षुषेव शेषेन्द्रियमनोभिः परिस्फुटमीक्षते प्रमाता, ततोऽचक्षुर्दर्शनस्यानाकारपश्यत्ताशब्दवाच्यत्वाभावात्, त्रिविधाऽनाकारपश्यत्ता, तदेवं साकारभेदेऽनाकारभेदे च प्रत्येकमवान्तरभेदे वैचित्र्यत्यभावान्महानुपयोगपश्यत्तयोःप्रतिविशेषः, एनमेव प्रतिविशेषं प्रतिपिपादयिषुः प्रथमतः साकारनाकारभेदौ ततस्तद्गतावान्तरभेदान् प्रतिपादयति-'गो० ! दुविहा पं० तंजहा०सागारपासणया अनागारपासणया य, सागारपासणया णं भंते ! कतिविहा पं०,' इत्यादि भावितार्थम् । तदेवं सामान्यतो जीवपदविशेषणरहिता पश्यत्तोक्ता, साम्प्रतं तामेव जीवपदविशेषितामभिधित्सुराह-'एवं जीवाणंपि' एवं- पूर्वोक्तेन प्रकारेण जीवानामपि-जीवपदविशेषणसहितापि पश्यत्ता वक्तव्या, सा चैवम्-

'जीवाणं भंते ! कतिविधा पासणया पं० ? , गो० ! दुविहा पं०, तंजहा--सागारपासणया अनागारपासणया य, जीवाणं भंते ! सागारपासणया कतिविहा पं०' इत्यादि, तदेवं जीवानामपि सामान्यत उक्ता, सम्प्रति चतुर्विंशतिदण्डककक्रमेण वदति-'नेरइयाणं भंते !' इत्यादि, सुगमत्वात्, उपयोगपदे प्रायो भावितत्वात् अनन्तरोक्तभावनानुसारेण स्वयं परिभावनीयं, तदेवं सामान्यतो विशेषतश्च जीवानां पश्यतोक्ता, सम्प्रति जीवानेव पश्यत्ताविशिष्टना चिचिन्तयिषुराह-'जीवा णं भंते ! किं सागारपस्सी' इत्यादि, जीवाः-जीवनयुक्ताःप्राणधारिण इत्यर्थः, णमिति वाक्यालङ्कारे किमिति प्रश्ने साकारपश्यत्ता विद्यते येषां ते साकारपश्यत्तिनः प्राकृतत्वात् साकारपस्सी इत्युक्तं, 'मनपज्जवनाणी केवलनाणी न वुच्चइ' इत्यादि, नैरयिकाणां चारित्रप्रतिपत्तेरभावतो मनःपर्यवज्ञानकेवलज्ञानकेवलदर्शनानामप्राप्तेः, ।।

इह किल छद्मस्थानां साकारोऽनाकारश्चोपयोगः क्रमेणोपजायमानो घटते, सकर्मकत्वात्, सकर्मकाणां ह्यन्तरस्योपयोगस्य वेलायामन्यतरस्य कर्मणाऽऽवृतत्वान्न घटते एवोपयोग इति, केवली तु घातिचतुष्टयक्षयाद् भवति, ततः संशयः-किं क्षीणज्ञानावरणदर्शनावरणत्वात् यस्मिन्नेव समये रत्नप्रभादिकं जानाति तस्मिन्नेव समये पश्यति उत जीवस्वाभाव्यात् क्रमेणेति ? , ततः पृच्छति--

मू. (५७४) केवली णं भंते ! इमं रयणप्पभं पुढविं आगारेहिं हेतूहिं उवमाहिं दिट्ठंतेहिं वण्णेहिं संठाणेहिं पमाणेहिं पडोयारेहिं जं समयं जाणति तं समयं पासइ जं समयं पासइ तं समयं जाणइ ?, गो० ! नो तिणट्ठे समट्ठे, से केणट्ठेणं भंते ! एवं वुच्चति केवली णं इमं रयणप्पभं पुढविं आगारेहिं० जं समयं जाणति नो तं समयं पासति जं समयं पा० नो तं समयं जा० ?, गो० ! सागारे से नाणे भवति अनागारे से दंसणे भवति, से तेणट्ठेणं जाव णो तं समयं जाणाति एवं जाव अहे सत्तमं। एवं सोहम्मकप्पं जाव अच्चुयं, गेविज्जगविमाणा अनुत्तरविमाणा, ईसीपब्भारं पुढवीं, परमाणुं पोग्गलं दुपदेसियं खंधं जाव अनंतपदेसियं खंधं,

केवली णं भंते! इमं रयणप्पभं पुढविं अनागारेहिं अहेतूहिं अनुवमाहिं अदिट्ठंतेहिं अवण्णेहिं असंठाणेहिं अपमाणेहिं अपडोयारेहिं पासति न जाणति ?, हंता ! गो० ! केवली णं इमं रयणप्पभं पुढविं अनागारेहिं जाव पासति न जाणति, से केणट्ठेणं भंते ! एवं वु० केवली इमं रयणप्पभं पुढविं अनागारेहिं जाव पासति न जाणति, गो० ! अनागारे से दंसणे भवति सागारे से नाणे भवति, से ते० गो० ! एवं वुच्चइ-केवली णं इमं रयणप्पभं पुढविं अनागारे हिं जाव पासति ण जाणति, एवं जाव ईसिप्पभारं पुढविं परमाणुं पोग्गलं अनंतपदेसियं खंधं पासति न जाणति ।।

वृ. 'केवली णं भंते!' इत्यादि, केवलं ज्ञानं दर्शनं चास्यास्तीति केवली णमिति वाक्यालङ्कृतौ भदन्त!–परमकल्याणयोगिन्! 'इमां' प्रत्यक्षतः उपलभ्यमानां रत्नप्रभाभिधां पृथिवीं 'आगारेहिं'ति आकारभेदा यथा इयं रत्नप्रभापृथिवी त्रिकाण्डा खरकाण्डपङ्ककाण्डअप्काण्डभेदात् खरकाण्डमपि षोडशभेदं, तद्यथा–प्रथमं योजनसहस्रमानंरत्नकाण्डं तदनन्तरं योजनसहस्रप्रमाणमेव वज्रकाण्डं तस्याप्यधो योजनसहस्रमानं वैडूर्यकाण्डमित्यादि, 'हेऊहिं'ति हेतवः–उपपत्तयः, ताश्चेमाः–

केन कारणेन रत्नप्रभेत्यभिधधीयते ?, उच्यते, यस्मादस्याः रत्नमयं काण्डं तस्मात् रत्नप्रभा, रत्नानि प्रभा–स्वरूपं यस्याः सा रत्नप्रभेति व्युत्पत्तेरिति, 'उवमाहि' इति उपमाभिः, 'माङ् माने' अस्मादुपूर्वात् उपमितं उपमा 'उपसर्गादात'; इत्यङ्प्रत्ययः, ताश्चैवं–रत्नप्रभायां रत्नप्रभादीनि काण्डानि वर्णविभागेन कांक्षाभानि ?, पद्मपागेन्दुसदृशानि इत्यादि, 'दिट्ठंताहिं'ति दृष्टः अन्तः–परिच्छेदो विवक्षितसाध्यसाधनयोःसम्बन्धस्याविनाभावरूपस्य प्रमाणेन यत्र ते दृष्टान्तास्तैर्यथा घटः स्वगतैर्धर्म्मैः पृथुबुध्नोदराद्याकारादिरूपैरनुगतः परधर्मेभ्यश्चपटादिगतेभ्यो व्यतिरिक्त उपलभ्यते इति पटादिभ्यः पृथक् वस्त्वन्तरं तथैवैषाऽपि रत्नप्रभा स्वगतभेदैरनुषक्ता शर्करा-प्रभादिभेदेभ्यश्चत व्यतिरिक्तेति ताभ्यः पृथक् वस्त्वन्तरमित्यादि,

'वण्णेहिं'ति शुक्लादिवर्णविभागेन तेषामेव उत्कर्षापपकर्षसङ्ख्येयासंख्येयानन्तगुणविभागेन च, वर्णग्रहणमुपलक्षणं तेन गन्धरसस्पर्शविभागेन चेति द्रष्टव्यं, 'संठाणेहिं' ति यानि तस्यां रत्नप्रभायां भवननारकादीनां संस्थानानि, तद्यथा–'ते णं भवणा बाहिं वट्टा अंतो चउरंसा अहे पुक्खर-कण्णियासंठाणसंठिया' तथा 'ते णं नरया अंतो वट्टा बाहिं चउरंसा अहे खुरप्पसंठाणसंठिया' इत्यादि, तथा 'पमाणेहिं'ति प्रमाणानि, 'अहे' त्यादि परिमाणानि, यथा 'असीउत्तरजोयणसयस-हस्सबाहल्ला रज्जुप्पमाणमेत्ता आयमविक्खंभेण'मित्यादि, 'पडोयारेहिं'ति प्रति–सर्वतः सामास्त्येन अवतीर्यते–व्याप्यते यैस्ते प्रत्यवताराः ते चात्र धनोदध्यादिवलया वदितव्याः, ते हि सर्वासु दिक्षु विदिक्षु चेमां रत्नप्रभां परिक्षिप्य व्यवस्थितास्तैः, 'जं समय'मिति 'कालध्वनोव्याप्ता' वित्यधिकरण-भावेऽपि द्वितीया, ततोऽयमर्थः–यस्मिन् समये जानाति–आकारादिविशिष्टं परिच्छिनत्ति 'तं समयं'ति तस्मिन् समये पश्यति–केवलदर्शनविषयीकरोति ?, भगवानाह–

गौतम! नायमर्थः समर्थो, नायमर्थो युक्तयुपपन्न इति भावः, तत्त्वमजानानः पृच्छति–'से केणट्ठेणं भंते!' इत्यादि, 'से' इति अथशब्दार्थे अथ केनार्थेन–कारणेन भदन्त! एवं–पूर्वोक्तेन प्रकारेणोच्यते, तमेव प्रकारं दर्शयति–'केवली ण'मित्यादि, भगवानाह–'गौतमे'त्यादि, अस्यायं भावार्थः–इह ज्ञानेन परिच्छिदन् जानातीत्युच्यते, दर्शनेन परिच्छन्दन् पश्यतीति, ज्ञानं च 'से' तस्य भगवतःसाकारमन्यथा ज्ञानत्वायोगात्, विशेषानभिगृह्णानो हि बोधो ज्ञानं, 'सविशेषं पुनर्ज्ञान'मिति वचनात्,

दर्शनमनाकारं 'निर्विशेषं विशेषाणां, ग्रहो दर्शनमुच्यते' इति वचनात्, तत्पर ज्ञात्रानं च दर्शनं च जीवस्य खण्डशो नोपजायते, यथा कतिपयेषु प्रदेशेषु ज्ञानं कतिपयेषु प्रदेशेषु दर्शनं, तथास्वाभाव्यात्, किन्तु यदा ज्ञानं तदा सामस्त्येन ज्ञानमेव यदा दर्शनं तदा सामस्त्येन दर्श-नमेव, ज्ञानदर्शने च साकारानाकारतया परस्परं विरुद्धे, छद्मस्थातपयोरिवेतरेतराभावनान्तरी-यकत्वात्, ततो यस्मिन् समये जानाति तस्मिन् समये न पश्यति, यस्मिन् समये पश्यति तस्मिन् समये न जानाति, एतदेवाह–

'से एएणट्ठेणं' इत्यादि, एतेन यदवादीद् वादी सिद्धसेनदिवाकरो यथा– 'केवली भगवान् युगपत् जानाति पश्यति चे'ति, तदप्यपास्तमवगन्तव्यं, अनेन सूत्रेण साक्षात् युक्तिपूर्वं ज्ञानदर्शनपयोगस्य क्रमशो व्यवस्थापितत्वात्, एवं शर्कराप्रभावालुकाप्रभापङ्कप्रभाधूमप्रभातमःप्रभातमस्तमःप्रभासौधर्मेशानसनत्कुमारमाहेन्द्रब्रह्मलोकलान्तकशुक्रसहस्रानतप्राणताऽरणाच्युतकल्पग्रैवेयकविमानानुत्तरविमानेषत्प्राग्भाराभिधपृथिवीपरमाणुपुद्गलद्विप्रदेशिकस्कन्धयावदनन्तप्रदेशिकस्कन्धविषयणायपि सूत्राणि भावनीयानि, ननु यदि ज्ञानदर्शने साकारनाकारतया पृथगेवं व्यवसअथापियतविषये तत इदमायातं–

यदा भगवान् केवली रत्नप्रभादिकमाकाराद्यभावेन परिच्छिनत्ति तदा स पश्यतीत्येवं वक्तव्यो न जानातीति, सत्यमेतत् तथा चाह– 'केवली णं भंते ! इमं रयणप्पभं पुढविं अनागारेहिं अहेऊहिं' इत्यादि, प्रायो भावितमेतत्, सुगमं ॥

पदं – ३० – समाप्तम्

पदं – ३१ – संज्ञी

मू. तदेवमुक्तं पश्यत्ताऽऽख्यं त्रिंशत्तमं पदं, साम्प्रतमेकत्रिंशत्तममारभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तरपदे ज्ञानपरिणामविशेषःप्रतिपादितः, इह तु परिणामसाम्याद् गतिपरिणामविशेष एव संज्ञापरिणामः प्रतिपाद्यते, तत्र चेदमादिसूत्रम्–

मू. (५७५) *जीवा णं भंते ! किं सण्णी असण्णी नोसण्णीनोअसण्णी ?, गो० ! जीवा सण्णीवि असण्णीवि नोसण्णीनोअसण्णीवि। नेरइयाणं पुच्छा, गो० ! नेरइया सण्णीवि असण्णीवि नो नोसण्णीनोअसण्णी, एवं असुरकुमारा जाव थणियकुमारा, पुढविकाइयाणं पुच्छा, गो० ! नो सण्णी असण्णी, नो नोसण्णीनोअसण्णी, एवं बेइंदियतेइंदियचउरिंदियावि, मणूसा जहा जीवा, पंचिंदियतिरिक्खजोणिया वाणमंतरा य जहा नेरइया, जोतिसियवेमाणिया सण्णी नो असण्णी नो नोसण्णीनोअसण्णी, सिद्धाणं पुच्छा, गो० ! नो सण्णी नो असण्णी नोसण्णिनोअसण्णी,*

वृ. 'जीवा णं भंते ! किं सण्णी' इत्यादि, संज्ञानं संज्ञा–'उपसर्गादातः' इत्यङ्प्रत्ययः भूतभवद्भाविभावस्वभावपर्यालोचनं सा विद्यते येषां ते संज्ञिनः, विशिष्टस्मरणादिरूपमनोविज्ञानभाज इत्यर्थः, यथोक्तमनोविज्ञानविकला असंज्ञिनः, ते च एकेन्द्रियविकलेन्द्रियसम्मूर्च्छिमपञ्चेन्द्रिया वेदितव्याः, अथवा संज्ञायते–सम्यक् परिच्छिद्यते पूर्वोपलब्धो वर्त्तमानो भावी च पदार्थो यया सा संज्ञा, भिदादिपाठाभ्युपगमात् करणे अङ्, विशिष्टा मनोवृत्तिरित्यर्थः, सा विद्यते येषां ते संज्ञिनः समनस्का इत्यर्थः तद्विपरीता असंज्ञिनोऽमनस्का इत्यर्थः,

ते चैकेन्द्रियादय एवानन्तरोदिताः प्रतिपत्तव्याः, एकेन्द्रियाणां प्रायः सर्वथा मनोवृत्तरभावात्, द्वीन्द्रियादीनां तु विशिष्टमनोवृत्तेरभावः, ते हि द्वीन्द्रियादयो वार्त्तमानिकमेवार्थं शब्दादिकं शब्दादिरूपतया संविदन्ति, न भूतं भाविनं चेति, केवली सिद्धश्चोभयप्रतिषेधविषयः, केवली हि यद्यपि मनोद्रव्यसम्बन्धभाक् तथापि न तैरसौ भूतभवद्भाविभावस्वभावपर्यालोचनं करोति, किन्तु क्षीणसकलज्ञानदर्शनावरणत्वात् पर्यालोचनमन्तरेणैव केवलज्ञानेन केवलदर्शनेन च साक्षात्समस्तं जानाति पश्यति च, ततो न संज्ञी नाप्यसंज्ञी, सकलकालकलाकलापव्यवच्छिन्नसमस्तद्रव्यपर्यायप्रपञ्चसाक्षात्करणप्रवणज्ञानसमन्वितत्वात्, सिद्धोऽपि न संज्ञी, द्रव्यमनसोऽप्यभावात्,

नाप्यसंज्ञी सर्वज्ञत्वात्, तदेवं सामान्यतो जीवपदे संज्ञिनोऽसंज्ञिनोअसंज्ञिनश्च लभ्यन्ते इति, भगवान् तथैव प्रतिसमाधानमाह–'गोतमे'त्यादि, जीवाः संज्ञिनोऽपि नैरयिकादीनां संज्ञिनां भावाद्, असंज्ञिनोऽपि पृथिव्यादीनामसंज्ञिनां भावात्, नोसंज्ञिनोअसंज्ञिनोऽपि सिद्धकेवलिनां नोसंज्ञिनोअसंज्ञिनामपि भावात्, ।

एतानेव चतुर्विंशतिदण्डकक्रमेणं चिन्तयति–'नेरइया ण'मित्यादि, इह ये नैरयिकाः संज्ञिभ्य उत्पद्यन्ते ते संज्ञिनो व्यवह्रियन्ते इतरे त्वसंज्ञिनः न च नैरयिकाणां केवलिभावो घटते, चारित्रप्रतिपत्तेरभावात्, तत उक्तं नैरयिकाःसंज्ञिनोऽप्यसंज्ञिनोऽपि. नो नोसंज्ञिनोनोअसंज्ञिनः, एवमसुरकुमारादयोऽपि स्तनितकुमारपर्यवसाना भवनपतयो वक्तव्याः, तेषामप्यसंज्ञिनोऽपुत्पादात् केवलित्वाभावाच्च, 'मणूसा जहा जीव'त्ति मनुष्याः प्राक्यथा जीवा उक्तास्तथा वक्तव्याः, संज्ञिनोऽपि असंज्ञिनोऽपि नोसंज्ञिनोअसंज्ञिनोऽपि वक्तव्या इति भावः, तत्र ये गर्भव्युत्क्रान्तास्ते संज्ञिनः सम्मूर्च्छिमा असंज्ञिनः केवलिनो नोसंज्ञिनोअसंज्ञिनः, 'पञ्चेन्द्रियतिरिक्खजोणियवाणमंतरा जहा नेरइया' इति, पञ्चेन्द्रियातिर्यग्योनिका व्यन्तराश्च यथा नैरयिका उक्तास्तथा वक्तव्याः, संज्ञिनोऽपि असंज्ञिनोऽपि नो नोसंज्ञिनोअसंज्ञिनः वक्तव्या इति भावः तत्र पञ्चेन्द्रियतिर्यग्योनिकाः सम्मूर्च्छिमाः असंज्ञिनः गर्भव्युत्क्रान्ताः संज्ञिनः, व्यन्तरा असंज्ञिभ्य उत्पन्ना असंज्ञिनः संज्ञिभ्य उत्पन्नाः संज्ञिनः, उभयेऽपि चारित्रप्रतिपत्तेरभावात् नो नोसंज्ञिनोअसंज्ञिनः, ज्योतिष्कवैमानिकाः संज्ञिन एव, नो असंज्ञिनः, असंज्ञिभ्य उत्पादाभावात्, नो नोसंज्ञिनोअसंज्ञिनश्चारित्रप्रतिपत्तेरभावात्, सिद्धास्तु प्रागुक्तयुक्तितो नो संज्ञिनो नाप्यसंज्ञिनः किन्तु नोसंज्ञिनोअसंज्ञिनः,

मू. (५७६) नेरइयतिरियमणुया य नवणयरगसुरा इ सण्णीऽसण्णी य ।
विगलिंदिया असण्णी जोकतिसवेमाणिया सण्णी ॥

वृ. अत्रैव सुखप्रतिपत्तये सङ्ग्रहणिगाथामाह–'नेरइय' इत्यादि, नैरयिकाः 'तिरिय'त्ति तिर्यक्पञ्चेन्द्रिया मनुष्या वनचरा–व्यन्तरा असुरादयः–समस्ता भवनपतयः प्रत्येकं संज्ञिनोऽसंज्ञिनश्च वक्तव्याः एतच्चानन्तरमेव भावितं, विकलेन्द्रिया–एकद्वित्रिचतुरिन्द्रिया असंज्ञिनो ज्योतिष्कवैमानिकाः संज्ञिन इति ।।

पदं – ३१ – समाप्तम्

पदं – ३२ – "संयम्"

वृ. तदेवमुक्तमेकत्रिंशत्तमं पदं, अधुना द्वात्रिंशत्तमं पदमारभ्यते, तस्य चायमभिसम्बन्धः–इहानन्तरपदे संज्ञिपरिणाम उक्तः, इह तु चारित्रपरिणामविशेषः संयमः प्रतिपाद्यते, संयमो नाम निरवद्येतरयोगप्रवृत्तिनिवृत्तिरूपः, तत्र चेदमादिसूत्रम्–

मू. (५७७) जीवा णं भंते ! किं संजया असंजया संजया २ नोसंजयानोअसंजयानोसंजयासंजया ?, गो० ! जीवा संजयावि १ असंजया वि २ संजयासंजयावि ३ नोसंजयानोअसंजयानोसंजयासंजयावि ४,

नेरइया णं भंते ! पुच्छा, गो० ! नेरइया नो संजया असंजया नोसंजयासंजया नो नोसंजयनोअसंजयनोसंजयासंजया, एवं जाव चउरिंदि,

पंचिंदियतिरिक्खजोणियाणं पुच्छा, गो० ! पंचिंदियतिरिक्खजोणिता नो संजता असंजतावि

संजतासंजतावि नो नोसंजतनोअसंजतनोसंजतासंजतावि, मणुस्साणं पुच्छा, गो० ! मणूसा संजतावि असंजतावि संजतासंजतावि नो नोसंजतनोअसंजतनोसंजतासंजता,

वाणमंतरजोतिसियवेमाणिया जहा नेरइया, सिद्धा णं पुच्छा गो० ! सिद्धा नो संजता १ नो असंजता २ नो संजतासंजता ३ नोसंजतनोअसंजतनोसंजतासंजता ४ ॥

वृ. 'जीवा णं भंते !' इत्यादि, संयमच्छन्ति स्म -सर्वसावद्ययोगेभ्यः सम्यगुपरमन्ति स्म अर्थात् निरवद्ययोगेषु चारित्रपरिणामस्फातिहेतुषु वर्त्तन्ते स्म इति संयताः 'गत्यर्थनित्याकर्मका' दिति कर्त्तरि क्तप्रत्ययः हिंसादिपापस्थाननिवृत्ता इत्यर्थः, तद्विपरीता असंयताः हिंसादीनां देशतो निवृत्ताः संयतासंयताः, त्रितयप्रतिषेधविषयाः सिद्धाः, कथमिति चेत्, उच्यते, उक्तमिह संयमो नाम निरवद्येतरयोगप्रवृत्तिनिवृत्तिरूपः ततः संयतादिपर्यायो योगाश्रयः, सिद्धाश्च भगवन्तो योगातीताः शरीरमनसोऽभावादतत्प्रतयप्रतिषेधविषयाः, एवं च सामान्यतो जीवपदे चतुष्टयमपि घटते, तथा चाह-'गोयमे'त्यादि, गौतम !जीवाः संयता अपि साधूनां संयतत्वात्, असंयता अपि नैरयिकादीनामसंयतत्वात्, संयतासंयता अपि पञ्चेन्द्रियतिरश्चां मनुष्याणां च देशतःसंयमस्य भावात्, नोसंयतनोअसंयतनोसंयतासंयता अपि सिद्धानां त्रयस्यापि प्रतिषेधात्, चतुर्विंशतिदण्डकसूत्राणि सुगमानि।

मू. (५७८) *"संजयअसंजय मीसगा य जीवा तहेव मणुया य।*
संजतरहिया तिरिया सेसा अस्संजता होंति ॥"

वृ. अत्रैवं सङ्ग्रहणिगाथामाह - 'संयते'त्यादि, संयता असंयता मिश्रकाश्च-संयतासंयता जीवास्तथैव मनुष्याश्च, किमुक्तं भवति ? -जीवपदम मनुष्यपदे च एतानि त्रीण्यपि पदानि घटन्ते, नतु न घटन्ते इत्येवंपरमेतत् सूत्रं, अन्यथा जीवपदे त्रितयप्रतिषेधरूपं चतुर्थमपि पदं घटत एव, यथोक्तं प्राक्, तथा संयतरहिता उपलणमेतत् त्रितयप्रतिषेधरहिताश्च तिर्यञ्चः-तिर्यक्पञ्चेन्द्रियाः, आह-

कथं संयतपदरहितास्तिर्यक्पञ्चेन्द्रियाः ?, यावता तेषामपि संयतत्वमुपपद्यते एव, तथाहि-संयतत्वं नाम निरवद्येतरयोगप्रवृत्तिनिवृत्त्यात्मकं, तेषु च निरवद्येतरयोगेषु प्रवृत्तिनिवृत्ती तिरश्चामपि सम्भवतः, यतश्चरमकालेऽपि चतुर्विधस्याप्याहारस्य प्रत्याख्यानं कृत्वा शुभेषु योगेषु वर्त्तमाना दृश्यन्ते, अन्यच्च सिद्धान्ते तत्र तत्र प्रदेशे महाव्रतान्यप्यात्मन्यारोपयन्तः श्रूयन्ते, उक्तं च--

॥ १ ॥ "तिरियाणं चारित्तं निवारितं तह य अह पुणो तेसिं
सुव्वइ बहुयाणं चिय महव्वयारोवणं समए ॥"

तदेतदयुक्तं, सम्यग्वस्तुतत्त्वापरिज्ञानात्, संयततत्वमिह निरवद्येतरयोगप्रवृत्तिनिवृत्तिरूपमान्तरचारित्रपरिणामानुषक्तभगवन्तव्यं, न शेष, न च तेषां कृतचतुर्विधाहारप्रत्याख्यानानामपि महाव्रतान्यारोपयतां भवप्रत्ययादेव चरणपरिणाम उपजायते, स ह्यचिन्त्यचिन्तामणिकल्पे मनुष्यभव एव, यदि परं कर्मक्षयोपशमाद् भवति, नान्यथा, अत एवायमतिदुर्लभो गीयते भगवद्भिः, अथ कथमवसीयते न तिरश्चां तथा चेष्टमानानामप्यान्तरश्चारित्रपरिणामः ?, उच्यते, केवलज्ञानाद्यश्रवणात्, यदि हि तिरश्चामपि चरणपरिणामस्सम्भवेत् तत् क्वचित् कदाचित् कस्यचिदुत्कर्षतो भावतो मनःपर्यायज्ञानं केवलज्ञानं वा श्रूयेत, तयोश्चारित्रपरिणामनिबन्धनत्वात्, न च श्रूयते, तस्मादवसीयते-न तेषां चारित्रपरिणामः, उक्तं च-

॥ १ ॥ "न महव्वयसम्भावेवि चरणपरिणामसंभवो तेसिं ।
न बहुगुणाणंपि जओ केवलसंभूइ परिणामो ॥"

पदं – ३२ – समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे द्वात्रिंशतमपदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता ।

पदं – ३३ – "अवधिः"

वृ. तदेवमुक्तं द्वात्रिंशत्तमं पदे, सम्प्रति त्रयस्त्रिंशत्तममारभ्यते, अस्य चायमभिसम्बन्धः– इहानन्तरपदे चारित्रपरिणामविशेषः संयमः प्रतिपादितः, इह तु ज्ञानपरिणामविशेषः खल्ववधिःप्रतिपाद्यते, इत्यनेन सम्बन्धेनायातस्यास्यावधिविषयमधिकारद्वारमाह–

मू. (५७९) *भेदविसयसंठाणे अब्भिंतरबाहिरे य देसोही ।*
ओहिस्स य खयवुड्ढी पडिवाई चेव अपडिवाई ॥"

वृ. 'भेयविसये' त्यादि, अवधेः–अवधिज्ञानस्य प्रागनिरूपितशब्दार्थस्य प्रथमं भेदो वक्तव्यः, ततो विषयस्तदनन्तरं संस्थानं–अवधिना द्योतितस्य क्षेत्रस्य यस्तप्रादिरूप आकारविशेषः सोऽवधिनिबन्धन इत्यवधेः संस्थानत्वेन व्यपदिश्यते, तथा द्विविधोऽवधिर्वक्तव्यः, तद्यथा– अभ्यन्तरो बाह्यश्च, तत्र यो [illegible] सर्वासु दिक्षु स्वद्योत्यं क्षेत्रं [illegible] च सह सातत्येन ततः स्वद्योत्यं क्षेत्रं सम्बद्धं सोऽभ्यन्तरावधि, एतद्विपरीतो बाह्यवधिः, स च द्विधा, तद्यथा–अन्तगतो मध्यगतश्च,

अथान्तगत इति कः शब्दार्थः ?, उच्यते, इह पूर्वाचार्यप्रदर्शितमर्थत्रयं अन्ते–आत्मप्रदेशानां पर्यन्ते गतः–स्थितोऽन्तगतः, काऽत्र भावनेति चेत्, उच्यते, इहावधिरुत्पद्यमानः कोऽपि स्पर्द्धकरूपतयोत्पद्यते, स्पर्द्धकं च नामावधिज्ञानप्रभाया गवाक्षजालादिद्वारविनिर्गतप्रदीपप्रभाया इव प्रतिनियतो विच्छेदविशेषः, तथा चाह जिनभद्रगणिक्षमाश्रमणः स्वोपज्ञाभाष्यटीकायां– "स्पर्द्धकमवधिविच्छेदविशेष" इति, तानि च एकजीवस्यासङ्ख्येयानि संख्येयानि च भवन्ति, यत उक्तं मूलावश्यकप्रथमपीढिकायाम्–'फड्डा य असंखेज्जा संखिज्जा यावि एगजीवस्स' इति, तानि च विचित्ररूपाणि कानिचित्पर्यन्तवर्त्तिष्वात्मप्रदेशेषूत्पद्यन्ते, तत्रापि कानिचित्पुरतः कानिचित्पृष्ठतः कानिचिदधोभागे कानिचिदुपरितनभागे कानिचिन्मध्यवर्त्तिष्वात्मप्रदेशेष्वेवं योऽवधिरुपजायते स आत्मनः पर्यन्ते सत्थित इतिकृत्वा अनन्तग इत्यभिधीयते, तैरेवपर्यन्तवर्त्तिभिरात्म- प्रदेशैः साक्षादवबोधात्',

अथवा औदारिकशरीरस्यान्ते गतः–स्थितोऽन्तगतः, औदारिकशरीरमधिकृत्य कदाचिदेकया दिशोपलम्भात्, इदमपि स्पर्द्धकरूपमवधिज्ञानं, अथवा सर्वेषामप्यात्मप्रदेशानां क्षयोपशमभावेऽपि औदारिकशरीरस्यान्ते कयाचिदेकया दिशा यद्वशादुपलभ्यते सोऽभ्यन्तगतः आह–यदि सर्वेषामप्यात्मप्रदेशानां क्षयोपशमस्ततः सर्वतः किं न पश्यति ?, उच्यते, एकदिशैव क्षयोपशमसम्भवात्, विचित्रो हि दशाद्यपेक्षया कर्म्मणां क्षयोपशमः, ततः सर्वेषामप्यात्मप्रदेशानामित्थंभूत एव स्वसामग्रीवशात् क्षयोपशमः संवृत्तो यदौदारिकशरीरमपेक्ष्य कयाचिद्विवक्षितया एकया दिशा पश्यतीति, तथा चोक्तं नन्द्यध्ययनचूर्णौ–'ओरालियसरीरंते ठियं गयंति एगट्ठं, तं वा अप्पप्प-

सफड्डगावहि एगदिसोवलंभाओ अंतगयमोहिनाणं भन्नइ, अहवा सव्वप्पएऐसेसु विसुद्धेसुवि ओरालियसरीरगंतेण एगदिसि पासणा गयंति अंतगयंति भण्णइ' इति, एष द्वितीयः, तृतीयः पुनरयं-एगदिग्भाविना तेनावधिना यदुद्योतितं त्रक्षेत्रं तस्यान्ते वर्त्तते अवधिरवधिज्ञानवतस्तदन्ते वर्त्तमानत्वात्, ततोऽन्ते एकदिग्गतस्यावधिविषयलस्य पर्यन्ते गतः-स्थितोऽन्तगत इति,

अन्तगतश्चावधिः त्रिधा, तद्यथा-पुरतोऽन्तगतः पृष्ठतोऽन्तगतः पार्श्वतोऽन्तगतः, तत्र यथा कश्चित्पुरुषो हस्तगृहीतया दीपिकया पुरतः प्रेक्ष्यमाणया पुरत एव पश्यति, नान्यत्र, एवं येनावधिना तथाविधक्षयोपशमभावतः पुरत एव सङ्ख्येयान्यसङ्ख्येयानि वा योजनानि पश्यति नान्यत्र सोऽवधिः पुरतोऽन्तगत इत्यभिधीयते, तथा स एव पुरुषो यथा पृष्ठतो हस्तेन ध्रियमाणया दीपिकया पृष्ठत एव पश्यतेयंव येनावधिना पृष्ठत एव सङ्ख्येयान्यसङ्ख्येयानि वा योजनानि पश्यति स पृष्ठतोऽन्तगतो, येन तु पार्श्वत एकतो द्वाभ्यां वा सङ्ख्येयान्सङ्ख्येयानि वा योजनानि पश्यति स पार्श्वतोऽन्तगत इति, उक्तं च नन्द्यध्ययनचूर्णौ-''पुरतोऽतगएणं पुरतो चेव संखेज्जाणि वा असंखेज्जाणि वा जोयणाइं जाणइ पासइ,

मग्गतोऽंतगएणं ओहिनाणेणं मग्गतो चेव' इत्यादि, मध्यगत इत्यत्रि त्रिधा व्याख्यानं, इह मध्यं प्रसिद्धं दण्डादिमध्यवत्, तत्रात्मप्रदेशानां मध्ये मध्यवर्त्तिष्वात्मप्रदेशेषु गतः-स्थितो मध्यगतः अयं च स्पर्द्धकरूपः सर्वदिगुपलम्भकारणं, मध्यवर्त्तिनामात्मप्रदे ज्ञानामवधिरवसेयः, अथवा सर्वेषामप्यात्मप्रदशानां क्षयोपशमभावेऽपि औदारिकशरीरमध्यभागेनोपलब्धिः स मध्ये गतो मध्यगतः, उक्तं च नन्द्यध्ययनचूर्णौ-''ओरालियसरीरमज्झे फड्डगविसुद्धीओ सव्वायप्पए-सविसुद्धीओ वा सव्वदिसोवलंभत्तणओ मज्झगतोत्ति भण्णइ' इति, अथवा तेनवधिना यदुद्योतितं क्षेत्रं सर्वासुदिक्षु तस्य मध्ये-मध्य भागे स्थितो मध्यगतः अवधिज्ञानिस्तदुद्योतितक्षेत्रमध्यवर्त्तित्वात्, आह च नंदिचूर्णिकृदेव-''अहवा उवलद्धिखेत्तस्स अवहिपुरिसो मज्झगतोत्ति अतो वा मज्झगतो ओही भण्णइ' इति, इह व्याख्यनत्रेऽपि यदाऽवधिना द्योतितं क्षेत्रमवधिमता सम्बद्धं भवति तदा सोऽभ्यन्तराधिर्मतः, सर्वदिगुपलब्धिक्षेत्रमध्यवर्त्तित्वात्, एष चेह न ग्राह्योऽभ्यन्तरावधावस्यान्तर्भावात्,

यदा तु तदुद्योतितं क्षेत्रमपान्तराले व्यवच्छिन्नत्वादवधिमता सम्बद्धं न भवति तदा बाह्योऽवधिः एष चेह ग्राह्य;, प्रस्तुतत्वात, तथा 'देसोही' इति देशावधिर्वक्तव्यः, उपलक्षणमेतत्, प्रतिपक्षभूतः सर्वावधिश्च, अथ किंस्वरूपो देशावधिः किंस्वरूपो वा सर्वावधिरिति चेत्, उच्यते, इहावधिस्त्रिविधो भवति, तद्यथा-सर्वजघन्यो मध्यमः सर्वोत्कृष्टश्च, तत्र यः सर्वजघन्यः स द्रव्यतोऽनन्तानि तैजसभाषापा- न्तरालवर्त्तीनि द्रव्याणि क्षेत्रतोऽङ्गुलसङ्ख्येयभागं क्षेत्रं कालतोऽतीतमनागतं चावलिकाया असङ्ख्येयभागं, इहावधिः क्षेत्रं कालं च स्वरूपतः साक्षान्न जानाति, तयोरमूर्त्तत्वात्, अवधेश्च रूपिविषयत्वात् 'रूपिष्ववधे' रिति वचनात्,

इह क्षेत्रकालदरअशनमुपचारतो वेदितव्यं, किमुक्तं भवति ?-एतावति क्षेत्रे काले च यानि द्रव्याणि तानि जानातीति, भावोतोऽनन्तान् पर्यायान् जानाति, प्रतिद्रव्यं जघन्यपदेऽपि चतुर्णां रूपरसगन्धस्पर्शरूपाणां पर्यायाणमवगमात्, 'दो पज्जवे दुगुणिए सव्वजहण्णे उ पिच्छए (ओही)। 'ते उ वन्नाईया चउरो' द्वौ पर्यवौ द्विगुणितौ सर्वजघन्यौ तु प्रेक्षतेऽवधिः। ते तु वर्णादिकाश्चत्वारः इति वचनात्, द्रव्याणां चानन्तत्वात्, अत ऊर्ध्वं तु प्रदेशवृध्या समयवृध्या पर्यायवृध्या

च प्रवर्द्धमानोऽवधिर्मध्यमो वेदितव्यः स च तावत् यावत्सर्वोत्कृष्टः परमावधिर्न भवति, सर्वोत्कृष्टः परमावधिर्द्रव्यतः सर्वाणि रूपिद्रव्याणि जानाति, क्षेत्रतोऽलोके लोकमात्राणि खण्डानि, कालतोऽतीतानामगताश्चासङ्ख्येया उत्सर्पिण्यवसर्पिणीर्भावतोऽनन्तान् पर्यायान्, प्रतिद्रव्यं सङ्ख्येयानामसङ्ख्येयानां च पर्यायाणामवगाग्नु,

॥१॥ "एगं दव्वं पेच्छं खंधमणुं वा स पज्जवे तस्स ।
उक्कोसमसंखिज्जे संखेज्जे पेच्छए कोई ॥"

इति वचनात्, तत्र सर्वजघन्यो मध्यमश्च देशावधिः, सर्वोत्कृष्टस्तु परमावधिः सर्वावधिः तथाऽवधेः क्षयवृद्धी वक्तव्ये, किमुक्तं भवति ? –हीयमानकः प्रवर्द्धमानकश्चावधिर्वक्तव्य इति, तत्र तथाविधसामग्र्यभवतः पूर्वावस्थातो हानिमुपगच्छन् हीयमानकः, उक्तं च–"हीयमाणयं पुव्वावत्थातो अहोऽहो हस्समाणं'ति, वर्द्धमानको बहुबहुतरेन्धनप्रक्षेपा- दिभिर्वर्द्धमानज्वाला-कलापइव पूर्वावस्थातो यथायोगं प्रशस्तप्रशस्ततराध्यवसायभावतोऽभिवर्द्धमानः,तथा प्रतिपाती अप्रतिपाती चशब्दस्यानुक्तार्थसमुच्चायकत्वादानुगामिकोऽनानुगामिकश्च वक्तव्यः तत्र प्रतिपतनशीलः प्रतिपाती–य उत्पन्नः सन् क्षयोपशमानुरूपं कियत्कालं स्थित्वा प्रदीप इव सामस्त्येन विध्वंसमुपयाति, अथ हीयमानकप्रतिपातिनोः कः प्रतिविशेषः ?, उच्यते, हीयमानकः पूर्वावस्थातोऽधोऽधो हानिमुपगच्छन्नभिधीयते प्रतिपाती तु निर्मूलमेककालं ध्वंसमुपगच्छन्निति, तथा न प्रतिपाती अप्रतिपाती, यत्केवलत्रानाद्वा मरणादारतो वा न भ्रंशमुप यातीत्यर्थः तथा गच्छन्तं पुरुषं आ–समन्तादनुगच्छतीत्येवंशीलमानुगामि आनुगाम्येवानुगामिकः, स्वार्थे कः प्रत्ययः, अथवा अनुगमः प्रयोजनं यस्य स आनुगामिकः, लोचनवत् गच्छन्तमनुगच्छति सोऽवधिरानुगामिक इति भावः तथा न आनुगामिकोऽनानुगामिकः, शृङ्खलाप्रतिबद्धदीप इव यो गच्छन्तं पुरुषं नानुगच्छतीति भावः ॥

मू. (५८०) कइविहा णं भंते ! ओही पन्नत्ता ?, गो० ! दुविहा ओही पन्नत्ता, तं०–भवपच्चइया य खओवसमिया य, दोण्हं भवपच्चइया, तं०–देवाण य नेरइयाण य, दोण्हं खओवसमिया, तं०–मणूसाणं पंचिंदियतिरिक्खजोणियाण य ।

वृ. तदेवमधिकारप्रतिपादनाय द्वारगाथोपन्यस्ता, सम्प्रति 'यथोद्देशं निर्देश' इति न्यायात् प्रथमतो भेदप्रतिपादनार्थमाह–'कइविहा णं भंते !' इत्यादि, कतिविधो भदन्त ! अवधिः प्रज्ञप्तः,सूत्रे स्त्रीत्वनिर्देशःप्राकृतत्वात्, भगवानाह–गौतम ! द्विविधोऽवधिः प्रज्ञप्तः, तद्यथा–'भवपच्चइया य खओवसमिया य' भवप्रत्ययकः क्षायोपशमिकश्च, तत्र भवन्ति कर्मवशवर्तिनः प्राणिनोऽस्मिन्निति भवो–नारकादिजन्म, 'पुंनाम्नी'ति अधिकरणे घप्रत्ययः, भव एव प्रत्ययः–कारणं यस्य स भवप्रत्ययः, प्रत्ययशब्दश्चेह कारणपर्यायः, वर्त्तते च प्रत्ययशब्दः कारणत्वे "प्रत्ययः शपथज्ञान-हेतुविश्वासनिश्चये" इति, स एव स्वार्थिकप्रत्ययविधानात् भवप्रत्ययकः, तथाऽवधिज्ञानावरणीयस्य कर्मण उदयावलिकाप्रविष्टस्यांशस्य वेदनेन योऽपगमः स क्षयोऽनुदयावस्थस्या विपाकोदयविष्कम्भणमुपशमः क्षयश्च उपशमश्च क्षयोपशमौ ताभ्यां निर्वृत्तः क्षायोपशमिकः, चशब्दौ स्वगतानेकभेदसूचकौ, तत्र तु यो येषं भवति तं तेषामुपदर्शयति–'दोण्ह'मित्यादि, द्वयोर्जीव-समूहयोर्भवप्रत्ययकः, तद्यथा–देवानां च नारकाणां च, देवा भवनपतिव्यन्तरज्योतिष्कवैमानिकभेदाच्चतुर्विधाः,

नारका रत्नप्रभादिपृथिवीभेदात् सप्तविधाः, चशब्दौ प्रत्येकं स्वगतानेकभेदसूचकौ, ते चानेकभेदा विषयसंस्थानचिन्तायामग्रे स्वयमेव सूत्रकृतैवोपदर्शयिष्यन्ते, आह-नन्ववधिज्ञानं क्षायोपशमिके भावे वर्त्तते नारकादिभवस्त्वौदयिके तत्कथं देवादीनामवधिज्ञानं भवप्रत्ययमिति व्यपदिश्यते?, नैष दोषो, यतस्तदपि परमार्थतः क्षायोपशमिकमेव, केवलं स क्षयोपशमो देवनारकभवेष्ववश्यंभावी पक्षिणां गगनगमनलब्धिरिव ततो भवप्रत्ययमिति व्यपदिश्यते, आह च नन्द्यध्ययनचूर्णिकृते-"ननु ओही खओवसमिओ चेव नारगादिभवो से उदइए भावे तओ कहं भवपच्चइओ भण्णइ?, उच्यते, सोऽवि खओवसमिओ चेव, किंतु सो खओवसमो देवनारगभवेसु अवस्सं भवइ, को दिट्ठंतो?-पक्खीणं आगासगमणं व, तओ भवपच्चइओ भण्णइ'त्ति,

तथा द्वयोः क्षायोपशमिकस्तद्यथा-मनुष्याणां च पञ्चेन्द्रियतिर्यग्योनिजातानां च, अत्रापि चशब्दौ प्रत्येकं स्वगतानकभेदसूचकौ, मनुष्याणां तिर्यक्पञ्चेन्द्रियतिरश्चां चावधिज्ञानं नावश्यंभावि ततः सामान्येऽपि क्षायोपशमिकत्वे भवप्रत्ययादिदं मघते, परमार्थतः पुनः सकलमप्यवधिज्ञानं क्षायोपशमकमेवेति। तदेवमुक्तो भेदः, सम्प्रति विषयप्रतिपादनार्थमाह-

मू. (५८१) *नेरइया णं भंते! केवइयं खेत्तं ओहिणा जाणंति पासंति? गो० जह० अद्धगाउयं उक्को० चत्तारि गाउयाइं ओहिणा जाणंति पासंति, रयणप्पभापुढविनेरइया णं भंते! केवतियं खेत्तं ओहिणा जाणंति पासंति?, गो० जह० अद्धट्ठाइं गाउयाइं उक्को० चत्तारि गाउयाइं०, सक्करप्पभापुढविनेरइया जह० तिण्णि गा० उक्को० अद्धट्ठाइं गाउ०, वालुयप्पभापुढविनेरइया ज० अद्धाइज्जाइं गाउ० उ० तिण्णि गाउयाइं ओहिणा जाणंति पासंति, पंकप्पभापुढविनेरइया ज० दोन्नि गाउ० उ० अद्धाइज्जाइं गा० ओहिणा जा० पा०, धूमप्पभापु० नेर० जह० दिवड्ढं गा उक्को० दो गाउ० ओहिणा जा० पा०, तमापु० ने० ज० गाउयं उ० दिवड्ढं गाउयं ओहिना जा० पा०, अधेसत्तमाए पुच्छा, गो० ! जह० अद्धं गाउयं उ० गाउयं ओहिणा जा० पा०।*

असुरकुमारा णं भंते! ओहिणा केवइयं खेत्तं जा० पा०?, गो० ! ज० पणवीसं जोअनाइं उक्को० असंखेज्जे दीवसमुद्दे ओहिणा जा० पा०, नागकुमारा णं ज० पणवीसं जोअनाइं उ० संखेज्जे दीवसमुद्दे ओहिणा जा० पा०, एवं जाव थणियकुमारा। पंचिंदियतिरिक्खजोणिया णं भंते! केवइयं खेत्तं ओहिणा जाणंति पासंति?, गो० ! ज० अंगुलस्स असंखेज्जतिभागं उ० असंखेज्जे दीवसमुद्दे, मणूसा णं भंते! ओहिणा केवतितं खेत्तं जा० पा०?, गो० ! ज० अंगुलस्स असंखेज्जतिभागं उक्को० असंखेज्जाइं अलोए लोयप्पमाणमेत्ताइं खंडाइं ओहिणा जा० पा०।

वाणमंतरा जहा नागकुमारा, जोइसिया णं भंते! केवतितं खेत्तं ओ० जा० पा०? गो० ज० संखेज्जे दीवसमुद्दे उक्कोसेणवि संखेज्जे दीवसमुद्दे, सोहम्मगदेवा णं भंते! केव० खेत्तं ओ० जा० पा०?, गो० ! ज० अंगुलस्स असंखेज्जतिभागं उक्को० अहे जाव इमीसे रयणप्पभाए हिट्ठिल्ले चरमंते तिरियं जाव असंखिज्जे दीवसमुद्दे उड्ढं जाव सयाइं विमाणाइं ओहिणा जाणंति पासंति, एवे ईसाणगदेवावि,

सणंकुमारदेवावि एवं चेव, नवरं जाव अहे दोच्चाए सक्करप्पभाए पुढवीए हिट्ठिल्ले चरमंते, एवं माहिंददेवावि, बंभलोयलंतगदेवा तच्चाए पुढवीए हिट्ठिल्ले चरमंते, महासुक्कसहस्सारगदेवा चउत्थीए पंकप्पभाए पुढवीए हेट्ठिल्ले चरमंते, आणयपाणयआरणच्चुयदेवा अहे जाव पंचमाए धूमप्पभाए हेट्ठिल्ले चरमंते, हेट्ठिमहिमगेवेज्जगदेवा अधे जाव छट्ठाए तमाए पुढवीए हेट्ठिल्ले जाव

चरमंते, उवरिमगेविज्जगदेवा णं भंते ! केवतियं खेत्तं ओहिणा जा० पा० ?, गो० ! ज० अंगुलस्स असंखेज्जतिभागं उ० अधे सत्तमाह हे० च० तिरियं जाव असंखेज्जे दीवसमुद्दे उड्ढं जाव सयाइं विमाणाइं ओ० जा० पा०, अनुत्तरोववाइयदेवा णं भंते ! के० खेत्तं ओ० जा० पा० ?, गो० ! संभिन्नं लोगनालिं ओ० जा० पा०

वृ. 'नेरइया ण'मित्यादि सुगमं, नवरं जघन्येनार्द्धगव्यूतमिति सप्तमपृथिव्यां जघन्यपदमपेक्ष्य, उत्कर्षतश्चत्वारि गव्यूतानि रत्नप्रभायामुत्कृष्टपदमाश्रित्य, अधुना प्रतिपृथिवीविषयं चिन्तयन्नाह–'रयणप्पभे'त्यादि, सुगमं, जघन्यपदोत्कृष्टपदविषयसङ्ग्राहिके इमे गाथे–

"अद्धट्ठ । तिन्नि अद्धाइयाइं ।। दोन्नि य दिवड्ढ मेगं च ।
अद्धं च गाउ कमसो जहन्नतो रयणमाईसुं ।।
रत्नादि गाउयाइं अद्धट्ठाइं ति[illegible]यं चेव ।
अद्धाइज्जा दोन्नि दिवड्ढ ।। मेगं च नरएसुं ।। ।। २ ।।"

भवनपतिव्यन्तराणां जघन्यपदे यानि पञ्चविंशतियोजनानि तानि येषां सर्वजघन्यं दशवर्षसहस्रप्रमाणमायुस्तेषां द्रष्टव्यानि, न शेषाणां, आह च भाष्यकृत्–'पणवीसजोयणाइं दसवाससहस्सिया ठिई जेसि'मिति, मनुष्य चिन्तायामुत्कृष्टपदे यान्यलोके लोकप्रमाणमात्राणि खण्डानि असङ्ख्येयानि तानि परमावधिमपेक्ष्य द्रष्टव्यानि, तस्यैवैतावद्विषयसम्भवात्, एतत्सामर्थ्यमात्रमुपवर्ण्यते, यद्येतावति क्षेत्रे द्रष्टव्यं भवति तर्हि पश्यति यावता तत्र विद्यते, अलोके रूपिद्रव्याणासम्भवात्, रूपिद्रव्यविषयश्चावधिः,

केवलमयं विशेषो –यावदद्यापि परिपूर्णं लोकं पश्यति तावदिह स्कन्धानेव पश्यति, यदा पुनरलोकेऽपि प्रसरमवधिरधिरोहति तदा यता यथाऽभिवृद्धिमासादयति तथा तथा लोके सूक्ष्मान् सूक्ष्मतरान् स्कन्धान् पश्यति यावदन्ते परमाणुमपि, उक्तं च–

॥ १ ॥ "सामत्थमेत्तमुत्तं दट्ठव्वं जइ हवेज्ज पेच्छन्ना ।
उ तं तत्थत्थि जओ सो रूविनिबंधणो भणिओ ।।
॥ २ ॥ वड्ढंतो पुन बाहिं लोगत्थं चेव पासई दव्वं ।
सुहुमयरं सुहुमयरं परमोही जाव परमाणुं ।।"

इत्थंभूतपरमावधिकलितश्च नियमादन्तर्मुहूर्त्तेन केवललोकलक्ष्मीमालिङ्गति, यत उक्तं– "परमोहीनाणविऊ केवलमंतोमुहुत्तमेत्तेणं" इति,

वैमानिकानां यज्जघन्यपदे अङ्गुलासङ्ख्येयभागप्रमाणं क्षेत्रं उक्तं तत्र पर आह–नन्वङ्गुलासङ्ख्येयभागमात्रक्षेत्रपरिमितोऽवधिः सर्वजघन्यो भवति, सर्वजघन्यश्चावधिस्तिर्यग्मनुष्येष्वेव न शेषेषु, यत आह भाष्यकृत् स्वकृतटीकायाम्–"उत्कृष्टो मनुष्येष्वेव नान्येषु, मनुष्यतिर्यग्योनिष्वेव जघन्यो नान्येषु, शेषाणां मध्यम एवेति" तत्कथमिह सर्वजघन्य उक्तः ?, उच्यते, सौधर्मादिदेवानां पारभविकोऽप्युपपातकालेऽवधिः सम्भवति, स च कदाचित्सर्वजघन्योऽपि, उपपातानन्तरं तु तद्वद्भजः, ततो न कश्चिद्दोषः, आह च दुष्प,मान्धकारनिमग्नजिनप्रवचनप्रदीपो जिनभद्रगणिक्षमाश्रमणः–

॥ १ ॥ "वेमाणियाणमंगुलभागमसंखं जहन्नओ होइ ।
उववाए परभविओ तब्भवजो होइ तो पच्छा ।।"

उड्ढं जाव सगाइं विमाणाइं'ति ऊर्ध्वं यावत् स्वकीयानि विमानानि, स्वकीयविमानस्तूपध्वजादिकं यावदित्यर्थः,

'संभिन्नं लोगनालिं'ति परिपूर्णं चतुर्दशरज्वात्मिकां लोकनाडीमिति। संस्थानद्वारमाह-

मू. (५८२) *नेरइयाणं भंते! ओही किंसंठिए पं०?, गो०! तप्पागारसंठिए पं०, असुरकुमाराणं पुच्छा, गो०! पल्लगसंठिते, एवं जाव थणियकुमाराणं, पंचिंदियतिरिक्खजोणियाणं पुच्छा, गो०! णाणासंठेणसं०, एवं मणूसाणवि, वाणमंतराणं पुच्छा, गो०! पडहगसं०, जोतिसियाणं पुच्छा?, गो०! झल्लरिसंठाणसं० पं०,*

सोहम्मगदेवाणं पुच्छा, गो०! उड्डमुयंगागारसंठिए पं०, एवं जाव अच्चुयदेवाणं, गेवेज्जगदेवाणं पुच्छा, गो०! पुप्फचंगेरिसंठिए पं०, अनुत्तरोववाइयाणं पुच्छा, गो०! जवनालियासंठिते ओही, पं०।

वृ. 'नेरइयाण'मित्यादि, 'तप्पागारसंठिए'त्ति तप्रो नाम काष्ठसमुदायविशेषो यो नदीप्रवाहेण प्लाव्यमानो दूरादानीयते स चायतस्त्र्यस्रश्च भवति, तदाकारसंस्थितोऽवधिर्नाकाणां, असुरकुमादारीनां सर्वेषामपि भवनपतीनां पल्लकसंस्थानसंस्थितः, पल्लको नाम लाटदेशे धान्याधारविशेषः, स चोर्ध्वधि आयत उपरि च किञ्चित्सङ्क्षिप्तः, पञ्चेन्द्रियतिर्यग्योनिकानां मनुष्याणां च नानासंस्थानसंस्थितो, यथा स्वयम्भूरमणोदधौ मत्स्याः, अपि च तत्र मत्स्यानां वलयाकारं संस्थानं निषिद्धं तिर्यग्मनुष्यावधेस्तु तदपि भवति, उक्तं च-

॥१॥ "नाणागारो तिरियमणुएसु मच्छा सयंभूरमणेव्व।
तत्थ वलयं निसिद्धं तस्स पुण तयंपि होज्जाहि॥"

व्यन्तराणां पटहसंस्थानसंस्थितः, पटह आतोद्यविशेषः, स च किञ्चिदायत उपर्यधश्च समप्रमाणः, ज्योतिष्कदेवानां झल्लरीसंस्थानसंस्थितः, झल्लरी-चर्मावनद्धविस्तीर्णवलयाकारा आतोद्यविशेषरूपा देशविशेषे प्रसिद्धा, सौधर्मदेवादीनामच्युतदेवपर्यन्तानां मृदङ्गसंस्थान-संस्थितः, मृदङ्गो वाद्यविशेषः, स चाधस्तात् विस्तीर्णं उपरि च तनुकः सुप्रतीतः, ग्रैवेयकदेवानां ग्रथितपुष्पसशिखाकरूपचङ्गेरीसंस्थानसंस्थितः अनुत्तरोपपातिकदेवानां कन्याद्योलकापरपर्यायजनालकसंस्थानसंस्थितः, तथा च तत्प्राकारादीनां व्याख्यानमिदं भाष्यकृदाह-

॥१॥ "तप्पण समागारो तप्पागारो स चाययत्तंसो।
उद्धायतो उ पल्लो उवरिं च स किंचि संखित्तो॥

॥२॥ "नद्धायतो समोविय पडहो हेट्ठोवरि पईतो सो।
चम्मामणवणद्धविच्छिन्नवलयरूवा उ झल्लरिया॥

॥३॥ उद्धायओ मुइंगो हेट्ठा रुंदो तहोवरिं तणुओ।
पुप्फसिहावलिरइया चंगेरी पुप्फचंगेरी॥
-जीवनालओत्ति भण्णइ उब्भ सिरकंचुओ कुमारीए॥"

इति, अनेन च संस्थानप्रतिपादनेनेदमावेदितं द्रष्टव्यं, भवनपतिव्यन्तराणामूर्ध्वं प्रभूतोऽवधिर्वैमानिकानामधः ज्योतष्कनारकाणां तिर्यक् विचित्रो नरतिरश्चां, आह च-

॥१॥ "भवणवइवणयराणं उड्ढं बहुगो अहो य सेसाणं।
नारगजोइसियाणं तिरियं ओरालिओ चित्तो॥"

मू. (५८३) नेरइयाणं भंते ! ओहिस्स किं अंतो० बाहिं०, गो० ! अंतो नो बाहिं, एवं जाव थणियकुमारा, पंचिंदियतिरिक्खजोणियाणं पुच्छा, गो० ! नो अंतो बाहिं, मणूसाणं पुच्छा, गो० ! अंतोवि बाहिंपि, वाणमंतरजोइसियवेमाणियाणं जहा नेरइयाणं।

नेरइयाणं भंते ! किं देसोही सव्वोही ?, गो० ! देसोही नो सव्वोही, एवं जाव थणियकुमारा, पंचिंदियतिरिक्खजोणियाणं पुच्छा, गो० ! देसोही नो सव्वोही, मणूसाणं पुच्छा, गो० ! देसोहीवि सव्वोहीवि, वाणमंतरजोइसियवेमाणियाणं जहा नेरइयाणं।

नेरइयाणं भंते ! ओहि किं आनुगामिते अनानुगामिते वड्ढमाणते हीयमाणए पडिवाई अप्पडिवाई अवट्ठिए अनवट्ठिए ?, गो० ! आनुगामिए नो अनानुगामिए नो वड्ढमाणते नो हीयमाणए नो पडिवाई अप्पडिवाई अवट्ठिए नो अणवट्ठिए, एवं जाव थणियकुमाराणं,

पंचिंदियतिरिक्खजोणियाणं पुच्छा, गो० ! आनुगामितेवि जाव अनवट्ठिएवि, एवं मणूसाणवि, वाणमंतरजोतिसियवेमाणियाणं जहा नेरइयाणं

वृ. तथा नैरयिकभवनपतिव्यन्तरज्योतिष्कवैमानिकाः तथाभवस्वाभाव्यादवधेर्मध्यवर्त्तिनो न पुनर्बहिः, किमुक्तं भवति ? – सर्वतःप्रकाशिखसम्बद्धावधयो भवन्ति, न तु स्पर्द्धकावधयो विच्छिन्नावधयो वा, तिर्यक्पञ्चेन्द्रियास्त्ववधेरन्तर्न विद्यन्ते, किन्तु बहिः, अत्राप्येष भावार्थः –तिर्यक्पञ्चेन्द्रियास्तथाभवस्वाभाव्यात् स्पर्द्धकावधयो विच्छिन्नावधयो वा भवन्ति, स्पर्द्धकाद्यवधयो वेति भावः, देशावधिसर्वावधिचिन्तायां मनुष्यवर्जाः सर्वेऽपि देशावधयः, मनुष्यास्तु देशावधयोऽपि सर्वावधयोऽपि, परमावधेरपि तेषां सम्भवात्, ।

आनुगामिकादिचिन्तायां नैरयिकभवनपति व्यन्तरज्योतिष्कवैमानिका आनुगामिका-प्रतिपात्यवस्थितावधयो नत्वानानुगामिकवर्द्धमा ।हीयमानप्रतिपात्यनवस्थितावधयस्तथाभवस्वा-भाव्यात्, तिर्यक्पञ्चेन्द्रियमनुष्याणां त्वष्टधाऽवधिरिति ॥

पदं – ३३ – समाप्तम्

पदं – ३४ – प्रविचारणा

वृ. तदेवमुक्तं त्रयस्त्रिंशत्तमं पदं, सम्प्रति चतुस्त्रिंशत्तममारभ्यते, अस्य चामभिसम्बन्धः– इहानन्तरपदे ज्ञानपरिणामविशेषोऽवधिरुक्तः, अत्र तु परिणामसाम्याद्भेदपरिणामविशेषः प्रवीचारः प्रतिपाद्यते इति, तत्र च सकलवक्तव्यतो पसङ्ग्राहिके इमे द्वे गाथे–

मू. (५८४) अनंतरगयाहारे १, आहारे भोयणाइय २ ।
पोग्गला नेव जाणंति ३, अज्झवसाणा ४ य आहिया ॥

वृ. 'अनंतरगयाहारे' इत्यादि, प्रथममनन्तरागताहारको नैरयिकादिर्वक्तव्यः, तदनन्तरं 'आहारे भोयणाइय' इति आहाराभोगता आदिशब्दादाहारनाभोगता च वक्तव्या, यथा 'नेरयिकाणं भंते ! आहारे किं आभोगनिव्वत्तिए अनाभोगनिव्वत्तिए' इत्यादि, तथा 'पोग्गला नेव जाणंति' इति, नैरयिका आहारतया गृहीतान् पुद्गलाञ्नैव जानन्तीत्यादि चतुर्विंशतिदण्डकक्रमेण वक्तव्यं, 'अज्झवसाणा य आहिय'त्ति तदनन्तरं नैरयिकादीनां क्रमेणाध्यवसानानि, सूत्रे पुंलिङ्गनिर्देशः प्राकृतत्वात्, चः पूर्वापेक्षया समुच्चये, आख्यातानि, ।

मू. (५८५) सम्मत्तस्सा हिमगे ५ ततो परियारणा ६ य बोद्धव्वा ।

काए फासे रवे सद्दे य मणे य अप्पबहुं ॥

वृ. तदनन्तरं सम्यक्त्वस्य 'अहिगमे' इति, सम्यकत्वस्याधिगमो नैरयिकादिचतुर्विंशतिदण्डकक्रमेण चिन्तनीयः, 'तत्तो परियारणा य बोद्धव्वा' इति ततः-सम्यकत्वाधिगमप्रतिपादनादूर्ध्वं परिचारणा वक्तव्यताय बोद्धव्या, कस्मिन् विषये इत्याह-काये स्पर्शे रूपे शब्दे मनसि च, ततः कायप्रवीचारादीनामल्पबहुत्वं, भावप्रधानोऽयं निर्देशः-अल्पबहुतवं वक्तव्य।

मू. (५८६) *नेरइया णं भंते! अनंतराहारा ततो निव्वत्तणा ततो परियाइणया ततो परिणामया ततो परियारणया तओ पच्छा विउव्वणया?, हंता! गो०! नेरइयाणं अनंतराहारा ततो निव्वत्तणया ततो परियादिणया ततो परिणामया तओ परियारणया तओ पच्छा विउव्वणया,*

असुरकुमारा णं भंते! अनंतराहारा ततो निव्वत्तणया ततो परियाइणया ततो परिणामया ततो विउव्वणया तओ पच्छा परियारणया?, हंता! गो०! असुरकुमारा अनंतराहारा ततो निव्वत्तणया जाव ततो पच्छा परिया०, एवं जाव थणियकुमारा,

पुढविकाइया णं भंते! अनंतराहारा ततो निव्वत्तणया ततो परियाइणया ततो परिणामया ततो परिया० ततोविउ०?, हंता गो०! तं चेव जाव परियारणया नो चेव णं विउव्वणया, एवं जाव चउरिंदिया, नवरं वाउक्काइया पं-चिंदियतिरिक्खजोणिया मणूसा य जहा नेरइया, वाणमंतरजोइसियवेमाणिया जहा असुरकुमारा

वृ. सम्प्रति 'यथोद्देशंनिर्देश' इति प्रथमतोऽनन्तरागताहारकवक्तव्यतामभिधित्सुरिदमाह-'नेरइया णं भंते!' इत्यादि, नरयिकाः, णमिति वाक्यालङ्कारे, भदन्त!-परमकल्याणयोगिन्! परमसुखयोगिन्! वा अनन्तरं-उपपातक्षेत्रप्राप्तिसमयमेव आहारयन्तीत्यानन्तरागताहाराः, 'ततो निव्वत्तणया' इति ततः-अनन्तराहरग्रहणादारभ्य क्रमेण शरीरस्येति गम्यते निर्वर्त्तना-निष्पतिर्भवति, 'ततो परियाइणया' इति ततः-शरीरनिष्पत्तेरारभ्य पर्यादानं-यथायोगमङ्गप्रत्यङ्गैर्लोमाहारादिना समन्ततः पुद्गलादानं 'ततो परिणामणया' इति ततः पुद्गलादानादनन्तरं तेषां पुद्गलानां परिणामनं-इन्द्रियादिरूपतया परिणत्यापादानं 'ततो परियारणया' इति ततः-इन्द्रियादिरूपतया परिणत्यापादानादूर्ध्वं परिचारणा-यथायोगं शब्दादिविषयोपभोगः, ततः पश्चात् विकुर्वणा-वैक्रियलब्धिवशात् विक्रिया नानारूपा?, एवमुक्ते भगवानाह-'हंता! गोयमे' त्यादि, हन्तेत्यभ्यनुज्ञार्थं, हंता! गौतम! नैरयिका अनन्तराहारा इत्यादि,

तदेवं यथा नैरयिकाणामनन्तराहारादिवक्तव्योतोक्ता तथा असुरकुमारादीनामपि स्तनितकुमारपर्यवसानानां वक्तव्या, नवरं तेषां पूर्वं विकुर्वणं पश्चात् परिचारणा, ते हि विशिष्टशब्दाद्युपभोगवाञ्छायां पूर्वमिष्टं वैक्रियं रूपं कुर्वन्ति पश्चात् शब्दाद्युपभोगमित्येष नियमः, शेषास्तु शब्दाद्युपभोगसम्पत्तौ सत्यां हर्षवशात् विशिष्टतरशब्दाद्युपभोगवाञ्छातः अन्यतो वा कुतश्चित्कारणात् विकुर्वते, ततस्तेषां पूर्वं प्रवीचारणा पश्चाद्विकुर्वणेति, पृथिवीकयविषये प्रश्नसूत्रं तथैव उत्तरसूत्रे तावद् वक्तव्यं यावत् परिचारणा, तेषामपि स्पर्शोपभोगसम्भवात्, 'नो चेव णं विउव्वणय'त्ति न चैव तेषां विकुर्वणा वाच्या, वैक्रियलब्धेरसम्भवात्,

'एव'मित्यादि, एवं-पृथिवीकायिकवत् अप्कायादयो वातकायवर्जास्तावदध्येतव्या यावच्चतुरिन्द्रियाः, सर्वेषामपि वैक्रियलब्धेरसम्भवेन सूत्रस्य समानत्वात्, वातकायान् प्रति विशेषमभिधित्सुः समानगमत्वात् पञ्चेन्द्रियतिर्यग्मनुष्याणामपि वातकायैः सहातिदेशमाह-

'नवर' मित्यादि, 'जहा नेरइया' इति यथा नैरयिकास्तथा वक्तव्याः, किमुक्तं भवति ? – नैरयिकवत् विकुर्वणाऽप्येतेषां वक्तव्या, वैक्रियलब्धिसम्भवात्, सा च प्रवीचारणायाः पश्चादिति, 'वाणमंतर-जोइसवेमाणिया जहा असुरकुमारा' इति असुरकुमाराणामिव व्यन्तरादीनामपि पूर्वं विकुर्वणा पश्चात् परिचारणा वक्तव्येति भावः, सुरगणानां सर्वेषामपि तथास्वाभाव्यात्, उक्तं च मूलटीकायाम्–

॥ १ ॥ "पुव्वं विउव्वणा खलु पच्छा परियारणा सुरगणाणं।
सेसाण पुव्वपरियारणा उ पच्छा विउव्वणया ॥" इति ॥

सम्प्रति आहारविषयमाभोगं चिचिन्तयिषुरिदमाह–

मू. (५८७) *नेरइया णं भंते ! आहारे किं आभोगनिव्वत्तिते अनाभोगनि० ?, गो० ! आभोगनिव्वत्तिएवि अना०, एवं असुरकुमाराणं जाव वेमाणियाणं, नवरं एगिंदियाणं नो आभोगनिव्वत्तिए अनाभोगनिव्वत्तिए।*

नेरइया णं भंते ! जे पोग्गले आहारत्ताए गिण्हंति ते किं जाणंति पा० आहारेंति उदाहु न याणंति न पासं० आहारेंति ?, गो० ! न याणंति न पासंति आहारेंति, एवं जाव तेइंदिया, चउरिंदियाणं पुच्छा, गो० ! अत्थेगतिया न याणंति पासंति आहा० अत्थेगइया न याणंति न पासंति आहा०, पंचिंदियतिरिक्खजोणियाणं पुच्छा गो० ! अत्थे० जा० पा० आहा० १ अत्थे० जा० न पा० आहा० अत्थे० न याणंति पासंति आहा० ३ अत्थे० न जा० न पा० आ० ४, एवं जाव मणुस्साणवि, वाणमंतरजोइसिया जहा नेरइया,

वेमाणियाणं पुच्छा, गो० ! अत्थे० जा० पा० आ०, अत्थे० न जा० न पा० आ०, से केणट्ठेणं भंते ! एवं वु० वेमाणिया अत्थे० जा० पा० आ० अत्थे० न जा० न पा० आ० ?, गो० वेमाणिया दुविहा पं०, तं०–माईमिच्छद्दिट्ठि उववन्नगा य अमायिसम्मद्दिट्ठिव०, एवं जहा इंदियउद्देसए पढमे भणितं तहा भाणितव्वं जाव से एएणट्ठेणं गो० ! एवं वुच्चति,

नेरइया णं भंते केवतिया अज्झवसाणा पं० ?, गो० ! असंखेज्जा अज्झवसाणा, ते णं भंते ! किं पसत्था अपसत्था ?, गो० ! पसत्थावि अप० एवं जाव वेमाणियाणं।

नेरइया णं भंते ! किं सम्मत्ताभिगमी मिच्छत्ताभिगमी सम्मामिच्छत्ताभिगमी ?, गो० ! सम्मत्ताभिगमीवि मिच्छत्ताभिगमीवि सम्मामिच्छत्ताभिगमीवि, एवं जाव वेमाणियावि, नवरं एगिंदियविगलिंदिया नो सम्मत्ताभिगमी मिच्छत्ताभिगमी नो सम्मामिच्छत्ताभिगमी।

वृ. 'नेरइयाण' मित्यादि, आभोगनिर्वर्त्तितो यदा मनःप्रणिधानपूर्वमाहारं गृह्णन्ति, शेषकालमनाभोगनिर्वर्त्तितः, स च लोमाहारोऽवसातव्यः, एवं शेषाणामपि जीवानामभोग-निर्वर्त्तितोऽनाभोगनिर्वर्त्तितश्चाहारो भावनीयः, नवरमेकेन्द्रियाणामतिस्तोकापटुमनोद्रव्य-लब्धिसम्पन्नत्वात्, पटुतर आभोगो नोपजायते इति तेषां सर्वदाऽनाभोगनिर्वर्त्तित एवाहारो न पुनः कदाचिदप्याभोगनिर्वर्त्तितः।

अधुना आहार्यमाणपुद्गलविषये ज्ञानदर्शने चिन्तयति–'नेरइया णं भंते' इत्यादि, नैरयिका णमिति वाक्यालङ्कारे भदन्त ! यान् पुद्गलान् आहारतया गृह्णन्ति तान् किं जानन्ति पश्यन्ति उत नेति ?, भगवानाह–गौतम ! न जानन्त्यवधिज्ञानेन, लोमाहारतया तेषामतिसूक्ष्मत्वेन नारकाव-धेरविषयत्वात्, न च पश्यन्ति चक्षुरिन्द्रियविषयाभावात्, द्वीन्द्रिया न जानन्ति, मिथ्याज्ञानतया

तेषां सम्यक् परिज्ञानाभावात्, द्वीन्द्रियाणां हि मत्यज्ञानं तदपि यास्पष्टमतः प्रक्षेपाहारमपि न ते स्वयं गृह्यमाणमपि सम्यक् जानन्ति चक्षुरिन्द्रियाभावात् न च पश्यन्ति, एवं त्रीन्द्रिया अपि ज्ञानदर्शनबलिकला भावनीयाः,

चतुरिन्द्रियाः 'अत्थेगइय'त्ति सन्त्येकके ये स्वयं गृह्यमाणमप्याहारं प्रक्षेपरूपमपि न जानन्ति, मिथ्याज्ञानित्वात्, तेषामपि हि द्वीन्द्रियाणामिव मत्यज्ञानं तदपि चाविशुद्धमिति, चक्षुषा पुनःपश्यन्ति चक्षुरिन्द्रियसद्भावात्, तथाहि—पश्यन्ति मक्षिकादयो गुडादिकमिति एवमाहारयन्ति, तथा सन्त्येकके चतुरिन्द्रिया ये न जानन्ति, मिथ्याज्ञानित्वात्, न पश्यन्ति च अन्धकारादिना चक्षुर्दर्शनस्य व्याहतत्वात् अनाभोगसम्भवाद्वा,

तिर्यक्पञ्चेन्द्रियतिरश्चां चतुर्भङ्गी प्रक्षेपाहारं लोमाहारं चाधिकृत्य भावनीया, तत्र प्रक्षेपाहारमधिकृत्यैवं भावना—सन्त्येकके तिर्यक्पञ्चेन्द्रिया ये प्रक्षेपमाहारं जानन्ति, सम्यग्ज्ञानितया तेषां यथावस्थितपरिज्ञानात्, पश्यन्ति चक्षुरिन्द्रियभावात् एवमाहारयन्ति १, तथा सन्त्येकके ये जानन्ति पूर्ववत् न च पश्यन्ति चक्षुर्दर्शनस्यान्धकारादिना अनाभोगेन च व्याहतत्वात् २, तथा सन्त्येकके ये न जानन्ति मिथ्याज्ञानितया सम्यक्परिज्ञानाभावात् पश्यन्ति पुनश्चक्षुरिन्द्रियोपयोगात् ३ तथा सन्त्येकके ये न जानन्तिमिथ्याज्ञानित्वान्न च पश्यन्ति पूर्ववत् एवमाहारयन्ति ४ लोमाहारापेक्षया त्वेवं भावना—सन्त्येकके तिर्यक्पञ्चेन्द्रिया ये लोमाहारमपि जानन्ति, विशिष्टावधिज्ञानपरिकलितत्वात्,

पश्यन्ति तथाविधक्षयोपशमभावत इन्द्रियपाटवस्यातिविशुद्धत्वात् एवमाहारयन्ति १ तथा सन्त्येकके ये न जानन्ति पूर्ववत् न तु पश्यन्ति तथाविधस्येन्द्रियपाटवस्याभावात् २ तथा सन्त्येकके ये न जानन्ति पश्यन्ति पुनस्तद्विषयेन्द्रियपाटवस्य भावात् ३ तथा सन्त्येकके ये न जानन्ति मिथ्याज्ञानित्वात् अवधिविकलत्वात् अवधिविषयातीतत्वाद्वा, न च पश्यन्ति तथारूपपाटवाभावात् ४ इति, एवं मनुष्याणामपि लोमाहारप्रक्षेपाहारौ प्रतीत्य चतुर्भङ्गी भावनीया, 'वाणमंतरजोइसिया जहा नेरइया' इति, नैरयिकावधिरिव व्यन्तरज्योतिष्कावधिरपि मनोभक्षित्वेऽप्याहारपुद्गलानामविषयत्वात्,

'वेमाणियाणं पुच्छ'त्ति, वैमानिकानां पृथक् सूत्रं वक्तव्यं, 'वेमाणिया णं भंते !' जे पोग्गले आहारत्ताए गेण्हंति ते किं जाणंति पासंति आहारेंति उदाहु न जाणंति न पासंति आहारेंति' इति, भगवानाह--'गोयमे'त्यादि, माया पूर्वभवकृता विद्यते येषां ते मायिनो, मायया हि यया तया वा बादररूपकृतया कलुषकर्मप्रादुर्भावः, कलुषे च कर्मण्युदयमागते भवप्रत्ययादप्युपजायमानोऽवधिर्नातिसमीचीनो भवति, एते च सम्यग्दशो न वेदितव्याः, तथा मिथ्या—विपर्यस्ता दृष्टिः—जिनप्रणीतवस्तुतत्त्वप्रतिपत्तिर्येषां ते मिथ्यादृष्टयः, मायिनश्च मिथ्यादृष्टश्च मायिमिथ्यादृष्टयस्ते च ते उपपन्नाश्च मायिमिथ्यादृष्टयुपपन्नास्त एव स्वार्थिककप्रत्ययविधानात् मायिमिथ्यादृष्टयुपपन्नकास्ते चोपरितनोपरितनग्रैवेयकपर्यवसाना विज्ञेयाः, तेषां यथायोगमवश्यं मिथ्यादृष्टित्वस्य मायित्वस्य च भावात्, तद्विपरीता अमायिसम्यग्दृष्टयुपपन्नकाः, ते चानुत्तरविमानवासिनः, तेषामवश्यं सम्यग्दृष्टित्वं, पूर्वानन्तरभवे नितरां प्रतनुक्रोधमानमायालोभत्वस्योपशान्तकषायत्वस्य च भावात्, आह च मूलटीकाकारः—"वेमाणिया मायिमिच्छद्दिट्ठीउववण्णगा जाव उवरिमगेवेज्जा, अमायिसम्मद्दिट्ठिउववन्नगा अनुत्तरसुरा एव गृह्यन्ते" इति, 'एवं जहे'त्यादि, एवमुक्तेन प्रकारेण

प्राक् यथा इन्द्रियपदस्के प्रथमोद्देशके भणितं तथा भणितव्यं, तच्च तावत् यावत् सर्वान्तिमं 'से एएण- ट्ठेण'मित्यादिना निगमनवाक्यं, तद्यथा-

'तत्थ णं जे ते मायिमिच्छद्दिट्ठिउववन्नगा ते णं न जाणंति न पासंति आहारेंति, तत्थ णं जे ते अमायिसम्मद्दिट्ठिउववण्णगा ते णं दुविहा पन्नत्ता, तंजहा-अनंतरोववण्णगा य परंपरोववण्णगा य, तत्थ णं जे ते अनंतरोववण्णगा ते णं न याणंति न पासंति आहारेंति, तत्थ णं जे ते परंपरोववण्णगा ते णं दुविहा पं०, त०-पज्जत्तगा य अपज्जत्तगा य, तत्थ णं जे त अपज्जत्तगा ते णं न जाणंति न पासंति आहारेंति, तत्थ णं जे ते पज्जत्तगा ते दुविहा प०, त०-उवउत्ता य अणुवउत्ता य, तत्थ णं जे ते अनुवउत्ता ते णं न याणंति न पासंति आहारेंति, तत्थ णं जे ते उवउत्ता ते णं जाणंति पासंति आहारेंति, से एएणट्ठेणं गोयमा! एवं वुच्चति-अत्थेगइया न जाणंति न पासंति आहारेंति अत्थेगइया जाणंति पासंति आहारेंति ?'' इति, अस्यायमर्थः-तत्र ये ते मायिमिथ्यादृष्ट्युपपन्नका उपरितनोपरितनग्रैवेयकपर्यवसाना इत्यर्थः ते मनोभक्ष्याहारयोग्यान् पुद्गलान् न जानन्ति अवधिज्ञानेन, तदवधेस्तेषामविषयत्वात्स, न पश्यन्ति चक्षुषा, तथाविधपाटवाभावात्,

-येऽप्यमायिसम्यग्दृष्ट्युपपन्नका अनुत्तरविमानवासिन इत्यर्थः, ते द्विधा-अनन्तरोपपन्नका परम्परोपपन्नकाश्च, प्रथमसमयोत्पन्ना अप्रथमसमयोत्पन्नाश्चेत्यर्थः अत्र ये ते अनन्तरोपपन्नकास्ते न जानन्ति न पश्यन्ति, प्रथमसमयोत्पन्नतयाऽवधिज्ञानोपयोगस्य चक्षुरिन्द्रियस्य चाभावात्, किन्त्वेवमेवाहारयन्ति, तत्र ये ते परम्परोपपन्नकास्ते द्विविधाः, तद्यथा-पर्याप्ता अपर्याप्ताश्च, तत्र ये ते अपर्याप्तकास्ते न जानन्ति न च पश्यन्ति, पर्याप्तीनामसम्पूर्णत्वेनावध्याद्युपयोगाभावात्, येऽपि पर्याप्तस्तेऽपि द्विविधाः, तद्यथा-उपयुक्ता अनुपयुक्ताश्च, तत्र ये ते उपयुक्तास्ते जानन्ति, अवधानवशतो यथाशक्ति नियमेन ज्ञानस्य स्वविषयपरिच्छेदाय प्रवृत्तिसम्भवात्, पश्यन्ति चक्षुषा इन्द्रियपाटवस्य तेषामतिविशिष्टत्वात्, ये त्वनुपयुक्तास्ते न जानन्ति न च पश्यन्ति अनुपयुक्तत्वादेव, उपयुक्ता अपि कथं मनोभक्ष्याहारयोग्यान् पुद्गलान् जानते इति चेत्, उच्यते,

-इहावश्यकप्रथमपीठिकायामवधिज्ञानाधिकारेऽभिहितम्-''संखेज्ज कम्मदव्वे लोए थोऊणयं पलियं'' अस्यायमर्थः-कार्मणशरीरद्रव्याणि पश्यन् क्षेत्रतो लोकस्य सङ्ख्येयान् भागान् पश्यति कालतः स्तोकोनं पल्योपमं यावत्, अनुत्तरास्तु सम्पूर्णां लोकनाडीं पश्यन्ति, 'सभिन्नलोगनालिं पैसंति अनुत्तरा देवा' इति वचनात्, ततस्ते मनोभक्ष्याहारयोग्यानपि पुद्गलान् जानन्ति, आह च मूलटीकाकारः-'ते जानन्ति पश्यन्ति आहारयन्ति च, विशुद्धत्वादवधेरिन्द्रियविषयस्य चातिविशुद्धत्वात् पश्यन्त्यपि'' इति, अत्र इन्द्रियविषयस्तेति-इन्द्रियपाटवस्येतिभावः, उपसंहारवाक्यं प्रतीतं । अध्यवसायचिन्तायां प्रत्येकं नैरयिकादीनामसङ्ख्येयान्यध्यवसानानि प्रतिसमयं प्रायोऽन्यान्याध्यवसानभावात्, ।

सम्यक्त्वाद्यधिगमचिन्तां कुर्वन्नाह-'नेरइया ण'मित्यादि, नैरयिकाः णमिति पूर्ववत् भदन्त किं सम्यक्त्वाधिगामिनः-सम्यक्त्वप्राप्तिवन्तः, एवं मिथ्यात्वाधिगामिनः सम्यग्मिथ्यात्वाधिगामिनश्च ?, भगवानाह-गौतम! 'सम्मे'त्यादि सुगमं, त्रिविधाया अपि प्राप्तेर्यथायोगं सम्भवात्, 'एवं जावे'त्यादि, एवं-नैरयिकगतेनाभिलापप्रकारेण निरन्तरं तावद्वक्तव्यं यावद्वैमानिकाः, नवरमेकेन्द्रियाणां विकलेन्द्रियाणां केषांचित् सासादनसम्यक्त्वमपि लभ्यते तथापि ते

मिथ्यात्वमिमुखा इति सदपि तत्र विवक्षितं। सम्प्रति परिचारणां प्रतिपिपादयिषुरिदमाह-

मू. (५८८) देवा णं भंते! किं सदेवीया सपरियारा सदेवीया अपरियारा एदेवीया सपरियारा अदेवीया अपरियारा?, गो०! अत्थेगतिया देवा सदेवीया सपरियारा अत्थेगतिया देवा अदेवीया सपरियारा अत्थे० देवा अदेविया अपरिचारा नो चेव णं देवा सदेवीया अपरिचारा,

से केणट्ठेणं भंते! एवं वुच्चति-अत्थे० देवा सदेवीया सपरिचारा तं चेव जाव नो चेव णं देवा सदेवीया अप०?, गो०! भवणपतिवाणमंतरजोतिससोहम्मीसाणेसु कप्पेसु देवा सदेवीया सपरियारा, सणंकुमारमाहिंदबंभलोगलंतगमहासुक्कसहस्सारआणयपाणयआरणअच्चुएसु कप्पेसु देवा अदेवीया सपरिचारा गेवेज्जअणुत्तरोववाइया देवा अदेवीया अपरियारगा, नो चेव णं देवा सदेवीया अपरिचारा, से तेणट्ठेणं गो०! एवं वु० अत्थे० देवा सदेवीया सपरिवारा तं चेव नो चेव णं देवा सदेवीया अपरियारा

वृ. 'देवा ण'मित्यादि, सुगमं, नवरं भवनपतिव्यन्तरज्योतिष्कसौधर्मशानकल्पेषु देवा सदेवीकाः, देवीनां तत्रोत्पादात्, अत एवन सपरिवाराः-परिचारणासहिताः, देवीनां तत्परिग्रहे यथायोगं भावतः कायप्रवीचारभावात्, सनत्कुमारमाहेन्द्रयोर्ब्रह्मलोकलान्तकयोर्महाशुक्र सहसार-योरानतादिचतुर्षु कल्पेषु देवा अदेवीकाः, तत्र देवीनामुत्पादाभावात्,

अथ च सपरिवाराः-परिचारणासहिताः सौधर्मेशानगतदेवीभिः सह यथाक्रमं स्पर्शरूपशब्दमनःप्रवीचारभावात्, ग्रैवेयकानुत्तरोपपातिनो देवा अदेवीकाः, देवीनां तत्रोत्पा-दाभावात् अपरिचाराः-अप्रवीचाराः, अत्यन्तमन्दपुरुषवेदोदयतया मनसापि प्रवीचारासम्भवात्, न पुनस्ते देवाः सदेवीका अपरीचाराः, तथाभवस्वाभाव्यात्, से एएण [illegible]। देवाः सदेवीकाःसपरिचारा इत्युक्तं, तत्र परिचारणामेव जिज्ञासुः पृच्छति-

मू. (५८९) कतिविहा णं भंते! परियारणा पं०?, गो०! पंचविहा परियारणा पं०, तं०-कायपरियारणा फासपरियारणा रूवप० सद्दपरि० मणपरियारणा।,

से केणट्ठेणं भंते! एवं वु० पंचविहा परि० पं०, तं०-कायप० जाव मणप०?, गो०! भवणवइवाणमंतरजोइससोहम्मीसाणेसु कप्पेसु देवा कायपरि० सणंकुमारमाहिंदेसु कप्पेसु देवा फासपरि० बंभलोयलंतगेसु देवा रूवपरिया० महासुक्कसहस्सारेसु देवा सद्दप० आणयपाण-यआरणअच्चुएसु कप्पेसु देवा मणप०, गेवेज्जअनुत्तरोववाइया देवा अपरियारगा, से तेणट्ठेणं गो० तं चेव जाव मणपरियारगा,

तत्थ णं जे ते कायपरियारगा देवा तेसि णं इच्छामणे समुप्पज्जति-इच्छामो णं अच्छराहिं सद्धिं कायपरियारं करेत्तए, तए णं तेहिं देवेहिं एवं मणसीकए समाणे खिप्पामेव ताओ अच्छराओ ओरालातिं सिंगारइं मणुण्णाइं मणोहराइं मणोरमाइं उत्तरवेउव्वियरूवाइं विउव्वंति विउव्वित्ता तेसिं देवाणं अंतियं पाउब्भवंति, तते णं ते देवा ताहिं अच्छराहिं सद्धिं कायपरियारणं करेंति

वृ. 'कइविहा ण'मित्यादि, सुगमं, भगवानाह-'गोतमे' त्यादि गतार्थं, नवरं 'कायपरिचारगा' इति कायेन-शरीरेण मनुष्यस्त्रीपुंसानामिव परिचारोमैथुनोपसेवनं येषांते कायपरिचारकाः किमुक्तं भवति?-भवनपत्यादय ईशानदेवलोकदेवपर्यन्ताः सक्लिष्टोदयपुरुषवेदकर्मप्रभावतो मनुष्यवत् मैथुनसुखप्रतीयमानाः सर्वाङ्गीणं कायक्लेशजं संस्पर्शसुखमवाप्य प्रीतिमासादयन्ति नान्यथेति, सनत्कुमारमाहेन्द्रयोः कल्पयोर्देवाः स्पर्शपरिचारकाः, स्पर्शेन-स्तनभुजोरुजघनादिगात्रसंस्पर्शेन

परिचारः—प्रवीचारो येषां ते तथा, ते हि यदा प्रवीचारमभिलषन्ति तदा प्रवीचाराभिलाषुकतया प्रत्यसन्नभूतानां देवीनां स्तनाद्यवयवान् संस्पृशन्ति, तावन्मात्रेणैव तेषां कायप्रवीचारादनन्तगुणं सुखं वेदोपशान्तिश्चोपजायते,

ब्रह्मलोकलान्तकयोः कल्पयोर्देवा 'रूपपरिचारका' रूपेण—रूपमात्रदर्शनेन परिचारो—मैथुनोपसेवनं येषां ते तथा, ते हि सुरसुन्दरीणां मनोभवराजास्थानीयं दिव्यमुन्मादजनकं रूपमुपलभ्य कायप्रवीचारादनन्तगुणं सुरतसुखमासादयन्ति, तावन्मात्रेणैवोपशान्तवेदा उपजायन्ते, महाशुक्रसहस्रारेषु कल्पेषु देवाः 'शब्दपरिचारकाः' शब्देन—शब्दमात्रश्रवणेन परिचारो येषां ते तथा, ते हि इच्छाविषयीकृतदेवीसत्कगीतहसितसविकारभाषितनूपुरादिध्वनिश्रवणमात्रत एव कायप्रवीचारादनन्तगुणसुखं उपभुञ्जते तावन्मात्रेणैव तेषां वेद उपशान्तिर्भवति,

आनतप्राणतारणाच्युतेषु कल्पेषु देवा 'मनःपरिचारकाः' मनसा मनोभवविकारोपबृंहितपरस्परोल्लावचमनःसत्कल्पेन परिचारो मैथुनोपसेवनं येषां ते तथा, ते हि परस्परोल्लावचमनः—सङ्कल्पमात्रेणैव कायप्रवीचारादनन्तगुणं सुखमवाप्नुवन्ति, तृप्ताश्च तावन्मात्रेणैवोपजायन्ते,

ग्रैवेयकानुत्तरोपपातदेवा 'अपरिचारका' न विद्यते परिचारो—मैथुनोपसेवनं मनासाऽपि येषां ते तथा, तेषां प्रतनुमोहोदयतया प्रशमसुखांतर्लीनत्वात्, यद्येवं कथं न ते ब्रह्मचारिणः ?, उच्यते, चारित्रपरिणामाभावात्, 'से तेणट्ठेण'मित्यादि निगमनवाक्यं, तत्र ये कायपरिचारका देवास्तेषां कायप्रविचारं विभावयिषुरिदमाह—

'तत्थ ण'मित्यादि, तत्र—तेषु कायपरिचारकादिषु देवेषु मध्ये ये ते पूर्वमुक्ताः कायपरिचारका भवनपतिव्यन्तरज्योतिष्कसौधर्मेशानदेवास्तेषां णमिति पूर्ववत् इच्छामनः—कायपरिचारेच्छाप्रधानं मनःसमुत्पद्यते, केनोल्लेखेन समुत्पद्यते ? —इच्छामः—अभिलषामः णमिति पूर्ववत् अप्सरोभिः सार्द्धं कायपरिचारं कर्त्तुमिति, 'तए ण'मित्यादि, ततस्तैर्देवैरेवमुक्तेन प्रकारेण कायपरिचारे मनसि कृते सति क्षिप्रमेव—शीघ्रमेव ता अप्सरसः स्वस्वभोग्यदेवाभिप्रायमवेत्य परिचाराभिलाषुकतया उत्तरवैक्रियाणि रूपाणि विकुर्वन्तीति सम्बन्धः,

कथंभूतानीत्यत आह—उदाराणि—स्फाराणि न तु हीनावयवानि तानि अपि 'शृङ्गाराणि' शृङ्गारो—विभूषणादिभिर्मण्डनं स विद्यते येषां तानि शृङ्गाराणि, 'अभ्रादिभ्य' इत्यादि अप्रत्ययः, विभूषणादिकृतोदारशृङ्गाराणीत्यर्थः, तानि च कदाचित् कस्यचिदमनोज्ञानि भवेयुः अत आह—'मनोज्ञानि' स्वस्वोपभोग्यदेवमनोविषयभावपेशलानि, तानि लेशतोऽपि सम्भाव्यन्ते तत आह—'मनोहराणि' स्वस्वोपभोग्यस्य देवस्य मनो हरन्ति—आत्मवशं नयन्तीति मनोहराणि, 'लिहादित्वादच्', तच्च मनोहरत्वं प्रथमसमापातमात्रभाव्यपि भवति तत आह—'मनोरमाणि' मनः स्वस्वोपभोग्यदेवस्वन्धि रमयन्ति—क्रीडयन्ति प्रतिक्षणमुत्तरोत्तरानुरागसम्पृक्तं जनयन्तीति मनोरमाणि, तानि इत्थंभूतानि उत्तरवैक्रियाणि रूपाणि विकुर्वित्वा तेषां देवानामन्तिकं—समीपं प्रादुर्भवन्ति,

'तते ण'मित्यादि, ततः णमिति पूर्ववत्, ते देवास्ताभिरप्सरोभिः सार्द्धं कायपरिचारणं—मनुष्य इव मनुष्यस्त्रीभिः सर्वाक्षीणकायक्लेशपूर्वकं मैथुनोपसेवनं कुर्वन्ति, एवमेव तेषां वेदोपशान्तिभावात्। तथा चामुमेवार्थं दृष्टान्तेन द्रढयति—

मू. (५९०) *से जहानामए सीया पोग्गला सीतं पप्प सीयं चेव अतिवतित्ताणं चिट्ठंति, उसिणा वा पोग्गला उसिणं पप्प उसिणं चेव अतिवतित्ताणं चिट्ठंति, एवमेव तेहिं देवेहिं ताहिं*

अच्छराहिं सद्धिं कायपरियारणं करे समाणे से इच्छामणे खिप्पामेव अवेति।

वृ. 'से जहानामए' इत्यादि 'से' इति अथशब्दार्थः, स चात्र वाक्योपन्यासे, यथा नाम 'ते' विवक्षिताः शीताः पुद्गलाः शीतं-शीतयोनिकं प्राणिनं प्राप्य 'शीतमेव' शीतत्वमेवातिव्रज्य-अतिशयेन गत्वा तिष्ठन्ति, किमुक्तं भवति ? -विशेषतः शीतीभूतस्य शीतयोनिकस्य प्राणिनः सुखित्वायोपकल्पन्ते, उष्णा वा पुद्गला उष्णयोनिकं प्राणिनं प्राप्य 'उष्णमेव' उष्णत्वमेवातिव्रज्य-अतिशयेन गत्वा तिष्ठन्ति, विशेषतः स्वरूपलाभसम्पत्त्या तस्य सुखित्वायोपतिष्ठन्ते इति भावः,

'एवमेव' अनेनैव प्रकारेण तैर्देवैस्ताभिरप्सरोभिः सार्द्धंयथोक्तरूपे कायपरिचारणे कृतेसति इच्छामनः-कामविषयेच्छाप्रधानं मनः क्षिप्रमेवातितृप्तिभावात् शीतीभवति, इयमत्र भावना-यथा शीतपुद्गलाः शीतयोनिकस्य प्राणिनः संस्पर्शे शीतत्वं विशेषतः आसादयन्तस्तस्य सुखित्वायोपकल्पन्ते उष्णपुद्गला वा उष्णयोनिकस्य प्राणिनः संस्पर्श उष्णत्वमतिप्रभूतमासादयन्तः सुखाय घटन्ते तथा देवीशरीरपुद्गला देवशरीरमवाप्यदेवशरीरपुद्गला अपि देवीशरीरमवाप्य परस्परं तद्गुणतां भजमानाः परस्परं सुखित्वायोपकल्पन्ते ततस्तृप्तिरुपजायते तृप्तिभावाच्चाभिलाषनिवृत्तिर्भवतीति।

इह मनुष्यस्त्रीणां मनुष्यपुरुषोपभोगे शुक्रपुद्गलसङ्क्रमतः सुखमुपजायमानं लक्ष्यं तत्किं देवीनामप्युपभोग्यदेवसत्कशुक्रपुद्गलसङ्क्रमतः सुखमुपजायते आहोश्विदन्यथेति संशयानो देवानां शुक्रपुद्गलास्तित्वं पृच्छति-

सू. (५९१) *अत्थि णं भंते! तेसिं देवाणं सुक्कपोग्गला ?, हंता! अत्थि, ते णं भंते! तासिं उच्छरकाणं कीसत्ताते भुज्जो २ परिणमंति ?, गो० ! सोतिंदियत्ताते चक्खुइंदि० घाणिंदिय० रसिंदिय० फासिंदियत्ताते इट्ठत्ताते कंतत्ताते मणुन्नत्ताते मणामत्ताते सुभगत्ताते सोहग्गरूवजोव्वणगुणलावन्नत्ताए ते तासिं भुज्जो २ परिणमंति।*

वृ. 'अत्थि ण' मित्यादि, अस्तीतिनिपातोऽत्र वाक्यार्थे, णमिति पूर्ववत्, भदन्त! तेषां देवानां शुक्रपुद्गलाः यत्सम्पर्कतो देवीनां सुखमुपजायते ?, 'हंता! अत्थि' मगवानाह-गौतम! सन्ति, केवलं ते वैक्रियशरीरान्तर्गता इति न गर्भाधानहेतवः,

'तेण भंते!' इत्यादि, ते शुक्रपुद्गलाः, णमिति पूर्ववत् भदन्त! तासामप्सरासां कीदृक्स्वरूपतया 'भूयो २' यदा २ क्षरन्ति तदा २ इत्यर्थः परिणमन्ति ?, मगवानाह-'गोयमे' त्यादि, श्रोत्रेन्द्रियरूपतया यावत्स्पर्शनेन्द्रियतया, तेऽपि कदाचिदनिष्टतया परिणमन्तः सम्भाव्येरन् तत आह-इष्टतया, इष्टमपि किञ्चित्स्वरूपतोऽकान्तं भवति, यथा शूकरादीनामिष्टमपि विष्ठादि, तत आह-'कान्ततया' कमनीयतया, कान्मतपि किञ्चिन्मनःस्पृहणीयं न भवति तत आह-

'मनोज्ञतया' अतिस्पृहणीयतया, तदप्यतिस्पृहणीयत्वं कदाचिदापातकालमात्रभावि सम्भाव्यते तत आह-'मनआपतया' मन आप्नुवन्ति-मनसि सदा रमन्ते इति मनआपास्तद्भावस्तत्ता तया, मनसा सदा स्पृहणीयतयेति भावः, कस्मादिति चेत्, अत आह-'सुभगतया' 'निमित्तकारणहेतुषु सर्वासां विभक्तीनां प्रायो दर्शन' मिति न्यायात् अत्र हेतौ तृतीया, ततोऽयमर्थः-यतः सुभगतया-सर्वजनप्रियतया परिणमन्ति तत उच्यते इष्टतया कान्ततयेत्यादि, सुभगतया परिणमनमपि कथमिति चेत्,

अत आह–'सोहग्गरूवजोव्वणगुणलावन्नत्ताए' इति, अत्र प्राकृततया गुणशब्दस्य लावण्यशब्दात् पूर्वं निपातः परमार्थस्तु परतो द्रष्टव्यः, ततोऽयमर्थः–सौभाग्याय–सौभाग्यहेतवे रूपयौवनलावण्यरूपा गदुणा यस्य तत्सौभाग्यरूपयौवनलावण्यगुणं तद्भावस्तत्ता तया, तत्र [illegible] लावण्यं–अतिशायी मनोभवविकारहेतुः परिणतिविशेषः, यतः सौभाग्यहेतुरूपादिगुणनिबन्धनतया परिणमन्ति ततः सुभगतया परिणमंतीत्युच्यते, एवं ते शुक्रपुद्गलास्तासामप्सरसां भूयो भूयः परिणमन्ति ।

तदेवं कायपरिचार उक्तः, सम्प्रति स्पर्शपरिचारं विभागयिषुराह–

मू. *(५९२) तत्थ णं जे ते फासपरियारगा देवा तेसि णं इच्छामणे समुप्पज्जति, एवं जहेव कायपरियारगा तहेव निरवसेसं भाणितव्वं ।*

तत्थ णं जे ते रूवपरियारगा देवातेसि णं इच्छामणे समुप्पज्जति इच्छामो णं अच्छराहिं सद्धिं रूवपरियारणं करेत्तते, ते णं तेहिं दवेहिं एवं मणसीकते समाणे तहेव जाव उत्तरवेउव्वितातिं रूवाइं विउव्वंति विउव्वित्ता जेणामेव ते देवा तेणामेव उवागच्छंति उवागच्छित्ता तेसिं देवाणं अदूरसामंते ठिच्चा ताइं उरालइं जाव मनोरमाइं उत्तरवेउव्विताइं रूवाइं उवदंसेमाणीतो २ चिट्ठंति, तते णं ते देवा ताहिं अच्छराहिं सद्धिं रूवपरियारणं करेंति, सेसं तं चेव जाव भुज्जो २ परिणामंति ।

तत्थ णं जे ते सद्दपरियारगा देवा तेसिं णं इच्छामणे समुप्पज्जति–इच्छामो णं अच्छराहिं सद्धिं सद्दपरियारणं करेत्तए, तते णं तेहिं देवेहिं एवं मणसीकए समाणे तहेव जाव उत्तरवेउव्वियातिं रूवातिं उविउव्वंति विउव्वित्ता जेणामेव ते देवा तेणामेव उवागच्छंति २ ता तेसिं देवाणं अदूरसामंते ठिच्चा अनुत्तराइं उच्चावयाइं सद्दाइं समुदीरेमाणीतो २ चिट्ठंति, तते णं ते देवा ताहिं अच्छराहिं सद्धिं सद्दपरियारणं करेंति सेसं तं चेव जाव भुज्जो २ परिणमंति ।

तत्थ णं जे ते मनपरियारगा देवा तेसिं इच्छामणे समुप्पज्जति, इच्छामो णं अच्छराहिं सद्धिं मणपरियारणं करेत्तते, तते णं तेहिं देवेहिं एवं मणसीकए समाणे खिप्पामेव ताओ अच्छराओ तत्थ गयाओ चेव समाणीओ अनुत्तरातिं उच्चावयातिं मणाइं संपहारे माणीतो २ चिट्ठंति, तते णं ते देवा ताहिं अच्छराहिं सद्धिं मणपरियारणं करेंति, सेसं निप्पवसेसं तं चव जाव भुज्जो २ प०

वृ. 'तत्थ ण'मित्यादि, तत्र–तेषुपरिचारकादिषु मध्ये णमिति पूर्ववत् ये ते स्पर्शपरिचारका देवास्तेषां णमिति पूर्ववत् एवमिच्छामनः–स्पर्शपरिचारविषयेच्छाप्रधानं मनःसमुत्पद्यते, 'एवं जहेवे'त्यादि, एवंउक्तेन प्रकारेण यथैवानन्तरं प्राक् कायपरिचारका उक्ताः'' तथैव स्पर्शपरिचारकेष्वपि निरवशेषं भणितव्यं, तद्यथैवम्–'इच्छामो णं अच्छाराहि सद्धिं फासपरियारं करेत्तए, तए णं तहिं देवेहिं एवं मणसीकए समाणे खिप्पामेव ताओ अच्छराओ उरालाइं जाव विउव्वित्ता तेसं देवाणं अंतियं पाउब्भवंति, तए णं ते देवा अच्छराहिं सद्धिं फासपरियारं करेंति'' स्पर्शपरिचारणं वदनचुम्बनस्तनमर्द्दनबाहुउपगूहनजघनोरुप्रभृतिगात्रसंस्पर्शरूपं,

'से जहानामए सीया पुग्गला सीयं पप्प सीयं चेव अतिवइत्ताणं चिट्ठंति उसिणा वा पोग्गला उसिणं पप्प उसिणं चेव अइवइत्ताणं चिट्ठंति एवमेव तेहिं देवेहिं ताहिं अच्छराहिं सद्धिं फासपरियारणे कए समाणे इच्छामणे खिप्पामेव अवेइ,' अस्य सपातनिका व्याख्या प्राग्वत्, 'अत्थि णं भंते ! तेसिं देवाणं सुक्कपोग्गला ?, हंता ! अत्थि, ते णं भंते ! तासिं अच्छराणं कीसत्ताए भुज्जो २

परिणमंति ?, गोयमा ! सोतिंदियत्ताए जाव फासिंदियत्ताए इट्ठत्ताए कंतत्ताए जाव भुज्जो २ परिणमंति' अस्यापि सपातनिका व्याख्या प्राग्वत्, नवरमस्मिन् स्पर्शप्रवीचारे शुक्रपुद्गलसङ्क्रमो दिव्यप्रभावादवसेयः, एवं रूपपरिचारादावलपि भावनीयं, तेवमुक्ताः स्पर्शपरिचारकाः,

सम्प्रति रूपपरिचारणां विभावयिषुराह-'तत्थ ण'मित्यादि, सुगमं तावत् यावत् विकुर्वित्वा 'जेणामेव'त्ति यत्रैव देवलोके विमाने प्रदेशे च ते देवाः सन्ति तत्रैव स्थाने ता अप्सरस उपागच्छन्ति, उपागम्य च तेषां देवानां 'अदूरसामंते' इति अदूरसमीपे स्थित्वा तानि पूर्वं विकुर्वितानि उदाराणि यावदुत्तरवैक्रियाणि रूपाणि उपदर्शयन्त्यस्तिष्ठन्ति, ततस्ते देवास्ताभिरप्सरोभिः सार्द्धं रूपपरिचारणां-परस्परं सविलासदृष्टिविक्षेपाङ्गप्रत्यङ्गनिरीक्षणनिजनिजानुरागप्रदर्शन-पटिष्टवेष्टाप्रकटनादिरूपां कुर्वन्ति, सेसं तं चेव'त्ति शेषं 'से जहा नामए' इत्यादि तदेव यावत् 'भुज्जो २ परिणमन्ती'ति वाक्यम्, तदेवं भाविता रूपपरिचारणा,

सम्प्रति शब्दपरिचारणां भावयितुकाम आह-'तत्थ ण'मित्यादि कण्ठ्यं, नवरमदूरसमीपे स्थित्वा अनुत्तरान्-सर्वमनःप्रल्हादजनकतया अनन्यसदृशान् उच्चावचान्-प्रबल२तरमन्मथोद्दीपकसभ्यासभ्यरूपान् शब्दान्सूत्रे नपुंसकनिर्देशःप्राकृतत्वात्, समुदीरयन्त्यस्तिष्ठन्ति, शेषं तथैव,

'एवं तत्थ ण'मित्यादि, मनःपरिचारकसूत्रमपि तथैव यावन्मनःपरिचारे मनसि कृते सति क्षिप्रमेव ता अप्सरसस्तत्र गता एव-सौधर्मेशानदेवलोकान्तर्गतस्वस्वविमानस्थिता एव सन्त्योऽनुत्तराणि-परमसन्तोषजनकतया अनन्यसदृशानि उच्चावचानि-कामानुषक्तसभ्यासभ्यरूपाणि मनांसि प्रचारयन्त्यस्तिष्ठन्ति, इह 'तत्तगया चेव समाणीओ' इति वदता देव्यः सहस्रारं यावद् गच्छन्ति न परत इत्यावेदितं द्रष्टव्यं, तथा चाह सङ्ग्रहणिमूलटीकाकारो हरिभद्रसूरिः-''सनत्कुमारादिदेवानां रताभिलाषे सति देव्यः स्वसत्परिगृहीताः सहस्रारं यावद् गच्छन्ती'ति, तथा स एव प्रदेशान्तरे आह-''इह सोहम्मे कप्पे तासिं देवीणं पलिओवममाउगं ताओ तद्देवाणं चेव हवंति, जासिं पुण पलिओवमाइं समयाहिया ठिई दुसमयतिसमयसंखेज्जासंखेज्जसमयाहिया जाव दसपलिया सोहम्मगदेवीओ ताओ सणंकुमाराणं गच्छंति, एवं दसपलिओवरि जासिं समयाहिया ठिई जाव वीसं पलिया ताओ बंभलोगदेवाणं गच्छंति, एवं वीसपलिओवरि जासिं समयाहिया ठिई जाव तीसं पलिया ताओ महासुक्कदेवाणं गच्छंति, एवं तीसं पलिओवरि जासिं समयाहिया ठिई जाव चत्तालीसं पलिया ताओ आणयदेवाणं तत्थ ठिया चेव झाणावलंबणं होंति, एवं चत्तालीसं पलिओवरि जासिं समयाहिया ठिई जाव पंचास पलिया ताओ आरणदेवाणं तत्थ ठियाओ चेव झाणावलंबणं होंति''

तथा ''ईसाणे जासिं देवीणं पलिओवममहियमाउयं ताओ तद्देवाणं चेव होंति, जासिं पुण अहियपलिओवमाइं समयाहिया ठिई दुसमयतिसमयसंखेज्जासंखेज्जसमयाहिया जाव पन्नरसपलिया ताओ माहिंददेवाणं गच्छंति, एवं पन्नरसपलिओवरि समयाहिया ठिई जाव पणवीसं पलिया ताओ लंतगदेवाणं, जासिं पुण पणवीसपलिओवरि समयाहिया ठिई जाव पंचतीसं पलिया ताओ सहस्सारदेवाणं, जासिं पुण पंचत्तीसपलिओवरि समयाहिया ठिई जाव पणयालीसं ताओ पाणयदेवाणं तत्थ ठियाओ चेव झाणावलंबणं होंति, जासिं पुण पणयालीसं पलिओवरि समयाहिया ठिई जाव पणपन्नपलिया ताओ अच्चुयदेवाणं तत्थ ठियाओ चेव झाणावलंबणं हवंति'' इति,

'तए ण'मित्यादि, ततो णमिति पूर्ववत्, ते देवाः ताभिरप्सरोभिः सार्द्धमनः-परिचारणं-

सुरतानुबन्धि परस्परं सम्यासम्यमनःसङ्कल्पकरणरूपं कुर्वन्ति, 'सेस'मित्यादि, शेषं 'से जहा नामए सीया पोग्गला' इत्यादि निरवशेषं तावद् वक्तव्यं यावत् 'भुज्जो २ परिणमन्ती'ति सर्वान्तिमं वाक्यं, व्याख्या चास्य प्राग्वत्, तत ऊर्ध्वं तु ग्रैवेयकादयो मनसाऽपि योषितो न प्रार्थयन्ति, प्रतनुवेदोदयत्वात्, यथोत्तरं चैतेऽनन्तगुणसुखभाजः, तथाहि–कायप्रवीचारेभ्यो नन्तगुणसुखाः स्पर्शपरिचारकास्तेभ्योऽप्यनन्तगुणसुखाः रूपपरिचारकास्तेभ्योऽपि अनन्तगुणसुखाः शब्दपरिचारकास्तेभ्योऽप्यनन्तगुणसुखा मनःपरिचारकास्तेभ्योऽपि अपरिचारकाः अनन्तगुणसुखाः। साम्प्रतमेतेषामेव परस्परमल्पबहुत्वमभिधित्सुराह–

मू. (५९३) *एतेसि णं भंते ! कायपरियारगाणं जाव मनपरियारगाणं अपरियारगाण य कयरे० अप्पा वा ४ ?, गो० ! सव्वत्थोवा देवा अपरियारगा मनपरियारगा संखे० सद्दपरियारगा असंखे० रूवप० असं०–फासप० असं० कायप० असं० ॥*

वृ. 'एएसि ण'मित्यादि, सर्वस्तोका देवा अपरिचारकाः, ते हि ग्रैवेयकानुत्तरोपपातिन्स्ते च सर्वसङ्ख्यया क्षेत्रपल्योपमासङ्ख्येयभागवर्त्तिनभःप्रदेशराशिप्रमाणा इति, तेभ्योऽपि मनःपरिचारका देवाः सङ्ख्येयगुणाः, तेषामानतादिकल्पचतुष्टयवर्त्तित्वात्, तद्वर्त्तिनां च पूर्वदेवापेक्षया सङ्ख्येयगुणक्षेत्रपल्योपमासङ्ख्येयभागगताकाशप्रदेशराशिप्रमाणत्वात्, तेभ्यः शब्दपरिचारका असङ्ख्येयगुणाः, ते हि महाशुक्रसहस्रारकल्पवासिनः, ते च धनीकृतलोकस्य एकप्रादेशिक्याः श्रेणेरसङ्ख्येयतमे भागे यावन्त आकाशप्रदेशास्तावत्प्रमाणाः,

तेभ्योऽपि रूपपिचारका देवा असङ्ख्येयगुणाः, ते हि ब्रह्मलोकलान्तकल्पनिवासिनः, ते च पूर्वदेवानधिकृत्यासङ्ख्येयगुणश्रेण्यसङ्ख्येयभागगतनभःप्रदेशराशिप्रमाणाः, तेभ्योऽपि स्पर्शपरिचारका देवा असङ्ख्येयगुणाः, तेषां सनत्कुमारमाहेन्द्रकल्पवर्त्तित्वात् तद्वर्त्तिनां च ब्रह्मलोकलान्तकदेवानपेक्ष्यासङ्ख्येयगुणश्रेण्यसङ्ख्येयभागगत्याकाशप्रदेशपरिमाणतयाऽधीतत्वात्, तेभ्यः कायपरिचारका देवा असङ्ख्येयगुणाः भवनपत्यादीनामीशानान्तानां सर्वेषां कायपरिचारकत्वात्, तेषां सर्वसङ्ख्यया प्रतरासङ्ख्येयभागवर्त्तिनभःप्रदेशराशिप्रमाणत्वात् इति ॥

पदं – ३४ – समाप्तम्

पदं – ३५ – "वेदना"

वृ. तदेवमुक्तं चतुस्त्रिंशत्तमं पदं, साम्प्रति पञ्चत्रिंशत्तममारभ्यते, अस्य चायमभिसम्बन्धः–इहानन्तरपदे वेदपरिणामविशेषः प्रवीचारः प्रतिपादितः, अत्र तु गतिपरिणामविशेषा वेदना प्रतिपाद्यते, तत्र आदौ सकलवक्तव्यतासङ्ग्रहपरे इमे द्वे गाथे–

मू. (५९४) *सीता य दव्वसरीरा साता तह वेदणा भवति दुक्खा।*
अब्भुवगमोवक्कमिया निदाय अनिदाय नायव्वा ॥

वृ. 'सीया य दव्वे'त्यादि, वेदना प्रथमतः शीता चशब्दादुष्णा सीतोष्णा च वक्तव्या, तदनन्तरं द्रव्यक्षेत्रकालभावैर्वेदना वक्तव्या, ततः शारीरी उपलक्षणान्मानसी च वेदना वाच्या, ततः साता तथा दुःखा वेदना सभेदा वक्तव्यतया ज्ञातव्या भवति, तदनन्तरमाभ्युपगमिकी औपक्रमिकी च वेदना वक्तव्यतया ज्ञातव्या, ततोऽप्यनन्तरं निदा चानिदा चेति, सातसुखादीनां विशेषमाभ्युपगमिक्यादिशब्दानामर्थं त्वग्रे वक्ष्यामः, सातादिवेदनां अधिकृत्य यो विशेषो वक्ष्यते

तत्सङ्गृह्याहिका द्वितीया गाथा–

मू. (५९५) *सायमसायं सव्वे सुहं च दुक्खं अदुक्खमसुहं च।*
माणसरहियं विगलिंदिया उ सेसा दुविहमेव॥

वृ. 'सायमसाय'मित्यादि, सर्वे संसारिणः सातामसातां चशब्दात् सातासातां च वेदनां वेदयन्ते, तथा सुखां दुःखां अदुःखासुखां च, तथा विकलेन्द्रिया–एकद्वित्रिचतुरिन्द्रियाः-तुशब्दस्याधिकारार्थसंसूचनार्थत्वादसंज्ञिपञ्चेन्द्रियाश्च मानसरहितां–मनोविकलां वेदनां वेदयन्ते, शेषास्तु द्विविधामेव शरीरमनोनिबन्धनां, शारीरीं मानसीं तदुभयसमुद्भवां चेति भावः, निदाऽनिदादिगतस्तु विशेषो न सङ्गृहीतो, विचित्रत्वात् सूत्रगतेः। तत्र 'यथोद्देशं निर्देश' इति न्यायात् प्रथमतः शीतादि-वेदनाः प्रतिपादनार्थमाह–

मू. (५९६) *कइविहा णं भंते ! वेदणा पं० ?, गो० ! तिविहा वेदना पं०, तं०–सीता उसिणा सीतोसिणा, नेरइया णं भंते ! किं सीतं वेदनं वेदेंति उसिणं वे० वे० सीतोसिणं वेदनं वेदेंति ?, गो० ! सीतंपि वेदनं वेदेंति उसिणंपि वे० वे० नो सीतोसिणं वे० वे०, केई एक्केकपुढवीए वेदनाओ भणंति,*

रयणप्पभापुढविनेरइयाणं भंते ! पुच्छा, गो० ! नो सीतं वेदन वे० उसिणं वे० वे० नो सीतोसिणं वे० वे०, एवं जाव वालुयप्पभापुढविनेरइया, पंकप्पभापुढविनेरइयाणं पुच्छा, गो० ! सीतंपि वे० वे० उसिणंपि वे० वे०, नो सीतोसिणं वे० वे०, ते बहुयतरागा जे उसिणं वेदनं वेदंति, ते थोवतरागा जे सीतं वेदनं वे०, धूमप्पभाए एवं चेव दुविहा, नवरं ते बहुतरागा जे सीतं वे० वे० ते थोवतरागा जे उसिणं वे० वेदेंति, तमाए य तमतमाए य सीयं वे० वे० नो उसिणं वे० वे०, नो सीतोसिणं वे० वेदेंति,

असुरकुमाराणं पुच्छा, गो० ! सीतंपि वे० वे० उसिणंपि वे० वे० सीतोसीणंपि वे० वे०, एवं जाव वेमाणिया। कतिविहा णं भंते ! वेदणा पं० ?, गो० ! चउव्विहा वेदणा पं० तं०–दव्वतो खेत्ततो कालते भावतो, नेरइया णं भंते ! किं दव्वतो वेदनं वे० वे० जाव किं भावतो वे० वे० ?, गो० ! दव्वओवि वे० वे० जाव भावओवि वे० वे०, एवं जाव वेमाणिया।

कतिविहा णं भंते ! वेदना पं० ?, गो० ! तिविहा वेदना, पं०, तं०–सारीरा माणसा सारीरमाणसा, नेरइया णं भंते ! किं सारीरं वे० वे० माणसं वेयणं वे० सारीरमाणसं वे० वे० ?, गो० ! सारीरंपि वे० वे० माणसंपि वे० वे० सारीरमाणसंपि वे० वे०, एवं जाव वेमाणिया, नवरं एगिंदियविगलिंदिया सारीरं वे० वे० नो माणसं वे० वे० नो सारीरमाणसं वे० वे०।

कइविहा णं भंते ! वेयणा पं० ?, गो० ! तिविहा वेदना पं०, तं०–साता असाता सातासाता, नेरइया णं भंते ! किं सायं वेदनं वेदंति असातं वे० वे० सायसायं वे० वे० ? गोयमा ! तिविहंपि वे० वे० एवं सव्वजीवा जाव वेमाणिया। कतिविहा णं भंते ! वेदना पं० ?, गो० ! तिविहा पं०, तं०–दुक्खा सुहा अदुक्खसुहा, नेरइया णं भंते ! किं दुक्खं वेदनं वे० वे० पुच्छा, गो० ! दुक्खंपि वे० वे० सुहंपि वे० वे० अदुक्खमसुहंपि वे० वे० एवं जाव वेमाणिया।

वृ. 'कइविहा णं भंते !' इत्यादि, शीता–शीतपुद्गलसम्पर्कसमुत्था, एवमुष्णा, या च अवयवभेदेन शीतोष्णपुद्गलसम्पर्कतः शीता उष्णा च सा शीतोष्णा, एनामेव त्रिविधां वेदनां नैरयिकादिचतुर्विंशतिदण्डकक्रमेण चिन्तयति–

'नेरइया ण'मित्यादि, तत्राद्यासु तिसृषु पृथिवीषूष्णां वेदनां वेदयन्ते, ते हि शीताः ये नरकावासाश्च तदाश्रयभूताः, सर्वतो जगत्प्रसिद्धस्वादिराङ्गारातिरिक्तबहुप्रतापोष्णपुद्गलसम्भूताः, चतुर्थ्यां तु पङ्कप्रभाभिधानायां पृथिव्यां केचिन्नैरयिका उष्णवेदनां केचिच्च शीतवेदनामनुभवन्ति, तत्रत्यनरकावासानां शीतोष्णभेदतो द्विधा भेदात्, केवलं ये उष्णवेदनां वेदयन्ते ते प्रभूततराः, प्रभूतेषु नरकावासेषूष्णवेदनासद्भावात्, इतरे शीतवेदनामनुभवन्तःस्तोकाः, स्तोकतरेषु नरकावासेषु शीतवेदनासम्भवात् धूमप्रभायामपि पृथिव्यां केचित् शीतवेदनाकाःकेचिदुष्णवेदनाकाः, नवरं शीतवेदनाकाः प्रभूततराः, प्रभूतेषु नरकावासेषु शीतवेदनासम्भवात्, स्तोका उष्णवेदनाः, कतिपयेष्वेव नरकावासेषूष्णवेदनाभावात्, अधस्तन्योस्तु द्वयोः पृथिव्यशीतवेदनामेव नैरयिका अनुभवन्ति, तत्रत्यनैरयिकाणां सर्वेषामुष्णयोनिकत्वात्, नरकावासानां त्वनुपमहिमानुषक्तत्वात्, एतावत्सूत्रं चिरन्तनेष्वविप्रतिपत्त्या श्रूयते, केचिदाचार्याः पुनरेतद्विषयमधिकमपि सूत्रं पठन्ति, ततस्तन्मतं आह–

'केइ एक्केक्कीए पुढवीए वेयणं भणंति' इति केचिदाचार्या एकैकस्यां पृथिव्यां प्रश्ननिर्वचनरूपतया वेदनां भणंति, यथा भणन्ति तथोपदर्शयन्ति–'रयणप्पभे'त्यादि सुगमं, तदेवं नैरयिकाणां चिन्तिता शीतादिवेदना, सम्प्रत्यसुरकुमाराणां तां चिचिन्तयिषुरिदमाह–'असुरकुमाराणं पुच्छा' असुरकुमाराणां शीतादिवेदनाविषयेत पृच्छासूत्रं च वक्तव्यं, 'असुरकुमारा णं भंते ! किं सीयं वेदणं वेयंति उसिणं वेयणं वेयंति सीओसिणं वेयणं वेयंति ?, इति भगवानाह–'गोयमे'त्यादि, शीतामपि वेदनां वेदयन्ते, यदा शीतलजलसम्पूर्णह्रदादिषु निमज्जनादिकं विदधति, उष्णामपि वेदनां वेदयंते यदा कोऽपि महर्द्धिकस्तज्जातीयोऽन्यजातीयो वा कोपवशात् विरूपतया दृष्ट्याऽवलोकमानः शरीरे सन्तापमुत्पादयति, यथा प्रथमोत्पन्नः ईशानेन्द्रो बलिचञ्चाराजधानीवास्तव्यानामसुरकुमाराणामुत्पादितवान्, अन्यथा वा तथाविधोष्णपुद्गलसम्पृक्तावुष्णवेदनामनुभवन्तो वेदितव्याः, यदा त्ववयवभेदेन शीतपुद्गलसम्पर्क उष्णपुद्गलसम्पर्कश्चोपजायते तदा शीतोष्णां वेदनां वेदयन्ते, ननु उपयोगः क्रमेण जीवानां भवति, तथास्वाभाव्यात्, कथमत्र शीतोष्णवेदनानुभवो युगपत् प्रख्याप्यते इति ?, उच्यते, इहापि वेदनानुभवः क्रमेणैव, तथाजीवस्वाभाव्यात्, केवलं शीतोष्णवेदनाहेतुपुद्गलसम्पर्को युगपदुपजायत इति सूक्ष्ममाशुसञ्चारिणमुपयोगक्रममनपेक्ष्य यथैव ते वेदयमाना युगपदभिमन्यन्ते तथैव प्रतिपादितमिति न कश्चिद्दोषः, सामान्यतः सूत्रस्य प्रवृत्तत्वात्,

'एवं जाव वेमाणिय'त्ति एवं–असुरोक्तेन प्रकारेण यावद् वैमानिकास्तावत् सूत्रं वक्तव्यं, तच्चैवम्–'पुढविकाइया णं भंते ! किं सीयं वेयणं वेयंति उसिणं वे० वे० सीओसिणं वेयणं वेयंति गो० ! सीयंपि वे० वे० उसिणंपि वे० वे० सीतोसिणंपि वे० वेयंति' इत्यादि, तत्र पृथिवीकायिकादयो मनुष्यपर्यवसानाः शीतवेदनां हिमादिप्रपातेऽभिवेदयमाना वेदितव्याः उष्णवेदनामग्न्यादिसम्पर्के शीतोष्णवेदनामवयवशः शीतोष्णपुद्गलसम्बन्धे इति, व्यन्तरज्योतिष्कवैमानिकास्त्वसुरकुमारवत् भावनीयाः। उक्ता शीतादिभेदात् त्रिविधा वेदना, सम्प्रति तामेव वेदनां प्रकारान्तरेणाभिधित्सुः प्रश्ननिर्वचनसूत्रे आह–

'कइविहा णं भंते' इत्यादि, इह वेदना द्रव्यक्षेत्रकालभावसामग्रीवशादुत्पद्यते, सर्वस्यापि वस्तुनो द्रव्यादिसामग्रीवशादुत्पद्यमानत्वात्, तत्र यदाऽस्यैव वेदना पुद्गलद्रव्यसम्बन्धमधिकृत्य

चिन्त्यते तदा द्रव्यवेदना, द्रव्यतो वेदना द्रव्यवेदना, नारकाद्युपपातक्षेत्रमधिकृत्य चिन्त्यमाना क्षेत्रवेदना, नारकादिभवकालसम्बन्धेन विवक्ष्यमाणा कालवेदना, वेदनीयकर्मोदयादुपजायमानत्वेन परिभाव्यमाना भाववेदना, एतामेव चतुर्विधां वेदनां चतुर्विंशतिदण्डकक्रमेण चिन्तयति–

'नेरइया णं भंते ! किं दव्वतो वेयणं वेदंति' इत्यादि, सकलमपि सुगमं । प्रकारन्तरेण वेदनामेव प्रतिपिपादयिषुः प्रश्ननिर्वचनसूत्रे आह–

'कइविहा णं भंते !' इत्यादि, शरीरे भवा शारीरी मनसि भवा मानसी तदुभयभवा शारीरमानसी, शारीरी च मानसी च शारीरमानसी, 'पुंवत्कर्मधारय' इति पुंवद्भावः, एतामेव चतुर्विंशतिदण्डकक्रमेण चिन्तयति–'नेरइया णं भंते ! किं सारीरं वेयणं वेदेंति' इत्यादि, तत्र यदा परस्परोदीरणतः परमाधार्मिकोदीरणतो वा क्षेत्रानुभावतो वा शरीरे पीडामनुभवन्ति तदा शारीरीं वेदनां वेदयन्ते, यदा तु केवलं मनसि दुःखं परिभावयन्ति पाश्चात्यं वा भवमात्मीयं दुष्कर्मकारिणमनुसृत्य पश्चात्तापमतीव कुर्वते तदा मानसीं वेदनां वेदयन्ते, यदा तु शरीरे मनसि चोक्तप्रकारेण युगपत् पीडां अनुभवन्ति तदा शारीरमानसी, इहापि वेदनानुभावः क्रमेणैव केवलं विवक्षिततावत्कालमध्ये शरीरे च पीडामनुभवन्ति मनसि च एतावन्तं कालं एकं विवक्षित्वा युगपच्छरीरमनःपीडानुभवः प्रतिपादित इत्यदोषः, 'एवं जाव वेमाणिया' इत्यादि, एवं–नैरयिकोक्तेन प्रकारेण सूत्रं तावद् वक्तव्यं यावद्वैमानिकाः, नवरमेकेन्द्रियकलेन्द्रियाः शारीरीं वेदनां वेदयन्ते न मानसीं, तेषां मनोसोऽभावात्, ततस्तदनुसारेण तद्विषयं सूत्रं वक्तव्यं ।

प्रकारान्तरेण वेदनामभिधित्सुः प्रश्ननिर्वचनसूत्रे आह–'कइविहा णं भंते !' इत्यादि, तत्र साता–सुखरूपा असाता–दुःखरूपा सातासाता–सुखदुःखात्मिका, एतामेव नैरयिकादिचतुर्विंशतिदण्डकक्रमेण चिन्तयति–'नेरइया ण'मित्यादि, तत्र तीर्थङ्करजन्मादिकाले सातवेदनां वेदयन्ते, शेषकालमसातवेदनां वेदयन्ते, यदा तु पूर्वसङ्गतिको देवो दानवो वा वचनामृतैः सिञ्चति तदा मनसि सातं शरीरे तु क्षेत्रानुभावतोऽसातं यदिवा मनस्येव तद्दर्शनतः तद्वचनश्रवणतश्च सातं पश्चात्तापानुभवनतस्त्वसातमिति तदा सातासातवेदनामनुभवन्ति, अत्रापि तावन्तं विवक्षितकालमेकं विवक्षित्वा सातासातानुभवो युगपत् प्रतिपादितः, परमार्थतस्तु क्रमेणैव च वेदितव्य इति, 'एव' मित्यादि, एवं–नैरयिकोक्तप्रकारेण सर्वे जीवास्तावद्वक्तव्या यावद्वैमानिकाः, तत्र पृथिव्यादयो यावन्नाद्याप्युपद्रवः सन्निपतति तावत् सातवेदनां वेदयन्ते उपद्रवसम्पाते त्वसातवेदनामवयवभेदेनोपद्रवसम्पातभावे सातासातवेदनां, व्यन्तरज्योतिष्कवैमानिका देवाः सुखमनुभवन्तः सातवेदनां च्यवनादिकाले त्वसातवेदनां परविभूतिदर्शनतो मात्सर्याद्यनुभवे स्ववल्लभदेवीपरिष्वङ्गाद्यनुभवे च युगपज्जायमाने सातासातवेदनां वेदयन्ते इति । भूयः प्रकारन्तरेण एतावमेव प्रतिपादयन् प्रश्ननिर्वचनसूत्रे आह–

'कइविहा णं भंते !' इत्यादि, या वेदना नैकान्तेन दुःखा भणितुं शक्यते सुखस्यापि भावात् नापि सुखा दुःखस्यापि भावात् सा अदुःखसुखा सुखदुःखात्मिका इत्यर्थः, अथ सातासातयोः सुखदुःखयोश्च परस्परं कः प्रतिविशेषः ?, उच्यते, ये क्रमेणोदयप्राप्तवेदनीयकर्मपुद्गलानुभवतः सातासाते ते सातासाते उच्यते, ये पुनः परोदीर्यमाणवेदनारूपे सातासाते ते सुखदुःखे इति एतामेव चतुर्विंशतिदण्डकक्रमेण चिन्तयति–'नेरइया ण'मित्यादि ॥

वेदनामेव प्रकारान्तरेण चिन्तयन्नाह–

मू. (५९७) कतिविहा णं भंते ! वेदना पं० ?, गो० ! दुविहा वेदना पं०, तं०—अब्भोवगमिया य उवक्कमिया य, नेरइया णं भंते ! अब्भोवगमियं वेदनं वे० वे० उवक्कमियं वेदनं वे० वे० ?, गो० ! नो अब्भोवगमियं वे० वे० उवक्कमियं वे० वे०, एवं जाव चउरिंदिया, पंचिंदियतिरिक्खजोणिया मणूसा य दुविहंपि वे० वे०, वाणमंतरजोतिसियवेमाणिया जहा नेरइया ।

वृ. 'कतिविहा णं भंते !' इत्यादि, तत्राभ्युपगमिकी नाम या स्वयमभ्युपगम्यते, यथा साधुभिः केशोल्लुञ्चनातापनादिभिः शरीरपीडा, अभ्युपगमेन—स्वयमङ्गीकारेण निर्वृत्ता आभ्युपगमिकीति व्युत्पत्तेः, उपक्रमणमुपक्रमः—स्वयमेव समीपे भवनमुदीरणाकरणेन वा समीपानयनं तेन निर्वृत्ता औपक्रमिकी, स्वयमुदीर्णस्य उदीरणाकरणेन वा उदयमुपनीतस्य वेदनीयकर्मो विपाकानुभवनेन निर्वृत्ता इत्यर्थः,

तत्र पञ्चेन्द्रियतिर्यञ्चो मनुष्याश्च द्विविधामपि वेदनां वेदयन्ते, सम्यग्दृशां पञ्चेन्द्रियतिरश्चां मनुष्याणां च कर्मक्षपणार्थमाभ्युपगमिक्या अपि वेदनायाः सम्भवात्, शेषास्त्वौपक्रमिकीमेव वेदनां वेदयन्ते नाभ्युपगमिकीं, पृथिव्यप्तेजोवायुवनस्पतिद्वित्रिचतुरिन्द्रियाणां मनोविकलतया विवेकाभावतस्तथाप्रतिपत्तेरभावात्, नारकभवनपतिव्यन्तरज्योतिष्कवैमानिकानां च तथाभवस्वाभाव्यादिति, एतदेव सूत्रकृत् प्रतिपादयति—'नेरइया णं भंते !' इत्यादि सुगमं । पुनः प्राकारन्तरेण वेदनामेवाभिधित्सुराह—

मू. (५९८) कतिविहा णं भंते ! वेदना पं० ?, गो० ! दुविहा वेदना पं०, तं०—निदाय अनिदाय, नेरइया णं भंते ! किं निदायं वेयणं वेदयंते अनिदायं वे० वे० ?, गो० ! निदायंपि वे० वे० अनिदायंपि वेदनं वे०,

से केणट्ठेणं भंते ! एवं वु०—नेरइया निदायंपि अनिदायंपि वे० वे० ?, गो० ! नेरइया दुविहा पं०, तं०—सण्णीभूया य असण्णीभूया य, तत्थ णं जे ते सण्णिभूया ते णं निदायंपि वे० वे०, तत्थ णं जे ते असण्णीभूता ते णं अनिदायं वेदणं वे०, से तेणट्ठेणं ?, गो० ! एवं नेरइया निदायंपि वेयणं वे० अनिदायंपि वे० वे०, एवं जाव थणियकुमारा,

पुढविकाइयाणं पुच्छा, गो० ! नो निदायं वे० वे० अनिदायं वे० वे०, से केणट्ठेणं भंते ! एवं० पुढविकाइया नो निदायं वे० वे० अनिदायं वे० वे० ?, गो० ! पुढविकाइया सव्वे असण्णी असण्णिभूयं अनिदायं वे० वे०, से तेणट्ठेणं गो० ! एवं० पुढविकाइया नो निदायं वे० वे०, अनिदायं वे० वे०, एवं जाव चउरिंदिया, पंचिंदियतिरिक्खजोणिया मणूसा वाणमंतरा जहा नेरइया,

जोइसियाणं पुच्छा, गो० ! निदायंपि वेयणं वे० वे० अनिदायंपि वेयणं वेद०, से केणट्ठेणं भंते ! एवं वु०—जोइसिया निदायंपि० अनिदायंपि वेयणं वेदंति ?, गो० ! जोइसिया दुविहा पं०, तं०—माइमिच्छद्दिट्ठिउववन्नगा य अमइसम्मद्दिट्ठीउववन्नगा य, तत्थ णं जे ते माइमिच्छद्दिट्ठिउववन्नगा ते णं अनिदायं वेयणं वेयंति, तत्थ णं जे ते अमाईसम्मादिट्ठीउ० ते णं निदायं वे० वे०, से एतेणट्ठेणं गो० ! एवं० जोइसिया दुविहंपि वेदनं वे०, एवं वेमाणियावि

वृ. 'कतिविहा णं भंते !' इत्यादि, च अनिदा च, तत्र नितरां निश्चितं वा सम्यक् दीयते चित्तमस्यामिति निदा, बहुलाधिकाराद् 'उपसर्गादात' इत्यधिकरणे धञ्, सामान्येन चित्तवती सम्यग्विवेकवती वा इत्यर्थः, इतरा त्वनिदा—चित्तविकला सम्यग्विवेकविकला वा, एतामेव

चतुर्विंशतिदण्डकक्रमेण प्रतिपादयति--

'नेरइया ण'मित्यादि, द्विविधा हि नैरयिकाः--संज्ञिभूता असंज्ञिभूताश्च, तत्र ये ते संज्ञिभ्य उत्पन्नास्ते संज्ञिभूताः, ये त्वसंज्ञिभ्यस्तेऽसंज्ञिभूताः असंज्ञिनश्च पाश्चात्यं न किमपि जन्मान्तरकृतं शुभमशुभं वैरादिकं वा स्मरन्ति, स्मरणं हि तत्र प्रवर्तते यत्तीव्रेणाभिसन्धिना कृतं भवति, न चासंज्ञिभवे पाश्चात्ये तेषां तीव्राभिसन्धिरासीत्, मनोविकलतात्, ततो यामपि काञ्चिद्वेदनां नैरयिका वेदयन्ते तामनिदां, पाश्चात्यभवानुभूतिविषयस्मरणपटुचित्तासम्भवात्, संज्ञिभूतास्तु सर्वं पाश्चात्यमनुस्मरन्तीति ते निदां वेदनां वेदयन्ते इति,

एवमसुरकुमारादयः स्तनितकुमारपर्यवसाना भवनपतयो वक्तव्याः, तेषामपि संज्ञिभ्योऽसंज्ञिभ्यश्चोत्पादसम्भवात्, पृथिव्यप्तेजोवायुवनस्पतिद्वित्रिचतुरिन्द्रियाः सम्मूर्च्छिमा इति मनोविकलत्वात् अनिदामेव वेदनां वेदयन्ते, 'पंचिंदियतिरिक्खजोणिया मणूसा वाणमंतरा जहा नेरइया' इति, पञ्चेन्द्रियतिर्यग्योनिका मनुष्या व्यन्तराश्च यथा नैरयिकास्तथा वक्तव्या इति शेषः, निदामपि वेदनां वेदयन्ति अनिदामपि वेदनां वेदयन्ते इति वक्तव्या इत्यर्थः कस्मादिति चेत्, उच्यते,

इह पञ्चेन्द्रियतिर्यग्योनिका मनुष्याश्च द्विधा भवन्ति, तद्यथा--सम्मूर्च्छिमा गर्भव्युत्क्रान्तिकाश्च, तत्र ये ते सम्मूर्च्छिमास्ते मनोविकलत्वादनिदां वेदनां वेदयन्ते, ये तु गर्भव्युत्क्रान्तास्ते समनस्का इति निदां वेदनामनुभवन्ति, व्यन्तरास्तु संज्ञिभ्योऽपि उत्पद्यन्ते असंज्ञिभ्योऽपि ततस्तेऽपि नैरयिकवत् निदां चानिदां च वेदनां वेदयमाना भावनीयाः,

'जोइसिया ण'मित्यादि, ज्योतिष्कास्तु संज्ञिभ्य एवोत्पद्यन्ते, ततस्तेषु न नैरयिकोक्तेन प्रकारेण निदानिदे वेदने सम्भावनीये, किन्तु प्रकारान्तरेण, ततस्तमेव प्रकारं बुभुत्सुः प्रश्नसूत्रमाह--'से केणट्ठेणं भंते !' इत्यादि सुगमं, भगवानाह--'गोयमे'त्यादि, ज्योतिष्का हि द्विविधाः--मायिमिथ्यादृष्ट्युपपन्नकाः अमायिसम्यग्दृष्ट्युपपन्नकाश्च,

तत्र मायानिर्वर्त्तितं यत्कर्म मिथ्यात्वादिकं तदपि माया, कार्ये कारणोपचारात्, माया विद्यते येषां ते मायिनः, अत एव मिथ्यात्वोदयात् मिथ्या-विपर्यस्ता दृष्टिः--वस्तुतत्त्वप्रतिपत्तिर्येषां ते मिथ्यादृष्टयो मायिनश्च ते मिथ्यादृष्टयश्च मायिमिथ्यादृष्टयस्ते च ते उपपन्नकाश्च मायिमिथ्यादृष्ट्युपपन्नकाः तद्विपरीता अमायिसम्यग्दृष्ट्युपपन्नकाः,

तत्र ये ते मायिमिथ्यादृष्ट्युपपन्नकास्तेऽपि मिथ्यादृष्टित्वादेव व्रतविराधनातोऽज्ञानतपोवशाद्वा वयमेवंविधा उत्पन्ना इति न जानते, ततः सम्यग्यथावस्थितपरिज्ञानाभावादनिदां वेदनां वेदयमानास्ते वेदितव्याः, ये त्वमायिसम्यग्दृष्ट्युपपन्नास्ते सम्यग्दृष्टित्वात् यथावस्थितं स्वरूपं जानन्ति, ततो यां काञ्चन वेदनां वेदयन्ते तां सर्वामपि निदामिति,

'एवं चेव वेमाणिया वि' इति एवं--ज्योतिष्कोक्तेन प्रकारेण वैमानिका अपि निदामनिदां च वेदनां वेदयमाना वेदितव्याः, तेषामपि मिथ्यादृष्टिसम्यग्दृष्टिभेदतो द्विविधत्वात् ॥

पदं -- ३५ -- समाप्तम्

मुनि दीपरत्नसागरेण संशोधिता सम्पादिता प्रज्ञापनाउपाङ्गसूत्रे
पञ्चत्रिंशत्तमपदस्य मलयगिरिआचार्येण विरचिता टीका परिसमाप्ता ।

पदं – ३६ – "समुद्घातः"

वृ. तदेवं व्याख्यातं पञ्चत्रिंशत्तमं पदं, सम्प्रति षट्त्रिंशत्तममारभ्यते, तस्य चायमभिसम्बन्धः–इहानन्तरपदे गतिपरिणामविशेषो वेदना प्रतिपादिता, इहापि गतिपरिणामविशेष एव समुद्घातश्चिन्त्यते, तत्र समुद्घातवक्तव्यताविषयए इयमादौ सङ्ग्रहणिगाथा–

मू. (५९९) *वेयणकसायमरणे वेउव्वियतेयए य आहारे ।*
केवलिए चेव भवे जीवमणुस्साण सत्तेव ॥

वृ. 'वेयणे'त्यादि, इह समुद्घाताः सप्त भवन्ति, तद्यथा–'वेयणकसायमरणे'इति, वेदनं कषायाश्च मरणं च वेदनकषायमरणं समाहारो द्वन्द्वस्तस्मिन् विषये त्रयः समुद्घाता भवन्ति, तद्यथा–वेदनासमुद्घाताः कषायसमुद्घातो मरणसमुद्घातश्च, 'वेउव्विय'त्ति वैक्रियविषयश्चतुर्थः समुद्घातः, तैजसः पञ्चमः समुद्घात;, षष्ठ आहार इति–आहारकशरीरविषयः,

–सप्तमः केवलिकः–केवलिषु भवति, 'जीवमणुस्साण सत्तेवि'त्ति सामान्यतो जीवचिन्तायां मनुष्यद्वारचिन्तायां सप्तैव–सप्तपरिमाणाः समुद्घाता वक्तव्याः, न न्यूनाः, सप्तानामपि तत्र सम्भवात्, 'सत्तेव'त्ति एवकारोऽत्र परिमाणे, सप्तैव च परिमाणे एवशब्दः, सप्तैव नाकाल्पनन्यासकृत्–'एवोऽवधारणपृथकत्वपरिमाणेष्वि'ति, शेषद्वारचिन्तायां तु यथासम्भवं वाच्याः,ते चाग्रे स्वयमेव सूत्रकृताऽभिधास्यन्ते इत्येष सङ्ग्रहणिगाथासङ्क्षेपार्थः ।

अथ समुद्घात इति कः शब्दार्थः ?, उच्यते, समित्येकीभावे उत्प्राबल्ये, एकीभावेन प्राबल्येन घातः समुद्घातः, केन सह एकीभावगमनमिति चेत्, उच्यते, अथद्विदनादिभिः तथाहि–यदाऽऽत्मा वेदनादिसमुद्घात गतो भवति तदा वेदनाद्यनुभवज्ञानपरिणत एव भवति, नान्यज्ञानपरिणतः, प्राबल्येन कथं घात इति चेत्, उच्यते, इह वेदनादिसमुद्घातपरिणतो बहून् वेदनीयादिकर्मप्रदेशान् कालान्तरानुभवयोग्यानुदीरणाकरणेनाकृष्योदयावलिकायां प्रक्षिप्यानुभूय च निर्जरयति, आत्मप्रदेशैस्सह सङ्क्लिष्टान् सातयतीति भावः, 'पुव्वकयकम्मसाडणं तु निज्जरा' इति वचनात्, तथाहि–वेदनासमुद्घातोऽसद्वेद्यकर्माश्रयः,

कषायसमुद्घातः कषायाख्यचारित्रमोहनीयकर्माश्रयः, मारणान्तिकसमुद्घातः अन्तर्मुहूर्त्तशेषायुःकर्माश्रयः, वैक्रियकतैजसाहारकसमुद्घाता यथाक्रमं वैक्रियशरीरतैजसशरीराहारकशरीरनामकर्माश्रयाः,

केवलिसमुद्घातः सदसद्वेद्यशुभाशुभनामोच्चनीयचैर्गोत्रकर्माश्रय;, तत्र वेदनासमुद्घातगत आत्मा असातवेदनीयकर्मपुद्गलपरिशातं करोति, तथाहिवेदनापीडितो जीवः स्वप्रदेशानन्तान्तकर्मस्कन्धवेष्टितान् शरीराद्बहिरपि विक्षिपति, तैश्च प्रदेशैर्वदनजठरादिरन्ध्राणि कर्णस्कन्धाद्यपान्तरालानि चापूर्य्यायामतो विस्तरतश्च शरीरमात्रं क्षेत्रमभिव्याप्यान्तर्मुहूर्त्त यावदवतिष्ठते, तस्मिंश्चान्तर्मुहूर्ते प्रभूतासातावेदनीयकर्मपुद्गलपरिशातं करोति,

कषायसमुद्घातसमुद्धतः कषायाख्यचारित्रमोहनीयकर्मपुद्गलपरिशातं विधत्ते, तथाहि–कषायोदयसमाकुलो जीवः प्रदेशान् बहिर्विक्षिपति, तैः प्रदेशैर्वदनोदरादिरन्ध्राणि कर्णस्कन्धाद्यन्तरालानि चापूर्य्यायामतो विस्तरतश्च देहमात्रं क्षेत्रमभिव्याप्य वर्त्तते, तथाभूतश्च प्रभूतान् कषायकर्म्मपुद्गलान् परिशातयति,

एवं मरणसमुद्घातगत आयुःकर्मपुद्गलान् परिशातयति, नवरं मरणसमुद्घातगतो

विक्षिप्तस्वप्रदेशो वदनोदरादिरन्ध्राणि स्कन्धाद्यपान्तरालानि चापूर्य विष्कम्भबाहल्याभ्यां स्वशरीरप्रमाणमायामतः स्वशरीरातिरेकतो जघन्यतोऽङ्गुलासङ्ख्येयभागं उत्कर्षतोऽसङ्ख्येयानि योजनान्येकदिशि क्षेत्रमभिव्याप्य वर्त्तत इति वक्तव्यं,

वैक्रियसमुद्घातगतः पुनर्जीवः स्वप्रदेशान् शरीराद्बहिर्निष्काश्य शरीरविष्कम्भबाहल्यमानमायामतः सङ्ख्येययोजनप्रमाणं दण्डं निसृजति, निसृज्य च यथास्थूलान् वैक्रियशरीरनामकर्मपुद्ग-लान् प्राग्वत् शातयति, तथा चोक्तम्-"वेउव्वियसमुग्घाएणं समोहणइ संमोहणित्ता संखिज्जाइं जोयणाइं दंडं निसिरइ, निसिरित्ता अहाबायरे पुग्गले परिसाडेइ" इति,

एवं तैससाहारसमुद्घातावपि भावनीयौ, नवरं तैजसमुद्घातस्तेजोलेश्याविनिर्गमकाले तैजसनामकर्मपुद्गलपरिशातहेतुः, आहारकसमुद्घातगतस्त्वाहारशरीरनामकर्मपुद्गलान् परिशातयतीति,

केवलिसमुद्घातगतः केवली सदसद्वेद्यादिकर्मपुद्गलपरिशातं करोति, स च यथा कुरुते तथा विनेयजनानुग्रहाय भाव्यते इति, केवलिसमुद्घातोऽष्टसामयिकः, तं च कुर्वन् केवली प्रथमसमये बाहल्यतः स्वशरीरप्रमाणमूर्ध्वमधश्च लोकान्तपर्यन्तं आत्मप्रदेशानां दण्डमारचयति, द्वितीयसमये पूर्वापरं दक्षिणोत्तरं वा कपाटं तृतीये मन्थानं चतुर्थेऽवकाशान्तराणां पूरणं पञ्चमेऽवकाशान्तराणां संहारं षष्ठेः मथः सप्तमे कपाटस्य अष्टमे स्वशरीरस्थो भवति, वक्ष्यति च-"पढमे समये दंडं करेइ, बीए कवाडं करेइ" इत्यादि, तत्र दण्डसमयात्प्राक् या पल्योपमासङ्ख्येयभागमात्रा वेदनीयनामगोत्राणां स्थितिरासीत् तस्या बुद्ध्या असङ्ख्येयभागाः, क्रियन्ते, ततो दण्डसमये दण्डं कुर्वन् असङ्ख्येयान् भागान् हन्ति, एकोऽसङ्ख्येयो भागोऽवतिष्ठते, यश्च प्राक्कर्मत्रयस्यापि रसस्तस्याप्यनन्ता भागाः क्रियन्ते,

ततस्तस्मिन् दण्डसमये असातवेदनीय १ प्रथमवर्जससंस्थान ६ संहननपञ्चका ११ प्रशस्तवर्णादिचतुष्टयो १५ पघाता १६ प्रशस्तविहायोगति १७ दुःस्वर १८ दुर्भगा १९ स्थिरा २० पर्याप्तका २१ शुभा २२ नादेया २३ यशः कीर्त्ति २४ नीचैर्गोत्ररूपाणां २५ पञ्चविंशतिप्रकृतीनामनन्तान् भागान् हन्ति, एकोऽनन्तभागोऽवशिष्यते,

तस्मिन्नेव च समये सातवेदनीय १ देवगति २ मनुष्यगति ३ देवानुपूर्वी ४ मनुष्यानुपूर्वी ५ पञ्चेन्द्रियजाति ६ शरीरपञ्चको ११ पाङ्गत्रय १४ प्रथमसंस्थान १५ संहनन १६ प्रशस्तवर्णविचतुष्टया २० गुरुलघु २१ पराघातो २२ च्छ्वास १३ प्रशस्तविहायोगति २४ त्रस २५ बादर २६ पर्याप्त २७ प्रत्येकातपो २९ द्योत ३० स्थिर ३१ शुभ ३२ सुभग ३३ सुस्वरा ३४ देय ३५ यशःकीर्त्ति ३६ निर्माण ३७ तीर्थकरो३७ च्चैर्गोत्ररूपाणा ३९ मेकोनचत्वारिंशतः प्रकृतीनामनुभागोऽप्रशस्तप्रकृत्यनुभागमध्यप्रवेशनोनोपहन्यते,

समुद्घातमाहात्म्यमेतत्, तस्य चोद्धरितस्य स्थितेरसङ्ख्येयभागस्यानुभागस्य चानन्तभागस्य पुनर्यथाक्रमं असङ्ख्येया अनन्ताश्च भागाः क्रियन्ते, द्वितीये कपाटसमये स्थितेरससङ्ख्येयान् भागान् हन्ति, एकोऽवशिष्यते, अनुभागस्य चानन्तान् भागान् हन्ति एकं मुञ्चति, अत्राप्यप्रशस्तप्रकृत्यनुभागमध्यप्रवेशनेन प्रशस्तप्रकृत्यनुभागघातो द्रष्टव्यः, पुनरप्येतत्समयेऽवशिष्टस्य स्थितेरसङ्ख्येयभागस्यानुभागस्य चानन्ततमभागस्य पुनर्बुध्या यथाक्रममसङ्ख्येया अनन्ताश्च भागाः क्रियन्ते ततस्तृतीये समये स्थितेरसङ्ख्येयान् भागान् हन्ति, एकं मुञ्चति, अनुभागस्य चानन्तान् भागान्

हन्ति, एकमनन्तभागं मुञ्चति, अत्रापि प्रशस्तप्रकृत्यनुभागघातोऽप्रशस्तप्रकृत्यनुभागमध्यप्रवेशनेनावसेयः, ततः पुनरपि तृतीयसमयावशिष्टस्य स्थितेरसङ्ख्येयभागस्यानुभागस्य चानन्ततमभागस्य बुध्या यथाक्रममसङ्ख्येया अनन्ताश्च भागाः क्रियन्ते, ततश्चतुर्थसमये स्थितेरसङ्ख्येयान् भागान् हन्ति, एकस्तिष्ठति, अनुभागस्याप्यनन्तान् भागान् हन्त्येकोऽवशिष्यते, प्रशस्तप्रकृत्यनुभाग- घातश्च पूर्ववदवसेयः,

एवं च स्थितिघातादि कुर्वतश्चतुर्थसमये स्वप्रदेशापूरितसमस्तलोकस्य भगवतः केवलिनो वेदनीयादिकर्मत्रयस्थितिरायुषः सङ्ख्येयगुणा जाता, अनुभागस्त्वद्याप्यनन्तगुणः, चतुर्थसमयावशिष्टस्य च स्थितेरसङ्ख्येयभागस्यानुभागस्य चानन्ततमभागस्य भूयोऽपि बुद्धया यथाक्रमं सङ्ख्येया अनन्ताश्च भागाः क्रियन्ते, ततोऽवकाशान्तरसंहारसमये स्थितेः सङ्ख्येयभागान् हन्ति, एकं सङ्ख्येयभागं शेषीकरोति, अनुभागस्यानन्तान् भागान् हन्ति एकं मुञ्चति, एवमेतेषु पञ्चसु दण्डादिसमयेषु प्रत्येकं सामयिकं कण्डकमुत्कीर्णं, समये २ स्थितिकण्डकानुभागकण्डघातनात्, अतः परं षष्ठसमयादारभ्य स्थितकण्डकमनुभागकण्डकं चान्तर्मुहूर्त्तेन कालेन विनाशयति, प्रयत्नमन्दीभावात्, षष्ठादिषु च समयेषु कण्डकस्य प्रतिसमयमेकैकं शकलं तावदुत्किरति यावदन्तर्मुहूर्त्तचरमसमये सकलमपि तत्कण्डकमुत्कीरणं भवति, एवमान्तर्मौहूर्तिकानि स्थितिकण्डककान्यनुभागकण्डकानि च घातयन् तावद्वेदितव्यः यावत् सयोग्यवस्थाचरमसमयः, सर्वाण्यपि चामूनि स्थित्यनुभागकण्डकान्यसङ्ख्येयान्यव- गन्तव्यानीति कृतं प्रसङ्गेन, प्रकृतं प्रस्तुमः । तत्र संग्रहणिगाथोक्तमर्थं स्पष्टयन् प्रथमतः समुद्घात- सङ्ख्याविषयं प्रश्नसूत्रमाह–

मू. (६००) कति णं भंते ! समुग्घाया पं० ?, गो० ! सत्त समुग्घाया पं०, तं०–वेदनासमुग्घाते १ कसायसमुग्घाते २ मारणंतियसमु० ३ वेउव्वियस० ४ तेयास० ५ आहारस० ६ केवलिसमुग्घाते ७ ।

वेदनासमुग्घाए णं भंते ! कतिसमइए पं० ?, गो० ! असंखेज्जसमइए अंतोमुहुत्तिते पं०, एवं जाव आहारसमुग्घाते, केवलिसमुग्घाए णं भंते ! कतिसमइए पं० ?, गो० ! अट्ठसमए पं०

नेरइयाणं भंते ! कति समुग्घाया पं० ?, गो० ! चत्तारि समुग्घाया पं०, तं०–वेदनासमुग्घाए कसायस० मारणंतियस० वेउव्वियस०, असुरकुमाराणं भंते ! कति समुग्घाया पं० ?, गो० ! पंच समुग्घाया पं०, तं०–वेदणास० कसायस० मारणंतियस० वेउव्वियस० तेयासमुग्घाए, एवं जाव थणियकुमाराणं,

पुढविकाइयाणं भंते ! कति समुग्घाया पं० ?, गो० ! तिन्नि समुग्घाया पं०, तं०–वेदनास० कसायस० मारणंतियस०, एवं जाव चउरिंदियाणं, नवरं वाउकाइयाणं चत्तारि समुग्घाया पं०, तं०–वेदनास० कसायस० मारणंतियस० वेउव्वियस०, पंचिंदियतिरिक्खजोणियाणं जाव वेमाणियाणं भंते ! कति समुग्घाया पं० ?, गो० ! पंच समुग्घाया पं०, तं०–वेयणास० कसायस० मारणंतियस० वेउव्वियस० तेयास०, नवरं मणूसाणं सत्तविहे समुग्घाए पं०, तं०–वेदनास० कसायस० मारणंतियस० वेउ० तेया० आहार० केवलिसमुग्घाते

वृ. 'कइ ण'मित्यादि, कति–कियन्तिमाणा णमिति वाक्यालङ्कारे 'भदन्ते'ति भगवतो वर्द्धमानस्वामिन आमन्त्रणं, भदन्तत्वं च भगवतः परमकल्याणयोगित्वात्, यदिवा भवान्तेति द्रष्टव्यं, सकलसंसारपर्यन्तवर्त्तित्वात्, अथवा भयान्त ! इहपरलोकादिभेदभिन्नसप्तप्रकार-

भयविनाशकत्वात्, समुद्घाताः—उक्तशब्दार्थाः प्रज्ञप्ताः, भगवानाह—'गोयमे'त्यादि, गौतम ! सप्त समुद्घाताः प्रज्ञप्ताः, तद्यथा—वेदनासमुद्घात इत्यादि, वदनायाः समुद्घातो वेदनासमुद्घातः, एवं यावत्केवलिसमुद्घात इति, 'केवलिसमुद्घात' इति केवलिनः समुद्घातः केवलिसमुद्घातः सम्प्रति कः समुद्घातः कियन्तं कालं यावद्भवतीत्येतन्निरूपणार्थमाह—

'वेयणे'त्यादि, सुगमं, नवरं 'जावे' त्यादि, एवमुक्तप्रकारेणाभिलापेनान्तर्मुहूर्त्तप्रमाणतया च समुद्घाताः क्रमेण तावद्वाच्याः यावदाहारकसमुद्घातः, एते षडप्याद्या आन्तर्मुहूर्तिका केवलिसमुद्घातस्त्वष्टसामयिकः, स चानन्तरमेव भावितः, एतानेव समुद्घातान् चतुर्विंशतिदण्डकक्रमेण चिन्तयिषुराह—

'नेरइयाण'मित्यादि, नैरयिकाणामाद्याश्चत्वारः, तेषां तेजोलब्ध्याहारकलब्धिकेवलित्वाभावतः शेषसमुद्घातत्रयासम्भवात्, असुरकुमारादीनां दशानामपि भवनपतीनां तेजोलेश्यालब्धिभावात् आद्याः पञ्चसमुद्घाताः, पृथिवीकायिकाप्कायिकतैजस्कायिकवनस्पतिकायिकद्वित्रिचतुरिन्द्रियाणामाद्यास्त्रयः, तेषां वैक्रियादिलब्ध्यभावतः उत्तरेषां चतुर्णामपि समुद्घातनानासम्भवात्, वायुकायिकानामाद्याश्चत्वारस्तेषां वैक्रियलब्धिसम्भवेन वैक्रियसमुद्घातस्यापि सम्भवात्, पञ्चेन्द्रियतिर्यग्योनिकानामाद्याः पञ्च, केषांचित्तेषां तेजोलब्धेरपि भावात्, मनुष्याणां सप्त, मनुष्येषु सर्वसम्भवात्, व्यन्तरज्योतिष्कवैमानिकानामाद्याः पञ्च, वैक्रियतेजोलब्धिभावाद्, उत्तरौ तु द्वौ न सम्भवतः, आहारकलब्धिकेवलित्वायोगात् ॥

सम्प्रति चतुर्विंशतिदण्डकमधिकृत्य एकैकस्य जीवस्य कति वेदनादयः समुद्घाता अतीताः कति भाविन इति चिचिन्तयिषुराह—

मू. (६०१) *एगमेगस्स णं भंते ! नेरइयस्स केवइया वेदनासमुग्घाया अतीत ?, गो० ! अनंता, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि तस्स जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं संखेज्जा वा असंखेज्जा वा अनंता वा, एवमसुरकुमारस्सवि निरंतरं जाव वेमाणियस्स, एवं जाव तेयगसमुग्घाते, एवमेते पंच चउवीसा दंडगा ।*

एगमेगस्स णं भंते ! नेरइयस्स केवइया आहारसमुग्घाया अतीता ?, कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि तस्स जह० एक्को वा दो वा उक्को० तिन्नि, केवइया पुरेक्खडा ?, कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि जह० एक्को वा दो वा तिन्नि वा उक्को० चत्तारि, एवं निरंतरं जाव वेमाणियस्स, नवरं मणूसस्स अतीतावि पुरेक्खडावि जहा नेरइयस्स पुरेक्खडा,

एगमेगस्स णं भंते ! नेरइयस्स केवतिया केवलिसमुग्घाया अतीता ?, गो० ! नत्थि, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि एक्को, एवं जाव वेमाणियस्स, नवरं मणूसस्स अतीता कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि एक्को, एवं पुरेक्खडावि

वृ. 'एगमेगस्स णं भंते !' इत्यादि, एकैकस्य सूत्रे मकारोऽलाक्षणिकः, भदन्त ! नैरयिकस्य सकलमतीतं कालमधिकृत्य 'केवइय'त्ति कियन्तो वेदनासमुद्घाता अतीता—अतिक्रान्ताः ?, भगवानाह—गौतम ! अनन्ताः नारकादिस्थानानामनन्तशः प्राप्तत्वादेकैकस्मिंश्च नारकादिस्थानप्राप्तिकाले प्रायोऽनेकशो वेदनासमुद्घातानां भावात्, एतच्च बाहुल्यापेक्षयोच्यते, बहवो हि जीवा अनन्तकालसमसंव्यवहारराशेरुद्वृत्ता वर्त्तन्ते, ततस्तदपेक्षया एकैकस्य नैरयिकस्यानन्ता अतीता वेदनासमुद्घाता उपपद्यन्ते, ये तु स्तोककालमसंव्यवहारराशेरुद्वृत्तास्तेषां यथासम्भवं सङ्ख्येया

असङ्ख्येया वा प्रतिपत्तव्याः केवलं ते कतिपये इति न विवक्षिताः,

'केवइया पुरेक्खड'त्ति इदं सूत्रं पाठसूचामात्रं, सूत्रपाठस्त्वेवम्–'एगमेगस्स णं भंते ! नेरइयस्स केवइया वेयणासमुग्घाया पुरेक्खडा' ? ति, सुगमं, नवरं पुरेअग्रे कृताः–तत्परिणामप्राप्तियोग्यतया व्यवस्थापिताः, सामार्थ्यात् तत्कर्तृजीवेनेति गम्यते, पुरस्कृता–अनागतकालभाविन इति तात्पर्यार्थः, अत्र भगवानाह–कस्यापि सन्ति कस्यापि न सन्ति, यस्यापिसन्ति तस्यापि जघन्यत एको द्वौ वा त्रयो वा, उत्कर्षतः सङ्ख्येया वा असङ्ख्येया वा अनन्ता वा, इयमत्र भावना–

यो नाम विवक्षितप्रश्नसमयानन्तरं वेदनासमुद्घातमन्तरेणैव नरकादुद्वृत्यानन्तरमुष्यभवे वेदनासमुद्घातमप्राप्त एव सेत्स्यति तस्य पुरतो वेदनासमुद्घात एकोऽपि नास्ति, यस्तु विवक्षितप्रश्नसमयानन्तरमायुः शेषे कितत्कालं नरकभवे स्थित्वा तदनन्तरं मनुष्यभवमागत्य सेत्स्यति तस्य एकादिसम्भवः, सङ्ख्यातकालसंसारावस्थायिनः सङ्ख्याता असङ्ख्यातकाल संसारावस्थायिनोऽसङ्ख्याताः अनन्तकालसंसारावस्थायिनोऽनन्ताः, 'एव'मित्यादि, एवं नैरयिकोक्तप्रकारेणासुरकुमारस्यापि यावत् स्तनितकुमारस्य वाच्यं, ततश्चतुर्विंशतितिदण्डकक्रमेण निरन्तरं तावद्वाच्यं यावद्वैमानिकस्य, किमुक्तं भवति ? –

सर्वेष्वपि असुरकुमारादिषु स्थानेषु अतीता वेदनासमुद्घाता अनन्ता वाच्याः, पुरस्कृतास्तु कस्यापि सन्ति कस्यापि न सन्ति, यस्यापि सन्ति तस्यापि जघन्यत एको द्वौ वा त्रयो वा उत्कर्षतः सङ्ख्येया असङ्ख्येया अनन्ता वा इति वाच्याः, भावनापि पूर्वोक्तानुसारेण स्वयं परिभावनीया, एवं चतुर्विंशतिदण्डकक्रमेण कषायसमुद्घातो मारणान्तिकसमुद्घातो वैक्रियसमुद्घाततैजससमुद्घातश्च प्रत्येकं, तत एव षढश्च चतुर्विंशतिदण्डकसूत्राणि भवन्ति, तथा चाह–'एवं जाव तेयगसमुग्घाए'इत्यादि, एवं वेदनासमुद्घातप्रकारेण शेषसमुद्घाततेष्वपि प्रत्येकं तावद्वक्तव्यं यावत्तैजससमुद्घात;, शेषं सुगमं,

'एगमेगस्स ण'मित्यादि, एकैकस्य भदन्त ! नैरयिकस्य पाश्चात्यं सकलमतीतकालमपक्ष्य कियन्त आहारकसमुद्घाता अतीताः ?, भगवानाह–गौतम ! कस्यापि 'अत्थि'त्ति अस्तीति निपातः सर्वलिङ्गवचनो, यदाह शाकटायनन्यासकृत्–''अस्तीति निपातः सर्वलिङ्गवचनेष्वि''ति, ततोऽयमर्थः–कस्यापि अतीता आहारकसमुद्घाताः सन्ति कस्यापि न सन्ति, येन पूर्वं मानुष्यं प्राप्य तथाविधसामग्र्यभावतश्चतुर्दश पूर्वाणि नाधीतानि, चतुर्दशपूर्वाधिगमे वा आहारकलब्ध्यभावतः तथाविधप्रयोजनाभावतो वा आहारकशरीरं न कृतं तस्य न सन्तीति, यस्यापि सन्ति तस्यापि जघन्यतः एको वा द्वौ वा उत्कर्षस्तु त्रयो, न तु चत्वारः, चतुः–कृत्वः कृताहारकशरीरस्य नरकगमनाभावात्, आह च मूलटीकाकारः–''आहारसमुग्घाया उक्कोसेणं तिन्नि, तदुवरि नियमा नरगं न गच्छइ जस्स चत्तारि भवन्ति'' इति, पुरस्कृता अपि कस्यापि सन्ति कस्यापि न सन्ति, तत्र यो मानुष्यं प्राप्य तथाविधसामग्र्यभावतश्चतुर्दशपूर्वाधिगममाहारकसमुद्घातं चान्तरेण सेत्स्यति तस्य न सन्ति, शेषस्य तु यथासम्भवं जघन्यत एको द्वौ वा त्रयो वा उत्कर्षतश्चत्वारः, तत ऊर्ध्वमवश्यं गत्यन्तरासंक्रमेणाहारकसमुद्घातमन्तरेण च सिद्धिगमनभावात्,

'एव'मित्यादि, एवं नैरयिकोक्तेन प्रकारेण चतुर्विंशतिदण्डकक्रमेण निरन्तरं तावद् वाच्यं यावद्वैमानिकसय् सूत्रं, नवरं मनुष्यस्यातीता अपि पुरस्कृता अपि यथा नैरयिकस्य पुरस्कृतास्तथा

वाच्याः, अतीता अपि चत्वारः पुरस्कृता अपि चत्वार उत्कर्षतो वाच्या इत्यर्थः, सूत्रपाठश्चैवम्- 'एगमेगस्स णं मणूसस्स भंते ! केवइया आहारसमुग्घाया अतीता ?, गोयमा ! कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं चत्तारि, केवइया पुरेक्खडा गोयमा ! कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि जहन्नेणं एक्को दो वा तिन्नि वा उक्कोसेणं चत्तारि' अत्र भावना-इह यश्चतुर्थवेलमाहारकशरीरंकरोति स नियमात्त तद्भव एव मुक्तिमासा- दयति, न गत्यन्तरं, कथमेतदवसीयते इति चेत् ?, उच्यते, सूत्रपौर्वापर्यपर्या लोचनात्, तथाहि-यदि चतुर्थवेलमप्याहारकशरीरं कृत्वा गत्यन्तरं संक्रामेत ततो नैरयिकादावन्यतरस्यां गतौ उत्कर्षतश्चत्वारोऽप्याहारकस्य समुद्घाता उच्यरेन, न चोच्यन्ते, ततोऽवसीयते-चतुर्थवेलमाहार-कशरीरं कृत्वा नियमात् तद्भव एव मुक्तो भवति न गत्यन्तरगामी,

तत्र यः प्रागाहारकशरीरं कदाचनापि न कृतवान् तस्यातीत आहारकसमुद्घातो नास्ति, ततस्तदपेक्षयोक्तं 'कस्सइ नत्थि'त्ति, यस्यापि सन्ति सोऽपि यदि पूर्वमेकवारमाहारकशरीरं कृतवान् तस्यैकोऽतीत आहारकस्य समुद्घातः द्वौ वारौ कृतवतो द्वौ त्रीन् वारान् कृतवस्त्रयो यश्चतुर्थवेल-माहारकशरीरं कृत्वा आहारकसमुद्घाताश्चतुर्थात्प्रतिनिवृत्तो वर्त्तते न चाद्यापि मनुजभवंविजहाति तस्य चत्वारः, पुरस्कृता अपि समुद्घाताः कस्यापि सन्ति कस्यापि न सन्ति, तत्र यश्चतुर्थवेलमा-हारकशरीरं कृत्वा आहारकसमुद्घातात् प्रतिनिवृत्तो यदिवा पूर्वमकृताहारकशरीरोऽप्यथवा एकावरकृताहारकशरीरोऽपि यदिवा द्विकृत्वः कृताहारकशरीरोऽपि यदिवा त्रिकृत्वः कृताहार-कशरीरोऽपि तथाविधसामग्र्यभावात् उत्तरकालमाहारकशरीरमकृत्वैव मुक्तिमवाप्स्यति तस्य पुरस्कृता आहारकसमुद्घाता न सन्ति, यस्यापि सन्ति तस्यापि जघन्यत एको वा द्वौ वा त्रयो वा उत्कर्षतश्चत्वारः, तत्र एकादिसम्भवः पूर्वोक्तभावनानुसारेण स्वयं भावनीयः यस्तु पूर्वकालमेक-वारमपि आहारकशरीरं न कृतवान् अथ चोत्तरकालं तथाविधसामग्रीभावतो यावत्सम्भवमाहार-कशरीरकर्त्ता तस्य चत्वारो न शेषस्य ।

सम्प्रति केवलिसमुद्घातविषयं दण्डकसूत्रमाह-'एगमेगस्स ण'मित्यादि, एकैकस्य भदन्त नैरयिकस्य निरवधिकमतीतं कालधिकृत्य कियन्तः केवलिसमुद्घाता अतीताः ?, भगवानाह-'नत्थि'त्ति नास्त्यतीत एकोऽपि केवलिसमुद्घातः, केवलिसमुद्घातानन्तरं ह्यन्तर्मुहूर्तेन नियमतो जीवाः परमपदमश्नुवते, ततो यद्यभविष्यत्केवलिसमुद्घातस्तर्हि नरकमेव नागमिष्यद्, अथ च सम्प्रति नरकगामिनो वर्त्तन्ते तस्मान्नास्त्येकस्याप्यतीतः केवलिसमुद्घातः 'केवइया पुरेक्खड'त्ति कियन्तः पुरस्कृताः केवलिसमुद्घाता इति प्रश्नः, भगवानाह-'गोतम ! कस्सइ अत्थि कस्सइ नत्थि'त्ति, इह केवलिसमुद्घात एकस्य प्राणिन आकालम क एव भवति, न द्वित्राः, ततोऽस्तीति निपातोऽत्र एकवचनान्तो वेदितव्यः, ततश्चायमर्थः-कस्यापि केवलिस- मुद्घातः पुरस्कृतोऽस्ति, यो दीर्घतरेणापि कालेन मुक्तिपदप्राप्तयवसरे विषमस्थितिकर्मा इति, कस्यापि नास्ति, यो मुक्तिपदमवाप्युमयोग्यो योग्यो वा केवलिसमुद्घागतमन्तरेणैव मुक्तिपदं गन्ता, तथा च वक्ष्यति-

॥ १ ॥ "अगंतुण समुग्घायमनंता केवलीजिना ।
जरमरणविप्पमुक्का, सिद्धिं वरगइं गया ॥" इति,

इह अस्तीति निपातः सर्वलिङ्गवचन इत्यविदितसिद्धान्तस्य बहुत्वाशङ्कापि कस्यचित्

स्यात् ततस्तदपनोदार्थमाह–'जस्स अत्थि' एको यस्यास्ति पुरस्कृतः केवलिसमुद्घातस्तस्य एको, भूयः संसाराभावात्,

'एवं जाव वेमाणियस्स'त्ति एवं–नैरयिकगताभिलापप्रकारेण चतुर्विंशतिदण्डकक्रममनुसृत्य तावद् वक्तव्यं यावद्वैमानिकस्य सूत्रं, तच्चैवम्–'एगमेगस्स णं भंते! वेमाणियस्स केवइया केवलिसमुग्घाया अतीता ?, गोयमा ! नत्थि, केवइया पुरेक्खडा ?, गोयमा ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि एक्को' इति, तत्रैव विशेषमाह–'नवर'मित्यादि, नवरमयं विशेषः–मनुष्यस्य केवलिसमुद्घातस्य चिन्तायामतीताः कस्याप्यस्ति कस्यापि नास्तीति वक्तव्यः, तत्र यः केवलिसमुदअघातात् प्रतिनिवृत्तो वर्त्तते न चाद्यापि मुक्तिपदमवाप्नोति तस्यास्त्यतीतः केवलिसमुद्घातः, ते च सर्वसङ्ख्यया उत्कर्षपदे शतपृथक्त्वप्रमाणा वेदितव्याः, कस्यापि नास्ति अतीतः केवलिसमुद्घातो, यो न समुद्घातं गतवान्, ते च सर्वसङ्ख्यया असङ्ख्येया द्रष्टव्याः शतपृथक्त्वव्यतिरेकेणान्येषां सर्वेषामप्यसम्प्राप्तकेवलिसमुद्घातत्वात्, अत्राप्यस्तीति निपातस्य सर्वलिङ्गवचनत्वात्,

'कस्सइ अत्थि कस्सइ नत्थि' इत्युक्तौ बहुत्वाशङ्का स्यात् ततस्तद्व्यवच्छेदार्थमाह–यस्य मनुष्यस्यातीतः केवलिसमुद्घातस्तस्य नियमादेको न द्वित्राः, एकेनैव समुद्घातेन प्रायः समस्तघातिकर्मणां निर्मूलकाषंकषितत्वात्, 'एवं पुरेक्खडावि'त्ति एवं अतीतगतेन प्रकारेण पुरस्कृता अपि केवलिसमुद्घाता वाच्याः, ते चैवम्–'कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि एक्को' इति, अत्र भावना पूर्वोक्तानुसारेण स्वयं भावनीया !! तदेवमीततमनागतं च कालमधिकृत्य एकैकस्य नैरयिकादेर्वेदनादिसमुद्घातचिन्ता कृता, सम्प्रपति नैरयिकादेः प्रत्येकं समुदायरूपस्य तच्चिन्तां चिकीर्षुराह–

मू. (६०२) *नेरइयाणं भंते! केवइया वेदणासमुग्घाया अतीता ? गो० ! केवइया पुरेक्खडा गो० ! अनंता, एवं जाव वेमाणियाणं, एवं जाव तेयगसमुद्घायए, एवं एतेवि पंच चउवीसदंडगा,*

नेरइयाणं ! भंते ! केवइया आहारगसमुग्घाया अतीता ?, गो० ! असंखेज्जा, केवइया पु० ?, गो० ! असंखेज्जा, एवं जाव वेमाणियाणं, नवरं वणस्सइकाइयाण मणूसाण य इमं नाणत्तं–वणस्सइकाइयाणं भंते ! केवइया आहारसमुग्घाया अईया ?, गो० ! अनंता, मणूसाणं भंते ! केवइया आहारसमुग्घाया अईया ?, गो० ! सिय संखेज्जा सिय असं०, एवं पुरेक्खडावि !

नेरइयाणं भंते ! केवइया केवलिसमुग्घाया अतीता ? गो० ! नत्थि, केवइया पुरेक्खडा ?, गो० ! असंखेज्जा, एवं जाव वेमाणियाणं, नवरं वणस्सइमणूसेसु इमं नाणत्तं–वणस्सइकाइयाणं भंते ! केवइया केवलिसमुग्घाया अतीता ?, गो० ! नत्थि, केवइया पुरे० ?, गो० ! अनंता, मणूसाणं भंते ! केवइया केवलिस० अतीता ?, गो० ! सिय अत्थि सिय नत्थि, जइ अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा, उक्कोसेणं सतपुहुत्तं, केवति० पुरेक्खडा ?, सिय संखेज्जा सिय असं०

वृ. 'नेरइयाण'मित्यादि, नैरयिकाणां विवक्षितप्रश्नसमयभाविनां सर्वेषासमुदायेन भदन्त कियन्तो वेदनासमुद्घाता अतीताः ?, भगवानाह–गौतम ! अनन्ताः, बहूनामन्तकालसंव्यवहारराशेरुद्ध त्तत्वात्, कियन्तःपुरस्कृताः ?, अत्रापि प्रश्नसूत्रपाठः परिपूर्ण एवं द्रष्टव्यः–'नेरइयाणं भंते! केवइया वेयणासमुग्घाया पुरेक्खडा' इति, भगवानाह–गौतम! अनन्ताः, बहूनामनन्तकाल-

भाविसंसारावस्थानभावात्, एवं चतुर्विंशतिदण्डकक्रमेण तावद् वक्तव्यं यावद्वैमानिकानां, यथा च वेदनासमुद्घातश्चतुर्विंशतिदण्डकक्रमेण चिन्तितः तथा कषायमरणवैक्रियतजस समुद्घाता अपि चिन्तनीयाः, तथा चाह-

'एवं जाव तेयगसमुग्घाए' एवं च सति एतान्यपि बहुत्वविषयाणि पञ्च चतुर्विंशतिदण्डकसूत्राणि भवन्ति, एतदेवाह-'एवमेएति य पंच चउव्वीसदंडगा' इति, आहारकसमुद्घातचिन्तां कुर्वन्नाह-'नेरइयाण'मित्यादि, अत्र प्रश्नसूत्रं सुगमं, भगवानाह-गौतम ! असङ्ख्येयाः, इयमत्र भावना-इह नैरयिकाः सर्वदाऽपि प्रश्नसमयभाविनः सर्वसङ्ख्ययाऽप्यसङ्ख्येयाः, तेषामपि मध्ये कतिपयाः सङ्ख्यातीताःकृतपूर्वाहारकसमुद्घातास्ततोऽसङ्ख्येया एतेनाऽनागताहारकसमुद्घाता घटन्ते, नानन्ताव नापि सङ्ख्येयाः, एवं पुरस्कृता अपि भावनीयाः, एवं चतुर्विंशतिदण्डकक्रमेण तावद्वाच्यं यावद्वैमानिकानां, आह च-

'एवं जाव वेमाणियाणं' अत्रैव यो विशेषस्तं दिदर्शयिषुराह-'नवर'मित्यादि, नवरं वनस्पतिकायिकचिन्तायां मनुष्यचिन्तायां च नैरयिकापेक्षया नानात्वमवसेयं, तदेव नानात्वमाह-'वणप्फइकाइयाण'मित्यादि, अत्र प्रश्नसूत्रं सुगमं, भगवानाह-गौतम ! अनन्ताः, अनन्तानामधिगतचतुर्दशपूर्वाणां कृताहारकसमुद्घातानां प्रमादवशतः उपचितसंसाराणां वनस्पतिषु भावात्, पुरस्कृता अनन्ताः, अनन्तानां वनस्पतिकायादुद्धृत्य चतुर्दशपूर्वाधिगमपुरस्सरं कृताहारकसमुद्घातानां भाविसिद्धिगमनभावात्,

'मणुस्साणं भंते !' इत्यादि, अत्रापि प्रश्नसूत्रं प्रतीतं, भगवानाह-गौतम ! स्यादिति निपातोऽनेकान्तद्योती, ततोऽयमर्थः-कदाचित् सङ्ख्येयाः कदाचिदसङ्ख्येयाः, कथमिति चेत्, उच्यते, इह सम्मूर्च्छिमगर्भव्युत्क्रान्तसमुदायचिन्तायां उत्कृष्टपदे मनुष्या अङ्गुलमात्रक्षेत्रे यावान् प्रदेशराशिस्तस्य यत्प्रथमं वर्गमूलं तत् तृतीयवर्गमूलेन गुणितं सत् यावत्प्रमाणं भवतिएतावत्प्रदेशप्रमाणानि खण्डानि धनीकृतस्य लोकस्य एकप्रादेशिक्यां श्रेणौ यावन्ति भवन्ति एतावत्प्रमाणा एकहीनाः, तेभ्योऽतीव शेषनारकादिजीवराश्यपेक्षया स्तोकाः, तत्रापि ये पूर्वभवेषु कृताहारकशरीरास्ते कतिपयाः, ते च कदाचित् विवक्षितप्रश्नसमये सङ्ख्येया; कदाचिदसङ्ख्येयाः, तत उक्तम्-'सिय संखेज्जा सिय असंखेज्जा' इति, अनागतेऽपि काले विवक्षितप्रश्नसमयभाविनां मध्ये कतिसङ्ख्या वाहारकशरीरमारप्स्यन्ति तेऽपि कदाचित् सङ्ख्येयाः कदाचिदसङ्ख्येयाः, तत आह-

'एवं पुरेक्खडावि'त्ति एवं अतीतगतेन प्रकारेण वनस्पतिकायिकानां मनुष्याणां च पुरस्कृता अपि आहारकसमुद्घाता वेदितव्याः, ते चैवम्-'वणप्फइकाइयाणं भंते ! केवइया आहारगसमुग्घाया पुरेक्खडा ?, गो० ! अनंता, मणुस्साणं भंते ! केवइया आहारगसमुग्घाया पुरेक्खडा ?, गो० ! सिय संखेज्जा सिय असंखेज्जा' इति, केवलिसमुद्घातविषयं प्रश्नसूत्रमाह-'नेरइयाणं भंते !' इत्यादि सुगमं, भगवानाह-गौतम ! न सन्ति केचनातीता नैरयिकाणां केवलिसमुद्घाताः, कृतकेवलिसमुद्घातानां नारकादिगमनासम्भवात्, कियन्तः पुरस्कृता इति प्रश्नः, भगवानाह-गौतम ! असंख्येयाः, सर्वदा विवक्षितप्रश्नसमयभाविनां मध्येऽसङ्ख्यातानां भाविकेवलिसमुद्घातत्वात्, तथा केवलवेदसोपलब्धेः, एवं चतुर्विंशतिदण्डकक्रमेण निरन्तरं तावद् वाच्यं यावद् वैमानिकानां सूत्रं, तथा चाह-

'एवं जाव वेमाणियाणं' अत्रैव विशेषमाह-'नवर'मित्यादि, नवरं-वनस्पतिकायिकेषु

मनुष्येषु चेदं वक्ष्यमाणलक्षणं नानात्वं, तदेववाह–'वणप्फइकाइयाण'मित्यादि, अत्र प्रश्नसूत्रं सुप्रतीतं, उत्तरसूत्रे निर्वचनं–अनन्ताः, अनन्तानां भाविकेवलिसमुद्घातानां तत्र भावात्,

'मणुस्साण'मित्यादि, अत्रापि प्रश्नसूत्रं सुगमं, भगवानाह– गौतम ! स्यात् सन्ति स्यान्न सन्ति, किमुक्तं भवति ? –यदा प्रश्नसमये समुद्घातान्निवृत्ताः प्राप्यन्ते सदा सन्ति, शेषकालं न सन्ति, तत्र 'जइ अत्थि'त्ति यदि प्रश्नसमये कृतकेवलिसमुद्घाता मनुष्यत्वमनुभवन्तः प्राप्यन्ते तदा जघन्यत एको द्वौ त्रयो वा उत्कर्षतः शतपृथक्त्वं, एतावतामेककालमुत्कृष्टपदे केवलिनां केवलिसमुद्घातासादनात् 'केवइया पुरेक्खडा'त्ति कियन्तो मनुष्याणां केवलिसमुद्घाताः पुरस्कृताः भगवानाह–स्यात् सङ्ख्येयाः स्यादसङ्ख्येया, मनुष्या हि सम्मूर्च्छिम गर्भव्युत्क्रान्ताश्च सर्वसमुदिता उत्कृष्टपदे प्रागुक्तप्रमाणास्तत्रापि विवक्षितप्रश्नसमयभाविनां मध्ये कदाचित्केवलिसमुद्घाताः सङ्ख्येयाः, बहूनामभव्यानां भावात्, कदाचित्त्वसङ्ख्येयाः, बहूनां भाविकेवलिसमुद्घातानां भावात्

सम्प्रति एकैकस्य नैरयिकत्वादिभावेषु वर्त्तमानस्य प्रत्येकं कति वेदनासमुद्घाता अतीताः कति भाविन इति निरूपयितुकाम आह–

मू. (६०३) *एगमेगस्स णं भंते ! नेरइयस्स नेरइयत्ते केवइया वेदणास० अतीता ?, गो० अनंता, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि जह० एक्को वा दो वा तिन्नि वा, उक्कोसेणं संखेज्जा वा असंखेज्जा वा अनंता वा, एवं असुरकुमारत्ते जाव वेमाणियत्ते*

एगमेगस्स णं भंते ! असुरकुमारस्स नेरइयत्ते केवइया वेदनासमुग्घाया अतीता ? गो० ! अनंता, केवइया पु० !, गो० ! कस्सइ अत्थि कस्सति नत्थि, जस्सत्थि तस्स सिय सं० सिय अ० सिय अनंता, एगमेगस्स णं भंते ! असुरकुमारस्स असुरकुमारत्ते केवइया वेदनासमुग्घाया अतीता ?, गो० ! अनंता, केवइया पु० ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि जह० एक्को वा दो वा तिन्नि वा उ० संखे० असंखे० अनंता वा, एवं नागकुमारत्तेवि जाव वेमाणियत्ते,

एवं जहा० वेयणासमुग्घातेणं असुरकुमारे नेरइयादिवेमाणियपज्जवसाणेसु भणितो तहा नागकुमारादिया अवसेसेसु सट्ठाणेसु परट्ठाणेसु भणितव्वा जाव वेमाणियस्स वेमाणियत्ते, एवमेते चउव्वीसा चउव्वीसं दंडगा भवंति ।

वृ. 'एगमेगस्स ण'मित्यादि, एकैकस्य भदन्त ! नैरयिकस्य सकलमतीतं कालमवधीकृत्य तदा तदा नैरयिकत्वे वृत्तस्य सतः सर्वसङ्ख्यया कियन्तः वेदनासमुद्घाता अतीताः ?, भगवानाह–गौतम ! अनन्ताः, नरकस्थानस्यानन्तशःप्राप्तत्वादेकैकस्मिंश्च नरकभवे जघन्यपदेऽपि सङ्ख्येययानां वेदनासमुद्घातानां भावात्, 'केवइया पुरेक्खडा'त्ति कियन्तो भदन्त ! एकैकस्य नैरयिकस्यासंसारमोक्षमनागतं कालमवधीकृत्य नैरयिकत्वे भाविनः सतः सर्वसङ्ख्यया पुरस्कृता वेदनासमुद्घाताः ?, भगवानाह–

'गौतम ! कस्सइ अत्थि'इत्यादि, तत्र य आसन्नमृत्युर्वेदनासमुद्घातमप्राप्यान्तिकमरणेन नरकादुद्वृत्य सेत्स्यति तस्य नास्ति नैरयिकत्वे भावी एकोऽपि पुरस्कृतो वेदनासमुद्घातः, शेषस्य तु सन्ति, तस्यापि जघन्यत एको द्वौ वा त्रयो वा, एतच्च क्षीणशेषायुषां तद्भवजानामनन्तरं सेत्स्यतां द्रष्टव्यं, न भूयो नरकेषूत्पत्स्यमानानां, भूयो नरकेषूत्पत्तौ जघन्यपदेऽपि सङ्ख्येयानां प्राप्यमाणत्वात्, यदाह मूलटीकाकारः–"नरकेषु जघन्यस्थितिषूत्पन्नस्य नियमतः नियमतः सङ्ख्येया एव वेदनासमुद्घाता भवन्ति,

वेदनासमुद्घातप्रचुरत्वान्नारकाणा''मिति, उत्कर्षतः सङ्ख्येया असङ्ख्येया वा अनन्ता वा, तत्र सकृत नरकेषु जघन्यस्थितिषूत्पत्स्यमानस्य सङ्ख्येयाः अनेकशो दीर्घस्थितिषु असकृद्वा उत्पत्स्यमानस्य असङ्ख्येयायः अनन्तशः उत्पत्स्यमानस्य अनन्ताः, 'एव'मित्यादि, एवं नैरयिकगतेनभिलापप्रकारेणासुरकुमारत्वेन तदनन्तरं चतुर्विंशतिदण्डकक्रमेण निरन्तरं तावद्वाच्यं यावद्वैमानिकत्वे, तद्यथैवम्-'एगमेगस्स णं भंते! नेरइयस्स असुरकुमाराओ केवइया वेदनासमुग्घाया अतीता?, गो० ! अनंता, केवइया पुरेक्खडा?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं संखेज्जा वा असंखेज्जा वा अनंता वा' तत्रातीतसूत्रेऽनन्तशोऽसुरकुमारत्वस्य प्राप्तत्वादुपपद्यते तद्भवमापन्नस्यानन्ता अतीता वेदनासमुद्घाताः, पुरस्कृतचिन्तायां योऽनन्तरभवेन नरकाद्वृत्तो मानुष्यं प्राप्य सेत्स्यति प्राप्तो वा परम्परया सकृत्सुकुमारभवं न वेदनासमुद्घातं गमिष्यति तस्य नास्त्येकोऽपि पुरस्कृतो असुरकुमारत्वे वेदनासमुद्घातः, यस्तु सकृदसुरकुमारत्वं प्राप्तः सन् सकृदेव वेदनासमुद्घातां गन्ता तस्य जघन्यत एको द्वौ वा त्रयो वा, शेषस्य सङ्ख्येयान वारान् असुरकुमारत्वं यास्यतः सङ्ख्येया असङ्ख्येयान् वारान् असङ्ख्येया अनन्तान् वारान् अनन्ताः, एवं चतुर्विंशतिदण्डकक्रमेण नागकुमारत्वादिषु स्थानेषु निरन्तरं सूत्रपाठस्तावद् वक्तव्यो यावद्वैमानिकत्वविषयं सूत्रं,

'एगमेगस्स ण'मित्यादि, एकैकस्य भदन्त ! असुरकुमारस्य पूर्वं नैरयिकत्वेन वृत्तस्य सतः सकलमतीतं कालमपेक्ष्य सर्वसङ्ख्यया कियन्तो वेदनासमुद्घाता अतीताः?, भगवानाह-गौतम ! अनन्ता अतीताः, अनन्तशो नैरयिकत्वस्य प्राप्तत्वात्, एवं पुरस्कृतेऽपि नैरयिकत्वे जघन्यपदेऽपि सङ्ख्येयानां वेदनासमुद्घातानां भावात्, कियन्तः पुरस्कृताः?, स्यात् सन्ति स्यान्न सन्ति, कस्यचित्सन्ति कस्यचिन्न सन्ति इति भावः, अत्रापीयं भावना-योऽसुरकुमारभवादुद्वृत्तो न नरकं यास्यति किन्त्वनन्तरं परम्परया वा मनुजभवं प्राप्य सेत्स्यति तस्य नरयिकत्वास्थाभाविनः पुरस्कृता वेदनासमुद्घाता न सन्ति, नैरयिकत्वावस्थाया एवासम्भवात्, यस्तुतद्भवादूर्ध्वं पारम्पर्येण नरकं गमिष्यति तस्य सन्ति, तत्रापि कस्यचित्सङ्ख्येयाः कस्यचिदसङ्ख्येया; कस्यचिदनन्ताः, तत्र यः सकृज्जघन्यस्थितिषु मध्ये समुत्पत्स्यते तस्य जघन्यपदेऽपि सङ्ख्येयाः, सर्वजघन्यस्थितावपि नरकेषु सङ्ख्येयानां वेदनासमुद्घातानां भावात्, वेदनाबहुलत्वान्नारकाणां, असकृद् जघन्यस्थितिषु दीर्घस्थितिषु सकृदसकृद्वा गमने असङ्ख्येयाः, अनन्तशो नरकगमने अनन्ताः,

तथा एकैकस्य भदन्त! असुरकुमारस्यासुरकुमारत्वे स्थितस्य सतः सकलमतीकालमधिकृत्य कियन्तो वेदनासमुद्घाता अतीताः?, भगवानाह-गौतम! अनन्ताः, पूर्वमप्यनन्तशस्तद्भावस्य प्राप्तत्वात्, प्रतिभवं च वेदनासमद्घातस्य प्रायो भावात्, पुरस्कृतचिन्तायां कस्यचित् सन्ति कस्यचिन्न सन्ति, यस्य प्रश्नसमयादूर्ध्वसुरकुमारत्वेऽपि वर्त्तमानस्य न भावी वेदनासमुद्घातो नापि ततउद्वृत्त्य भूयोऽप्यसुरकुमारत्वं प्राप्यस्ति तस्य न सन्ति, यस्तु सकृत् प्राप्स्यति तस्य जघन्यपदे एको द्वौ वा त्रयो वा उत्कर्षतः सङ्ख्येया असङ्ख्येया अनन्ता वा, सङ्ख्येयान् वारान् उत्पत्स्यमानस्य सङ्ख्येयाः असङ्ख्येयान् वारान् असङ्ख्येयाः अनन्तान् वारान् अनन्ताः, एवं चतुर्विंशतिदण्डकक्रमेण नागकुमारत्वादिषु स्वस्थानेष्वसुरकुमारस्य निरन्तरं तावद्वक्तव्यं यावद्वैमानिकत्वे, तथा चाह-

'एवं नागकुमारत्तेवि' इत्यादि, तदेवमसुरकुमाराणां वेदनासमुद्घातश्चिन्तितः, सम्प्रति नागकुमारादिष्वतिदेशमाह-'एव'मित्यादि, उपदर्शिताभिलापेन यथा चतुर्विंशतिदण्डकक्रमेण

असुरो नैरयिकादिषु वैमानिकपर्यवसानेषु भणितस्तथा नागकुमारादयोऽवशेषेषु समस्तेषु स्वस्थानपरस्थानेषु भणितव्या यावद्वैमानिकस्य वैमानिकत्वे, एवं चैतानि नैरयिक चतुर्विंशतिदण्डकसूत्रादीनि वैमानिकचतुर्विंशतिदण्डकसूत्रपर्यवसानानि चतुर्विंशतिः सूत्राणि भवन्ति, तदेवं चतुर्विंशत्या चतुर्विंशतिदण्डकसूत्रैर्वेदनासमुद्घातश्चिन्तितः, सम्प्रति चतुर्विंशत्यैव चतुर्विंशतिदण्डकसूत्रैः कषायसमुद्घातं चिचिन्तयिषुरिदमाह–

मू. (६०४) *एगमेगस्स णं भंते ! नेरइयस्स नेरइयत्ते केवइया कसायसमुग्घाया अतीता गो० ! अनंता, केवइया पु० ? गो० ! क० अत्थि क० नत्थि, जस्सत्थि एगुत्तरियाते जाव अनंता*

एगमेगस्स णं भंते ! नेरइयस्स असुरकुमारत्ते केवइया कसायमुग्घाया अतीता ?, गोयमा अनंता, केवइया पु० ?, गो० ! कस्सति अत्थि कस्सति नत्थि, जस्सत्थि सिय संखेज्जा सिय असंखेज्जा सिय अनंता, एवं जाव नेरइयस्स थणियकुमारत्ते, पुढविकाइयत्ते एगुत्तरियाए नेतव्वं, एवं जाव मणुयत्ते, वाणमंतरत्ते जहा असुरकुमारत्ते,

जोइसियत्ते अतीता अनंता, पुरेक्खडा कस्सति अत्थि कस्सति नत्थि, जस्सत्थि सिय असंखेज्जा सिय अनंता, एवं वेमाणियत्तेवि सिय असंखेज्जा सिय अनंता, असुरकुमारस्स नेरइयत्ते अतीता अनंता, पुरेक्खडा कस्सति अत्थि कस्सति नत्थि, जस्सत्थि सिय संखेज्जा सिय असंखेज्जा सिय अनंता,

असुरकुमारस्स असुरकुमारत्ते अतीता अनंता पुरेक्खडा एगुत्तरिया, एवं नागकुमारत्ते जाव निरंतरं वेमाणियत्ते जहा नेरइयस्स भणितं तहेव भाणितव्वं, एवं जाव थणियकुमारस्सवि वेमाणियत्ते, नवरं सव्वेसिं सट्ठाणे एगुत्तरियाए परट्ठाणे जहेव असुरकुमारस्स, पुढविकाइयस्स नेरइयत्ते जाव थणियकुमारत्ते अतीता अनंता, पुरेक्खडा कस्सति अत्थि कस्सति नत्थि, जस्सत्थि सिय संखेज्जा सिय असंखेज्जा सिय अनंता,

पुढविकाइयस्स पुढविकाइयत्ते जाव मणूसत्ते अतीता अनंते पुरे० क० अत्थि क० नत्थि जस्स अत्थि एगुत्तरिया, वाणमंतरत्ते जहा नेरइयत्ते, जोतिसियवेमाणियत्ते अतीता अनंता, पुरेक्खडा कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि सिय असंखेज्जा सिय अनंता, एवं जाव मणूसत्तेवि नेयव्वं, वाणमंतरजोइसियवेमाणिया जहा असुरकुमारा, नवरं सट्ठाणे एगुत्तरियाए भाणितव्वे जाव वेमाणियस्स वेमाणियत्ते, एवं एते चउव्वीसं चउवीसा दंडगा, ।

वृ. 'एगमेगस्स ण'मित्यादि, तत्र नैरयिकस्य नैरयिकत्वविषयं प्रश्नसूत्रं सुगमं, पुरस्कृतचिन्तायां तु कस्यचित् सन्ति कस्यचिन्न सन्ति, तत्र यः क्षीणशेषायुः प्रश्नसमये भवपर्यन्ते वर्त्तमानः कषायसमुद्घातमप्राप्त एव नरकभावदुद्वृ त्त्यानन्तरं पारम्पर्येण वा सेत्स्यति न भूयो नरकवासगामी तस्य न सन्ति पुरस्कृता नैरयिकत्वे कषायसमुद्घाताः, शेषस्य तु सन्ति, तस्यापि जघन्यत एको द्वौ वा त्रयो वा, ते च क्षीणायुःशेषाणां तद्भावभाजामवसेयाः, उत्कर्षतः सङ्ख्येया असङ्ख्येया वा अनन्ता वा, तत्र सङ्ख्येयवर्षायुःशेषाणां सङ्ख्येयाः असङ्ख्येयवर्षायुःशेषाणामसङ्ख्येयाःस यदिवा सकृत् जघन्यस्थितौ उत्पत्स्यमानानां सङ्ख्येयाः असकृत् जघन्यस्थितौ सकृदसकृद्दीर्घस्थितावुत्पत्स्यमानानामसङ्ख्येयाः अनन्तश उत्पत्स्यमानानामनन्ताः,

तथा नैरयिकस्येवासुरकुमारत्वविषयेऽतीतसूत्रं, तथैव पुरस्कृतसूत्रे 'कस्सइ अत्थि कस्सइ नत्थि'त्ति यो नरकादुद्वृ त्तोऽसुरकुमारत्वं न प्राप्स्यति तस्य न सन्ति पुरस्कृता असुरकुमारत्वविषयाः

कषायसमुद्घाताः, यस्तु प्राप्स्यति तस्य सन्ति, ते च जघन्यपदे सङ्ख्येया जघन्यस्थितावप्यसुरकुमाराणां सङ्ख्येयानां कषायसमुद्घातानां भावात्, लोभादिकषायबहुलत्वात् तेषां, उत्कृष्टदेऽसङ्ख्येया अनन्ता वा, तत्र सकृददीर्घस्थितावसकृज्जघन्यस्थितिषु वा उत्पत्स्यमानानामसङ्ख्येयाः, अनन्तश्च उत्पत्स्यमानानामनन्ताः, एवं नैरयिकस्य नागकुमारत्वादिषु स्थानेषु निरन्तरं तावद्वक्तव्यं यावत् स्तनितकुमारत्वे, तथा चाह–

'एवं जावे'त्यादि, पृथिवीकायिकत्वेऽतीतसूत्रं तथैव, पुरस्कृतचिन्तायां तु कस्यचित् सन्ति कस्यचिन्न सन्ति, तत् यो नरकादुद्वृत्तो न पृथिवीकायभवं गमी तस्य न सन्ति, योऽपि गन्ता तस्यापि जघन्यपदे एको द्वौ वा त्रयो वा उत्कर्षतः सङ्ख्येया असङ्ख्येया वा अनन्ता वा, ते चैवं–तिर्यक्पञ्चेन्द्रियभवनान्मनुष्यभवाद्देवभवाद्वा कषायसमुद्घातसमुद्धतः सन् य एकवारं पृथिवीकायिकेषु गन्ता तस्य एको द्वौ वारौ गन्तुर्द्वौ त्रीन् वारान् त्रयः सङ्ख्येयान वारान् सङ्ख्येया असङ्ख्येयान् वारान् असङ्ख्येयाय अनन्तान् वारान् अनन्ताः,तथा चाह–

'पुढविकाइयत्ते एगुत्तरियाए नेयव्वं'ति तथा 'एवं ताव मणूसत्ते' इति एवं पृथिवीकायिकगतेनाभिलापप्रकारेण तावद् वक्तव्यं यावन्मनुष्यत्वे, तच्चैवम्–'एगमेगस्स णं भंते! नेरइयस्स आउकाइयत्ते केवइया कसायसमुग्घाया अईया ?, गोयमा ! अनंता, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि जहण्णेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं संखेज्जा वा असंखेज्जा वा अनंता वा' एवं यान्मनुष्यसूत्रं, तत्राप्याकायादिवनस्पतिपर्यन्तसूत्रभावना पृथिवीकायसूत्रवत्, द्वीन्द्रियसूत्रे पुरस्कृतचिन्तायां जघन्येन एको द्वौ वा त्रयो वेति सकृत् जघन्यस्थितिकं द्वीन्द्रियभवं प्राप्तुकामस्य, सङ्ख्येयान् वारान् प्राप्तुकामस्य सङ्ख्येया असङ्ख्येयानसङ्ख्येया अनन्तान् अनन्ताः, एवं त्रीन्द्रियचतुरिन्द्रियसूत्रे अपि भावनीये,

तिर्यक्पञ्चेन्द्रियमनुष्यसूत्रविषया त्वेवं भावना–सकृत्पञ्चेन्द्रियभवं प्राप्तुकामस्य स्वभावत एवाल्पकषायस्य जघन्यत एको द्वौ त्रयो वा शेषस्य सङ्ख्येयान वारान् तिर्यक्पञ्चेन्द्रियभवं प्राप्तुकामस्य सङ्ख्येया असङ्ख्येयान् वारान् असङ्ख्येया अनन्तान् वारान् अनन्ताः, मनुष्यसूत्रे तु पुरस्कृतविषया भावनैवं–यो नरकभावादुद्वृत्तोऽल्पकषायः सन् मुष्यभवं प्राप्य कषायसमुद्घातमप्राप्त एव सिद्धिपुरं गन्ता तस्य न सन्ति, शेषस्य सन्ति, तस्यापि एकं द्वौ त्रीन् वारान् कषायसमुद्घातान् प्राप्य सेत्स्यत एको द्वौ त्रयो वा सङ्ख्येयान् भवान् यदिवा एकस्मिन्नपि भवे सङ्ख्येयान् कषायसमुद्घातान् गन्तुः सङ्ख्येया असङ्ख्येयान् भवान् प्राप्तुकामस्यासङ्ख्येयाः अनन्तान् अनन्ताः,

'वाणमंतरत्ते जहा असुरकुमारत्ते' प्रागुक्तं, किमुक्तं भवति ? –पुरस्कृतचिन्तायां एवं वक्तव्यं–'जस्सत्थि सिय संखेज्जा सिय असंखेज्जा सिय अनंता वा' इति न त्वेकोत्तरिका वक्तव्याः, व्यन्तराणामप्यसुरकुमाराणामिव जघन्यस्थितावपि सङ्ख्येयानां कषायसमुद्घातानां लभ्यमानत्वात्, असङ्ख्येयानन्तभावनाप्यसुरकुमारवत्,

'जोइसियत्ते'इत्यादि, ज्योतिष्कत्वेऽतीता अनन्ता वक्तव्याः, पुरस्कृतास्तु कस्यापि सन्ति कस्यापि न सन्ति, एतदपि प्राग्वद् भावनीय, यस्यापि सन्ति तस्यापि कस्यचिदसङ्ख्येयाः कस्यचिदनन्ताः, न तु स्यात् सङ्ख्येया इति वक्तव्यं, कुत इति चेत् ?, उच्यते, ज्योतिष्काणां जघन्यपदेऽप्यसङ्ख्येयकालायुष्कतया जघन्यतोऽपि असङ्ख्येयानां कषायसमुद्घातानां लभ्यमानत्वात्, अनन्तश्चास्तत्र जिगमिषूणामनन्ताः, एवं वैमानिकत्वेऽपि पुरस्कृतचिन्तायां स्यादसङ्ख्येयाः

स्यादनन्ता इति वक्तव्यं, भावना प्राग्वत् ।

तदेवं नैरयिकस्य स्वस्थाने परस्थाने च कषायसमुद्घाताश्चिन्तिताः सम्प्रत्यसुरकुमारेषु तान् चिचिन्तयिषुराह–'एगमेगस्स ण'मित्यादि, एकैकस्य असुरकुमारस्य नैरयिकत्वे कषायसमुद्घाता अतीता अनन्ताः, भावनिः''कस्यचित्सन्ति कस्यचिन्न सन्ति, तत्र योऽसुरकुमारभवादुद्वृत्तो नरकं न यास्तति तस्य न सन्ति, यस्तु यास्यति तस्य सन्ति, तस्यापि जघन्यतः सङ्ख्येयाः, जघन्यस्थितावपि सङ्ख्येयानां कषायसमुद्घातानां नरकेषु भावात्, उत्कर्षतोऽसङ्ख्येया अनन्ता वा, तत्र जघन्यस्थितिष्वसकृद्दीर्घस्थितिषु सकृदसकृद्वा जिगमिषोरसङ्ख्येया अनन्तशो जिगमिषोरनन्ताः, असुरकुमारस्यासुरकुमारत्वे अतीता अनन्ताः, 'पुरेक्खडा एगुत्तरिया' इत्यादि, पुरस्कृतास्तु कस्यापि सन्ति कस्यापि न सन्ति, तत्र योऽसुरकुमारभवे पर्यन्तवर्ती न च कषायसमुद्घातं यातो नापि तत्र प्रभ्रष्टो भूयोऽसुरकुमारभवं लब्ध्वा किन्त्वनन्तरं पारम्पर्येण वा सेत्स्यति तस्य सन्ति, शेषस्य तु न सन्ति, यस्यापि सन्ति तस्यापि जघन्यत एको द्वौ वा त्रयो वा उत्कर्षतःसङ्ख्येया असङ्ख्येया अनन्ता वा, तत्र एकादयः क्षीणायुःशेषाणां तद्भव भाजां भूयस्तत्रैवानुत्पत्स्यमानानामवगन्तव्याः, सङ्ख्येयादयो नैरयिकत्वे इव भावनीयाः,

'एव'मित्यादि, एवं–उक्तेन प्रकारेण नागकुमारत्वे तत ऊर्ध्वं चतुर्विंशतिदण्डकक्रमेण निरन्तरं यावद्वैमानिकत्वे–वैमानिकत्वविषयं सूत्रं, यथा नैरयिकस्य भणितं तथैव भणितव्यं, किमुक्तं भवति ?–नागकुमारत्वादिषु स्तनितकुमारपर्यवसानेषु पुरस्कृतचिन्तायां 'कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं संखेज्जा वा असंखेज्जा वा अनंता वा' पृथिवीकायिकत्वादिषु मनुष्यत्वपर्यवसानेषु 'जस्स अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं संखेज्जा वा असंखेज्जा वा अनंता वा' व्यन्तरत्वे 'जस्स अत्थि सिय संखेज्जा सिय असंखेज्जा सिय अनंता' ज्योतिष्कत्वे 'जस्स अत्थि सिय असंखेज्जा सिय अनंता' वैमानिकत्वेऽप्येवमेवेति वक्तव्यमिति,

'एवं जावे'त्यादि, एवं–उक्तेन प्रकारेण असुरकुमारवन्नागकुमारस्य यावत् स्तनितकुमारस्य प्रत्येकं यावद् वैमानिकत्वे–वैमानिकत्वविषयं सूत्रं तावद्वक्तव्यं, अत्रैव विशेषमाह–नवरं सर्वेषां नागकुमारादीनां स्तनितकुमारपर्यवसानानां स्वस्थाने नियमतः पुरस्कृता एकोत्तरिकाः, परस्थाने यथैवासुरकुमारस्य तथैव वक्तव्याः,

'पुढविकाइयस्स नेरइयत्ते'इत्यादि, पृथिवीकायिकस्य नैरयिकत्वे यावत् स्तनितकुमारत्वे अतीता अनन्ताः, अत्र भावना प्रागिव, पुरस्कृताः कस्यापि सन्ति कस्यापि न सन्ति, तत्र यः पृथिवीकायभवादुद्वृत्तो नरकेष्वसुरकुमारेषु यावत् स्तनितकुमारेषु न गमिष्यति किन्तु मनुष्यभवं प्राप्य सिद्धिं गन्ता तस्य न सन्ति, शेषस्य तु सन्ति, यस्यापि सन्ति तस्यापि जघन्यतः सङ्ख्येयाः, जघन्यस्थितावपि नरकादिषु सङ्ख्येयानां कषायसमुद्घातानां भावात्, उत्कर्षतोऽसङ्ख्येया अनन्ता वा, ते च प्राग्वद् भावयितव्याः, पृथिवीकायिकत्वे यावन्मनुष्यत्वेऽतीतास्ते तथैव, भाविन एकोत्तरिकया वक्तव्याः, ते चैवम्–'कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि जहन्नेणं एक्को वा दो वा तिण्णि वा उक्कोसेणं संखेज्जा वा असंखेज्जा वा अनंता वा' ते च नैरयिकस्य पृथिवीकायिकत्व इव भावनीयाः,

'वाणमंतरत्ते जहा नेरइयत्ते' इति व्यन्तरत्वे यथा नैरयिकत्वे तथा वक्तव्यं, किमुक्तं भवति ?–एकोत्तरिका न वक्तव्याः, किन्तु 'सिय संखेज्जा सिय असंखेज्जा सिय अनंता' इति

वक्तव्यं, 'जोइसिय' इत्यादि, ज्योतिष्कत्वे वैमानिकत्वे चातीतास्तथैव, पुरस्कृता यदि सन्ति ततो जघन्यपदे असङ्ख्येयाः उत्कृष्टपदे अनन्ताः, एवमप्कायिकस्य यावन्मनुष्यत्वे नेतव्यं, परस्थाने यथा असुरकुमारस्य सूत्र, सूत्रपर्यन्तं दर्शयति-'जाव वेमाणियस्स वेमाणियत्ते' इति यावद्वैमानिकस्य वैमानिकत्वे -वैमानिकत्वविषयं सूत्रं, एतावता कषायसमुद्घातगताश्चतुर्विंशतिः-चतुर्विंशति-सङ्ख्याश्चतुर्विंशतिदण्डकाः भणितव्याः २४ ।

तदेवमुक्तश्चतुर्विंशत्या चतुर्विंशतिदण्डकसूत्रैः कषायसमुद्घातः, सम्प्रति चतुर्विंशत्यैव चतुर्विंशतिदण्डकसूत्रैर्मारणान्तिकसमुद्घातमाह-

मू. (६०५) *मारणंतियसमुग्घातो सट्ठाणेवि परट्ठाणेवि एगुत्तरियाए नेयव्वो जाव वेमाणियस्स वेमाणियत्ते, एवमेते चउवीसं चउवीसदंडगा भाणियव्वा वेउव्वियसमुग्घातो जहा कसायस० तहा निरवसेसो भाणितव्वो, नवरं जस्स नत्थि तस्स न वुच्चति, एत्थवि चउवीसं चउवीसा दंडगा भाणियव्वा । तेयगसमु० जहा मारणंतियस०, नवरं जस्सऽत्थि, एवं एतेवि चउव्वीसं चउव्वीसा दंडगा भाणितव्वा ।*

एगमेगस्स णं भंते ! नेरइयस्स नेरइयत्ते केवइया आहारसमुग्घाया अतीता ?, गो० ! नत्थि, केवइया पु० ?, गो० ! नत्थि, एवं जाव वेमाणियत्ते, नवरं मणूसत्ते अतीता कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि जह० एक्को वा दो वा उ० तिन्नि, केवइया पु० ?, गो० ! कस्सति अत्थि क० नत्थि, जस्सत्थि जह० एक्को वा दो वा तिन्नि वा उ० चत्तारि, एवं सव्वजीवाणं मणुस्साणं भाणियव्वं, मणूसस्स मणूसत्ते अतीता कस्सति अत्थि कस्सति नत्थि, जस्सत्थि जह० एक्को वा दो वा तिन्नि वा उ० चत्तारि, एवं पुरेक्खडावि, एवमेते चउवीसं चउवीसा दंडगा जाव वेमाणियत्ते

एगमेगस्स णं भंते ! नेरइयस्स नेरइयत्ते के० केवलिसमुग्घाया अतीता ?, गो० ! नत्थि, केवइया पुरेक्खडा ?, गो० ! नत्थि, एवं जाव वेमाणियत्ते, नवरं मणूसत्ते अतीता नत्थि, पुरेक्खडा क० अत्थि क० नत्थि, जस्सत्थि इक्को, मणूसस्स मणूसत्ते अतीता कस्सति अत्थि क० नत्थि, जस्सत्थि एक्को, एवं पुरेक्खडावि, एवमेते चउव्वीसं चउव्वीसा दंडगा

वृ. 'मारणंतिए'त्ति मारणान्तिकसमुद्घातः पुरस्कृतचिन्तायां स्वस्थाने परस्थाने वा एकोत्तरिकया नेतव्यो यावद्वैमानिकस्य वैमानिकत्वे-वैमानिकत्वविषयं सूत्रं, तच्चैवम्-

'एगमेगस्स णं भंते! नेरइयस्स नेरयत्ते केवइया मारणंतियसमुग्घाया अतीता ?, गोयमा अनंता, केवइया पुरेक्खडा ?, गोयमा ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं संखेज्जा वा असंखेज्जा वा अनंता वा' तत्र यो मारणान्तिकसमुद्घातमन्तरेण कालं कृत्वा नरकादुद्वृत्तः अनन्तरं पारम्पर्येण वा मनुष्यभवं प्राप्य सेत्स्यति न भूयो नरकगामी तस्य न सन्ति पुरस्कृता मारणान्तिकसमुद्घाताः, यः पुनस्तद्भवे वर्त्तमानो मारणान्तिकसमुद्घातेन कालं कृत्वा नरकादुद्वृत्तःसेत्स्यति तस्यैकः पुरस्कृतो मारणान्तिकसमुद्घातो, यः पुनर्भूयोऽपि नरकमागत्य सर्वसङ्ख्यया द्वौ मारणान्तिकसमुद्घातौ गन्ता तस्य द्वौ, एवं त्रिप्रभृतयोऽपि भावनीयाः, सङ्ख्येयान् वारान् नरकमागन्तुः सङ्ख्येयाः असङ्ख्येयान् वारान् असङ्ख्येयाः अनन्तान् वारान् अनन्ताः एवमसुरकुमारत्वे आलापको वाच्यः, नवरमत्रैवं भावनायो नरकादुद्वृत्तो मनुष्यभवं प्राप्य सेत्स्यति यदिवा तस्मिन् भवे मारणान्तिकसमुद्घातमगत्वा मृत्युमासाद्य ततोऽयभवे सिद्धिगन्ता तस्यैव न सन्ति, शेषस्य त्वेकादिभावना प्रागिव व्यन्तरज्योतिष्कवैमानिकेषु यथा नैरयिकस्य,

नैरयिकादिषु चतुर्विंशतिस्थानेषु चिन्ता कृता तथाऽसुरकुमारादीनां वैमानिकपर्यवसानानां चतुर्विंशतिदण्डकक्रमेण कर्त्तव्या, तदेवमन्यान्यपि चतुर्विंशतिर्दण्डकसूत्राणि भवन्ति, तथा चाह–

'एवं एए चउवीसं चउवीसा दंडगा भाणियव्वा' इति, उक्तो मारणान्तिकसमुद्घातश्चतुर्विंशत्या चतुर्विंशतिदण्डकसूत्रैः, साम्प्रतमेतावत्सङ्ख्यायामेकैव सूत्रैर्वैक्रियसमुद्घातं विवक्षुराह–

'वेउव्विए' इत्यादि, वैक्रियसमुद्घातो यथा कषायसमुद्घातः प्राक् प्रतिपादितः तथा निरवशेषो भणितव्यः, केवलं यस्य वैक्रियसमुद्घातो नास्ति वैक्रियलब्धेरेवासम्भवात् तस्य नोच्यते, शेषस्य उच्यते, स चैवं–

'एगमेगस्स णं भंते ! नेरइयस्स नेरइयत्ते केवइया वेउव्वियसमुग्घाया अतीता ?, गो० ! अनंता, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं सिय संखेज्जा वा सिय असंखेज्जा वा सिय अनंता वा। एगमेगस्स णं भंते नेरइयस्स असुरकुमारत्ते केवइया वेउव्वियसमुग्घाया अतीता ?, गो० ! अनंता, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि सिय संखिज्जा सिय असंखिज्जा सिय अनंता वा, एवं नेरइयस्स जाव थणियकुमारत्ते।

एगमेगस्स णं भंते ! नेरइयस्स पुढविकाइयत्ते केवइया वेउव्वियसमुग्घाया अतीता ?, गो० ! नत्थि, केवइया पुरेक्खडा ?, गो० ! नत्थि, एवं जाव तेउक्काइयत्ते, एगमेगस्स णं भंते ! नेरइयस्स वाउकाइयत्ते केवइया वेउव्वियसमुग्घाया अतीता ?, गो० !, अनंता, केवइया पुरेक्खडा गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्को० संखेज्जा वा असं० अनंता वा, वणस्सइकाइयत्ते जाव चउरिंदियत्ते जहा पुढविकाइत्ते, तिरिक्खपंचिंदियत्ते मणुस्सत्ते जहा वाउकाइयत्ते, वाणमंतरजोइसियवेमाणियत्तेसु जहा असुरकुमारत्ते' इह यत्र वैक्रियमसमुद्घातसम्भवस्तत्र भावना कषायसमुद्घातवद् भावनीया, अन्यत्र तु प्रतिषेधः सुप्रतीतो, वैक्रियलब्धिरेवासम्भवात्,

यथा च नैरयिकस्य चतुर्विंशदण्डकक्रमेण सूत्रमुपदर्शितमेवमसुरकुमारादीनामपि चतुर्विंशतिदण्डकक्रमेण प्रत्येकं सूत्रमवगन्तव्यं, नवरमसुरकुमारादिषु स्तनितकुमारपर्यवसानेषु व्यन्तरादिषु च परस्परं स्वस्थाने एकोत्तरिका परस्थाने सङ्ख्येयादयो वक्तव्याः, वायुकायिकतिर्यक्पञ्चेन्द्रियमनुष्येषु तु परस्परं स्वस्थाने परस्थानवा एकोत्तरिकाः, शेषं तथैव, एवमेतान्यपि चतुर्विंशतिश्चतुर्विंशतिदण्डकसूत्राणि भवन्ति, तथा चाह–'एवमेते चउवीसं चउवीसगा दंडगा भाणितव्वा'

एवं–उपदर्शितेन प्रकारेण अत्रापि–वैक्रियसमुद्घातविषयेऽपि चतुर्विंशतिः–चतुर्विंशतिसङ्ख्ययाः 'चउवीसा' इति चतुर्विंशतिः–चतुर्विंशतिस्थानपरिमाणा दंडका–दण्डकसूत्राणि भणितव्यः। सम्प्रति तैजसमुद्घातमतिदेशत आह–'तेयगे' त्यादि, तैजसमुद्घातो यथा मारणान्तिकसमुद्घातस्तथा वक्तव्यः, किमुक्तं भवति ? –स्वस्थाने परस्थाने च एकोत्तरिकया स वक्तव्या इति, नवरंयस्य नास्ति–न सम्भवति तैजसमुद्घातस्तस्य न वक्तव्यः, तत्र नैरयिकपृथिव्यप्तेजोवायुवनस्पतिद्वित्रिचतुरिन्द्रियेषु न सम्भवतीति न वक्तव्यः, शेषेषु तु वक्तव्यः, स चैवम्–

'एगमेगस्स णं भंते ! नेरइयस्स नेरइयत्ते केवइया तेउसमुग्घाया अतीता ?, गो० !

नत्थि, केवइया पुरेक्खडा ?, गो० ! नत्थि, एगमेगस्स णं भंते ! नेरइयस्स असुरकुमारत्ते केवइया तेयगसमुग्घाया अतीता ?, गो० ! अनंता, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं संखेज्जा वा असंखेज्जा वा अनंता वा' इत्यादि सूत्रोक्तं विशेषमुपजीव्य स्वयं परि भावनीयं, अत्रापि सूत्रसङ्ख्यामाह–'एव'मित्यादि, एवं–मारणान्तिकसमुद्घातगतेन क्वचित् सर्वथा निषेधरूपेण च प्रकारेण एतेऽपि–तैजसमुद्घातगता अपि चतुर्विंशतिः चतुर्विंशतिका–दण्डका भणितव्याः । सम्प्रत्याहारकसमुद्घातं चिन्तयन्नाह–'एगमेगस्स ण'मित्यादि, इह सर्वेष्वपि स्थानेषु मनुष्यत्वचिन्तायामतीता जघन्यत एको द्वौ वा उत्कर्षतस्त्रयश्च, पुरस्कृता जघन्यत एको वा द्वौ वा त्रयो वा उत्कर्षतश्चत्वारः, शेषेषु स्थानेषु अतीताः पुरस्कृताश्च प्रतिषेद्धव्याः मनुष्य स्य मनुष्यत्वचिन्तायामतीताः पुरस्कृताश्च जघन्यत एको वा द्वौ वा त्रयो वा उत्कर्षतश्चत्वारः,अत्रार्थे च कारणं प्रागेवोक्तं, अत्रापि सूत्रसङ्ख्यामाह–

'एव'मित्यादि, एवम्–उपदर्शितेन प्रकारेण एते आहारकमुद्घातविषयाश्चतुर्विंशतिसङ्ख्याकाः दण्डका वक्तव्याः, कियद्दूरं यावदित्याह–यावद्वैमानिकस्य वैमानिकत्वे–वैमानिकत्वविषयं सूत्रं, तद्यथैवम्–'एगमेगस्स णं भंते ! वेमाणियस्स वेमाणियत्ते केवइया आहारगसमुग्घाया अतीता ?, गो० ! नत्थि, केवइया पुरेक्खडा ?, गो० ! नत्थि' इति । अधुना केवलिसमुद्घातमभिधित्सुराह–'एगमेगस्स णं भंते !इत्यादि, अत्राप्ययं तात्पर्यार्थः–सर्वेष्वपि स्थानेषु मनुष्यत्वचिन्ताव्यतिरेकेणातीताः पुरस्कृताश्च प्रतिषेद्धव्याः, मनुष्यवर्जेषु मनुष्यत्वचिन्तायामतीताः प्रतिषेद्धव्याः, पुरस्कृतस्तु कस्याप्यस्ति कस्यापि नास्ति, यस्याप्यस्ति तस्याप्येक एवेति वक्तव्यः, मनुष्यस्य मनुष्यत्वचिन्तायामतीतः कस्यापि अस्ति कस्यापि नास्ति, यस्याप्यस्ति तस्याप्येक एव, एतच्च प्रश्नसमये केवलिसमुद्घातादुत्तीर्णं केवलिनमधिकृत्य, पुरस्कृतोऽपि कस्यापि अस्ति कस्यापि नास्ति, यस्याप्यस्ति तस्याप्येक इति वक्तव्यं, अत्रापि सूत्रसङ्ख्यायमाह–

'एव'मित्यादि एवम्–उपदर्शितेन प्रकारेण एते केवलिसमुद्घातविषयाश्चतुर्विंशतिश्चतुरिवंशतिसङ्ख्याका दण्डका भवन्ति, तदेवं सर्वसङ्ख्यया एकत्वविषयाणां चतुर्विंशतिदण्डकसूत्राणामष्टषष्ट्यधिकं शतं जातं, एतावत्सङ्ख्याकान्येव बहुत्वविषयाण्यपि सूत्राणि भवन्ति, तानुपदिदर्शयिषुराह–

मू. (६०६) *नेरइयाणं भंते ! नेरइयत्ते० के० वेदनास० अतीता ?, गो० ! अनंता, के० पुरे० ?, गो० ! अनंता, एवं जाव वेमाणियत्ते, एवं सव्वजीवाणं भाणितव्वं जाव वेमाणियाणं वेमाणियत्ते, एवं जाव तेयगस० नवरं उववज्जिऊण नेयव्वं जस्सत्थि वेउव्वियतेयगा ।*

नेरइयाणं भंते ! नेरइयत्ते केवतिता आहारगस० अतीता ?, गो० ! नत्थि, केवतिता पु० गो० ! नत्थि एवं जाव वेमाणियत्ते, नवरं मणूसत्ते अतीता असं० पुरेक्खडा असंखेज्जा एवं जाव वेमाणियाणं, नवरं वणस्सइकाइयाणं मणूसत्ते अतीता अनंता पुरेक्खडा अनंता, मणूसाणं मणूसत्ते अतीता सिय संखेज्जा सिय असंखेज्जा, एवं पुरेक्खडावि, सेसा सव्वे जहा नेरइया, एवं एते चउवीसं चउवीसा दंडगा ।

नेरइयाणं भंते ! नेरइयत्ते केव० केवलिसमुग्घाया अतीता ?, गो० ! नत्थि, के० पु० ?, गो० ! नत्थि, एवं जाव वेमाणियत्ते, नवरं मणूसत्ते अतीता णत्थि, पुरे० असंखेज्जा, एवं जाव

वेमाणिया, नवरं वणस्सइकाइयाणं मणूसत्ते अतीता नत्थि, पु० अनंता, मणूसाणं मणूसत्ते अतीता सिय अत्थि सिय नत्थि, जइ अत्थि जह० एक्को वा दो वा तिन्नि वा उक्को० सतपुहुत्तं, केवइया पुरे० ?, गो० ! सिय संखेज्जा सिय असंखेज्जा, एवं एते चउव्वीसं चउव्वीसा दंडगा सव्वे पुच्छाए भणितव्वा जाव वेमाणाणं वेमाणियत्ते ।

वृ. 'नेरइयाणं'मित्यादि, नैरयिकाणां विवक्षितप्रश्नसमयभाविनां सर्वेषां भदन्त ! पूर्वं सकलमतीतं कालमवधीकृत्य यथासम्भवं नैरयिकत्वे वृत्तानां सतां मसुदायेन सर्वसङ्ख्यया कियन्तो वेदनासमुद्घाता अतीताः ?, भगवानाह– गौतम ! अनन्ताः, बहूनामनन्तकालमसंव्यवहारराशेरुद्वृत्तत्वात्, कियन्तः पुरस्कृताः ?, एतच्च सूत्रं सूचामात्रं, परिपूर्णस्तु पाठ एवं–

'नेरइयाणं भंते ! नेरइयत्ते केवइया वेयणासमुग्घाया पुरेक्खडा ?' इति भगवानाह–गौतम अनन्ताः, बहूनामनन्तशो भूयोऽपि नरकेष्वागमनसम्भवात्, 'एव'मित्यादि, एवमुक्तेन प्रकारेणासुरकुमारत्वादिषु स्थानेषु क्रमेण तावद् वक्तव्यं यावद्वैमानिकत्वे–वैमानिकत्वविषयं सूत्रं, तच्चेदं– 'नेरइयाणं भंते ! वेमाणियत्ते केवइया वेयणासमुग्घाया अतीता ?, गो० ! अनंता, केवइया पुरेक्खडा ?, गो० ! अनंता' इति, अत्र अतीता अनन्ताः सुप्रतीताः, सर्वसांव्यवहारिकजीवैः प्रायोऽनन्तशो वैमानिकत्वस्य प्राप्तत्वात्, पुरस्कृतास्त्वनन्ताः, प्रश्नसमयभाविनां नैरयिकाणां मध्ये बहुभिरनन्तशो वैमानिकत्वस्य प्राप्स्यमानत्वात्, एवमपान्तरालवर्त्तिष्वपि असुरकुमारत्वादिषु स्थानेषु भावना भावनीया, यथा च नैरयिकाणां नैरयिकत्वादिषु चतुर्विंशतिदण्डकक्रमेणातीताः पुरस्कृताश्च वेदनासमुद्घाता भणिता एवं सर्वजीवनामसुरकुमारादीनां भणितव्याः, कियद्दूरं यावदित्याह–यावद्वैमानिकानां वमानिकत्वे–वैमानिकत्वविषयाः, ते चैवं–

'वेमाणियाणं भंते ! वेमाणियत्ते केवइया वेयणासमुग्घाया अतीता ?, गो० ! अनंता, केवइया पुरे० ?, गो० ! अनंता' इति, एवं कषायमरणवैक्रियतैजसमुद्घाता अपि नैरयिकादीनां वैमानिकपर्यवसानानां सर्वेषु नैरयिकत्वादिषु स्थानेषु चतुर्विंशतिदण्डकक्रमेण वक्तव्याः, तथा चाह–'एवं जावे'त्यादि, एवं–वेदनासमुद्घातगतेन प्रकारेण कषायादिसमुद्घाता अपि तावद्वक्तव्याः यावत्तैजससमुद्घातः किमविशेषेण वक्तव्याः ?, नेत्याह–'नवर'मित्यादि, नवरमुपयुज्य–उपयोगं कृत्वा सर्वं सूत्रं बुद्ध्या नेतव्यं, किमुक्तं भवति ?–ये यत्र समुद्घाता घटन्ते ते तत्रातीताः पुरस्कृताश्चानन्ता वक्तव्याः, शेषेषु च स्थानेषु प्रतिषेद्धव्याः एतदेव वैविक्त्येनाह–'जस्स अत्थी'त्यादि, यस्य जीवराशेर्नैरयिकादेरसुरकुमारादेश्च सन्ति वैक्रियतैससमुद्घातास्ते तस्य वक्तव्याः, शेषेषुपृथिव्यादिषु स्थानेषु प्रतिषेद्धव्या इति सामर्थ्यलभ्यं, कषायमारणान्तिकसमुद्घाताः पुनः सर्वत्रापि वेदनासमुद्घातवदविशेषेणातीताः पुरस्कृताश्चानन्ता वक्तव्याः न तु क्वापि निषेद्धव्याः

सम्प्रति आहारसमुद्घातविषयं सूत्रमाह–'नेरइयाण' मित्यादि आहारकसमुद्घातो ह्याहारकलब्धौ सत्यामाहारकशरीरप्रारम्भकाले भवति, नान्यथा, आहारकलब्धिश्चोपजायते चतुर्दशपूर्वाधिगमे, तेषां चतुर्दशनानां पूर्वाणामधिगमो मनुष्यत्वावस्थायां न शेषायामवस्थायामति मनुष्यत्ववर्जासु शेषास्ववस्थास्वतीतानां पुरस्कृतानां चाहारकसमुद्घातानां प्रतिषेधः, मनुष्यत्वावस्थायामपि पूर्वमतीता असङ्ख्येयाः, प्रश्नसमयभाविनां नारकाणां मध्ये बहूनामसङ्ख्येयानां नरकाणां पूर्वं तदा २ मनुष्यत्वमवाप्य अधिगतचतुर्दशपूर्वाणां प्रत्येकं सकृद् द्विःत्रिर्वा कृताहारकसमुद्घातत्वात्, पुरस्कृता अपि असङ्ख्येयाः, प्रश्नसमयभाविनां नारकाणां मध्ये बहुभिर-

सङ्ख्येयैर्नारकैर्नरकादुद्वृ त्यानन्तर्येण पारम्पर्येण वा तदा तदा मनुष्यत्वावाप्तौ चतुर्दश पूर्वाण्यधीत्य प्रत्येकमाहारकसमुद्घातानामेकशो द्विः त्रिश्चतुर्वा करिष्यमाणत्वात्,

'एवं जाव वेमाणियाण'मिति नैरयिकाणां चतुर्विंशतिदण्डकक्रमेण चिन्ता कृता एवमसुरकुमारादीनामपि प्रत्येकं चतुर्विंशति- दण्डकक्रमेण तावद्वक्तव्या यावद्वैमानिकानां, केवलं यत्रास्ति विशेषस्तं दर्शयति–'नवर'मित्यादि, नवरं वनस्पतिकायिकानां मनुष्यत्वचिन्तायामतीताः पुरस्कृताश्च प्रत्येकमनन्ता वक्तव्याः, अनन्तानां पूर्वमधिगतचतुर्दशपूर्वाणां यथायोगमेकशो द्विः त्रिर्वा कृताहारकसमुद्घातानां वनस्पतिष्ववस्थानात् अनन्तरमेव वनस्पतिकायादुद्वृ त्यानन्तर्येण पारम्पर्येण वा मानुषत्वमवाप्य यथायोगमेकशो द्विः त्रिश्चतुर्वाऽऽहारकसमुद्घातानां निर्वर्तयिष्यमाणत्वात्, मनुष्याणां मनुष्यत्वावस्थायामतीताः, पुरस्कृताश्च स्यात्सङ्ख्येयाः स्यादसङ्ख्येयाः, कथमिति चेत्, उच्यते, ते हि प्रश्नसमयभाविनः उत्कर्षपदेऽपि सर्वस्तोकाः, श्रेण्यसङ्ख्येयभागतत्प्रदेशराशिप्रमाणत्वात्, ततो विवक्षितप्रश्नसमयभाविनां मध्ये कदाचिदसङ्ख्येयाः–यथायोगं प्रत्येकमेकशो द्विः त्रिश्चतुर्वा कृतकरिष्यमाणा- हारकसमुद्घाताः प्राप्यन्ते, उपसंहारमाह–

'एव'मित्यादि, एवमुक्तेन प्रकारेण एते आहारकसमुद्घातविषयाश्चतुर्विंशतिश्चतुर्विंशतिसङ्ख्याका दण्डका वक्तव्याः, सम्प्रति केवलिसमुद्घातं चिन्तयति–'नेरइयाण'मित्यादि, केवलिसमुद्घातोऽपि मनुष्यत्वावस्थायां भवति, न शेषास्वस्थासु, न च कृतकेवलिसमुद्घातः संसारं पर्यटति, केवलिसमुद्घातानन्तरमन्तर्मुहूर्तेनावश्यं निःश्रेयसपदाधिगमात्, ततो नारकाणां मनुष्यत्ववर्ज्जासु शेषास्ववस्थास्वतीताः पुरस्कृताश्च केवलिसमुद्घाताः प्रतिषेद्धव्याः, मनुष्यत्वावस्थायामप्यतीताः प्रतिषेद्धव्याः, कृतकेवलिसमुद्घातानां नरके गमनाभावात्, भाविनश्च भविष्यन्ति, प्रश्नसमयभाविनां मध्ये बहूनामसङ्ख्येयानां नारकाणां मुक्तिपदगमनयोग्यत्वात्, ततः पुरस्कृता असङ्ख्येया इत्युक्तं, 'एव'मित्यादि, यथा नैरयिकाणां केवलिसमुद्घातचिन्ता कृता एवमसुरकुमारादीनामपि कर्त्तव्या, सा च तावत् यावत् वैमानिकानां, अत्रैव विशेषमाह–

'नवर'मित्यादि, नवरं वनस्पतिकायिकानां मनुष्यत्वावस्थाचिन्तायामतीताः प्रतिषेद्धव्याः, कृतकेवलिसमुद्घातानां संसाराभावात्, पुरस्कृतास्त्वनन्ता वाच्याः, प्रश्नसमयभाविनां वनस्पतिकायिकानां मध्ये बहूनामनन्तानां वनस्पतिकायिकानां वनस्पतिकायादुद्वृ त्यानन्तर्येण पारम्पर्येण वा कृतकेवलिसमुद्घातानां सेत्स्यमानत्वात्, मनुष्याणां मुख्यात्वावस्थाचिन्तायामतीताः कदाचित्सन्ति कदाचिन्न सन्ति, कृतकेवलिसमुद्घातानां सिद्धत्वभावादन्येषां चाद्यपि केवलिसमुद्घाताप्रतिपत्तेः, यदापि सन्ति तदाऽपि जघन्यत एको द्वौ वा त्रयो वा उत्कर्षतः शतपृथक्त्वं, पुरस्कृताः स्यात्सङ्ख्येयाः स्यादसङ्ख्येयाः, प्रश्नसमयभाविनां मनुष्याणां मध्ये कदाचित्सङ्ख्येयानां कदाचिदसङ्ख्येयानां यथायोगमानन्तर्येण पारम्पर्येण कृतकेवलिसमुद्घातानां सेत्स्यमानत्वात्,

सूत्रसर्वसङ्ख्यामाह–एवमुक्तेन प्रकारेण एते केवलिसमुद्घातविषयाश्चतुर्विंशतिश्चतुर्विंशतिदण्डकाः ते च सर्वेऽपि पृच्छायां–पृच्छापुरस्सरं भणितव्याः कियद्दूरं यावदित्याह–वैमानिकानां वैमानिकत्वविषयं सूत्रं, तच्चेदं–'वेमाणियाणं भंते ! वेमाणियत्ते केवइया केवलिसमुग्घाया अतीता ?, गो० १ नत्थि, के० पु० ?, गो० ! नत्थि' इति ॥ तदेवमुक्ता नैरयिकादिषु वैमानिकपर्यवसानेष्वेकत्वविशिष्टेषु बहुत्वेविशिष्टेषु च भूतभाविवेदनादिसमुद्घात-

सम्भवासम्भवपुरस्सरं सङ्ख्याप्रमाणप्ररूपणा,

सम्प्रति तेन तेन समुद्घातेन यावत् केवलिसमुद्घातेन समुद्घातनामसुद्घातानां च परस्परमल्पबहुत्वमिभिधित्सुराह–

मू. (६०७) *एतेसि णं भंते! जीवणं वेदणासमुग्घातेणं कसायस० मारणंतिय० वेउव्वियस० तेयस० आहारगस० केवलिस० समोहयाणं असमोहयाण य कयरे२हिंतो अ० ब० तु० वि०?,*

गो० ! सव्वत्थोवा जीवा आहारगसमुग्घाएणं समोहया केवलिसमुग्घाएणं संमोहता संखे० कतेयगसमुद्घाएणं समोहया असं० वेउव्वियसमुग्घाएणं समो० असं० मारणंतियसमु० समो० अनंतगुणा कसायस० स० असं० वेदनास० विसेसाहिया असंमोहया असंखिज्जगुणा

वृ. 'एएसि ण'मित्यादि, एतेषां–यथायोगं प्राक् समवहतासमहतत्वेन निरूपितानां भदन्त सामान्यतो जीवानां वेदनासमुद्घातेन यावत् केवलिसमद्घातेन समवहतानासमवहतानां च मध्ये कतरे कतरेभ्योऽल्पाः कतरे कतरेभ्यो बहुकाः--सङ्ख्येयासङ्ख्येयादिगुणतया प्रभूताः कतरे कतरैस्तुल्याः–समसङ्ख्याकाः, अत्रार्थे सूत्रे विभक्तिपरिणामः स्वयं योजनीयः, कतरे कतरेभ्यो विशेषाधिकाः–मनागधिकाः, वाशब्दाः सर्वेऽपि विकल्पार्थाः, भगवानाह–गौतम ! सर्वस्तोका जीवा आहारकसमुद्घातेन समुद्घाताः, आहारकशरीरिणो हि कदाचिदिह लोके षण्मासान् यावन्न भवन्त्यपि, यदापि भवन्ति तदापि जघन्यत एको द्वौ त्रयो वा उत्कर्षतः सहस्रपृथकत्वं,

केवलमाहारकसमुद्घात आहारकशरीरप्रारम्भकालेन शेषकालं ततःस्तोका एव युगपदाहारकसमुद्घाताः प्राप्यन्ते इति सर्वस्तोका आहारकसमुद्घोतन समुद्घाताः, तेभ्यः केवलिसमुद्घातेन समुद्घताः सङ्ख्येयगुणाः, तेषामेककालंशतपृथक्त्वेन प्राप्यमाणत्वात्, यद्यप्याहारकशरीरिणः सत्तया समकालं एको द्वौ वा त्रयो वा उत्कर्षतः सहस्रपृथकत्वमानाः प्राप्यन्ते तथाप्या (पि स्तोकानामा) हारकसमुद्घातसम्भवात् एककालमतिस्तोकाः प्राप्यन्ते इति न तेभ्यः केवलिसमुद्घातसमुद्घातानां सङ्ख्येयगुणत्वविरोधः, केवलिसमुद्घातसमुद्घतेभ्यः तैजससमुद्घातेन समवहताः असङ्ख्येयगुणाः,

पञ्चेन्द्रियतिर्यग्योनिकानां मनुष्याणां देवानामपि च तैजससमुद्घातसम्भवात्, तेभ्योऽपि वैक्रियसमुद्घातेन समुद्घताः असङ्ख्येयगुणाः, नारकवातकायिकानामपि वैक्रियसमुद्घातसम्भवात्, वातकायिकाश्च वैक्रियलब्धिमन्तो न स्तोकाः, किन्तु देवेभ्योऽप्यसङ्ख्येयगुणाः, कथमेतदिति चेत्, उच्यते, इह बादरपर्याप्तवायुकायिकाःस्थलचरपञ्चेन्द्रियेभ्योऽसङ्ख्येयगुणाः, महादण्डके तथा पठितत्वात्,

स्थलचरपञ्चेन्द्रियाश्च देवेभ्योऽप्यसङ्ख्येयगुणाः, ततो यद्यपि बादरपर्याप्तवायुकायिकानां सङ्ख्येयभागमात्रस्य वैक्रियलब्धिसम्भवो, यत उक्तम्–"तिण्हं ताव ससीणं वेउव्वियलद्धी चेव नत्थि, बायरपज्जत्ताणंपि संखेज्जइभागमेत्ताणं"ति, तथापि सङ्ख्येयभागमात्रा वैक्रियलब्धिमन्तो देवेभ्योऽप्यसङ्ख्येयगुणा भवन्ति, ततो नैरयिकाणां वायुकायिकानां च वैक्रियसमुद्घातसम्भवादुपपद्यन्ते तैजससमुद्घातसमुद्घतेभ्यो वैक्रियसमुद्घातेन समुद्धताः असङ्ख्येयगुणाः, तेभ्योऽपि मारणान्तिकसमुद्घातेन समुद्घता अनन्तगुणाः, कथं ?, उच्यते, इह निगोदजीवानामनन्तानामसङ्ख्येयो भागः सदा विग्रहगतौ वर्त्तमानः प्राप्यते, ते च प्रायो मारणान्तिकसमुद्घातसमुद्घता इति पूर्वेभ्योऽनन्तगुणाः, तेभ्योऽपि कषायसमुद्घातसमुद्घता असङ्ख्येयगुणाः, निगोजदीवाना-

मेवानन्तानां विग्रहगत्यापन्नेभ्योऽसङ्ख्येयगुणानां कषायसमुद्घातसमुद्घतानां सदा प्राप्यमाणत्वात्, तेभ्योऽपि वेदनासमुद्घातेन समुद्घता विशेषाधिकाः तेषामेव निदोगजीवानामनन्तानां कषाय-समुद्घातसमुद्घतेभ्यो मनाक् विशेषाधिकानां सदा वेदनासमुद्घातेन समुद्घाततयऽवाप्यमान-त्वात्, तेभ्योऽपि एकेनापि समुद्घातेनासमुद्घाता असङ्ख्येयगुणाः, वेदनाकषायमरणसमुद्घात-समुद्घतेभ्यो निगोदजीवानामेवासङ्ख्येयगुणानामसमवहतानां सदा लभ्यमानत्वात् ।

मू. (६०८) *एतेसि णं भंते ! नेरइयाणं वेदनासमुग्घाएणं कसायस० मारणंतियस० वेउव्वियस० समोहयाणं असमोहयाण य कतरे२हिंतो अप्पा वा ४, गो० ! सव्वत्थोवा नेरइया मारणंतियसमुग्घातेणं समोहया वेउव्वियसमुग्घातेणं समोहया असं० कसायसमुग्घाएणं समोहता संखे० वेदणासमुग्घा० समो० संखे० असमोहया० संखे० ।*

एतेसि णं भंते ! असुरकुमाराणं वेदनासमुग्घातेणं कसायस० मारणंतियस० वेउव्वियस० तेयगस० समोहताणं असमोहताण य कयरे२हिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा असुरकुमारा तेयगसमुग्घाएणं समोहया मारणंतियस० सं० असं० वेदणास० सं० असं० कसायसमु० स० सं० वेउव्वियमु० स० संखे० असमोहयाअसंखेज्जगुणा एवं जाव थणियकुमारा ।

एएसि णं भंते ! पुढविकाइयाणं वेदणास० ३ ?, गो० ! सव्वत्थोवा पुढविकाइया मारणंति-यसमुग्घाएणं समोहया कसायसमुग्घाएणं समोहया सं०, वेदनासमु० सं० विसेसाहिया असमोहया असं०, एवं जाव वणस्सइकाइया, नवरं सव्वत्थोवा वाउक्काइया वेउव्वियसमुग्घाएणं समोहया मारणंतियसमु० समो० असंखेज्जगुणा कसायसमुग्घा० स० सं० वेदनास० स० विसेसाहिया असमोहया असंखेज्जगुणा ।

बेइंदियाणं भंते ! वेदनासमुग्घायएणं कसायस० मारणंतियस० समोहयाणं असमोहयाण य कतरे २ हिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा बेइंदिया मारणंतियसमुग्घाएणं समोहया वेदनासमुग्घातेणं समोहया असंखे० कसायस० समो० असंखे० असमोहया संखे०, एवं जाव चउरिंदिया । पंचिंदियतिरिक्खजोणियाणं भंते ! वेदनास० समो० कसायसमुग्घातेणं मारणंतियस० वेउव्वियस० तेयासमु० समोहयाणं असंमोहयाण य कतरे२हिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा पंचिंदियतिरि० तेयासमु० समोहया वेउ० समु० समो० असं० मारणंतियस० समो० असं० वेदनास० समो० असं० कसायस० समो० संखे० असमवहता संखे० ।

मणुस्साणं भंते ! वेदनासमुग्घातेणं समोहयाणं कसायसमु० मारणंतियस० वेउव्वियस० तेयगस० आहारगसमुग्घाएणं केवलिस० समोहयाणं असमोहयाण य कयरे २ हिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा मणुस्सा आहारगस० समोहया केवलिस० स० संखे० तेयगस० समो० संखे० वेउव्वियस० समो० संखे० मारणंतियस० समो० असं० वेदनास० स० असं० कसायस० स० संखे० असमोहया असं० । वाणमंतरजोइसियवेमाणियाणं जहा असुरकुमाराणं

वृ. सम्प्रत्येतदेवाल्पबहुत्वं जीवविशेषेषु नैरयिकादिषु चतुर्विंशतिदण्डकक्रमेण यथायोगं चिचिन्तयिषुराह–'नेरइयाण'मित्यादि प्रश्नसूत्रं, भगवानाह–सर्वस्तोका नैरयिका मारणान्तिक-समुद्घातेन समुद्घताः, मारणान्तिको हि समुद्घातो मरणकाले भवति, मरणं च शेषजीवनभ्रा-कराशयपेक्षयाऽतिस्तोकानां, न च सर्वेषां म्रियमाणानामविशेषेण माराणान्तिकसमुद्घातः, किन्तु कतिपयानां, 'समोहयावि मरंति असमोहयावि मरंति'ति वचनात्, अतः सर्वस्तोका मारणान्तिक-

समुद्घातसमुद्घताः, तेभ्योऽपि वैक्रियसमुद्घातेन समुद्घाताः असङ्ख्येयगुणाः, सप्तस्वपि पृथिवीषु प्रत्येकं बहूनां परस्परवेदनोदीरणाय निरन्तरमुत्तरवैक्रियसमारम्भसम्भवात्, तेभ्योऽपि कषायसमुद्घातेन समुद्घताः सङ्ख्येयगुणाः, कृतोत्तरवैक्रियाणामकृतोत्तरवैक्रियाणां तत्र सर्वसङ्ख्येयोत्तरवैक्रियारम्भकेभ्योऽसङ्ख्येयगुणानां कषायसमुद्घातसमुद्घतत्वेन प्राप्यमाणत्वात्, तेभ्योऽपि वेदनासमुद्घातेन समुद्घताः सङ्ख्येयगुणाः, यथायोगं क्षेत्रजपरमाधार्मिकोदीरितपरस्परोदीरितवेदनाभिः प्रायो बहूनां सदा समुद्घतत्वेन प्राप्यमाणत्वात्, तेभ्योऽप्येकेनापि समुद्घातेनासमवहताः सङ्ख्येयगुणाः, वेदनासमुद्घातमन्तरेणाप्यतिबहूनां सामान्यतो वेदनामनुभवतां सम्भवात्।

सम्प्रत्यसुरकुमाराणामल्पबहुत्वमाह--'एएसि णं' मित्यादिप्रश्नसूत्रं सुगमं, भगवानाह--गौतम ! सर्वस्तोकाः असुरकुमारास्तैजससमुद्घातेन समुद्घताः, तैजसो हि समुद्घातो महति कोपावेशे कस्यचित् कदाचित्केषाञ्चिद्भवति, ततस्तेन समुद्घातेन समुद्घताः सर्वस्तोकाः, तेभ्यो मारणान्तिकसमुद्घातेन समुद्घताः असङ्ख्येयगुणाः, तेभ्यो वेदनासमुद्घातेन समुद्घताः असङ्ख्येयगुणाः, परस्परं युद्धादौ बहूनांवेदनासमुद्घातेन समुद्घतानां प्राप्यमाणत्वात्, तेभ्योऽपि कषायसमुद्घातेन समुद्घाताः सङ्ख्येयगुणाः, येन तेन वा कारणेन बहूनां कषायसमुद्घातगमनसम्भवात्, तेभ्योऽपि वैक्रियसमुद्घातेन समुद्घताः सङ्ख्येयगुणाः, परिचारणाद्यनेकनिमित्तमतिबहूनामुत्तरवैक्रियकरणारम्भसम्भवात्, तेभ्योऽप्यसमवहता असङ्ख्येयगुणाः, बहूनामुत्तमजातीनां सुखसागरावगाढानां पूर्वोक्तेभ्योऽसङ्ख्येयगुणानां केनापि समुद्घातेनासमवहतानां सदा लभ्यमानत्वात्, 'एव'मित्यादि, यथा असुरकुमाराणामल्पबहुत्वमुक्तमेवं सर्वेषां भवनपतीनां द्रष्टव्यं यावत् स्तनितकुमाराणामिति।

सम्प्रति पृथिवीकायिकगतमल्पबहुत्वमाह--'एएसि ण' मित्यादि, अत्र कषायसमुद्घातसमुद्घतानां वेदनासमुद्घातसमुद्घतानां च सङ्ख्येयगुणत्वे असमवहतानां चासङ्ख्येयगुणत्वे भावना स्वयं भावनीया, सुगमत्वात्, 'एव'मित्यादि, पृथिवीकायिकगतेन प्रकारेणाल्पबहुत्वं तावद्वक्तव्यं यावद्वनस्पतिकायिकाः, वायुकायिकान् प्रति विशेषमभिधित्सुराह--'नवर'मित्यादि, नवरं वातकायिकानामल्पबहुत्वचिन्तायामेवं वक्तव्यं--सर्वस्तोका वातकायिका वैक्रियसमुद्घातेन समुद्घताः, बादरपर्याप्तसङ्ख्येयभागस्य वैक्रियलब्धेः सम्भवात्, तेभ्योऽपि मारणान्तिकसमुद्घातेन समुद्घता असङ्ख्येयगुणाः, पर्याप्तापर्याप्तसूक्ष्मबादरभेदभिन्नानां सर्वेषामपि वातकायिकानां मरणसमुद्घातसम्भवात्, तेभ्योऽपि कषायसमुद्घातेन समुद्घताः सङ्ख्येयगुणाः, तेभ्योऽपि वेदनासमुद्घातेन समुद्घता विशेषाधिकाः, तेभ्योऽसमवहता असङ्ख्येयगुणाः, सकलसमुद्घातगतवातकायिकापेक्षया स्वभावस्थानां वातकायिकानां स्वभावत एवासङ्ख्येयगुणतया प्राप्यमाणत्वात्

द्वीन्द्रियसूत्रे सर्वस्तोकाः द्वीन्द्रिया मारणान्तिकसमुद्घातेन समुद्घताः, प्रतिनियतानामेव प्रश्नसमये मरणसद्भावात्, तेभ्यो वेदनासमुद्घातेन समुद्घता असङ्ख्येयगुणाः, शीतातपादिसम्पर्कतोऽतिप्रभूतानां वेदनासमुद्घातभावात्, तेभ्यः कषायसमुद्घातेन समुद्घता असङ्ख्येयगुणाः, अतिप्रभूततरणां लोभादिकषायसमुद्घातभावात्, तेभ्योऽप्यसमवहताः सङ्ख्येयगुणाः, 'एव'मित्यादि, एवं द्वीन्द्रियगतेन प्रकारेण तावद् वक्तव्यं यावच्चतुरिन्द्रियाः।

तिर्यक्पञ्चेन्द्रियसूत्रे सर्वस्तोकास्तैजससमुद्घातेन समुद्घताः, कतिपयानामेव तेजोलब्धि-

भावात्, तेभ्यो वेदनासमुद्घातेनासमवहताः असङ्ख्येयगुणाः, तेभ्योऽपि वैक्रियसमुद्घातेन समवहताः असङ्ख्येयगुणाः, प्रभूतानां वैक्रियलब्धेर्भावात्, तेभ्योऽपि मारणान्तिकसमुद्घातेन समवहता असङ्ख्येयगुणाः, सम्मूर्च्छिमजलचरस्थलचरखचराणामपि सर्वेषां वैक्रियलब्धिरहितानां प्रत्येकं पूर्वोक्तेभ्योऽसङ्ख्येयगुणानां केषाञ्चित् गर्भजानामपि वैक्रियलब्धिरहितानां वैक्रियलब्धिमतां च मरणसमुद्घातसम्भवात्, तेभ्योऽपि वेदनासमुद्घातेन समुद्धताः असङ्ख्येयगुणाः, म्रियमाणजीवराश्यपेक्षया अपि अम्रियमाणानामसङ्ख्येयगुणानां वेदनासमुद्घातभावात्, तेभ्यः कषायसमुद्घातेन समुद्धताः सङ्ख्येयगुणाः, तेभ्योऽप्यसमवहताः सङ्ख्येयगुणाः, अत्र भावना प्रागिव।

मनुष्यसूत्रे सर्वस्तोका आहारकसमुद्घातेन समुद्धताः, अतिस्तोकानामेककालमाहारकशरीरप्रारम्भसंभवात्, तेभ्यः केवलिसमुद्घातेन समुद्धताः सङ्ख्येयगुणाः, शतपृथक्त्वसङ्ख्यया प्राप्यमाणत्वात्, तेभ्यस्तैजससमुद्घातेन समवहताः सङ्ख्येयगुणाः, शतसहस्रसङ्ख्यया तेषां प्राप्यमाणत्वात्, तेभ्योऽपि वैक्रियसमुद्घातेन समुद्धताः सङ्ख्येयगुणाः कोटीसङ्ख्ययालभ्यमानत्वात्, तेभ्योऽपि मारणान्तिकसमुद्घातेन समवहता असङ्ख्येयगुणाः सम्मूर्च्छिममनुष्याणामपि तद्भावात्, तेषां चासङ्ख्येयत्वात्, तेभ्योऽपि वेदनासमुद्घातेन समुद्धता असङ्ख्येयगुणाः, म्रियमाणराश्यपेक्षया असङ्ख्येयगुणानामम्रियमाणानां तद्भावसम्भवात्, तेभ्यः कषायसमुद्घातेन समुद्धताः सङ्ख्येयगुणाः, प्रभूततया तेषां प्राप्यमाणत्वात्, तेभ्योऽप्यसमवहता असङ्ख्येयगुणाः, सम्मूर्च्छिममनुष्याणामल्पकषायाणामुत्कटषायिभ्योऽसङ्ख्येयगुणानां सदा लभ्यमानत्वात्। व्यन्तरज्योतिष्कवैमानिका यथा असुरकुमारास्तथा वक्तव्याः। तदेवमुक्तं समुद्धतासमुद्धतविषयमल्पबहुत्वं, अधुना कषायसमुद्घातगतां विशेषवक्तव्यतामभिधित्सुराह-

मू. (६०९) *कति णं भंते! कसायसमुग्घाया पन्नत्ता?, गो०! चत्तारि कसायसमुग्घाया पं० तं०-कोहसमुग्घाते माणस० मायास० लोहसमुग्घाते!,*

नेरइयाणं भंते! कतिकसायसमुग्घाया पं०?, गो०! चत्तारि कसायसमुग्घाता पं० एवं जाव वेमाणियाणं, एगमेगस्स णं भंते! नेरइयस्स केवतिता कोहसमुग्घाता अतीता?, गो०! अनंता, केवतिता पुरे०?, गो०! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्को० संखेज्जा वा असंखेज्जा वा अनंता वा, एवं जाव वेमाणियस्स, एवं जाव लोभसमुग्घाते एते चत्तारि दंडगा।

नेरइयाणं भंते! केवइया कोहसमु० अतीता?, गो०! अनंता, के० पु०?, गो०! अनंता, एवं जाव वेमाणियाणं, एवं जाव लोभसमुग्घाए, एवं एएवि चत्तारि दंडगा।

एगमेगस्स णं भंते! नेरइयस्स नेरइयत्ते केवइया कोहस० अतीता?, गो०! अनंता, एवं जहा वेदनासमुग्दायतो भणितो तहा कोहसमुग्घातोवि निरवसेसं जाव वेमाणियत्ते, माणसमुग्घाए मायासमुग्घातेवि निरवसेसं जहा मारणंतियसमुग्घाते लोहसमुग्घातो जहा कसायसमुग्घातो नवरं सव्वजीवा असुरादिनेरइएसु मोहकसाएणं एगुत्तरियाते नेतव्वा।

नेरइयाणं भंते! नेरइयत्ते केवइया कोहसमु० अतीता?, अनंता, के० पु०?, गो०! अनंता, एवं जाव वेमाणियत्ते, एवं सट्ठाणपरट्ठाणेसु सव्वत्थ भाणियव्वा, सव्वजीवाणं चत्तारिवि समुग्घाया जाव लोभसमुग्घातो जाव वेमाणियाणं वेमाणियत्ते।

वृ. 'कइ ण'मित्यादि, इदं सामान्यतः कषायसमुद्घातविषयं चतुर्विंशतिदण्डकक्रमगतं

च सूत्रं सुप्रतीतं, सम्प्रत्येकैकस्य नैरयिकादेश्चतुर्विंशतिदण्डकक्रमेण वैमानिकपर्यवसानस्य तद्वक्तव्यतामाह–'एगमेगस्स णं भंते !' इत्यादि, अत्रातीतसूत्रं सुप्रतीतं, पुरस्कृतसूत्रे 'कस्सइ अत्थि कस्सइ नत्थि'त्ति यो नरकभवप्रान्ते वर्त्तमानः स्वभावत एवाल्पकषायः कषायसमुद्घातमन्तरेण कालं कृत्वा नरकादुद्वृत्तो मनुष्यभवं प्राप्य कषायसमुद्घातमगत एव सेत्स्यति तस्य नास्ति पुरस्कृत एकोऽपि कषायसमुद्घातो, यस्यापि सन्ति तस्यापि जघन्यत एको द्वौ त्रयो वा, ते च प्रागुक्तस्वरूपस्य सकृत्कषायसमुद्घातगामिनो वेदितव्याः, उत्कर्षतः सङ्ख्येया असङ्ख्येया अनन्ता वा, तत्र सङ्ख्येयं कालं संसारावस्थायिनः सङ्ख्येयाः असङ्ख्येयं कालमसङ्ख्येयाः अनन्तकालमनन्ताः, एवमसुर-कुमारादिक्रमेण तावद् वाच्यं यावद्वैमानिकस्य,

'एव'मित्यादि, एवं–चतुर्विंशतिदण्डकक्रमेण मानादिकषायसमुद्घातसमुद्गतास्तावद्वक्तव्याः यावल्लोभसमुद्घातः, एवमेते चत्वारः चतुर्विंशतिदण्डका भवन्ति, एते चैकैकनैरयिकादिविषया उक्ताः, सम्प्रत्येतानेव चतुश्चतुर्विंशतिदण्डकान् सकलनारकादिविषयानाह–'नेरइयाण'मित्यादि, अतीतसूत्रं सुप्रतीतं, पुरस्कृता अनन्ताः, प्रश्नसमयभाविनां नारकाणां मध्ये बहूनामनन्तकालमवस्थायित्वात्, एवं–नैरयिकोक्तेन प्रकारेण तावद् वक्तव्यं यावद्वैमानिकानां

यथा चैषः क्रोधसमुद्घातश्चतुर्विंशतिदण्डकक्रमेणोक्तः एवं मानादिसमुद्घातोऽपि तावद् वक्तव्यायावल्लोभसमुद्घातः। एवमेतेऽपि सकलनारकादिविषयाश्चत्वारश्चतुर्विंशतिदण्डका भवन्ति, साम्प्रतमेकैकस्यनैरयिकादेर्नैरयिकादिषु भावेषु वर्त्तमानस्य कति क्रोधसमुद्घाता अतीताः कति भाविन इति निरूपयितुकाम आह– 'एगमेगस्स ण'मित्यादि, एकैकस्य भदन्त ! नैरयिकस्य विवक्षितप्रश्नसमयकालात् पूर्वं सकलमतीतं कालमवधीकृत्य तदा तदाऽस्य नैरयिकत्वं प्राप्तस्य सतः सर्वसङ्ख्यया कियन्तः क्रोधसमुद्घाता अतीताः ?, भगवानाह–गौतम ! अनन्ताः नरकगतेरनन्तशः प्राप्तत्वात्, एकैकस्मिंश्च नरकभवे जघन्यपदेऽपि सङ्ख्येयानां क्रोधसमुद्घातानां भावात्,

'एवं जहे'त्यादि, एवमुपदर्शितेन प्रकारेण यथा वेदनासमुद्घातः प्राग् भणितः तथा क्रोधसमुद्घातोऽपि भणितव्यः, कथं भणितव्य इत्याह–निरवशेषंक्रियाविशेषणमेतत्, सामस्त्येनेत्यर्थः, कियद्दूरं यावत् भणितव्यमित्याह–यावद् वैमानिकत्वे, वैमानिकैस्य वैमानिकत्व इत्यालापकं यावदित्यर्थः, स चैवं–'केवइया पुरेक्खडा ?, गोयमा ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं संखेज्जा वा असंखेज्जा वा अनंता वा, एवमसुरकुमारत्ते जाव वेमाणियत्ते,' 'एगमेगस्स णं भंते ! असुरकुमारस्स नेरइयत्ते केवइया कोहसमुग्घाया अईया ?, गो० ! अनंता, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि तस्स सिय संखेज्जा सिय असं० सिय अनंता, एगमेगस्स णं भंते ! असुरकुमारस्स असुरकुमारत्ते केवइया कोहसमुग्घाया अतीता ?, गो० ! अनंता, केव० पुरे० ?, गो० ! क० अत्थि क० नत्थि, जस्सत्थि जह० एक्को वा दो वा तिन्नि वा उक्को० संखेज्जा वा असंखेज्जा वा अनंता वा, एवं नागकुमारत्ते जाव वेमाणियत्ते, एवं जहा असुरकुमारेसु नेरइया वेमाणियपज्जवसाणेसु भणिया तहा नागकुमारादिया सट्ठाणपरट्ठाणेसु भणियव्वा जाव वेमाणियत्ते' इति,

अस्यार्थः–कियन्तो भदन्त ! एकैकस्य नारकस्यासंसारमोक्षमनन्तं कालं मर्यादीकृत्य नैरयिकत्वे भाविनः सतः सर्वसङ्ख्यया पुरस्कृताः क्रोधसमुद्घाताः ?, भगवानाह–'कस्सइ अत्थि' इत्यादि, य आसन्नमरणः क्रोसमुद्घातमनासाद्यात्यन्तिकमरणेन नरकादुद्वृत्तः सेत्स्यति तस्य

नास्ति नैरयिकत्वभाविन एकोऽपि पुरस्कृतः क्रोधसमुद्घातः, शेषस्य तु सन्ति, यस्यापि सन्ति तस्यापि जघन्यत एको द्वौ त्रयो वा, एतच्च क्षीणशेषायुषां तद्भावस्थानां भूयो नरकेषु उत्पद्यमानानां वेदितव्यं, भूयो नपरकेषूत्पत्ती हि जघन्यपदेऽपि सङ्ख्येयाः प्राप्यन्ते, नैरयिकाणां क्रोधसमुद्घातप्रचुरत्वात्, उत्कर्षतः सङ्ख्येया वा असङ्ख्येया वा अनन्ता वा, तत्र सकृन्नरकेषु जघन्यस्थितिकेषूत्पत्स्यमानस्य सङ्ख्येया अनेकशो यदिवा दीर्घस्थितिकेषु सकृदपि उत्पत्स्यमानस्यासङ्ख्येयाः अनन्तश उत्पत्स्यमानस्यानन्ताः,

'एव'मित्यादि, एवं–नैरयिकोक्तप्रकारेणासुरकुमारत्वे तदनन्तरं चतुर्विंशतिदण्डकक्रमेण तावद् वक्तव्यं यावद्वैमानिकत्वविषयं सूत्रं, तद्यथैवं–'एगमेगस्स णं भंते ! नेरइयस्स वेमाणियत्ते केवइया कोहसमुग्घाया अईया ?, गो० ! अनंता, केवइया पुरे० ?, गो० ! कस्सइ अत्थि क० नत्थि, जस्सत्थि जह० एक्को वा दो वा तिन्नि वा उक्को० संखेज्जा वा असं० अनंता वा,' अत्राप्ययं भावार्थः–अतीतचिन्तायामनन्ताः, अनन्तशो वैमानिकत्वस्य प्राप्तत्वात्, पुरस्कृतचिन्तायां योऽनन्तरभवे नरकादुद्वृत्तो मानुषत्वमवाप्य सेत्स्यति प्राप्तो वा परम्परया सकृद्वैमानिकभवं न क्रोधसमुद्घातं गन्ता तस्यैकोऽपि पुरस्कृतः क्रोधसमुद्घातो वैमानिकत्वे न विद्यते, यस्त्वसकृद्वैमानिकत्वं प्राप्तः सन् सकृदेव क्रोधसमुद्घातं याता तस्य जघन्यत एको द्वौ वा त्रयो वा, शेषस्य सङ्ख्यातान् वारान् वैमानिकत्वं प्राप्स्यतः सङ्ख्येयाः असङ्ख्येयान् वारान् असङ्ख्येयाः अनन्तान् वारान् अनन्ताः,

'एगमेगस्स ण'मित्यादि प्रश्नसूत्रं सुगमं, 'गो० ! अनंता' इति, अनन्तशो नैरयिकत्वं प्राप्तस्य, एकैकस्मिंश्च नैरयिकभवे जघन्यपदेऽपि सङ्ख्येयानां क्रोधसमुद्घातानां भावात्, पुरस्कृताः कस्यचित्सन्ति कस्यचिन्न सन्ति, किमुक्तं भवति ? –योऽसुरकुमारभवादुद्वृत्तो न नरकं यास्यति किन्त्वनन्तरं परम्परया वा मनुष्यभवमवाप्य सेत्स्यति तस्य नैरयिकावस्थाभाविनः पुरस्कृताः क्रोधसमुद्घाता न सन्ति, नैरयिकत्वावस्थाया एवासम्भवात्, यस्तु तद्भवादूर्ध्वं पारम्पर्येण नरकगामी तस्य सन्ति, तस्यापि कस्यचित् सङ्ख्येयाः कस्यचिदसङ्ख्येयाः कस्यचिदनन्ताः, तत्र यः सकृज्जघन्यस्थितिकेषु नरकमध्येषु समुत्पत्स्यते तस्य जघन्यपदेऽपि सङ्ख्येयाः दशवर्षसहस्रप्रमाणायामपि स्थितौ सङ्ख्येयानां क्रोधसमुद्घातानां भावात्, क्रोधबहुलत्वान्नारकाणां, असकृत् दीर्घस्थितिषु सकृद्वा गमनेऽसङ्ख्येयाः अनन्तशो नरकगमनेऽनन्ताः,

तथा एकैकस्य भदन्त ! असुरकुमारस्य असुरकुमारत्वे स्थितस्य सतः सकलमतीतकालमधिकृत्य कियन्तः क्रोधसमुद्घाता अतीताः ?, भगवानाह–अनन्ताः अनन्तशोऽसुरकुमारभावस्य प्राप्तत्वात्, प्रतिभवं च क्रोधसमुद्घातस्य प्रायो भावात्, पुरस्कृतचिन्तायां कस्यापि सन्ति, यस्य प्रश्नकालादूर्ध्वं असुरकुमारत्वेऽपि वर्त्तमानस्य न भावी क्रोधसमुद्घातो नापि तत उद्वृत्तो भूयोऽप्यसुरकुमारत्वं याता तस्य न सन्ति, यस्तु सकृदसुरकुमारत्वमागामी तस्य जघन्यपदे एको वा द्वौ वा त्रयो वा उत्कर्षतः सङ्ख्येया असङ्ख्येया अनन्ता वा, सङ्ख्येयान् वारान् आगामिनः सङ्ख्येया असङ्ख्येयान् वारान् असङ्ख्येयाः अनन्तान् वारान् अनन्ताः, एवं चतुर्विंशतिदण्डकक्रमेण नागकुमारत्वादिषु स्थानेषु असुरकुमारस्य निरन्तरं तावद्वक्तव्यं यावद्वैमानिकत्वे, तथा चाह–

'एवं नागकुमारत्तेऽवी'त्यादि, तदेवमसुरकुमारेषु क्रोधसमुद्घातचिन्तितः, सम्प्रति नागकुमारादिष्वतिदेशमाह–'एव'मित्यादि, एवमुक्तेनाभिलापगतेन प्रकारेण यथा

चतुर्विंशतिदण्डकक्रमेण असुरकुमारो नैरयिकादिषु वैमानिकपर्यवसानेषु भणितः; तथा नागकुमारादयः समस्तेषु स्वस्थानपरस्थानेषु भणितव्याः यावद्वैमानिकस्य वैमानिकत्वे आलापकः, एवमेतानि नैरयिकचतुर्विंशतिदण्डकादिसूत्राणि वैमानिकचतुर्विंशतिदण्डकपर्यवसानानि चतुर्विंशतिः सूत्राणि वेदितव्यानि।

तदेवं चतुर्विंशतिदण्डसूत्रैः क्रोधसमुद्घातश्चिन्तितः, सम्प्रति चतुर्विंशत्यैव चतुर्विंशतिदण्डकसूत्रैर्मानसमुद्घातं मायासमुद्घातं चाभिधित्सुरतिदेशमाह-'माणसमुग्घाए मायासमुग्घाए निरवसेसं जहा मारणंतियसमुग्घाए' इति, यथा-प्राक् मारणान्तिकसमुद्घातेऽभिहितं सूत्रं तथा मानसमुद्घाते मायासमुद्घाते च निरवशेषमभिधातव्यं, तद्यथैवं-

'एगमेगस्स णं भंते ! नेरइयस्स नेरइयत्त केवइया माणसमुग्घाया अईया ? गोयमा ! अनंता, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्कोसेणं संखेज्जा वा असंखेज्जा वा अनंता वा, एवमसुरकुमारत्ते जाव वेमाणियत्ते,

एगमेगस्स णं भंते ! असुरकुमारस्स नेरइयत्ते केवइया माणसमुग्घाया अतीता ? गोयमा अनंता, केवइया पुरेक्खडा ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि जहन्नेणं एक्को वा दो वा तिन्नि वा उक्को० संखेज्जा वा असंखेज्जा वा अनंता वा, एवं नागकुमारत्ते जाव वेमाणियत्ते, एवं जहा असुरकुमारे नेरइया वेमाणियपज्जवसाणेसु भणिया तहा नागकुमाराइया सट्ठाणपरट्ठाणेसु भाणियव्वा जाव वेमाणियस्स वेमाणियत्ते' अस्यायमर्थः-अतीतेषु सूत्रेषु सर्वत्राप्यनन्तत्वं सुप्रतीतं, नैरयिककत्वादिस्थानानि प्रत्येकमनन्तशः, प्राप्तत्वात्, पुरस्कृतचिन्तायां त्वेवं नैरयिकस्य नैरयिकत्वे भावना-यो नैरयिकः प्रश्नकालादूर्ध्वं मानसमुद्घातमन्तरेण कालं कृत्वा नरकादुद्वृत्तोऽनन्तरं पारम्पर्येण वा मनुष्यभवमवाप्य सेत्स्यति न भूयो नरकमागन्ता तस्य न सन्ति पुरस्कृता मानसमुद्घाताः, यः पुनस्तद्भवे वर्त्तमानो भूयो वा नरकमागत्यैकं वारं मानसमुद्घातं गत्वा कालकरणेन नरकादुद्वृत्तः सेत्स्यति तस्यैकः पुरस्कृतो मानसमुद्घातः, एवमेव कस्यापि द्वौ कस्यापि त्रयः सङ्ख्येयान् वारान् नरकमागन्तुः सङ्ख्येयाः असङ्ख्येयान् वारान् असङ्ख्येयाः अनन्तान् वारान् अनन्ताः, नैरयिकस्यैवासुरकुमारत्वे पुरस्कृतचिन्तायामियं भावना-

यो नरकादुद्वृत्तो असुरकुमारत्वं न यास्यति तस्य न सन्ति पुरस्कृता मानसमुद्घाताः, यस्त्वेकं वारं गन्ता तस्य एको द्वौ त्रयादयो वा सङ्ख्येयान् वारान् गन्तुः सङ्ख्येयाः असङ्ख्येयान् वारान् असङ्ख्येयाः अनन्तान् वारान् अनन्ता, एवं तावद् भणनीयं यावत् तिर्यक्पञ्चेन्द्रियत्वे पुरस्कृतचिन्ता,

मनुष्यचिन्तायां चैवं भावना-यो नरकादुद्वृत्तो मनुष्यभवं प्राप्य मानसमुद्घातगत्वा सेत्स्यति तस्य नास्त्येकोऽपि पुरस्कृतो मानसमुद्घातो, यस्तु मनुष्यत्वं गतः सन्नेकं वारं मानसमुद्घातं गन्ता तस्यैकोऽपरस्य द्वावन्यस्य त्रयादयः सङ्ख्येयान् वारान् गन्तुः सङ्ख्येयाः असङ्ख्येयान् वारान् असङ्ख्येयाः अनन्तान् वारान् अनन्ता;, व्यन्तरज्योतिष्कवैमानिकत्वेषु भावना यथा असुरकुमारत्वे यथा च नैरयिकस्य नैरयिकत्वादिषु चतुर्विंशतिस्थानेषु भावना कृता तथा असुरकुमारादीनामपि वैमानिकपर्यवसानानां चतुर्विंशतिदण्डकक्रमेण कर्त्तव्या, यथा च मानसमुद्घातस्य चतुर्विंशतिः सूत्राणि चतुर्विंशतिदण्डकक्रमेणोक्तानि तथा मायासमुद्घातस्यापि चतुर्विंशतिसूत्राणि चतुर्विंशतिदण्डकक्रमेण वक्तव्यानि, तुल्यगमकत्वात्,

अधुना लोभसमुद्घातमतिदेशत आह-'लोभसमुग्घातो जहा कसायसमुग्घातो, नवरं सव्वजीवा असुराई नेरइएसु लोभकसाएणं एगुत्तरियाए नेतव्वा' इति, यथा प्राक् कषायसमुद्घात उक्तस्तथा लोभकषायोऽपि वक्तव्यः, नवरं तत्रासुरकुमारादीनां नैरयिकत्वे पुरस्कृतचिन्तायां स्यात् सङ्ख्येयाः स्यादसङ्ख्येया स्यादनन्ता इत्युक्तं अत्र तु सर्वे जीवा असुरकुमारादयो नैरयिकेषु पुरस्कृतचिन्तायां चिन्त्यमाना एकोत्तरिकया ज्ञातव्याः, एकोत्तरस्य भाव एकोत्तरिका 'द्वन्द्वचुरादिभ्यो वु'ञिति चीरादेराकृतिगणतया वुञिति, एको द्वौ त्रय इत्यादिरूपा तया, एकोत्तरतया इत्यर्थः, नैरयिकाणां निरतिशयदुःखवेदनाभिभूततया नित्यमुद्विग्नानां प्रायो लोभसमुद्घातासम्भवात्, सूत्रालापकश्चैवम्-

'एगमेगस्स णं भंते ! नेरइयस्स नेरइयत्ते केव० लोभसमु० अतीता ?, गो० ! अनंता, के० पु० !, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्स अत्थि एगो वा दो वा तिन्नि वा उक्कोसेणं संखेज्जा वा, असं० अनंता वा, एगमेगस्स णं भंते ! नेरइयस्स असुरकुमारत्ते केव० लोभस० अतीता ?, गो० ! अनंता, ते० पु० ?, गो० ! क० अत्थि क० नत्थि, जस्सत्थि सिय संखेज्जा सिय असं० सिय अनंता, एवं जाव नेरइयस्स थणियकुमारत्ते,

एगमेगस्स णं भंते ! नेरइयस्स पुढविकाइयत्ते के० लोभस० अतीता ?, गो० ! अनंता, के० पुरे० ?, गो० ! क० अत्थि क० नत्थि, जस्स अत्थि जह० एक्को वा दो वा तिन्नि वा उक्को० संखे० असं० अनंता वा, एवं जाव मणूसत्ते, वाणमंतरत्ते जहा असुरकुमारत्ते, एगमेगस्स णं भंते नेरइयस्स जोइसियत्ते के० लोभस० अतीता ?, गो० ! अनंता, केवइया पुरे० ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि जस्सत्थि जह०- एक्को वा दो वा तिन्नि वा उक्कोसेणं सिय संखेज्जा सिय असंखेज्जा सिय अनंता, एवं जाव वेमाणियत्तेऽवि भाणियव्वं, एगमेगस्स णं भंते ! असुरकुमारस्स नेरइयत्ते के० लोभस० अतीता ?, गो० ! अनंता, केवइया पुरे० ?, गो० ! कस्सइ अत्थि कस्सइ नत्थि, जस्सत्थि जह० एक्को वा दो वा तिन्नि वा उक्को० सं० असं० अनंता वा,

एगमेगस्स णं भंते ! असुरकुमारस्स असुरकुमारत्ते के० लोभस० अतीता ?, गो० ! अनंता, के० पु० ?, गो० ! क० अ० क० नत्थि, जस्सत्थि जह० एक्को वा दो वा तिन्नि वा उक्को० सं० असं० अनंता वा, एगमेगस्स णं भंते ! असुरकुमारस्स नागकुमारत्ते पुच्छा, गो० ! अनंता, के० पु० ?, गो० ! क० अत्थि कस्सइ नत्थि, जस्सत्थि सिय सं० सिय असं० सिय अनंता, एवं जाव थणियकुमारत्ते। पुढविकाइयत्ते जाव वेमाणियत्ते जहा नेरइयस्स भणितं तहेव भाणियव्वं, एवं जाव थणियकुमारस्स वेमाणियत्ते।

एगमेगस्स णं भंते ! पुढविकाइयस्स नेरइयत्ते केव० लोभस० अतीता ?, गो० ! अनंता, केवइ० पु० ?, गो० ! क० अत्थि क० नत्थि, जस्सत्थि जह० एक्को वा दो वा तिन्नि वा उक्को० संखेज्जा वा असं० अणं०, पुढवि० असुरकुमारत्ते अतीता अनंता, केव० पु० ?, गो० ! कस्सइ अत्थि क० नत्थि, जस्स अत्थि सिय सं० सिय असं० सिय अनंता, एवं जाव थणियकुमारत्ते, पुढविकाइयत्ते अतीता अनंता, पुरेक्खडा कस्सइ अत्थि क० नत्थि, जस्सत्थि जह० एक्को वा दो वा तिन्नि वा उक्को० सं० असं० अनंता वा, एवं जाव मणूसत्ते, वाणमंतरत्ते जहा असुरकुमारत्ते, जोइसियत्ते वेमाणियत्ते अतीता अनंता, पुरेक्खडा० क० अत्थि क० नत्थि, जस्सत्थि सिय संखे० सिय असं० सिय अनंता, एवं जाव मणूसस्स वेमाणियत्ते,

वाणमंतरस्स जहा असुरकुमारस्स एवं जोइसियवेमाणियाणंपि' अस्यामर्थः–नैरयिकस्य नैरयिकत्वे अतीता लोभसमुद्घाता अनन्ताः, अनन्तशो नैरयिकत्वस्य प्राप्तत्वात्, पुरस्कृतचिन्तायां कस्यचित् सन्ति कस्यचिन्न सन्ति, तत्र यः प्रश्नसमयादूर्द्धं लोभसमुद्घातमप्राप्त एव नरकभवादुद्वृत्त्यानन्तरं पारम्पर्येण वा सेत्स्यति न च भूयो नरकमागामी न चागतऽपि लोभसमुद्घातं गन्ता तस्य नैकोऽपि पुरस्कृतो लोभसमुद्घातः, शेषस्य तु भावी, तस्यापि कस्यचिदेकः कस्यचित् द्वौ कस्यचित् त्रयः, एतच्च प्रश्नसमयादूर्ध्वमपि तद्भवभाजां सकृन्नारकभवगामिनां वा वेदितव्यं, उत्कर्षतः सङ्ख्येया वा असङ्ख्येया वा अनन्ता वा, तत्र सङ्ख्येयान् वारान् नरकभवमागामिनः सङ्ख्येयाः असङ्ख्येयान् वारान् असङ्ख्येयाः अनन्तान् वारान् अनन्ताः, तथा नैरयिकत्वस्यासुरकुमारत्वविषयेऽतीतसूत्रं तथैव भावनीयं, पुरस्कृतसूत्रे 'कस्सइ अत्थि क० नत्थि'त्ति यो नरकभवादुद्वृत्तो नासुरकुमारत्वं प्राप्स्यति तस्य न सन्त्यसुरकुमारत्वविषयाः पुरस्कृताः लोभसमुद्घाताः, यस्तु प्राप्स्यति तस्य सन्ति, ते च जघन्यपदे सङ्ख्येयाः, जघन्यस्थितावप्यसुरकुमाराणां सङ्ख्येयानां लोभसमुद्घातानां भावात्, लोभबहुलत्वात् तेषां, उत्कृष्टपदेऽसङ्ख्येया अनन्ता वा, तत्र सकृद्दीर्घस्थितावसकृज्जघन्यस्थितिषु दीर्घस्थितिषु वा उत्पत्स्यमानानामवसेयं, अनन्तश उत्पत्स्यमानानामनन्ताः, एवं नैरयिकस्य नागकुमारत्वादिषु स्थानेषु निरन्तरं तावद्वक्तव्यं यावत्स्तनितकुमारत्वे, तथा चाह–

'एवं जाव थणियकुमारत्ते' पृथिवीकायिकत्वेऽतीतसूत्रं तथैव, पुरस्कृतचिन्तायां तु कस्यापि सन्ति कस्यापि न सन्ति, तत्र नरकादुद्वृत्तो यो न पृथिवीकायिकत्वं प्राप्स्यति तस्य न सन्ति, योऽपि गन्ता तस्य जघन्यपदे एको द्वौ वा त्रयो वा उत्कर्षतः सङ्ख्येया असङ्ख्येया अनन्ता वा, ते चैवम्–तिर्यक्पञ्चेन्द्रियभवात् मनुष्यभवाद्वा लोभसमुद्घातेन समुद्धतः सन् य एकं वारं पृथिवीं गन्ती तस्य एको द्वौ वारौ गन्तुर्द्वौ त्रीन् वारान् गन्तुस्त्रयः सङ्ख्येयान् वारान् सङ्ख्येयाः असङ्ख्येयान् वारान् असङ्ख्येयाः अनन्तान् वारान् अनन्ताः, 'एवं जाव मणूसत्ते' इति एवं–पृथिवीकायिकगतेनाभिलापप्रकारेण तावद्वक्तव्यं यावन्मनुष्यत्वे, तथैवं–

'एगमेगस्स णं भंते ! नेरइयस्स आउकाइयत्ते' इत्यादि, यावन्मनुष्यसूत्रं, तत्राप्कायिकादिवनस्पतिपर्यन्तसूत्रभावना पृथिवीकायसूत्रवत्, द्वीन्द्रियसूत्रे पुरस्कृतचिन्तायां जघन्येन एको द्वौ वा त्रयो वेति एतत् सकृत् द्वीन्द्रियभवं प्राप्तुकामस्य वेदितव्यं, उत्कर्षेणं सङ्ख्येया असङ्ख्येया अनन्ता वा, तत्र सङ्ख्येयान् वारान् द्वीन्द्रियभवं प्राप्तुकामस्य सङ्ख्येया असङ्ख्येयान् वारान् असङ्ख्येयाः अनन्तान् वारान् अनन्ताः, एवं त्रीन्द्रियचतुरिन्द्रियसूत्रे अपि भावनीये, तिर्यक्पञ्चेन्द्रियसूत्रविषयाऽप्येवं भावना–सकृत् पञ्चेन्द्रियभवं गन्तुकामस्य स्वभावत एवाल्पलोभस्य जघन्यतः एको द्वौ त्रयो वा, शेषस्य तूत्कर्षतः सङ्ख्येयान् वारान् तिर्यक्पञ्चेन्द्रियभवं गन्तुः सङ्ख्येयाः असङ्ख्येयान् वारान् असङ्ख्येयाः अनन्तान् वारान् अनन्ताः, मनुष्यसूत्रे तु पुरस्कृतविषया भावना मूलत एवं–यो नरकभवादुद्वृत्तोऽल्पलोभकषायः सन् मनुष्यभवं प्राप्य लोभसमुद्घातमगत्वा सिद्धिपुरं यास्यति तस्य न सन्ति पुरस्कृता लोभसमुद्घाताः शेषस्य तु सन्ति, यस्य सन्ति तस्यापि जघन्यत एको द्वौ वा त्रयो वा, ते च एकं द्वौ त्रीन् वा लोभसमुद्घातान् प्राप्य सेत्स्यतो वेदितव्याः, सङ्ख्येयादयः प्राग्वद् भावनीयाः,

'वाणमंतरत्ते जहा असुरकुमारा' इति यथा नैरयिकस्यासुरकुमारत्वे पुरस्कृतविषये सूत्रमुक्तं

तथा व्यन्तरेष्वपि वक्तव्यं, किमुक्तं भवति ? -पुरस्कृतचिन्तायमेवं वक्तव्यं- 'कस्सइ अत्थि क० नत्थि, जस्स अत्थि सिय संखेज्जा सिय असं० सिय अनंता' इति, नत्वेकोत्तरिका वक्तव्या, व्यन्तराणामप्यसुरकुमाराणामिव जघन्यस्थितावपि सङ्ख्येयानां लोभसमुद्घातानां भावात्, 'जोइसियत्ते' इत्यादि, ज्योतिष्कत्वे अतीता अनन्ताः, अनन्तशो ज्योतिष्कत्वस्य प्राप्तत्वात्, पुरस्कृताः कस्यापि सन्ति कस्यापि न सन्ति, एतत् प्राग्वद् भावनीयं, यस्यापि सन्ति तस्यापि कस्यचिदसङ्ख्येयाः कस्यचिदनन्ताः, न तु जातुचित् सङ्ख्येयाः, ज्योतिष्काणां जघन्यपदेऽप्यसङ्ख्येयवर्षायुष्कतया जघन्यतोऽप्यसङ्ख्येयानां लोभसमुद्घातानां भावात्, लोभबहुलत्वात्तज्ज्ञातेः, एवं वैमानिकत्वेऽपि पुरस्कृतचिन्तायां वक्तव्यं। तदेवं स्वस्थाने परस्थाने च लोभसमुद्घातश्चिन्तितः, सम्प्रत्यसुरकुमारस्य तं चिचिन्तयिषुरिदमाह-

'एगमेगस्स ण'मित्यादि, एकैकस्य असुरकुमारस्य नैरयिकत्वे लोभसमुद्घाता अतीता अनन्ताः, नैरयिकत्वस्यानन्तशः प्राप्तत्वात्, पुरस्कृताः कस्यचित् सन्ति कस्यचिन्न सन्ति, तत्र योऽसुरकुमारभवादुद्वृत्तो न नरकं याता नापि सकृद् गतोऽपि लोभसमुद्घातं गन्ता तस्य न सन्ति, यस्तु यास्यति तस्य जघन्यत एको द्वौ त्रयो वा उत्कर्षतः सङ्ख्येया असङ्ख्येया अनन्ताः, तत्र सकृन्नरकगामिनः एकादयो नैरयिकाणामिष्टद्रव्यसंयोगाभावतः प्रायो लोभसमुद्घातस्यासम्भवात्, उक्तं च मूलटीकायाम्-

"नेरइयाणं लोभसमुग्घाया थोवा चेव भवन्ति, तेसिमिट्ठदव्वसंजोगाभावातो एगादिसंभव" इति, सङ्ख्येयान् वारान् नरकं गन्तुः सङ्ख्येयाः असङ्ख्येयान् वारान् असङ्ख्येया अनन्तान् वारान् अनन्ताः, असुरकुमारस्यासुरकुमारत्वे अतीता अनन्ताः सुप्रतीताः, पुरस्कृताः कस्यापि सन्ति कस्यापि न सन्ति, तत्र योऽसुरकुमारभवे पर्यन्तवर्ती न च लोभसमुद्घातं याता नापि तत उद्वृत्तो भूयोऽप्यसुरकुमारत्वं याता किञ्चनन्तरं पारम्पर्येण वा सेत्स्यति न सन्ति, यस्य तु सन्ति तस्यापि जघन्यत एको द्वौ वा त्रयो वा उत्कर्षतः सङ्ख्येया असङ्ख्येया अनन्ताः, तत्र एकादयः क्षीणायुःशेषाणां तद्भवभाजां भूयस्तथैवानुत्पद्यमानानामवगन्तव्याः, सङ्ख्येयादयो नैरयिकस्येव भावनीयाः, असुरकुमारस्य नागकुमारत्वेऽतीताः प्राग्वत्, पुरस्कृताः कस्यापि सन्ति कस्यापि न सन्ति, तत्र योऽसुरकुमारभवादुद्वृत्तो न नागकुमारभवं गन्ता तस्य न सन्ति, शेषस्य तु सन्ति, यस्यापि सन्ति तस्यापि स्यात् सङ्ख्येयाः स्यादसङ्ख्येयाः स्यादनन्ताः, तत्र सकृन्नागकुमारभवं प्राप्तुकामस्य सङ्ख्येयाः, जघन्यस्थितावपि सङ्ख्येयानां लोभसमुद्घातानां भावात्, असङ्ख्येयान् वारान् प्राप्तुकामस्य असङ्ख्येयाः अनन्तान् वारान् अनन्ताः, एवं यावत् स्तनितकुमारत्वे, पृथिवीकायिकत्वे यावद्वैमानिकत्वे यथा नैरयिकस्य भणितं तथैव भणितव्यं, एवमसुरकुमारस्येव नागकुमारादेरपि तावद्वक्तव्यं यावत्स्तनितकुमारस्य वैमानिकत्वे-वैमानिकत्वविषयं सूत्रं, तच्चैवं- 'एगमेगस्स णं भंते ! पुढविकाइयस्स नेरइयत्ते केवइया लोभसमुग्घाया अतीता ?' इत्यादि, एवं

-'एगमेगस्स णं भंते ! पुढविकाइयस्स नेरइयत्ते' इत्याद्यपि सूत्रं पूर्वोक्तभावनानुसारेण स्वयं भावनीयं, तदेवं नैरयिकादेरेकत्वविषयाः क्रोधादिसमुद्घाताः प्रत्येकं चतुर्विंशत्या चतुर्विंशतिदण्डकसूत्रैर्विचिन्तिताः, सम्प्रति तानेव नैरयिकादिबहुत्वविषयान् चिचिन्तयिषुरिदमाह-'नेरइयाणं भंते' इत्यादि, नैरयिकाणां भदन्त ! नैरयिकत्वे कियन्तः क्रोधसमुद्घाता अतीताः ?, भगवानाह-गौतम ! अनन्ताः, अनन्तशो नैरयिकत्वस्य सर्वजीवैः प्राप्तत्वात्, कियन्तः

पुरस्कृताः ?, गौतम ! अनन्ताः, प्रश्नसमयभाविनां मध्ये बहूनामनन्तशो नैरयिकत्वं प्राप्तुकामत्वात् 'एव'मित्यादि,

एवं–नैरयिकगतेनाभिलापप्रकारेण चतुर्विंशत्या चतुर्विंशतिदण्डकसूत्रैर्भिन्नाः तावद्वक्तव्यं यावद्वैमानिकस्य वैमानिकत्वे–वैमानिकविषयं सूत्र, तद्यथा–'वेमाणियाणं भंते ! वेमाणियत्ते केवइया कोहसमुग्घाया अतीता ?, गो० ! अनंता, केवइया पुरेक्खडा ?, गो० ! अनंता' भावना प्राग्वत्, यथा च क्रोधसमुद्घाताः सर्वेषु जीवेषु स्वस्थाने परस्थाने चातीताः पुरस्कृताश्चानन्तत्वेनाभिहिताः तथा मानादिसमुद्घाता अपि वाच्याः, तथा चाह–'एव'मित्यादि, एवं–क्रोधसमुद्घातगतेन प्रकारेण चत्वारोऽपि समुद्घाताः सर्वत्रापि स्वस्थानपरस्थानेषु वाच्याः, यावल्लोभसमुद्घातो वैमानिकत्वविषय उक्तो भवति, स चैवं–'वेमाणियाणं भंते ! वेमाणियत्ते केवइया लोभसमुग्घाया अतीता ?, गो० ! अनंता, केवइया पुरेक्खडा ?, गो० ! अनंता' सुगमं।

तदेवं नैरयिकादिबहुत्वविषया अपि क्रोधादिसमुद्घाताः प्रत्येकं चतुर्विंशत्या चतुर्विंशतिदण्डकसूत्रैश्चिन्तिताः, सम्प्रति क्रोधादिसमुद्घातैः शेषसमुद्घातैश्च समवहतानामसमवहतानां च परस्परमल्पबहुत्वमभिधित्सुः प्रथमतः सामान्यतो जीवविषयं तावदाह–

सू. (६१०) *एतेसि णं भंते ! जीवाणं कोहसमुग्घातेणं माणसमुग्घातेणं मायासमुग्घातेणं लोभसमुग्घातेण य समोहयाणं अकसायसमुग्घातेणं समोहयाणं असमोहयाण य कयरे२ हिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा जीवा अकसायसमुग्घाएणं समो०, माणसमुग्घाएणं समोहया अनंत०, कोहस० समो० विसेसाहिया मायासमुग्घाएणं स० विसे० लोभसमु० स० वि० असमोहया संखेज्जगुणा,*

एतेसि णं भंते ! नेरइयाणं कोहस० मानस० मायास० लोभस० समोहयाणं असमोहयाण य कयरे२ हिंतो अप्पा वा ४ ?, गो० ! सव्वत्थोवा नेरइया लोभसमुग्घाएणं समोहया मायास० स० संखेज्ज० माणस० स० संखे० कोहस० संखे० असमोहया संखे०, असुरकुमाराणं पुच्छा, गो० ! सव्वत्थोवा असुरकुमाराणं कोहस० समो० मानसमुग्घाएणं स० संखे० मायास० स० सं० लोभस० समो० संखे० असमोहया सखेज्जगुणा,

एवं सव्वदेवा जाव वेमाणिया, पुढविकाइयाणं पुच्छा, गो० ! सव्वत्थोवा पुढविकाइया मानसमुग्घाएणं समोहया कोहसमु० स० विसे० मायासमु० स० विसे० लोभस० स० विसे० असमो० संखे, एवं जाव पंचिंदियतिरिक्खजोणिया, मणुस्सा जहा जीवा, नवरं मानसमु० स० असं०

वृ. 'एएसि ण'मित्यादि, एतेषां भदन्त ! जीवानां क्रोधसमुद्घातेन मानसमुद्घातेन मायासमुद्घातेन लोभसमुद्घातेन च समवहतानां

'अकषायेणे'ति कषायव्यतिरेकेण शेषेण समुद्घातेन समवहतानामसमवहतानां च कतरे कतरेभ्यः अल्पा वा बहवो वा 'अर्थवशाद्विभक्तिपरिणाम' इति न्यायात् पञ्चम्याः स्थाने तृतीयापरिणामनात्तु कतरैः कतरैस्तुल्या वा, तथा कतरे२ भ्यो विशेषाधिकाः, एवं गौतमेन पृष्टे भगवानाह–गौतम ! सर्वस्तोका जीवाः अकषायसमुद्घातेन–कषायव्यतिरिक्तेन शेषवेदनादिषसमुद्घातषट्केन समवहताः, कषायव्यतिरिक्तसमुद्घातसमुद्घता हि क्वचित् कदाचित् केचिदेव प्रतिनियता लभ्यन्ते, ते चोत्कर्षपदेऽपि कषायसमुद्घातसमवहतापेक्षया अनन्तभागे वर्त्तन्ते, ततः स्तोकाः, तेभ्यो मानसमुद्घातसमवहता अनन्तगुणाः, अनन्तानां वनस्पतिजीवानां पूर्वभवसंस्कारानुवृत्तितो

मानसमुद्घाते वर्त्तमानानां प्राप्यमाणत्वात्, तेभ्यः क्रोधसमुद्घातेन समवहता विशेषाधिकाः, मानापेक्षया क्रोधिनां प्रचुरत्वात्, तेभ्यो मायासमुद्घातेन समवहता विशेषाधिकाः, क्रोध्यपेक्षया मायिनां प्रचुरत्वात्, तेभ्योऽपि लोभसमुद्घातेन समवहता विशेषाधिकाः, मायाविभ्यो लोभवतामतिप्रभूतत्वात्, तेभ्योऽपि केनाप्यसमवहता सङ्ख्येयगुणाः, चतसृष्वपि गतिषु प्रत्येकं समवहतेभ्योऽसमवहतानां सदा सङ्ख्येयगुणतया प्राप्यमाणत्वात्, सिद्धास्त्वेकेन्द्रियापेक्षयानन्तभागवर्त्तिन इति ते सन्तोऽपि न विवक्षिताः, एतदेवाल्पबहुत्वं चतुर्विंशतिदण्डकक्रमेण चिन्तयन्नाह-

'एएसि ण'मित्यादि सुगमं, नवरं सर्वस्तोका नैरयिका लोभसमुद्घातेन समवहता इति, नैरयिकाणामिष्टद्रव्यसंयोगाभावात् प्रायो लोभसमुद्गातस्तावन्नोपपद्यते, येषामपि च केषाञ्चिद्भवति ते कतिपया इति शेषसमुद्घातसमवहतापेक्षया सर्वस्तोकाः, असुरकुमारविषयाल्पबहुत्वचिन्तायां सर्वस्तोकाः क्रोधसमुद्घातसमुद्गता इति, देवा हि स्वभावतो लोभबहुलास्ततोऽल्पतरा मानादिमन्तःततोऽपि सकदाचित्कतिपये क्रोधवन्त इति शेषसमुद्घातसमवहतापेक्षया सर्वस्तोकाः,

'एवं सव्वदेवा जाव वेमाणिया' इति एवं-असुरकुमारगतेनाल्पबहुत्वप्रकारेण सर्वे देवा नागकुमारादयस्तावद्वक्तव्याः यावद्वैमानिकाः, पृथिवीकायिकचिन्तायां सामान्यतो जीवपदे इव भावना भावनीया, समानत्वात्, 'एवं जावे'त्यादि, एवं-पृथिवीकायिकक्तेन प्रकारेण तावद्वक्तव्यं यावत् तिर्यक्पञ्चेन्द्रियाः, मनुष्या यथा जीवाः नमवरमकषायसमुद्घातसमवहतापेक्षया मानसमुद्घातेन समवहता असङ्ख्येयगुणा वक्तव्याः। सम्प्रति कति छाद्मस्थिकाः समुद्घाता इति निरूपणार्थमाह--

मू. (६११) *कइ णं भंते ! छाउमत्थिया समुग्घाया पं० ?, गो० ! छ छाउमत्थिया स० पं०, तं०-वेदनास० कसायस० मारणंतियस० वेउव्वियस० तेयास० आहारगसमुद्घाते, नेरइयाणं भंते ! कति छाउमत्थिया स० पं० ?, गो० चत्तारि छाउमत्थिया स० पं०, तं०-वेदनास० कसायस० मारणंतियस० वउव्वियस०,*

असुरकुमाराणं पुच्छा, गो० ! पंच छाउ० समु० पं०, तं०-वेदनासमु० कसायसमु० मारणंतियस० वेउव्वियस० तेयगसमु०, एगिंदियविगलिंदियाणं पुच्छा, गो० ! तिन्नि छाउ० समु० पं०, तं०-वेदनासमु० कसायस० मारणंतियस०, नवरं वाउकाइयाणं चत्तारि स० पं०, तं०-वेदनास० कसायस० मारणंतियस० वेउव्वियस०,

पंचिंदियतिरिक्खजोणियाणं पुच्छा, गो० ! पंच० स० पं०, तं०-वेदनास० कसायस० मारणंतियस० वेउव्वियस० तेयगस०, मणूसाणं कति छाउमत्थिया समु० पं० ?, गो० ! छाउमत्थिया सं० पं०, तं०-वेदनास० कसायस० मारणंतियस० वेउव्वियस० तेयगस० आहारगस०

वृ. 'कइ णं भंते !' इत्यादि सुगमं, अथ कति केषां छाद्मस्थिकाः समुद्घाता इति चतुर्विंशतिदण्डकक्रमेण निरूपयति-'नेरइयाण'मित्यादि, नैरयिकाणामाद्याश्चत्वारो वेदनादिसमुद्घाताः, तेषां तेजोलब्ध्याहारकलब्ध्यभावतस्तैजससमुद्घाताहारकसमुद्घातासम्भवात्,

असुरकुमारादीनां सर्वेषामपि देवानामाहारकसमुद्घातवर्जाः शेषाः पञ्च समुद्घाताः, तेषां तेजोलब्धिसम्भवात् तैजससमुद्घातस्यापि सम्भवात्, यस्त्वाहारकसमुद्घातः स तेषां न

सम्भवति, चतुर्दशपूर्वाधिगमाभावेात भवप्रत्ययाच्च तेषामाहारकलब्ध्यभावात्, वायुकायवर्जै-केन्द्रियविकलेन्द्रियाणामाद्या वेदनाकषायमरणलक्षणास्त्रयः समुद्घाताः, तेषां वैक्रियहारकते-जोलब्ध्यभावतस्तत्समुद्घातासम्भवात्, वायुकायिकानां पूर्वे त्रयो वैक्रियसमुद्घातसहिताश्चत्वारः समुद्घाताः, तेषां बादरकपर्याप्तानां वैक्रियलब्धिसम्भवतो वैक्रियसमुद्घातस्यापि सम्भवात्,

पञ्चेन्द्रियतिर्यग्योनिकानामाहारकसमुद्घातवर्जाः शेषाः पञ्च छाद्मस्थिकाः समुद्घाताः, यस्त्वाहारकसमुद्घातः स तेषां न सम्भवति, चतुर्दशपूर्वाधिगमाभावतस्तेषामाहारकलब्ध्यसम्भवात्, मनुष्याणां षडपि, मनुष्येषु सर्वभावसम्भवात् । तदेवं यति येषां छाद्मस्थिकाः समुद्घातास्तति तेषां निरूपिताः सम्प्रति यस्मिन् समुद्घातेन वर्त्तमानो यावत् क्षेत्रं समुद्घातवशतस्तैस्तैः पुद्गलैर्व्याप्नोति तदेतन्निरूपयति–

मू. (६१२) जीवे णं भंते ! वेदनासमुग्घाएणं समोहते समोहणित्ता जे पोग्गले निच्छुभति तेहि णं भंते ! पोग्गलेहिं केवइते खेत्ते अफुण्णे केवतिते खेत्ते फुडे ?, गो० ! सरीरप्पमाणमेत्ते विक्खंभबाहल्लेणं नियमा छद्दिसिं एवतिते खेत्ते अफुण्णे एवतिते खेत्ते फुडे, से णं भंते ! खित्ते केवतिकालस्स अप्फुडे केव० फुडे ?, गो० ! एगसमइएण वा दुसमइएण वा तिसमइएण वा विग्गहेणं एवतिकालस्स अफुण्णे एवइयकालस्स फुडे, ते णं भंते ! पोग्गले केवतिकालस्स निच्छुभति गो० ! जहन्नेणं अंतोमुहुत्तस्स उक्को० वि० अंतो०,

ते णं भंते ! पोग्गला निच्छूढा समाणा जातिं तत्थ पाणातिं भूयातिं जीवातिं सत्तातिं अभिहणंति वत्तेंति लेसेंति संघाएंति संघट्टेंति परितावेंति किलामेंति उद्दवेंति तेहिंतो णं भंते ! से जीवे कतिकिरिए ?, गो० ! सिय तिकिरिए सिय चउकिरिए सिय पंचकिरिए,

ते णं भंते ! जीवा तातो जीवाओ कतिकिरिया ?, गो० ! सिय तिकिरिया सिय चउकिरिया सिय पंचकिरिया, से णं भंते ! जीवे ते य जीवा अन्नेसिं जीवाणं परंपराघाएणं कतिकिरिया ?, गो० ! तिकिरियावि चउकिरियावि पंचकिरियावि, नेरइए णं भंते ! वेदनासमुग्घाएणं समोहते, एवं जहेव जीवे, नवरं नेरइयाभिलावो, एवं निरवसेसं जाव वेमाणिते । एवं कसायसमुग्घातोवि भाणितव्वो ।

जीवे णं भंते ! मारणंतियसमुग्घातेणं समोहणइ समोहणित्ता जे पोग्गले निच्छुभति तेहिं णं भंते ! पोग्गलेहिं केवतिते खेत्ते अप्फुण्णे केवतिते खेत्ते फुडे ?, गो० ! सरीरप्पमाणमेत्ते विक्खंभबाहल्लेणं आयामेणं जहन्नेणं अंगुलस्स असंखेज्जतिभागं उक्कोसेणं असंखेज्जातिं जोयणातिं एगदिसिं एवतिते खेत्ते अफुण्णे एवतिए खेत्ते फुडे,

से णं भंते ! खेत्ते केवतिकालस्स अफुण्णे केवतिकालस्स फुडे ?, गो० ! एगसमइएण वा दुसमइएण वा तिसमइएण वा चउसमइएण वा विग्गहेणं एवतिकालस्स अफुण्णे एवतिकालस्स फुडे, सेसं तं चेव जाव पंचकि०, एवं नेरइएवि, नवरं आयामेणं जहन्नेणं साइरेगं जोयणसहस्सं उक्को० असंखेज्जातिं जोअनातिं एगदिसिं एवतिते खेत्ते अप्फुण्णे एवतिते खित्ते फुडे, विग्गहेणं एगसमइएण वा दुसमइएण वा तसमइएण वा चउसमतिएण वा भन्नति, सेसं तं चेव जाव पंचकिरियावि,

असुरकुमारस्स जहा जीवपदे, नवरं विग्गहो तिसमइओ जहा नेरइयस्स, सेसं तं चेव जाव पंचकिरियावि,

असुरकुमारस्स जहा जीवपदे, नवरं विग्गहो तिसमइओ जहा नेरइयस्स, सेसं तं चेव जहा असुरकुमारे, एवं जाव वेमाणिते, नवरं एगिंदिये जहा जीवे निरवसेसं।

मू. 'जीवे णं भंते !' इत्यादि, जीवो णमिति वाक्यालङ्कारे--वेदनासमुद्घाते वर्त्तमानः तस्मिन् समवहतो भवति समवहत्य च यान् पुद्गलान् वेदनायोग्यान् स्वशरीरान्तर्गतान् 'निच्छुभइ'इति विक्षिपति आत्मविश्लिष्टान् करोतीत्यर्थः, 'तेहि ण'मिति तैः पुद्गलैः कियत् क्षेत्रमापूर्णं, आपूर्णत्वमान्तराले कियदाकाशप्रदेशासंस्पर्शनेऽपि व्यवहारत उच्यते तत आह--कियत् क्षेत्रं स्पृष्टं--प्रतिप्रदेशापूरणेन व्याप्तं, एवं गौतमेन प्रश्ने कृते सति भगवानाह- 'सरीरे'त्यादि नियमात्--नियमेन 'छद्दिसिं'ति षड् दिशो यत्रापूरणे स्पर्शने वा षड्दिक् तद्यथा भवति एवं विष्कम्भतो -विस्तरेण बाहल्यतः--पिण्डतः शरीरप्रमाणमात्रं, यावत्प्रमाणः स्वशरीरस्य विष्कम्भो यावत्प्रमाणं च बाहल्यं एतावन्मात्रमापूर्णं स्पृष्टं चेति वाक्यशेषः, तदेव निगमनद्वारेणाह--

'एवइए खेत्ते अफुण्णे एवइए खेत्ते फुडे' इति, इह वेदनासमुद्घातो वेदनातिशयात्, वेदनातिशयश्च लोकनिष्कुटेषु जीवानां न भवति, निरुपद्रवस्थानवर्त्तित्वात् तेषां, किन्तु त्रसनाड्या अन्तः, तत्र परोदीरणासम्भवात्, तत्र च षड्दिक्त्वमेव इति नियमाच्छद्दिशिमित्युक्तं, अन्यथा 'सिय तिदिसिं सिय चउदिसिं सिय पंचदिसि'मित्याद्युच्येत, अथ स्वशरीरप्रमाणविष्कम्भबाहल्यमेव क्षेत्रमापूर्णं स्पृष्टं च विग्रहगतौ जीवस्य गतिमधिकृत्य कियद्दूरं यावद्भवति कियन्तं च काल-मित्येतन्निरूपणार्थमाह--

'से णं भंते !' इत्यादि, नपुंसकत्वे पुंस्त्वं प्राकृतत्वात्, तत्--अनन्तरोक्तप्रमाणं णमिति प्राग्वत् भदन्त ! क्षेत्रं कालस्स इति--प्राकृतत्वात् तृतीयार्थे षष्ठी कियता कालेन पूर्णं कियता कालेन स्पृष्टं, किमुक्तं भवति ?- कियन्तं कालं यावत् स्वशरीरप्रमाणविष्कम्भाबाहल्यं क्षेत्रं निरन्तरं विग्रहगतौ जीवस्य गतिमधिकृत्यापूर्णं स्पृष्टं च लभ्यते इति ?, भगवानाह--गौतम ! एकसमयेन वा द्विसमयेन वा त्रिसमयेन वा विग्रहेण, किमुक्तं भवति ?--एकसमयेन वा द्विसमयेन वा त्रिसमयेन वा विग्रहेण यावन्मात्रं क्षेत्रं व्याप्यते इयद्दूरं यावत् स्वशरीरप्रमाणविष्कम्भबाहल्यं क्षेत्रं वेदनाजननयोग्यैः पुद्गलैरापूर्णं भूतं जीवस्य गतिमधिकृत्याप्यते, तत एतद्गतमुत्कर्षत-स्त्रिसामयिकेन विग्रहेण यावन्मात्रं क्षेत्रमभिव्याप्यते एतावदात्मविश्लिष्टैर्वेदनाजननयोग्यैः पुद्गलैरापूर्णं लभ्यते, इह चतुःसामयिकः पञ्चसामयिकश्च विग्रहो यद्यपि सम्भवति तथापि वेदनासमुद्घातः प्रायः परोदीरितवेदनावशत उपजायते, परोदीरिता च वेदना त्रसनाड्यां व्यवस्थि-तस्य न बहिः, त्रसनाडीव्यवस्थितस्य च विग्रह उत्कर्षतोऽपि त्रिसामयिक इति उत्कर्षतोऽपि त्रिसामयिकेन विग्रहेणेत्युक्तं, न चतुःसामयिकेन पञ्चसामयिकेन चेति, उपसंहारवाक्यमाह--

'एवइयकालस्स अफुण्णे एवइयकालस्स फुडे' एतावता उत्कर्षतोऽपि त्रिसमयप्रमा-णेनेत्यर्थः कालेनापूर्णमेतावता कालेन स्पृष्टं, किमुक्तं भवति ?--विग्रहगतावुत्कर्षतः त्रीन् समयान् यावत् त्रिभिश्च समयैर्यावन्मात्रं व्याप्यते इयन्तीं सीमाभिव्याप्य स्वशरीरप्रमाणविष्कम्भबाहल्यं क्षेत्रं वेदनाजननयोग्यैः पुद्गलैरापूर्णं भूतं च जीवस्य गतिमधिकृत्य व्याप्यते, अथवा 'केवइय कालस्स'त्ति षष्ठ्येव व्याख्येया, ततः स्वशरीरप्रमाणविष्कम्भबाहल्यं क्षेत्रं वेदनाजननयोग्यैः पुद्गलैरापूर्णं भूतं च जीवस्य विग्रहगतिमधिकृत्य कियतः कालस्य सम्बन्धि, कियन्तं कालं यावद-व्याप्यते इत्यर्थः, भगवानाह--एकसमयेन द्विसमयेन त्रिसमयेन वा विग्रहेणापूर्णं स्पृष्टं च लभ्यते

इति वाक्यशेषः, तत एतावता उत्कर्षतः त्रिसमयप्रमाणस्य कालस्य सम्बन्धि यशोक्तप्रमाणं क्षेत्रं वेदनाजननयोग्यैः पुद्गलैरापूर्णतावता कालस्य सम्बन्धि स्पृष्टमिति।

सम्प्रति यावन्तं कालं वेदनाजननयोग्यान् पुद्गलान् विक्षिपति तावत्कालप्रमाणं प्रतिपादनार्थमाह–'ते णं भंते !' इत्यादि, तान् वेदनाजननयोग्यान् पुद्गलान् णमिति वाक्यालङ्कारे भदन्त ! परमकल्याणयोगिन् परमसुखयोगिन् वा पुद्गलान् कियतः कालस्य सम्बन्धिनो विक्षिपति कियत्कालं वेदनाजननयोग्यान् विक्षिपतीति भावः, भगवानाह–जघन्येनाप्यन्तर्मुहूर्तस्य सम्बन्धिन उत्कर्षतोऽप्यन्तर्मुहूर्तस्य, केवलं मनाक् बृहत्तरस्य सम्बन्धिनः विक्षिपति, किमुक्तं भवति ? –ये पुद्गला जघन्यत उत्कर्षतश्चान्तर्मुहूर्तं यावत् वेदनाजननसमर्थाः तान् तथा २ वेदनार्त्तः सन् स्वशरीरगतान् स्वशरीराद्बहिरात्मप्रदेशेभ्योऽपि विश्लिष्टान् विक्षिपति, यथाऽत्यन्तदाहज्वरपीडितः सन् सूक्ष्मपुद्गलान्, प्रत्यक्षसिद्धं चैतदिति,

'ते णं भंते !' इत्यादि, ते णमिति पूर्ववत् भदन्त ! पुद्गला विक्षिप्ताःसन्तः शरीरसम्बद्धा असम्बद्धा वा 'जाइं तत्थे'त्यादि प्राकृतत्वात् पुंस्त्वेऽपि नपुंसकता यान् तत्र वेदनासमुद्घातगतपुरुषसंस्पृष्टे क्षेत्रे प्राणान्–द्वित्रिचतुरिन्द्रियान् शङ्खकोटिकाक्षकादीन् भूतान्–वनस्पतीन् जीवान्–पञ्चेन्द्रियान् गृहगोधिकासर्पादीन् सत्त्वान्–शेषपृथिवीकायिकादीन् अभिघ्नन्ति–अभिमुखमागच्छन्तो घ्नन्ति वर्तयन्ति–आवर्त्तपतितान् कुर्वन्ति लेशयन्ति–मनाक् स्पृशन्ति सङ्घातयन्ति–परस्परं तान् सङ्घातमापन्नान् कुर्वन्ति–अतीव सङ्घातविशेषमापादितान् कुर्वन्ति परितापयन्ति–पीडयन्ति क्लमयन्ति–मूर्च्छापन्नान् कुर्वन्ति अपद्रावयन्ति–जीवितात् व्यपरोपयन्ति, तेभ्यः पुद्गलेभ्यः तेषां प्राणादीनां विषये भदन्त ! सः–अधिकृतो वेदनासमुद्घातगतो जीवः कतिक्रियः प्रज्ञप्तः ?, भगवानाह–

गौतम ! 'सिय तिकिरिए' इति, स्यात्शब्दः कथञ्चित्पर्यायः, कथञ्चित् कदाचित् कांश्चिच्च जीवानधिकृत्येत्यर्थः त्रिक्रियः, किमुक्तं भवति ? –यदा न केषाञ्चित् सर्वथा परितापनं जीविताद् व्यपरोपणं वा करोति तदा सर्वथा त्रिक्रिया एव, यदापि केषाञ्चित्परितापं मरणं वाऽऽपादयति तदापि येषां नावाधामुत्पादयति तदपेक्षया त्रिक्रियाः, 'सिय चउकिरिए' इति केषाञ्चित्परितापकरणे तदपेक्षया चतुष्क्रिय इति, केषाञ्चिदपद्रावणे तदपेक्षया पञ्चक्रिया इति, सम्प्रति तमेवाधिकृतं वेदनासमुद्घातगतं जीवमधिकृत्य तेषां वेदनासमुद्घातगतपुरुषपुद्गलस्पृष्टानां जीवानां क्रिया निरूपयति–

'ते णं भंते !' इत्यादि, ते–वेदनासमुद्घातगतपुद्गलस्पृष्टा णमिति पूर्ववत् भदन्त ! जीवास्ततो–वेदनासमुद्घातपरिगतान् जीवान् अत्र 'स्थानियपः कर्माधारयोः' इति स्थानिनं यवमधिकृत्य पञ्चमीयं, अयमर्थः–तं वेदनासमुद्घातपरिगतं जीवमधिकृत्य कतिक्रियाः प्रज्ञप्ताः ?, भगवानाह –गौतम ! स्यात्त्रिक्रियाः यदा न काञ्चित्तस्याबाधामापादयितुं प्रभविष्णवः स्युस्तदा त्रिक्रिया यदा तं परितापयन्ति, दृश्यन्ते शरीरेण स्पृश्यमानाः परितापयन्तो वृश्चिकादयः, स्यात् पञ्चक्रियाःये तं जीविताद्पि व्यपरोपयन्ति, सिद्धाश्च प्रत्यक्षतः शरीरेण स्पृश्यमाना जीविताव्यावयन्तः सर्पादय इति, सम्प्रति तेन वेदनासमुद्घातगतेन जीवेन व्यापाद्यमानैर्जीवैर्येऽन्ये जीवा व्यापाद्यन्ते ये चान्यैर्जीवैर्व्यापाद्यमानान् वेदनासमुद्घातगतेन जीवेन व्यापाद्यन्ते तानधिकृत्य तस्य वेदनासमुद्घातपरिगतस्य

तेषां च समुद्घातगतजीवसम्बन्धिपुद्गलस्पृष्टानां जीवानां क्रियानिरूपणार्थमाह-

'से णं भंते ! जीवे ते य जीवा' इत्यादि, सः-अधिकृतो वेदनासमुद्घातगतो जीवः ते च वेदनासमुद्घातपरिगतजीवसम्बन्धिपुद्गलस्पृष्टाःअन्येषां जीवानामुपदर्शितेन प्रकारेण यः परम्पराघातस्तेन परम्पराघातेन कतिक्रियाः प्रज्ञप्ताः ?, भगवानाह-गौतम ! स्यात् तिस्रः क्रियाः इत्यादि पूर्ववत् भावयितव्यः, एनमेव वेदनासमुद्घातमुक्तेन प्रकारेण नैरयिकादिषु चतुर्विंशतिस्थानेषु चिन्तयन्नाह-

'नेरइए णं भंते !' इत्यादि, एवं-उक्तेन प्रकारेण यथैव प्राक् सामान्यतो जीवो वेदनासमुद्घातमधिकृत्य चिन्तितः तथा नैरयिकोऽपि चिन्तयितव्यः, नवरं जीवाभिलापस्थाने नैरयिकाभिलापः कर्त्तव्यो, यथा 'नेरइए णं भंते ! वेदनासमुग्घाएणं समोहए समोहणित्ता जे पोग्गले निच्छुभइ' इत्या, 'एवं निरवसेसं जाव वेमाणिए' इति एवं-नैरयिकोक्तेन प्रकारेण शेषेष्वपि स्थानेषु स्वस्वाभिलापपूर्वकं निरवशेषं तावद्वक्तव्यं यावद्वैमानिकाः-वैमानिकाभिलापः ।

तदेवमुक्तो वेदनासमुद्घातः, सम्प्रति कषायसमुद्घातं समानवक्तव्यत्वादतिदेशतोऽभिधित्सुराह-'एवं कसायसमुग्घाओऽवि भाणियव्वो' इति, एवं-वेदनासमुद्घातगतेन प्रकारेण सामान्यतो जीवपदे चतुर्विंशतिदण्डकक्रमेण च कषायसमुद्घातोऽपि वक्तव्यः स चैवम्- 'जीवे णं भंते! कसायसमुग्घाएणं समोहए समोहणित्ता जे पोग्गले निच्छुभइ' यान् पुद्गलान् शरीरान्तर्गतान् कषायसमुद्घातवशसमुत्थप्रयत्नविशेषतः स्वशरीराद्बहिरात्मप्रदेशेभ्योऽपि विश्लिष्टान् करोति,

'तेहि णं भंते! पोग्गलेहिं केवइए खेत्ते अप्फुण्णे केवइए खित्ते फुडे ?, गो० ! सरीरप्पमाणमेत्ते विक्खंभबाहल्लेणं नियमा छद्दिसिं एवइए खेत्ते अफुण्णे एवइए खेत्ते फुडे' कषायसमुद्घातो हि प्रथमं उद्भवति त्रसजीवानां, तेषामेव तीव्रतराध्यवसायसम्भवाद्, एकेन्द्रियाणां तु पूर्वभवानुवृत्तितः, त्रसजीवाश्च त्रसनाड्यां न ततो बहिः, त्रसनाड्यां च व्यवस्थितः स्वशरीरप्रमाणं विष्कम्भबाहल्यं क्षेत्रमात्मविश्लेष्टैः पुद्गलैः भूतं षड्दिक्कत्वमवश्यमुपपद्यते इति 'नियमा छद्दिसिं' मित्युक्तम्, 'एवइए खेत्ते अफुण्णे एवइए खेत्ते फुडे' इत्यादि सर्वं समानं । सम्प्रति मरणसमुद्घातमभिधित्सुराह-

'जीवे णं भंते! मारणंतियसमुग्घाएण' मित्यादि, इति पूर्ववत्, भदन्त ! कश्चिन्मारणान्तिकसमुद्घातेन समवहतः समवहत्य च यान् पुद्गलान् तैजसादिशरीरान्तर्गतान् 'निच्छुभइ' इति विक्षिपति, आत्मप्रदेशेभ्यो विश्लिष्टान् करोति तैर्भदन्त ! पुद्गलैः कियत् क्षेत्रमापूर्णं कियत् क्षेत्रं स्पृष्टम् ?, भगवानाह-गौतम ! विष्कम्भबाहल्यतः शरीरप्रमाणमायामतो जघन्यतः स्वशरीरातिरेकाङ्गुलासङ्ख्येयभाग मात्रं यदा तावन्मात्रे क्षेत्रे उत्पद्यते उत्कर्षतोऽसङ्ख्येयानि योजनानि एतच्च यदा तावति क्षेत्रे अन्यथा वा द्रष्टव्यम्, एकदिशि-एकस्यां दिशि न तु विदिशि स्वभावतो जीवप्रदेशानां दिशि गमनसम्भवात्, एतावत् क्षेत्रमापूर्णमेतावत् क्षेत्रं स्पृष्टं, जघन्यतः उत्कर्षतो वा आत्मप्रदेशैरपि एतावत् क्षेत्रस्य पूरणसम्भवात्, सम्प्रति विग्रहगतिमधिकृत्यापूरणविषयं स्पर्शनविषयं च कालप्रमाणमाह-

'से णं भंते !' इत्यादि, तत् उत्कर्षेणायामतोऽनन्तरोक्तप्रमाणं भदन्त ! क्षेत्रं विग्रहगतिमधिकृत्य 'केवइयकालस्स'त्ति तृतीयार्थे षष्ठया भावात् कियता कालेनापूर्णा कियता कालेन

स्पृष्टं किमुक्तं भवति ? –विग्रहगतिमधिकृत्य कियता कालेनोत्कर्षतोऽसङ्ख्येययोजनप्रमाणं क्षेत्रमायामतः पुद्गलैरापूर्णं स्पृष्टं भवतीति, भगवानाह–गौतम ! एकसमयेन वा द्विसमयेन वा त्रिसमयेन वा चतुःसमयेन वा विग्रहेणापूर्णं स्पृष्टं, इह पञ्चसामयिकोऽपि विग्रहः सम्भवति परं स कादाचित्क एव इति न विवक्षितः, इयमत्र भावना–उत्कृष्टपदे आयामपतोऽसङ्ख्येयोजनप्रमाणं क्षेत्रं विग्रहगतिमधिकृत्योत्कर्षतः चतुर्भिः समयैरापूर्णं स्पृष्टं वा भवतीति, अथ कथं चतुःसामयिकः पञ्चसामयिको वा विग्रहः सम्भवति ?, उच्यते, त्रसनाड्या बहिरधस्तनभागादुपरितने भागे यद्वोपरितनभागादधस्तने भागे समुत्पद्यमानो जीवो विदिशो वा दिशि दिशो वा विदिशि यदोत्पद्यते तदा एकेन समयेन त्रसनाडीं प्रविशति द्वितीयेनोपरि अधो वा गमनं तृतीयेन बहिर्निष्सरणं चतुर्थेन दिशि उत्पत्तिदेशप्राप्तिः, अयं चतुःसामयिको विग्रहः, एवं पञ्चसामयिकस्तु त्रसनाड्या बहिरेव विदिशो विदिशि उत्पत्तौ लभ्यते, तद्यथा–प्रथमसमये त्रनाड्या बहिरेव विदिशो दिशि गमनं द्वितीये त्रसनाड्या मध्ये प्रवेशः तृतीये उपर्यधो वा गमनं चतुर्थे बहिर्निस्सरणं पञ्चमे विदिश्युत्पत्तिदेशगमनमिति, उपसंहारमाह–'एवइयकालस्स अप्फुण्णं एवइकालस्स फुडं' इति एतावता कालेनापूर्णमेतावताकालेन स्पृष्टमिति, 'सेसं तं चेव जाव पंचकिरिए' इति अत ऊर्ध्वं शेषं तदेव सूत्रं–'ते णं भंते ! पुग्गला निच्छूढा समाणा जाइं तत्थ पाणाइं इत्यादि यावत् पंचकिरिया' इति पदं, तदेवं सामान्यतो जीवपदे मारणान्तिकसमुद्घातश्चिन्तितः, सम्प्रति एनमेव चतुर्विंशतिदण्डकक्रमेण चिन्तयन् प्रथमो नैरयिकातिदेशमाह–

'एव'मित्यादि, एवं–सामान्यतो जीवपद इव नैरयिकेऽपि वक्तव्यं, नवरमयं विशेषः–सामान्यतो जीवपदे क्षेत्रमायामतो जघन्येनाङ्गुलासङ्ख्येयभागमात्रमुक्तं इह तु जघन्यतः सातिरेकं योजनसहस्रं, किमत्र कारणमिति चेत् ?, उच्यते, इह नैरयिकाः नरकादुद्वॉत्ताः स्वभावत एव पञ्चेन्द्रियतिर्यक्षु मध्ये उत्पद्यन्ते मनुष्येषु वा नान्यत्र, सर्वजघन्यचिन्ता चात्र क्रियते, ततो यदा पातालकलशसमीपवर्त्ती नैरयिकः पातालकलशमध्ये द्वितीये वा त्रिभागे मत्स्यतयोत्पद्यते तदा पातालकलशठिक्करिकाया योजनसहस्रमानत्वत् यथोक्तं जघन्यमानं नातोऽपि न्यूनतरं कथंचनेति, उत्कर्षतोऽसङ्ख्येयानि योजनानि, तानि सप्तमपृथिवीगतनारकापेक्षया भावनीयानि, अत्रैवोपसंहारमाह–

'एगदिसिं एवइए' इत्यादि, एकस्यां दिशि जघन्यत उत्कर्षतश्च एतावत्–अनन्तरोक्तप्रमाणं क्षेत्रमापूर्णमेतावत् क्षेत्रं स्पृष्टं, विग्रहगतिमधिकृत्य विशेषमाह–'विग्गहे णे'त्यादि, विग्रहेणापूर्णं स्पॉष्टं वा वक्तव्यैकसामयिकेन द्विसामयिकेन त्रिसामयिकेन वा, नन्वेतत् सामान्यतो जीवपदेऽप्युक्तं तत्कोऽत्र विशेषस्तत आह–'नवरं चउसमइएण वा ण भन्नइ' इति नवरमत्र सामान्यजीवपद इव चतुःसामयिकेनेति न भण्यते, नैरयिकाणामुत्कर्षतोऽवि विग्रहस्य त्रिसामयिकत्वात्, ते च त्रयः समया एवं भवन्ति–इह कश्चिन्नैरयिको वायव्यां दिशि वर्त्तमानो भरतक्षेत्रे पूर्वस्यां दिशि तीर्यक्पञ्चेन्द्रियतया मनुष्यतया वोत्पित्सुः प्रथमसमये ऊर्ध्वमागच्छति द्वितीयसमये वायव्या दिशः पश्चिमदिशं तृतीये ततः पूर्वदिशमिति स, एवमसुरकुमारादिष्वपि यथायोगं त्रिसमयविग्रहभावना कार्या, 'सेसं तं चेव जाव पंचकिरियावि' इति शेषं सूत्रं तदेव वेदनासमुद्घातगतं,

'ते णं भंते ! पोग्गला केवइया कालस्स निच्छुभंति ?, गो० ! जहन्नेणवि अंतो० उक्को०

अंतोमुहुत्तस्से'त्यादि तावद्वक्तव्यं यावद[redacted]मं पदं 'पंचकिरियावि' इति, असुरकुमारविषये अतिदेशमाह–'असुरकुमारस्स जहा जी[redacted]वपदे' इति यथा सामान्यतो जीवपदेऽभिहितं तथा असुरकुमारस्याप्यभिधातव्यं, एतावत[redacted]केमुक्तं भवति ?–यथा जीवपदे आयामतः क्षेत्रं जघन्यतोऽङ्गुलासङ्ख्येयभागमात्रं उत्[redacted]तोऽसङ्ख्येयानि योजनानि तथाऽत्रापि वक्तव्यं, कथं जघन्यतोऽङ्गुलासङ्ख्येयभागमात्रमि[redacted]चेत्, उच्यते, इहासुरकुमारादय ईशानदेवपर्यन्ताः पृथिव्यम्बुवनस्पतिष्वप्युत्पद्यन्ते, ततो[redacted]ऽसुरकुमारःसङ्क्लिष्टाध्यवसायी स्वकुण्डालाद्येकदेशे पृथिवीकायिकत्वेनोत्पित्सुर्म[redacted]समुद्घातमादधाति तदा जघन्येनायामतः क्षेत्रमङ्गुलासङ्ख्येयभागप्रमाणमवाप्यते इति य[redacted]वपदे इत्युक्तं, ततोऽत्रापि विग्रहगतिश्चतुःसामयिकी प्राप्नोति तत आह–नवरं विग्रहस्ति[redacted]मयिको यथा नैरयिकस्य, शेषं सूत्रं तदेव यत् सामान्यतो जीवपदे, नागकुमारादिष्वतिदेशम[redacted]–

'जहा असुरकुमारे' इत्यादि[redacted]या असुरकुमारेऽभिहितमेवं नागकुमारादिषु तावद् वक्तव्यं यावद्वैमानिकविषयं सूत्रं, नवरमे[redacted]द्रिये पृथिव्यादिरूपे यथा जीवे–सामान्यतो जीवपदे तथा निरवशेषं वक्तव्यं, किमुक्तं भ[redacted]?–यथा जीवपदे चतुःसामयिकोऽपि विग्रह उक्तः तथा पृथिव्यादिष्वपि पञ्चसु स्थानेषु[redacted]यः । शेषं तथवेति, तदेवमुक्तो मारणान्तिकसमुद्घातः,

साम्प्रतं वैक्रियसमुद्घातमभिधित्सुराह–

सू. (६१३) *जीवे णं भंते ! वेउव्वियसमुग्घाएणं समोहते समोहणित्ता जे पुग्गले निच्छुभति तेहि णं भंते ! पोग्गलेहिं केवतिते खेत्ते अफुण्णे केवतिए खित्ते फुडे ?, गो० ! सरीरप्पमाणमेत्ते विक्खंभबाहल्लेणं आयामेणं जह० अंगुलस्स संखेज्जतिभागं उक्को० संखिज्जाति जोअनाति एगदिसिं विदिसिं वा एवइए खित्ते अफुण्णे एवतिते खेत्ते फुडे,*

से णं भंते ! केवतिकालस्स अफुण्णे केवतिकालस्स फुडे ?, गो० ! एगसमइएण वा दुसमइएण वा तिसमइएण वा विग्गहेणं एवतिकालस्स अफुण्णे एवतिकालसस फुडे, सेसं तं चेव जाव पंचकिरियावि, एवं नेरइएवि, नवरं आयामेणं जह० अंगुलस्स असंखेज्जतिभागं उक्को० संखिज्जाइं जोअनाइं एगदिसिं, एवतिते खेत्ते, केवतिकालस्स ?, तं चेव जहा जीवपदे, एवं जहा नेरइयस्स तहा असुरकुमारस्स, नवरं एगदिसिं विदिसिं वा, एवं जाव थणियकुमारस्स, वाउकाइयस्स जहा जीवपदे, नवरं एगदिसिं, पंचिंदियतिरिक्खजोणियस्स निरवसेसं जहा नेरइयस्स, मणूसवाणमंतरजोइसियवेमाणियस्स निरवसेसं जहा असुरकुमारस्स ।

जीवे णं भंते ! तेयगसमुग्घाएणं समोहते समोहणित्ता जे पोग्गले निच्छुब्भति तेहि णं भंते पोग्गलेहिं केवतिते खेत्ते अफुण्णे केवइए खित्ते फुडे, एवं जहेव वेउव्विते समुग्घाते तहेव, नवरं आयामेणं जह० अंगुलस्स असंखेज्जतिभागं सेसं तं चेव एवं जाव वेमाणियस्स, नवरं पंचिंदियतिरिक्खजोणियस्स एगदिसिं एवतिते खेत्ते अफुण्णे एवइखित्तस्स फुडे ।

जीवे णं भंते ! आहारगसमुग्घातेणं समोहते समोहणित्ता जे पोग्गले निच्छुब्भति तेहि णं भंते ! पोग्गलेहिं केवइए खित्ते अफुण्णे केवइए खेत्ते फुडे ?, गो० ! सरीरप्पमाणमेत्ते विक्खंभबाहल्लेणं आयामेणं जहन्नेणं अंगुलस्स असंखेज्जतिभागं उक्को० संखेज्जाइं जोयणाइं एगदिसिंएवतिते खेत्ते एगसमतिएण वा दुसम०, तिसम० विग्गहेणं एवतिकालस्स अफुण्णे एवतिकालस्स फुडे,

ते णं भंते ! पोग्गला केवतिकालस्स निच्छुब्भति ?, गो० ! जह० अंतो० उक्को० अंतोमुहुत्तस्स, ते णं भंते ! पोग्गला निच्छूढा समाणा जातिं तत्थ पाणातिं भूयातिं जीवातिं सत्तातिं अभिहणंति जाव उद्दवेंति, ते णं भंते ! जीवे कतिकिरिए ?, गो० ! सिय तिकि० सिय चउ० सिय पंचकिरिए,

ते णं भंते ! जीवाओ कतिकिरिया ?, गो० ! एवं चेव, से णं भंते ! ते य जीवा अन्नेसिं जीवाणं परंपराघातेणं कतिकिरिया ?, गो० ! तिकिरियावि चउकिरियावि पंचकि०, एवं मणूसेवि

सू. 'जीवे णं भंते! वेउव्विए' इत्यादि प्राग्वत्, नवरमायामतः उत्कर्षतः सङ्ख्येयानि योजनानि, एतच्च वायुकायिकवर्जनैरयिकाद्यपेक्षया द्रष्टव्यं, ते हि वैक्रियसमुद्घातमारभमाणास्तथाविधप्रयत्नविशेषभावतः सङ्ख्येयान्येव योजनान्युत्कर्षतोऽप्यात्मप्रदेशानां दण्डमारचयन्ति, नासङ्ख्येयानि योजनानि, वायुकायिकास्तु जघन्यतो वा उत्कर्षतो वा अङ्गुलासङ्ख्येयभागं, तावत्प्रमाणं चोत्कर्षतो दण्डमारचयन्तस्तावति प्रदेशे तैजसादिशरीरपुद्गलान् आत्मप्रदेशेभ्यो विक्षिपन्ति, ततस्तैः पुद्गलैर्भृतं क्षेत्रमायामतः उत्कर्षतोऽपि सङ्ख्येयान्येव योजनान्यवाप्यन्ते, एतच्चैवं क्षेत्रप्रमाणं केवलं वैक्रियसमुद्घातसमुद्भवं प्रयत्नमधिकृत्योक्तं, यदा तु कोऽपि वैक्रियसमुद्घातमधिरूढो मरणमुपश्लिष्टः कथमप्युत्कृष्टदेशेन त्रिसामयिकेन विग्रहेणोत्पत्तिदेशमभिगच्छति तदा सङ्ख्यातीतान्यपि योजनानि यावदायामक्षेत्रमवसेयं, तावत्प्रमाणं क्षेत्रापूरणं मरणसमुद्घातप्रयत्नसमुद्भवमिति सदपि न विवक्षितं,

'एकदिसिं विदिसिं वा' इति, तत् जघन्यत उत्कर्षतो वा यथोक्तप्रमाणमायामक्षेत्रमेकस्यां दिशि विदिशि वा द्रष्टव्यं, तत्र नैरयिकाणां पञ्चेन्द्रियतिरश्चां वायुकायिकानां च नियमादेकदिशि, नैरयिका हि परवशा अल्पर्द्धयश्च तिर्यक्पञ्चेन्द्रियाश्चाल्पर्द्धय एव वायुकायिका विशिष्टचेतनाविकलास्ततस्तेषां वैक्रियसमुद्घातमारभमाणानां यदि परं तथास्वाभाव्यादेवात्मप्रदेशदण्डवनिर्गमस्तेभ्यश्चात्मप्रदेशेभ्यो विश्लिष्य पुद्गलानां च स्वभावतोऽनुश्रेणिगमनं न तु विश्रेणितः ततो दिश्येव नैरयिकतिर्यक्पञ्चेन्द्रियवायुकायिकानामायामतः क्षेत्रं द्रष्टव्यं, नतु विदिशि, ये तु भुवनपतिव्यन्तरज्योतिष्कवैमानिका मनुष्याश्च ते स्वेच्छाचारिणो विशिष्टलब्धिसम्पन्नाश्च भवन्ति ततस्ते कदाचित्प्रयत्नविशेषतो विदिश्यप्यात्मप्रदेशानां दण्डं विक्षिपन्तस्तत्र तेभ्य आत्मप्रदेशेभ्यः पुद्गलान् विक्षिपन्तीति तेषामेकस्यां दिशि विदिशि वा प्रत्येतव्यं।

वैक्रियसमुद्घातगतश्च कोऽपि कालमपि करोति विग्रहेण चोत्पत्तिदेशप्रभिसर्पति ततो विग्रहगतिमधिकृत्य कालनिरूपणार्थमाह--'से णं भंते !' इत्यादि, तत् भदन्त ! क्षेत्रं विग्रहगतिमधिकृत्योत्पत्तिदेशं यावत् 'केवइकालस्स' त्ति तृतीयार्थे षष्ठी कियता कालेनापूर्णं कियता कालेन स्पृष्टं ?, भगवानाह--गौतम ! एकसामयिकेन वा द्विसामयिकेन वा त्रिसामयिकेन वा विग्रहेण आपूर्णं स्पृष्टमिति गम्यते, किमुक्तं भवति ?--विग्रहगतिमधिकृत्य मरणदशादारभ्य उत्पत्तिदेशं यावत् क्षेत्रस्यापूरणमुत्कर्षतः त्रिभिः समयैरवाप्यते न चतुर्थेनापि समयेन, वैक्रियसमुद्घातगतो हि वायुकायिकोऽपि प्रायस्त्रसनाड्यामेवोत्पद्यते, त्रसनाड्यां च विग्रह उत्कर्षतोऽपि त्रिसामयिक इति, उपसंहारमाह--

'एवइकालस्स' इत्यादि सुगमं, 'सेसं तं चेवे'त्यादि अत ऊर्द्धं शेषं सूत्रं तदेव -यथाऽऽहु वेदनासमुद्घाते उक्तं, तद्वाऽऽहारकसमुद्घातेऽपि पदं 'पंचेंदियतिरिक्खाणवि' इति, एवं 'नेरइएणवि' इत्यादि सूत्रं तु स्वयं भावनीयं, यस्तु दिग्विदिगपेक्षया विशेषः स प्रागेव दर्शितः ।

सम्प्रति तैजससमुद्घातमभिधित्सुराह–'जीवे णं भंते! तेयगसमुग्घाएणं'मित्यादि, सुगमं, नवरमयं तैजसमुद्घातश्चतुर्देवनिकायतिर्यक्पञ्चेन्द्रियमनुष्याणां सम्भवति न शेषाणां, ते च महाप्रयत्नवन्त इति तेषां तैजससमुद्घातमारभमाणानां जघन्यतोऽपि क्षेत्रमायामतोऽङ्गुलासङ्ख्येयभागप्रमाणं भवति, न तु सङ्ख्येयभागमानं, उत्कर्षतः सङ्ख्येययोजनप्रमाणं, तच्च जघन्यत उत्कर्षतो वा यथोक्तप्रमाणं क्षेत्रं तिर्यक्पञ्चेन्द्रिययवर्जानामेकस्यां दिशि विदिशि वा वक्तव्यं, तिर्यक्पञ्चेन्द्रियाणां तु दिश्येव, अत्र युक्तिः प्रागुक्तैवानुसर्त्तव्या, तथा चाह–'एवं जहा वेउव्वियसमुग्घाए' इत्यादि । तदेवमुक्तास्तैजससमुद्घातः, साम्प्रतमाहारकसमुद्घातं प्रतिपिपादयिषुराह–

'जीवे णं भंते!' इत्यादि, एतच्च सूत्रं तैजससमुद्घातवद्भावनीयं, नवरमयमाहारकसमुद्घातो मनुष्याणां तत्राप्यधीतचतुर्दशपूर्वाणं तत्रापि केषाञ्चिदेवाहारकलब्धिमतां न शेषाणां, ते चाहारकसमुद्घातमारभमाणा जघन्यत उत्कर्षतो वा यथोक्तप्रमाणमायामतः क्षेत्रमात्मप्रदेशविश्लिष्टैः पुद्गलैरापूरयन्त्येकस्यां दिशि, न तु विदिशि, विदिशि तु प्रयत्नान्तरविशेषादात्मप्रदेशदण्डविक्षेपः पुद्गलैरापूरणं च, न च ते प्रयत्नान्तरमारभते प्रयोजनाभावात् गम्भीरत्वाच्चेति, आहारकसमुद्घातगतोऽपि च कोऽपि कालं करोति विग्रहेण चोत्पद्यते विग्रहश्चोत्कर्षतस्त्रिसामयिक इति

'एगदिसिं एवइए खेत्ते पुढे' तथा 'एगसमइएण वा दुसमइएण वा' इत्याद्युक्तं, तथा मनुष्याणामेवायमाहारकसमुद्घात इति चतुर्विंशतिदण्डकचिन्तोपक्रमे 'एवं मणूसेवि' इत्युक्तं, अस्यायमर्थः–एवं सामान्यतो जीवपदे इव मनुष्येऽपि–मनुष्यचिन्तायामपि सूत्रं वक्तव्यं, जीवपदे मनुष्यानेवाधिकृत्य सूत्रस्य प्रवृत्तत्वाद्, अन्येषामाहारकसमुद्घातासम्भवात् ।।

तदेवं षण्णामपि छाद्मस्थिकानां समुद्घातनामारम्भे जघन्यतः उत्कर्षतो वा यावत्प्रमाणं क्षेत्रमात्मविश्लिष्टैः पुद्गलैर्यथायोगमौदारिकादिशरीराद्यन्तर्गतैरापूरितं भवति तावत्प्रमाणमावेदितं, सम्प्रति केवलिसमुद्घातविधौ यथास्वरूपैः पुद्गलैर्यावत्प्रमाणस्य क्षेत्रस्यापूरणमुपजायते तथास्वरूपैः पुद्गलैस्तावत्प्रमाणस्य क्षेत्रस्यापूरणमभिधित्सुराह–

मू. (६१४) *अनगारस्स णं भंते! भावियप्पणो केवलिसमुग्घातेणं समोहयस्स जे चरमा निज्जरापोग्गला सुहुमा णं ते पोग्गला पं० ? समणाउसो!, सव्वलोगंपिय णं ते फुसित्ताणं चिट्ठंति हंता! गो० ! अनगारस्स भावियप्पणो केवलिसमुग्घाएणं समोहयस्स जे चरमा निज्जरापोग्गला सुहुमा णं ते पोग्गला पं० समणाउसो!, सव्वलोगंपिय णं फुसित्ताणं चिट्ठंति ।*

छउमत्थे णं भंते! मणूसे तेसिं निज्जरापोग्गलाणं किंचि वण्णेणं वण्णं गंधेणं गंधं रसेण वा रसं फासेण वा फासं जाणति पासति ?, गो० ! नो इणट्ठे समट्ठे, से केणट्ठेण भंते! एवं वुच्चति छउमत्थे णं मणूसे तेसिं निज्जरापोग्गलाणं नो किंचि वण्णेणं २ गंधेणं २ रसेणं २ फासेणं २ नो जाणति पासति ?, गो० ! अयण्णं जंबूदीवे दीवे सव्वदीवसमुद्दाणं सव्वब्भंतराए सव्वखुड्डाए वट्टे तेल्लापूयसंठाणसंठिते वट्टे रहचक्कवालसंठाणसंठिए वट्टे पुक्खरकण्णियासंठाणसंठिए वट्टे पडिपुण्णचंदसंठाणसंठिए एगं जोअणसयसहस्सं आयामविक्खंभेणं तिन्नि जोयणसयसहस्साइं

सोलस सहस्साइं दोन्नि सत्तावीसे जोयणसते तिन्नि य कोसे अट्ठावीसं च धनुसतं तेरस य अंगुलाइं अद्धंगुलं च किंचिविसेसाहिते परिक्खेवेणं पं०,

देवे णं महिड्ढीते जाव महासोक्खे एगं महं सविलेवणं गंधसमुग्गतं गहाय तं अवदालेति तं महं एगं सविलेवणं गंधसमुग्गतं अवदालइत्ता इणामेव कट्टु केवलकप्पं जंबुद्दीवं दीवं तिहिं अच्छराणिवातेहिं तिसत्तखुत्तो अणुपरियट्टित्ताणं हव्वमागच्छेज्जा, से नूनं गो०! से केवलकप्पे जंबुद्दीवे दीवे तेहिं घाणपोग्गलेहिं फुडे?, हंता! फुडे, छउमत्थे णं गोतमा! मणूसे तेसिं घाणपुग्गलाणं किंचि वण्णेणं वण्णं गंधेणं गंधं रसेणं रसं फासेणं फासं जाणति पासति?, भगवं! नो इणट्ठे समट्ठे,

से एएणट्ठेणं गोयमा! एवं वुच्चइ–छउमत्थे णं मणूसे तेसिं निज्जरापोग्गलाणं नो किंचि वण्णेणं वण्णं गंधेणं गंधं रसेणं रसं फासेणं फासं जाणति पासति, सुहुमा णं ते पोग्गला पं० समणाउसो!, सव्वलोगंपि य णं फुसित्ताणं चिट्ठंति

वृ. 'अनगारस्स णं भंते!' इत्यादि, इह केवलिसमुद्घातः केवलिनो भवति, न छद्मस्थस्य, केवली निश्चयनयमतेनानगारो न गृहस्थो नापि पाखण्डी, स च नियमाद् भावितात्मा विशिष्टशुभाध्यवसाययकलितत्वात्, अन्यथा केवलित्वानुपपत्तेः, तत उक्तमनगारस्य भावितात्मन इति, केवलिसमुद्घातेन–उक्तस्वरूपेण समवहतस्य ये चरमाः–चरमसमयभाविनश्चतुर्थसमयभाविन इत्यर्थः, तैरेव सकललोकापूरणात्, 'निर्जरापुद्गला' इति निर्जरागुणयोगात् निर्जराः–निर्जीर्णा इत्यर्थः ते च ते पुद्गलाश्चेति विशेषणसमासः, किमुक्तं भवति?–ये लोकापूरणसमये पुद्गला आत्मप्रदेशेभ्यो विश्लिष्टाः परित्यक्तकर्मत्वपरिणामा इति,

'सुहुमा णं ते पुग्गला' इति णमिति निश्चये नियतमेतत् सूक्ष्माः–चक्षुरादीन्द्रियपथमतिक्रान्तास्ते पुद्गलाः प्रज्ञप्ताः भगवद्भिर्हे श्रमण हे आयुष्मन्!, गौतमकृतं भगवतः सम्बोधनमेतत्, तथा णमिति निश्चितमेतत् सर्वलोकमपि ते पुद्गलाः स्पृष्टा णमिति वाक्यालङ्कारे तिष्ठन्ति इति गौतमेन प्रश्ने कृते भगवानाह–'हंता गोयमा!' इत्यादि, हन्तेति प्रीतौ, यदाह शाकटायनः–'हन्तेति सम्प्रदानप्रीतिविषादादिष्वि'ति, प्रीतिश्चात्र यथावस्थितस्वरूपप्रतिपादकत्वात् प्रश्नसूत्रस्य साम्प्रत्यलक्षणा वेदितव्या, न तु हर्षरूपा, क्षीणमोहत्वेन भगवतो हर्षविषादातीतत्वात्, साम्प्रत्यमेव ख्यापयति, यदुक्तं गौतमेन तदेवानुवदति–

'अनगारस्से'त्यादि भावितार्थं। सूक्ष्माः पुद्गला इत्युक्तं, तच्च सूक्ष्मत्वमापेक्षिकमपि भवति यथा बदरादीनामामलकाद्यपेक्षया, ततश्चक्षुरादीन्द्रियगोचरातिक्रान्तरूपं तत्प्रतिपिपादयिषुरिदमाह–'छउमत्थे णं भंते!' इत्यादि, छद्मस्थो भदन्त! मनुष्यः तेषां–अनन्तरोद्दिष्टानां निर्जरापुद्गलानां किञ्चिदिति प्रथमतः सामान्येन प्रयुक्तं जानाति पश्यतीति सम्बध्यते,

एतदेव विशेषतो व्याचष्टे–'वर्णेन' वर्णग्राहकेण चक्षुरिन्द्रियेण वर्ण्यते–यथावस्थितं वस्तुस्वरूपं निर्णीयते अनेनेति वर्ण इति व्युत्पत्तेः वर्णं–कृष्णादिरूपं 'गन्धेन' गन्धग्राहकेण नासिकेन्द्रियेण 'गन्ध आघ्राणे' 'घ्रादिभ्यो णिच्' गन्ध्यते–आघ्रायते शुभोऽशुभो वा गन्धोऽनेनेति गन्ध इति व्युत्पादनात् गन्धं शुभमशुभं वा 'रसेन' रसग्राहकेण रसेन्द्रियेण रस्यते–आस्वाद्यतेऽनेनेति शब्दार्थत्वात् रसं–तिक्तादिरूपं, 'स्पर्शेन' स्पर्शग्राहकेण स्पर्शनेन्द्रियेण स्पृश्यते कर्कशादिरूपः परिच्छेद्यवस्तुगतः स्पर्शोऽनेनेति स्पर्श इति व्युत्पादनात् 'स्पर्श' कर्कशादिरूपं जानाति पश्यतीति

भगवानाह–गौतम ! नायमर्थः समर्थः उपपन्न इत्यर्थः, पुनर्गौतम : प्रश्नयति–

'से केणट्ठेणं भंते !' इत्यादि, उत्तानार्थं, भगवानाह–गौतम ! 'अयण्ण'मित्यादि, अयं-प्रत्यक्षत उपलभ्यमानः, णमिति वाक्यालङ्कारे, अष्टयोजनोच्छ्रितया रत्नमय्या जम्ब्वा उपलक्षितो द्वीपो जम्बूद्वीपो द्वीपः, 'सर्वाभ्यन्तरक' इति सर्वेषामभ्यन्तरो–मध्यवर्ती सर्वाभ्यन्तरः सर्वाभ्यन्तर एव सर्वाभ्यन्तरकः "जातौ वा स्वार्थे क" इति प्राकृतलक्षणवशात् स्वार्थे कप्रत्ययः, केषां सर्वेषा-मभ्यन्तर इत्याह–सर्वद्वीपसमुद्राणां, तथाहि–सर्वे–अशषा द्वीपसमुद्रा जम्बूद्वीपादारभ्याग-मिभिहितेन क्रमेण द्विगुणद्विगणविस्तारा व्यवस्थिताः ततो भवति द्वीपसमुद्राणामेव जम्बूद्वीपोऽ-भ्यन्तरः, तथा 'सव्वखुड्डागे' इति सर्वेभ्यो द्वीपसमुद्रेभ्यः क्षुल्लको–ह्रस्वः सर्वक्षुल्लकः, तथाहि–सर्वे लवणादयः समुद्राः सर्वे च धातकीखण्डादयो द्वीपाः अस्माज्जम्बूद्वीपादारभ्य प्रवचनोक्तेन क्रमेण द्विगुणद्विगुणचक्रवालविततताः ततः शेष द्वीपसमुद्रापेक्षयाऽयं सर्वलघुरिति, तथा वृत्तो–वर्तुलो, यतस्तैलापूपसंस्थानसंस्थितः, तैलेन हि पक्वोऽपूपः प्रायः परिपूर्णवृत्तो भवति न घृतपक्व इति तैलविशेषणं, तस्येव संस्थानसंस्थितः, तथा वृत्तो जम्बूद्वीपो द्वीपो यतो रथचक्रवालसंस्थानसंस्थितः, रथस्य –रथाङ्गस्य चक्रस्य चक्रवालं–मण्डलं तस्येव यत् संस्थान तेन संस्थितः, एवं सूत्रोक्तमन्यदपि पदद्वयं भावनीयं, 'आयामविक्खंभेणं'ति आयामश्च विष्यकम्भश्चेति समाहारो द्वन्द्वः तेन आयामेन विष्कम्भेन च प्रत्येकमेकं योजनशतसहस्रमित्यर्थः, परिधिपरिमाणानयनगणितं च जम्बूद्वीपप्रज्ञप्ति-यादावनेकशो भावितमिति ततोऽवधार्यं

'देवेण'मित्यादि, देवश्च णमिति वाक्यालङ्कारे 'महर्द्धिक' इति महती ऋद्धीः -विमानपरि-वारादिका यस्या सौ महर्द्धिकः 'जाव महासोक्खे' इति यावत्शब्दकरणात् 'महज्जुइए महाबले महायसे' इति द्रष्टव्यं, तत्र महती द्युतिः–शरीराभरणविषया यस्य स महाद्युतिः, महद्बलं–शारीरः प्राणो यस्य स महाबलः महत् यशः–ख्यातिर्यस्य स महायशाः, तथा महत्–प्रभूतं सौख्यं यस्य प्रभूतसद्वेद्यकर्मोदयभावादिति महासौख्यः, क्वचित्–'महेसक्खे' इति पाठः, तत्र महान् ईश–ईश्वर इत्याख्या– शब्दप्रथा यस्य लोके स महेशाख्यः, अथवा ईशनमीशो, भावे धञ्प्रत्ययः, ऐश्वर्यमित्यर्थः ईश ऐश्वर्ये' इति वचनात्, तत ईशं–ऐश्वर्यमात्मनः ख्याति–अन्तर्भूतण्यर्थतया ख्यापयति प्रकाशयति तथा परिवारादिस्फीत्या वर्त्तते इति ईशाख्यः महांश्चासावीशाख्यश्च महेशाख्यः अन्यत्र 'महासक्खे' इति वा पाठः, तत्रैवं वृद्धव्यख्या–आशुगमनादक्षं–मनः अक्षाणि–इन्द्रियाणि स्वस्व-विषयव्यापकत्वात्, अक्षशब्दो हि प्रायेणाशुङ् व्यासावित्यस्य वातोर्निष्पाद्यते, अश्वश्चाक्षाणि च अश्वाक्षाणि, महान्ति-स्फीतिमन्ति अश्वाक्षाणि यस्यासौ महाश्वाक्षः, स्फीतमनाः स्फूर्त्तिम-च्चक्षुरादीन्द्रियश्चेत्यर्थः, एकं महान्तं–अतिगुरुकमन्यथा स्तोकतया तद्गतैर्गन्धपुद्गलैः सकलस्य जम्बूद्वीपस्य व्याप्तुमशक्यत्वात्,

'सविलेवण'मिति सह विशष्टं–अतिसूक्ष्मरंध्राणामपि स्थमनात् लेपनं लेपो–जत्वादिकृतं पिधानमुपरि वर्त्तते येन स तथा तं, विशिष्टलेषप्रदानाभावे हि बहवः सूक्ष्मरन्ध्रैर्गन्धपुद्गला निर्गच्छन्ति ततः उद्घाटनवेलायां तेषां स्तोकीभावेन सकलजम्बूद्वीपापूरणं नोपपद्यते, 'गंधसमुग्गयं'-तिगन्धद्रव्यैरतिविशिष्टैः परिपूर्णं भृतः समुद्गको गन्धसमुद्गकस्तं 'अवदालेइ'त्ति अवदालयति उत्पाटतीत्यर्थः, 'इणामेव'ति एवमेवेत्यर्थः 'केवलकप्पं'ति केवलं–केवलज्ञानं तत्कल्पं परिपूर्णतया

तत्सदशं परिपूर्णमित्यर्थः, जम्बूद्वीपं द्वीपं त्रिभिः अप्सरोनिपातो नाम–चप्पुटिका ततस्तिसृभिः चप्पुटिकाभिरिति द्रष्टव्यं, चप्पुटिकाश्च कालोपलक्षणं, ततोऽयमर्थः–यावता कालेन तिस्रश्चप्पुटिकाः पूर्यन्ते तावत्कालमध्ये इति, त्रिसप्तकृत्वः–एकविंशतिवारान् अतिपरिवर्त्य–सामस्त्येन परिभ्रम्य 'हव्वं' शीघ्रमागच्छेतः–समागच्छेत्

'से नूनं' इत्यादि, सेशब्दो मगधदेशप्रसिद्धया अथशब्दार्थे, अथशब्दस्य चार्थो वाक्योपन्यासादयः उक्तं च–'अथ प्रक्रियाप्रश्नानन्तर्यमङ्गलाधिकारवाक्योपन्यासेषु' तत्राय वाक्योपन्यासे, तद्भावना च एवं –उक्तस्तावत् विवक्षितार्थप्रतिपत्तिहेतोर्दृष्टान्तस्य पीठिकाबन्धः, सम्प्रति विवक्षितार्थप्रतिपत्तिहेतुदृष्टान्तवाक्यमुपन्यस्यते, नूनं–निश्चितं, गौतम! स केवलकल्पो जम्बूद्वीपस्तैर्गन्धसमुद्रकाद्विनिर्गतैः घ्राणपुद्गलैः–गन्धपुद्गलैः स्पृष्टो–व्याप्तः, काक्वा चेदं सूत्रमधीयते ततः प्रश्नोऽवगम्यते, अथवा प्रश्नार्थः सेशब्दस्ततोऽञ्जसा प्रश्नयतीति, गौतम! आह–हंत! स्पृष्टो गन्धपुद्गलानां सर्वतोऽगिसर्प्पणशीलत्वात्, पुनरपि भगवानाह-

'छउमत्थे ण'मित्यादि सुगमम् एष चात्र भावार्थः–यथा ते सकलजम्बूद्वीपव्यापिनो गन्धपुद्गलाः सूक्ष्मत्वात् न छद्मस्थानां चक्षुरादीन्द्रियगम्यास्तथा सकललोकव्यापिनो निर्जरापुद्गला अपीति, उपसंहारमाह–'एमुदुगण'ंति एतावत्सूक्ष्माः अत्र निमित्तं केवली समुद्घातमारभते तत्पिपृच्छिषुरिदं प्रश्नसूत्रमाह

मू. (६१५) कम्हा णं भंते! केवली समुग्घायां गच्छति?, गो० ! केवलिस्स चत्तारि कम्मंसा अक्खीणा अवेदिया अनिज्जिण्णा भवंति, तं०–वेदणिज्जे आउए नामे गोए, सनव्यबहुप्पएसे से वेदणिज्जे कम्मे हवति सव्वत्थोवे आउए कम्मे हवइ, विसमं समं करेति बंधणेहिं ठितीहि य, विसमसमीकरणयाए बंधणेहिं ठितीहि य एवं खलु केवली समोहणति,

एवं खलु समुग्घायं गच्छति, सव्वेवि णं भंते! केवली समोहणंति सव्वेवि णं भंते! केवली समुग्घातं गच्छंति?, गो० ! नो इणट्ठे समट्ठे,

वृ. 'कम्हा ण'मित्यादि, कस्मात् कारणात् णमिति वाक्यालङ्कारे भदन्त! 'केवली' केवलज्ञानोपेतः समुद्घातं गच्छति–आरभते, कृतकृत्यत्वात् किल तस्येति भावः, भगवानाह–'गोयमे'त्यादि, गौतम! केवलिनश्चत्वारः 'कर्मांशाः' कर्मभेदाः 'अक्षीणाः' क्षयमनुपगताः, कुत इत्याह–अवेदिताः, अत्र 'निमित्तकारणहेतुषु सर्वासां विभक्तीनां प्रायो दर्शन'मिति न्यायात् हेतौ प्रथमा, ततोऽयमर्थः–यतोऽवेदिताः ततोऽक्षीणाः, कर्मणां हि क्षयो नियमतः प्रदेशतो विपाकतो वा वेदनाद् भवति, 'सव्वं च पएसतया भुञ्जइ कम्ममणुभावतो मइय' मित्यादि वचनात्, ते चत्वारः कर्मांशा अपि अवेदिता अतोऽक्षीणाः, एतदेव पर्यायेण व्याचष्टे–'अनिर्जीर्णाः' सामस्त्येनात्मप्रदेशेभ्योऽपरिशाटिताः 'भवन्ति' तिष्ठन्ति, तानेव नामग्राहमभिधित्सुराह–

'तंजहे'त्यादि सुगमं, तत्र यदा 'से' तस्य केवलिनः सर्वबहुप्रदेशं वेदनीयमुपलक्षणमेतत् नामगोत्रे च तथा सर्वस्तोकप्रदेशमायुःकर्म तदा स 'बंधणेहिं ठिइहि'न्ति बध्यते–भवचारकांत् विनिर्गच्छन् प्रतिबध्यते यैस्ते बन्धनाः, 'करणाधारे' इति करणेऽनट्प्रत्ययः, अथवा बध्यन्ते–आत्मप्रदेशैः सह लोलीभावेन संश्लिष्यः क्रियन्ते योगवशात् ये ते बन्धनाः 'कृद्बहुल'मिति वचनात् कर्मणि अनट्, उभयत्रापि कर्मपरमाणवो वाच्याः, स्थितयो–वेदनाकालाः, तथा चोक्तं भाष्यकृता–

॥ १ ॥ "विसमं स करेइ समं समोहओ बंधणेहि ठिइए य।
कम्मद्दव्वाइं बंधणाति कालो ठिई तेसिं ॥"

ततश्च तैर्बन्धनैः स्थितिभिश्च विषमं सत् वेदनीयादिकं समुद्घातविधिना सममायुषा सह करोति, स एवं खलु केवली बन्धनैः स्थितिभिश्च विषमस्य सतो वेदनीयादिकस्य कर्मणः 'समीकरणयाए' इति अत्र ताप्रत्ययः स्वार्थिकः, ततोऽयमर्थः-समकरणाय 'समोहन्नइ' इति समवहन्ति-समुद्घातय प्रयतते, एवं खलु समुद्घातं गच्छति, उक्तं च-

॥ १ ॥ "आयुषि [illegible] शेषाणि कर्मणां च यदि [illegible]।
न स्यात् स्थितिवैषम्यात् गच्छति स ततः समुद्घातम् ॥
॥ २ ॥ स्थित्या च बन्धनेन च समीक्रियार्थं हि कर्मणां तैषाम्।
अन्तर्मुहूर्तशेषे तदायुषि समुद्घिघांसति सः ॥"

ननु प्रभूतस्थितिकस्य वेदनीयादेरायुषा सह समीकरणार्थं समुद्घातमारभते इति यदुक्तं तन्नोपपन्नं, कृतनाशादिदोषप्रसङ्गात्, तथाहि-प्रभूतकालोपभोग्यस्य वेदनीयादेरारत एवापगमसम्भवात् कृतनाशः, वेदनीयादिवच्च कृतस्यापि कर्मक्षयस्य पुनर्नाशसम्भवान्मोक्षेऽप्यनाश्वसप्रसङ्गः, तदसत्, कृतनाशादिदोषाप्रसङ्गात्, तथाहि-इह यथा प्रतिदिवसं सेतिकापरिभोगेन वर्षशतोपभोग्यस्य कल्पितस्याहारस्य भस्मकव्याधिना तत्सामर्थ्यात् स्तोकजिवसैर्निःशेषतः परिभोगान्न कृतनाशोपगमः तथा कर्मणोऽपि वेदनीयादेः तथाविधशुभाध्यवसायानुबन्धादुक्रमेण साकल्यतो भोगान्न कृतनाशरूपदोषप्रसङ्गः, द्विविधो हि कर्मणोऽनुभवः-प्रदेशतो विपाकतश्च, तत्र प्रदेशतः सकलमपि कर्मानुभूयते, न तदस्ति किञ्चित् कर्म यत्प्रदेशतोऽप्यननुभूतं सत् क्षयमुपयाति, ततः कथं कृतनाशदोषापत्तिः ?,

विपाकतस्तु किञ्चिदनुभूयते किञ्चिन्न, अन्यथा मोक्षाभावप्रसङ्गात्, तथाहि-यदि विपाकानुभूतित एव सर्वं कर्म क्षपणीयमिति नियमः तर्ह्यसङ्ख्यातेषु भवेषु तथाविधविचित्राध्यवसायविशेषैर्यन्नरकगत्यादिकं कर्मोपार्जितं तस्य नैरयिके मनुष्यादावेव भवेऽनुभवः, स्वस्वभवनिबन्धनत्वात् तथाविधविपाकानुभवस्य, क्रमेण च स्वस्वभवानुभवनेन वेदने नारकादिभवेषु चारित्राभावेन प्रभूततरकर्मसन्तानोपचयात् तस्यापि स्वस्वभवानुगमनेनानुभवोपगमात् कुतो मोक्षः ?,

तस्मात् सर्वं कर्म विपाकतो भाज्यं प्रदेशतोऽवश्यमनुभवनीयमिति प्रतिपत्तव्यं, एवं च न कश्चिद्दोषः, नन्वेवमपि दीर्घकालभोग्यतया तद्वेदनीयादिकं कर्मोपचितं अथ च परिणामविशेषादुपक्रमेणारादेव तदनुभवति ततः कथं न कृतनाशदोषापत्तिः ?, तदप्यसम्यक्, बन्धकाले तथाविधाध्यवसायवशादादावुपक्रमयोग्यस्यैव तेन बन्धनात्, अपिच-जिनवचनप्रामाण्यादपि वेदनीयादिकर्मणामुपक्रमो मन्तव्यः, यदाह भाष्यकृत्-

॥ १ ॥ "उदयक्खयक्खओवसमोवसमा जं च कम्मुणो भणिया।
दव्वाइं पंचगं पइ जुत्तमुवक्कमणमेत्तोवि ॥"

न चैवं मोक्षोपक्रमहेतुः कश्चिदस्ति येन तत्रानाश्वासप्रसङ्गः, यथा च न मोक्षोपक्रमहेतुः कश्चिदस्ति तथाऽन्तिमसूत्रे भावयिष्यते, ततो यदुक्तं 'वेदनीयादिवच्च कृतस्यापि कर्मक्षयस्ये'त्यादि

न तत्सम्यगुपपन्नमित स्थितं, अपर आह–ननु यदा वेदनीयादिकमतिप्रभूतं सर्वस्तोकं चायुस्तदा समधिकवेदनीयादिसमुद्घातार्थं समुद्घातमारभतां, वेदनीयादेः सोपक्रमत्वात्, यदा त्वधिकमायुः सर्वस्तोकं च वेदनीयादिकं तदा का वार्तावा ?, न खल्वायुषः समधिकस्य समुद्घाताय समुद्घातः कल्प्यते, चरमशरीरिणामायुषो निरुपक्रमत्वात् 'चरमसरीरा य निरुवक्कमा' इति वचनात्, तदयुक्तं, एवंविधभावस्य कदाचनाप्यभावात्, तथाहि–

सर्वदैव वेदनीयाद्येवायुषः सकाशादधिकस्थितिकं भवति, न तु कदाचिदपि वेदनीयादेरायुः, अथैवंविधो नियमः कुतो लभ्यते ?, उच्यते, परिणामस्वभावात्, तथाहि–इत्थंभूत एवात्मनः परिणामो येनास्यायुर्वेदनीयादेः [illegible] न तु कदाचनाप्यधिकं, ययैतस्यैवायुषः खल्वध्रुवबन्धः, तथाहि–ज्ञानावरणादीनि कर्माणि आयुर्वर्जानि सप्तापि सदैव बध्यन्ते, आयुस्तु प्रतिनियत एव काले स्वभवत्रिभागादिशेषरूपे, तत्र यैवंविधवैचित्र्यनियमे न स्वभावादतेऽपरः कश्चिदस्ति हेतुरेवमिहापि स्वभावविशेष एव नियामको द्रष्टव्यः, आह च भाष्यकृत्–

॥ १ ॥ "असमठिईणं नियमो को थेवं आउयं न सेसंति ।
परिणामसहावाओ अद्धुवबंधोवि तस्सेव ॥"

अथ विशेषपरिज्ञानाय गौतमो भगवन्तं पृच्छति–'सव्वेवि ण'मित्यादि, णमिति निश्चये सर्वेऽपि खलु केवलिनः समवध्नन्ति–समुद्घाताय प्रयतन्ते, प्रयत्नानन्तरं च सर्वेऽपि खलु केवलिनः समुद्घातं गच्छन्त ?, इति गौतमेन प्रश्ने कृते सति भगवान्निर्वचनमाह–'गोयमे'त्यादि, गौतम ! नायमर्थः समर्थः–नायमर्थः उपपन्नः, किमुक्तं भवति ?–सर्वेऽपि केवलिनः समुद्घाताय न प्रयतन्ते नापि समुद्घातं गच्छन्ति, किन्तु येषामायुषः समधिकं वेदनीयादिकं, यस्य पुनःस्वभावत एवायुषा सह समस्थितिकानि वेदनीयादीनि कर्माणि सोऽकृतसमुद्घात एव तानि क्षपयित्वा सिध्यति, तथा चाह–

सू. (६१६) *"जस्साउएण तुल्लाति, बंधणेहिं ठितीहि य ।*
भवोवग्गहकम्माइं, समुघातं से णं गच्छति ॥

वृ. 'जस्से'त्यादि, यस्य केवलिन आयुषा सह भवे–मनुष्यभवे उप–समीपेन गृह्यते–अवष्टभ्यते यैस्तानि भवोपग्रहाणि तानि च तानि कर्माणि च भवोपग्राहकर्माणि–वेदनीयनामगोत्राणि बन्धनैः–प्रदेशैः स्थितिभिश्च तुल्यानि–समानि भवन्ति स समुद्घातं न गच्छति, अकृतसमुद्घात एव तानि क्षपयित्वा स सिद्धिसौधमध्यास्ते इति भावः, उक्तं च–

॥ १ ॥ "जस्स उ तुल्लं भवइ य कम्मचउक्कं सभावतो जो य ।
सो अकयसमुग्घाओ सिज्झइ जुगवं खवेऊणं ॥"

अथायं कदाचित्को भाव उत बाहुल्यभावः ?, तत आह–

सू. (६१७) *अगंतूणं समुग्घातं, अनंता केवली जिना ।*
जरामरणविप्पमुक्का, सिद्धिं वरगतिं गता ॥

वृ. 'अगंतूण समुग्घाय'मित्यादि, अगत्वा समुद्घातं–केवलिसमुद्घातं 'सिद्धिं' चरमगतिं गता इति सम्बन्धः, कियत्सङ्ख्याका इत्याह–अनन्ताः–अनन्तसङ्ख्याकाः 'केवलिनः' केवलज्ञानदर्शनोपेताः, अनेन ये नवानामात्मगुणानामत्यन्तोच्छेदो मोक्ष इति प्रतिपन्नास्तेऽपास्ता द्रष्टव्याः,

ज्ञानस्य निरुपचरितात्मस्वभावत्वात्, तस्य च विनाशायोगाद्, अन्यथाऽऽत्मन एवाभावापत्तेः, न चात्मनो निरन्वयो विनाशः, सतःसर्वथा विनाशायोगात्, 'नासतो विद्यते भावो, नाभावो विद्यते सत' इति न्यायात्, तथा जिना–जितरागादिशत्रवः, अनेन गोशालकमतापाकरणमाह, ते हि मुक्तिपदमध्यासीनमपि न तत्त्व तो वीतरागमपि मन्यन्ते, 'अवाप्तमुक्तिपदा अपि तीर्थनिकार-दर्शनादिहागच्छन्ती'ति वचनात्, तत्त्वतो वीतरागस्य च पराभवबुद्धेरिहागमनस्य चासम्भवात्, पुनः कथंभूता इत्याह–

'जरामरणविप्रमुक्ता' जरा च मरणं च जरामरणे ताभ्यां विप्रमुक्ता जरामरणविप्रमुक्ताः, जरामरणग्रहणमुपलक्षणं तेन समस्तरोगशोकादिसांसारिकक्लेशविमुक्ता इति द्रष्टव्यं, एतेन एकान्ततो मोक्षसौख्यस्योपादेयतामाह, अन्यस्यैवंविधस्वरूपस्य स्थानस्यासम्भवात्, नहि संसारे प्रकर्षसुखप्राप्तमपि स्थानमेवंविधमस्ति, सर्वस्यापि मरणपर्यवसानत्वात्, सेधनं सिद्धिः–अशेषक-र्मांशापगमेनात्मनः स्वरूपेऽवस्थानता वरा–सर्वगतीनामुत्तमा गम्यते इति गतिर्वरगतिस्तां वरगतिरूपामित्यर्थःगताः–प्राप्ताः,

मू. (६१८) *कतिसमतिए णं भंते! आउज्जीकरणे पं० ?, गो० ! असंखेज्जसमतिए अंतो-मुहुत्तिए आउज्जीकरणे पं० !*

वृ. इह सर्वोऽपि केवली केवलिसमुद्घातं गच्छन् प्रथमत आवर्जीकरणमुपगच्छति, तथा च केवलिसमुद्घातप्रक्रियां बिभणिषुः समुद्घातशब्दव्याख्यानपुरस्सरमाह भाष्यकारः–

॥ १ ॥ "तत्थाउयअसंसाहियकम्मसमुग्घायणं समुग्घाओ।
तं गमंतुमणा पुव्वं आउज्जीकरणं उवेइ ॥"

अथावर्जीकरणमिति कः शब्दार्थः ?, उच्यते, आवर्जनमावर्जः–आत्मानं प्रति मोक्षस्या-भिमुखीकरणं आत्मनो मोक्षं प्रत्युपयोजनमिति तात्पर्यार्थः, अथवा आवर्ज्यते–अभिमुखीक्रियते मोक्षोऽनेनेति आवर्जः–शुभमनोवाक्कायव्यापारविशेषः, उक्तं च–'आवज्जणमुवओगो वावारो वा' इति, तत उभयत्रापि अतस्य तस्य करणमिति विवक्षायां च्विप्रत्ययः आवर्जीकरणं, अपरे आवर्जितकरणमित्याहुः, तत्रायं शब्दार्थः–आवर्जितो नाम अभिमुखीकृतः तथा च लोके वक्तारः "आवर्जितोऽयं मया, सम्मुखीकृत' इत्यर्थः ततश्च तथाभव्यत्वेनावर्जितस्य -मोक्षगमनं प्रत्यभि-मुखीकृतस्य करणं–क्रिया शुभयोगव्यापारणं आवर्जितकरणं,

अपरे 'आउञ्जियाकरण'मिति पठन्ति, तत्रैवं शब्दसंस्कारमाचक्षते–आयोजिकाकरणमिति, अयं चात्रान्वयार्थः–आङ् मर्यादायां आ–मर्यादया केवलिइष्ट्या योजनं–शुभानां योगानां व्यापारक-णमायोजिका, भावे वुञ्, तस्याःकरणमायोजिकाकरणः, अन्ये 'आउस्सियकरण'मिति ब्रुवते, तत्राप्यमन्वर्थः–आवश्यकेन–अवश्यंभावेन करणमावश्यककरणं, तथाहि–समुद्घातं केचित्कुर्वन्ति केचिच्च न कुर्वन्ति इदं त्वावश्यककरणं सर्वेऽपि केवलिनः कुर्वन्तीति, सम्प्रतय-स्यैवावर्जीकरणस्य कालप्रमाणनिरूपणार्थं प्रश्ननिर्वचनसूत्रे आह–

मू. (६१९) *कतिसमतिए णं भंते! केवलिसमुग्घाए पं० ?, गो० ! अट्ठसमतिते पं०, तं०–पढमे समए दंडं करेति बीए समए कवाडं करेति ततिए समए मंथं करेति चउत्थे समए लोगं पूरेति पंचमे समए लोयं पडिसाहरति छट्ठे समए मंथं पडिसाहरति सत्तमए समए कवाडं पडिसाहरति*

अट्ठमे समए दंडं पडिसाहरति, दंडं पडिसाहरेत्ता तओ पच्छा सरीरत्थे भवति।

से णं भंते! तहा समुग्घायगते किं मनजोगं जुंजति वइजोगं जुंजति कायजोगं जुंजति?, गो० ! नो मनजोगं जुंजति नो वइजोगं जुंजति कायजोगं जुंजति,

कायजोगे णं भंते! जुंजमाणे किं ओरालियकायजोगं जुंजति ओरालियमीसासरीकायजो० किं वेउव्वियसरीरकाययोगं वेउव्वियमीसासरीरकायजोगं० किं आहारगसरीरका० आहारगमीसासरीका० किं कम्मगसरीरका० ?,

गो०! ओरालियसरीरकायजोगंपि जुंजति ओरालियमीसासरीकायजोगंपि जुंजइ, नो वेउव्वियसरीरका०: नो वेउव्वियसरीरका० नो वेउव्वियमीसा० नो आहारसरीका० नो आहारगमीसा० कम्मगसरीरकायजोगंपि जुंजति, पढमट्ठमेसु समएसु ओरालियसरीरकायजोगं जुंजति बितियछट्ठसत्तमेसु ओरालियमीसासरीरकायजोगं जुंजति, ततियचउत्थपंचमेसु समएसु कम्मगसरीरकायजोगं जुंजति

वृ. 'कइसमइए ण'मित्यादि सुगमं, आवर्जीकरणानन्तरं चाव्यवधानेन केवलिसमुद्घातमारभते, स च कतिसामयिक इत्याशङ्कायां तत्समयनिरूपणार्थमाह–'कइसमइए ण'मित्यादि सुगमं, तत्र यस्मिन् समये यत्करोति तद्दर्शयति–'तंजहा–पढमे समए'इत्यादि, इदमपि सुगमं, प्रागेव व्याख्यातत्वात्, नवरमेवं भावार्थो - यथाऽऽद्यैश्चतुर्भिः समयैःक्रमेणात्मप्रदेशानां विस्तारणं तथैव प्रतिलोमं क्रमेण संहरणमिति, उक्तं चैतदन्यत्रापि–

॥ १ ॥ "उड्ढंअहो य लोगंतगामिणं सो सदेहविक्खंभं।
पढमे समयंमि दंडं करेइ बिइयंमि य कवाडं ॥

॥ २ ॥ तइयसमयंमि मंथं चउत्थए लोगपूरणं कुणइ।
पडलोमं साहरणं काउं तो होइ देहत्थो ॥"

अस्मिंश्च समुद्घाते क्रियमाणे सति यो योगो व्याप्रियते तमभिधित्सुराह–'से णं भंते!' इत्यादि, तत्र मनोयोगं वाग्योगं वा न व्यापारयति, प्रयोजनाभावात्, आह च धर्म्मसारमूलटीकायां हरिभद्रसूरिः–"मनोवचसी तदा न व्यापारयति, प्रयोजनाभावात्" काययोगं पुनर्युञ्जान औदारिककाययोगमौदारिकमिश्रकाययोगं कार्मणकाययोगं वा युनक्ति, न शेषं लब्ध्युपजीवनाभावेन शेषस्य काययोगस्यासम्भवात्, तत्र प्रथमे अष्टमे च समये केवलमौदारिकमेव शरीरं व्याप्रियते इत्यौदारिककाययोगः, द्वितीये षष्ठे सप्तमे च समये कार्मणशरीरस्यापि व्याप्रियमाणत्वात् औदारिकमिश्रकाययोगः, तृतीयचतुर्थपञ्चमेषु तु समयेषु केवलमेव कार्मणशरीरव्यापारभागिति कार्मणकाययोगः, आह च भाष्यकृत्–

॥ १ ॥ "न किर समुग्घातगतो मनवइजोगप्पयोयणं कुणइ।
ओरालियजोगं पुण जुंजइ पढमट्ठमे समए ॥

॥ २ ॥ उभयव्वावाराओ तम्मीसं बीयछट्ठसत्तमए।
तिचउत्थपंचमे कम्मगं तु तम्मत्तचेट्ठाओ ॥"

–अत्रैव विशेषपरिज्ञानायाह–

मू. (६२०) *से णं भंते! तहा समुग्घातगते सिज्झति बुज्झति मुच्चति परिनिव्वाति*

सव्वदुक्खाणं अंतं करेति ?, गो० ! नो इणट्ठे समट्ठे, से णं भततो पडिनियत्तति पडिनियत्तित्ता ततो पच्छा मनजोगंपि जुंजति वइजोगंपजुंजइ कायजोगंपि जुंजति,

मनजोगं जुंजमाणे किं सच्चमणजोगं जुंजति मोसमणजोगं जुंजति सच्चामोसमणजोगं जुंजति असच्चामोसमणजोगं जुंजति ?, गो० ! सच्चमणजो- नो मोसमणजो० नो सच्चामोसमणजोगं जुंजति असच्चामोसमणजोगं जुंजति,

वतिजोगं जुंजमाणे कं सच्चवइजोगं जुंजति मोसवइजोगं जुं० सच्चामोसवइजोगं असच्चा-मोसवइजो० ?, गो० ! सच्चवतिजो० नो मोसवइजो० नो सच्चामोसवतिजो० असच्चामोसवइजोगंपि जुंजति, कायजोगं जुंजमाणे आगच्छेज्जा वा गच्छेज्जा वा चिट्ठेज्जा वा निसीएज्ज वा तुयट्टेज्ज वा उल्लंघेज्ज वा पलंघेज्ज वा पडिहारियं पीढफलगसेज्जासंथारगं पच्चप्पिणेज्जा ।

वृ. 'से णं भंते !' इत्यादि, स भदन्त ! केवली तथा-दण्डकपाटादिक्रमेण समुद्घातं गतःसन् सिद्धति निष्ठितार्थो भवति ?, स च 'वर्त्तमानसामीप्ये वर्त्तमानवद्वे'ति वचनात् सेत्स्यन्नपि व्यवहारत उच्यते, तत आह-**बुध्यत**-अवगच्छति केवलज्ञानेन यथाऽहं निश्चयतो निष्ठितार्थो भविष्यामि निःशेषकर्मांशापगमतः तत आह-मुच्यतेऽशेषकर्मांशैरिति गम्यते, मुच्यमानश्च कर्माणुवेदनापरितापरहितो भवति तत आह-परिनिर्वाति-सामस्त्येन शीतीभवति, समस्तमेतदेकेन पदयेण स्पष्टयति-सर्वदुःखानामन्तं करोतिती, भगवानाह-गौतम ! नायमर्थः समर्थो-नायमर्थः सङ्गतो यः समुद्घातं गतः सर्वदुःखानामन्तं करोतीति, योगनिरोधस्याद्याप्यकृतत्वात्, सयोगस्य च वक्ष्यमाणयुक्त्या सिध्यभावादिति भावः, ततः किं करोतीत्यत आह-

'से ण'मित्यादि, सः-अधिकृकतसमुद्घातगतः णमिति वाक्यालङ्कारे ततः समुद्घातात् प्रतिनिवर्त्तते, प्रतिनिवर्त्त्य च ततः-प्रतिनिवर्त्तनात् पश्चादनन्तरं मनोयोगमपि वाग्योगमपि काययोगमपि युनक्ति-व्यापारयति, यतः स भगवान् भवधारणीयकर्मसु नामगोत्रवेदनीयेष्वचिन्त्य-माहात्म्यसमुद्घातवशतः प्रभूतेष्वायुषा सह समीकृतेष्वप्यन्तर्मुहूर्त्तभाविपरमपदत्वतस्तस्मिन् काले यद्यनुत्तरोपपातिकादिना देवेन मनसा पृच्छ्यते तर्हि व्याकरणाय मनःपुद्गलान् गृहीत्वा मनोयोगं युनक्ति, तमपि सत्यमसत्यामृषारूपं वा, मनुष्यादिना पृष्टः सन्नपृष्टो वा कार्यवशतो वाक्पुद्गलान् गृहीत्वा वाग्योगं तमपि सत्यमसत्यामृषा वा, न शेषान् वाग्मनसोर्योगान्, क्षीणरागादित्वात्, आगमनादौ चौदारिकादिकाययोगं, तथाहि-

भगवान् कार्यवशतः कुतश्चित् स्थानात् विवक्षिते स्थाने आगच्छेत्, यदिवा क्वापि गच्छेत्, अथवा तिष्ठेत्-ऊर्ध्वस्थानेन वाऽवतिष्ठेत् निषीदेद्वा तथाविधश्रमापगमाय त्वग्वर्त्तनं वा कुर्यात्, अथवा विवक्षिते स्थाने तथाविधसम्पातिमसत्त्वाकुलां भूमिवलोक्य तत्परिहाराय जन्तुरक्षानिमित्त-मुल्लङ्घनं प्रलङ्घनं वा कुर्यात्, तत्र सहजात् पादविक्षेपान्नागधिकतरः पादविक्षेपः उल्लङ्घनं स एवातिविकटः प्रलङ्घनं, यदिवा प्रातिहारिकं पीठफलकशय्यासंस्तारकं प्रत्यर्पयेत्, यस्मादानीतं तस्मै समर्पयेत्, इह भगवता आर्यश्यामेन प्रातिहारिकपीठफलकादीनां प्रत्यर्पणमेवोक्तं ततोऽवसीयते नियमादन्तर्मुहूर्त्तावशेषायुष्क एवावर्जीकरणादिकमारभते, न प्रभूतावशेषायुष्कः, अन्यथा ग्रहणस्यापि सम्भवात्तदप्युपादीयेत, एतेन यदाहुरेके-

'जघन्यतोऽन्तर्मुहूर्त्ते शेषे समुद्घातमारभते उत्कर्षतः षट्सु मासेषु शेषेष्वि'ति तदपास्तं

द्रष्टव्यं, षट्सु मासेषु कदाचिदपान्तराले वर्षाकालसम्भवात् तन्निमित्तं पीठफलकादीनामादानमप्युपपद्येत, न च तत्सूत्रसम्मतमिति तत्प्ररूपणमुत्सूत्रमवसेयं, एतच्चोत्सूत्रं आवश्यकेऽपि समुद्घातानन्तरमव्यवधानेन शैलेश्यभिधानात्, (यतः) तत्सूत्रं

॥ १ ॥ "दण्डकवाडे मंथंतरे य साहारणा सरीरत्थे ।
भासाजोगनिरोहे सेलेसी सिज्झणा चेव ॥"

यदि पुनरुत्कर्षतः षण्मासरूपमपान्तरालं भवेत्ततस्तदप्यभिधीयेत, न चोक्तं, तस्मादेव अयुक्तमेतदिति, तथा चाह भाष्यकारः –

॥ १ ॥ "कम्मलहुयाए समओ भिन्नमुहुत्तावसेसओ कालो ।
अन्ने जहन्नमेयं छम्मासुक्कोसमिच्छंति ॥
॥ २ ॥ ततोऽनंतरसेलेसीपडिवण्णओ जं च पाडिहारीणं ।
पच्चप्पणमेव सुए इहरा गहणंपि होज्जाहि ॥"

अत्र कर्म्मलघुतानिमित्तं समुद्घातस्य समयः–अवसरो भिन्नमुहूर्त्तविशेषकालः, शेषं सुगमं, तदेवमन्तर्मुहूर्त्तकालं यथायोगं योगत्रयव्यापारभाक् केवली भूत्वा तदनन्तरमत्यन्ताप्रकम्पं लेश्यातीतं परमनिर्जराकारणं ध्यानं प्रतिपित्सुरवश्यं योगनिरोधायोपक्रमते, योगे सति यथोक्तरूपस्य ध्यानस्यासम्भवात्, तथाहि–योगपरिणामो लेश्या, तदन्वयव्यतिरेकानुविधानात्, ततो यावद्योगस्तावदवश्यंभाविनी लेश्येति न लेश्यातीतध्यानसम्भवः, अपिच–यावद्योगस्तावत्कर्मबन्धोऽपि,

'जोगा पयडिपएसं ठिइअनुभागं कसायओ कुणइ' इति वचनात्, केवलं स कर्म्मबन्धः केवलयोगनिमित्तत्वात् समयत्रयावस्थायी, तथाहि–प्रथमसमये कर्म बध्यते, द्वितीयसमये वेद्यते, तृतीये तु समये तत्कर्माकर्मीभवति, तत्र यद्यपि समयद्वयरूपस्थितिकानि कर्माणि क्रियन्ते, पूर्वाणि २ कर्माणि प्रलयमुपगच्छन्ति, तथापि समये समये सन्ततया कर्मादाने प्रवर्त्तमाने सति न मोक्षः स्याद्, अथ चावश्यं मोक्षं गन्तव्यं–तस्मात् कुरुते स योगनिरोधमिति, उक्तं च–

॥ १ ॥ "स ततो योगनिरोधं करोति लेश्यानिरोधमभिकाङ्क्षन् ।
समयस्थितिं च बन्धं योगनिमित्तं स निरुरुत्सुः ॥
॥ २ ॥ समये समये कर्मादाने सति सन्ततेर्न मोक्षः स्यात् ।
यद्यपि हि विमुच्यन्ते स्थितिक्षयात् पूर्वकर्म्माणि ॥
॥ ३ ॥ नाकर्मणो हि वीर्यं योगद्रव्येण भवति जीवस्य ।
तस्यावस्थानेन तु सिद्धः समयस्थितेर्बन्धः ॥"

अत्र बन्धस्य समयमात्रस्थितिकता बन्धसमयतिरिक्त्य वेदितव्या, भाष्यमप्येनं पूर्वोक्तं सकलमपि प्रमेयं पुष्णाति, तथा च तद्वतो ग्रन्थः–

॥ १ ॥ "विणिवित्तसमुग्घाओ तिन्निवि जोगे जिनो पउंजिज्जा ।
सद्धमसद्धामोसं च सो मणं तह वइजोगं ॥
॥ २ ॥ ओरालियकाययोगं गमणाई पाडिहारियाणं वा ।
पच्चप्पणं करेज्जा जोगनिरोहं तओ कुणइ ॥
॥ ३ ॥ किन्न सयोगो सिज्झइ ? स बंधहेउत्ति जं सजोगोऽयं ।

न समेइ परमसुक्खं स निज्जराकारणं परमं ॥''

–अत एवाह–

मू. (६२१) *से णं भंते ! तहा सजोगी सिज्झति जाव अंतं करेति ?, गो० ! नो इणट्ठे समट्ठे, से णं पुव्वमेव सण्णिस्स पंचिंदियपज्जत्तयस्स जहन्नजोगिस्स हेट्ठा असंखेज्जगुणपरिहीणं पढमं मनजोगं निरुंभति, ततो अनंतरं बेइंदियपज्जत्तगस्स जहन्नजोगिस्स हेट्ठा असंखिज्ज-गुणपरिहीणं दोच्चं वतिजोगं निरुंभति, ततो अनंतरं च णं सुहुमस्स पणगजीवस्स अपज्जत्तयस्स जहन्नजोगिस्स हेट्ठा असंखेज्जगुणपरिहीणं तच्चं कायजोगं निरुंभति,*

से णं एतेण उवाएणं –पढमं मनजोगं निरुंभति मनजोगं निरुंभित्ता वतिजोगं निरुंभति वयजोगं निरुंभित्ता कायजोगं निरुंभइ कायजोगं निरुंभित्ता जोगनिरोहं करेति जोगनिरोहं करेत्ता अजोगतं पाउणति अजोगयं पाउणित्ता ईसिं हस्सपंचक्खरुच्चारणद्धाए असंखेज्जसमइयं अंतोमुहुत्तियं सेलेसिं पडिवज्जइ, पुव्वरइयगुणसेढीयं च णं कम्मं, तीसे सेलेसिमद्धाए असंखेज्जाहिं गुणसेढीहिं असंखेज्जे कम्मखंधे खवयति खवइत्ता वेदनिज्जाउनामगोत्ते इच्चेते वत्तारि कम्मंसे जुगवं खवेति, जुगवं खवेत्ता ओरालियतेयाकम्मगाइं सव्वाहिं विप्पजहणाहिं विप्पजहति, विप्पजहित्ता उज्जुसेढीपडिवण्णो अफुसमाणगतीए एगसमएणं अविग्गहेणं उड्ढं गंता सागारोवउत्ते सिज्झइ बुज्झइ० तत्थ सिद्धो भवति,

ते णं तत्थ सिद्धा भवंति असरीरा जीवघना दंसणनाणोवउत्ता निट्ठियट्ठा नीरया निरेयणा वितिमिरा विसुद्धा सासयमनागयद्धं कालं चिट्ठंति, से केणट्ठेणं भंते ! एवं वुच्चइ ते णं तत्थ सिद्धा भवंति असरीरा जीवघना दंसणणनणोवउत्ता निट्ठियट्ठा नीरया निरेयणा वितिमिरा विसुद्धा सासयमनागयद्धं कालं चिट्ठंति ?,

गो० ! से जहानामए बीयाणं अग्गिदड्ढाणं पुनरपि अंकुरुप्पत्ती ण भवति, एवामेव सिद्धाणवि कम्मबीएसु दड्ढेसु पुनरपि जम्मुप्पत्ती न भवति, से तेणट्ठेणं गोतमा ! एवं वु०–ते णं तत्थ सिद्धा भवंति असरीरा जीवघना दंसणनाणोवउत्ता निट्ठियट्ठा नीरया निरेयणा वितिमिरा विसुद्धा सासयमनागतद्धं कालं चिट्ठंतित्ति–

वृ. 'से णं भंते ! तहा सजोगी सिज्झइ' इत्यादि, सुगमं, योगनिरोधं कुर्वन् प्रथमं मनोयोगं निरुणद्धि, तच्च पर्याप्तमात्रसंज्ञिपञ्चेन्द्रियस्य प्रथमसमये यावन्ति मनोद्रव्याणि यावन्मात्रश्च तद्व्यापारः तस्मादसङ्ख्येयगुणहीनं मनोयोगं प्रतिसमयं निरुन्धानोऽसङ्ख्येयैः समयैः साकल्येन निरुणद्धि, उक्तं च–

॥ १ ॥ ''पज्जत्तमेत्तसण्णिस्स जत्तियाइं जहन्नजोगिस्स ।
होंति मनोदव्वाइं तव्वावारो य जम्मत्तो ॥

॥ २ ॥ तदसंखगुणविहीणं समए समए निरुंभमाणो सो ।
मनसो सव्वनिरोहं करेअसंखेज्जसमएहिं ॥''

एतदेवाह–'से णं भंते !' इत्यादि, सः–अधिकृतकेवली योगनिरोधं चिकीर्षन् पूर्वमेव संज्ञिनः पर्याप्तस्य जघन्ययोगिनः सत्कस्य मनोयोगस्येति गम्यतेऽधस्तात् असङ्ख्येयगुण परिहीनं समये २ निरुन्धानोऽसङ्ख्येयैः समयैः साकल्येनेति गम्यते प्रथमं मनोयोगं निरुणद्धि, 'ततोऽनंतरं

च ण'मित्यादि, तस्मात् मनोयोगनिरोधादनन्तरं चशब्दो वाक्यसमुच्चये णमिति वाक्यालङ्कारे द्वीन्द्रियस्य पर्याप्तस्य जघन्ययोगिनः सत्कस्य वाग्योगस्येति गम्यतेऽधस्तात् वाग्योगं असङ्ख्येयगुणपरिहीनं समये समये निरुन्धानोऽसङ्ख्येयैः समयैः साकल्येनेति गम्यते द्वितीयं वाग्योगं निरुणद्धि, आह च भाष्यकृत–

॥ १ ॥ "पज्जत्तमित्तबेंदिय जहन्नवइजोगपज्जवा जे उ ।
तदसंखगुणविहीणं समये समये निरुंभंतो ॥
सव्ववइजोगरोहं संखाईएहिं कुणइ समएहिं" 'ततोऽनंतरं च ण'मित्यादि, ततो वाग्योगादनन्तरं च णं प्राग्वत् सूक्ष्मस्य पनकजीवस्य अपर्याप्तकस्य प्रथमसमयोत्पन्नस्येति भावार्थः जघन्ययोगिनः–सर्वाल्पवीर्यस्य पनकजीवस्य यः काययोगस्तस्याधस्तादसङ्ख्येयगुणहीनं काययोगं समये समये निरुन्धन् असङ्ख्येयैः समयैः समस्तमपीति गम्यते तृतीयं काययोगं निरुणद्धि, तं च काययोगं निरुन्धानः सूक्ष्मक्रियमप्रतिपाति ध्यानमधिरोहति, तत्सामर्थ्याच्च वदनोदरादिविवरपूरणेन संकुचितदेहत्रिभागवर्त्तिप्रदेशो भवति, तथा चाह भाष्यकृत–

॥ १ ॥ "तत्तो य सुहुमपनगस्स पढमसमयोववण्णस्स ॥
जो किर जहन्नजोगी तदसंखेज्जगुणहीणमेक्केक्कं ।
समएहिं रुंभमाणो देहतिभागं च मुंचंतो ॥
रुंभइ स कायजोगं संखाईएहिं चेव समएहिं' काययोगनिरोधकालानन्तरे चरमे अन्तर्मुहूर्त्ते वेदनीयादित्रयस्य प्रत्यकं स्थितिः सर्वापवर्त्तनया अपवर्त्तायोग्यावस्थासमाना क्रियते गुणश्रेणिक्रमविरचितप्रदेशा, तद्यथा–प्रथमस्थितौ स्तोकाः प्रदेशाः, द्वितीयस्यां स्थितौ ततोऽसङ्ख्येयगुणाः, तृतीयस्यां ततोऽप्यसङ्ख्येयगुणाः, एवं तावद्वाच्यं यावच्चरमा स्थितिः, स्थापना, एताः प्रथम समयगृहीतदलिकनिर्वर्त्तिता गुणश्रेणयः, एवं प्रतिसमयगृहीतदलिकनिर्वर्त्तिताः कर्मन्यस्य प्रत्येकसमङ्ख्येया द्रष्टव्याः अन्तर्मुहूर्त्तसमयानामसङ्ख्यायत्वात्, आयुषस्तु स्थितिर्यथावद्धैवावतिष्ठते, सा च गुणश्रेणिक्रमविपरीतक्रमदलिकरचना,

अयं च सर्वोऽपि मनोयोगादिनिरोधो मन्दमतिसुखावबोधार्थमाचार्येण स्थूरदृष्ट्या प्रतिपादितः, यदि पुनः सूक्ष्मदृष्ट्या तत्स्वरूप जिज्ञासा भवति तदा पञ्चसङ्ग्रहटीका निभालनीया, तस्यामिति निपुणं प्रपञ्चेन तस्याभिधानाद्, इह च ग्रन्थगौरवभयान्नास्माभिरभिहितः, 'सेण'मित्यादि, सोऽधिकृतः केवली णमिति पूर्ववत् एतेनानन्तरोदितेनोपायेन–उपायप्रकारेण, शेषं सुगमं, यावदयोगतां 'पाउणइ'त्ति प्राप्नोति, अयोगतामाप्तयभिमुखो भवति इति भावार्थः, अयोगतां च प्राप्य– अयोगतामाप्तयभिमुखो भूत्वा

'ईसिं'ति स्तोकं कालं शैलेशीं प्रतिपद्यते इति सम्बन्धः, कियता कालेन विशिष्टां इत्यत आह - ह्रस्वपञ्चाक्षरोच्चराणाद्धया, किमुक्तं भवति ? –नातिद्रुतं नातिविलम्बितं किन्तु मध्यमेन प्रकारेण यावता कालेन इ्अणनम इत्येवंरूपाणि पञ्चाक्षराणि उच्चार्य्यन्ते तावता कालेन विशिष्टयमिति. एतावान् कालः किंसमयप्रमाण इति निरूपणार्थमाह–असङ्ख्येयसामयिकां–असङ्ख्येयसमयप्रमाणां, यद्यासङ्ख्येयसमयप्रमाणं तच्च जघन्यतोऽप्यन्तर्मुहूर्त्तप्रमाणं तत एषाऽप्यन्तर्मुहूर्त्तप्रमाणेति ख्यापनायाह –

'आन्तर्मुहूर्त्तिकीं शैलेशी'मिति, शीलं–चारित्रं तच्चेह निश्चयतः सर्वसंवररूपं तद् ग्राह्यं, तस्यैव सर्वोत्तमत्वात्, तस्येशः शीलेशः तस्य याऽवस्था सा शैलेशी तां प्रतिपद्यते, तदानीं च ध्यानं ध्यायति व्यवच्छिन्नक्रियमप्रतिपाति, उक्तं च–

॥ १ ॥ "सीलं व समाहाणं निच्छयओ सव्वसंवरो सो य ।
तस्सेसो सीलेसो सेलेसी होइ तदवत्था ॥

॥ २ ॥ बहस्सक्खराइं मज्झेण जेण कालेण पंच भण्णंति ।
अच्छइ सेलेसिगतो तत्तियमित्तं तओ कालं ॥

॥ ३ ॥ तनुरोहारंभाओ झायइ सुहुमकिरियानियट्टिं सो ।
वोच्छिन्नकिरियमप्पडिवाई सेलेसिकालंमि ॥"

न केवलं शैलेशीं प्रतिपद्यते पूर्वरचितगुणश्रेणीकं च वेदनीयादिकं कर्म अनुभवितुमिति शेषः, प्रतिपद्यते च तत्पूर्वं काययोगनिरोधगते चरमेऽन्तर्मुहूर्ते रचिता गुणश्रेणयः–प्राग्वनिर्दिष्टस्वरूपा यस्य तत्तथा, ततः किं करोतीत्यत आह–

'तीसे सेलेसिअद्धाए' इत्यादि, तस्यां शैलेश्यद्धायां वर्त्तमानोऽसङ्ख्येयाभिर्गुणश्रेणीभिः पूर्वनिर्वर्त्तिताभिः प्रापिता ये कर्मत्रयस्य पृथक् प्रतिसमयसमङ्ख्येयाः कर्मस्कन्धास्तान् 'क्षपयन्' विपाकतः प्रदेशतो वा वेदनेन निर्जरयन् चरमे समये वेदनीयमायुर्नाम गोत्रमित्येतान् चतुरः 'कर्मांशान्' कर्मभेदान् युगपत् क्षपयति, युगपच्च क्षपयित्वा ततोऽनन्तरसमये औदारिकतैजसकार्मण-रूपाणि त्रीणि शरीराणि

'सव्वाहिं विप्पजहणाहिं' इति सर्वैर्विप्रहानैः, सूत्रे स्त्रीत्वं प्राकृतत्वात्, विप्रजहाति, किमुक्तं भवति ?--यथा प्राक् देशतस्त्यक्तवान् तथा न त्यजति, किन्तु सर्वैः प्रकारैः परित्यजतीति, उक्तं

"ओरालियाइ चयइ सव्वाहिं विप्पजहणाहिं जं भणियं ।
निस्सेस तहा न जहा देसच्चाएण सो पुव्विं ॥"

परित्यज्य च तस्मिन्नेव समये कोशबन्धविमोक्षणसहकारिसमुत्थस्वभावविशेषादेरण्डफलमिव भगवानपि कर्मसम्बन्धविमोक्षणसहकारिसमुत्थस्वभावविशेषदूर्ध्वं लोकान्ते गत्वेति सम्बन्धः, उक्तं च–

॥ १ ॥ "एरण्डफलं च जहा बंधच्छेदेरियं दुयं जाति ।
तएकम्म बंधणछेदणेरितो जाति सिद्धोवि ॥"

कथं गच्छतीत्यत आह–'अविग्रहेण' विग्रहस्याभावोऽविग्रहः तेन एकेन समयेनास्पृशन्, समयान्तरप्रदेशान्तरास्पर्शनेनेत्यर्थः, ऋजुश्रेणिं च प्रतिपन्नः, एतदुक्तं भवति–यावत्स्वाकाशप्रदेशेष्विहावगाढस्तावत एव प्रदेशानूर्ध्वमृजुश्रेण्याऽवगाहमानो विवक्षितात्च समयादन्यत् समयान्तरमस्पृशन् गत्वा, तथा चोक्तमावश्यकचूर्णौ· "जत्तिए जीवोऽवगाढो तावइयाए ओगाहणाए उड्ढं उज्जुगं गच्छति न वंकं, बिइयं च समयं न फुसइ" इति, भाष्यकारोऽप्याह

॥ १ ॥ "रिउसेढिं पडिवन्नो समयपएसंतरं अफुसमाणो ।
एगसमएणं सिज्झइ अह सागरोवउत्तो सो ॥"

इत्थमूर्ध्वं गत्वा किमित्याह--साकारोपयुक्तः सन् सिध्यति--निष्ठितार्थो भवति, सर्वा

हि लब्धयः साकारोपयोगोपयुक्तस्य उपजायते नाकाकारोपयुक्तस्य, सिद्धिरप्येषा सर्वलब्ध्युत्तमा लब्धिरिति साकारोपयोगोपयुक्तस्योपजायते, आह च-

॥ १ ॥ "सव्वाओ लद्धीओ जं सागारोवओगलाभाओ ।
तेणह सिद्धिलद्धी उप्पज्जइ तदुवउत्तस्स ॥"

तदनन्तरं तु क्रमेणोपयोगप्रवृत्तिः । तदेवं यथा केवली सिद्धो भवति तथा प्रतिपादितमिदानीं सिद्धा यथास्वरूपास्तत्रावतिष्ठन्ते तथा प्रतिपादयति–'ते णं तत्थ सिद्धा भवंती'त्यादि, ते–अनन्तरोक्तक्रमसम्भूता णमिति वाक्यालङ्कारे तत्र–लोकान्ते सिद्धा भवन्ति, अशरीराः–औदारिकादिशरीरविप्रमुक्ताः तेषां सिद्धत्वप्रथमसमये एव सर्वात्मना त्यक्तत्वात्, जीवघनाः–निचितीभूतजीवप्रदेशरूपाः, सूक्ष्मक्रियाऽप्रतिपातिध्यानप्रतिपत्तिकाले एव तत्सामर्थ्यतो वदनोदरादिविवराणामापूरितत्वात्, दर्शनज्ञानोपयुक्ता जीवस्वाभाव्यात्, निष्ठितार्थाः कृतकृत्यत्वात्, नीरजसो बध्यमानकर्माभावात्, निरेजनाः कम्पक्रियानिमित्तविरहात्, वितिमिराः कर्मतिमिरापगमात्, विशुद्धास्त्रिविधकर्मक्षयादशेषादेमार्गप्रतिपत्त्या अत्यन्तशुद्धीभूतत्वात्, ते चेत्थंभूतास्तत्र गतास्तिष्ठन्ति शाश्वतंयथा भवत्येवं 'अनागताद्धं' अनागता भाविनी अद्धा समस्ता यत्र सोऽनागताद्धः तं कालं यावत्, अत्रैव मन्दमतिविबोधायाक्षेपपरिहारावाह–

'से केणट्ठेणं भंते !' इत्यादि सुगमं, नवरं 'कम्मबीएसु'त्ति कर्म्मरूपाणि बीजानि-जन्मनः कारणानि कर्मबीजानि तेषु दग्धेषु–निर्मूलकाषंकषितेषु पुनरपि–भूयो जन्मन उत्पत्तिर्न भवति, कारणमन्तरेण कार्यासम्भवात्, अथ तान्येव कर्माणि भूयः कस्मान्न भवन्ति ?, उच्यते, रागादीनामभावात्, रागादयो ह्यायुःप्रभृतीनां कर्मणां कारणं, न च ते तेषां सन्ति, प्रागेव क्षीणमोहावस्थायां क्षीणत्वात्, न च तेऽपि क्षीणा अपि भूयः प्रादुष्यन्ति, सहकारिकारणाभावात्, रागादीनां ह्युत्पत्तौ परिणामिकारणमात्मा सहकारिकरणं रागादिवेदनीयं कर्म, न चोभयकारणजन्यं कार्यमेकतरस्याप्यभावे भवति, अन्यथा तस्याकारणत्वप्रसङ्गात्, न च सिद्धानां रागादिवेदनीयं कर्मास्ति, तस्य प्रागेव शुक्लध्यानाग्निना भस्मीकृतत्वात्, न च वाच्यमत्रापि स एव प्रसङ्गः, यथा तदपि रागादिवेदनीयं कर्म भूयः कस्मान्न भवतीति ?, तत्कारणस्य सङ्क्लेशस्याभावात्, रागादिवेदनीयानां हि कर्मणामुत्पत्तौ रागादिपरिणतिरूप; सङ्क्लेशः,

'जं वेयइ से बंधइ' इति, न च रागादिवेदनीयकर्मविनिर्मुक्तस्य तथाभूतं सङ्क्लेशोत्थानमस्ति, ततस्तदभावाद्रागादिवेदनीयकर्माभावः, तदभावाच्च भूयो रागादीनामभावः, तथा च रागादीनामेव पुनरुत्पत्तिचिन्तायां धर्म्मसङ्ग्रहण्यामुक्तम्–

॥ १ ॥ 'खीणा य ते न होंती पुनरवि सहकारिकारणाभावा ।
नहि होइ संकिलेसो तेहिं विउत्तस्स जीवस्स ॥
॥ २ ॥ तयभावा न य बंधो तप्पाउग्गस्स होइ कम्मस्स ।
तदभावे तदभावो सव्वद्धं चेव विन्नेओ ॥"

इति, ततो रागादीनामभावादायुःप्रभृतीनां कर्म्मणां पुनरुत्पादाभावस्तदभावाच्च न भूयो जन्मोत्पत्तिः, अत एवोक्तमन्यत्रापि–

॥ १ ॥ "दग्धे बीजे यथाऽत्यन्तं, प्रादुर्भवति नाङ्कुरः ।

कर्मबीजे तथा दग्धे, न रोहति भवाङ्कुरः ॥"

उपसंहारमाह-'से एएणट्ठेण'मित्यादि, एतदेव सिद्धस्वरूपं परममङ्गलभूतं शास्त्रस्य शिष्यप्रशिष्यादिवंशगतत्वेनाव्यवच्छित्तिर्भूयादित्यन्तमङ्गलत्वेनोपसंहारव्याजत आह-

मू. (६२२) *'निच्छिन्नसव्वदुक्खा जाइजरामरणबंधनविमुक्का ।*
सासयमव्वाबाहं विहंति सुही सुहं पत्ता ॥'
(पन्नवणाए भगवतीए समुग्घायपयं छत्तीसतिमं पयं समत्तं)

वृ. 'निच्छिण्णे'त्यादि, निस्तीर्णं सर्वदुःखं यैस्ते तथा, सकलसांसारिकदुःखपारगता इत्यर्थः, कुत इत्याह-"जातिजरामरणबन्धनविप्रमुक्ताः' जातिश्च जरा च मरणं च बन्धनानि च-ज्ञानावरणीयादीनि कर्माणि तैर्विप्रमुक्ताः, अत्र हेतौ प्रथमा, यतो जातिजरामरणबन्धविप्रमुक्ताः ततो निस्तीर्णसर्वदुःखाः, ते इत्थंभूताः परमस्वास्थ्यरूपं 'शाश्वतं' शश्वद्भावि 'अव्याबाधं' बाधारहितं, रागादयो हि न तद्बाधितुं प्रभविष्णवो न च तेषां ते सन्तीत्यनन्तरमेव भावितं, सुखं प्राप्ताः, अत एव सुखिनः सन्तस्तिष्ठन्ति ॥

पदं - ३६ - समाप्तम्

॥ १ ॥ "नम त नयमङ्गकलितं प्रमाणबहुलं विशुद्धसद्बोधम् ।
जिनवचनमन्यतीर्थिककुमतिनिरासैकदुर्ललितम् ॥
॥ २ ॥ जयति हरिभद्रसूरिष्टीकाकृद्विवृतविषममावार्थः ।
यद्वचनवशादहमपि जातो लेशेन विवृतिकरः ॥
॥ ३ ॥ कृत्वा प्रज्ञापनाटीकां पुण्यं यदवाप मलयगिरिरनघम् ।
तेन समस्तोऽपि जनो लभतां जिनवचनसद्बोधम् ॥"

प्रज्ञापनाउपाङ्गसूत्रं-२समाप्तम्

પ્રજ્ઞાપનાઉપાઙ્ગસૂત્રં ૧ થી૧૪ ''૫૬'' ભાટે જુઓ ભાગ. ૧૦
૧૫થી૩૬ ''૫૬'' ભાટે જુઓ ભા. ૧૧

૧૫ | ચતુર્થ ઉપાઙ્ગસૂત્રં પ્રજ્ઞાપના સમાપ્તમ્

મુનિ દીપરત્નસાગરેણ સંશોધિતા સમ્પાદિતા પ્રજ્ઞાપનાઉપાઙ્ગસૂત્રસ્ય
મલયગિરિ આચાર્યેણ વિરચિતા ટીકા પરિસમાપ્તા ।

* * *